आनन्दाश्रममुद्रणालयस्थग्रन्थानां सूचीपत्रम् ।

ग्रन्थनाम ।	मूल्यम् । रू०	आ०
१ गणेशाथर्वशीर्षम्—सभाष्यम् ।	०	६
२ रुद्राध्यायः—सायणाचार्यभट्टभास्करप्रणीतभाष्याभ्यां संवलितः।	१	६
३ पुरुषसूक्तम्—सायणभाष्योपेतम् ।	०	४
४ योगरत्नाकरः—वैद्यकशास्त्रीयग्रन्थोऽतीव पुरातनः । ...	५	०
५ ईशावास्योपनिषत्—सटीकशांकरभाष्याद्युपेता । ...	०	१४
६ केनोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	१	०
७ काठकोपनिषत्—टीकाद्वयसहितशांकरभाष्योपेता । ...	१	४
८ प्रश्नोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	१	०
९ मुण्डकोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	०	१०
१० माण्डूक्योपनिषत्-सटीकशांकरभाष्यगौडपादीय[illegible]द्युपेता।	२	५
११ ऐतरेयोपनिषत्—सटीकशांकरभाष्याद्युपेता । ...	१	४
१२ तैत्तिरीयोपनिषत्—सटीकशांकरभाष्याद्युपेता । ...	१	१२
१३ तैत्तिरीयोपनिषद्भाष्यवार्तिकम्—सुरेश्वराचार्यकृतं सटीकम् ।	२	२
१४ छान्दोग्योपनिषत्—सटीकशांकरभाष्योपेता ।	५	०
१५ बृहदारण्यकोपनिषत्—सटीकशांकरभाष्योपेता । ...	८	०
१६ बृहदारण्यकोपनिषद्भाष्यवार्तिकम्—भागत्रयात्मकम् ।	२२	८
१७ श्वेताश्वतरोपनिषत्—भाष्यदीपिकाद्युपेता ।	२	४
१८ सौरपुराणम्—श्रीमद्द्वैपायनप्रणीतम् । उपपुराणम् । ...	३	०
१९ रसरत्नसमुच्चयः—श्रीमद्वाग्भटाचार्यविरचितः। वैद्यकग्रन्थः।	३	१२
२० जीवन्मुक्तिविवेकः—विद्यारण्यविरचितः सटीकः । ...	३	१२
२१ ब्रह्मसूत्राणि—सटीकशांकरभाष्योपेतानि भागद्वयात्मकानि ।	१२	०
२२ श्रीमच्छंकरदिग्विजयः-विद्यारण्यकृतः। टीकाटिप्पणीभ्यां सहितः।	६	०
२३ वैयासकन्यायमालाविस्तरः-भारतीतीर्थमुनिप्रणीतः। ...	१	१२
२४ जैमिनीयन्यायमालाविस्तरः—श्रीमाधवप्रणीतः। ...	८	०
२५ सूतसंहिता—माधवकृतटीकोपेता । भागत्रयात्मिका । ...	११	८
२६ हस्त्यायुर्वेदः—पालकाप्यमुनिविरचितः ।	७	६
२७ वृन्दमाधवः—श्रीमद्वृन्दप्रणीतः । सटीकः । वैद्यकग्रन्थः ।	६	१२
२८ ब्रह्मपुराणम्—श्रीमद्व्यासविरचितम् । प्रथमं महापुराणम् ।	६	४
२९ उपनिषदां समुच्चयः-श्रीनारायणशंकरानन्दकृतदीपिकासहितः।	६	१२
३० नृसिंहपूर्वोत्तरतापनीयोपनिषत्—भाष्याद्युपेता । ...	१	१२

87

ग्रन्थनाम ।	मूल्यम् । रू०	आ०
३१ बृहदारण्यकोपनिषन्मिताक्षरा—श्रीनित्यानन्दमुनिविरचिता ।	२	१२
३२ ऐतरेयब्राह्मणम्—सायणभाष्यसमेतम् । भागद्वयात्मकम् ।...	१०	१०
३३ धन्वन्तरीयनिघण्टुः—श्रीधन्वन्तरिविरचितः । वैद्यकग्रन्थः ।	६	४
३४ श्रीमद्भगवद्गीता—शांकरभाष्योपेता ।	२	०
३४ श्रीमद्भगवद्गीता—सटीकशांकरभाष्योपेता ।	६	४
३५ संगीतरत्नाकरः—शार्ङ्गदेवकृतः सटीको द्विभागः । गानशास्त्रम् ।	१०	४
३६ तैत्तिरीयारण्यकम्—सायणभाष्यसमेतं भागद्वयात्मकम् ।	९	१
३७ तैत्तिरीयब्राह्मणम्—सायणभाष्यसमेतं भागत्रयात्मकम् ।...	१४	८
३८ ऐतरेयारण्यकम्—सायणभाष्यसहितम् ।	३	०
३९ संस्काररत्नमाला—गोपीनाथभट्टविरचिता । भागद्वयात्मिका ।	१२	८
४० संध्याभाष्यसमुच्चयः—खण्डराजश्रीकृष्णपण्डितादिप्रणीतः ।	२	०
४१ अग्निपुराणम्—महर्षिव्यासप्रणीतम् । महापुराणम् ...	५	४
४२ तैत्तिरीयसंहिता—सायणभाष्यसमेता । भागनवकात्मिका ।	४५	१२
४३ वैयाकरणसिद्धान्तकारिकाः—भट्टोजीदीक्षितकृताः सटीकाः ।	०	१२
४४ श्रीमद्भगवद्गीता—पैशाचभाष्यसमेता ।	१	८
४५ श्रीमद्भगवद्गीता—मधुसूदनश्रीधरकृतटीकोपेता । ...	५	४
४६ याज्ञवल्क्यस्मृतिः—अपरार्ककृतटीकासहिता भागद्वयात्मिका ।	१३	०
४७ पातञ्जलयोगसूत्राणि—भाष्यवृत्तिभ्यां समेतानि । ...	३	०
४८ स्मृतीनां समुच्चयः—अङ्गिरःप्रभृतिसप्तविंशतिस्मृत्यात्मकः ।	५	०
४९ वायुपुराणम्—महर्षिव्यासप्रणीतम् । महापुराणम् । ...	४	१२
५० यतीन्द्रमतदीपिका—श्रीनिवासदासकृता । प्रकाशटीकोपेता ।	१	४
५१ सर्वदर्शनसंग्रहः—माधवाचार्यप्रणीतः ।	२	०
५२ श्रीमद्भगवद्गीता—नीलकण्ठकृतटीकोपेता ।	२	०
५३ सत्याषाढश्रौतसूत्रम्—सत्याषाढविरचितं भागदशकात्मकम् ।	२८	५
५४ मत्स्यपुराणम्—श्रीमद्द्वैपायनमुनिप्रणीतम् । महापुराणम् ।	६	०
५५ पुरुषार्थचिन्तामणिः—आठवलेइत्युपाह्वविष्णुभट्टकृतः ।	४	०
५६ नित्याषोडशिकार्णवः—भास्करराययोन्नीतटीकासहितः ।	३	८
५७ आचारभूषणम्—हिरण्यकेश्याह्निकमोकोपाह्वत्र्यम्बककृतम् ।	४	६
५८ आचारेन्दुः—मटिइत्युपाह्वत्र्यम्बककविरचितः । ...	४	०
५९ श्राद्धमञ्जरी—केळकरोपाह्वबापूभट्टविरचिता । ...	२	०
६० यतिधर्मसंग्रहः—विश्वेश्वरसरस्वतीकृतः ।	१	१२

ग्रन्थनाम ।	मूल्यम् । रू०	आ०
६१ गौतमप्रणीतधर्मसूत्रम्—हरदत्तकृतटीकासमेतम् । ...	२	८
६२ ईशकेनकठप्रश्नमुण्डमाण्डूक्यानन्दवल्लीभृगूपनिषदः-सटीकाः	२	८
६३ छान्दोग्योपनिषत्—रङ्गरामानुजविरचितप्रकाशिकोपेता ।	३	
६४ बृहदारण्यकोपनिषत्—रङ्गरामानुजविरचितप्रकाशिकोपेता ।	३	
६५ शाङ्खायनब्राह्मणम्—ऋग्वेदान्तर्गतबाष्कलशाखीयम् । ...	१	
६६ काव्यप्रकाशः—उद्द्योतयुतप्रदीपसहितः । ...	६	८
६७ ब्रह्मसूत्राणि—दीपिकासमेतानि ।	४	८
६८ बृहद्ब्रह्मसंहिता—नारदपञ्चरात्रान्तर्गता ।	१	१२
६९ ज्ञानार्णवतन्त्रम्—ईश्वरप्रोक्तम् । तन्त्रशास्त्रग्रन्थः । ...	१	४
७० स्मृत्यर्थसारः—श्रीधराचार्यविरचितः ।	१	१०
७१ बृहद्योगतरङ्गिणी—त्रिमल्लभट्टविरचिता भागद्वयोपेता ।	१०	१२
७२ परिभाषेन्दुशेखरः—वैद्यनाथकृतगदाख्यटीकायुतः । ...	२	६
७३ गायत्रीपुरश्चरणपद्धतिः—श्रीमच्छंकराचार्यविरचिता । ...	१	८
७४ द्राह्यायणगृह्यसूत्रवृत्तिः—रुद्रस्कन्दप्रणीता । ...	१	०
७५ ब्रह्मसूत्रभाष्यार्थरत्नमाला—सुब्रह्मण्यविरचिता । ...	४	
७६ ईशकेनकठोपनिषदः—दिगम्बरानुचरकृतव्याख्यासमेताः ।	१	
७७ वेदान्तसूत्रमुक्तावलिः—ब्रह्मानन्दसरस्वतीविरचिता । ...	२	
७८ त्रिस्थलीसेतुः—नारायणभट्टविरचितः ।	३	१२
७९ छान्दोग्योपनिषत्—मिताक्षराव्याख्यासमेता । ...	२	०
८० वाक्यवृत्तिः—श्रीमच्छंकराचार्यकृता सटीका । ...	०	८
८१ आश्वलायनश्रौतसूत्रम्—नारायणकृतवृत्तिसमेतम् ।	४	१२
८२ ब्रह्मसूत्रवृत्तिः—हरिदीक्षितविरचिता ।	२	७
८३ संक्षेपशारीरकम्—व्याख्यासहितं भागद्वयोपेतम् । ...	९	१
८४ अद्वैतामोदः—अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीतः । ...	२	०
८५ ज्योतिर्निबन्धः—शूरमहाठश्रीशिवराजविरचितः । ...	३	१५
८६ विधानमाला—श्रीनृसिंहभट्टविरचिता ।	४	४
८७ अग्निहोत्रचन्द्रिका—किंजवडेकरोपाह्ववामनशास्त्रिकृता ।	२	४
८८ निरुक्तम्—दुर्गाचार्यकृतवृत्तिसमेतम् । भागद्वयात्मकम् । ...	१६	४
८९ काव्यप्रकाशः—संकेताख्यटीकासमेतः ।	३	४
९० शाङ्खायनारण्यक—ऋग्वेदान्तर्गतबाष्कलशाखीयम् । ...	०	९
९१ गौतमप्रणीतन्यायसूत्राणि-भाष्यवृत्तिभ्यां समेतानि । ...	४	२
९२ श्रीमद्भगवद्गीता—सटीकरामानुजभाष्ययुता । ...	७	२
९३ दर्शपूर्णमासप्रकाशः—किंजवडेकरोपाह्ववामनशास्त्रिकृतः ।	६	१

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १४

छान्दोग्योपनिषत् ।

आनन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेता

रत्नागिरिग्रामनिवासि 'महामहोपाध्याय' इत्युपपदधारिवाङ्-शास्त्रिसूरिसूनुभिः 'आगाशे' इत्युपाह्वैः वे० शा० सं० रा० रा० काशीनाथशास्त्रिभिः संशोधिता ।

सा च

विनायक गणेश आपटे

इत्येतैः

पुण्याख्यपत्तने

श्रीमन् 'महादेव चिमणाजी आपटे' इत्यभिधेय-महाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयस्ताक्षरैर्मुद्रयित्वा

प्रकाशिता ।

पञ्चमीयमङ्कनावृत्तिः ।

शालिवाहनशकाब्दाः १८५६ ।

खिस्ताब्दाः १९३४ ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।

मूल्यं पञ्चकरूपकम् (५) ।

आदर्शपुस्तकोल्लेखपत्रिका ।

—○*○—

अथास्याश्छान्दोग्योपनिषदः पुस्तकानि यैः परहितैकपरतया संस्करणार्थं प्रदत्तानि तेषां नामादीनि पुस्तकानां संख्याश्च कृतज्ञतया प्रकाश्यन्ते—

(क) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, कलिकातानगरस्थमुद्रणालये मुद्रितं, कैलासवासिनां देव इत्युपाह्वानां पुण्यपत्तननिवासिनां वे० शा० सं० बालशास्त्रिणाम् ।

(ख) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, करवीरपुरनिवासिनां वे० शा० सं० रा० रा० श्रीमतां गुरुमहाराजानाम् । लेखनकालः संवत् १८४७ ।

(ग) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, इंदूरपुरनिवासिनां किबे इत्युपाह्वानां श्रीयुतानां रा० रा० भाऊसाहेब बाळासाहेब इत्येतेषाम् ।

(घ) इति संज्ञितम्—मूलं सभाष्यं, करवीरपुरनिवासिनां वे० शा० सं० रा० रा० गुरुमहाराजानाम् ।

(ङ) इति संज्ञितम्—मूलं सभाष्यं, पुण्यपत्तननिवासिनां कैलासवासिनां फडणीस इत्युपाह्वानां रा० रा० मोरोबादादा इत्याख्यानाम् ।

(च) इति संज्ञितम्—भाष्यं कैलासवासिनां पुण्यपत्तननिवासिनां श्रीयुतानां पटवर्धन इत्युपाह्वानां रा० रा० बाळासाहेब इत्याख्यानाम् ।

(छ) इति संज्ञितम्—टीका, पुण्यपत्तननिवासिनां कै० श्री० रा० रा० बाळासाहेब पटवर्धन इत्येतेषाम् ।

(ज) इति संज्ञितम्—मूलं, पुण्यपत्तननिवासिनां श्री० रा० रा० भाऊसा० नगरकर इत्येतेषाम् । लेखनकालः शके १७०५ ।

(झ) इति संज्ञितम्—मूलं, साठे इत्युपाह्वानां वे० शा० सं० रा० रा० नीलकण्ठशास्त्रिणां पुण्यपत्तननिवासिनाम् ।

(ञ) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, बडलीग्रामनिवासिनां चिदम्बरदीक्षितकुलोत्पन्नानां श्री० वे० शा० सं० रा० रा० मार्तण्डदीक्षितानाम् । लेखनकालः शके १७८१ ।

(ट) इति संज्ञितम्—मूलं सभाष्यं टीकोपेतं च, वटोदरनिवासिनां पटवर्धनोपाह्वानां श्री० रा० रा० कृष्णराव भीमाशंकर इत्येतेषाम् ।

(ठ) इति संज्ञितम्—मूलं सभाष्यं, उज्जयनीक्षेत्रनिवासिनां वे० शा० रा० रा० सोरटीलुवा इत्येतेषाम् । लेखनकालः संवत् १८६० ।

(ड) इति संज्ञितम्—भाष्यं, दक्षिणापथवर्तिविद्यालयग्रन्थसंग्रहालयास्थं डाक्टर इत्युपपदधारिभिर्भाण्डारकरोपाह्वैः " रामकृष्ण गोपाल " इत्येतैर्दत्तम् ।

(ढ) इति संज्ञितम्—भाष्यं, एतदपि दक्षिणापथवर्तिविद्यालस्थमेव तैरेव दत्तम् ।

(ण) इति संज्ञितम्—भाष्यं सटीकं, अहेग्रामनिवासिनां लिमये इत्युपाह्वानां रा० रा० गोविन्दशर्मणाम् ।

(त) इति संज्ञितम्—मूलं, रा० रा० " महादेव चिमण जी अपटे " इत्येतेषाम् । लेखनकालः संवत् १७३३ ।

(थ) इति संज्ञितम्—मूलं, पुण्यपत्तननिवासिनां के० रा० रा० नारायण बाबाजी जोशी इत्येतेषाम् ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

छान्दोग्योपनिषदः संक्षेपतः प्र

येनाद्वैद्वमखण्डमक्षयपदं प्रादर्शि तापापहं
भाष्यग्रन्थनिबन्धनैः श्रुतिशिरोवाक्यार्थविद्योतिभिः ॥
नित्यो यत्र समस्तसद्गुणगणस्तं शंकराख्यं गुरुं
विख्यातं मुनिमौलिलालितपदद्वंद्वं सदा संश्रये ॥

इह खलु जगत्यां चतुरुदधिवलयाङ्किनायामासेतुहिमाचलं नूनं सर्वेऽपि प्राणिनः स्वजठरपिठरीपूर्तये तद्विरोधित्वेन समुपस्थितस्वल्पदुःखप्रशमाय चाहर्निशमश्रान्तं प्रयतमानाः संलक्ष्यन्ते। परं नैतावदेव कर्तव्यं जन्मिनः पुंसः। किंतु पुनरपि जननं पुनरपि मरणमित्येवमात्मकसंसृतिचक्रनिवृत्तिरूपामृतत्वप्राप्तये प्रयतितव्यं खलु पुरुषधौरेयेण। तदेव च तस्य जन्तुषः साफल्यम्। अन्यथा पशुतुल्यता। तदुक्तं योगरसायने —

कुले महति जातेन स्वात्मनः श्रेय इच्छता।
आत्मज्ञाने श्रमः कार्यो यज्ज्ञात्वाऽमृतमश्नुते ॥
स गुणी स च धर्मिष्ठः स विवेकी स बुद्धिमान्।
ब्रह्मज्ञाने मतिर्यस्य शेषाः पशुसमा नराः ॥ इति।

आत्मज्ञानमधिकृत्य श्रीमान्परमकारुणिकश्वराचरगुरुरविद्याध्वान्तध्वंसपटीयसीरनेका विद्याः प्रवर्तयामास। तदन्तर्गतैवैकेयं छान्दोग्योपनिषदिति निश्चप्रचम्।

ननु कोऽर्थोऽस्य शब्दस्येतिचेदुच्यते–छन्दो वेदविशेषं सामाख्यं गायन्तीति च्छदोगाः 'गापोष्टक्' (पा०सू०३–२–८) इति टक्प्रत्ययः। छन्दोगानां धर्म आम्नायो वा छान्दोग्यम्। 'छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः' (पा० सू०४–३–१२९) इति ञ्यप्रत्ययः। उपनिषच्छब्दार्थनिर्वचनमुपदेशसाहस्र्यामाचार्यैरित्थमुक्तम्—

सदेरुपनिपूर्वस्य क्विपि चोपनिषद्भवेत्।
मन्दीकरणभावाच्च गर्भादेः शातनात्तथा ॥ इति।

'शद्लृ विशरणगत्यवसादनेषु' इति पाणिनिस्मृतेः शिथिलीकरण-प्राप्तिनाशेतित्रितयार्थकस्योपनिपूर्वस्य शद्लृधातोः क्विबन्तस्य रूप-मिदमुपनिषदिति । तथा च नितरां सादयति शिथिलयति स्थूलसू-क्ष्मप्रपञ्चमिति, वा नितरामुप समीपं सादयति प्रापयति परमात्मन इमं जीवमिति, अथवा नितरां सादयति विनाशयति सविलासाज्ञानमिति, व्युत्पत्त्या जन्मजरारोगमरणाद्यनेकानर्थव्रातप्रयोजकमहामोहविध्वंस-पूर्वकस्वस्वरूपाविर्भावसंपत्त्या परमानन्दप्रापिका या 'अथ परा यया तदक्षरमधिगम्यते' इति मुण्डकोपनिषदभिहिता परा विद्या सोपनिषच्छ-ब्देनाभिधीयते। एवं भूतायाः विद्यायाः प्रतिपादकं ग्रन्थं लक्षणया वृत्त्या ब्रूते उपनिषच्छब्दः । छान्दोग्यस्योपनिषदिति व्युत्पत्त्या भावरूपाना-द्यज्ञाननिरसनेनाऽऽत्मस्वरूपयाथार्थ्यावगमकः सामवेदीयोपनिषद्ग्रन्थ इत्यर्थः । एवं च भेदत्रयातीतं देशकालाद्यनवच्छिन्नं नित्यशुद्धबुद्ध-मुक्तस्वरूपमद्वयं ब्रह्मास्या मुख्यं प्रतिपाद्यमित्युक्तं भवति ।

तादृशस्य ब्रह्मणो ज्ञाने यत्नश्च 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतेरुपनिषदादिवेदान्तानां श्रवणाद्येव श्रवणादि च जिज्ञासा-दयोत्तरभावि। जिज्ञासैव तादृशे वस्तुनि कृतपरिश्रमस्यापि प्रेक्षावतो न खलु सहसोदेति । कुतः पुनरदृष्टशास्त्रमुखस्य स्थूलधियः । पुत्रमित्र-कलत्राद्यनेकजवीवोभ्रपरिपतितसकलप्राणिकदम्बके दुःखशोकायादि-महोर्मिमालाकुले तापत्रयाग्निज्वालाजटिले क्षुत्पिपासादिविभीषिकाभयं-करे शास्त्राचार्योपदेशसमासादितादृयब्रह्मसाक्षात्कारबद्धिरसंस्पृष्टे ईदृशे कष्टप्रचुरे संसृतिचक्रेऽसंभविन्येव खलु देहभृतामन्तर्मुखत्वेन प्रवृत्तिः । 'पराञ्चि खानि व्यतृणत्स्वयंभूः' इति श्रुतेश्च । अतो विषयोपभोगज-नितानागमापायिनो दुःखोदर्कान् सुखाभासानेव सुखं परं मत्वा क्लिश्य-न्तः कथमिमे संचितकर्मादिजन्यं तापत्रयं जह्युरिति कृपया तादृशां जनानां समस्तदुःखहानाय निरतिशयानन्दलाभाय च ईश्वर एव शंकराचार्यरूपेणावततार । त इमे श्रीशंकरगुरुचरणा वेदान्तानां दुर्वि-ज्ञेयतामाकलय्य दशोपनिषत्सु सरलं सुबोधं च भाष्यमारचय्य श्रुति-निगूढमद्वयात्मतत्त्वं प्रकाशयामासुः । निस्तुलरमणीयमपूर्वं भाष्यं

गभीराशयत्वान्न तथा मन्दमध्यमाधिकारिणां स्पष्टं प्रकाशेतेत्यालोच्याऽऽनन्दगिरिभिर्नातिचिरादेव तदुपरि कामपि भाष्यग्रन्थहृत्तलावगाहिनीं रुचिरां सुविपुलां च व्याख्यां विधाय तदात्मतत्त्वं सुविमलं रत्नमिव लोकानां पुरतः प्रस्थापितम् ।

एवं सति यदन्यैराचार्यैर्वेदान्तानां द्वैततत्त्वपरत्वमुपवर्णितं तदिदं छान्दोग्योपनिषद्गतश्रुतिवचनान्युदाहृत्यानायासादेव निराकर्तुं शक्यं भवति ।

इत्थं ह्यन्येषामाचार्याणामाशयः—' पृथगात्मानं प्रेरितारं च मत्वा ' (श्वे० १।६) इत्यादिका ह्यभेद(अद्वैत)श्रुतयः । 'नेह नानाऽस्ति किंचन' (बृ० ४ । ४ । १९) इत्यादिका ह्यभेद(अद्वैत)श्रुतय इति द्विविधाः श्रुतय उपलभ्यन्ते । तत्र लोके शरीरस्य शरीरिणश्च परस्परं भेदस्य पामरापामराखिलजनानुभवसिद्धतया तादृशभेदबोधकत्वात्प्रमाणं भेदश्रुतयः । अभेदश्रुतयस्तु नेह नानेत्यादयः 'पाषाणाः प्लवन्ते' इतिवल्लोकविरुद्धार्थाभिधायित्वात्कल्पिताभेदपरत्वेनोपचरितार्था इति ।

अत्रोच्यते—निरस्तसमस्तभेदेन ब्रह्मणा जगतोऽभेदं प्रदर्शयन्तीषु परःशतासु श्रुतिषु जाग्रतीषु कथंकारं पामरजनानुभवसिद्धो भेदः (द्वैतं) सत्यतां लभताम् । किंतु ' नेह नाना ' ' वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ' इत्यादिश्रुतिशतसमधिगतोऽभेद (अद्वैतं) एव पारमार्थिकः । न च तासामुपचरितार्थता वक्तुं शक्या । उपक्रमोपसंहारादिषड्विधतात्पर्यनिर्णायकलिङ्गवत्त्वेन तत्त्वं बोधयन्तीनामुपचरितार्थतानुपपत्तेः । लिङ्गषट्कं च पूर्वाचार्यैः प्रदर्शितम्—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥ इति ।

तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहाराख्यमेकं लिङ्गम् । यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयस्य वस्तुनः ' एकमेवाद्वितीयम् ' इत्यादौ ' ऐतदात्म्यमिदं

सर्वम् ' इत्यन्ते च प्रतिपादनम् । प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनः-पुन्येन प्रतिपादनमभ्यासः । यथाऽत्रैव ' तत्त्वमसि श्वेतकेतो ' इति नवकृत्वः प्रतिपादनम् । प्रकरणप्रतिपाद्यस्य प्रमाणान्तराविषयीकरणमपूर्वता । ' तं त्वौपनिषदं पुरुषं पृच्छामि ' इत्यादिश्रुतिभिरुपनिषन्मात्रवेद्यत्वप्रतिपादनाद्ब्रह्मणोऽपूर्वत्वम् । प्रकरणप्रतिपाद्यस्य तत्र तत्र श्रूयमाणं प्रयोजनं फलम् । यथा ' अभयं गतो भवति ' इत्यादि । प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः । यथाऽत्रैव ' उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति ' इत्यादि प्रशंसनम् । प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः । यथाऽत्रैव ' यथा सोम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृन्मयं विज्ञातं स्याद्वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ' इत्यत्र विकारस्य वागारम्भणमात्रत्वे युक्तिः श्रूयते । मृद्विकारेषु घटादिषु विकारनामधेययोर्वागारम्भणमात्रत्वेन यथा मृत्तमेवावशिष्यते नान्यत्तथा चिद्विवर्तस्य प्रपञ्चस्य गिरिनदीसमुद्रात्मकविकारनामधेययोर्वागारम्भणमात्रत्वाच्चिन्मात्रमेवावशिष्यते रज्जुविवर्तस्य सर्पस्य रज्जुमात्रावशेषवदित्यर्थः । एवं च सर्वेषां वेदान्तवाक्यानामभेद (अद्वैत) एव तात्पर्यं पर्यवस्यति । भेदस्तु (द्वैतं तु) औपाधिकः । यथा लोके समुद्रादुदकात्मनोऽभेदेऽपि तद्विकाराणां फेनवीचितरङ्गादीनां मिथो भेदो दृष्टस्तद्वज्जीवप्रपञ्चयोर्ब्रह्मणोऽनन्यत्वेऽपि भेदः सिध्यति । तत्र यद्यपि जीवो न ब्रह्मविकारः ' तत्सृष्ट्वा तदेवानुप्राविशत् ' (तै० २ । ६) इति स्रष्टुरेवाविकृतस्य कार्यानुप्रवेशश्रवणात्तथाऽपि अविद्याप्रत्युपस्थापितनामरूपोपाधिनिमित्तो भेदः कार्यप्रविष्टस्यापि संभवति । यथैव च नैयायिकमते आकाशस्यैकस्यैव सतो घटकरकाद्युपाधिभेदाद्घटाकाशकरकाकाशयोर्भेदस्तद्वत् । एवं च पृथगात्मानमित्यादिभेदश्रुतीनामौपाधिकभेद एव तात्पर्यमिति शांकरमतसिद्धमद्वैतमेव विजयते ।

अस्याश्चोपनिषद इयं पञ्चम्याद्वृत्तिः । प्रत्येकस्यामाद्यवृत्तौ सहस्रं पुस्तकानीत्यद्यावत्प्रचलितः संप्रदायः । प्रथमाद्यवृत्तिस्तु संस्थासंस्था-

पनादनन्तरं द्वित्रवर्षान्तर एवाऽऽदित्याष्टेन्दु(१८१२)मिते शाके प्रकाशिता । ततः (१८२३) शकसमये द्वितीयाऽऽवृत्तिः । तदनु (१८३५) (१८४६) शालिवाहनशककालेऽनुक्रमेण तृतीयाचतुर्थ्यावावृत्ती प्रकाशिते । ततोऽधुना रसेषुत्रसुखसुधांशिते शकाब्दके (१८५६) इयमिति स्थूलेन मानेन दशभिर्दशभिः संवत्सरैरस्याः प्रकाशनं कर्तव्यतामापतितम् । तथा च प्रतिहायनं शतं पुस्तकानि पिपाठिषुभिर्ग्राहकैर्गृह्यन्त इति नियमोऽर्थात्सिध्यति । एतावता श्रीशंकराचार्यैरुक्तीनमेतद्रहस्यभूतमद्वैततत्त्वं निखिलजनमनःसंपतं सज्जगतीतले विपुलतां गच्छदस्तीत्यनुमीयते ।

पुण्यपत्तने
वैशाखशुक्लप्रतिपदि
इन्दुवासरे शके १८५६

आनन्दाश्रमस्थपण्डितप्रधानः—
मारुलकरोपाह्वः शंकरशास्त्री ।

छान्दोग्योपनिषद्विषयसूचीपत्रम् ।

—:०⊙:०—

विषयाः ।	(आरम्भ-(समाप्ति- खण्डाङ्काः ।	पृष्ठाङ्काः ।	पृष्ठाङ्काः ।
अथ प्रथमोऽध्यायः ।			
ॐकारस्य रसतमत्वाप्तिसमृद्धिगुणानामुक्तिः ..	१	७	१७
प्राणदृष्ट्योंकारोपासनम्	२	१८	२८
आदित्यदृष्ट्या प्राणादिदृष्ट्या चोद्गीथस्वरोपासनम्	३	२९	३६
स्वरशब्दितोंकारोपासनम्	४	३७	३९
वागादीनां मुख्यप्राणस्य च रश्मीनामादित्यस्य चाभेद-दृष्ट्योद्गीथोपासनस्य निन्दापूर्वकं तेषां पुनर्भेददृष्ट्यो-द्गीथोपासनम् ५–७		४०	५२
शिलकदालभ्यजैवलिसंवादः ८–९		५३	६१
दुर्भिक्षकाल उषस्तर्देशान्तरगमनं हस्तिपालोच्छिष्टभो-जनादिप्रस्तावपूर्वकराजयज्ञदर्शनमृत्विक्संवादश्च	१०	६२	६६
राजोषस्तिसंवादपूर्वकपार्थिवप्रस्तावेन देवताज्ञानम्	११	६७	७०
कक्कुरैरुद्गीथोपासनोपदेशः १२		७१	७४
मक्त्यवयवोपासनम् १३		७५	७७
अथ द्वितीयोऽध्यायः ।			
साधुदृष्ट्या समस्तसामोपासना	१	७८	८०
लोकदृष्ट्या हिंकारः प्रस्ताव उद्गीथः प्रतिहारो निधन-मिति पञ्चविधसामोपासना	२	८०	८३
सृष्टिदृष्ट्या पञ्चविधसामोपासना	३	८४	८४
अन्नदृष्ट्या पञ्चविधसामोपासना	४	८५	८५
ऋतुदृष्ट्या पञ्चविधसामोपासना	५	८६	८६
पशुदृष्ट्या पञ्चविधसामोपासना	६	८७	८७
प्राणादिदृष्ट्या पञ्चविधसामोपासना	७	८८	८९
वाग्दृष्ट्या हिंकारः प्रस्ताव आदिरुद्गीथः प्रतिहार उपद्रवो निधनमिति सप्तविधसामोपासना	८	८९	९०
आदित्यदृष्ट्या सप्तविधसामोपासनम्	९	९०	९४
आदित्यजयेन सप्तविधसामोपासनम् १०		९५	९७
त्रिषु गायत्रसामोपासनम् ११		९८	९९

विषयाः	(आरम्भ–(समाप्ति– खण्डाङ्काः	पृष्ठाङ्काः	)पृष्ठाङ्का ।)
अग्नौ रथंतरसामोपासनम्	....१२	९९	१००
मिथुने वामदेव्यसामोपासनम्	...१३	१००	१०१
आदित्ये बृहत्सामोपासनम्	....१४	१०२	१०२
पर्जन्ये वैरूपसामोपासनम्	....१५	१०३	१०३
ऋतुषु वैराजसामोपासनम्	...१६	१०३	१०४
पृथिव्यादिदृष्ट्या शक्करीसामोपासनम्... ...	...१७	१०४	१०५
पशुदृष्ट्या रेवतीसामोपासनम्	...१८	१०५	१०६
अङ्गदृष्ट्या यज्ञायज्ञीयसामोपासनम्	....१९	१०६	१०७
देवतादृष्ट्या राजनसामोपासनम्	...२०	१०७	१०८
त्रयीविद्यादिदृष्ट्या सामोपासनम्	...२१	१०८	११०
विनर्दिगुणविशिष्टसामोपासनम्	....२२	११०	११३
धर्मस्कन्धेनोंकारोपासनम्	....२३	११३	११५
सामोपासनप्रसङ्गेन सामहोममन्त्रोत्थानानि, अज्ञात-सामहोममन्त्रोत्थानस्य कर्मनिषेधश्च	....२४	१२६	१३१
अथ तृतीयोऽध्यायः ।			
आदित्यादौ मध्वादिदृष्टिः	.... १	१३१	१३५
दक्षिणदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टिः ...	.... २	१३५	१३६
पश्चिमदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टिः	.... ३	१३६	१३७
उत्तरदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टिः	.... ४	१३७	१३७
ऊर्ध्वदिक्स्थरश्म्यादौ मधुनाड्यादिदृष्टिः ...	... ५	१३८	१३९
प्रथमामृतं यद्रोहितादिरूपं वसूपजीवनभूतं तस्योपासनम्	६	१३९	१४१
द्वितीयामृतं रुद्रोपजीवनभूतं यत्तदुपासनम् ...	.... ७	१४१	१४२
तृतीयामृतमादित्योपजीवनभूतं यत्तदुपासनम् चतुर्थामृतं मरुदुपजीवनभूतं यत्तदुपासनम् पञ्चमामृतं साध्योपजीवनभूतं यत्तदुपासनम्	८–१०	१४२	१४८
भोगक्षय आत्मनि संहृतं सर्वमित्युपासनम्	...११	१४८	१५१
गायत्र्या ब्रह्मोपासनम्	....१२	१५२	१५७
द्वारपालादिगौण्युपासनं हृदि मुख्यब्रह्मोपासनम्	...१३	१५८	१६७
सर्वदृष्ट्या ब्रह्मोपासनं मनोमयत्वाद्यारोपेण शाण्डिल्य-विद्या च	....१४	१६८	१७५
पुत्रदीर्घायुष्कफला विराट्कोशोपासना	...१५	१७५	१७८
आत्मनो दीर्घायुष्कफलाऽऽत्मयज्ञोपासना	....१६	१७९	१८२

विषयाः ।	खण्डाङ्काः ।	(आरम्भ- पृष्ठाङ्काः ।	समाप्ति- पृष्ठाङ्काः ।
आत्मयज्ञोपासनाऽऽङ्गिरसेन देवकीपुत्रायोक्ताऽक्षयादि- फला	....१७	१८३	१८८
मनआदिदृष्ट्याऽध्यात्माधिदैविकब्रह्मोपासना	....१८	१८८	१९१
आदित्याण्डदृष्ट्याऽध्यात्माधिदैविकब्रह्मोपासना	....१९	१९१	१९५
अथ चतुर्थोऽध्यायः ।			
जानश्रुतेर्हंसोक्त्या रैक्वनिकटे क्षत्तृप्रेरणम्	१	१९५	२००
रैक्वाय जानश्रुतेर्धनादिदानम्	२	२०१	२०४
आरुणायिकासहिता सर्वोपलब्धिफला संवर्गविद्या ...	३	२०४	२१०
सत्यकामेन ब्रह्मचर्यार्थं गौतमस्य गोचारणम्....	४	२११	२१४
बलीवर्दस्य सत्यकामाय ब्रह्मणः प्रथमपादोक्तिः ...	५	२१४	२१६
अग्नेः सत्यकामाय ब्रह्मणो द्वितीयपादोक्तिः	६	२१६	२१७
हंसस्य सत्यकामाय तृतीयपादोक्तिः	७	२१८	२१९
मद्गोः सत्यकामाय चतुर्थपादोक्तिः	८	२१९	२२०
सत्यकामस्य गुरुकुले पुनर्गमनम्	९	२२०	२२२
उपकोसलस्याऽऽत्मविद्या	१०	२२२	२२७
गार्हपत्याग्निविद्या	११	२२७	२२८
अन्वाहार्यपचनाग्निविद्या	१२	२२९	२३०
आहवनीयाग्निविद्या	१३	२३०	२३१
अग्नीनामुपकोशलं प्रति वचनम्	१४	२३१	२३३
अक्षिपुरुषोपासना	१५	२३३	२३७
यज्ञोपासना	१६	२३७	२४१
व्याहृत्युपासना	१७	२४१	२४५
अथ पञ्चमोऽध्यायः ।			
ज्येष्ठश्रेष्ठादिगुणोपासना, इन्द्रियाणां विवादश्च ...	१	२४६	२५५
प्राणस्यान्नवासोदृष्ट्योपासनम्	२	२५५	२६२
पञ्चाग्निविद्यार्थं श्वेतकेतुप्रवाहणसंवादः...	३	२६२	२६७
लोकरूपाग्निविद्या	४	२६७	२७१
पर्जन्यरूपाग्निविद्या	५	२७१	२७२
पृथिवीरूपाग्निविद्या	६	२७२	२७२
पुरुषरूपाग्निविद्या	७	२७३	२७३
योषिद्रूपाग्निविद्या	८	२७३	२७४

विषयाः ।	आरम्भ- (समाप्ति- खण्डाङ्काः । पृष्ठाङ्काः ।)	पृष्ठाङ्काः ।)	
योनिद्वारा जातस्य पुनः पुनर्घटीयन्त्रवदूर्ध्वनागमनाय कर्म कुर्वतो मृतस्याग्नये हरणम्	९	२७५	२७७
आत्मविद्ययोत्तरमार्गः कर्मणा दक्षिणमार्गः	१०	२८७	२९९
औपमन्यवादिभिः पञ्चभिरुद्दालकेन सहितैः कैकेयस्य .... संवादः	११	२९९	३०३
औपमन्यवकैकेयराजसंवादः	१२	३०३	३०४
सत्ययज्ञकैकेयराजसंवादः	१३	३०४	३०५
इन्द्रद्युम्नकैकेयराजसंवादः	१४	३०५	३०६
जनकैकेयसंवादः	१५	३०६	३०७
बुडिलकैकेयसंवादः	१६	३०७	३०८
उद्दालककैकेयसंवादः	१७	३०८	३०९
सर्वैः सह कैकेयसंवादः	१८	३०९	३११
विदुषोऽग्निहोत्रसिद्ध्यर्थं प्राणाय स्वाहेति प्रथमाहुति- कथनम्	१९	३१२	३१३
व्यानाय स्वाहेति द्वितीयाहुतिकथनम् अपानाय स्वाहेति तृतीयाहुतिकथनम् समानाय स्वाहेति चतुर्थाहुतिकथनम् उदानाय स्वाहेति पञ्चमाहुतिकथनम्	....२०–२३	३१३	३१५
एवंविदोऽग्निहोत्रफलम्...	२४	३१५	३१८
अथ षष्ठोऽध्यायः ।			
श्वेतकेतुमुपदिशत्यारुणिः	१	३१८	३२२
अन्यपक्षनिरसनपूर्वकं सर्वस्य जगतः सन्मात्रत्वकथनम्	२	३२२	३३५
भूतसूक्ष्मात्मपञ्चसृष्टिक्रमः	३	३३५	३४१
एकविज्ञानेन सर्वविज्ञानम्	४	३४१	३४६
अन्नाद्याशितं त्रेधा भवतीति	५	३४७	३४९
भक्ष्यमाणस्याणीयोभागो मनआदिर्भवतीति	६	३४९	३५०
षोडशकलपुरुषोपदेशः	७	३५०	३५४
सुषुप्तिकालस्थित्युपदेशः	८	३५५	३६६
सुषुप्त्यादौ सत्संपन्नानां सत्संपत्तिज्ञानाभावे दृष्टान्तः....	९	३६६	३६८
तदीदृष्टान्तेनोपदेशः	१०	३६९	३७०

विषयाः ।	(आरम्भ—(समाप्ति— खण्डाङ्काः । पृष्ठाङ्काः)पृष्ठाङ्काः।)		
वृक्षदृष्टान्तेनोपदेशः	....११	३७०	३७२
वटफलदृष्टान्तेनोपदेशः	...१२	३७३	३७४
लवणदृष्टान्तेनोपदेशः	....१३	३७४	३७७
गन्धारदेशादानीतपुरुषदृष्टान्तेनोपदेशः ...	....१४	३७७	३८२
मुमूर्षुपुरुषदृष्टान्तेनोपदेशः	...१५	३८२	३८४
चौरपरशुग्रहणदृष्टान्तेनोपदेशः	....१६	३८४	३९०
अथ सप्तमोऽध्यायः ।			
नारदाय सनत्कुमारोपदेशः	.... १	३९०	३९६
वाङ् नाम्नो भूयसीति	.... २	३९६	३९७
मनो वाचो भूय इति	... ३	३९७	३९९
संकल्पो मनसो भूयानिति	.... ४	३९९	४०३
चित्तं संकल्पाद्भूय इति	.... ५	४०३	४०५
ध्यानं चित्ताद्भूय इति	.... ६	४०५	४०६
विज्ञानं ध्यानाद्भूय इति	... ७	४०७	४०८
बलं विज्ञानाद्भूय इति	.... ८	४०८	४०९
अन्नं बलाद्भूय इति	.... ९	४१०	४११
आपोऽन्नाद्भूयस्य इति	...१०	४११	४१२
तेजोऽभ्यो भूय इति	....११	४१२	४१४
आकाशस्तेजसो भूयानिति	...१२	४१४	४१५
स्मरणमाकाशाद्भूय इति	....१३	४१५	४१६
आशा स्मरणाद्भूयसीति	....१४	४१६	४१७
प्राण आशाया भूयानिति	....१५	४१८	४२२
सत्यं त्वेव विजिज्ञासितव्यमित्युपदेशः ...	...१६	४२२	४२३
विज्ञानं त्वेव विजिज्ञासितव्यमित्युपदेशः	...१७	४२३	४२५
मतिस्त्वेव विजिज्ञासितव्येत्युपदेशः	....१८	४२५	४२५
श्रद्धा त्वेव विजिज्ञासितव्येत्युपदेशः	....१९	४२५	४२६
निष्ठा त्वेव विजिज्ञासितव्येत्युपदेशः	...२०	४२६	४२६
कृतिस्त्वेव विजिज्ञासितव्येत्युपदेशः	....२१	४२६	४२६
सुखं त्वेव विजिज्ञासितव्यमित्युपदेशः....	....२२	४२७	४२८
भूमा त्वेव विजिज्ञासितव्य इत्युपदेशः...	...२३	४२८	४२८

विषयाः ।		(आरम्भ–(समाप्ति– खण्डाङ्काः पृष्ठाङ्काः) पृष्ठाङ्काः, ।		
भूमस्वरूपकथनम्	....२४	४२८	४३१	
सर्वत्र स एवेत्युपदेशः	...२५	४३२	४३३	
एवंविदः फलोपदेशः	....२६	४३४	४३६	
अथाष्टमोऽध्यायः ।				
दहरपुण्डरीके ब्रह्मोपासनम्	१	४३७	४४६	
दहरब्रह्मोपासनफलम्	.... २	४४७	४४९	
असत्यापिहितसत्योपासनं नामाक्षरोपासनं च	... ३	४४९	४५४	
सेतुरूपात्मोपासना	... ४	४५४	४५७	
यज्ञादौ ब्रह्मचर्यदृष्टिः	.... ५	४५७	४६४	
हृदयनाडीसूर्यरश्मिपथोपासना	... ६	४६४	४७०	
इन्द्रविरोचनयोः प्रजापतिसकाशं गमनम् ...	.... ७	४७१	४७६	
इन्द्रविरोचनयोरुदशराव आत्मदर्शनम् ...	.... ८	४७६	४८१	
इन्द्रस्य पुनरागमनम्	... ९	४८२	४८५	
इन्द्राय स्वप्नपुरुषोपदेशः	...१०	४८६	४८८	
सुषुप्तपुरुषोपदेशः	....११	४८९	४९१	
मर्त्यशरीराद्युपदेशः	...१२	४९१	५०९	
इषामाच्छबलमिति मन्त्रः	...१३	५०९	५१०	
कारणत्वेनाऽऽकाशाख्यब्रह्मोपदेशः	....१४	५१०	५१२	
परम्परागतमात्मज्ञानमित्युपदेशः	...१५	५१२	५१५	

समाप्तमिदं सूचीपत्रम् ।

ॐ तत्सद्ब्रह्मणे नमः ।

सामवेदीया

छान्दोग्योपनिषत् ।

आनन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेता ।

(अथ श्रीमच्छंकरभगवत्पादविरचितं भाष्यम्) ।

(तत्र भाष्यकारोपोद्घातः) ।

ओमित्येतदक्षरमित्याद्यष्टाध्यायी छान्दोग्योपनिषत् । तस्याः संक्षेपतोऽर्थजिज्ञासुभ्य ऋजुविवरणमल्पग्रन्थमिदमारभ्यते ।

(अथाऽऽनन्दगिरिकृता टीका) ।

नमो जन्मादिसंबन्धबन्धविध्वंसहेतवे ।
हरये परमानन्दवपुषे परमात्मने ॥
नमस्क्रियन्तसंदोहमरसीरुहभानवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयसे ॥

छन्दोगानामुपनिषद्भेदं व्याचिख्यासुर्भगवान्भाष्यकारश्चिकीर्षितग्रन्थपरिसमाप्तिप्रत्यूहपरिपन्थिदुरितनिबर्हणसिद्ध्यर्थमोंकारोच्चारलक्षणं मङ्गलाचरणं संपादयन्व्याख्येयस्वरूपं दर्शयति—ओमित्येतदिति । व्याख्यानं सप्रयोजनं प्रतिजानीते—तस्या इति । ननु शारीरके भूयःसु प्रदेशेषु विस्तरेण व्याख्यातत्वादमुष्य भाष्यं किमिति संप्रत्यारभ्यते तत्राऽऽह—संक्षेपत इति । विस्तरेण व्याख्यातत्वेऽपि संग्रहतो व्याख्यानमस्याः संप्रणीयते विस्तृतस्य संक्षिप्य ग्रहणे सुग्रहत्वादित्यर्थः । किंच न चेयं यथापठक्रमं व्याख्याता । प्रकृते तु पाठक्रममनतिक्रम्य व्याख्यायते तद्युक्तमिदं भाष्यमित्याऽऽह—ऋजुविवरणमिति । ऋजु पाठक्रमानुसारि विवरणमर्थस्फुटीकरणं प्रकृतोपनिषदो यस्मिन्भाष्ये तत्तथेति यावत् । अथ पाठक्रममाश्रित्यापि द्राविडं भाष्यं प्रणीतं तत्किमनेनेत्याशङ्क्याऽऽह—अल्पग्रन्थमिति । तथाऽपि विशिष्टाधिकार्यभावे कथमिदमारभ्यते तत्राऽऽह—अर्थजिज्ञासुभ्य इति । ये हि मुमुक्षवोऽस्या विवक्षितमर्थं जिज्ञासन्ते तेभ्यो भाष्यमिदं प्रस्तूयते । तथा च विशिष्टाधिकारिसंभवे तदारम्भः संभवति । तस्य च प्रकृतोपनिषदर्थपरिज्ञानमवान्तरफलं तद्द्वारा कैवल्यं परमं फलमिति भावः ।

---

१ ख. घ. °रणल° । २ क °सेऽत्रा° ।

तत्र संबन्धः । समस्तं कर्माधिगतं प्राणादिदेवताविज्ञानसहितमर्चिरादिमार्गेण ब्रह्मगतिप्राप्तिकारणम् । केवलं च धूमादिमार्गेण चन्द्रलोकप्राप्तिकारणम् । स्वभावप्रवृत्तानां च मार्गद्वयपरिभ्रष्टानां कृष्टाऽधोगतिरुक्ता ।

ननु कर्मविधिशेषत्वादुपनिषदस्तद्व्याख्यानेनैव कृतव्याख्यानत्वात्पिष्टपिष्टप्रसङ्गात्कृतं तद्व्याख्येनेत्याशङ्क्य शेषशेषित्वे प्रमाणाभावान्नैवमित्यभिप्रेत्य पूर्वोत्तरकाण्डयोर्नियतपूर्वापरभावप्रयुक्तं संबन्धं प्रतिजानीते—तत्रेति । तस्या व्याख्येयत्वेन प्रस्तुताया उपनिषदः कर्मकाण्डेन सह संबन्धोऽभिधीयत इत्यर्थः । कोऽसावित्यपेक्षायां तदभिधित्सया कर्मकाण्डार्थमनुवदति—समस्तमिति । विहितं प्रतिषिद्धं च कर्म पूर्वस्मिन्काण्डे प्रतिपन्नमित्यर्थः । तत्र हि विहितं समुच्चितमसमुच्चितं चेति द्विविधमित्यङ्गीकृत्य समुच्चितस्य फलमनुवदति—प्राणादीति । प्राणश्चाग्निश्चेत्याद्या देवता तद्विज्ञानं तदुपासनं तेन समुच्चितमग्निहोत्रादि कर्मार्चिराद्युपलक्षिते[न] देवयानेन पथा कार्यब्रह्मप्राप्तौ कारणं न तु ब्रह्मप्राप्तौ तस्य गन्तव्यत्वाभावात्कार्यस्यैव गन्तव्यतायाबादर्यधिकरणे सिद्धान्तितत्वात् । तस्मान्न समुचितं विहितं कर्म परमपुरुषार्थहेतुरित्यर्थः । तस्यैवासमुच्चितस्य फलमाह—केवलं चेति । विहितस्य गतिमुक्त्वा प्रतिषिद्धस्य गतिमाह—स्वभावेति । स्वभावेन शास्त्रापेक्षामन्तरेण प्रकृतिवशादेव प्रवृत्ता यथेष्टचेष्टारतिकास्तेषां कर्मज्ञानाभावाद्देवयाने पितृयाणे च पथ्यनधिकृतानामधोगतितिर्यगवस्था क्षुद्रजन्तुलक्षणाऽपुनरावृत्तिर्दुर्लभा* वाक्येन ।

न चोभयोर्मार्गयोरन्यतरस्मिन्नपि मार्गे आत्यन्तिकी पुरुषार्थसिद्धिरित्यतः कर्मनिरपेक्षमद्वैतात्मविज्ञानं संसारगतित्रयहेतुमर्देन वक्तव्यमित्युपनिषदारभ्यते ।

अन्यतरस्मिन्नधिकृतानां परमः पुरुषार्थः सेत्स्यति, "शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते" इति स्मृत्या तयोर्नित्यफलत्वप्रतिपत्तेरत आह—न चोभयोरित्यादि । ननु मार्गद्वयभ्रष्टानां पुरुषार्थाभावेऽपि द्वयोः पथोरन्यतरस्मिन्वा भविष्यतीति चेत्तत्र न तावद्देवयानेऽपि निमित्ते निरतिशयपुरुषार्थसिद्धिः । "इमं मानवमावर्तं नाऽऽवर्तन्ते" "तेषामिह न पुनरावृत्तिः" इत्यत्रेहेति विशेषणादेकया यात्यनावृत्ति-

---

* अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्वं म्रियस्वेत्येतत्तृतीयं स्थानमित्यनेन वाक्येनोक्तेत्यन्वयः ।

---

१ क. ख. °णाग्न्यादि° । २ क. ग. घ. च. °ह्मलोकप्र° । ३ ख. छ. °नुद्रवति । ४ ख. ग. छ. °त्र वि° । ५ क. °धमद्वी° । ६ °णाग्न्यादी° । ७ ख. ग. छ. °तानां ग° । ८ क. छ. °तिर्दुर्ल° । ९ क. ग. °थोरपि मार्गे° । १० क. °स्मिन्नाऽधि° । ११ क. °रमपु° । १२ क. °दिना । न° ।

मिति स्मृतावन वृत्तेरेतत्फलविषयत्वात्फलपर्यन्तरेऽप्यनावृत्तावपि विशेषणानर्थक्यात् । नापि पितृयाणपथि निरतिशयपुरुषार्थसिद्धिः । "एतमेवाध्वानं पुनर्निवर्तन्ते" । "अन्यथाऽऽवर्तते पुनः" इति च द्वस्थलस्खलनावगमात् । तस्मान्न कर्मवशादात्यन्तिकपुरुषार्थप्राप्तिरित्यर्थः । एवमनूद्य कर्मफलं फलितं संबन्धमाह— इत्यत इति । उक्तरीत्या कर्म यतो न निरतिशयपुरुषार्थहेतुरतः ससाधनात्कर्मणस्तत्फलाच्च विरक्तस्य निरतिशयपुरुषार्थं काङ्क्षतस्तत्साधनं केवलमात्मज्ञानं संसारान्तर्भूतपूर्वोक्तगतित्रयहेतुकर्मतद्धेतुनिराकरणेन वक्तव्यमित्याभिप्रायेणोपनिषदेषाऽऽरभ्यते । न हि कर्मानुष्ठानात्पुरुषार्थो निरतिशयो लभ्यते । तस्य तथेहेत्यादौ क्षायिष्णुफलत्वश्रुतेः । तथा चेश्वरार्पणबुद्ध्याऽनुष्ठितशुभकर्मवशादुपजातशुद्धबुद्धेर्विरक्तस्य मुमुक्षोर्मोक्षसाधनज्ञानार्थोऽयमुपनिषदारम्भ इति हेतुहेतुमद्भावः संबन्ध इत्यर्थः ।

न चाद्वैतात्मविज्ञानादन्यत्राऽऽत्यन्तिकी निःश्रेयसप्राप्तिः । वक्ष्यति हि— "अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति । विपर्यये च स स्वराड् भवति" इति ।

ननु— मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया ॥

इति वृद्धैरुक्तत्वात्काम्यनिषिद्धे वर्जनीये । नित्यनैमित्तिके च कृत्वा व्यवस्थितस्य मुमुक्षोर्वर्तमानदेहपाते पुनर्देहान्तरग्रहे हेत्वभावादनायाससिद्धा ज्ञानादेतऽपि मुक्तिरिति कथं तादर्थ्येनोपनिषदारभ्यते तत्राऽऽह—न चेति । न हि स्वदुत्प्रेक्षितो मोक्षोपायो विना प्रमाणं प्रकल्प्यते । न च पौरुषेयं वाक्यं मूलप्रमाणमन्तरेण प्रमाणम् । न चात्र श्रुतिस्मृती प्रत्यक्षादि वा मूलमालोच्यते । संभवति च यथावर्णितचरितस्यापि कर्मशेषवशाद्देहान्तरं न चैकभविकः कर्माशयः । तद्य इह रमणीयचरणास्ततः शेषेणेत्यादिश्रुतिस्मृतिविरोधात्तस्मादात्मज्ञानादेव मुक्तिरिति भावः । अद्वैतज्ञानविधुराणां भेदज्ञानभाजां कर्मानुष्ठायिनां क्षय्यफलशालित्वे वाक्यशेषं प्रमाणयति—वक्ष्यति हीति । अद्वैतात्मोपदेशानन्तर्यमथशब्दार्थः । ये पुनरनुपासितगुरवस्तदुपदेशशून्या यथामति यथोक्तादद्वैतादन्यथा द्वैतमेव तत्त्वं विदन्ति ते परतन्त्राः सन्तो रागादिना कर्मानुतिष्ठन्तो विनाशिफलशालिनः स्युरिति श्रुत्यर्थः । अद्वैतात्मज्ञानादात्यन्तिकपुरुषार्थसिद्धिरित्यत्रापि वाक्यशेषमनुकूलयति—विपर्यये चेति । चकारात्क्रियापदमनुकृष्यते । स हि विद्वान्विद्यया निरस्ताविद्यादिमलः स्वपरिज्ञानात्स्वयमेव परमात्मा भवति । भेदप्रतिपत्तिहेतोरुच्छिन्नत्वादित्यर्थः ।

---

१ ख. ग. छ. °थेण प° । २ ख. ग. छ. °र्थोऽनति° । ३ ख. ग. छ. °यिफ° । ४ ख. छ. °शुद्धक° । ५ ख जिहीर्षया " । ६ क. ग. परात्मा ।

तथा द्वैतविषयानृताभिसंधस्य बन्धनं तस्करस्येव तप्तपरशुग्रहणे बन्धदाहाभावः संसारदुःखप्राप्तिश्चेत्युक्त्वाऽद्वैतात्मसत्याभिसंधस्यातस्करस्येव तप्तपरशुग्रहणे बन्धदाहाभावः संसारदुःखनिवृत्तिर्मोक्षश्चेति । अत एव न कर्मसहभाव्यद्वैतात्मदर्शनम् ।

भेदनिष्ठानां कर्मिणां पुरुषार्थो निरतिशयो न सिध्यति अद्वैतनिष्ठानां तु कर्म त्यजतां पुमर्थः सेत्स्यतीत्यत्र वाक्यशेषस्थं लिङ्गं दर्शयति—तथेत्यादिना । द्वैतमेव विषयस्तस्मिन्वाचारम्भणश्रुतेरनृतेऽभिसंधा यस्यामिसंधा सत्यत्वाभिमानस्तस्य बन्धनं परमानन्दस्याऽऽविर्भावरहित्यं संसारात्मकस्य दुःखस्य प्राप्तिश्च । यथा वस्तुतस्तस्करस्य नाहं तस्करोऽस्मीति मिथ्यैवाभिमन्यमानस्य परिशोधनार्थं तप्तपरशोर्ग्रहणे दाहो बन्धनं दुःखप्राप्तिश्च प्रतीयते, तथैव द्वैताभिनिवेशवतोऽनीति प्रथममुक्त्वा वस्तुतोऽतस्करस्य परैरारोपितस्करत्वस्य परिशुद्धतया तप्तपरशुग्रहणे दाहाद्यभाववद्द्वैताभावोपलक्षिते प्रत्यगात्मनि परमार्थसत्येऽभिमानवतो द्वैताच्च व्यावृत्तचित्तस्यानर्थध्वंसो निरतिशयानन्दाविर्भावश्चेति यथोक्तार्थानुरोधेनाग्रे श्रुतिर्वक्ष्यतीति योजना । केवलमात्मज्ञानं कैवल्यहेतुस्तत्सिद्ध्यर्थमुपनिषदारम्भ इति स्वपक्षो दर्शितः । स्वयूथ्यास्तु कर्मसमुच्चितमात्मज्ञानं मोक्षसाधनं तादर्थ्येनोपनिषदारम्भ इत्याहुस्तान्प्रत्याह—अत एवेति । यत्कृतकं तदनित्यमितिव्याप्त्यनुगृहीतया तद्यथेहेत्यादिश्रुत्या कर्मफलस्यानित्यत्वावगमाद्ब्रह्मविदाप्नोति परमित्यादिश्रुत्या च ज्ञानफलस्य नित्यत्वसिद्धेर्ज्ञानकर्मणोर्विरुद्धफलत्वाध्यवसायाद्द्वैतस्याऽऽत्मनो दर्शनं नैव कर्मणा सहं भवितुमुत्सहते । न हि विरुद्धयोस्तमःप्रकाशयोः समुच्चयः संगच्छते । तत्र समुच्चितज्ञानार्थत्वेनोपनिषदारम्भ इत्यर्थः ।

क्रियाकारकफलभेदोपमर्देन सदेकमेवाद्वितीयमात्मैवेदं सर्वमित्येवमादिवाक्यजनितस्य बाधकप्रत्ययानुपपत्तेः । कर्मविधिप्रत्यय इति चेत् । न । कर्तृभोक्तृस्वभावविज्ञानवतस्तज्जनितकर्मफलरागद्वेषादिदोषवतश्च कर्मविधानात् । अधिगतसकलवेदार्थस्य कर्मविधानाद्द्वैतज्ञानवतोऽपि कर्मेति चेत् । न । कर्माधिकृतविषयस्य कर्तृभोक्त्रादिज्ञानस्य स्वाभाविकस्य सदेकमेवाद्वितीयमात्मैवेदं सर्वमित्यनेनोपमर्दितत्वात् । तस्मादविद्यादिदोषवत एव कर्माणि विधीयन्ते । नाद्वैतज्ञानवतः । अत एव हि वक्ष्यति—"सर्व एते पुण्यलोका भवन्ति । ब्रह्मसंस्थोऽमृतत्वमेति" इति ।

किंचाद्वैतात्मज्ञानं स्वसाध्यसिद्ध्यर्थं वा कर्मापेक्षते स्वबाधकविधुननार्थं वा । नाऽऽद्यः । तस्यासाध्यफलत्वादिति मन्वानो द्वितीयं प्रत्याह—क्रियेति । वाक्यजनित-

---

१ क. 'त्तिश्चे' । २ क. 'णामिति श्रु' । ३ क. 'मन्वान' । ४ ख. दाहे ब' । ५ क. ग. ह्रीतत' । ६ क. 'हभावि भ' । ७ क. फले रा' । ८ क. 'र्थं क' ।

स्याद्वैतात्मज्ञानस्येति शेषः । तस्य बाधकाभावेन तत्परिहारार्थं सहकार्यपेक्षा नास्तीत्यर्थः । बाधकप्रत्ययाभावस्यासिद्धिमाशङ्कते—कर्मेति । तद्विषयो विधिप्रत्ययो यजेतेत्यादिविधिजनितः कर्तव्यतावबोधः । स चाऽऽत्मनि कर्तृत्वादिकमाक्षिप्तं कर्त्राद्यात्मज्ञानस्य बाधको भवतीत्यर्थः । कस्यायं कर्मविधिरज्ञस्य विदुषो वेति विकल्प्याऽऽद्यं प्रत्याह—नेत्यादिना । कर्त्राद्याकारं प्रमाणनिरपेक्षप्रकृतिप्रसूतं मिथ्याज्ञानं तद्वतस्तेन मिथ्याज्ञानेन जनितकर्मफलविषयो रागादिदोषस्तद्वतश्च कर्म विधीयते । न हि कर्ताऽहमित्यादिमिथ्याधियो रागद्वेषाभावे कर्म विधातुं शक्यम् । ‘ यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ’ इति स्मृतेः । अतोऽज्ञस्य कर्मविधिपक्षे न तत्प्रत्ययो बाधकः प्रत्यक्षाभावादित्यर्थः । द्वितीयं शङ्कते—अधिगतेति । अधीतस्वाध्यायो हि वैदिके कर्मण्यधिक्रियते । अध्ययनं चार्थावबोधफलमिति मीमांसकमर्यादा । तथा चाध्ययनवतो ज्ञातसर्ववेदार्थस्य यजेतेत्यादिना कर्मविधानादात्मज्ञानस्यापि कर्माङ्गत्वं गम्यते । न चाऽऽत्मज्ञानमपबाध्यते । अविरोधादित्यर्थः । न तावदर्थावबोधफलमध्ययनमिति प्रामाणिकमक्षरवाक्यफलं तदिति चाध्येतृप्रसिद्धं तत्राध्ययनविधिवशेन नाऽऽत्मज्ञानस्य कर्मविधिसंबन्धः संभवतीति परिहरति—नेति । किंच ममेदं कर्मेति कर्मण्यैश्वर्यं प्रतिपद्य व्यवस्थितं विषयीकृत्य प्रवृत्तस्य कर्त्राद्याकारविज्ञानस्य प्रमाणापेक्षामन्तरेण स्वभावप्राप्तस्य वाक्योत्थेन सम्यग्ज्ञानेनापह्नुतत्वात्कर्मफलविषयरागाद्ययोगात्तन्निबन्धनस्य कर्मणोऽपि दुरनुष्ठानत्वान्नाऽऽत्मज्ञस्य कर्मोपपत्तिरित्याह—कर्माधिकृतेति । अद्वैतात्मज्ञानस्य कर्मप्रवृत्तिविरोधित्वे फलितमुपसंहरति—तस्मादिति । अज्ञस्य कर्मविधिर्न त्वात्मज्ञस्येत्यत्र श्रुतिं संवादयति—अत एवेति । एते त्रयोऽप्याश्रमिणः कर्माधिकृता इति यावत् । यथा ब्रह्मचारी गृहस्थो वानप्रस्थश्चेत्येते कर्मिणस्तथा ब्रह्मविदपि कर्मी चेन्न पृथक्क्रियेत । पृथक्करणाच्च न तस्य कर्मविधिरिति मत्वोक्तम्—ब्रह्मसंस्थ इति ।

तत्रैतस्मिन्नद्वैतविद्याप्रकरणेऽभ्युदयसाधनान्युपासनान्युच्यन्ते । कैवल्यसंनिकृष्टफलानि चाद्वैतादीषद्विकृतब्रह्मविषयाणि “ मनोमयः प्राणशरीरः ” इत्यादीनि कर्मसमृद्धिफलानि च कर्माङ्गसंबन्धीनि । रहस्यसामान्यान्मनोवृत्तिसामान्याच्च यथाऽद्वैतज्ञानं मनोवृत्तिमात्रं तथाऽन्योन्यप्युपासनानि मनोवृत्तिरूपाणीत्यस्ति हि सामान्यम् । कस्तर्ह्यद्वैतज्ञानस्योपासनानां च विशेषः । उच्यते । स्वाभाविकस्याऽऽत्मन्यक्रियेऽध्यारोपितस्य कर्त्रादिकारकक्रियाफलभेदविज्ञानस्य निवर्तकमद्वैतविज्ञानम् । रज्ज्वादाविव सर्पाद्य-

---

१ क. °तावबो° । २ क. °षये रा° । ३ ख. घ, च. °था ह्यद्वै° । ४ क. °न्यान्युप° । ५ ख, °न्यविक्रि° ।

ध्यारोपलक्षणज्ञानस्य रज्ज्वादिस्वरूपनिश्चयः प्रकाशनिमित्तः । उपासनं तु यथाशास्त्रसमर्थितं किंचिदालम्बनमुपादाय तस्मिन्समानचित्तवृत्तिसंतानकरणं तद्विलक्षणप्रत्ययानन्तरितमिति विशेषः ।

यदि समुच्चयासंभवात्केवलमेवाऽऽत्मज्ञानं कैवल्यसाधनमिति तादर्थ्येनोपनिषदारभ्यते हन्त किमित्यस्यामुपनिषदि त्रिविधान्युपासनान्युपन्यस्यन्ते तत्राऽऽह-तत्रेति । उक्तेन रीत्योपनिषदारम्भे सतीति यावत् । स यो वायुं दिशां वत्सं वेद न पुत्ररोदं रोदितीत्यादीन्यभ्युदयफलान्युपासनानि । कैवल्येन संनिकृष्टफलत्वं नाम क्रममुक्तिफलत्वम् । अद्वैतान्निष्प्रपञ्चादीषद्विकृतं सगुणं ब्रह्म । कर्मसमृद्धिफलानि कर्मफलगतातिशयफलान्युद्गीथाद्युपासनानीत्यर्थः । आत्मविद्याप्रकरणे त्रिविधोपासनोपन्यासे हेतुमाह—रहस्येति । उपनिषत्पदवेदनीयत्वस्याऽऽत्मविद्यायामुपासनेषु चाविशेषादित्यर्थः । तत्रैव हेत्वन्तरमुद्भाव्य विभजते—मनोवृत्तीत्यादिना । आत्मज्ञानस्योपासनानां च यथोक्तं सामान्यमिष्यते चेत्तर्हि फलतोऽपि विशेषो न स्यादिति मन्वानः शङ्कते—कस्तर्हीति । फलतो विशेषं दर्शयन्नुत्तरमाह—उच्यत इति । तत्र प्रथममात्मज्ञानस्योपासनाभ्यो विशेषमादर्शयति—स्वाभाविकस्येति । प्रत्यगात्मनि क्रियाकारकफलविभागविकले कूटस्थे स्वभावशब्दिताविद्याकृतमध्यारोपितं कर्त्राद्याकारविज्ञानम् । तस्याद्वितीयत्वादिलक्षणाधिष्ठानयाथात्म्यज्ञानं निवर्तकम् । यथा रज्ज्वादावधिष्ठाने सर्पादिसमारोपरूपस्य मिथ्याज्ञानस्य प्रकाशादिकारणप्रसूतो रज्ज्वाद्यधिष्ठानस्वरूपनिश्चयो निवर्तकस्तथेत्यर्थः । संप्रत्युपासनानामद्वैतज्ञानाद्विशेषं दर्शयति—उपासनानं त्विति । शास्त्रं मनो ब्रह्मेत्युपासीतेत्यादि, किंचिदालम्बनं मनःप्रभृति विवक्षितम् । समानजातीयप्रत्ययसंतानकरणं विच्छिद्य विच्छिद्य ध्यायिनेऽपि सिध्यतीति विशिनष्टि—तद्विलक्षणेति । आत्मज्ञानस्योपासनानां च वान्तरविशेषमुपसंहरति—इति विशेष इति ।

तान्येतान्युपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्त्वावभासकत्वाद्[1]द्वैतज्ञानोपकारकाण्यालम्बनविषयत्वात्तु[2]साध्यानि चेति पूर्वमुपन्यस्यन्ते । तत्र कर्माभ्यासस्य दृढीकृतत्वात्कर्मपरित्यागेनोपासन एव दुःखं चेतःसमर्पणं कर्तुमिति कर्माङ्गविषयमेव तावदादावुपासनमुपन्यस्यते ।

(इति भाष्यकारोपोद्घातः) ।

ननु विद्याप्रकरणे यथोक्तोपासनानामुपदेशसंभवेऽपि विधेव प्राधान्यात्प्राथम्येनोच्यतामुपासनानि पुनरप्रधानत्वात्पाश्चात्येन वाच्यानीत्याशङ्क्याऽऽह—तानीति । उपासनानामीश्वरार्पणबुद्ध्याऽनुष्ठितानित्यादिकर्मवच्चित्तशुद्धिद्वारा ज्ञानकारणत्वात्कार्याच्च

---

१ ग. तु शा° । २ क. ग. ङ. च. °मर्पितं । ३ क. ग. °नलक्षणं । ४ क. °क्तारी° । ५ क. °नीत्याशङ्क्य वि° । ६ क. ग. घ च. °त्सखसा° ।

कारणस्य प्राथम्यप्रसिद्धेः साकारवस्तुविषयत्वेन सुसाध्यत्वाच्च मन्दानां सहसा तेषु प्रवृत्त्युपपत्तेरादावुपदेशः संभवतीत्यर्थः । तथाऽपि बहुविधेषूपासनेषु किमित्यङ्गावबद्धमेवोपासनं प्रथममुच्यते तत्राऽऽह—तत्रेति । प्राक्तने पुरुषे कर्माभ्यासस्यानादिवासनया दृढीकृतत्वादन्यस्ततत्तत्कर्मत्यागेऽतत्संबन्धिनि केवलोपासने चेतसः समर्पणं दुःखं कर्तुमित्यङ्गावबद्धमेव तावदुपासनमुच्यते । एवमादावुक्त्वा पुनरुपासनान्तराणि क्रमेण वक्तव्यानीत्यर्थः ।

(अथोपनिषत्) ।

ओमित्येतदक्षरमुद्गीथमुपासीत । ओमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥

ओमित्येतदक्षरमुद्गीथमुपासीत । ओमित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठम् । तस्मिन्हि प्रयुज्यमाने स प्रसीदति प्रियनामग्रहण इव लोकः । तदिहेतिपरं प्रयुक्तमभिधायकत्वाद्व्यावर्तितं शब्दस्वरूपमात्रं प्रतीयते । तथा चार्चादिवत्परस्याऽऽत्मनः प्रतीकं संपद्यते । एवं नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठमिति सर्ववेदान्तेष्ववगतम् । जपकर्मस्वध्यायाद्यन्तेषु च बहुशः प्रयोगात्प्रसिद्धमस्य श्रैष्ठ्यम् । अतस्तदेतदक्षरं वर्णात्मकमुद्गीथभक्त्यवयवत्वादुद्गीथशब्दवाच्यमुपासीत । कर्माङ्गावयवभूत ओंकारे परमात्मप्रतीके दृढ मैकाग्र्यलक्षणां मतिं संतनुयात् । स्वयमेव श्रुतिरोंकारस्योद्गीथशब्दवाच्यत्वे हेतुमाह—ओमिति ह्युद्गाय[गी]ति । ओमित्यारभ्य हि यस्मादुद्गायत्यत उद्गीथ ओंकार इत्यर्थः । तस्योपव्याख्यानं तस्याक्षरस्योपव्याख्यानमेवमुपासनमेवंविभूत्येवंफलमित्यादिकथनमुपव्याख्यानम् । प्रवर्तत इति वाक्यशेषः ॥ १ ॥

काण्डद्वयस्य नियतपौर्वापर्यप्रयुक्तसंबन्धमुपनिषत्तात्पर्यं चोक्त्वा प्रत्यक्षरं व्याख्यातुकामः प्रतीकमादत्ते—ओमित्येतदक्षरमिति । तत्र प्रथममोंकारस्याभिधायकत्वपक्षमेवावलम्बते—परमात्मन इति । अभिधानान्तरेभ्यो विशेषं दर्शयति—नेदिष्ठमिति । निकटतममतिशयेन प्रियमिति यावत् । ओंकारस्य नेदिष्ठत्वं समर्थयते—तस्मिन्निति । ओंकारस्यान्यत्र परमात्मनामत्वेऽपि प्रकृते किं विवक्षितमित्याशङ्क्याऽऽह—तदिहेति । प्रकृते हि वक्ये तदोमिति पदमितिशब्दशिरस्कं प्रयुक्तमितिशब्दसामर्थ्यादेव वाचकत्वाद्व्यावर्तितं शब्दस्वरूपमात्रमुपास्यं गम्यते । यत्र हीतिपरः प्रयोगो न तत्राभिधेयविवक्षाऽस्ति यथा गौरित्ययमाहेति । तथा चात्रेतिपरत्वादोंकारस्य स्वरूपमात्रमुपास्यं विवक्षितमित्यर्थः । तथोपास्यत्वार्थं श्रैष्ठ्यं साधयति—तथा चेति ।

---

१ क. ग. °नेनात° । २ ख. छ. ज. चेता स° । ३ क. ङ. °ङ्ग व° ।

इतिपरप्रयोगवशादभिधायकत्वाभावे सत्यर्चाशब्दितप्रतिमाया भगवत्प्रतीकत्ववदोंकारस्यापि परमात्मप्रतीकत्वेन श्रेष्ठत्वादुपास्यत्वसिद्धिरित्यर्थः । तदिदं श्रैष्ठ्यं सप्रमाणकं निगमयति—एवमिति । सर्ववेदान्तेष्वेतदालम्बनं परमित्यादिषु[1] । किंच नास्य श्रैष्ठ्यं समर्थनीयं प्रसिद्धत्वादित्याह—जपेति । गायत्र्यादिजपे यज्ञादौ कर्मणि स्वाध्यायस्याऽऽदावन्ते चौंकारस्य प्रयोगो दृश्यते ।

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥
ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते ॥ इति स्मृतेः ।

ओमिति ब्रह्मणः प्रवक्ष्यन्नाहेत्यादिश्रुतेश्चेत्यर्थः । ओमितीत्ययं भागो व्याख्यातः संप्रत्येतदक्षरमित्यस्यार्थमाह—अत इति । श्रेष्ठत्वमुपास्यत्वार्थमनुकृष्यते । व्याप्तेश्च समञ्जसमिति न्यायेन विशेषणस्यार्थवत्त्वमभिप्रेत्य रूढियोगमपहरतीति न्यायेनाक्षरशब्दस्य प्रकरणमनुसृत्य प्रसिद्धमर्थमाह—वर्णात्मकमिति । ग्रामो दग्धः पटो दग्ध इतिवदेकदेशे समुदायविषयं पदं प्रवृत्तमित्याह—उद्गीथेति । उपास्तिं विभजते—कर्मेति । उद्गीथावयवत्वादोंकारे तच्छब्दप्रवृत्तिरित्युक्तत्वादनन्तरवाक्यमकिंचित्करमित्याशङ्क्य श्रुत्युक्तो योऽस्मदुक्तो हेतुस्तेन स्फुटीक्रियते तत्रश्चोत्कृष्यास्माभिर्दर्शित इत्यभिप्रेत्याऽऽह—स्वयमेवेति । ओमित्येतदक्षरमित्यत्रोपासनोत्पत्तिविधिरुक्तः । संप्रति गुणं विवक्षुर्वाक्यान्तरमादाय व्याचष्टे—रस्येति । एवमुपासनमिति । रसनमत्वमाप्तिः समृद्धिरित्येवंगुणकमुपासनं यस्याक्षरस्य तत्तथेत्यर्थः । एवं विभूतीति । परमः परार्ध्यस्तेनेयं त्रयी विद्या वर्तत इत्याद्या विभूतिः स्तुतिर्यस्य तत्तथेति यावत् । एवंफलमिति । आप्नुयेता ह वै कामानामित्यादि फलं यस्योपास्यसाक्षात्कारस्य तत्तथोक्तमित्यर्थः । गोदोहनवदाश्रित्य विधानादधिकृताधिकारमिदमुपासनं तथाऽपि पृथगेव । पृथग्ह्यप्रतिबन्धः फलमिति न्यायेन फलवत्फलं याजमानमुद्गातुर्यजमानेन कर्मार्थं क्रीतत्वात्तत्कर्तृकस्योपासनस्यापि यजमानस्य स्वामिनः फलमिति वचनमादिशब्दार्थः । वाक्यस्य साकाङ्क्षत्वेनाऽऽनर्थक्यं वारयति—प्रवर्तत इति ॥१॥

एषां भूतानां पृथिवी रसः पृथिव्या आपो रसः ।
अपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य
वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न
उद्गीथो रसः ॥ २ ॥

---

१ क. ग. 'नं श्रेष्ठमेतदालम्बनं प' । २ ख. छ. ज. 'न्तरं वा' ।

एषां चराचराणां भूतानां पृथिवी रसो गतिः परायणमवष्टम्भः । पृथिव्या आपो रसोऽप्सु ह्योता च प्रोता च पृथिव्यतस्ता रसः पृथिव्याः । अपामोषधयो रसोऽप्परिणामत्वादोषधीनाम् । तासां पुरुषो रसोऽन्नपरिणामत्वात्पुरुषस्य । तस्यापि पुरुषस्य वाग्रसः । पुरुषावयवानां हि वाक्सारिष्ठा । अतो वाक्पुरुषस्य रस उच्यते । तस्या अपि वाच ऋग्रसः सारतरा । ऋचः साम रसः सारतरम् । तस्यापि साम्न उद्गीथः प्रकृतत्वादोंकारः सारतरः ॥ २ ॥

तदेवोपव्याख्यानमनुवर्तयन्नोंकारस्य रसतमत्वं गुणं विधातुं पातनिकां करोति — एषामिति । गतिरित्युत्पत्तिकारणत्वं परायणमिति स्थितिहेतुत्वमवष्टम्भ इति प्रलयनिदानत्वमुच्यत इति भेदः । वैपरीत्येन वाऽमूनि पदानि नेयानि । अद्यां पृथिवीरसत्वं साधयति—अप्सु ह्योति । अस्यार्थस्य श्रुत्यन्तरप्रसिद्धिं द्योतयितुं हिशब्दः । ओषधीनामपः प्रति कारणत्वाभावात्कथं तत्र रसशब्दस्तत्राऽऽह—अप्परिणामत्वादिति । कारणपरतया पूर्वत्र व्याख्यातोऽपि रसशब्दो गोरस इतिवदुत्तरत्र कार्यपरतया व्याख्येय इत्यर्थः । कथमोषधीनां पुरुषो रसः । न हि ताभिरसौ क्रियते तत्राऽऽह—अन्नेति । पुरुषरसत्वं वाचः समर्थयते—पुरुषेति । वाग्विहीनं हि प्रतिपुरुषान्तरं विनिन्दन्ति । अतो वाचः सारतमत्वं प्रसिद्धमिति हिशब्दार्थः । तस्याः सारिष्ठत्वप्रसिद्धिरतःशब्दार्थः । वाङ्निर्वर्त्यत्वादृचस्तद्रसत्वमित्यभिप्रेत्याऽऽह—सारतरेति । ऋचः सकाशादपि तदध्यूढं साम गीयमानं श्रुतिश्रोत्रोः सुखकरमिति मत्वाऽऽह—सारतरमिति । उद्गीथशब्दं चावयवे प्रकरणान्नियमयति—प्रकृतत्वादिति । न हि सामानोक्तं फलाय भवतीति मन्वानो ब्रूते—सारसर इति ॥ २ ॥

स एष रसानाꣳ रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः ॥ ३ ॥

एवं स एष उद्गीथाख्य ओंकारो भूतादीनामुत्तरोत्तररसानामतिशयेन रसो रसतमः । परमः परमात्मप्रतीकत्वात् । परार्ध्योऽर्थं स्थानं परं च तदर्थं चैं परार्थं तदर्हतीति परार्ध्यः परमात्मस्थानार्हः परमात्मवदुपास्यत्वादित्यभिप्रायः । अष्टमः पृथिव्यादिरससंख्यायां यदुद्गीथो य उद्गीथः ॥ ३ ॥

यदर्थं पृथिव्यादीनां रसत्वमुक्तं तदिदानीं दर्शयति— एवमिति । रसतमत्वगुणकमोंकारमुपास्यत्वार्थं विशेषणाभ्यां महीं करोति—परम इति । तस्य परमात्मस्था-

---

१ ख. ग. घ. ङ. च. °पोऽप्तु । २ क. °वर्णय° । ३ ख. ज. वाचो रसत° । ४ क. ग. तदूर्ध्वं । ५ क. ङ. च तं° ।

नयोग्यत्वं समर्थयते—परमात्मवदिति। यथा परमात्मा स्वरूपत्वेनानुसंधीयते तथाऽस्यापि तदात्मनाऽनुसंधेयत्वाद्विष्णुबुद्ध्यालम्बनार्हप्रतिमावदयमपि परमात्मबुद्ध्यालम्बनयोग्यो भवतीत्यर्थः। ॐकारात्पराचीनो रसो नास्तीति तदीयरसतमत्वस्फुटीकरणार्थं परिगणनातः सिद्धमष्टमत्वमनुवदति—अष्टम इति ननु भूतान्यारभ्य नवमत्वे प्रतीयमाने कथमोंकारस्याष्टमत्वं प्रतिज्ञायते तत्राऽऽह—पृथिव्यादीति। स एष इत्युक्तं व्यक्तीकर्तुं यदुद्गीथ इत्येतद्व्याचष्टे—य इति। पूर्ववदुद्गीथशब्दोऽवयवपरो नेतव्यः॥ ३॥

कतमा कतमर्क्कतमत्कतमत्साम कतमः कतम उद्गीथ इति विमृष्टं भवति॥ ४॥

वाच ऋग्रस इत्युक्तम्। कतमा सर्क्कतमत्तत्साम कतमो वा स उद्गीथः। कतमा कतमेति वीप्साऽऽदरार्था। ननु "वा बहूनां जातिपरिप्रश्ने डतमच्"। न ह्यत्र ऋग्जातिबहुत्वं कथं डतमच्प्रयोगः। नैष दोषः। जातौ परिप्रश्नो जातिपरिप्रश्न इत्येतस्मिन्विग्रहे जातावृग्व्यक्तीनां बहुत्वोपपत्तेः। न तु जातेः परिप्रश्न इति विगृह्यते। ननु जातेः परिप्रश्न इत्यस्मिन्विग्रहे कतमः कठ इत्याद्युदाहरणमुपपन्नं जातौ परिप्रश्न इत्यत्र तु न युज्यते। तत्रापि कठादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषः। यदि जातेः परिप्रश्नः स्यात्कतमा कतमर्गित्यादावुपसंख्यानं कर्तव्यं स्याद्विमृष्टं भवति विमर्शः कृतो भवति॥ ४॥

अथ गुणान्तरविधानार्थं प्रश्नमवतारयन्वृत्तमनुवदति—वाच इति। ऋचः साम रसः साम्न उद्गीथो रस इति चोक्तमिति द्रष्टव्यम्। इदानीमृगादिजातिं जिज्ञासमानः पृच्छति—कतमेति। वीप्सामात्रयं प्रश्ने तत्तज्जातिज्ञाने श्रद्धातिरेकं दर्शयितुमित्याह—कतमा कतमेति। प्रश्नत्रयमाक्षिपति—नन्विति। अनेकजात्यवच्छिन्नानां मध्ये यदैकस्या जातेर्निर्धारणार्घः परिप्रश्नो भवति तदा तस्मिन्विषये विकल्पेन डतमच्प्रत्ययः स्यात्। यथा बहूनां कठादीनां मध्ये कठजातिनिर्णयार्थं कतमे कठा इति प्रश्नो दृश्यते तथाऽन्यत्रापीति सूत्रार्थः। बहूनामेकस्या निर्धारणे डतमजित्यनेऽपि प्रकृते प्रश्नत्रये काऽनुपपत्तिरित्याशङ्क्याऽऽह—न हीति। अत्रेत्यध्यापकाध्येतृव्यवहारभूमिरुक्ता। ऋग्जातिग्रहणं सामजातेरुद्गीथजातेश्चोपलक्षणम्। तद्बहुत्वाभावेऽपि

---

१ ख. ग. °मत्वं स्फु°। २ ख. छ. ज. यदुद्गी°। ३ क. ग. °मच्प्रत्ययः। नै°। च. °मच्प्रत्ययप्रयोगः। नै°। ४ ख. घ. छ. °त्येवं विग्र°। ५ घ. ङ. च. °पत्तिर्न तु। ६ ख. घ. इत्येतस्मि°। ७ ख. ग. घ. ङ. °नम्। तत्रा°। ८ च. °ति॥ ४॥ विमर्शे। ९ ख. ग. छ. ज. °नुदवति। १० क. ग. ननु वेति। ११ ग. °यार्थः क°। १२ ख. छ. ज. ऋक्त्वजाति°।

किं नेच्छ्यते तत्राऽऽह—कथमिति । ऋगादिजातयो यदि भूयस्यः स्युस्तदा तासां मध्ये कतमज्जातिः कतमा सामजातिर्वा कतमा वाङ्मयजातिरत्र विवक्षितेति प्रश्नो युज्यते । न चास्ति तत्र जातिबहुत्वं प्रमाणाभावादतोऽनुपपन्नं प्रश्नत्रयमित्यर्थः । प्रश्नानुपपत्तिं दूषयति—नैष दोष इति । बहूनां तत्तज्जात्यवच्छिन्नानां संनिधाने जातौ सत्यां व्यक्तिबहुत्वसंभवात्तदन्यतमनिर्धारणार्थपरिप्रश्ने विकल्पेन कतमज्जेति मूत्रार्थाङ्गीकाराद्गादिजातौ तद्व्यक्तिबाहुल्यात्कतमा तद्व्यक्तिर्वाच ऋग्मम इत्यादौ विवक्षितेति प्रश्नपर्यवसानादुपपन्नं प्रश्नत्रयमित्यर्थः । यत्तु विग्रहानन्तरं गृहीत्वा प्रश्नानुपपत्तिरित्युक्तं तत्राऽऽह—न त्विति । तत्र चानुपपत्तिं यदि जातेरित्यत्र व्यक्तौ करिष्यति । अस्मदिष्टविग्रहापरिग्रहे वृत्तिकारीयमुदाहरणं विरुध्यते । कठशब्दस्य व्यक्तिविशेषत्वासंभवादिति शङ्कते—नन्विति । उदाहरणेऽपि सत्यां कठजातौ तद्व्यक्तिबाहुल्यात्तदन्यतमनिर्धारणाभिप्रायेण परिप्रश्ने कतमज्जेत्यङ्गीकारान्न परोक्षोदाहरणविरोधोऽस्मत्पक्षेऽस्तीति परिहरति—तत्रापीति । ननु द्विधाऽपि विग्रहोपपत्तौ किमिति त्वदिष्टो विग्रहो नियम्यते तत्राऽऽह—यदीति । त्वदिष्टविग्रहपरिग्रहश्चेद्गादिजातेरेकत्वात्प्रत्येकं बहुत्वायोगाद्वा बहूनामित्यादिसूत्रेण कतमर्क्कतमत्सामेत्युदाहरणं न सिध्येत् । तथा च तत्सिद्ध्यर्थं पृथग्विधानं प्रसज्येत । न हि वैदिकमुदाहरणं प्रमत्तगीतमिव हातुं शक्यम् । तस्माद्गादिव्यक्तिरेवात्र प्रष्टुं युक्तेत्यर्थः ॥ ४ ॥

वागेवर्क्प्राणः सामोमित्येतदक्षरमुद्गीथः । तद्वा एत-
न्मिथुनं यद्वाक्च प्राणश्चर्क्चं सामं च ॥ ५ ॥

विमर्शे हि कृते सति प्रतिवचनोक्तिरुपपन्ना वागेवर्क्प्राणः सामेति । वाग्ऋचोरेकत्वेऽपि नाष्टमत्वव्याघातः पूर्वस्माद्वाक्यान्तरत्वादाप्तिगुणसिद्ध्यै ओमित्येतदक्षरमुद्गीथ इति । वाक्प्राणाद्यृक्सामयोनी इति वागेवर्क्प्राणः सामेत्युच्यते । यथाक्रममृक्सामयोन्योर्वाक्प्राणयोर्ग्रहणे हि सर्वासामृचां सर्वेषां च साम्नामवरोधः कृतः स्यात् । सर्वर्क्सामावरोधे चर्क्सामसाध्यानां च सर्वकर्मणामवरोधः कृतः स्यात् । तदवरोधे च सर्वे कामा अवरुद्धाः स्युः । ओमित्येतदक्षरमुद्गीथ इति भक्त्याशङ्का निवर्त्यते । तद्वा एतदिति मिथुनं निर्दिश्यते । किं तन्मिथुनमित्याह यद्वाक्च प्राणश्च सर्वऋक्सामकारणभूतौ मिथुनम् । ऋक्च साम चेति ऋक्सामकारणाद्यृक्सामशब्दोक्तावित्यर्थः । न तु स्वतन्त्रमृक्च साम च मिथुनम् । अन्यथा

---

१ ख. छ. ञ. °तिः सा° । २ क. °थक्सूत्रविधा° । ३ ख. °म चेति ॥ ५ ॥ ४ ख. घ. ङ. च. साम । वा° । ५ ख. °द्धये वा° । ६ ख. घ. ङ. °नां क° । ७ च. °रणभूतावृ°। ८ ख. तु स्वातन्त्र्येणर्क्चं° । ९ घ, ङ. च °तन्त्रे ऋक्च ।

हि वाक्च प्राणश्चेत्येकं मिथुनमृक्साम चापरं मिथुनमिति द्वे मिथुने स्याताम् । तथा च तदेतन्मिथुनमित्येकवचननिर्देशोऽनुपपन्नः स्यात् । तस्माद्ऋक्सामयोर्वाक्प्राणयोरेव मिथुनत्वम् ॥ ५ ॥

किमिति यथोक्तरीत्या विमृश्यते । विवक्षितमृगादिस्वरूपमेवाऽऽदावुपन्यस्यन्नां लाघवादित्याशङ्क्याऽऽह—विमर्शे हीति । शिष्यभूतया श्रुत्या चोदिते सैवाऽऽचार्यभूता परिहरति—वागेवेति । नन्वाद्ये प्रतिवचने वाग्रूचोरेकत्वावगमादोंकारस्य रसतमवाक्योपदिष्टमष्टमत्वं व्याहन्येतेत्याशङ्क्याऽऽह—वाग्रूचोरिति । कथं पुनारसतमवाक्यादिदं प्रश्नप्रतिवचनरूपवाक्यं भिद्यतेऽर्थाधिक्याभावात्तत्राऽऽह—अन्नमिति । पूर्वं हि वाक्यमोंकारस्य रसतमत्वं विदधाति । इदं तु तस्यैवाऽऽष्टगुण्यं विधत्ते । तथा च तादृग्गुणविध्यर्थत्वेनास्य वाक्यान्तरत्वादेतद्वाक्यवशादष्टमत्वाभावेऽपि पूर्ववाक्योदोंकारस्याष्टमत्वमविरुद्धमित्यर्थः । तथाऽपि कथमृगादिजातीये पृष्टे वागेवर्गित्यादिप्रतिवचनमुचितं तद्व्यक्तिविशेषवचनमेव प्रश्नानुसारीत्याशङ्क्याऽऽह—वाक्प्राणाविति । वाग्रूचो योनिस्तान्निर्वर्तकत्वात् । प्राणश्च साम्नो हेतुर्बलेन हि गीतिरुत्पाद्यते । तथा च वागेवेत्यादिना कार्यकारणयोरभेदोपदेशाद्वाङ्मात्रं सममात्रं वा तत्तत्कारणात्मकं प्रतीयते । तेन पूर्वत्रापि व्यक्तिरेवाविवक्षिता । प्रश्नप्रतिवचनयोरेकार्थत्वात् । न चैवमृगादिजातेरेकत्व ङुतमच्प्रत्ययानुपपत्तिस्तत्तज्जात्यवच्छिन्नानामृक्सामोद्भोथानां संनिधावृगादिजातेरेकस्या निर्धारणार्थं परिप्रश्ने तत्प्रयोगसंभवाद्गादिषु प्रत्येकं भेदविवक्षया षष्ठीसमासे दूषणमुक्तम् । तत्र प्रत्येकमेकत्वमुपेत्योक्तरीत्या षष्ठीसमासे तु न किंचिद्दूष्यतीति भावः । ऋगात्मिकाया वाचः सामात्मकस्य प्राणस्य ग्रहणे फलितं दर्शयन्नुक्तमेव व्यक्तीकरोति—यथाक्रममिति । ऋक्सममात्रावरोधेऽपि सिध्यतीत्याशङ्क्याऽऽह—सर्वेति । तथाऽपि किं स्यादिति चेत्तदाह—सर्वे कामा इति । उक्तप्रक्रियया सर्वकामावाप्तिहेतुरोंकारो विवक्षिताष्टिगुणकः सिध्यतीत्यर्थः । तृतीये वचने तात्पर्यमाह—ओमित्येतदिति । अत्रापि पूर्ववज्जातिगृहीतौ तद्व्यक्तित्वेन भक्तिरेवोक्तेति शङ्कां निरसितुमोमित्येतदक्षरमिति विशेषणम् । तथा चोद्गीथस्तदवयवो विशेषणात्प्रकरणाच्चेत्यर्थः । पारम्पर्येण वाक्प्राणयोः सर्वकामसंबन्धादुद्गीथस्यापि तथाभूतवागादिसंबन्धादस्ति सर्वकामसंबन्ध इत्युक्तम् । इदानीमोंकारस्य वाक्प्राणद्वारा सर्वकामसंबन्धे हेत्वन्तरमाह—तद्वा इति । तदेतत्पदयोरक्षरविषयत्वं व्यावर्त्य वक्ष्यमाणविषयत्वं दर्शयति—मिथुनमिति । वैशब्दो मिथुनप्रसिद्ध्यर्थः । वाक्च प्राणश्चेति यदुभयमुपलभ्यते तदेतन्मिथुनमिति योजनामङ्गीकृत्य वाक्यार्थमाह—ऋक्साम-

---

१ ख. घ. ङ. °णश्चैकं । २ ख. छ. झ. °दिरूं । ३ क. °रूपं वा° । ४ ख. छ. झ. °था वा° । ५ ख. छ. झ. वाक्प्राण° । ६ ख, ग. छ. ज. तन्मि° ।

मेति । वाक्प्राणयोर्ऋक्सामकारणत्वमुत्तरवाक्येन(ण) स्पष्टयति— ऋक्वेति । यथा-वाक्प्राणौ मिथुनमेवमृक्साम च स्वातन्त्र्येण मिथुनं निर्देशसामान्यादित्याशङ्क्याऽऽह—न त्विति । विपक्षे दोषमाह—अन्यथेति । इष्टमेव मिथुनद्वयमिति चेन्नेत्याह—तथा चेति । ननु मिथुनयोरनुगतं मिथुनत्वमादायैकवचनमुपपत्स्यते चेन्नेत्याह—तस्मादिति । उपक्रमभङ्गान्न स्वतन्त्रमिथुनद्वयमस्तीत्यर्थः ॥ ५ ॥

तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे सꣳसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ॥ ६ ॥

तदेतदेवंलक्षणं मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते । एवं सर्वकामावाप्तिगुणविशिष्टं मिथुनमोंकारे संसृष्टं विद्यत इत्योंकारस्य सर्वकामावाप्तिगुणवत्त्वं प्रसिद्धम् । वाङ्मयत्वमोंकारस्य प्राणनिष्पाद्यत्वं च मिथुनेन संसृष्टत्वं मिथुनस्य कामापयितृत्वं प्रसिद्धमिति दृष्टान्त उच्यते । यथा लोके मिथुनौ मिथुनावयवौ स्त्रीपुंसौ यदा समागच्छतो ग्राम्यधर्मतया संयुज्येयातां तदाऽऽपयतः प्रापयतोऽन्योन्यस्येतरेतरस्य तौ कामम् । तथा च स्वात्मानुप्रविष्टेन मिथुनेन सर्वकामाप्तिगुणवत्त्वमोंकारस्य सिद्धमित्यभिप्रायः ॥ ६ ॥

भवतु वाक्प्राणाख्यमृक्सामात्मकवाक्प्राणरूपम् । ओंकारमिथुनयोः संसर्गे किं फलतीत्याह—एवमिति । कया पुनर्विधया मिथुनेन संसृष्टत्वमक्षरस्य सेत्स्यतीत्यत्राऽऽह—वाङ्मयत्वमिति । यत्तु सर्वकामाप्तिगुणविशिष्टं मिथुनमित्युक्तं तदुपपादयति—मिथुनस्येति । प्रसिद्धमिति । तादृगर्थो यथोक्ताक्षरस्य सर्वकामापयितृत्वे दृष्टान्तः सम्प्रत्युच्यतेऽनन्तरवाक्येने(णे)त्यर्थः । दृष्टान्तमेव विवृणोति—यथेत्यादिना । मिथुनद्वयं नास्तीत्युक्त्वा कथं मिथुनाविति द्विवचनं तत्राऽऽह—मिथुनावयवाविति । ग्राम्यधर्मतया तथाविधव्यापारतयेति यावत् । वैशब्दोऽवधारणे । विवक्षितं दार्ष्टान्तिकमाचष्टे—तथेति ॥ ६ ॥

तदुपासकोऽप्युद्गाता तद्धर्मा भवतीत्याह—

आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥ ७ ॥

---

१ क. ग. घ. ङ. 'माप्ति' । २ ख. ङ. 'मापि' । ३ ख. घ. ङ. 'त्वं सि' । ४ घ. ङ. 'ष्टत्वमेव मि' । ५ ख. घ. ङ. 'था स्वा' । ६ क. ग. 'त्स्यति तत्राऽऽ' । ७ ख. ग. ङ. तीति । आ' ।

आपयिता ह वै कामानां यजमानस्य भवति य एतदक्षरमेवमाप्तिगुण बहुद्गीथमुपास्ते तस्यैतद्यथोक्तं फलमित्यर्थः । " तं यथा यथोपासते तदेव भवति " इति श्रुतेः ॥ ७ ॥

एवमोंकारमाप्तिगुणविशिष्टं शिष्ट्वा तदुपासनाफलं कथयति-तदुपासकोऽपीति । तद्धर्मेत्युपासकस्याऽऽप्तिगुणवैशिष्ट्योक्तिः । आपेति वक्तव्ये कथमापयितेत्युक्तं तत्राऽऽह-यजमानस्येति । निपातौ त्ववधारणार्थौ । उद्गीथं तदवयवभूतमिति यावत् । आप्तिगुणवदोंकारोपासनात्कथमुपासिता तद्गुणो भवतीत्याशङ्क्याऽऽह-तमिति ॥७॥

तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदाहैषो एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥ ८ ॥

समृद्धिगुणवांश्चोंकारः । कथम्--तद्वा एतत्प्रकृतमनुज्ञाक्षरमनुज्ञा च साऽक्षरं च तत् । अनुज्ञाऽनुमतिरोंकार इत्यर्थः । कथमनुज्ञेत्याह श्रुतिरेव । यद्धि किंच यत्किंच लोके ज्ञानं धनं वाऽनुजानाति विद्वान्धनी वा तत्रानुमतिं कुर्वन्नोमित्येव तदाह । तथा च वेदे—"त्रयस्त्रिंशदित्योमिति होवाच" इत्यादि । तथा च लोकेऽपि तवेदं धनं गृह्णामीत्युक्त ओमित्याह । अत एषा उ एवैषैव समृद्धिर्यदनुज्ञा याऽनुज्ञा सा समृद्धिस्तन्मूलत्वादनुज्ञायाः । समृद्धो ह्योमित्यनुज्ञां ददाति तस्मात्समृद्धिगुणवानोंकार इत्यर्थः । समृद्धिगुणोपासकत्वात्तद्धर्मा सन्समर्धयिता ह वै कामानां यजमानस्य भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यादि पूर्ववत् ॥ ८ ॥

उत्तरग्रन्थस्य गुणान्तरविधाने तात्पर्यं दर्शयति—समृद्धीति । तस्य समृद्धिगुणवत्त्वमप्रामाणिकमित्याशङ्क्य परिहरति— स्वयमित्यादिना । तदेतत्पदयोरोंकारस्वयमक्षरं विषयत्वेन निर्दिशति—प्रकृतमिति । तस्य स्मृत्यर्थो वैशब्दः । अनुज्ञाक्षरमित्येतद्विगृह्य विवक्षितेनार्थेन घटयति—अनुज्ञा चेति । तस्यानुज्ञात्वे प्रश्नपूर्वकं प्रसिद्धिमुपन्यस्यति-कथमिति । तत्रेति ज्ञानधनयोरुक्तिस्तदित्यनुमन्तव्यं साधारण्येनोच्यते। ओंकारस्यानुज्ञाक्षरत्वे लोकप्रसिद्धिवद्वेदप्रसिद्धिं समुच्चिनोति-तथा चेति। कत्येव देवा याज्ञवल्क्येति शाकल्येन पृष्टे त्रयस्त्रिंशदिति याज्ञवल्क्येन प्रत्युक्ते-

---

१ ख. ग. 'द्वेदे प्र'।

सत्योमिति शाकल्योऽनुज्ञां कृतवान् । पुनश्च कत्थेवेति प्रश्ने षडिति प्रतिवचने सत्योमिति होवाचेत्यादि वाक्यं बृहदारण्यके यथोक्तार्थानुपरि प्रसिद्धमित्यर्थः । यद्धि किंचेत्यादावुक्तां लोकप्रसिद्धिमेव प्रकटयति—तथा च लोकेऽपीति । ओंकारस्य लोकवेदप्रसिद्धिम्यामनुज्ञात्वेऽपि कथं समृद्धिगुणकत्वमित्याशङ्क्याऽऽह—अथ इति । उशब्दोऽप्यर्थः समृद्धिशब्दादुपरि संबध्यते । तस्याः समृद्धिमूलत्वं साधयति—समृद्धो हीति । अनुज्ञायाः समृद्धिं प्रति कारणत्वेन समृद्धित्वे सत्योंकारस्यापि तदात्मकस्य समृद्धिगुणवत्त्वं सिद्धमित्युपसंहरति—तस्मादिति । समर्धयितेत्यादिफलवाक्यं प्रत्याह—समृद्धीति । अस्मिन्वाक्ये समर्धयितेत्यादिपदजातमापयितेत्यादिपूर्ववद्व्याख्येयमित्याह—इत्यादि पूर्ववदिति ॥ ८ ॥

तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शꣳसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन ॥ ९ ॥

अथेदानीमक्षरं स्तौत्युपास्यत्वात्प्ररोचनार्थम् । कथं, तेनाक्षरेण प्रकृतेनेयमृग्वेदादिलक्षणा त्रयी विद्या त्रयीविद्याविहितं कर्मेत्यर्थः । न हि त्रयी विद्यैवाऽऽश्रावणादिभिर्वर्तते कर्म तु तथा प्रवर्तत इति प्रसिद्धम् । कथमोमित्याश्रावयत्योमिति शꣳसत्योमित्युद्गायतीति लिङ्गाच्च सोमयाग इति गम्यते । तच्च कर्मैतस्यैवाक्षरस्यापचित्यै पूजार्थम् । परमात्मप्रतीकं हि तत् । तदपचितिः परमात्मन एव सा । "स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति स्मृतेः । महिम्ना रसेन किंचैतस्यैवाक्षरस्य महिम्ना महत्त्वेन ऋत्विग्यजमानादिप्राप्यैरित्यर्थः । तयैतस्यैवाक्षरस्य रसेन व्रीहियवादिरसनिर्वृत्तेन हविषेत्यर्थः । यागहोमाद्यक्षरेण क्रियते । तच्चाऽऽदित्यमुपतिष्ठते । ततो वृष्ट्यादिक्रमेण प्राणोऽन्नं च जायते । प्राणैरन्नेन च यज्ञस्तायते । अत उच्यतेऽक्षरस्य महिम्ना रसेनेति ॥ ९ ॥

ओंकारस्य गुणत्रयवतः सफलमुपासनमुक्तम् । तथा वक्तव्याभावात्तेनेयमित्यादिवाक्यमनर्थकमित्याशङ्क्याऽऽह—अथेति । स्तुतेरानर्थक्यमाशङ्क्याऽऽह—उपास्यत्वादिति । प्ररोचनं प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । त्रयी विद्या वर्तत इति संबन्धः । त्रयी विद्येत्यस्योपचरितार्थत्वं कथयति—त्रयी विद्येति । किमिति श्रुतं त्यक्त्वा व्याख्यायते तत्राऽऽह—न हीति । तस्याः स्वरूपलाभस्यानादित्वेन हेत्वनपेक्षत्वादित्यर्थः । कर्मापि कथमाश्रावणादिभिरात्मानं लभते तत्राऽऽह—कर्म

१ अ. °कथं तत्राऽऽह । २ क. ग. घ. ङ. °य विहि° । ३ ङ. °दिनि° ।

त्विति । प्रसिद्धिमेव प्रश्नद्वयति-कथमित्यादिना । अध्वर्यवहौत्रौद्गात्रसमाहारस्य दर्शपूर्णमासादिष्वसंभवादग्निष्टोमादिषु च संभवात्त्रित्वसमाहारालिङ्गादोंकारेण प्रवर्त्यमानं त्रयीविहितं कर्म सोमयाग इति प्रतिभातीत्याह-लिङ्गाच्चेति । स्तुत्यर्थेनोंकृतं कर्मेति न्यायादोंकारेण वैदिकस्य कर्मणः स्थितिरिति स्तुतिं विधाय स्तुत्यन्तरमाह-तच्चेति । कथं पुनरक्षरं कर्मणा पूज्यते तत्राऽऽह-परमात्मेति । तस्य तत्प्रतीकत्वे किं स्यादिति चेत्तदाह-तदुपचितिरिति । ननु कर्मणा परमात्मा चेदाराध्यते तर्हि तत्प्रतीकत्वादक्षरस्यापि तेनाऽऽराधनं स्यात् । न चेश्वरस्तेनाऽऽराध्यत इति प्रमाणमस्ति तत्राऽऽह-स्वकर्मणेति । वर्णाश्रमविहितेन कर्मणेश्वरं प्रसाद्य तत्प्रसादवशात्तत्फलं कर्ता प्राप्नोतीति भगवतोक्तत्वादीश्वरपूजार्थं कर्मेति गम्यते । तथा च तत्प्रतीकत्वादोंकारस्य तत्पूजार्थं कर्मेति युक्तमित्यर्थः । वैदिकं कर्माक्षरपूजार्थमित्यक्षरं स्तुत्वा विधा[ना]न्तरेण स्तौति-किंचेति । यजमानादीत्यादिपदेन पत्नी गृह्यते । प्राणैस्त्रयीविहितं कर्म वर्तत इति संबन्धः । स्तुत्यन्तरमाह-तथेति । यथाऽक्षरविकारैर्यजमानादिप्राणैर्वैदिकं कर्म प्रवर्तते तथेति यावत् । हविषेत्यत्रापि पूर्ववदन्वयः । कथमृत्विगादिप्राणानां हविषश्चाक्षरविकारत्वमत आह-प्राणेति । आदिशब्दोऽनुक्तवैदिककर्मसंग्रहार्थः । " तस्मादोमित्युदाहृत्य " इत्यादिस्मृतेरित्यर्थः ।

अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥

इति स्मृतिमाश्रित्याऽऽह-तच्चेति । वृष्ट्यादीत्यादिशब्देनान्नस्य प्रजानां चोत्पत्त्युपकरणं सर्वमुच्यते । तथाऽपि कथमेतस्यैवाक्षरस्य महिम्नेत्यादि तत्राऽऽह-प्राणैरिति ॥ ९ ॥

तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या च यदेवं विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति ॥ १० ॥

इति प्रथमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

---

१ क. °सिद्धत्वमे° । २ ज. 'रेणैव वै° । ३ ख, ग ज. 'मै व' ।

तत्राक्षरविज्ञानवतः कर्म कर्तव्यमिति स्थितमाक्षिपति—तेनाक्षरेणोभौ यच्चै-तदक्षरमेवं व्याख्यातं वेद यश्च कर्ममात्रविदक्षरयाथात्म्यं न वेद तावुभौ कुरुतः कर्म । तयोश्च कर्मसामर्थ्यादेव फलं स्यात्किं तत्राक्षरयाथात्म्य-विज्ञानेनेति । दृष्टं हि लोके हरीतकीं भक्षयतोस्तद्रसाभिज्ञेतरयोर्विरेचनम् । नैवम् । यस्मान्नाना तु विद्या चाविद्या च । भिन्ने हि विद्याविद्ये । तुशब्दः पक्षव्यावृत्त्यर्थः । नोंकारस्य कर्माङ्गत्वमात्रविज्ञानमेव रसतमाप्तिसमृद्धिगुण वद्विज्ञानं किं तर्हि ततोऽभ्यधिकम् । तस्मात्तदङ्गाधिक्यात्फलाधिक्यं युक्त-मित्यभिप्रायः । दृष्टं हि लोके वणिक्शबरयोः पद्मरागादिमणिविक्रये वणिजो विज्ञानाधिक्यात्फलाधिक्यम् । तस्माद्यदेव विद्यया विज्ञानेन युक्तः सन्करो-ति कर्म श्रद्धया श्रद्दधानश्च सङ्गुपनिषदा योगेन युक्तश्चेत्यर्थः । तदेव कर्म वीर्यवत्तरमविद्वत्कर्मणोऽधिकफलं भवतीति । विद्वत्कर्मणो वीर्यवत्तर[त्व]वच्च-नादविदुषोऽपि कर्म वीर्यवदेव भवतीत्यभिप्रायः । न चाविदुषः कर्मण्यनधि-कारः । औषस्त्ये काण्डेऽविदुषामप्यार्त्विज्यदर्शनात् । रसतमाप्तिसमृद्धिगुणव-दक्षरमित्येकमुपासनम् । मध्ये प्रयत्नान्तरादर्शनात् । अनेकैर्हि विशेषणैरने कधोपास्यत्वात्खल्वेतस्यैव प्रकृतस्योद्गीथाख्यस्याक्षरस्योपव्याख्यानं भव-ति ॥ १० ॥

इति प्रथमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अक्षरस्य स्तुत्या महीकृतत्वादुपासने सिद्धे किमुत्तरेण ग्रन्थेनेत्याशङ्क्याऽऽह—तत्रेति । पूर्वस्मिन्संदर्भे स्तुतिवशादक्षरविज्ञाने कर्तव्ये तन्निष्पाद्यं कर्म तद्विज्ञानवतोऽनुष्ठेयमिति स्थितं तदाक्षेप्तुमुत्तरं वाक्यमित्यर्थः । आक्षेपाक्षराणि व्याचष्टे—तेनेत्या-दिना । ननु कर्मकर्तृत्वे विद्वदविदुषोर्विद्वानेव तत्फलमश्नुते नाविद्वानिति कथमित्याश-ङ्क्याऽऽह—तयोश्चेति । इतिशब्दस्त्वाक्षिपतीत्यनेन संबध्यते । कथं विद्वदविदुषोर-विशिष्टं फलमित्याशङ्क्य दृष्टान्तमाह—दृष्टं हीति । विमतं न स्वतन्त्रफलमङ्गज्ञा-नत्वादाज्यावेक्षणवदिति प्राप्ते प्रत्याह—नैवमिति । हेतुत्वेनावतारितं वाक्यं व्याचष्टे—भिन्ने हीति । विद्योपासना कर्माविद्या तयोर्भिन्नत्वं पृथक्फलवत्त्वं तत्र विद्यावैयर्थ्य-मित्यर्थः । विद्यायाः स्वतन्त्रफलत्वं नास्तीति पक्षस्य व्यावृत्तिप्रकारमेव प्रपञ्चयति—नेत्यादिना । अङ्गज्ञानाद्गुणवदक्षरज्ञानस्याऽऽधिक्ये फलितमाह—तस्मादिति । तदङ्गं कर्माङ्गमुद्गीथमात्रज्ञानं तस्मादाधिक्याद्विशिष्टाक्षरज्ञानस्येति यावत् । यत्तु पुनरुक्तं तयोश्च कर्मसामर्थ्यादेव फलं स्यादिति तत्राऽऽह—दृष्टं हीति । यत्त्वङ्गज्ञानत्वादिति

---

१ ख. °भौ कुरुतो य° । २ ङ. °श्च स्वक° । ३ ख. ञ. °र्थः । स्व° । ४ ख. छ. झ. °लत्वं ना°।

तत्किमङ्गत्वे सति ज्ञानत्वं किंवाऽऽश्रित्य विहितत्वमथवैतदेव ज्ञानत्वविशेषितम्। नाऽऽद्यः। तन्निर्धारणनियमन्यायेनासिद्धेः। न द्वितीयो गोदोहने व्यभिचारात्। न तृतीयो दृष्टान्तस्य साधनविकलत्वादाज्यावेक्षणस्याऽऽश्रित्य विध्युद्दाहणत्वहिभूतत्वाद-ङ्गसंबन्धज्ञानत्वमात्रेण दृष्टान्तत्वे सत्यङ्गत्वोपाधेः संभवादित्यभिप्रेत्य ज्ञानाधिक्ये फलाधिक्यमित्यत्रानन्तरवाक्यं योजयति—तस्मादिति। विज्ञानमुद्गीथाद्यङ्गमात्रविषयमुपासनातिरिक्तं तेनेति यावत्। योगो देवतादिविषयमुपासनम्। इतिशब्दस्तदर्थसमाप्त्यर्थः। तत्रैवार्थसिद्धमर्थं कथयति—विद्वदिति। नन्वर्थी समर्थो विद्वानपर्युदस्तश्च कर्मण्यधिकारीत्यङ्गीकारादविदुषस्तल्लक्षणाक्रान्तस्यानधिकारात्कथं तत्कर्म वीर्यवदिति प्रतिज्ञायते तत्राऽऽह—न चेति। औषस्त्य उषस्तिसंबन्धे मटचीहतेष्वित्यादिके तस्मिन्ग्रन्थजाते विद्याहीनानामपि कर्मानुष्ठानं दृश्यते प्रस्तोतर्यो देवतेत्यादौ तां चेदविद्वानित्यादिलिङ्गात्। तस्मादविदुषोऽपि कर्मण्यधिकारः। अधिकारलक्षणे तु ज्ञानाभावेऽपि द्रव्यादिज्ञानमात्रेण विशेषणसिद्धिरित्यर्थः। गुणवदक्षरज्ञानं स्वतन्त्रमित्युक्तम्। तत्तु रसतमगुणवदक्षरविषयमेकमुपासनम्। तत्र च विध्युद्देशे फलस्याश्रुतत्वेऽपि विश्वजिन्न्यायेन वा तत्कल्प्यते। आदित्यगुणवतः समृद्धिगुणवतश्चाक्षरस्य द्वे विज्ञाने प्रत्येकं फलश्रुतेः। तथा चात्र त्रीण्युपासनानि पृथक्फलानि विवक्षितानीत्यत आह—रसतमेति। न तावदिहोपासीतेतिविधिव्यतिरेकेण मध्ये विध्यन्तरमुपलभ्यते। न चाऽऽप्तेता ह वै कामानामित्यादिवाक्ये फलश्रुत्या विधिरुन्नेयः। रसतमगुणवदक्षरविज्ञानविधौ फलाकाङ्क्षिण्यर्थवादस्थफलांशान्वयेनानेकगुणवदेकविज्ञानसंभवे विधिभेदकल्पनायोगात्। खल्वर्थवादिकफलवदनेकविशेषणकैकोपासनविषयविध्यभ्युपगमेन वाक्यैक्यसंभवे वाक्यं भेत्तुमुचितम्। एतेन विश्वजिन्न्यायो निरस्तः। रात्रिसत्रन्यायस्तु प्रकृताविरोधीति भावः। तस्योपव्याख्यानमित्युक्तस्योपसंहारवाक्यं खल्वेतस्येत्यादि, तत्रैतच्छब्देन प्रकृताकर्षणे कारणमाह—अनेकैरिति। रसतमादिसमृद्धिरूपाण्यनेकानि विशेषणानि तैर्विशिष्टत्वेनाक्षरस्यानेकप्रकारेणोपास्यत्वात्। प्रकारभेदेऽप्युपासनैक्यस्य प्रागेवोक्तत्वात्प्रकृतस्यैवाक्षरतदुपव्याख्यानं यत्खलु विहितमित्यर्थः॥ १० ॥

इति प्रथमाध्यायस्य प्रथमः खण्डः॥ १ ॥

(अथ प्रथमाध्यायस्य द्वितीयः खण्डः)।

देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध

---

१ ख. छ. अ. °तावि°। २ ख. छ. ज. °र्थं कर्म। ३ ख. ग. छ. झ. ट. °दित°। ४ क. ग. °कारल°। ५ छ. ख. अ. °भेवमु°। ६ क °गान्न ख°। ७ ख. अ. °वे मे°।

देवा उद्गीथमाजहूरुरनेनैनानभिभविष्याम इति ॥ १ ॥

देवासुरा देवाश्चासुराश्च । देवा दीव्यतेर्द्योतनार्थस्य शास्त्रोद्भासिता इन्द्रियवृत्तयः । असुरास्तद्विपरीताः स्वेष्वेवासुषु विष्वग्विषयासु प्राणनक्रियासु रमणात्स्वाभाविकयस्तमआत्मिका इन्द्रियवृत्तय एव । ह वा इति पूर्ववृत्तोद्भासकौ निपातौ । यत्र यस्मिन्निमित्त इतरेतरविषयापहारलक्षणे संयेतिरे । संपूर्वस्य यततेः संग्रामार्थत्वमिति संग्रामं कृतवन्त इत्यर्थः । शास्त्रीयमकाशवृत्त्यभिभवनाय प्रवृत्ताः स्वाभाविकयस्तमोरूपा इन्द्रियवृत्तयोऽसुराः । तथा तद्विपरीताः शास्त्रार्थविषयविवेकज्योतिरात्मानो देवाः स्वाभाविकतमोरूपासुराभिभवनाय प्रवृत्ता इत्यन्योन्याभिभवोद्भवरूपः संग्राम इव सर्वप्राणिषु प्रतिदेहं देवासुरसंग्रामोऽनादिकालप्रवृत्त इत्यभिप्रायः । स इह श्रुत्याऽऽख्यायिकारूपेण धर्माधर्मोत्पत्तिविवेकविज्ञानाय कथ्यते प्राणविशुद्धिविज्ञानविधिपरतया । अत उभयेऽपि देवासुराः प्रजापतेरपत्यानीति प्राजापत्याः । प्रजापतिः कर्मज्ञानाधिकृतः पुरुषः । " पुरुष एवोक्थमयमेव महान्प्रजापतिः " इति श्रुत्यन्तरात् । तस्य हि शास्त्रीयाः स्वाभाविकयश्च करणवृत्तयो विरुद्धा अपत्यानीव तदुद्भवत्वात् । तत्तत्रोत्कर्षापकर्षलक्षणनिमित्ते ह देवा उद्गीथमुद्गीथमक्त्युपलक्षितमौद्गात्रं कर्माऽऽजहूरुराहृतवन्तः । तस्यापि केवलस्याऽऽहरणासंभवाज्ज्योतिष्टोमाद्याहृतवन्त इत्यभिप्रायः । तत्किमर्थमाजहूरुरित्युच्यते । अनेन कर्मणैनानसुरानभिभविष्याम इत्येवमभिप्रायाः सन्तः ॥ १ ॥

गुणत्रयविशिष्टमुद्गीथावयवभूतमोंकाराख्यमक्षरं परमात्मप्रतीकं तदुबुद्ध्योपास्यमित्युपदिष्टमिदानीं तस्यैवाक्षरस्याध्यात्माधिदैवभेदेनाऽऽदित्यप्राणदृष्ट्योपासनं विवक्षन्कंण्डिकान्तरमवतारयति—देवासुरा इति । तत्राक्षराणि व्याचिख्यासुरप्रतिभाव्युदासार्थं विवक्षितं समासं दर्शयति-देवाश्चेति । देवशब्दनिष्पत्तिप्रकारं सूचयति—देवा इति । दीव्यतिर्द्योतनार्थः । " दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु " इति दर्शनात्तस्य चाजन्तस्य सति गुणे कर्तरि यथोक्तरूपसिद्धिरित्यर्थः । ते च द्योतका देवा रूढेरिन्द्रादयो भविष्यन्तीत्याशङ्क्याऽऽह—शास्त्रेति । इत्यध्यात्ममित्युपसंहारविरोधात्प्रसिद्धेरेव हेयत्वादुपासकशरीरस्थकरणावस्था देवाः सत्त्वा-

---

१ ख, घ, . °ख्यानि प्रा° । २ क. ग. °द्धाप° । ३ ख. छ. ञ. °व्यतेर्यो° ।

त्मकाः शास्त्रानुसारिणो देवशब्दवाच्या इत्यर्थः । तथाऽऽध्यात्ममसुरा विरोचना-दयः स्युरित्याशङ्क्य पूर्ववदुपसंहारविरोधमभिप्रेत्याऽऽह—असुरा इति । असुरा इन्द्रियवृत्तय एवेति संबन्धः । सात्त्विकेन्द्रियवृत्तिभ्यो वैपरीत्यं तासाममुरत्वसिद्ध्यर्थं दर्शयति—तद्विपरीता इति । तासाममुरशब्दवाच्यत्वे निमित्तान्तरमाह—स्वेष्वेवेति । विष्वञ्चिषयासु विष्वञ्चो नानागतयो विषया यासां तास्विति यावत् । प्राणनक्रियासु जीवनानुकूलप्राणचेष्टास्वित्यर्थः । तदेव स्फोरयति—स्वाभाविक्य इति । शास्त्रापेक्षामन्तरेणैव स्वभाववशात्प्रवर्तमानत्वं स्वाभाविकत्वम् । तथा च शास्त्रीयेन्द्रियवृत्तिभ्यो वैपरीत्यममूषामतिविशदमित्यर्थः । वैपरीत्यान्तरमाह—तमआत्मिका इति । कथं मिथो विषयापहारं निमित्तीकृत्य देवानाममुराणां [च] संग्रामोऽभूदित्यपेक्षायामासुरीं वृत्तिं प्रकटयति—शास्त्रीयेति । दैवीं वृत्तिं प्रथयति—तथेति । देवानामुक्तासुरवैपरीत्यं स्फुटयति—शास्त्रेति । स्वाभाविकः शास्त्रानपेक्षस्तमोरूपपाप्मासुरः परिच्छेदाभिमानस्तस्य तिरस्करणार्थमिति यावत् । उक्तमाध्यात्मिकसंग्रामं निगमयति—इत्यन्योन्येति । उक्तरीत्या यथोक्तानां देवानामसुराणां च पराभिभवः स्वोद्भवश्चेत्येवंरूपः संग्रामः प्रतिदेहमनादिकालप्रवृत्तो यथा देवासुरसंग्रामस्तथेति योजना । किमर्थं पुनरपुरुषार्थरूपो देवासुरसंग्रामः श्रुत्या श्राव्यते तत्राऽऽह—स इहेति । स हि संग्रामोऽस्मिन्प्रकरणे प्राणस्य विशुद्धिविषयं विज्ञानं विधातुं प्रवृत्तः । तथा श्रुत्या कथारूपेणाऽऽख्यायते । इन्द्रियाणां विषयवैमुख्ये धर्मः स्यात्तेषां तदाभिमुख्ये पापस्योत्पत्तिरिति विवेकविज्ञानसिद्ध्यर्थं चाऽऽख्यायिका प्रणीयते । तस्मादिन्द्रियाणां प्रयत्नतो विषयप्रावण्यं परिहर्तव्यम् । तद्वैमुख्यं च तेषां श्रेयोर्थिभिर्यत्नादाधेयमिति भावः । यजमानप्राणानामेव देवासुरभावस्योक्तत्वमतःशब्दार्थः । प्रजापतिशब्दस्य रूढमर्थमपाकृत्य विवक्षितमर्थमाह—प्रजापतिरिति । उक्तरूपः पुरुषः प्रजापतिरित्यत्र गमकमाह—पुरुष एवेति । कथं पुनर्यथोक्तानां देवासुराणां तदपत्यत्वं तत्राऽऽह—तस्य हीति । यत्रेत्युक्तं संग्रामनिमित्तं परामृशति—तत्तत्रेति । देवानामुत्कर्षोऽपकर्षश्चासुराणामित्यस्मिन्निमित्ते कथमुद्गीथमक्त्याहरणमित्याशङ्क्याऽऽह—उद्गीथेति । लक्षितलक्षणान्यायं सूचयति—तस्यापीति । उद्गीथभक्तेरिवेत्यपेरर्थः । तदाहरणप्रयोजनं प्रश्नपूर्वकं कथयति—तत्किमर्थमित्यादिना ॥ १ ॥

यदा च तदुद्गीथं कर्माऽऽजिहीर्षवस्तदा—

ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे तꣳ
ह्यासुराः पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्रति

---

१ ख, ञ. °षयवि° ।

सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः ॥ २ ॥

ते ह देवा नासिक्यं नासिकायां भवं चेतनावन्तं घ्राणं प्राणमुद्गीथकर्तार-मुद्गातारमुद्गीथभक्त्योपासांचक्रिरे [उपासनं] कृतवन्त इत्यर्थः । नासिक्यप्राणदृष्ट्योद्गीथाख्यमक्षरमोंकारमुपासांचक्रिर इत्यर्थः । एवं हि प्रकृतार्थपरित्यागोऽप्रकृतार्थोपादानं च न कृतं स्यात् । खल्वेतस्यैवाक्षरस्येत्योंकारो ह्युपास्यतया प्रकृतः । ननूद्गीथोपलक्षितं कर्माऽऽहृतवन्त इत्यवोच इदानीमेव कथं नासिक्यप्राणदृष्ट्योंकारमुपासांचक्रिर इत्यात्थ । नैष दोषः । उद्गीथकर्मण्येव हि तत्कर्तृप्राणदेवतादृष्ट्योद्गीथभक्त्यवयवश्चोंकार उपास्यत्वेन विवक्षितो न स्वतन्त्रोऽतस्तादर्थ्येन कर्माऽऽहृतवन्त इति युक्तमेवोक्तम् । तमेवं देवैर्हृतमुद्गातारं ह्यासुराः स्वाभाविकतमआत्मानो ज्योतीरूपं नासिक्यं प्राणं देवं स्वोत्थेन पाप्मनाऽधर्मासङ्गरूपेण विविधुर्विद्धवन्तः संसर्गं कृतवन्त इत्यर्थः । स हि नासिक्यः प्राणः कल्याणगन्धग्रहणाभिमानासङ्गाभिभूतविवेकविज्ञानो बभूव । स तेन दोषेण पाप्मसंसर्गी बभूव । तदिदमुक्तमसुराः पाप्मना विविधुरिति । यस्मादासुरेण पाप्मना विद्धस्तस्मात्तेन पाप्मना प्रेरितो घ्राणः प्राणो दुर्गन्धिग्राहकः प्राणिनाम् । अतस्तेनोभयं जिघ्रति लोकः सुरभि च दुर्गन्धि च । पाप्मना ह्येष यस्माद्विद्धः । उभयग्रहणमविवक्षितम् । यस्योभयं हविरार्तिमार्छतीति यद्वत् । यदेवेदमप्रतिरूपं जिघ्रतीति समानप्रकरणश्रुतेः ॥२॥

संप्रत्युद्गीथाहरणप्रकारं प्रकटयति—यदा चेति । अचेतनस्य करणस्येद्गातृत्वासंभवाद्विशिनष्टि—चेतनावन्तमिति । मुख्यं प्राणं व्यावर्तयति—घ्राणमिति । त्वं न उद्गायेतिवाजसनेयकश्रुतिमाश्रित्याऽऽह—उद्गीथकर्तारमिति । अथोद्गीथभक्तिरेव श्रूयते न तूद्गाता तत्कथं तदुपासनमित्याशङ्क्याऽऽह—उद्गीथभक्त्येति । तथोपलक्षितमुद्गातारमुपासत इति यावत् । कथमुपासनमित्यपेक्षायामुद्गीथेन कर्तृत्वप्रार्थनयेत्याह—कृतवन्त इति । ते ह नासिक्यमित्यक्षरेणोक्तमर्थमुक्त्वा वाक्यार्थमाह—नासिक्येति । किमित्यक्षरमोंकाराख्यमिहोपास्यत्वेन व्याख्यायते तत्राऽऽह—एवं हीति । उक्तमेव स्फुटयति—खल्विति । तथा च प्राणस्योद्गातृदृष्ट्योपासने प्रकृतस्य परित्यागो भवेच्च घ्राणप्राणदृष्ट्योपास्यत्वाङ्गीकारेऽप्रकृतोपादानमिति शेषः । पूर्वापरविरोधमा-

---

१ ग. ङ. च. °न्तं प्रा° । २ ख. घ. ङ. च. °सिक्यप्रा° । ३ ख. °धुर्वेदितव° । ४ ख. ङ. प्राणप्रा° । ५ ङ. °यशब्दप्र° । ६ ज. °तृप्रा° । ७ क. ग. °श्च प्रा° । ८ ख. ङ. °पासन° ।

शङ्कते— नन्विति । उद्गीथोपलक्षितेनौद्गात्रेणोपलक्षितं ज्योतिष्टोमादि कर्माऽऽहृत-मित्युक्तं तदाहरणं च तस्योपासनं तद्विरुद्धं नासिक्यप्राणदृष्ट्याऽक्षरोपासनवचनमि त्यर्थः । स्वोक्तेर्मिथो विरोधं परिहरति—नैष दोष इति । उद्गीथोपलक्षितकर्मोप-लक्षिते ज्योतिष्टोमादौ कर्मणि सत्येवोद्गातृप्राणदृष्ट्योपास्यत्वेनाक्षरं विवक्षितम् । ओंकारश्चोद्गीथावयवो ध्येयत्वेनेष्टो न स्वतन्त्रो व्यापकः । तथा चाक्षरोपासनार्थत्वेन कर्माहरणं न ध्येयत्वेनेत्यविरोध इत्यर्थः । आश्रित्य विधानार्थं कर्माहरणमित्युक्त्वा तं हेत्यादि व्याचष्टे—तमेवमिति । स्वोत्थेन चाऽऽसुरेण नासिकासंबन्धेनेति यावत् । अधर्मादासङ्गस्तद्रूपेणेत्येतस्याऽऽसङ्गवेधं साधयति—स हीति । कल्याणो गन्धः सुरभिरुक्तस्तस्य ग्रहणं ममैवेत्यभिमानात्मा योऽयमासङ्गस्तेनाभिभूतमुपकारो गन्धा-घ्राणकृतस्तुल्यः सर्वस्य कार्यकारणसंघातस्येति विवेकविज्ञानं यस्य स तथेति विग्रहः । ननु कथं यथोक्तासङ्गस्पर्शितेत्याशङ्क्याऽऽह—स तेनेति । उक्तेऽर्थे वाक्यं पात-यति—तदिदमिति । घ्राणप्राणस्याऽऽसुरपाप्मविद्धत्वे कार्यलिङ्गकमनुमानं सूचयति—यस्मादिति । उक्तानुमानावद्योति वाक्यं व्याकरोति—अत इति । अतःशब्दार्थमेव स्पष्टयति—पाप्मनेति । ननु पाप्मना विद्धत्वात्तेन लोको दुर्गन्धं जानातीत्येव वक्तव्यं सुरभिज्ञानस्य पाप्मकर्मत्वाभावात् । तथा च कथं तेनोभयं जिघ्रतीत्युक्तं तत्राऽऽह—उभयग्रहणमिति । एकस्यापि हविषो द्रव्यात्मकस्य पुरोडाशादेर्वा काका-दिसंबन्धाद्भ्रंशे प्रायश्चित्तसत्त्वेऽपि यस्योभयं हविरार्तिमार्छति स ऐन्द्रं पञ्चशरावमो-दनं निर्वपेदित्यत्रोभयग्रहणमाविवक्षितमिति स्थितं प्रथमे तन्त्रे तथाऽत्रापीत्याह—यस्येति । न केवलं पाप्मना हीति वाक्यशेषादत्रोभयग्रहणमविवक्षितं किंतु वाज-सनेयके यथोक्तोद्गीथविद्याविषयत्वेन समानकरणे यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मेति श्रुतेरत्रापि पाप्मवेधवशाद्दुर्गन्धं जानातीत्येव वक्तव्यत्वादविवक्षितमुभय-ग्रहणमित्याह—यदेवेति ॥ २ ॥

अथ ह वाचमुद्गीथमुपासांचक्रिरे तां ह असुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा ॥ ३ ॥

अथ ह चक्षुरुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् ॥ ४ ॥

अथ ह श्रोत्रमुद्गीथमुपासांचक्रिरे तद्धासुराः

---

१ क. °र्यकर° । २ क. °र्थं योज° । ३ अ. °ङ्कानु° । ४ अ. नात्येवं व° ।

पाप्मना विविधुस्तस्मात्तेनोभयꣳ शृणोति श्रवणीयं चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् ॥ ५ ॥
अथ ह मन उद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयꣳ संकल्पयते संकल्पनीयं चासंकल्पनीयं च पाप्मना ह्येतद्विद्धम् ॥ ६ ॥

मुख्यप्राणस्योपास्यत्वाय तद्विशुद्धत्वानुभवार्थोऽयं विचारः श्रुत्या प्रवर्तितः । अतश्चक्षुरादिदेवताः क्रमेण विचार्याऽऽसुरेण पाप्मना विद्धा इत्युपोह्यन्ते । समानमन्यत्, अथ ह वाचं चक्षुः श्रोत्रं मन इत्यादि । अनुक्ता अप्यन्यास्त्वग्रसनादिदेवता द्रष्टव्याः । " एवमु खल्वेता देवताः पाप्मभिः " इति श्रुत्यन्तरात् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

ननु नासिक्यस्य प्राणस्य पाप्मविद्धत्वादनुपास्यत्वे सिद्धे न्यायसाम्याद्वागादीनामपि नोपास्यत्वमिति सिध्यति तत्किमुत्तरग्रन्थेनेत्यत आह—मुख्यप्राणस्येति । न्यायसाम्येऽपि मुखतो निराकरणाभावे मुख्यप्राणस्यैवोपास्यत्वमित्यनिश्चयात्तदुपास्यतादार्ढ्यार्थं मुखतो वागादीनामुपास्यत्वमपाकर्तुमुत्तरग्रन्थ इत्यर्थः । विद्धा इति विचार्य क्रमेणोपोह्यन्त इति संबन्धः । उत्तरवाक्येष्वक्षरव्याख्यानमनपेक्षितं पूर्वेण समानवादित्याह—समानमिति । अवशिष्टवाक्यैकदेशग्रहणार्थमादिपदम् । ननु घ्राणादीनां पाप्मविद्धत्वादनुपास्यत्वेऽपि त्वगादीनां तद्विद्धत्वेनानुपास्यत्वावचनान्मुख्यस्यैव प्राणस्योपास्यत्वं नावसीयते तत्राऽऽह—अनुक्ता इति । उक्तानामनुक्तोपलक्षणत्वे बृहदारण्यकश्रुतिं संवादयति—एवमु खल्विति ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे तꣳ हासुरा ऋत्वा विदध्वꣳसुर्यथाऽश्मानमाखणमृत्वा विध्वꣳसेत ॥ ७ ॥

आसुरेण विद्धत्वाद्घ्राणादिदेवता अपोह्याथानन्तरं य एवायं प्रसिद्धो मुखे भवो मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे तं हासुराः पूर्ववदृत्वा प्राप्य विदध्वंसुर्विनष्टा अभिप्रायमात्रेण । अकृत्वा किंचिदपि प्राणस्य कथं विनष्टा इत्यत्र दृष्टान्तमाह—यथा लोकेऽश्मानमाखणं न शक्यते खनितुं कुद्दालादि-

---

१ ङ. °दृसन्नस्तवा° । २ क. असुरेण । ३ क °त्वात्प्राणा° । ४ क. ग. °पोह्यन्तेऽथा° ।

भिरपि[1] भेत्तुं न शक्योऽखण एवाऽऽखण्डस्तमृत्वा सामर्थ्याल्लोष्टः पांसुपिण्डः श्रुत्यन्तराच्च अश्मनि क्षिप्तोऽश्मभेदनाभिप्रायेण तस्याश्मनः किंचिदप्यकृत्वा स्वयं विध्वंसेत विदीर्येतैवं विदध्वंसुरित्यर्थः ॥ ७ ॥

अथ हेत्यादि मुख्यप्राणविषयं वाक्यमुत्थाप्य व्याकरोति—आसुरेणेत्यादिना । पूर्ववद्वागादिष्विवेति यावत् । * टङ्कैश्च विदारकैर्लोहविशेषैरित्यर्थः । अश्रुतस्य लोष्टस्योपादाने हेतुमाह—सामर्थ्यादिति । तस्य ध्वंसनयोग्यत्वाद्ध्वंसतेश्च कर्त्रपेक्षत्वादित्यर्थः । तर्हि यस्य कस्यचिदेवंविधस्य संभवादलं लोष्टग्रहणेनेत्याशङ्क्य "यथाऽश्मानमृत्वा लोष्टो विध्वंसेत" इति बृहदारण्यकश्रुतेस्तस्यैवात्र ग्रहणमित्याह—श्रुत्यन्तराच्चेति ॥ ७ ॥

एवं यथाऽश्मानमाखणमृत्वा विध्वꣳसत एवꣳ हैव स विध्वꣳसते य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः ॥ ८ ॥

एवं विशुद्धोऽसुरैरधर्षितत्वात्प्राण इति । एवंविदः प्राणात्मभूतस्येदं फलमाह—यथाऽश्मानमिति । एष एव दृष्टान्तः । एवं हैव स विध्वंसते विनश्यति । कोऽसावित्याह—य एवंविदि यथोक्तप्राणविदि पापं तदनर्हं कर्तुं कामयत इच्छति यश्चाप्येनमभिदासति हिनस्ति प्राणविदं प्रत्याक्रोशताडनादि प्रयुङ्क्ते सोऽप्येवमेव विध्वंसत इत्यर्थः । यस्मात्स एष प्राणवित्प्राणभूतत्वादश्माखण इवाश्माखणोऽधर्षणीय इत्यर्थः । ननु नासिक्योऽपि प्राणो वाय्वात्मा यथा मुख्यस्तत्र नासिक्यः प्राणः पाप्मना विद्धः प्राण एव सन्न मुख्यः कथम् । नैष दोषः । नासिक्यस्तु स्थानकरणवैगुण्यादिद्धो वाय्वात्माऽपि सन्मुख्यः स्थानदेवतावलीयस्त्वान्न विद्ध इति युक्तम् । यथा वास्यादयः शिक्षावत्पुरुषाश्रयाः कार्यविशेषं कुर्वन्ति नान्यहस्तगतास्तद्वदोषवद्घ्राणसचिवत्वाद्विद्धा घ्राणदेवता न मुख्यः ॥ ८ ॥

दृष्टान्तदार्ष्टान्तिकाभ्यां सिद्धमर्थं निगमयति—एवमिति । । प्राणस्य विशुद्धस्यात्तदुपासनं कर्तव्यमिति शेषः । फलवचनमवतार्य व्याकरोति—एवंविद इत्यादिना ।

* कुद्दालादिरित्यत्र यदादिपदं तस्यार्थः ।

१ क. °पि टङ्कैश्छेत्तुं । ग. °पि च्छेत्तुं । घ. °पि टङ्कैश्च भे° । २ क. पांशुपि° । ३ क. ग. घयवा° । ४ क. ख. छ. ञ. °ति अनु° । ५ घ. च. न तु मु° । ६ क. ग. °ति । इति भा° ।

प्राणवित्प्रतिस्पर्धिनो विनाशे हेतुमाह—यस्मादिति । नासिक्यप्राणस्य मुख्यप्राणस्य च वायुविकारत्वेन प्राणत्वाविशेषात्पाप्मना वेधावेधौ तुल्यावेव स्याताामिति शङ्कते—नन्विति । स्थानविशेषसंबन्धासंबन्धाभ्यां द्वयोरपि पाप्मवेधावेधव्यवस्था युक्तेति परिहरति—नैष दोष इति । स्थानावस्थावच्छिन्ने करणे वैगुण्यं विषयविशेषासक्तत्वं तस्माच्चक्षुषस्य नासिक्यप्राणस्यापि विद्धता स्यादिति यावत् । तदसंभवाद्विशेषसंबन्धप्रयुक्तवैगुण्यायोगादित्येतच्छ्लिष्टमुक्तमुपपन्नम् । स्थानसंबन्धविशेषाद्घ्राणप्राणस्य पाप्मविद्धत्वं तदभावाच्च मुख्यप्राणस्य तदविद्धत्वमित्येतद्दृष्टान्तेन स्पष्टयति—यथेत्यादिना । न मुख्यो दोषवद्घ्राणसन्निवेत्वाभावादिति शेषः ॥ ८ ॥

नैवैतेन सुराभि न दुर्गन्धि विजानात्यपहतपाप्मा
ह्येष तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवति ।
एतमु एवान्ततोऽवित्त्वोत्क्रामति व्याददात्येवान्नत
इति ॥ ९ ॥

यस्मान्न विद्धोऽसुरैर्मुख्यस्तस्मान्नैवैतेन सुरभि दुर्गन्धि वा विजानाति घ्राणेनैव तदुभयं विजानाति लोकः । अतश्च पाप्मकार्यादर्शनादपहतपाप्माऽपहतो विनाशितोऽपनीतः पाप्मा यस्मात्सोऽयमपहतपाप्मा ह्येष विशुद्ध इत्यर्थः । यस्माच्चाऽऽत्मंभरयः कल्याणाद्यासक्तत्वाद्घ्राणादयो न तथाऽऽत्मंभरिर्मुख्यः किं तर्हि सर्वार्थः । कथमिति, उच्यते—तेन मुख्येन यदश्नाति यत्पिबति लोकस्तेनाशितेन पीतेन चेतरान्घ्राणादीनवति पालयति । तेन हि तेषां स्थितिर्भवतीत्यर्थः । अतः सर्वंभरः प्राणोऽतो विशुद्धः । कथं पुनर्मुख्याशितपीताभ्यां स्थितिरेषां गम्यत इति, उच्यते—एतं (तमु एव) मुख्यं प्राणं मुख्यप्राणस्य वृत्तिमन्नपाने इत्यर्थः । अन्ततोऽन्ते मरणकालेऽवित्त्वाऽलब्ध्वोत्क्रामति । घ्राणादिप्राणसमुदाय इत्यर्थः । अप्राणो हि न शक्नोत्यशितुं पातुं वा । तेन तदोत्क्रान्तिः प्रसिद्धा घ्राणादिकलापस्य । दृश्यते ह्युत्क्रान्तौ प्राणस्याशिशिषा । अतो व्याददात्येवाऽऽस्यविदारणं करोतीत्यर्थः । तद्ध्यन्नालाभ उत्क्रान्तस्य लिङ्गम् ॥ ९ ॥

घ्राणदेवता विद्धा प्राणदेवता तु न विद्धेत्यत्र गमकत्वेनानन्तरवाक्यं व्याचष्टे—यस्मादिति । मुख्यप्राणस्य पाप्मवेधाभावमुपसंहरति—अतश्चेति । पाप्मकार्यमासक्तस्तस्य घ्राणेऽनुपलम्भादित्यत्र शब्दस्यैवार्थः । हिशब्देनोक्तं पाप्मावेधं विशुद्धत्वे

---

१ क. ख. °हतो । २ घ. °तेनेत° । ३ क. ख. ग. °भरिः घ्रा° । ४ घ. ङ. च. तेनोत्का° ।

हेतूकृत्य मुख्यप्राणविशुद्धिमुपसंहरति—ष्वेष इति। तस्य विशुद्धत्वे हेत्वन्तरमाह—यस्माच्चेति। अतो विशुद्ध इत्युत्तरत्र संबन्धः। सर्वार्थत्वं प्राणस्य प्रश्नपूर्वकं प्रतिपादयति—कथमित्यादिना। घ्राणादीत्यादिशब्देन कार्यमप्युच्यते। तेनैतास्तृप्यन्तीति श्रुत्यन्तरमाश्रित्याऽऽह—तेन हीति। प्राणवृत्तिहेतुभ्यामन्नपानाभ्यां संघातस्थितिरतःशब्दार्थः। सर्वार्थत्वं द्वितीयस्यातःशब्दस्यार्थः। मुख्यप्राणोपयुक्तत्वादन्नपानानां संघातस्थितिहेतुत्वमित्यत्र प्रश्नपूर्वकं लिङ्गं दर्शयति—कथमित्यादिना। वृत्तिमेव विशिनष्टि—अन्नपाने इति। अन्वहमुपयु(भु)ज्यमाने अन्नपाने प्राणस्थितिहेतू इति यावत्। प्राणस्योच्चिक्रमिषायामपि संघातः स्वयमशनपाने कृत्वा स्थास्यतीत्याशङ्क्याऽऽह—अप्राणो हीति। तदा प्राणोच्चिक्रमिषावस्थायामिति यावत्। ननूत्क्रान्त्यवस्थायामशिशिषाद्यभावादेव संघातस्योत्क्रान्तिर्न त्वशनाद्यभावात्तत्र प्रमाणाभावादत आह—दृश्यते हीति। तदिति मुख्यव्यादानमुच्यते। अन्नग्रहणं पानोपलक्षणार्थम् ॥ ९ ॥

तꣳ हाङ्गिरा उद्गीथमुपासांचक्र एतमु एवाऽऽङ्गिरसं मन्यन्तेऽङ्गानां यद्रसः ॥ १० ॥

तं हाङ्गिरास्तं मुख्यं प्राणं हाङ्गिरा इत्येवंगुणमुद्गीथमुपासांचक्र उपासनं कृतवान्बको दाल्भ्य इति वक्ष्यमाणेन संबध्यते। तथा बृहस्पतिरित्यायास्य इति चोपासांचक्रे वक इत्येव संबन्धं कृतवन्तः केचित्। एतमु एवाऽऽङ्गिरसं बृहस्पतिमायास्यं प्राणं मन्यन्त इति वचनात्। भवत्येवं यथाश्रुतासंभवे, संभवति तु यथाश्रुतमृषिचोदनायामपि श्रुत्यन्तरवत्। तस्माच्छतर्चिन इत्याचक्षत एतमेव सन्तमृषिमपि। तथा माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिरित्यादिऋषीनेव प्राणमापादयति श्रुतिः। तयैतानप्यृषीन्प्राणोपासकानाङ्गिरोबृहस्पत्यायास्यान्प्राणं करोत्यभेदविज्ञानाय। "प्राणो ह पिता प्राणो माता" इत्यादिवच्च। तस्मादृषिराङ्गिरा नाम प्राण एव सन्नात्मानमाङ्गिरसं प्राणमुद्गीथमुपासांचक्र इत्येतत्। यद्यस्मात्सोऽङ्गानां प्राणः सन्रसस्तेनासावाङ्गिरसः ॥ १० ॥

विशुद्धिगुणकमुख्यप्राणात्मोद्गातृदृष्ट्योद्गीथावयवभूतमोंकाराख्यमक्षरमुपास्यमित्युक्तमिदानीं तत्रैवाऽऽङ्गिरसबृहस्पत्यायास्यगुणत्रयविधानार्थमुत्तरग्रन्थमुत्थापयति—तं हेति। तत्र वृत्तिकाराभिप्रेतं संबन्धं दर्शयति—तं मुख्यमिति। पराभिप्रेतसंबन्धे गमकमाह—एतमिति। अव्यवहितसंबन्धसंभवे व्यवहितसंबन्धकल्पना न युक्तेति

---

१ ख. °ष्ठ्यद्धिहे°। २ ख. ग. °पानसं°। ३ क. ग. °त्येवं सं°। ४ ङ. च. °न्तरात्।

परिहरति—भवत्येवमिति । ऋषीणामङ्गिरोबृहस्पत्यादिशब्दैरुपदेशेऽपि गुणत्रयविशिष्टप्राणोपासनं न विरुध्यते ततश्च प्रधानानामबाधे प्राणोपासकानामृषीणामुपदेशो न त्यागमर्हत्यङ्गिरोबृहस्पत्यादिशब्देभ्योऽपि प्रथमप्रतिपन्नानृषीन्विहाय यौगिकवृत्तिप्रतिपत्तव्यगुणमात्रप्रतिपत्त्यनुपपत्तेरित्यर्थः । प्राणोपासकानामृषीणामभिधानमैतरेयकश्रुत्या द्रढयति—श्रुत्यन्तरवदिति । तदेव स्पष्टयति—तस्मादिति । शतर्चिनो नाम प्रथममण्डलदृश ऋषयः । एष च प्राणो यस्मात्पुरुषं संघातारूयं शतवर्षाण्यभिगतवांस्तस्मादेतमेव प्राणं सन्तमृषिशरीरास्थितमपि+शतर्चिशब्दवाच्यं वदन्तीति योजना । शतर्चिशब्दवदुभयविषयाणि शब्दान्तराण्यपि सन्तीत्याह—तथेति । आद्यन्ते मण्डले मुक्त्वा मध्यमानां मण्डलानां द्रष्टारो माध्यमा ऋषयस्तेऽपि प्राणस्तस्य स्वात्मनि मध्ये सर्वजगद्विधारकत्वात् । गृत्समदस्तु द्वितीयमण्डलदर्शी स्वापकाले वागादीनां गिरणात्प्राणो गृत्सो रेतोविसर्गकारणं मदहेतुत्वादपानो मदः प्राणापानात्मकत्वात्प्राणोऽपि तथोच्यते । तृतीयमण्डलदर्शी विश्वामित्रः प्राणोऽपि तथा व्यपदिश्यते । तस्य हि विश्वं भोज्यजातं स्थितिहेतुतया स्निग्धमासीत् । वामदेवस्तु चतुर्थमण्डलद्रष्टा प्राणोऽपि तच्छब्दवाच्यस्तस्य वागादिदेवतासंभजनीयत्वात् । पञ्चममण्डलद्रष्टाऽत्रिरित्युच्यते प्राणोऽपि तथैव कथ्यते । तस्य पाप्मनोऽनर्थरूपान्प्रति सर्वत्रात्तृत्वात् । आदिपदेन भरद्वाजादिपदानि गृहीतानि । दृष्टान्तमेवं व्याख्याय दार्ष्टान्तिकमाह—तथेति । किमित्यङ्गिरःप्रभृतीन्प्राणं करोति श्रुतिरत आह—अभेदेति । तथा च सप्तमे प्राणस्य सार्वात्म्यं वक्ष्यते तथाऽत्रापि तस्य तत्तदृषिरूपत्वं विवक्षितमित्याह—प्राणो हेति । अव्यवहितसंबन्धसंभवे फलितं वाक्यार्थं कथयति—तस्मादिति । प्राणस्याङ्गिरस्त्वं व्युत्पादयति—यस्मादिति ॥ १० ॥

तेन तꣳह बृहस्पतिरुद्गीथमुपासांचक्र एतमु एव बृहस्पतिं मन्यन्ते वाग्घि बृहती तस्या एष पतिः ॥ ११ ॥

तेन तꣳ हाऽऽस्यास्य उद्गीथमुपासांचक्र एतमु एवाऽऽस्यास्यं मन्यन्त आस्यायदयते ॥ १२ ॥

तथा वाचो बृहत्याः पतिस्तेनासौ बृहस्पतिः । तथा यद्यस्मादास्यादयते निर्गच्छति तेनाऽऽस्यास्य ऋषिः प्राण एव सन्नित्यर्थः । तथाऽन्योऽ-

+ अत्र सर्वेष्वप्यादर्शपुस्तकेषु शतर्चिनरुब्दवाच्यामिति वर्तते तच्चिन्त्यम् ।

१ ख. छ. ञ. 'गंकर' ।

प्युपासक आत्मानमेवाऽऽङ्गिरसादिगुणं प्राणमुद्गीथमुपासीतेत्यर्थः ॥ ११ ॥ ॥ १२ ॥

अङ्गिरःशब्दवद्बृहस्पतिशब्दोऽप्युभयत्र नेतव्य इत्याह—तथेति । प्राणस्य बृहस्पतित्वं साधयति—वाग्वै इति । अङ्गिरोबृहस्पतिशब्दवदायास्यशब्दोऽप्युभयत्र द्रष्टव्य इत्याह—तथेति । तस्योभयत्र वृत्तिं विशदयति—यद्यस्मादिति । यस्मादास्यादयते तेनाऽऽयास्यः प्राणः स एवात्रोपासकत्वाद्ऋषिरपि तथेति योजना । यथोक्तानामृषीणामेवोक्तगुणकमुपासनं नान्येषां विशेषवचनादित्याशङ्क्याऽऽह—तथेति । विशेषस्य न शेषनिवर्तकत्वं प्रदर्शनार्थत्वादित्यर्थः ॥ ११ ॥ १२ ॥

तेन तꣳ ह बको दाल्भ्यो विदांचकार । स ह नैमिशीयानामुद्गाता बभूव सह स्मैभ्यः कामानागायति ॥ १३ ॥

न केवलमङ्गिरःप्रभृतय उपासांचक्रिरे । तं ह बको नाम दल्भ्यस्यापत्यं दाल्भ्यो विदांचकार यथादर्शितं प्राणं विज्ञातवान् । विदित्वा च स ह नैमिशीयानां सत्रिणामुद्गाता बभूव । स च प्राणविज्ञानसामर्थ्यादेभ्यो नैमिशीयेभ्यः कामानागायति स्म हाऽऽगीतवान्किलेत्यर्थः ॥ १३ ॥

यथोक्तोपासनस्य त्रिषु नियमाभावे गमकं दर्शयति—न केवलमिति । संप्रति विहितोपासनस्य दृष्टफलमादेष्टुं पातनिकां करोति—विदित्वेति ॥ १३ ॥

आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥ १४ ॥

इति छान्दोग्योपनिषदि प्रथमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

तथाऽन्योऽप्युद्गाताऽऽगाता ह वै कामानां भवति य एवं विद्वान्यथोक्तगुणं प्राणमक्षरमुद्गीथमुपास्ते तस्यैतद्दृष्टं फलमुक्तम् । प्राणात्मभावस्त्वदृष्टम् । "देवो भूत्वा देवानप्येति" इति श्रुत्यन्तरात्सिद्धमेवेत्यभिप्रायः । इत्य-

---

१-ख. छ. ज. °स्य इति श° । २ क. ख. °मिषीया° । ३ ख. °याणामु° । ४ क. ख. घ. ङ. °मिशीया° । ५ ख. घ. ङ. °याणां स° । ६ क. ख. ग. घ. ङ. °मिषीये° ।

ध्यात्ममेतदात्मविषयमुद्गीथोपासनमित्युक्तोपसंहारोऽधिदैवतोद्गीथोपासने व-क्ष्यमाणे बुद्धिसमाधानार्थः ॥ १४ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

भूमिकां कृत्वा विवक्षितमुपास्तिफलं कथयति—तथेति । दृष्टमिति विशेषणाद-भीष्टं फलान्तरमाचष्टे—प्राणेति । आत्मविषयं शरीरवर्तिप्राणगोचरमिति यावत् । उपसंहारस्य प्रयोजनमाह—आधिदैवेति ॥ १४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां प्रथमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

(अथ प्रथमाध्यायस्य तृतीयः खण्डः) ।

अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीतो-द्यन्वा एष प्रजाभ्य उद्गायति । उद्यन्हि तमो भयमप-हन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद ॥ १ ॥

अथानन्तरमधिदैवतं देवताविषयमुद्गीथोपासनं प्रस्तुतमित्यर्थोऽनेकधोपास्य त्वादुद्गीथस्य य एवासावादित्यस्तपति तमुद्गीथमुपासीताऽऽदित्यदृष्ट्योद्गीथ-मुपासीतेत्यर्थः । तमुद्गीथमित्युद्गीथशब्दोऽक्षरवाची सन्कथमादित्ये वर्तत इति, उच्यते— उद्यन्नुद्यच्छन्वा एष प्रजाभ्यः प्रजार्थमुद्गायति प्रजानामन्नोत्पत्त्य-र्थम् । न ह्यनुद्यति, तस्मिन्व्रीह्यादेः पक्तिः स्यादत उद्गायतीवोद्गायति, यथैवो-द्गाताऽन्नार्थमत उद्गीथः सवितेत्यर्थः । किंचोद्यन्नेवं तमस्तज्जं च भयं प्राणिना-मपहन्ति तमेवंगुणं सवितारं यो वेद सोऽपहन्ता नाशयिता ह वै भयस्य ज-न्ममरणादिलक्षणस्याऽऽत्मनस्तमसश्च तत्कारणस्याज्ञानलक्षणस्य भवति ॥१॥

अनन्तरमाध्यात्मिकप्राणदृष्ट्योद्गीथोपासनवचनादिति शेषः । किमिति । देवता-विषय मुद्गीथोपासनं प्रस्तूयते तत्राऽऽह—अनेकधेति । प्राणरूपेणाऽऽदित्यादिरूपेण चोद्गीथस्योपास्यत्वाद्देवताविषयतदुपारितप्रस्तावो युक्त एवेत्यर्थः । आदित्यादिमतयश्चे-त्यादिन्यायेन वाक्यार्थं कथयति—आदित्यदृष्ट्येति । तमादित्यमुद्गीथमुपासीतेत्या-

१ क. 'दैवतेति । २ घ, ङ. च. 'ति व्रीह्या' ।

दित्यशब्दस्योद्गीथशब्दस्य च सामानाधिकरण्यमयुक्तमुद्गीथशब्दस्य प्रकरणादक्षरत्वा-
च्चित्वादादित्यशब्दस्य च ज्योतिर्विषयत्वाद्भिन्नार्थयोश्च शब्दयोः सामानाधिकरण्या-
योगादिति शङ्कते—तमुद्गीथमिति । आदित्ये यद्यपि नोद्गीथशब्दो रूढ्या वर्ति-
तुमर्हति तथाऽपि गौण्या च तत्र तत्र वृत्तेः सामानाधिकरण्यसिद्धिरित्युत्तरमाह—
उच्यत इति । प्रजार्थमुद्गायतीत्येतदेव स्पष्टयति—प्रजानामिति । अन्नोत्पत्त्यर्थ-
मुद्गायतीति पूर्वेण संबन्धः । तदेव व्यतिरेकद्वारा साधयति—न हीति । आदित्य-
स्यान्नार्थमागानमतःशब्दार्थः । न तस्योद्गातुरिव प्रत्यक्षमुद्गानमुपलब्धमित्याश-
ङ्क्याऽऽह—उद्गायतीवेति । उपमामेवोपपादयति—यथेति । अथाऽऽत्मनेऽन्नाद्य-
मागायेदितिश्रुत्यन्तरे यथाऽन्नार्थमुद्गातोऽऽगायतीत्यवगतं तथाऽऽदित्योऽपि प्रजा-
नामन्नार्थमागायतीत्यर्थः । उद्गीथशब्दस्याऽऽदित्ये संभवं परामृश्य फलितमाह—
अत इति । आदित्यदृष्ट्योद्गीथोपासनमुपपाद्य फलोक्तिं व्याचष्टे—किंचेत्या-
दिना । एवंगुणं तमस्तज्जभयनिवर्तकत्वगुणसहितमिति यावत् । १ ॥

यद्यपि स्थानभेदात्प्राणादित्यौ भिन्नाविव लक्ष्येते तथाऽपि न स तत्त्व-
भेदस्तयोः । कथम्—

समान उ एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वर
इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा
एतमिममुं चोद्गीथमुपासीत ॥ २ ॥

समान उ एव तुल्य एव प्राणः सवित्रा गुणतः सविता च प्राणेन । यस्मादुष्णोऽयं प्राण उष्णश्चासौ सविता । किंच स्वर इतीमं प्राणमाचक्षते कथयन्ति तथा स्वर इति प्रत्यास्वर इति चामुं सवितारम् । यस्मात्प्राणः स्वरत्येव न पुनर्मृतः प्रत्यागच्छति । सविता त्वस्तमित्वा पुनरप्यहन्यहनि प्रत्यागच्छति । अतः प्रत्यास्वरोऽस्मादुगुणतो नामतश्च समानावितरेतरं प्राणादित्यौ । अतः सतत्त्वाभेदादेतं प्राणमिममुं चाऽऽदित्यमुद्गीथमुपासीत ॥२॥

नन्वध्यात्ममधिदैवतमिति स्थानभेदात्प्राणादित्ययोर्भिन्नत्वाद्भिन्नमेव तयोरुपासन-
मुपादेयमत आह—यद्यपीति । प्राणादित्ययोः स्वरूपभेदाभावं प्रश्नपूर्वकं प्रतिपाद-
यति—कथमित्यादिना । उशब्दोऽप्यर्थः स्थानभेदतो भेदमनुजानाति । गुणतः
साम्यं साधयति—यस्मादिति । नामतः साम्यं संगिरते—किंचेति । सवितृवत्प्राणेऽपि
प्रत्यास्वरशब्दप्रवृत्तिमाशङ्क्याऽऽह—यस्मादिति । स्वरत्येव गच्छत्येवेति यावत् ।
तस्मिन्नेव स्थूलदेहे न प्रत्यागच्छति तस्मात्प्राणे स्वरशब्दप्रवृत्तिरेवेत्यर्थः । सवितर्यपि

तर्हि तच्छब्दप्रकृतिरेवेत्याशङ्क्याऽऽह—सविता त्विति । आदित्यस्यास्तं गतस्य प्रत्यहमेकत्रैवाऽऽगतिदर्शनात्तस्मिन्प्रत्यास्वरशब्दस्यापि प्रवृत्तिरस्तीत्यर्थः । अतः प्राणादित्ययोरुक्तं साम्यं निगमयति—अस्मादिति । अन्योन्यसाम्यकृतं फलमाह—अत इति । प्राणादित्यावेकीकृत्य तद्दृष्ट्योद्गीथावयवभूतमोंकाराख्यमक्षरमुपास्य मित्यर्थः ॥ २ ॥

अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः । अथ यः प्राणापानयोः संधिः स व्यानो यो व्यानः सा वाक् । तस्मादप्राणन्नपानन्वाचमभिव्याहरति ॥ ३ ॥

अथ खल्विति प्रकारान्तरेणोपासनमुद्गीथस्योच्यते व्यानमेवं वक्ष्यमाणलक्षणं प्राणस्यैव वृत्तिविशेषमुद्गीथमुपासीत । अधुना तत्सँतत्त्वं निरूप्यते—यद्वै पुरुषः प्राणिति मुखनासिकाभ्यां वायुं बहिर्निःसारयति स प्राणाख्यो वायोर्वृत्तिविशेषो यदपानित्यपश्वसिति ताभ्यामेवान्तराकर्षति वायुं सोऽपानोऽपानाख्या वृत्तिः । ततः किमिति, उच्यते—अथ य उक्तलक्षणयोः प्राणापानयोः संधिस्त*योरन्तरा वृत्तिविशेषः स व्यानः, यः सांख्यादिशास्त्रप्रसिद्धः श्रुत्या विशेषनिरूपणान्नासौ व्यान इत्यभिप्रायः । कस्मात्पुनः प्राणापानौ हित्वा महताऽऽयासेन व्यानस्यैवोपासनमुच्यते । वीर्यवत्कर्महेतुत्वात् । कथं वीर्यवत्कर्महेतुत्वमित्याह—यो व्यानः सा वाक् । व्यानकार्यत्वाद्वाचः । यस्माद्व्याननिर्वर्त्या वाक्तस्मादप्राणन्नपानन्प्राणापानव्यापारावकुर्वन्वाचमभिव्याहरत्युच्चारयति लोकः ॥ ३ ॥

अथाऽऽध्यात्मिकमाधिदैविकं चोद्गीथोपासनं प्रस्तुत्य तदेव समस्यैकीकृत्योक्तं तथा च वक्तव्याभावात्किमुत्तरेण ग्रन्थेनेत्याशङ्क्याऽऽध्यात्मिकमेवोद्गीथोपासनमनुसृत्याऽऽह—अथेति । कोऽसौ व्यानो यदृष्ट्योद्गीथोपासनमुपादिदिक्षितमत आह—वक्ष्यमाणलक्षणमिति । पक्षान्तरं व्यावर्तयति—प्राणस्यैवेति । वक्ष्यमाणलक्षणमित्युक्तं व्यक्तीं करोति—अधुनेति । तन्निरूपणार्थमादौ प्राणापानौ निरूपयति—यद्वा इत्यादिना । ताभ्यामेव मुखनासिकाभ्यामित्येतत् । स्यातामेवं प्राणापानौ व्यानस्य

* तयोरित्यस्य वृत्तिविशेष इत्यत्रान्वयः । अन्तरेत्यस्य प्राणापानावित्यध्याहृतेन संबन्धः ।

१ ख. ग. घ. ङ. °पि वृ° । २ ख. °व च व° । ३ च. °स्समेत्वं नि° । ४ ख. ङ. °ङ्क्थो थाऽऽ° । ५ क. ग. °तामित्येवं ।

तु किमायातमिति शङ्कित्वा तत्स्वरूपं दर्शयति-तत इत्यादिना । संधिमेव स्फुटयति-तयोरिति । प्राणापानयोर्वृत्त्योरभावावस्थायां मध्ये च वायोर्वृत्तिविशेषो योऽस्ति स व्यानशब्दार्थ इत्यर्थः । संधिस्कन्धमर्मदेशवृत्तिर्व्यान इति सांख्या योगाश्चाऽऽहुस्तान्प्रत्याह—यः सांख्यादीति । सांख्यानां योगानां च शास्त्रे प्रसिद्धो यो वायोर्वृत्तिविशेषः स्कन्धादिदेशगो नासौ व्यानश्रुत्या विशेषनिरूपणादिति योजना । व्यानस्य प्राणापानसापेक्षत्वात्तयोरन्यतरस्योपासनमेवोचितं न व्यानोपासनमिति मन्वानश्चोदयति-कस्मादिति । महताऽऽयासेन व्यानसतत्त्वनिरूपणेनेति यावत् । तास्यां तस्य वैशिष्ट्यमुपेत्य परिहरति-वीर्यवदिति । व्यानस्यैवोपासनमिति शेषः । तदेव प्रश्नद्वारा प्रपञ्चयति—कथमित्यादिना । कथं व्यानस्य वीर्यवत्कर्म प्रसिद्धं प्रतिज्ञायते कार्यकरणाभावादित्याह—व्यानेति । वाचो व्यान निर्वर्त्यत्वे लिङ्गं दर्शयति-यस्मादिति ॥ ३ ॥

या वाक्सर्क्तस्मादप्राणन्नन्नपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राणन्नन्नपानन्साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्नन्नपानन्नुद्गायति ॥ ४ ॥

तथा वाग्विशेषामृचमृक्संस्थं च साम सामावयवं चोद्गीथमप्राणन्नन्नपानन्व्यानेनैव निर्वर्तयतीत्यभिप्रायः ॥ ४ ॥

या वागित्यादिवाक्यानामर्थं संक्षिपति—तथेत्यादिना ॥ ४ ॥

अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाऽग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्नन्नपानन्करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत ॥ ५ ॥

न केवलं वागाद्यभिव्याहरणमेवातोऽस्माद्व्यान्यपि यानि वीर्यवन्ति कर्माणि प्रयत्नाधिक्यनिर्वर्त्यानि यथाऽग्नेर्मन्थनमाजेर्मर्यादायाः सरणं धावनं दृढस्य धनुष आयमनमाकर्षणमप्राणन्नन्नपानंस्तानि करोति । अतो विशिष्टो व्यानः प्राणादिवृत्तिभ्यः । विशिष्टस्योपासनं ज्यायः फलवत्त्वाद्राजोपासनवत् । एतस्य हेतोरेतस्मात्कारणाद्व्यानमेवोद्गीथमुपासीत नान्यदुपास्यान्तरम् । कर्मवीर्यवत्तरत्वं फलम् ॥ ५ ॥

---

१ ग. प्रत्यभिज्ञा° । २ ग. छ. ढ. °रणभा° । ३ ख. घ. °ष्टस्य चोपा° ।

अतो यानीत्यादि व्याचष्टे—न केवलमिति । व्यानेन निर्वर्तयतीति पूर्वेण संबन्धः । यान्यन्यान्यपि यथोक्तानि कर्माणि तानि लोको व्यानेनैव करोतीत्युत्तरत्र संबन्धः । प्रयत्नाधिक्यनिर्वर्त्यानि कर्माण्येवोदाहरति-यथेति । यथा तानि कर्माणि तथाऽन्यान्यप्येवं प्रकाराणीति योजना । व्यानस्य वीर्यवत्कर्महेतुत्वे फलितमाह—अत इति । वैशिष्ट्येऽपि किं स्यादिति चेत्तदाह—विशिष्टस्येति । वैशिष्ट्यफलमुपसंहरति—एतस्येति । फलवत्त्वादित्युक्तमुपास्तिफलं स्पष्टयति—कर्मेति । व्यानदृष्ट्योद्गीथोपासनस्याङ्गावबद्धत्वादिति शेषः ॥ ५ ॥

अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदꣳ सर्वꣳ स्थितम् ॥ ६ ॥

अथाधुना खलूद्गीथाक्षराण्युपासीत भक्त्यक्षराणि मा भूवन्नित्यतो विशिनष्टि—उद्गीथ इति । उद्गीथनामाक्षराणीत्यर्थो नामाक्षरोपासनेऽपि नामवत एवोपासनं कृतं भवेदमुकमिश्रा इति यद्वत् । प्राण एवोत्, उदित्यस्मिन्नक्षरे प्राणदृष्टिः । कथं प्राणस्योत्त्वमित्याह—प्राणेन ह्युत्तिष्ठति सर्वोऽप्राणस्यावसाददर्शनादतोऽस्त्युदः प्राणस्य च सामान्यम् । वाग्गीः । वाचो ह गिर इत्याचक्षते शिष्टाः । तथाऽन्नं थमन्ने हीदं सर्वं स्थितमतोऽस्त्यन्नस्थं थाक्षरस्य च सामान्यम् ॥ ६ ॥

उद्गीथोपासनप्रसङ्गेनोद्गीथाक्षरोपासनां प्रस्तौति—अथेति । विशेषणतात्पर्यं दर्शयति—भक्तीति । उद्गीथाक्षराण्युपासीतेत्युक्ते भक्त्यक्षराण्युपास्यानि प्राप्तानि तानि मा भूवन्निति यतो मन्यते श्रुतिस्ततो विशेषणं करोतीत्यर्थः । विशेषणश्रुतिं व्याकरोति—उद्गीथेति । नामाक्षरोपासनमुद्गीथोपासनस्यार्किंचित्करमित्याशङ्क्याऽऽह—नामेति । यथा लोके कृष्णमिश्रादिवाचकशब्दप्रयोगे वाच्यस्य पुरुषविशेषस्योपासनं गम्यते तथेहापीत्यर्थः । नामाक्षरोपासने नामवत्तदुपासनेऽपि तदुपासनमेव कथमित्याशङ्क्य विभजते—प्राण एवेति । प्राणस्योदः सादृश्यं प्रश्नपूर्वकमाह—कथमित्यादिना । गीरित्यस्मिन्नक्षरे वाग्दृष्टिः कर्तव्येत्याह—वाग्गीरिति । वाचो गिरश्च सादृश्यं दर्शयति—वाचो हेति । उद्गीरक्षरयोः प्राणवाग्दृष्टिरिव थमित्यस्मिन्नक्षरेऽन्नदृष्टिः कार्येत्याह—तथेति । थकारान्नयोरपेक्षितं सादृश्यं दर्शयति—अन्ने हीति । ॥ ६ ॥

---

१ ख. घ. ङ. °स्य थकार° । २ ख. ञ. °नस्या° । ३ ञ. °रत्वमि° । ४ ख. छ. ञ. °उद्गथक्ष°।

द्यौरेवोदन्तरिक्षं गीः पृथिवी थमादित्य एवोद्वायुर्गी-
रग्निस्थꣳ सामवेद एवोद्यजर्वेदो गीर्ऋग्वेदस्थं दुग्धेऽ-
स्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य
एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इति ॥ ७ ॥

त्रयाणां श्रुत्युक्तानि सामान्यानि तानि तेनानुरूपेण शेषेष्वपि द्रष्टव्यानि। द्यौरेवोदुच्चैः स्थानात्। अन्तरिक्षं [1]गीर्गिरणाल्लोकानाम्। पृथिवी थं प्राणिस्थानात्। आदित्य एवोदूर्ध्वत्वात्। वायुर्गीरन्यादीनां गिरणात्। अग्निर्[2]स्थं याज्ञीयकर्मावस्थानात्। सामवेद एवोत्स्वर्गसंस्तुतत्वात्। यजुर्वेदो गीर्यजुषां [3]भक्तस्य हविषो देवतानां गिरणात्। ऋग्वेदस्थमृच्यध्यूढत्वात्साम्नः। उद्गीथाक्षरोपासनफलमधुनोच्यते—दुग्धे दोग्ध्यस्मै साधकाय। का सा वाक्, कं दोहम्। कोऽसौ दोह इत्याह—यो वाचो दोहः। ऋग्वेदादिशब्दैसाध्यं फलमित्यभिप्रायस्तद्वाचो दोहस्थं स्वयमेव वाग्दोग्ध्यात्मानमेव दोग्धि। किंचान्नवान्प्रभूतान्नोऽन्नादश्च दीप्ताग्निर्भवति। य एतानि यथोक्तान्येवं यथोक्तगुणान्युद्गीथाक्षराणि विद्वान्सन्नुपास्त उद्गीथ इति ॥ ७ ॥

प्राण एवोदित्यादौ साहश्यं श्रुत्यैवोक्तं द्यौरेवोदित्यादौ तु नोक्तं तथा च तत्र साहश्याभावे कथं दृष्टिकरणमित्याशङ्क्याऽऽह—त्रयाणामिति। अन्तरिक्षमाकाशस्तदन्तःप्रतिष्ठा लोकास्तेन गीर्णा इवेति मत्वाऽऽह—गिरणादिति। अग्न्यादीनां गिरणादिति संवर्गविद्यायां द्रष्टव्यम्। सामवेदो वै स्वर्गो लोक इति स्वर्गलोकत्वेन सामवेदस्य संस्तुतत्वादिति हेतुमाह—स्वर्गेति। यजुषा स्वाहास्वधादिनेति यावत्। अध्यात्ममधिलोकमधिदैवमधिवेदं च नामाक्षरोपासनमुक्त्वा तत्फलोक्तिमवतार्य व्याकरोति—उद्गीथेति। यो वाचो दोह इत्यत्र षष्ठी कर्मणि द्रष्टव्या। तमेव वाग्दोहं प्रकटयति—ऋग्वेदादीति। तत्साध्यं फलं स्वाधीनोच्चारणक्षमत्वं तदनायासेनास्य संभवतीत्यर्थः। तादिति प्रकृतफलपरामर्शः। षष्ठी पूर्ववत्। तामिति दोहोक्तिः। वाच एव दोहे कर्मत्वं कर्तृत्वं चेत्याह—आत्मानमेवेति। यो दोग्धा सा वागेव सा चाऽऽत्मानमेव तं दोग्धीति योजना। यथोक्तानि प्राणवागन्नादिरूपत्वेनोक्ता-

---

१ क. ख. ङ. च. °गीर्निगिर°। २ ङ. °स्थं यज्ञक°। ३ ख. प्रदत्त°। ४ ग. घ. ङ. च. ऋगादि°। ५ ख. ग. ङ. च. °ऽदवाच्यं फ°। ६ ख. ङ. °क्तानीति प्रा°।

नीति यावत् । यथोक्तगुणान्युत्थानागैरणस्थित्यादिधर्मकाणीत्यर्थः । उद्गीथाक्षराणीत्युक्तं विशेषणानुवादेन स्फुटयति—उद्गीथ इति । उद्गीथ इत्येवंरूपस्य नाम्नोऽक्षराणीति यावत् ॥ ७ ॥

अथ खल्वाशीःसमृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेत् ॥ ८ ॥

अथ खल्विदानीमाशीःसमृद्धिराशिषः कामस्य समृद्धिर्यथा भवेत्तदुच्यत इति वाक्यशेषः । उपसरणान्युपसर्तव्यान्युपगन्तव्यानि ध्येयानीत्यर्थः । कथम्, इत्युपासीत, एवमुपासीत । तद्यथा—येन साम्ना येन सामविशेषेण स्तोष्यन्स्तुतिं करिष्यन्स्याद्धवेदुद्गाता तत्सामोपधावेदुपसरेच्चिन्तयेदुत्पत्त्यादिभिः ॥ ८ ॥

वागादिसमृद्धिफलकमुपासनमुपदिश्य फलसमृद्धिर्येन प्रकारेण भवति तत्प्रकारं ज्ञानं सर्वकाम्योपासनशेषभूतं प्रासङ्गिकं विधीयत इत्याह—अथ खल्विति । वागादिसमृद्धिफलकोपासनानन्तर्यमथशब्दार्थः । वक्ष्यमाणोपासनानां सर्वकाम्योपासनाशेषत्वद्योतनार्थं खल्वित्युक्तम् । प्रासङ्गिकत्वं दर्शयति—इदानीमिति । कामशब्दः फलविषयः । तच्छब्दः प्रकारज्ञानपरामर्शी । उच्यते विधीयत इत्यर्थः । ध्यानप्रकारं प्रश्नपूर्वकं विशदयति—कथमित्यादिना । इतिशब्दार्थमभिनयति—एवमिति । एवंशब्दार्थमुदाहरणनिष्ठतया स्पष्टयति—तद्यथेति । उत्पत्त्यादिभिरित्यादिशब्देन च्छन्दोदेवतादि गृह्यते ॥ ८ ॥

यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत् ॥ ९ ॥

यस्यामृचि तत्साम तां चर्चमुपधावेद्देवतादिभिः । यदार्षेयं साम तं चर्षिम् । यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत् ॥ ९ ॥

देवतादिभिरित्यादिपदेनाऽऽर्षेयादिग्रहः ॥ ९ ॥

येन च्छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तꣳ स्तोममुपधावेत् ॥ १० ॥

येन च्छन्दसा गायत्र्यादिना स्तोष्यन्स्यात्तच्छन्द उपधावेत् । येन स्तोमेन स्तोष्यमाणः स्यात् । स्तोमाङ्गफलस्य कर्तृगामित्वादात्मनेपदं स्तोष्यमाण इति । तं स्तोममुपधावेत् ॥ १० ॥

गायत्र्यादिनेत्यादिपदमुष्णिगनुष्टुब्बृहत्यादिसंग्रहार्थम् । त्रिवृत्पञ्चदशः सप्तदश एक-

१ क. घ, ट. 'पस्मरे' ।

विंशः प्रसिद्धः सोमयागे स्तोमः । आत्मनेपदप्रयोगप्रतिपन्नमर्थमाह—स्तोमाङ्गेति । यत्र कर्तृगामि फलं तत्रांऽऽत्मनेपदं प्रयुज्यते, प्रकृते च स्तोष्यमाण इत्यात्मनेपदं दृश्यते, तस्मादेतत्फलस्य कर्तृगामित्वं गम्यते । अन्यथा पूर्वोत्तरयोरिव परस्मैपदप्रयोगप्रसङ्गादित्यर्थः ॥ १० ॥

यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेत् ॥ ११ ॥

यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेदधिष्ठात्रादिभिः ॥ ११ ॥

यां दिशमभीत्यभिव्याप्येत्यर्थः । स्तोष्यन्देवताविशेषमिति शेषः । अधिष्ठातृशब्देनेन्द्रादयो गृह्यन्ते । आदिपदं तत्तद्दिगवस्थितसाधारणधर्मसंग्रहार्थम् ॥ ११ ॥

आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्न-
प्रमत्तोऽभ्याशो ह यदस्मै स कामः समृध्येत य-
त्कामः स्तुवीतेति यत्कामः स्तुवीतेति ॥ १२ ॥
इति छान्दोग्योपनिषदि प्रथमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

आत्मानमुद्गातां स्वरूपं गोत्रानामादिभिः सामादीन्क्रमेण स्वं चाऽऽत्मानमन्ततोऽन्त उपसृत्य स्तुवीत । कामं ध्यायन्नप्रमत्तः स्वरोष्मव्यञ्जनादिभ्यः प्रमादमकुर्वंस्ततोऽभ्याशः क्षिप्रमेव ह यद्यत्रास्मा एवंविदे स कामः समृध्येत समृद्धिं गच्छेत् । कोऽसौ, यत्कामो यः कामोऽस्य सोऽयं यत्कामः संस्तुवीतेति । द्विरुक्तिरादरार्था ॥ १२ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

आत्मानं स्वरूपं गोत्रादिभिरुपसृत्योद्गाता स्तुवीतेति संबन्धः । नामादिभिरित्यादिशब्देन वर्णाश्रमादिग्रहणम् । अन्तत इत्यस्यार्थमाह—सामादीनिति । पूर्वोक्तान्सामादीन्सर्वानुक्तेन क्रमेण ध्यात्वा तदवसाने स्वात्मानमपि संचिन्त्यापेक्षितफलमनुसंदधानः स्वरादिभ्यः प्रमादमकुर्वन्नुद्गाता स्तुवीतेति योजना । यत्र कर्मण्ययमुद्गाता यथोक्तरीत्या स्तोता भवति तत्र क्षिप्रमेवास्मै स स कामः समृद्धिं गच्छेद्यत्कामः सन्यः स्तुवीतेत्यन्वयः । इतिशब्दः प्रासङ्गिकोपासनसमाप्त्यर्थः ॥ १२ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
प्रथमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

---

१ क. °भ्यासो ह° । २ क. ख. घ. ङ. च. ज. ट. °ता स्वं रू. । ३ ग. ङ. ठ. ड. ढ. °म दिक्कमै । ४ ग. घ ङ. च. ट. ठ. ड ढ. °त्य का° । ५ क. ङ. ट. °भ्यासः क्षि° । ६ ढ. °द्गाति ।

(अथ प्रथमाध्यायस्य चतुर्थः खण्डः) ।

ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥

ओमित्येतदित्यादिप्रकृतस्याक्षरस्य पुनरुपादानमुद्गीथाक्षरान्युपासनान्तरितत्वादन्यत्र प्रसङ्गो मा भूदित्येवमर्थम् । प्रकृतस्यैवाक्षरस्यामृताभयगुणविशिष्टस्योपासनं विधातव्यमित्यारम्भः । ओमित्यादि व्याख्यातम् ॥ १ ॥

प्रासङ्गिकं हित्वा प्रकृतमनुसंधत्ते—ओमित्येतदित्यादीति । पुनरुपादानस्य तात्पर्यमाह—उद्गीथेति । आदिशब्देन पूर्वोक्तान्युपसरणानि गृह्यन्ते । उद्गीथस्य तैर्व्यवहितत्वात्प्रकरणविच्छेदशङ्कायां ततोऽन्यस्मिन्नर्थे प्रसङ्गः स्यात्स मा भूदित्येवमर्थं पुनरुपादानमित्यर्थः । देवा वै मृत्योरित्यादेस्तात्पर्यमाह—प्रकृतस्येति । अक्षरव्याख्यानप्राप्तावनुवादभागं प्रत्याह—ओमित्यादीति ॥ १ ॥

देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशꣳस्ते छन्दोभिरच्छादयन्यदेभिरच्छादयꣳस्तच्छन्दसां छन्दस्त्वम् ॥ २ ॥

देवा वै मृत्योर्मारकाद्भिभ्यतः किं कृतवन्त इत्युच्यते । त्रयीं विद्यां त्रयीविहितं कर्म प्राविशन्प्रविष्टवन्तो वैदिकं कर्म प्रारब्धवन्त इत्यर्थः । तन्मृत्योस्त्राणं मन्यमानाः । किंच ते कर्मण्यविनियुक्तैश्छन्दोभिर्मन्त्रैर्जपहोमादि कुर्वन्त आत्मानं कर्मान्तरेष्वच्छादयंश्छादितवन्तः । यद्यस्मादेभिर्मन्त्रैरच्छादयंस्तत्तस्माच्छन्दसां मन्त्राणां छादनाच्छन्दस्त्वं प्रसिद्धमेव ॥ २ ॥

देवासुरा ह वै यत्रेत्यत्र व्याख्याता देवा मारकादासुरात्पाप्मनः सकाशादिति यावत् । कोऽयं कर्मणि प्रवेशो नाम तत्राऽऽह—वैदिकमिति । तदिति वैदिकं कर्मोच्यते । ते छन्दोभिरित्यादि व्याचष्टे—किंचेति । न हि सर्वे मन्त्राः सर्वत्र विनियुज्यन्ते । तथा चैकस्मिन्कर्मण्यनुष्ठीयमाने विनियुक्तान्मन्त्रान्हित्वा कर्मान्तरेष्ववशिष्टैर्जपादि कुर्वन्तः स्वात्मानं देवाश्छादितवन्तः । तस्मान्न मृत्युवश्यता तेषामि-

---

१ क. °न्युपासनानि । २ ख. ग °दि कर्म कु° । ३ ख. ङ. °न्त्रैश्छादयन्तस्त° ।

त्यर्थः । तेषां छन्दोभिश्छादितत्वे छन्दसां छन्दस्त्वप्रसिद्धिप्रकारमभिनयति—तत्त-स्मादिति ॥ २ ॥

तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेवं पर्यप-श्यदृचि साम्नि यजुषि । ते नु वित्त्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन् ॥ ३ ॥

तांस्तत्र देवान्कर्मपरान्मृत्युर्यथा लोके मत्स्यघातको मत्स्यमुदके नाति-गम्भीरे परिपश्येद्धडिशोदकस्रावोपायसाध्यं मन्यमान एवं पर्यपश्यद्दृष्टवान्मृत्युः कर्मक्षयोपायेन साध्यान्देवान्मेन इत्यर्थः । कासौ देवान्ददर्शेत्युच्यते—ऋचि साम्नि यजुषि । ऋग्यजुःसामसंबन्धिकर्मणीत्यर्थः । ते नु देवा वैदिकेन कर्मणा संस्कृताः शुद्धात्मानः सन्तो मृत्योश्चिकीर्षितं विदितवन्तः । विदित्वा च तं ऊर्ध्वा व्यावृत्ताः कर्मभ्य ऋचः साम्नो यजुष ऋग्यजुःसामसंबद्धात्कर्मणोऽभ्युत्थायेत्यर्थः । तेन कर्मणा मृत्युभयापगमं प्रति निराशास्तदपास्यामृताभयगुणमक्षरं स्वरं स्वरशब्दितं प्राविशन्नेव प्रविष्टवन्तः । ओंकारोपासनपराः संवृत्ताः । एवशब्दोऽवधारणार्थः सन्समुच्चयप्रतिषेधार्थः । तदुपासनपराः संवृत्ता इत्यर्थः ॥ ३ ॥

कर्मानुतिष्ठतां देवानां मृत्युवश्यता न व्यावृत्तेत्याह—तानिति । तत्रेति वैदिककर्मप्रारम्भोक्तिः । उशब्दोऽप्यर्थः । यथोक्तकर्मपरानपि तान्मृत्युः पर्यपश्यादिति संबन्धः । कर्मणां मृत्युपदगोचरत्वं दृष्टान्तेनाऽऽह—यथेति । दार्ष्टान्तिकभागस्य विवक्षितमर्थं संगृह्णाति—मृत्युरिति । दार्ष्टान्तिके क्षुद्रोदकस्थानीयं किं स्यादिति प्रश्नपूर्वकं दर्शयति—कासावित्यादिना । ऋगादीनां नित्यत्वेन क्षयाभावान्न क्षुद्रोदकस्थानीयतेत्याशङ्क्य विवक्षितमर्थमाह—ऋगिति । कर्मणश्च कृतक्रत्वेन फलतः स्वरूपतश्च क्षयिता प्रसिद्धेति भावः । मृत्युपरिहारोपायमुपदिशति—ते नु देवा इत्यादिना । कर्मभ्यः सकाशादूर्ध्वा व्यावृत्ता इत्यर्थः । सर्वकर्मसंग्रहार्थं कर्मभ्य इति बहुवचनम् । अवैदिककर्मत्यागस्य कर्मिष्वपि सिद्धत्वाद्वैदिककर्मत्यागार्थं विशिनष्टि—ऋच इति । कर्मत्यागमात्रात्कृतकृत्यताशङ्कां वारयति—तेनेति । किं तदक्षरं तदाह—ओंकारेति ॥ ३ ॥

---

१ क. ग. ट. °पायसा° । २ ग. घ. ङ. च. ट. ठ. ड. ते दे° । ३ क. तदूर्ध्वाः । ४ ङ. ड. ढ. ऊर्ध्वाः क° । ५ ङ. ड. ढ. °र्मण इत्य° । ६ क. ख. घ. ङ. ञ. ट. ठ. ड. ढ. स्वर° । ७ ख. ञ. °र्थः ॥ ३ ॥ ८ क. ग. ठ. °र्थं गृ° । ९ ग. छ. ठ. ते दे° ।

कथं पुनः स्वरशब्दवाच्यत्वमक्षरस्येत्युच्यते —

यदा वा ऋचमाप्नोत्योमित्येवातिस्वरत्येवꣳ सामैवं
यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य
देवा अमृता अभया अभवन् ॥ ४ ॥

यदा वा ऋचमाप्नोत्योमित्येवातिस्वरत्येवं सामैवं यजुः । एष उ स्वरः । कोऽसौ, यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य यथागुणमेवामृता अभयाश्चाभवन्देवाः ॥ ४ ॥

उदात्तादिरूपत्वाभावादक्षरस्य न स्वरशब्दत्वमित्याशङ्क्य परिहरति—कथमित्यादिना । ऋचमाप्नोत्यध्ययनेन स्वाधीनां करोतीत्यर्थः । अतिस्वरत्यतिशयेनाऽऽदरविषयोच्चारयतीति यावत् । ऋग्यजुःसाम्नां प्रत्येकमोंकारोच्चारणद्वारेणैवाऽऽप्तिदर्शनादित्यतिशब्दार्थः । उशब्दोऽपिपर्यायः । संप्रतिपन्नस्वरवदिति दृष्टान्तार्थः । अमृतमभयं तथाविधब्रह्मप्रतीकत्वादित्यर्थः । तत्प्रविश्य ब्रह्मबुद्ध्या तद्ध्यानं कृत्वेत्यर्थः ॥ ४ ॥

स य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षरꣳ स्वर-
ममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तद-
मृतो भवति ॥ ५ ॥

इति छान्दोग्योपनिषदि प्रथमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

स योऽन्योऽपि देववदेवैतदक्षरमेवममृतमभयगुणं विद्वान्प्रणौति स्तौति । उपासनमेवात्र स्तुतिरभिप्रेता । स तयैवैतदेवाक्षरं स्वरममृतमभयं प्रविशति । तत्प्रविश्य च राजकुलं प्रविष्टानामिव राज्ञोऽन्तरङ्गबहिरङ्गतावन्न परस्य ब्रह्मणोऽन्तरङ्गबहिरङ्गताविशेषः । किं तर्हि यदमृता देवा येनामृतत्वेन यदमृता अभूवंस्तेनैवामृतत्वेन विशिष्टस्तदमृतो भवति न न्यूनता नाप्यधिकताऽमृतत्वं इत्यर्थः ॥ ५ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

भवतु देवानामेवमस्माकं तु किमायातमित्याशङ्क्याऽऽह—स योऽन्योऽपीति ।

---

१ क. ट. °ष एव उ । ग. ठ. °ष एव स्वं° । २ ख. घ. ङ. च. ञ. ढ. ड. ढ. °तच्चामृ° । ३ क. °मृतभि° । ४ क. °मेव चात्र । ५ ग. ट. ढ. °त्वमिल्यं° ।

राजगृहं प्रविष्टस्य विशेषदर्शनादक्षरं प्रविष्टस्यापि फले विशेषः स्यादित्याशङ्क्याऽऽह—तत्प्रविश्येति । अमृतत्वेन विशिष्टा इति शेषः ॥ ९ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां प्रथमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

(अथ प्रथमाध्यायस्य पञ्चमः खण्डः) ।

प्राणादित्यदृष्टिविशिष्टस्योद्गीथस्योपासनमुक्तमेवानूद्य प्रणवोद्गीथयोरेकत्वं कृत्वा तस्मिन्प्राणरश्मिभेदगुणविशिष्टदृष्ट्याऽक्षरस्योपासनमनेकपुत्रफलमिदानीं वक्तव्यमित्यारभ्यते—

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥ १ ॥

अथ खलु य उद्गीथः स प्रणवो बह्वृचानां यश्च प्रणवस्तेषां स एव च्छान्दोग्य उद्गीथशब्दवाच्यः । असौ वा आदित्य उद्गीथ एष प्रणवः । प्रणवशब्दवाच्योऽपि स एव बह्वृचानां नान्यः । उद्गीथ आदित्यः । कथम् । उद्गीथाख्यमक्षरमोमित्येतदेष हि यस्मात्स्वरन्नुच्चारयन्[1]नेकार्थत्वाद्धातूनाम् । अथवा स्वरन्गच्छन्[2]नेति । अतोऽसावुद्गीथः सविता[3] ॥ १ ॥

खण्डान्तरस्य तात्पर्यमाह—प्राणादित्येति । प्रणवस्योद्गीथस्य चैकत्वं कृत्वा तस्मिन्सत्यध्यात्मं प्राणदृष्ट्याऽधिदैवतमादित्यदृष्ट्या च विशिष्टस्योद्गीथस्य यदुपासनमुक्तं तदेवानूद्य निन्दित्वा प्राणानां रश्मीनां च भेद एव गुणस्तद्विशिष्टदृष्ट्या तस्यैवोद्गीथावयवस्याक्षरस्यानेकपुत्रफलमुपासनमनेन ग्रन्थेन वक्तव्यमित्युत्तरो ग्रन्थः संप्रति प्रस्तूयत इत्यर्थः । अमृताभयगुणकाक्षरोपासनानन्तर्यमथशब्दार्थः । प्रणवोद्गीथयोरेकत्वे वैदिकप्रसिद्धिप्रदर्शनार्थं खल्वित्युक्तम् । तयोरेकत्वमुक्त्वाऽऽदित्यदृष्ट्योद्गीथोपास्तिमुक्तामनुवदति—असाविति । उद्गीथादित्ययोरेकत्वं प्रश्नपूर्वकमुपपादयति—उद्गीथ इत्यादिना । उच्चारयन्नेतीति संबन्धः । स्वरतेर्गत्यर्थत्वात्कथमुच्चारयन्नित्युच्यते तत्राऽऽह—अनेकार्थत्वादिति । गच्छन्सविता प्राणिनां प्रवृत्त्यर्थमोमित्यनुज्ञां कुर्वन्निव गच्छति तस्मादोंकारत्वं सवितुरित्याह—अथवेत्यादिना ॥ १ ॥

एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽ-

---

१. ब. °लकमि° । २ ख. ब. °थन्नेत्यने° । ३ ख. ब. अतः स उद्गी° । ४ ख. ब. °रित्यत्रे पक्षान्तरमाह ।

सीति ह कौषीतकिः पुत्रमुवाच रश्मीꣳस्त्वं पर्यावर्तयाद्बहवो वै ते भविष्यन्तीत्यधिदैवतम् ॥ २ ॥

तमेतमु एवाहमध्यगासिषमाभिमुख्येन गीतवानस्म्यादित्यरश्मभेदं कृत्वा ध्यानं कृतवानस्मीत्यर्थः । तेन तस्मात्कारणान्मम त्वमेकोऽसि पुत्र इति ह कौषीतकिः कुषीतकस्यापत्यं कौषीतकिः पुत्रमुवाचोक्तवान् । अतो रश्मीनादित्यं च भेदेन त्वं पर्यावर्तयात्पर्यावर्तयेत्यर्थः । त्वंयोगात् । एवं बहवो वै ते तव पुत्रा भविष्यन्तीत्यधिदैवतम् ॥ २ ॥

आदित्यदृष्ट्योद्गीथमुपदिष्टमनूद्य निन्दति—तमेतमिति । निन्दाफलं दर्शयति—अत इति । पर्यावर्तयादिति प्रथमपुरुषे श्रूयमाणे किमिति मध्यमपुरुषो व्याख्यायते तत्राऽऽह—त्वंयोगादिति । युष्मद्युपपदे मध्यमपुरुषविधानादित्यर्थः । रश्मिभेदगुणदृष्टिविशिष्टोद्गीथोपासनस्य फलं कथयति—एवमिति । वक्ष्यमाणेऽध्यात्मे बुद्धिसमाधानार्थमुक्तं देवताविषयं दर्शनमुपसंहरति—इत्यधिदैवतमिति ॥ २ ॥

अथाध्यात्मं य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ॥ ३ ॥

अथानन्तरमध्यात्ममुच्यते । य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतेत्यादि पूर्ववत् । तथोमिति ह्येष प्राणोऽपि स्वरन्नेत्योमिति ह्यनुज्ञां कुर्वन्निव वागादिप्रवृत्त्यर्थमेतीत्यर्थः । न हि मरणकाले मुमूर्षोः समीपस्थाः प्राणस्योंकरणं शृण्वन्तीति । एतत्सामान्यादादित्येऽप्योंकरणमनुज्ञामात्रं द्रष्टव्यम् ॥ ३ ॥

अध्यात्मप्राणदृष्ट्योद्गीथोपास्तिमुक्तामनुवदति—अथेत्यादिना । कथं प्राणोद्गीथयोरेकत्वमित्याशङ्क्याऽऽह—तथेति । यथा प्राणिनां प्रवृत्त्यर्थमोमित्यनुज्ञां कुर्वन्निवाऽऽदित्यो गच्छतीत्युक्तं तद्वदिति यावत् । उक्तमेव व्यतिरेकद्वारा स्फोरयति—न हीति । मुमूर्षुसमीपवर्तिनो बन्धवो मरणकाले प्राणस्य वागादिप्रवृत्त्यर्थमनुज्ञाकरणं नैव जानन्ति । तथा च जीवदवस्थायामोमिति तदनुज्ञावशादेव वागादीनां प्रवृत्तिरालक्ष्यते । तस्मात्प्राणस्यानुज्ञामात्रमोंकरणमित्यर्थः । प्राणादित्ययोरध्यात्माधिदैवतयोरुद्गीथत्वाविशेषात्प्राणवदादित्येऽप्यनुज्ञामात्रमोंकरणमवधेयमित्याह—एतत्सामान्यादिति ॥ ३ ॥

---

१ ख. ज. °र्थः । यतस्तस्मा° । २ ख. घ. ज. ठ. ड. ढ. °वितुमर्हन्ती° । ३ क. ग. ङ. °हि । तथा पूर्ववदो°

एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणाश्स्त्वं भूमानमभि-गायताद्बहवो वै मे भविष्यन्तीति ॥ ४ ॥

एतमु एवाहमभ्यगासिषमित्यादि पूर्ववदेव । अतो वागादीन्मुख्यं च प्राणं भेदगुणविशिष्टमुद्गीथं पश्यन्भूमानं मनसाऽभिगायतात् । पूर्ववदावर्तयेत्यर्थः । बहवो वै मे मम पुत्रा भविष्यन्तीत्येवमभिप्रायः सन्नित्यर्थः । प्राणादित्यैक-त्वोद्गीथदृष्टेरेकपुत्रत्वफलदोषेणापोदितत्वाद्वृद्धिमप्राणभेददृष्टेः कर्तव्यता चोद्य-तेऽस्मिन्काण्डे बहुपुत्रफलत्वार्थम् ॥ ४ ॥

प्राणदृष्ट्योक्तामुद्गीथोपास्तिं निन्दित्वा विवक्षितामुपास्तिमुपन्यस्यति—एतमु एवेति । भूमानं बहुत्वोपेतमिति यावत् । मध्यमपुरुषे तातङ्लादेशस्य वैकल्पिक-त्वेऽपि प्रथमपुरुषशङ्कया दुरन्वयं व्यावर्तयति—पूर्ववदिति । एकत्वदृष्टिनिन्दा-द्वारा प्रधानोपासनं सफलमुपसंहरति—प्राणेत्यादिना ॥ ४ ॥

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृषदनाद्वैवापि दुरुद्गीतमनुसमाहर-तीत्यनुसमाहरतीति ॥ ५ ॥

इति छान्दोग्योपनिषदि प्रथमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

अथ खलु य उद्गीथ इत्यादिप्रणवोद्गीथकत्वदर्शनमुक्तं तस्यैतत्फलमुच्यते-होतृषदनाद्धोता यत्रस्थः शंसति तत्स्थानं होतृषदनं हौत्रात्कर्मणः सम्य-क्प्रयुक्तादित्यर्थः । न हि देशमात्रात्फलमाहर्तुं शक्यम् । किं तद्वैवापि दुरुद्गीतं दुष्टमुद्गीतमुद्गानं कृतमुद्गात्रा स्वकर्मणि क्षतं कृतमित्यर्थः । तदनुसमाहरत्य-नुसंधत्त इत्यर्थः । चिकित्सयेव धातुवैषम्यंसमीकरणमिति ॥ ५ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

पूर्वोत्तरयोर्ग्रन्थयोरसंगतिमाशङ्क्य तात्पर्यप्रदर्शनपूर्वकमुत्तरग्रन्थमवतार्य व्याकरोति—

---

१ ख. घ. ङ. ञ. ठ. ड. ढ. °वत् । अ° । २ ख. घ. ञ. °पोहित° । ३ ठ. °स्मिन्खण्डे । ४ ठ. °फलार्थ° । ५ क. ग. झ ट. °द्गीथम° । ६ क. °म्यशमी° । ७ च. °मित्यर्थः ॥ ५ ॥

अथेत्यादिना । ननु यथाश्रुतं स्थानमेव होतृषदनं किं नेष्यते तत्राऽऽह—न हीति । हौत्रात्कर्मणो यत्फलमाद्रियते तत्प्रश्नपूर्वकमविशेषतो दर्शयति—किं तदित्यादिना । निपातद्वयमवधारणातिशयफलकं क्रियापदेन संबध्यते । अपिशब्दस्तु निष्ठानन्तरमावितया नेतव्यः । दुष्टमुद्गानमेव स्पष्टयति—उद्गात्रेति । कथमन्यनिष्ठात्कर्मणोऽन्यत्र फलमाहर्तुं शक्यमित्याशङ्क्याऽऽह—चिकित्सयेति । उद्गाता प्रणवोद्गीथैकत्वविज्ञानमाहात्म्यात्प्रामादिकं स्वकर्मणि प्राप्तं क्षतं हौत्रात्कर्मणः सम्यक्प्रयुक्तात्प्रणवात्प्रतिसंदधातीत्यर्थः ॥ ९ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
प्रथमाध्यायस्य पञ्चमः खण्डः ॥ ९ ॥

(अथ प्रथमाध्यायस्य षष्ठः खण्डः) ।

अथेदानीं सर्वफलसंपत्त्यर्थमुद्गीथस्योपासनान्तरं विधित्सयते—

इयमेवर्गग्निः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयत इयमेव साऽग्निरमस्तत्साम ॥ १ ॥

इयमेव पृथिव्यृक् । ऋचि पृथिवीदृष्टिः कार्या । तयाऽग्निः साम । साम्न्यग्निदृष्टिः । कथं पृथिव्यग्न्योर्ऋक्सामत्वमिति । उच्यते । तदेतत्तदेतदग्न्याख्यं सामैतस्यां पृथिव्यामृच्यध्यूढमधिगतमुपरिभावेन स्थितमित्यर्थः । ऋचीव साम । तस्मादत एव कारणादृच्यध्यूढमेव साम गीयत इदानीमपि सामगैः । यथा च ऋक्सामनी नात्यन्तं भिन्ने अन्योन्यं तथैतौ पृथिव्यग्नी । कथम्, इयमेव पृथिवी सा सामनामार्धशब्दवाच्या । इतरार्धशब्दवाच्योऽग्निरमस्तदेतत्पृथिव्यग्निद्वयं सामैकशब्दाभिधेयत्वमापन्नं साम । तस्मान्नान्योन्यं भिन्नं पृथिव्यग्निद्वयं नित्यसंश्लिष्टमृक्सामनी इव । तस्माच्च पृथिव्यग्न्योर्ऋक्सामत्वमित्यर्थः । सामाक्षरयोः पृथिव्यग्निदृष्टिविधानार्थमियमेव साऽग्निरम इति केचित् ॥ १ ॥

इयमेवेत्यादिसंदर्भस्य तात्पर्यमाह—अथेति । पुत्राद्यैश्वर्यैकदेशविषयोपासनोपदेशानन्तरमवसरे प्राप्ते ज्योतिष्टोमादावधिकृतस्य समग्रैश्वर्यप्राप्त्यर्थमाधिदैवाध्यात्मविभागेनोद्गीथविषयमेवापूर्वमुपासनमस्मिन्ग्रन्थे विधातुमिष्टमित्यर्थः । तत्र तदङ्गभूतमुपासनमादौ विदधाति—इयमेवेति । पृथिव्यामृग्दृष्टिरत्र नेष्टा कर्माङ्गस्य संस्कर्तव्यत्वा-

---

१ क. ग. ङ. च. ट. ड. 'तद्' । २ क. ग. ङ. च. ङ. 'त्यन्तभि' ।

दित्यभिप्रेत्याऽऽह—ऋचीति । ऋचि यथा पृथिवीदृष्टिरनन्तरवाक्ये विहिता तथाऽग्निः सामेत्यत्राग्निदृष्टिः सोऽग्नि विधीयते पूर्ववदित्याह—तथेति । ऋक्त्वं पृथिव्याः सामत्वं चाग्नेरप्रसिद्धमिति शङ्कते—कथमिति । ऋक्सामत्वसिद्धावित्युत्तरमाह—उच्यत इति । तयोराधाराधेयभावे गमकं दर्शयति—तस्मादिति । ऋचि पृथिवीदृष्टिः साग्नि चाग्निदृष्टिरित्यत्र हेत्वन्तरमाह—यथा चेति । पृथिव्यग्न्योरत्यन्तभेदाभावं प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । कर्माङ्गयोः सह प्रयोगादक्सामयोरन्योन्यमव्यभिचारान्नात्यन्तभेदस्तथा पृथिव्यग्न्योरप्येकशब्दवाच्यत्वान्नात्यन्तं भिन्नतेत्यर्थः । तयोरत्यन्तभेदाभावे फलितमाह—तस्माच्चेति । पृथिवी साशब्दवाच्या स्त्रीत्वादग्निरमः पुंस्त्वादिति द्रष्टव्यम् । पक्षान्तरमुत्थाप्याङ्गी करोति—सामाक्षरयोरिति ॥ १ ॥

अन्तरिक्षमेवर्ग्वायुः साम तदेतदेतस्यामृच्यध्यूढꣳ
साम तस्मादृच्यध्यूढꣳ साम गीयतेऽन्तरिक्षमेव
सा वायुरमस्तत्साम ॥ २ ॥
द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढꣳ
साम तस्मादृच्यध्यूढꣳ साम गीयते द्यौरेव साऽऽ-
दित्योऽमस्तत्साम ॥ ३ ॥

अन्तरिक्षमेवर्ग्वायुः सामेत्यादि पूर्ववत् ॥ २ ॥ ३ ॥

॥ २ ॥ ३ ॥

नक्षत्राण्येवर्क्चन्द्रमाः साम तदेतदेतस्यामृच्यध्यूढꣳ
साम तस्मादृच्यध्यूढꣳ साम गीयते नक्षत्राण्येव सा
चन्द्रमा अमस्तत्साम ॥ ४ ॥

नक्षत्राणामधिपतिश्चन्द्रमा अतः स साम ॥ ४ ॥

कथं पुनर्नक्षत्रपर्याये तदेतदेतस्यामित्यादिवाक्यं न हि नक्षत्रेषु चन्द्रमसः स्थितिरत आह—नक्षत्राणामिति । नक्षत्राधिपत्यात्तदुपरिभावेन चन्द्रमसः स्थितेरित्यतः शब्दार्थः । नक्षत्रसहितं चन्द्रमसं परामृष्टुं सशब्दः ॥ ४ ॥

अथ यदैतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं

---

१ क ग. ट. °सिद्धिरित्यु° । २ ख. घ. °त्यन्तभि° । ३ ग. ट. °वाक्ये न । ४ ग. ट. °रांमर्थं स° ।

परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳ
साम तस्मादृच्यध्यूढꣳ साम गीयते ॥ ५ ॥

अथ यदेतदादित्यस्य शुक्लं भाः शुक्ला दीप्तिः सैवर्क् । अथ यदादित्ये नीलं परः कृष्णं परोऽतिशयेन काष्ण्यं तत्साम । तद्धयेकान्तसमाहितदृष्टे-र्दृश्यते ॥ ५ ॥

अङ्गोपासनानि कानिचिदुक्त्वा तादृगेवोपासनान्तरमाह—अथेति । आदित्यस्य मण्डलात्मनो यद्रूपं शुक्लं दृश्यत ऋचि तद्दृष्टिः कर्तव्येत्यर्थः । तदेव रूपं विशि-नष्टि—भा इति । तामेव व्याचष्टे—शुक्ला दीप्तिरिति । ऋचि यथा पूर्वोक्तरू-पदृष्टिस्तथा साम्नि वक्ष्यमाणरूपदृष्टिरनुष्ठेयेत्याह—अथेति । नन्वादित्ये शौक्ल्य-वदनतिशयं काष्ण्यं नास्माभिरनुभूयते तत्राऽऽह—तद्धीति । एकान्तेन समाहिता शास्त्रसंस्कृता यस्य दृष्टिस्तस्याऽऽदित्ये निरतिशयं काष्ण्यं दृश्यते । तथा च तद्-दृष्टिः साम्नि श्लिष्टेत्यर्थः ॥ ५ ॥

अथ यदेवैतदादित्यस्य शुक्लं भाः सैव साऽथ
यन्नीलं परः कृष्णं तदमस्तत्सामाथ य एषोऽ-
न्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्म-
श्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः ॥ ६ ॥

ते एवैते भाः शुक्लकृष्णत्वे सा चामश्च साम । अथ य एषोऽन्तरादित्य आदित्यस्यान्तर्मध्ये हिरण्मयो हिरण्मय इव हिरण्मयः । न हि सुवर्णविका-रत्वं देवस्य संभवति । ऋक्सामगेष्णत्वापहतपाप्मत्वासंभवात् । न हि सौ-वर्णेऽचेतने पाप्मादिमात्तिरस्ति येन प्रतिषिध्येत । चाक्षुषे चाग्रहणात् । अतो लुप्तोपम एव हिरण्मयशब्दो ज्योतिर्मय इत्यर्थः । उत्तरेष्वपि समाना योजना । पुरुषः पुरि शयनात्पूरयति वा स्वेनाऽऽत्मना जगदिति दृश्यते निवृत्तच-क्षुर्भिः[1] समाहितचेतोभिर्ब्रह्मचर्यादिसाधनापेक्षम्[2] । तेजस्विनोऽपि श्मश्रुके-शादयः कृष्णाः स्युरित्यतो विशिनष्टि—हिरण्यश्मश्रुर्हिरण्यकेश इति । ज्योति-र्मयान्येवास्य[3] श्मश्रूणि केशाश्चेत्यर्थः । आप्रणखात्प्रणखो नखाग्रं नखाग्रेण सह सर्वः सुवर्ण इव भारूप इत्यर्थः ॥ ६ ॥

---

१ ग. ट. °निर्वृत्त° । २ क. ट. °पेक्षैः । ते° । ख. घ. ङ. ञ. °पेक्ष्यम् । ३ ग. घ. ङ. च. ट. ठ. ड. ढ. °ण्येवा° ।

अथ यदेवैतदित्यादेस्तात्पर्यमाह—ते एवेति । अङ्गोपासनानि समाप्यानन्तरमाधिदैविकीं प्रधानोपासनां विवक्षुरुपास्यस्वरूपमुपन्यस्यति—अथेत्यादिना । किमिति हिरण्मयपदमुपमार्थं व्याख्यायते हिरण्यविकारत्वमेवात्र विवक्षितं किं न स्यादित्याशङ्क्याऽऽह—न हीति । अपहतपाप्मत्वासंभवं साधयति—न हीत्यादिना । पाप्मादीत्यादिपदं तत्कार्यसंग्रहार्थम् । किंच चक्षुष्युपास्ये पुरुषे सुवर्णविकारत्वस्याग्रहणाद्यौगमेव हिरण्मयपदमित्याह—चाक्षुषे चेति । न चैतत्राप्यातिदेशिकं तद्ग्रहणमृक्सामगेष्णत्वादिना तादृशेन विरोधात्तस्माद्यौगमेव हिरण्मयपदमित्युपसंहरति—अत इति । हिरण्यश्मश्रुरित्यादिविशेषणेष्वपि तुल्यं गौणत्वमित्याह—उत्तरेष्वपीति । नन्वादित्यादिमण्डले पुरुषो नास्माभिर्दृश्यते तत्राऽऽह—निवृत्तचक्षुर्भिरिति । विशिष्टाधिकारिणामादित्यपुरुषदर्शनमुपपादयति—ब्रह्मचर्यादीति ॥ ६ ॥

तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद ॥ ७ ॥

तस्यैवं सर्वतः सुवर्णवर्णस्याप्यक्ष्णोर्विशेषः । कथं तस्य यथा कपेर्मर्कटस्याऽऽसः कप्यासः । आसेरुपवेशनार्थस्य करणे घञ् । कपिपृष्ठान्तो येनोपविशति । कप्यास इव पुण्डरीकमत्यन्ततेजस्त्येवमस्य देवस्याक्षिणी । उपमितोपमानत्वान्न हीनोपमा । तस्यैवंगुणविशिष्टस्य गौणमिदं नामोदिति । कथं गौणत्वम् । स एष देवः सर्वेभ्यः पाप्मभ्यः पाप्मना सह तत्कार्येभ्य इत्यर्थः । य आत्माऽपहतपाप्मेत्यादि वक्ष्यति । उदित उद्इत उद्गत इत्यर्थः । अतोऽसावुन्नामा । तमेवंगुणसंपन्नमुन्नामानं यथोक्तेन प्रकारेण यो वेद सोऽप्येवमेवोदेत्युद्गच्छति सर्वेभ्यः पाप्मभ्यः । ह वा इत्यवधारणार्थौ निपातौ । उदेत्येवेत्यर्थः ॥ ७ ॥

सर्व एव सुवर्ण इति विशेषणादक्ष्णोरपि सुवर्णत्वे प्राप्ते प्रत्याह—तस्येति । विशेषमेव प्रश्नपूर्वकं विशदयति—कथमित्यादिना । यथा कप्यासवद्व्यवस्थितं पुण्डरीकं तथा तस्याक्षिणी इति योजना । आसशब्दनिष्पत्तिप्रकारं सूचयति—आसेरिति । घञन्तस्य शब्दस्य विवक्षितमर्थं कथयति—कपीति । तस्य करणत्वं स्फुटयति—येनेति । कपिः स कपिपृष्ठान्तः कप्यास इति शेषः । पदार्थमुक्त्वा वाक्यार्थमाह—कप्यास इवेति । निह्यनोपमया देवस्य चक्षुषी व्यपदिशता तयो-

---

१ क. ग. ट. °र्यत्वसं° । २ ट. निर्वृत्त° । ३ क. ग. च. झ. ट. °पमत्वा° । ४ ख. छ. वर्णवर्ण । ५ ख. ञ. °वच° ।

रपि निहीनत्वं व्यपदिष्टं स्यादित्याशङ्क्याऽऽह—उपमितेति । कप्यासेनोपमितं पुण्डरीकं तेनोपमानेनोपमितत्वाच्चक्षुषोर्न निहीनोपमानप्रयुक्तं निहीनत्वमित्यर्थः । यथोक्तस्याऽऽदित्यपुरुषस्य क्षेत्रज्ञत्वशङ्कां व्यावर्तयितुं नाम व्यपदिशति—तस्येति । नाम्नो गौणत्वं शङ्काद्वारा व्युत्पादयति—कथमित्यादिना । न तस्य सर्वपाप्मोदयस्तत्कार्यभाक्त्वादित्याशङ्क्याऽऽह—पाप्मनेति । आदित्यक्षेत्रज्ञेऽपि सर्वपाप्मोदयः संभवति, न ह वै देवान्पापं गच्छतीति श्रुतेरित्याशङ्क्य परमात्मविषयवाक्यशेषमुदाहरति—य आत्मेति । उक्तार्थयोगोऽतःशब्दार्थः । उपास्यं परमात्मानमुपन्यस्य तदुपासनमिदानीं सफलमुपन्यस्यति—तमेवंगुणसंपन्नमिति । यथोक्तेन प्रकारेणोन्नामानमिति संबन्धः ॥ ७ ॥

तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वे-
वोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो
लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥८॥

इति छान्दोग्योपनिषदि प्रथमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

तस्योद्गीथत्वं देवस्याऽऽदित्यादीनामिव विवक्षितत्वादाह—तस्यर्क्च सामच गेष्णौ पृथिव्याद्युक्तलक्षणे पर्वणी । सर्वात्मा हि देवः । परापरलोककामेशितृत्वादुपपद्यते पृथिव्यग्न्यृक्सामगेष्णत्वम् । सर्वयोनित्वाच्च । यत एवमुन्नामा चासावृक्सामगेष्णश्च तस्मादृक्सामगेष्णत्वप्राप्तमुद्गीथत्वमुच्यते परोक्षेण परोक्षप्रियत्वाद्देवस्य तस्मादुद्गीथ इति । तस्मात्त्वेव हेतोरुद्गायतीत्युद्गाता । यस्माद्यस्येदस्य यथोक्तस्योन्नाम्नो गाताऽसावतो युक्तोद्गातेति नामप्रसिद्धिरुद्गातुः । स एष देव उन्नामा ये चामुष्मादादित्यात्पराञ्चः परागञ्चनादूर्ध्वा लोकास्तेषां लोकानां चेष्टे न केवलमीशितृत्वमेव चशब्दाद्धारयति च । "स दाधार पृथिवीं द्यामुतेमाम्" इत्यादिमन्त्रवर्णात् । किंच देवकामानामीष्ट इत्येतदधिदैवतं देवताविषयं देवस्योद्गीथस्य स्वरूपमुक्तम् ॥ ८ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

कथं परस्योपासनमित्यपेक्षायामुद्गीथे संपाद्येति दर्शयति—तस्येत्यादिना । यथाऽऽ-

---

१ क. ग. ङ. च. ट ड. °व्यग्न्यार्ग्यक्सा° ।

दित्यादीनामुद्गीथे संपाद्योपासनमत्र विवक्ष्यते तथा परमात्मनोऽपि तत्र संपाद्योपासनं विवक्षित्वा सर्वकर्तृत्वमात्मत्वमाह तस्येत्यादिवाक्यमित्यर्थः । मण्डलावच्छिन्नस्य पुरुषस्य कथमृगादिगेष्णत्वमित्याशङ्क्याऽऽह—सर्वात्मेति । परस्य स्वारस्येन सर्वात्मत्वादाध्यानार्थं मण्डलावच्छेदादुपपन्नमृगादिगेष्णत्वमित्यर्थः । तत्रैव हेत्वन्तरमाह—परापरेति । सर्वात्मत्वं साधयति—सर्वयोनित्वादिति । सर्वकारणत्वेन सर्वात्मत्वादृगादिगेष्णत्वं युक्तमेवेत्यर्थः । तस्मादुद्गीथ इति वाक्यं योजयति—यत इति । प्राप्ते सति तस्मादुद्गीथ इत्यनेन वाक्येनोद्गीथत्वं परोक्षेण नाम्ना देवस्योच्यत इति योजना । किमिति परोक्षनाम्ना देवो व्यपदिश्यत इत्याशङ्क्य परोक्षप्रिया इव हि देवाः प्रत्यक्षाद्विष इति श्रुत्यन्तरमाश्रित्याऽऽह—परोक्षप्रियत्वादिति । उन्नामत्वे देवस्योद्गातृत्वप्रसिद्धिं प्रमाणयति—तस्मादिति । तच्छब्दार्थं स्फुटयति—यस्मादिति । प्रकृतस्योन्नाम्नो देवस्याऽऽगानादित्यतःशब्दार्थः । उद्गातुरुद्गातेति नामप्रसिद्धिरिति युक्तेति योजना । सर्वपाप्मोदयलिङ्गात्तस्य चान्यत्रासंभवादादित्यान्तर्गतो देवः परमात्मेत्युक्तं तत्रैव हेत्वन्तरमाह—स एष इति । देवकामानामादित्यादुपरितनलोकेष्वधिष्ठातारो ये देवास्तेषां कामाः काम्यमानफलविशेषास्तेषामिति यावत् । न हि निरङ्कुशं लोककामेशितृत्वं परस्मादन्यत्र संभवति । एष सर्वेश्वर इति श्रुतेरिति भावः ॥८॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
प्रथमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

(अथ प्रथमाध्यायस्य सप्तमः खण्डः) ।

अथाध्यात्मं वागेवर्क्प्राणः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । वागेव सा प्राणोऽमस्तत्साम ॥ १ ॥

अथाधुनाऽध्यात्ममुच्यते । वागेवर्क्प्राणः साम । अधरोपरिस्थानत्वसामान्यात् । प्राणो घ्राणमुच्यते सह वायुना, वागेव सा प्राणोऽम इत्यादि पूर्ववत् ॥ १ ॥

आधिदैविकोपास्त्यानन्तर्यमथशब्दार्थः । ऋचि वाग्दृष्टिः साम्नि प्राणदृष्टिश्च कर्तव्येत्यत्र हेतुमाह—अधरेति । कथमृक्सामयोरिव वाक्प्राणयोरधरोपरिस्थानत्वं तत्राऽऽह—प्राण इति । स्थानमात्रत्वं व्यावर्तयति—सहेति ॥ १ ॥

---

१ क. ट. परात्मे° । २ क. °ति । प्राणमा° । ३ ग. ङ. ट. 'मात्रं व्या' ।

चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । चक्षुरेव साऽऽत्माऽमस्तत्साम ॥ २ ॥

चक्षुरेवर्गात्मा साम । आत्मेति च्छायात्मा तत्स्थत्वात्साम ॥ २ ॥

मोक्तारं व्यावर्तयति—आत्मेति । छायात्मनः सामत्वे हेतुमाह—तत्स्थत्वादिति । चक्षुषि च्छायात्मनः स्थितत्वादृचि सामवदित्यर्थः ॥ २ ॥

श्रोत्रमेवर्ङ्मनः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । श्रोत्रमेव सा मनोऽमस्तत्साम ॥ ३ ॥

श्रोत्रमेवर्ङ्मनः साम, श्रोत्रस्याधिष्ठातृत्वान्मनसः सामत्वम् ॥ ३ ॥

॥ ३ ॥

अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । अथ यदेवैतदक्ष्णः शुक्लं भाः सैव साऽथ यन्नीलं परः कृष्णं तदमस्तत्साम ॥ ४ ॥

अथ यदेतदक्ष्णः शुक्लं भाः सैवर्क् । अथ यन्नीलं परः कृष्णमादित्य इव दृक्शक्त्यधिष्ठानं तत्साम ॥ ४ ॥

आध्यात्मिकानि कानिचिदङ्गोपासनान्युक्त्वाऽनन्तरं प्रकारान्तरेणाङ्गोपासनमेव किंचिदुपदिशति—अथेति । अक्ष्णो यदेतद्रूपं शुक्लं दृश्यते ऋचि तद्दृष्टिः कर्तव्येत्यर्थः । तदेव रूपं विशिनष्टि—भा इति । ऋचि पूर्वोक्तरूपदृष्टिवद्वक्ष्यमाणरूपदृष्टिरपि साम्नि कर्तव्येत्याह—अथेति । यथाऽऽदित्यमण्डले समधिगम्यमतिकृष्णं रूपमुक्तं तथा चक्षुष्यपि दृक्शक्तेरधिष्ठानं तादृग्रूपमुपलभ्यते तद्दृष्टिः साम्नि कर्तव्येत्यर्थः ॥ ४ ॥

अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥ ५ ॥

---

१ क. अध्यात्म° । २ क. ज 'कृष्णरू° ।

अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते । पूर्ववत् । सैवर्गध्यात्मं वागाद्या पृथिव्याद्या चाधिदैवतम् । प्रसिद्धा च ऋक्पादबद्धाक्षरात्मिका । तथा साम । उक्थसाहचर्याद्वा स्तोत्रं सामोक्थं शस्त्रमुक्थादन्यत्तथा यजुः स्वाहास्वधावषडादि सर्वमेव वाग्यजुस्तत्स एव । सर्वात्मकत्वात्सर्वयोनित्वाच्चेति ह्यवोचाम । ऋगादिप्रकरणात्तद्ब्रह्मेति त्रयो वेदाः । तस्यैतस्य चाक्षुषस्य पुरुषस्य तदेव रूपमतिदिश्यते । किं तद्यदमुष्याऽऽदित्यपुरुषस्य । हिरण्मय इत्यादि यदधिदैवतमुक्तम् । यावमुष्य गेष्णौ पर्वणी तावेवास्यापि चाक्षुषस्य गेष्णौ । यच्चामुष्य नामोदित्युद्गीथ इति च तदेवास्य नाम । स्थानभेदाद्रूपगुणनामातिदेशादीशितृत्वविषयभेदव्यपदेशाच्चाऽऽदित्यचाक्षुषयोर्भेद इति चेत् । न । अमुनाऽनेनैवेत्येकस्योभयात्मप्राप्त्यनुपपत्तेः । द्विधाभावेनोपपद्यत इति चेत् । वक्ष्यति हि स एकधा भवति त्रिधा भवतीत्यादि । न । चेतनस्यैकस्य निर[वय]यत्वाद्द्विधाभावानुपपत्तेः । तस्मादध्यात्माधिदैवतयोरेकत्वमेव । यत्तु रूपाद्यतिदेशो भेदकारणमुक्तो न तद्भेदावगमाय । किं तर्हि स्थानभेदाद्भेदाशङ्का मा भूदित्येवमर्थम् ॥ ५ ॥

आध्यात्मिकप्रधानोपासनशेषत्वेनाङ्गोपासनान्युक्त्वाऽनन्तरं प्रधानोपासनाविषयं दर्शयति—अथेति । दृश्यत इति प्रयोगाच्छायात्माऽयमित्याशङ्क्याऽऽह—पूर्ववदिति । यथा पूर्वस्मिन्नाधिदैविके वाक्ये समाहितचेतोभिरादित्यपुरुषस्य दृश्यत्वमुक्तं तथा च क्षुषपुरुषस्यापि विशिष्टाधिकारिभिरेव दृश्यत्वमेष्टव्यमित्यर्थः । छायात्मपक्षे वाक्यशेषविरोधमभिप्रेत्याऽऽह—सैवेति । येयमृग्यथा व्याख्याता सा सर्वा स एव पुरुष इत्यर्थः । ऋच्युक्तं न्यायं साम्न्यतिदिशति—तथेति । यत्किंचित्साम तत्सर्वं स एव पुरुष इत्यर्थः । ऋक्सामशब्दयोरर्थान्तरमाह—उक्थेति । ऋक्साम यद्वदिति दृष्टान्तस्तथाशब्दार्थः । कथमृगाद्यात्मत्वं परस्येत्याशङ्क्याऽऽह—सर्वात्मकत्वादिति । ब्रह्मशब्दस्य परमात्मविषयत्वं व्यावर्तयन्प्रकरणादित्युक्तन्यायेन त्रयो वेदाः स एव पुरुष इत्युपसंहारः । छायात्मनो जडस्य व्यावृत्त्यर्थं रूपातिदेशं दर्शयति—तस्येति ।

---

१ क. ग. घ. च. ट. ड. साम ऋक्शस्त्रं° । २ ड. ठ. °मुक्ताद° । ३ ग. ट. ° भावो नो° । ४ क. °ति द्विधा । ५ ग. ट. °पत्तिः । तं° । ६ क. °मर्थः ॥ ५ ॥ ग. °मर्थं ॥ ५ ॥ ७ क ग. ट. °पर्यं व्या° ।

किं तदादित्यपुरुषस्य रूपमित्यपेक्षायामाह—हिरण्मय इत्यादीति । इतश्च नायं छायात्मेत्याह—यावमुष्येति । नामातिदेशोऽप्येतमर्थमुपोद्बलयतीत्याह—यच्चेति । आदित्यचाक्षुषयोरुपास्ययोर्भेदादुपासनाऽपि भिन्नेति शङ्कते—स्थानेति । आदित्यमण्डलं चक्षुश्चेति स्थाने भिद्येते रूपं हिरण्मयो हिरण्यश्मश्रुरित्यादि ऋगादिगेष्णत्वादिर्गुण उदित्यादि नाम तेषामतिदेशस्तस्यैतस्य तदेव रूपमित्यादिः । ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् । ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे देवकामानां मनुष्यकामाना(णां) चेत्यध्यात्मम् । इत्ययमीशितृत्वविषयो भेदव्यपदेशः । अतश्चैतयोर्भेदादुपासनमपि भिन्नमेवेत्यर्थः । नोपास्यभेदादुपासनाभेदोऽस्तीति दूषयति—नेति । उपासकस्तावदमुनाऽऽदित्यात्मना पराञ्चो लोकान्देवकामांश्चाऽऽप्नोति स एवानेन चाक्षुषरूपेणार्वाचीनलोकान्मनुष्यकामांश्चाऽऽप्नोतीति श्रूयते । न चैकस्य वस्तुतो भिन्नोभयरूपत्वप्राप्तिरुपपद्यते । तस्माद्भेदकल्पना न युक्तेत्यर्थः । उभयात्मकत्वमेकस्यापि विद्यामाहात्म्याद्भेदभावोपगमादुपपन्नमिति शङ्कते—द्विधेति । एकस्य विद्यावशादनेकरूपत्वे वक्ष्यशेषं प्रमाणयति—वक्ष्यति हीति । एकस्यानेकशरीरपरिग्रहेति न स्वरूपभेदोपपत्तिरिति परिहरति—न चेतनस्येति । एकत्वसाधकसद्भावस्तच्छब्दार्थः । परोक्तं भेदकमनुवदति—यच्चेति । भेदकारणमित्यस्यादुपरिष्टादितिशब्दो द्रष्टव्यः । दूषयति—न तदित्यादिना । तदित्यतिदिश्यमानं रूपाद्युक्तम् ॥ ५ ॥

स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां(णां) चेति तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः ॥ ६ ॥

स एष चाक्षुषः पुरुषो ये चैतस्मादाध्यात्मिकादात्मनोऽर्वाञ्चोऽर्वाग्गता लोकास्तेषां चेष्टे मनुष्यसंबन्धिनां च कामानाम् । तत्तस्माद्य इमे वीणायां गायन्ति गायकास्त एतमेव गायन्ति । यस्मादीश्वरं गायन्ति तस्मात्ते धनसनयो धनलाभयुक्ता धनवन्त इत्यर्थः ॥ ६ ॥

आधिदैविकपुरुषवदाध्यात्मिकेऽपि पुरुषे निरतिशयैश्वर्यश्रवणाच्च तयोरैक्यमित्याह—स एष इति । तयोर्भेदाभावे हेत्वन्तरमाह—तत्तस्मादिति । ईश्वरस्यैव प्रागुक्तहेतोर्गानविषयत्वयोग्यत्वादित्यर्थः । तच्छब्दार्थं स्फुटयति—यस्मादिति ॥ ६ ॥

अथ य एतदेवं विद्वान्साम गायत्युभौ स गायति

---

१ ख. छ. ञ. °इत्यादिना । इ । २ ख. छ ञ. °त्मत्व° । ३ ढ. °यन्त्यागायनास्त° ; ४ ग. घ. ङ. ट ठ. ड. °यनास्त ।

सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्ताꣳ-
श्चाऽऽप्नोति देवकामाꣳश्च ॥ ७ ॥

अथ य एतदेवं विद्वान्यथोक्तं देवमुद्गीथं विद्वान्साम गायत्युभौ स गायति चाक्षुषमादित्यं च। तस्यैवंविदः फलमुच्यते—सोऽमुनैवाऽऽदित्येन स एष ये चामुष्मात्पराञ्चो लोकास्तांश्चाऽऽप्नोति, आदित्यान्तर्गतदेवो भूत्वेत्यर्थो देवकामांश्च ॥ ७ ॥

स्थानभेदेन यथोक्तोपासनवतः फलोक्त्यर्थं पातनिकां करोति—अथेति। एतत्सामेति संबन्धः। एवं विद्वानित्येतदेव विभजते—यथोक्तमिति। विद्वानित्यस्मादुपरिष्टादथशब्दः संबध्यते। सोऽमुनैव लोकान्कामांश्चाऽऽप्नोतीति संबन्धः। आद्यप्रकारं विवृणोति—स एष इति। उपास्यवदुपासकस्यापि कुतो निरतिशयमैश्वर्यं न हि द्वयोर्निरङ्कुशमैश्वर्यं युक्तमित्याशङ्क्याऽऽह—आदित्येति। अमुनैवाऽऽदित्येनेत्युक्तमेवात्र व्यक्तीकृतम् ॥ ७ ॥

अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्ताꣳश्चाऽऽप्नोति
मनुष्यकामाꣳश्च तस्मादु हैवंविदुद्गाता ब्रूयात् ॥ ८ ॥
कं ते काममागायानीत्येष ह्येव कामागानस्येष्टे य
एवं विद्वान्साम गायति साम गायति ॥ ९ ॥

इति छान्दोग्योपनिषदि प्रथमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

अथानेनैव चाक्षुषेणैव ये चैतस्मादर्वाञ्चो लोकास्तांश्चाऽऽप्नोति मनुष्यकामांश्च चाक्षुषो भूत्वेत्यर्थः। तस्मादु हैवंविदुद्गाता ब्रूयाद्यजमानं कमिष्टं ते तव काममागायानीति। एष हि यस्मादुद्गाता कामागानस्योद्गानेन कामं संपादयितुमीष्टे समर्थ इत्यर्थः। कोऽसौ, य एवं विद्वान्साम गायति साम गायति। द्विरुक्तिरुपासनसमाप्त्यर्था ॥ ८ ॥ ९ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

---

१ क. ट. °कं तदे°। २ ख. ङ. ञ. °देनोक्तो°। ३ ख. ङ. ञ. °युं पु°।

अथशब्दस्तथापर्यायः । चाक्षुषो भूत्वाऽनेनैव चाक्षुषेणैवेति संबन्धः । उक्तफलस्य याजमानत्वं दर्शयति—तस्मादिति । तच्छब्दार्थमेव कथयति—एष हीति । उद्गातारं विशिनष्टि—कोऽसाविति । उद्गीथे परस्य संपाद्योपासनं विभागेनोक्तमुपसंहरति—द्विरुक्तिरिति ॥ ८ । ९ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां प्रथमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

(अथ प्रथमाध्यायस्याष्टमः खण्डः) ।

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुरुद्गीथे वै कुशलाः स्मो हन्तोद्गीथे कथां वदाम इति ॥ १ ।

अनेकधोपास्यत्वादक्षरस्य प्रकारान्तरेण परेश्वरीयस्त्वगुणफलमुपासनान्तरमानिनाय । इतिहासस्तु सुखावबोधनार्थः । त्रयस्त्रिसंख्याकाः । ह, इत्येतिह्यार्थः । उद्गीथ उद्गीथज्ञानं प्रति कुशला निपुणा बभूवुः । कस्मिंश्चिद्देशे काले च निमित्ते वा समेतानामित्यभिप्रायः । न हि सर्वस्मिञ्जगति त्रयाणामेव कौशलमुद्गीथादिविज्ञाने । श्रूयन्ते ह्युषस्तजानश्रुतिकैकेयप्रभृतयः सर्वज्ञकल्पाः । के ते त्रय इत्याह—शिलको नामतः शलावतोऽपत्यं शालावत्यः । चिकितायनस्यापत्यं चैकितायनः । दैल्भगोत्रो दाल्भ्यो द्व्यामुष्यायणो वा प्रवाहणो नामतो जीवलस्यापत्यं जैवलिरित्येते त्रयस्ते होचुरन्योन्यमुद्गीथे वै कुशला निपुणा इति प्रसिद्धाः स्मः । अतो हन्त यद्यनुमतिर्भवतामुद्गीथ उद्गीथज्ञाननिमित्तां कथां विचारणां पक्षप्रतिपक्षोपन्यासेन वदामो वादं कुर्म इत्यर्थः । तथा च तद्विद्यसंवादे विपरीतग्रहणनाशोऽपूर्वविज्ञानोपजनः संशयनिवृत्तिश्चेति । अतस्तद्विद्यसंयोगः कर्तव्य इति चेतिहासप्रयोजनम् । दृश्यते हि शिलकादीनाम् ॥ १ ॥

अध्यात्माधिदैवतंस्थानभेदावच्छिन्नपरमात्मदृष्ट्योद्गीथोपासनमखिलपाप्मापगमफल

---

१ ख ङ. ज. झ. ञ. °तुः सिल° । २ ख. ङ. ञ ढ. बोधार्थः । ३ ख. च ढ °ह । सिल° । ४ घ. ङ. ठ. ड. °नः । दाल्भ्यगो° । ५ क. ङ, च. ट. दल्भ्यगो° । ६ ङ. च ढ, हि सिल° । ८ क. °तत्तद्.थान° ।

मुक्तम्। संप्रति स्थानभेदावच्छेदं हित्वा परोवरीयस्त्वगुणकपरमात्मदृष्ट्यै द्वीथोपासनं परोवरीयस्त्वप्राप्तिफलकमानीतवानाम्नाय इति प्रकरणतात्पर्यमाह—अनेकधेति। तर्हि विवक्षितमुपासनमेवोच्यतां किमाख्यायिकयेत्याशङ्क्याऽऽह इतिहासश्चेति। इतिहासः पूर्ववृत्तम्। इतिहस्य भाव ऐतिह्यम्। समेतानामिति निर्धारणे षष्ठी। ननु सर्वस्मिञ्जगति त्रयाणामेवोद्गीथादिज्ञाने कौशलमिति किं नोच्यते। किमिति तेषां मध्ये त्रयाणामेव तन्नैपुण्यं प्रतिज्ञायते तत्राऽऽह—न हीति। अमुष्य प्रसिद्धस्यापत्यमामुष्यायणो द्वयोरामुष्यायणो द्व्यामुष्यायणः। तव मम चायमिति परिभाषया धर्मतः परिगृहीत इति यावत्। किमर्थो वादारम्भ इत्यत आह—तथा चेति। प्रवृत्ते वादे तस्मिन्विवक्षितेऽर्थे विद्या येषां तैः सह संवाददृष्टमेव फलमित्यर्थः। इतिशब्दस्य प्रयोजनमित्यनेन संबन्धः। वादारम्भस्य दृष्टफलत्वे फलितमाह—अत इति। इतिहासस्तु मुखावबोधार्थ इत्युक्तेन समुच्चयार्थश्चकारः। कथं यथोक्तं फलं दृष्टमित्याशङ्क्याऽऽह—दृश्यते हीति। शिलकादीनां तद्विद्ययोगे विपरीतधीध्वंसादिकं फलमिति शेषः॥ १॥

तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचꣳ श्रोष्यामीति॥ २॥

तथेत्युक्त्वा ते समुपविविशुर्होपविष्टवन्तः किल। तत्र राज्ञः प्रागल्भ्योपपत्तेः स ह प्रवाहणो जैवलिरुवाचेतरौ भगवन्तौ पूजावन्तावग्रे पूर्वं वदताम्। ब्राह्मणयोरिति लिङ्गाद्राजाऽसौ युवयोर्ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामि। अर्थरहितामित्यपरे वाचामिति विशेषणात्॥ २॥

तत्रेति निर्धारणार्था सप्तमी। राज्ञः प्रागल्भ्योपपत्तेरित्ययुक्तं तस्य राजत्वे हेत्वभावादित्याशङ्क्याऽऽह—ब्राह्मणयोरितीति। पक्षान्तरं विशेषणसामर्थ्यादुत्थाप्याङ्गी करोति—अर्थेति॥ २॥

स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच॥ ३॥

उक्तयोः स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच—हन्त यद्यनुमंस्यसे त्वा त्वां पृच्छानीत्युक्त इतरः पृच्छेति होवाच॥ ३॥

---

१ ख. ञ. °यणिर्व्यामु°। २ क. छ. °मित्येतेन। ३ क. °थोक्तफ°। ४ ख. छ. ञ °ति। सिल°। ५ ख. ङ. ज. झ. ञ. स हि सिल°। ६ ङ. च. ह सिल°।

राज्ञा यथोक्तेन प्रकारेणोक्तयोर्ब्रह्मगयोर्मध्ये शालावत्यो दाल्भ्यं प्रत्युवाचेति संबन्धः ॥ ३ ॥

का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच ॥ ४ ॥

लब्धानुमतिराह— का सांम्नः, प्रकृतत्वादुद्गीथस्य । उद्गीथो ह्यत्रोपास्यत्वेन प्रकृतः । " परोवरीयांसमुद्गीथम् " इति च वक्ष्यति । गतिराश्रयः परायणमित्येतत् । एवं पृष्टो दाल्भ्य उवाच—स्वर इति । स्वरात्मकत्वात्साम्नः । यो यदात्मकः स तद्गतिस्तदाश्रयश्च भवतीति युक्तं मृदाश्रय इव घटादिः । स्वरस्य का गतिरिति, प्राण इति होवाच । प्राणनिष्पाद्यो हि स्वरस्तस्मात्स्वरस्य प्राणो गतिः । प्राणस्य का गतिरित्यन्नमिति होवाच । अन्नावष्टम्भो हि प्राणः । " शुष्यति वै प्राण ऋतेऽन्नात् " इति हि श्रुतेः । " अन्नं दाम " इति च । अन्नस्य का गतिरित्याप इति होवाच । अप्संभवत्वादन्नस्य ॥ ४ ॥

साम्नो गतिरित्यन्वयः । सामशब्दार्थमाह—प्रकृतत्वादिति । तस्य पूर्वोत्तरग्रन्थयोः प्रकृतत्वं प्रकटयति—उद्गीथो हीति । गतिशब्दस्य क्रियाविषयत्वं व्यावर्तयति—आश्रय इति । औपचारिकमाश्रयं निरस्यति—परायणमित्येतदिति । स्वरो ध्वनिभेदः स कथमुद्गीथस्य गतिरित्याशङ्क्याऽऽह—स्वरात्मकत्वादिति । तद्व्यञ्जकतया तदाश्रयत्वेन तत्तादात्म्याद्भवति स्वरस्तस्य गतिरित्यर्थः । साम्नः स्वरात्मकत्वेऽपि कथं तद्गतित्वमित्याशङ्क्य दृष्टान्तेन परिहरति—यो यदात्मक इति । प्राणस्यान्नावष्टम्भत्वे वाजसनेयश्रुतिं प्रमाणयति—शुष्यतीति । वत्सस्थानीयस्य प्राणस्यान्नं दाम बन्धनमिति च श्रुतिरित्यर्थः । ता अन्नमसृजन्तेति श्रुतेरन्नस्याप्संभवत्वं द्रष्टव्यम् ॥ ४ ॥

अपां का गतिरित्यमुं लोक इति होवाचामुष्य लोकस्य का गतिरिति न स्वर्गं लोकमतिनयेदिति

---

१ क. ख. घ. ञ. ठ. साम्नो गतिः । प्र° । २ ख. घ. ङ. च. ञ. ड. ढ °थोऽत्र ह्युपा° । ३ ङ. ड. °तिश्रु° । ४ ख. छ. ञ. °थोऽत्र हीं° । ५ क. श्रुतेरि° । ञ. श्रुतेरर्थः ।

होवाच स्वर्गं वयं लोकꣳ सामाभिसंस्थापयामः स्वर्गसꣳस्तावꣳ हि सामेति ॥ ५ ॥

अपां का गतिरित्यसौ लोक इति । अमुष्माल्लोकाद्वृष्टिः संभवति । अमुष्य लोकस्य का गतिरिति पृष्टो दाल्भ्य उवाच—स्वर्गममुं लोकमतीत्याश्रयान्तरं साम न नयेत्कश्चिदिति होवाचाऽऽह । अतो वयमपि स्वर्गं लोकं सामाभिसंस्थापयामः । स्वर्गलोकप्रतिष्ठं साम जानीम इत्यर्थः । स्वर्गसंस्तावं स्वर्गत्वेन संस्तवनं संस्तावो यस्य तत्साम स्वर्गसंस्तावम् । हि यस्मात्स्वर्गो वै लोकः साम वेद इति श्रुतिः ॥ ५ ॥

कथमपामसौ लोको गतिस्तत्राऽऽह—अमुष्मादिति । इति पृष्टो दाल्भ्य उवाच हेति संबन्धः । तत्र च्छन्दसि कालनियमाभावमभिप्रेत्य क्रियापदं व्याकरोति—आहेति । यद्यपि परो नास्याऽऽश्रयान्तरं प्रतिपद्यते तथाऽपि त्वया तद्वाच्यमेवेत्याशङ्क्याऽऽह—अत इति । अतःशब्दार्थमेव स्फोरयति—स्वर्गेति । तस्मात्स्वर्गलोकप्रतिष्ठं सामेति पूर्वेण संबन्धः । स्वर्गसंस्तावं सामेत्यत्र प्रमाणमाह—स्वर्ग इति ॥ ९ ॥

तꣳ हो शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति ॥ ६ ॥

तमितरः शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच—अप्रतिष्ठितमसंस्थितं परोवरीयस्त्वेनासमाप्तगति सामेत्यर्थः । वा इत्यागमं स्मारयति किलेति च । दाल्भ्य ते तव साम । यस्त्वसहिष्णुः सामविदेतर्ह्येतस्मिन्काले ब्रूयात्कश्चिद्विपरीतविज्ञानमप्रतिष्ठितं साम प्रतिष्ठितमित्येवंवादापराधिनं मूर्धा शिरस्ते विपतिष्यति विस्पष्टं पतिष्यतीति । एवमुक्तस्यापराधिनस्तथैव तद्विपतेन्न संशयो न त्वहं ब्रवीमीत्यभिप्रायः ।

---

१ ख. घ. ङ. °माद्धि लोका° । २ च. °वाचाऽऽह । स्व° । ३ ख. ञ. °च होवाऽऽह । स्व° । ४ ख. घ. ङ. च. ञ. ड. °रं परं सा° । ५ ख. घ. ङ. च. ञ. ठ. ढ. °वाच । अ° । ६ ख. घ. ञ. ढ. °ति हि श्रु° । ७ ख. ञ. श्रुतेः ॥ ५ ॥ ८ ख. छ. ङ. °माद्धीति । ९ ख. ञ. °ति । स्यात्स्व° । १० ख. ङ. ज. झ. ह सिल° । ११ ख. ग. घ. ङ. °रः सिल° ।

ननु मूर्धपाताहें चेदपराधं कृतवानतः परेणानुक्तस्यापि पतेन्मूर्धा न चेदपराध्युक्तस्यापि नैवं पतति । अन्यथाऽकृताभ्यागमः कृतनाशश्च स्याताम् । नैष दोषः । कृतस्य कर्मणः शुभाशुभस्य फलप्राप्तेर्देशकालनिमित्तापेक्षत्वात् । तत्रैवं सति मूर्धपातनिमित्तस्याप्यज्ञानस्य पराभिव्याहारनिमित्तापेक्षत्वमिति ॥ ६ ॥

उपदेशपारम्पर्यमागमः । यत्कृतकं तदनित्यमिति स्वर्गस्यान्तवत्त्वान्न परायणत्वं संभवतीत्याशयेनाऽऽह—किलेति चेति । यथोक्तं न्यायं सूचयतीति शेषः । न्यायागमाभ्यामप्रतिष्ठितं ते सामेत्युपसंहरति—दाल्भ्येति । स्वर्गप्रतिष्ठितं सामेति ज्ञाने दोषं दर्शयति—यस्त्विति । असहिष्णुर्मिथ्यावचनमसहमानः सन्निति यावत् । एतस्मिन्काले मिथ्यावचनावस्थायामित्यर्थः । विपरीतं विज्ञानं यस्य स तथोक्तस्तं प्रतीति विग्रहः । तदेव विपरीतज्ञानमभिनयति—अप्रतिष्ठितमिति । सामाप्रतिष्ठितं प्रतिष्ठितमिति विपरीतज्ञानं प्रति कश्चिद्ब्रूयादिति संबन्धः । तदीयवचनमेव दर्शयति—एवमिति । स तथा कथयतु मम तु किं स्यादित्याशङ्क्याऽऽह—एवमुक्तस्येति । तत्रैव विदुषः शापवाक्यानुसारेणेति यावत् । तदिति शिरोनिरुक्तिः । शापदानाय प्रवृत्तस्त्वयमिति शङ्कां वारयति—नन्विति । मूर्धपातोपन्यासानर्थक्यमाशङ्कते—नन्विति । अपराधभावेऽपि परोक्तिवशान्मूर्धपाते दोषमाह—अन्यथेति । सति चापराधे परोक्तिवैधुर्यान्मूर्धपाताभावे दोषं कथयति—कृतेति । अपराधस्य मूर्धपातहेतोरपि सहकार्यपेक्षत्वादभिव्याहरणं नानर्थकमित्युत्तरमाह—नैष दोष इति । कर्मणः शुभादेराचरितस्य निमित्तापेक्षया फलहेतुत्वेऽपि प्रकृतेऽपराधिनि कुतो व्याहरणापेक्षेत्याशङ्क्याऽऽह—तत्रेति । तत्र शुभादौ कर्मण्येव निमित्तापेक्षया फलप्रदे सतीत्यर्थः । इति पराभिव्याहरणमर्थवादिति शेषः ॥ ६ ॥

हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययं लोक इति होवाचास्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमिति नयेदिति होवाच प्रतिष्ठां वयं लोकꣳ सामाभिसꣳस्थापयामः प्रतिष्ठासꣳस्तावꣳ हि सामेति ॥ ७ ॥

---

१ क. ग. ङ. ठ. ड. °च तत्पत° । २ ख. ग. ङ. च ज. ठ. ड. ढ. °तांग° । ३ घ. ङ. °पाते नि° । ४ ख. ज. °व्याहरणनि° । ५ ख. छ. ञ. °ति विज्ञा° । ६ क. ग. ठ. °राधिनि प° । ७ क. ड. °वत्तो वे° । भ. ज. ठ. °वन्ते वे° ।

एवमुक्तो दाल्भ्य आह—हन्ताहमेतद्भगवंतो वेदानि यत्प्रतिष्ठं सामेत्युक्तः प्रत्युवाच शालावत्यो विद्धीति होवाच । अमुष्य लोकस्य का गतिरिति पृष्टो दाल्भ्येन शालावत्योऽयं लोक इति होवाच । अयं हि लोको यागदानहोमादिभिरमुं लोकं पुष्यतीति । "अतः प्रदानं देवा उपजीवन्ति" इति हि श्रुतयः । प्रत्यक्षं हि सर्वभूतानां धरणी प्रतिष्ठेति । अतः साम्नोऽप्ययं लोकः प्रतिष्ठेवेति युक्तम् । अस्य लोकस्य का गतिरित्युक्त आह शालावत्यः । न प्रतिष्ठामिमं लोकमतीत्यं नयेत्साम कश्चित् । अतो वयं प्रतिष्ठां लोकं सामभिसंस्थापयामः । यस्मात्प्रतिष्ठासंस्तावं हि प्रतिष्ठात्वेन संस्तुतं सामेत्यर्थः । " इयं वै रथंतरम् " इति च श्रुतिः ॥ ७ ॥

हन्तेत्यादि व्याकरोति—एवमिति । कथममुष्य लोकस्यैतल्लोकप्रतिष्ठत्वं तदाह—अयं लोक इति । आदिशब्दः श्राद्धादिसंग्रहार्थः । तत्रैव श्रुतिं प्रमाणयति—इतीति । अस्माल्लोकात्प्रतीयमानं चरुपुरोडाशाद्यग्निद्वारोपनीवन्ति देवा इति श्रौती प्रसिद्धिरित्यर्थः । भवतु परं लोकं प्रति प्रतिष्ठात्वमस्य लोकस्य तथाऽपि कथमयं लोकः साम्नः प्रतिष्ठेत्याशङ्क्याऽऽह—प्रत्यक्षं हीति । पृथिव्याः सर्वाणि भूतानि प्रति प्रतिष्ठात्वे फलितमाह—अत इति । साम्नोऽपि सर्वान्तर्भावादित्यर्थः । तथाऽपि प्रतिष्ठान्तरं त्वया वाच्यमित्याशङ्क्याऽऽह—अतो वयमिति । यस्मादेतल्लोकप्रतिष्ठात्वेन संस्तुतं साम तस्मादिदं साम प्रत्येतमेव लोकं प्रतिष्ठां जानीम इति योजना । कथं प्रतिष्ठात्वेन सामत्वाविशेषात्पृथिव्यां साम संस्तुतमित्याशङ्क्याऽऽह—इयमिति । इयं वै रथंतरशब्दवाच्यस्य सामविशेषस्य पृथिवीत्वेन स्तुतत्व दुद्गीथस्यापि सामत्वाविशेषात्पृथिव्यात्मत्वं संभाव्यत इत्यर्थः ॥ ७ ॥

तꣳ ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवंतो वेदानीति विद्धीति होवाच ॥ ८ ॥

इति छान्दोग्योपनिषदि प्रथमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

---

१ क. ङ. ङ. ठ. °वत्तो वे° । ग. घ. ट. ढ. °वन्तो वे° । २ घ. 'ति ह श्रु° । च. ङ. °ति श्रु° । ३ क. ग. च. ढ. ङ. ढ, °त्य न न° । ४ ठ. °मः । हि ह° । ५ क. अत इति । ञ. प्रदानमिति । ६ ख. छ. झ. ट. परलो° । ७ क. °थिव्यां साम स्तु° । ८ ग. ढ. °व्यात्मसं° । ९ ङ. ङ. °वत्तो वे° । ग. झ. ठ. °वन्तो वे° ।

तमेवमुक्तवन्तं ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य सामेत्यादि पूर्ववत्। ततः शालावत्य आह-हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाचेतरोऽनुज्ञात आह ॥ ८ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

हन्ताहमेतदित्यत्रानन्तं सामैतादित्युच्यते ॥ ८ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां प्रथमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

(अथ प्रथमाध्यायस्य नवमः खण्डः)।

अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् ॥ १ ॥

अस्य लोकस्य का गतिरिति । आकाश इति होवाच प्रवाहणः। आकाश इति च पर आत्माऽऽकाशो वै नामेति श्रुतेः । तस्य हि कर्म सर्वभूतोत्पादकत्वम् । तस्मिन्नेव हि भूतप्रलयः । तत्तेजोऽसृजत । तेजः परस्यां देवतायामिति हि वक्ष्यति । सर्वाणि ह वा इमानि भूतानि स्थावरजंगमान्याकाशादेव समुत्पद्यन्ते तेजोबन्नादिक्रमेण सामर्थ्यात् । आकाशं प्रत्यस्तं यन्ति प्रलयकाले तेनैव विपरीतक्रमेण हि यस्मादाकाश एवैभ्यः सर्वेभ्यो भूतेभ्यो ज्यायान्महत्तरोऽतः[2] स सर्वेषां भूतानां परमयनं परायणं प्रतिष्ठा त्रिष्वपि कालेष्वित्यर्थः ॥ १ ॥

आकाशशब्दस्य भूताकाशविषयत्वं व्यावर्त्य[3] परमात्मविषयत्वं वाक्यशेषवशाद्दर्शयति-आकाश इति चेति। किंच परस्याऽऽत्मनः सर्वभूतोत्पादकत्वं कर्मेति वेदान्तमर्यादातदिहाऽऽकाशे श्रुतम्। तथा च परमात्मैवाऽऽकाशशब्द इत्याह-तस्य हीति । किंच परस्मिन्नेव भूतानां प्रलयः स चात्राऽऽकाशे श्रुतस्तस्मात्पर एवाऽऽत्माऽऽकाश इत्याह-तस्मिन्नेवेति । सर्वोत्पादकत्वं परस्य कर्मेत्यत्र मानमाह--तत्तेजोऽसृजतेति । परस्मिन्नेव लयो भूतानामित्यत्रापि मानमाह-तेज इति । भवतु परस्याऽऽत्मनः

---

१ क. ख. च. ङ. °वत्तो वे° । ग. घ. ठ. °वन्ती वे° । २ क. ग. ट. ठ. °तः सर्वे° । ३ च. छ. ञ. °ति । किं।

सर्वोत्पादकत्वं कर्म तथाऽपि किमायातमाकाशस्येति चेत्तत्राऽऽह—सर्वाणीति । कथमयं क्रमो लभ्यते । अविशेषेण हि ततः सर्वोत्पत्तिः श्रुतेत्याशङ्क्याऽऽह—सामर्थ्यादिति । आत्मन आकाशः संभूतस्तत्तेजोऽसृजतेत्यादिश्रुतिबलादित्यर्थः । तथाऽपि कथमाकाशे सर्वभूतलयस्तत्राऽऽह—आकाशं प्रतीति । विपर्ययेण तु क्रमेऽन इति न्यायेनाऽऽह—विपरीतेति । आकाशस्य परमात्मत्वे हेत्वन्तरमाह—यस्मादिति । परायणत्वमपि तत्रैव लिङ्गमित्याह—अत्र इति ॥ १ ॥

स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्परोवरीयाꣳसमुद्गीथमुपास्ते ॥ २ ॥

यस्मात्परं परं वरीयो वरीयसोऽप्येष वरः परश्च वरीयांश्च परोवरीयानुद्गीथः परमात्मा संपन्न इत्यर्थः । अत एव स एषोऽनन्तोऽविद्यमानान्तरमेतं परोवरीयांसं परमात्मभूतमनन्तमेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते । तस्यैतत्फलमाह—परोवरीयः परं परं वरीयो विशिष्टतरं जीवनं ह्यस्य विदुषो भवति दृष्टं फलमदृष्टं च परोवरीयस उत्तरोत्तरविशिष्टतरानेव ब्रह्माकाशान्तांल्लोकाञ्जयति य एतदेवं विद्वानुद्गीथमुपास्ते ॥ २ ॥

आकाशस्तल्लिङ्गादिति न्यायेनाऽऽकाशस्य परमात्मत्वमुक्तमिदानीं तस्योद्गीथे संपादितस्य परोवरीयस्त्वं गुणमुपदिशति—यस्मादिति । उत्तरमुत्तरं श्रेष्ठादपि श्रेष्ठोऽयमित्येतत् । साममात्रस्य कथमयं गुणः स्यादित्याशङ्क्याऽऽह—परमात्मेति । आकाशस्य परमात्मत्वे लिङ्गान्तरमाह—अत एवेति । परमात्मसंपन्नत्वादिति यावत् । आकाशो हि प्रकृतोद्गीथे संपादितोऽनन्तः श्रुतः । न चाऽऽनन्त्यं ब्रह्मणोऽन्यत्र युक्तम् । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः । तस्मादाकाशो ब्रह्मेत्यर्थः । संप्रत्याकाशशब्दितस्य परस्योद्गीथे संपादितस्य परोवरीयस्त्वगुणविशिष्टस्योपासितं विधत्ते—तमेतमिति । परं परमुपर्युपरीति यावत् । तस्मादेवमुपासीतेति भावः ॥२॥

तꣳ हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदि-

---

१ ख. छ. झ. क्रम उपल° । २ झ. °तमेवं । ३ क. ग. ङ. ट. °मात्रं सं° । ४ क. ग. घ, च. ट. ठ. ड. ढ. °रं वि° ।

ष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति ॥ ३ ॥

किंच तमेतमुद्गीथं विद्वानतिधन्वा नापतः शुनकस्यापत्यं शौनक उदरशाण्डिल्याय शिष्यायैतमुद्गीथदर्शनमुक्त्वोवाच । यावत्ते तव प्रजायां प्रजासंततावित्यर्थः । एनमुद्गीथं त्वत्संततिजा वेदिष्यन्ते ज्ञास्यन्ति तावन्तं कालं परोवरीयो हैभ्यः प्रसिद्धेभ्यो लौकिकजीवनेभ्य उत्तरोत्तरविशिष्टतरं जीवनं तेभ्यो भविष्यति ॥ ३ ॥

विधिशेषमर्थवादं दर्शयति—किंचेति । इतश्चात्र विधिरस्तीत्येतत्तेभ्यस्तत्संततिजा ये यथोक्तोद्गीथे(थं) वेदितारस्तदर्थमित्यर्थः ॥ ३ ॥

तथाऽमुष्मिँल्लोके लोक इति स य एतंदेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथाऽमुष्मिँल्लोके लोक इति [३]लोके लोक इति ॥ ४ ॥

इति च्छान्दोग्योपनिषदि प्रथमाध्यायस्य नवमः खण्डः ॥ ९ ॥

तथाऽदृष्टेऽपि परलोकेऽमुष्मिन्परोवरीयाँल्लोको भविष्यतीत्युक्त्वाऽऽशाण्डिल्यायातिधन्वा शौनकः । स्यादेतत्फलं पूर्वेषां महाभाग्यानां नैदंयुगीनानामित्याशङ्क्यानिवृत्तय आह—स य इति काश्चिदेतदेवं विद्वानुद्गीथमेतर्ह्युपास्ते तस्याप्येवमेव परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथाऽमुष्मिँल्लोके लोक इति [५]लोके लोक इति ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य नवमः खण्डः ॥ ९ ॥

तथा दृष्टविशिष्टतरजीवनवदित्यर्थः । अदृष्टेऽपीति च्छेदः । स य एतमित्याद्युत्तरं वाक्यं शङ्कोत्तरत्वेनोत्थाप्य व्याचष्टे—स्यादित्यादिना । अस्मिन्युगे भवन्तीत्यैदंयुगीनास्तेषामैदंयुगीनानां लोकः परोवरीयानिति शेषः । पुनरुक्तिरुद्गीथोपास्तिसमाप्त्यर्था ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां प्रथमाध्यायस्य नवमः खण्डः ॥ ९ ॥

---

१ ञ. °त्तरं वि° । २ क. ग. ङ. ज. झ. ट. ठ. °तमेवं । ३ ख. ञ. लोकलो° । ४ ठ. °ज्ञां नेदानींतना° । ५ क. ग. ङ. °ति ॥ ९ ॥ ख. य. °ति लोकलो° ।

(अथ प्रथमाध्यायस्य दशमः खण्डः)।

मटचीहतेषु कुरुष्वाटिक्या सह जाययोपस्तिर्ह चा-
क्रायण इभ्यग्रामे प्रद्राणक उवास ॥ १ ॥

उद्गीथोपासनप्रसङ्गेन प्रस्तावप्रतिहारविषयमप्युपासनं कर्तव्यमितीदमारभ्यते। आख्यायिकां तु सुखावबोधार्थां। मटचीहतेषु मट-च्योऽशनयस्ताभिर्हतेषु नाशितेषु कुरुषु। कुरुसस्येष्वित्यर्थः। ततो दुर्भिक्षे जात आटिक्याऽनुपजातपयोधरादिस्त्रीव्यञ्जनया सह जाययोपस्तिर्ह नाम-तद्ब्रह्मस्यापत्यं चाक्रायणः। इभो हस्ती तमर्हतीतीभ्य ईश्वरो हस्त्यारोहो वा तस्य ग्राम इभ्यग्रामस्तस्मिन्प्रद्राणकोऽन्नालाभात्। द्रा कुत्सायां गतौ। कुत्सितां गतिं गतोऽत्यावरथां प्राप्त इत्यर्थः। उवासोषितवान्कस्यचिद्गृ-हमाश्रित्य ॥ १ ॥

अथोद्गीथाक्षरोपासनस्यानेकधोक्तत्वाद्वक्तव्यानवशेषात्प्रपाठकपरिसमाप्तिरेव युक्ते-त्याशङ्क्याऽऽह-उद्गीथेति। इदमा खण्डान्तरं परामृश्यते। प्रस्तावाद्युपासनं विव-क्षितं चेत्तदेवोच्यतां किमनया कथयेत्याशङ्क्याऽऽह--आख्यायिका त्विति। मटच्यो मर्दनहेतवोऽशनयः पाषाणदृष्टयो वा। ततः सस्यनाशादित्येतत्। सर्वतः स्वैरसंचारेऽपि न व्यभिचारशङ्केति दर्शयितुमाटिक्येति विशेषणम्। प्रद्राणकपदस्य क्रियापदेन संबन्धः। कुत्सितगतिप्राप्तौ हेतुरन्नालाभादिति। प्रद्राणकशब्दार्थं धातूप-न्यासद्वारा कथयति-द्रा कुत्सायामिति ॥ १ ॥

स होभ्यं कुल्माषान्खादन्तं बिभिक्षे तꣳ होवाच।
नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता
इति ॥ २ ॥

सोऽन्नार्थमटन्निभ्यं कुल्माषान्कुत्सितान्माषान्खादन्तं भक्षयन्तं यदृच्छ-योपलभ्य बिभिक्षे याचितवान्। तमुपसृत्य होवाचेभ्यः। नेतोऽस्मान्मया भक्ष्यमाणादुच्छिष्टराशेः कुल्माषा अन्ये न विद्यन्ते। यच्च ये राज्ञो मे ममो-पनिहिताः प्रक्षिप्ता इमे भाजने किं करोमीत्युक्तः प्रत्युवाचोषस्तिः ॥ २ ॥

---

१ ग. ङ. ज. ट. 'टिक्यः स'। २ घ. ङ च ठ. ढ. ढ. 'का सु'। ३ ङ. 'च्यो विद्यु-तोऽश'। ४ ठ. 'देशस'। ५ क. ङ. ढ. 'दिव्य'। ६ ङ. ञ. इतीभ्य'।

यदृच्छया सहसेत्यर्थः । नेत इति वाक्योपादानं तद्व्याकरोति—अस्यादिति । यदित्यव्ययं बहुवचनान्तम् । उपनिहिताः कुल्माषा इति शेषः । तेषां खल्विमे भाजने प्रक्षिप्ता इति योजना ॥ २ ॥

एतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतꣳ स्यादिति होवाच ॥ ३ ॥

एतेषामेतानित्यर्थः । मे मह्यं देहीति होवाच । तान्स इभ्योऽस्मा उषस्तये प्रददौ प्रदत्तवान् । अनुपानीयं समीपस्थमुदकं हन्त गृहाणानुपानमित्युक्तः प्रत्युवाच । उच्छिष्टं वै मे ममेदमुदकं पीतं स्याद्यदि पास्यामीत्युक्तवन्तं प्रत्युवाचेतरः ॥ ३ ॥

हन्त कुल्माषा भक्षिताश्चेदित्यर्थः ॥ ३ ॥

नꣳ स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदꣳकपानमिति ॥४॥

किं न स्विदेते कुल्माषा अप्युच्छिष्टा इत्युक्त आहोस्वित्तर्नं वा अजीविष्यं न जीविष्यामीमान्कुल्माषानखादन्नभक्षयन्निति होवाच । काम इच्छातो मे ममोदकपानं लभ्यत इत्यर्थः । अतश्चैतामवस्थां प्राप्तस्य विद्याधर्मयशोवतः स्वात्मपरोपकारसमर्थस्यैतदपि कर्म कुर्वतो नाऽऽप्यः स्पर्श इत्यभिप्रायः । तस्यापि जीवितं प्रत्युपायान्तरेऽजुगुप्सिते सति जुगुप्सितमेतत्कर्म दोषाय । ज्ञानावलेपेन कुर्वतो नरकपातः स्यादेवेत्यभिप्रायः । प्रद्दाणकशब्दश्रवणात् ॥ ४ ॥

किं प्रत्युवाचेत्याकाङ्क्षापूर्वकमाह—किमित्यादिना । अनुपानाभावेऽपि तुरꣳ जीवनरक्षणमित्याशङ्क्याऽऽह—काम इति । अन्योच्छिष्टकुल्माषभक्षणमृषेर्वदन्त्याः श्रुतेस्तात्पर्यमाह—अतश्चेति । चाक्रायणस्य विदुषोऽभक्ष्यभक्षणदर्शनादिति यावत् । एतामवस्थां प्राप्तस्य जीवितसंदेहमापन्नस्येत्यर्थः । विद्याधर्मयशोवतो ज्ञानादियुक्तस्येति प्रपन्नस्येत्येतत् । स्वात्मोपकारे परोपकारे च सामर्थ्यं निग्रहानुग्रहशक्तिमत्त्वम् । एतत्कर्म जीवनमात्रकारणं कुत्सितं चेष्टितमित्यर्थः । उच्छिष्टोदकपानप्रतिषेधश्रुतेरभिप्रायमाह—तस्यापीति । एतत्कर्मेत्यभक्ष्यभक्षणोक्तिः । ननु ज्ञानिनो यथे-

---

१ ख. ञ, °पानाय स° । २ क. °कं च ' हं° । ३ ठ, किं न । ४ क. ग. ङ. ढ. °दपा° । ५ ख. छ. झ. ट. °ख्यातिप्रं° । ६ ग. ट. एतावत्कं° ।

ष्टचेष्टाऽत्रानुज्ञायते । मैवम् । सर्वान्नानुमतिश्चेत्यादिन्यायविरोदित्याह—ज्ञानेति । तस्मिन्नभिप्राये लिङ्गं दर्शयति—प्रद्दाणकेति । चाक्रायणे प्रद्दाणकशब्दप्रयोगात्परमापदमापन्नः सन्कुल्माषानुच्छिष्टान्भक्षितवानिति प्रतिभाति । तथा च ज्ञानिनो यथेष्टाचारे प्रमाणाभावादनेकप्रमाणविरोधाच्च नासावत्र विवक्षित इत्यर्थः ॥ ४ ॥

स ह खादित्वाऽतिशेषाज्ञायाया आजहार साऽग्र एव सुभिक्षा बभूव तान्प्रतिगृह्य निदधौ ॥ ५ ॥

तांश्च स खादित्वाऽतिशेषानतिशिष्टाज्ञायायै कारुण्यादाजहार । साऽऽटिक्यग्र एव कुल्माषप्राप्तेः सुभिक्षा शोभनभिक्षा लब्धान्नेत्येतद्भूत्र संवृत्ता । तथाऽपि स्त्रीस्वाभाव्यादनवज्ञाय तान्कुल्माषान्पत्युर्हस्तात्प्रतिगृह्य निदधौ निक्षिप्तवती ॥ ५ ॥

स्त्रीस्वाभाव्यं पत्युराज्ञाकरणम् ॥ ९ ॥

स ह प्रातः संजिहान उवाच यद्वतान्नस्य लभेमहि लभेमहि धनमात्रा२ राजाऽसौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति ॥ ६ ॥

स तस्याः कर्म जानन्प्रातरुषःकाले संजिहानः शयनं निद्रां वा परित्यजन्नुवाच पत्न्याः शृण्वत्या यद्यदि बतेति खिद्यमानोऽन्नस्य स्तोकं लभेमहि तद्भुक्त्वाऽहं समर्थो भूत्वा लभेमहि धनमात्रां धनस्याल्पम् । ततोऽस्माकं जीवनं भविष्यतीति । धनलाभे च कारणमाह—राजाऽसौ नातिदूरे स्थाने यक्ष्यते । यजमानत्वात्तस्याऽऽत्मनेपदम् । स च राजा मा मां पात्रमुपलभ्य सर्वैरार्त्विज्यैर्ऋत्विक्कर्मभिर्ऋत्विक्कर्मप्रयोजनायेत्यर्थो वृणीतेति ॥ ६ ॥

तस्याः कर्म कुल्माषाणां परिरक्षणम् । यक्ष्यतीति कस्मान्नोक्तं तत्राऽऽह—यजमानत्वादिति । राज्ञो यजमानत्वाद्यागफलस्याऽऽत्मगामित्वाद्यक्ष्यत इत्यात्मनेपदं प्रयुक्तमित्यर्थः । अन्येषामुपद्रष्टृत्वसंभवे कुतस्त्वामेव राजा मानयिष्यतीत्याशङ्क्याऽऽह—स चेति ॥ ६ ॥

तं जायोवाच हन्त पत इम एव कुल्माषा इति तान्खादित्वाऽमुं यज्ञं विततमेयाय ॥ ७ ॥

---

१ क. °ष्टाचरणे प्र° । २ ख. ङ ञ. ङ. ढ. °ष्यति । ३ क. ग. ठ. °दूरस्था° ।

एवमुक्तवन्तं जायोवाच हन्त गृहाण हे पत इम एव ये मद्धस्ते विनिक्षिप्तास्त्वया कुल्माषा इति । तान्खादित्वाऽमुं यज्ञं राज्ञो वितनं विस्तारितमृत्विग्भिरेवाय ॥ ७ ॥

हन्तेत्यन्नलेशलाभश्चेदेवं धनलब्धिद्वारा जीवनहेतुरित्यर्थः ॥ ७ ॥

तत्रोद्गातृनास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतारमुवाच ॥ ८ ॥

तत्रं च गत्वोद्गातृनुद्गातृपुरुषानागत्य स्तुवन्त्यस्मिन्नित्यास्तावस्तस्मिन्नास्तावे स्तोष्यमाणानुपोपविवेश समीप उपविष्टस्तेषामित्यर्थः । उपविश्य स ह प्रस्तोतारमुवाच ॥ ८ ॥

राज्ञो यज्ञस्तत्रेत्युच्यते । उद्गातुरेकत्वे कुतो बहूक्तिरित्याशङ्क्याऽऽह—उद्गातृपुरुषानिति । स्तुवन्त्यस्मिन्निति सप्तम्या संवाददेशो वा निर्दिश्यते ॥ ८ ॥

प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ॥ ९ ॥

हे प्रस्तोतरित्यामन्त्र्याभिमुखीकरणाय । या देवता प्रस्तावं प्रस्तावभक्तिमनुगताऽन्वायत्ता तां चेद्देवतां प्रस्तावभक्तेरविद्वान्सन्प्रस्तोष्यसि विदुषो मम समीपे । तत्परोक्षेऽपि चेद्विपतेत्तस्य मूर्धा कर्ममात्रविदामेनधिकार एव कर्मणि स्यात् । तच्चानिष्टमविदुषामपि कर्मदर्शनात् । दीक्षणमार्गश्रुतेश्च । अनधिकारे चाविदुषामुत्तर एवैको मार्गः श्रूयेत । न च स्मार्तकर्मनिमित्त एव दक्षिणः पन्थाः । यज्ञेन दानेनेत्यादिश्रुतेः । तथोक्तस्य मयेति च विशेषणाद्विद्वत्समक्षमेव कर्मण्यनधिकारो न सर्वत्राग्निहोत्रस्मार्तकर्माध्ययनादिषु च । अनुज्ञायास्तत्र तत्र दर्शनात् । कर्ममात्रविदामप्यधिकारः सिद्धः कर्मणीति मूर्धा ते विपतिष्यतीति ॥ ९ ॥

किमर्थमामन्त्रणं तदाह—अभिमुखीकरणायेति । विदुषः समीपे देवतामविद्वान्प्रस्तोष्यसि चेन्मूर्धा ते विपतिष्यतीत्यग्रे संबन्धः । नन्वविद्वन्निन्दाया विवक्षितत्वाद्विद्वत्समीपवचनमकिंचित्करमिति चेन्नेत्याह—तत्परोक्षेऽपीति । तस्येत्यविद्वान्प्रस्तोतोच्यते । मा भूत्कर्ममात्रविदां कर्मण्यधिकार इति चेन्नेत्याह—तच्चेति । तेनोभौ कुरुत इत्यादिश्रुताविति शेषः । अविदुषामपि कर्माधिकारे हेत्वन्तरमाह—दक्षिणेति ।

---

१ ख. छ. झ. देव ध° । २ झ. वने हे° । ३ ख. झ, °त्र ग° । ४ क. °शो नि° । ५ क. ग. घ. ट. ठ. °मध्यन° । ६ ख. घ. ज. एको । ७ क. ग. घ. ङ. ठ. ड. °त्र द° ।

तदेव व्यतिरेकद्वारा स्फोरयति—अनधिकारे चेति । तस्यैव समुच्चयफलत्वादित्यर्थः । ननु दक्षिणमार्गस्य वापीकूपतटाकादिस्मार्तकर्मप्रयुक्तत्वाद्वैदिके कर्माणि विद्वानेवाधिक्रियते नेत्याह—न चेति । यज्ञेन दानेन लोकाञ्जयन्तीति वैदिककर्मनिष्ठानामज्ञानामेव दक्षिणमार्गश्रवणादिति हेतुमाह—यज्ञेनेति । इतश्चाविदुषां विद्वत्समीपे कर्माधिकारो नास्तीत्याह—यथोक्तस्येति । देवताविज्ञानशून्यस्य ते मूर्धा विपतिष्यतीत्यनेन प्रकारेण मयोक्तस्य मूर्धा व्यपतिष्यदिति विशेषश्रवणाद्विद्वत्समीपे तदनुज्ञामन्तरेण कर्म कुर्वतोऽपराधित्वात्तस्य कर्मण्यनधिकार एवेत्यर्थः । विद्वदसमीपे पुनरविदुषोऽपि कर्मण्यधिकारोऽस्तीत्याह—न सर्वत्रेति । अग्निहोत्रादौ श्रौते कर्मणि स्मार्तेषु च वापीकूपतटाकादिकर्मस्वध्ययनजपादिषु च विद्वत्सन्निधिमन्तरेणापि सर्वस्मिन्काले कर्ममात्रविदो नाधिकारोऽस्तीत्यशक्यं वक्तुमित्यर्थः । तत्र हेतुमाह—अनुज्ञेति । भगवन्तं वा अहं विविदिषाणीत्यादिना राज्ञा स्वकीयकर्मनिर्वर्तने प्रार्थनादर्शनादेत एव मया समतिसृष्टाः स्तुवतामिति चानुज्ञोपलम्भादस्त्येवाविदुषामपि कर्मण्यधिकार इत्यर्थः । उक्तमर्थमुपसंहरति—कर्ममात्रेति । विद्वत्समीपे तदनुज्ञामलब्ध्वा नास्ति कर्मानुष्ठानमित्येतन्निगमयितुमितिशब्दः । मूर्धा ते विपतिष्यतीत्येतदन्तं प्रस्तोतृविषयं वाक्यं व्याख्यातमित्यनुवदति—मूर्धेति ॥ ९ ॥

एवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतीष्यतीति ॥ १० ॥
एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णीमासांचक्रिरे ॥ ११ ॥

इति च्छान्दोग्योपनिषदि प्रथमाध्यायस्य दशमः खण्डः ॥ १० ॥

एवमेवोद्गातारं प्रतिहर्तारमुवाचेत्यादि समानमन्यत् । ते प्रस्तोत्रादयः

---

१ क. ञ. °तडागादि° । २ क. °दिकक° । ३ ख. छ. °श्रौतक° । ४ क. ञ. °तडागादि° । ५ छ. °नादे° ।

कर्मभ्यः समारता उपरताः सन्तो मूर्धपातभयात्तूष्णीमासांचक्रिरेऽन्यच्चाकुर्वन्तः । अर्थित्वात् ॥ १० ॥ ११ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य दशमः खण्डः ॥ १० ॥

तूष्णीमित्यस्यार्थमाह—अन्यच्चेति । तत्र हेतुमाह—आर्थित्वादिति । तत्तद्देवताविषयविज्ञानार्थित्वेन कर्मान्तरमकुर्वन्तश्चाक्रायणाभिमुखाः स्थिता इत्यर्थः ॥ १० ॥ ॥ ११ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां प्रथमाध्यायस्यं दशमः खण्डः ॥ १० ॥

(अथ प्रथमाध्यायस्यैकादशः खण्डः) ।

अथ हनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच ॥ १ ॥

अथानन्तरं हैनमुषस्ति यजमानो राजोवाच । भगवन्तं वै पूजावन्तमहं विविदिषाणि वेदितुमिच्छामीत्युक्त उषस्तिरस्मि चाक्रायणस्तवापि श्रोत्रपथमागतो यदीति होवाचोक्तवान् । १ ॥

अथ हैनमित्यादि व्याकरोति-अथेति । प्रस्तोतृप्रभृतीनां तूष्णींभावादिति शेषः ॥ १ ॥

स होवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषं भगवतो वा अहमवित्त्याऽन्यानवृषि ॥ २ ॥

स ह यजमान उवाच सत्यमेवमहं भगवन्तं बहुगुणमश्रौषं सर्वैश्च ऋत्विक्कर्मभिरार्त्विज्यैः पर्यैषिषं पर्येषणं कृतवानस्मि । अन्विष्य भगवतो वा अहमवित्त्याऽलाभेनान्यानिमानवृषि वृतवानस्मि ॥ २ ॥

चाक्रायणस्य वचनमङ्गी करोति—सत्यमिति । अङ्गीकारमेव स्फोरयति—एवमिति । आर्त्विज्यैरित्यस्य व्याख्यानमृत्विक्कर्मभिरिति । तदर्थमिति यावत् । यदि मामार्त्विज्यार्थमनुसंहितवानसि किमितीमानन्यान्वृतवानित्याशङ्क्याऽऽह—अन्विष्येति । २ ॥

---

१ क. ग, घ. ञ. ड. °न्तं पू° । २ ख. घ. ङ. °वन्तं वा अहं । ३ ख, ञ, °नस्म्यद्याप्यन्वि° ।

भगवाꣳस्त्वेव मे सर्वैरार्त्विज्यैरिति तथेत्यथ
तर्ह्येत एव समतिसृष्टाः स्तुवतां यावत्त्वेभ्यो
धनं दद्यास्तावन्मम दद्या इति तथेति ह
यजमान उवाच ॥ ३ ॥

अद्यापि भगवांस्त्वेव मे मम सर्वैरार्त्विज्यैर्ऋत्विक्कर्मार्थमस्त्वित्युक्तस्तथेत्याहोषस्तिः । किंत्वयैवं तर्ह्येत एव त्वया पूर्वं वृता मया समतिसृष्टा मया सम्यक्प्रसन्नेनानुज्ञाताः सन्तः स्तुवताम् । त्वया त्वेतत्कार्यम् । यावत्त्वेभ्यः प्रस्तोत्रादिभ्यः सर्वेभ्यो धनं दद्याः प्रयच्छासि तावन्मम दद्या इत्युक्तस्तथेति ह यजमान उवाच ॥ ३ ॥

एवं गते किमधुना कर्तव्यमित्याशङ्क्याऽऽह—अद्यापीति । चाक्रायणानुमतिं श्रुत्वा किमिदमिति व्याकुलितेषु प्रस्तोतृप्रभृतिषु ब्रूते—किंत्विति । उभयानुमत्यपेक्षयाऽऽनन्तर्यम् । ममालाभेनामीषां वृतत्वस्य निवृत्त्यवस्थायामित्याह—तर्हीति । अनुज्ञाताः सन्तः प्रस्तोत्रादयः स्तुतिं कुर्वतामित्याह—स्तुवतामिति । अस्त्वेवं त्वदर्थं पुनर्मया किं विधेयमित्याशङ्क्याऽऽह—त्वया त्विति ॥ ३ ॥

अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्या देवता
प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि
मूर्धा ते विपतिष्यतीति । सा भगवानवोच-
त्कतमा सा देवेति ॥ ४ ॥

अथ हैनमौषस्त्यं वचः श्रुत्वा प्रस्तोतोपससादोषस्तिं विनयेनोपजगाम । प्रस्तोतर्या देवतेत्यादि मा मां भगवानवोचत्पूर्वम् । कतमा सा देवता या प्रस्तावभक्तिमन्वायत्तेति ॥ ४ ॥

यजमानं प्रत्युषस्तिप्रोक्तं वचः श्रुत्वाऽनन्तरमेनमुषस्तिं प्रस्तोता त्यक्तव्याकुलत्वः शिष्यत्वेनोपसन्नवानित्याह—अथेति । उपगतिप्रकारमभिनयति—प्रस्तोतरिति ॥ ४ ॥

प्राण इति होवाच सर्वाणि ह वा इमानि
भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जि-

---

१ ख. ग. °पेक्षया° । २ ख. °या आन° । ३ क. °न्तर्यमथशब्दः । म° । ४ क. त्यक्त्वा व्या° । ५ क. ग. ट. °लत्वं शि° । ६ क. तर्यिति ।

हते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रा-
स्तोष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥ ५ ॥

पृष्टः प्राण इति होवाच । युक्तं प्रस्तावस्य प्राणो देवतेति । कथं, सर्वाणि स्थावरजंगमानि भूतानि प्राणमेवाभिसंविशन्ति प्रलयकाले प्राणमभि लक्षयित्वा प्राणात्मनैवोज्जिहते प्राणादेवोद्गच्छन्तीत्यर्थ उत्पत्तिकाले । अतः सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वांस्त्वं प्रास्तोष्यः प्रस्तवनं प्रस्तावभक्तिं कृतवानसि यदि मूर्धा शिरस्ते व्यपतिष्यद्विपतितमभविष्यत्तथोक्तस्य मया तत्काले मूर्धा ते विपतिष्यतीति । अतस्त्वया साधु कृतम् । मया निषिद्धः कर्मणो यदुपरममकार्षीरित्यभिप्रायः ॥ ५ ॥

प्रतिवचनमादाय प्रशब्दसामान्यं गृहीत्वा तात्पर्यमाह--पृष्ट इति । कथमिह प्राणशब्दार्थो निश्चीयतामित्याशङ्क्याह एव प्राण इति न्यायेनाऽऽह—कथमिति । प्राणात्मनैव संविशन्तीति पूर्वेण संबन्धः । प्राणशब्दार्थस्य परमात्मत्वेन निर्णीतत्वमतः-शब्दार्थः । चेच्छब्दार्थो यदीत्युक्तः । मया तथोक्तस्य मूर्धा ते विपतिष्यतीत्येवमुक्तस्य तव तत्काले स्वापराधावस्थायां मूर्धा व्यपतिष्यदेवेति योजना । प्रमादस्य महत्त्वया परिहृतत्वादित्यत शब्दार्थः ॥ ५ ॥

अथ हनमुद्गातोपससादोद्गातर्या देवतोद्गीथमन्वायत्ता
तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा
भगवानवोचत्कतमा सा देवतेति ॥ ६ ॥

तथोद्गाता पप्रच्छ कतमा सोद्गीथभक्तिमनुगताऽन्वायत्ता देवतेति ॥ ६ ॥
॥ ६ ॥

आदित्य इति होवाच सर्वाणि ह वा इमानि भूता-
न्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवतोद्गीथम-

---

१ ख. ग. °ले । अ° । ङ. ङ. ढ. °ले सा° । २ ख. घ. च. ज. °तः सा° । ३ ख. घ. ङ. च. ज. ङ. ढ. कृतं त्वया । म° ।

न्वायत्ता तां चेदविद्वानुदगास्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥ ७ ॥

पृष्ट आदित्य इति होवाच । सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैरूर्ध्वं सन्तं गायन्ति शब्दयन्ति स्तुवन्तीत्यभिप्रायः । उच्छब्दसामान्यात्प्रशब्दसामान्यादिव प्राणोऽतः सैषा देवतेत्यादि पूर्ववत् ॥ ७ ॥

यथा प्रशब्दसामान्यात्प्राणः प्रस्तावदेवतेत्युक्तं तथाऽऽदित्यो द्वीथयोरुच्छब्दसामान्यादुद्गीथदेवताऽऽदित्य इत्याह—उच्छब्देति । उक्तसामान्यपरामर्शार्थोऽतः-शब्दः ॥ ७ ॥

अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥ ८ ॥

एवमेवाथ हैनं प्रतिहर्तोपससाद कतमा सा देवता प्रतिहारमन्वायत्तेति ॥ ८ ॥

एवमेव प्रस्तोतृवदुद्गातृवच्चेत्यर्थः । ऋत्विग्भ्यां प्रस्तावोद्गीथदेवतयोर्विज्ञानानन्तर्यमथशब्दार्थः ॥ ८ ॥

अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति ॥ ९ ॥

इति च्छान्दोग्योपनिषदि प्रथमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

पृष्टोऽन्नमिति होवाच । सर्वाणि ह वा इमानि भूतान्यन्नमेवाऽऽत्मानं प्रति सर्वतः प्रतिहरमाणानि जीवन्ति । सैषा देवता प्रतिशब्दसामान्यात्प्रतिहारभक्तिमनुगता । समानमन्यत्तथोक्तस्य मयेति । प्रस्ता-

---

१ ख. ग. घ. ङ. च. ञ. ठ. ड. 'र्वाणीमा' ।

वोद्गीथप्रतिहारभक्तीः प्राणादित्यान्नदृष्ट्योपासीतेति समुदायार्थः । प्राणाद्यापत्तिः कर्मसमृद्धिर्वा फलमिति ॥ ९ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

कथमन्नस्य प्रतिहारत्वं तदाह–सर्वाणीति । तां चेदविद्वानित्याद्यन्यदित्युच्यते । यथोक्तस्य मयेत्येतदन्तमिति शेषः । कीदृगुपासनमस्मिन्प्रकरणे विवक्षितमित्याशङ्क्याऽऽह–प्रस्तावेति । उपास्तित्रयस्य फलं दर्शयति–प्राणादीति ॥ ९ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां प्रथमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

(अथ प्रथमाध्यायस्य द्वादशः खण्डः) ।

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज ॥ १ ॥

अतीते खण्डेऽन्नापत्तिनिमित्ता कष्टावस्थोक्तोच्छिष्टपर्युषितभक्षणलक्षणा सा मा भूदित्यन्नलाभायाथानन्तरं शौवः श्वभिर्दृष्ट उद्गीथ उद्गानं सामातः प्रस्तूयते । तत्तत्र ह किल बको नामतो दल्भस्यापत्यं दाल्भ्यो ग्लावो वा नामतो मित्रायाश्चापत्यं मैत्रेयः । वाशब्दश्चार्थे । द्व्यामुष्यायणो ह्यसौ । वस्तुविषये क्रियास्विव विकल्पानुपपत्तेः । द्विनामा द्विगोत्र इत्यादि हि स्मृतिः । दृश्यते चोभयतः पिण्डभाक्त्वम् । उद्गीथे बद्धचित्तत्वादृषावनादराद्वा वाशब्दः स्वाध्यायार्थः । स्वाध्यायं कर्तुं ग्रामाद्बहिरुद्वव्राजोद्गतवान्विविक्तदेशस्थोदकाभ्यासम् । उद्वव्राज प्रतिपालयांचकारेति चैकवचनाल्लिङ्गादेकोऽसावृषिः । श्वोद्गीथकालप्रतिपालनादृषेः स्वाध्यायकरणमन्नकामनयेति लक्ष्यत इत्यभिप्रायतः ॥ १ ॥

पूर्वोत्तरखण्डयोः संगतिं दर्शयन्नुपासनान्तरं प्रस्तौति—अतीत इति । अन्नलाभ-

---

१ क. ट. °ज्ञानास्ति° । ग. °ज्ञालाभनि° । २ क. च. °च्छिष्ट° । ३ क. ग. घ. ङ. ट. ढ. °त्रि किं° । ४ ग. च. ञ. ट. दल्भ्यस्या° । ५ ख. ञ. °वो ना° । ६ ख. च. ञ. ढ. °दि स्मृ° । ७ ख. च. ञ. ट. स्मृतिर्हि । द्व° । ८ ख. ग. घ. च. ञ. ट. ड. °यार्थम् । स्वा° । ९ क. ट. ठ. °भ्यासम् । १० ख. ङ. छ. ड. ड. °क्ष्येतऽभि° । ११ क. °प्रायोऽन्तःस्वा° । ख. घ. ङ. छ. ढ. ड. °प्रायोऽतः ।

स्यापेक्षितत्वमतःशब्दार्थः । प्रकारान्तरेणोद्गीथोपासनमन्नकामस्य प्रस्तुत्य प्रतिपत्तिसौकर्यार्थमाख्यायिकामादत्ते—उषस्तेति । न केवलं दैल्भस्यापत्यं किंतु मित्रायाश्चेति चार्थः । न च सा दैल्भस्य पत्नीति युक्तम् । तथा सति मैत्रेयपदस्य वैयर्थ्यात् । पत्न्यन्तरापत्यत्वव्यावृत्त्यर्थमिति चेन्न । प्रयोजनाभावात् । नन्वत्र वाशब्दाद्द्वावृषी विवक्षिताविति चेन्नेत्याह—वाशब्द इति । कथं पुनर्दैल्भस्यापत्यं बकस्तदभार्यायां मित्रायाश्चापत्यं भवितुमुत्सहते तत्राऽऽह—द्व्यामुष्यायणो हीति । चैकितायनो दाल्भ्य इत्यत्रोक्तमेतदिति सूचयितुं हिशब्दः । उदितानुदितहोमवत्केषांचिद्दृष्टत्वा बकोऽसावन्येषां श्लाघ इत्येकस्मिन्नपि विकल्पो भविष्यति नेत्याह—उद्गीथविषय इति । कथं पुनर्विना मानमेकस्यैव द्विनामत्वाद्यङ्गी क्रियते तत्राऽऽह—द्विनामेति । इत्यादिवाक्यं स्मृतिरूपं धर्मशास्त्रे प्रसिद्धमित्यर्थः । द्विगोत्रत्वमेकस्य लोकेऽपि प्रसिद्धमित्याह—दृश्यते चेति । यतः सुतो जायते येन चायं धर्मतो गृह्यते तयोरुभयोरित्याह—उभयत इति । 'उभयोरप्यसावुक्थी पिण्डदाता च धर्मतः' इति स्मरन्तीत्यर्थः । दाल्भ्यादन्यो मैत्रेय इत्यङ्गीकृत्याऽऽह—उद्गीथ इति । तदुपास्तौ तात्पर्यमृषेर्वनादरे हेतुः । तस्मादृषिस्मृषिद्वयं वा विवक्षितमित्यर्थः । पक्षान्तरद्योतनार्थो वाशब्दः । श्रौतो वाशब्दस्तर्हि किमर्थमित्याशङ्क्य पाठादन्यत्र तस्य फलमित्याह—वाशब्द इति । मैत्रेयौ तं वाक्यं व्याख्याय स्वाध्यायमित्यादि व्याचष्टे—स्वाध्यायमिति । यदुक्तमृषिरेको बकादिशब्दैरुच्यत इति तत्र लिङ्गमाह—उद्गात्रेति । शुनामुद्गीथः श्वोद्गीथस्तत्कालस्य प्रतिपालनं प्रतीक्षणमृषेर्दृश्यते तेषां चोद्गानमन्नार्थं तद्दृष्टेरपि स्वाध्यायकरणं तदर्थमित्याह—श्वोद्गीथेति । यथोक्तार्थवाचिशब्दाभावेऽपि सामर्थ्यादयमर्थो भातीत्याह—अभिप्रायेति ॥ १ ॥

तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति ॥ २ ॥

स्वाध्यायेन तोषिता देवतार्षिर्वा स्वरूपं गृहीत्वा श्वा श्वेतः संस्तस्मा ऋषये तदनुग्रहार्थं प्रादुर्बभूव प्रादुश्चकार । तमन्ये शुक्लं श्वानं क्षुल्लकाः श्वान उपसमेत्योचुरुक्तवन्तोऽन्नं नोऽस्मभ्यं भगवानागायत्वागानेन निष्पादयत्वित्यर्थः । मुख्यप्राणं वागादयो वा प्राणमन्वन्नभुजः स्वाध्या-

---

१ छ. ञ. दल्भ्यस्या° । २ ग. छ. ञ. ट. दल्भ्यस्य । ३ ग. छ. ञ. ट. °दैल्भ्यस्या° । ४ क. ग. ट. °यान्तवा° । ५ ख. ग. छ.ञ. ठ. °ध्यायार्थमि° । ६ क. °र्थो भवती° । ७ ख. छ. ज. °य इ° । ८ क. °काः क्षुद्रकाः श्वा° । ९ ख. ग. घ. ङ. छ. ट. ठ. ढ. मुख्यं प्रा° ।

यपरितोषिताः सन्तोऽनुगृह्णीयुरेनं स्वरूपमादायेति युक्तमेवं प्रतिपत्तुम् । अश्नायामं वै बुभुक्षिताः स्मो वा इति ॥ २ ॥

तस्मा इत्यादि व्याचष्टे— स्वाध्यायेनेति । क्षुल्लकाः क्षुद्रकाः शिशव इति यावत् । श्वेतः श्वा कश्चिद्दर्षिर्देवता वा । अन्ये च श्वानो देवता ऋषयो वेत्युक्तम् । संप्रति विवक्षितं पक्षमाह—मुख्येति । तमूचुरिति संबन्धः । तानेव विशिनष्टि—प्राणमन्विति । मुख्यप्राणसहितत्वागादिग्रहे हेतुमाह—स्वाध्यायेति । अन्यथा वाक्यमनिर्धारितार्थं स्यादिति भावः । किमित्यन्नं भवद्भ्यो मया संपाद्यते न हि भवतामभोक्तॄणां तेन कृत्यमस्तीत्याशङ्क्य त्वन्निष्ठचेतनद्वारेणास्माकमपि भोगसिद्धेर्भवमित्याह—अश्नायाम वा इत्यादिना ॥ २ ॥

तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयांचकार ॥३॥

एवमुक्ते श्वा श्वेतं उवाच तान्क्षुल्लकाञ्शुन इहैवास्मिन्नेव देशे मा मां प्रातः प्रातःकाल उपसमीयातेति । दैर्घ्यं छान्दसं समीयातेति प्रमादपाठो वा । प्रातःकालकरणं तत्काल एव कर्तव्यार्थम् । अन्नदस्य वा सवितुरपराह्णेऽनाभिमुख्यात् । तत्तत्रैव ह बको दाल्भ्यो ग्लावो वा मैत्रेय ऋषिः प्रतिपालयांचकार प्रतीक्षणं कृतवानित्यर्थः ॥ ३ ॥

किमिति प्रातःकालप्रतीक्षणं कृतं तत्राऽऽह—प्रातरिति । उद्गानस्येति शेषः । प्रातःकालप्रतीक्षणकरणे कारणान्तरमाह—अन्नदस्येति । तस्य वृष्टिद्वाराऽन्नदत्वं द्रष्टव्यम् । तद्धेत्यादि व्याचष्टे—तत्तत्रेति । ऋषेरन्नकामत्वमितोऽवगतम् ॥ ३ ॥

ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः संरब्धाः सर्पन्तीत्येवमाससृपुस्ते ह समुपविश्य हिं चक्रुः ॥४॥

ते श्वानस्तत्रैवाऽऽगम्य ऋषेः समक्षं यथैवेह कर्मणि बहिष्पवमानेन स्तोत्रेण स्तोष्यमाणा उद्गातृपुरुषाः संरब्धाः संलग्ना अन्योन्यमेवं मुखेना-

---

१ घ. ङ. च. ठ. ड. ढ °म बु° । २ छ. °रितं स्या° । ३ क. ग. च. ट. °मुक्तवन्त ः । स श्वा । ङ. °मुक्तवन्तः । श्वा । ङ. °मुक्तवतः । श्वा । ४ ख. ग. घ. ङ. च. ट. ज. ड. ढ. °तस्तान्क्षु° । ५ ढ. °कानुवाच शुन° । ६ क. च. °गत्य ऋ° । ७ क. ख. ग. घ. च. ज. ट. ढ. °व सर्पन्ति । एवं मु° ।

न्योन्यस्य पुच्छं गृहीत्वाऽऽसमुपासप्तवन्तः परिभ्रमणं कृतवन्त इत्यर्थः । त एवं संसृप्य समुपविश्योपविष्टाः सन्तो हिं चक्रुर्हिंकारं कृतवन्तः ॥ ४ ॥

ते हेत्यादि व्याकरोति—ते श्वान इति । सम्क्षमाससमुपुरिति संबन्धः । उद्गातृपुरुषा इत्यध्वर्युप्रमुखा यजमानपर्यन्ता गृह्यन्ते । अन्योन्यं संलग्नाः सर्पन्तीति शेषः ॥ ४ ॥

ओ३मदा३मो पिबा३मो३ देवो वरुणः प्रजापतिः सविता२ऽन्नमिहा२ऽऽहरदन्नपते३ऽन्नमिहा२ऽऽहरा२ऽऽहरो३मिति ॥ ५ ॥

इति च्छान्दोग्योपनिषदि प्रथमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

ओमदामो पिबामो देवो द्योतनात् । वरुणो वर्षणाज्जगतः । प्रजापतिः पालनात्प्रजानाम् । सविता प्रसवितृत्वात्सर्वस्याऽऽदित्य उच्यते । एतैः पर्यायैः स एवंभूत आदित्योऽन्नमस्मभ्यमिहाऽऽहरदाहरत्विति । त एवं हिं कृत्वा पुनरप्यूचुः—स त्वं हेऽन्नपते । स हि सर्वस्यान्नस्य प्रसवितृत्वात्पतिः । न हि तत्पाकेन विना प्रभूतमन्नमणुमात्रमपि जायते प्राणिनाम् । अतोऽन्नपतिः । हेऽन्नपतेऽन्नमस्मभ्यमिहाऽऽहराऽऽहरेति । अभ्यास आदरार्थः । ओमिति ॥ ५ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

हिंकारस्वरूपमाह—ओमित्यादिना । त्रिवारमोंकारो गानार्थमुच्चरितः । अदामाशनं करवाम । पिबाम पानं करवामेत्येतत् । इतिशब्दो हिंकारसमाप्त्यर्थः । अन्नप्रसवितृत्वमादित्यस्य साधयति— न हीति । इहेति प्रकृतदेशोक्तिः । ओंकारः सवितृप्रार्थनामन्त्रसमाप्त्यर्थः । भक्तिविषयोपासितसमाप्त्यर्थमितिपदम् ॥ ५ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां प्रथमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

(अथ प्रथमाध्यायस्य त्रयोदशः खण्डः) ।

भक्तिविषयोपासनं सामावयवसंबद्धमित्यतः सामावयवान्तरस्तोभाक्ष-

१ ग. घ. ञ. °च्छं पु° । २ ङ. च. ढ. °वरणा° । ३ ञ. ङ. सर्वान्न° । ४ घ. ङ. ङ. °र्थमोमि° । ५ क. °मुच्चारि° । ६ ख. छ. ञ. °प्यर्थं चेति° । ७ क. ढ. °बन्धमि° ।

रविषयान्यु(ण्यु)पासनान्तराणि संहतान्युपदिश्यन्तेऽनन्तरं सामावयवसंबद्धत्वाविशेषात्—

अयं वाव लोको हाउकारो वायुर्हाइकारश्चन्द्रमा अथकारः । आत्मेहकारोऽग्निरीकारः ॥ १ ॥

अयं वावायमेव लोको हाउकारः स्तोभो रथंतरे साम्नि प्रसिद्धः—इयं वै रथंतरमिति । अस्मात्संबन्धसामान्याद्धाउकारस्तोभोऽयं लोक इत्येवमुपासीत । वायुर्हाइकारः । वामदेव्ये सामनि हाइकारः प्रसिद्धः । वाय्वप्संबन्धश्च वामदेव्यस्य साम्नो योनिरिति । अस्मात्सामान्याद्धाइकारं वायुदृष्ट्योपासीत । चन्द्रमा अथकारः । चन्द्रदृष्ट्याऽथकारमुपासीत । अन्ने हीदं स्थितम् । अनात्मा चन्द्रः । थकाराकारसामान्याच्च । आत्मेहकारः । इहेति स्तोभः प्रत्यक्षो ह्यात्मेति व्यपदिश्यते । इहेति च स्तोभः । तत्सामान्यात् । अग्निरीकारः । ईनिधनानि चाऽऽग्नेयानि सर्वाणि सामानीत्यतस्तत्सामान्यात् ॥ १ ॥

ननु भक्तिसंबन्धानामुपासनानां नीतत्वात्समस्तस्येत्यादिवक्तव्ये किमनन्तरखण्डेनेत्याशङ्क्याऽऽह—भक्तीति । इत्यतोऽस्मात्प्रसङ्गादिति यावत् । ऋगक्षराणि गीयन्ते तद्व्यतिरिक्तानि वाच्यशून्यानि गीतिसिद्ध्यर्थानि स्तोभाक्षराणि परिभाष्यन्ते तानि च कर्मापूर्वनिर्वृत्तिद्वारेण फलवत्त्वादुपास्यानि तदुपास्तिविधिपरमुत्तरं वाक्यमित्यर्थः । वक्ष्यमाणोपासनानां प्रत्येकं स्वातन्त्र्यं नास्तीत्याह—संहतानीति । तेषामनन्तरमुपदेशे हेतुमाह—सामावयवेति । न चैवंविधस्तोमो नास्तीति वाच्यमित्याह—रथंतर इति । तथाऽपि कथं पृथिवीदृष्ट्या यथोक्तस्तोभस्योपास्यत्वं तदाह—इयमिति । इयं वै रथंतरमित्यत्र पृथिव्या रथंतरत्वं श्रुतं प्रस्तुतश्च स्तोमो रथंतरेऽस्तीत्युक्तम् । तथा च यथोक्तात्संबन्धरूपात्सादृश्यात्पृथिवीदृष्ट्या हाउकार उपास्य इत्यर्थः । अथ पुनर्वायुदृष्ट्या हाइकारस्योपास्यत्वं तत्राऽऽह—वाय्वप्संबन्धश्चेति । हाइकारो वामदेव्ये साम्नि प्रसिद्धः । तस्य च वायोरपां च संबन्धो योनिर्मैथुनेच्छावतीनामपां वायुः पृष्ठेऽत्यवर्तत ततो वामदेव्यं सामाभवदिति श्रुतेः । तस्माद्यथोक्ताद्वामदेव्यसामसंबन्धसामान्याद्वायुदृष्ट्या हाइकारमुपासीतेत्यर्थः । कथमथकारस्य

---

१ घ. ङ ढ. 'बन्धत्वा' । २ ख. ञ. ठ. 'र्हायिका' । ३ ख. ङ. ञ. 'र्हायिका' । ४ ख. ङ. ञ. ड. ढ. 'हायिका' । ५ ङ. 'स्मात्संबन्धाद्धा' । ६ ढ. 'दं सर्वं स्थि' । ७ ख. घ. ङ. च. ञ. ढ. 'त्मा च च' । ८ च. ड. ढ. स्तोभोऽप्र' । ९ ख. ञ. 'नि धनानि चा' । १० क. 'नां ज्ञात' । ग. ट. 'नां जात' । ११ क. तत्राऽऽह' । १२ ख. ञ. हायिका' । १३ ख. ग. ञ. हायिका' । १४ ख. ञ. 'मा'क्षरव' । १५ ख. ञ. हायिका' ।

चन्द्रदृष्ट्योपासनं तत्राऽऽह--अन्ने हीति । तथा च थकारसामान्याद्यथोक्तोपास्तिसिद्धिरिति शेषः । थकारवदकारसामान्याच्च च द्रदृष्ट्याऽथकारमुपासीतेत्याह--थकारेति । अथकारे तावद्वचक्तोऽकारोऽनात्मनि चन्द्रमस्यपि सोऽस्तीति तद्युक्तं यथोक्तमुपासनमित्यर्थः । प्रथममप्रत्यक्षः पश्चात्प्रत्यक्षीभवन्निति शेषः । तत्सामान्यमिहेति व्यपदिश्यमानत्वं तस्मादात्मदृष्टिरिहेति स्तोभे कर्तव्येत्याह--तत्सामान्यादिति । अग्निदृष्टिरीकाराख्ये स्तोभाक्षरे कर्तव्येत्यत्र हेतुमाह--ईनिधनानीति । ईकारो निधीयते येषु सामसु तान्यीनिधनानि प्रसिद्धानि । तथा च तेष्वग्निरीकारश्चेत्युभयोर्भावादस्मात्सादृश्यादीकारमग्निदृष्ट्योपासीतेत्यर्थः ॥ १ ॥

आदित्य ऊकारो निहव एकारो विश्वे देवा औहोयिकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराट् ॥ २ ॥

आदित्य ऊकारः । उच्चैरूर्ध्वं सन्तमादित्यं गायन्त्यूकारश्चायं स्तोभः । आदित्यदैवत्ये साम्नि स्तोभे ऊ इत्यादित्य ऊकारः । निहव इत्यह्वानमेकारः स्तोभः । एहीति चाऽऽह्वयन्तीति तत्सामान्यात् । विश्वे देवा औहोयिकारो वैश्वदेव्ये साम्नि स्तोभस्य दर्शनात् । प्रजापतिर्हिंकारः । आनिरुक्तत्याद्धिंकारस्य चाव्यक्तत्वात् । प्राणः स्वरः । स्वर इति स्तोभः । प्राणस्य च स्वरहेतुत्वसामान्यात् । अन्नं या या इति स्तोभोऽन्नम् । अन्नेन हीदं यातीत्यतस्तत्सामान्यात् । वागिति स्तोभो विराडन्नं देवताविशेषो वा । वैराजे साम्नि स्तोभदर्शनात् ॥ २ ॥

ऊकारमादित्यदृष्ट्या कथमुपासीतेत्याशङ्क्याऽऽह--उच्चैरिति । ऊकारादित्ययोर्विधान्तरेण सादृश्यमाह--आदित्येति । एकारसामान्यान्निहवदृष्टिरेकारे स्तोभे कार्येत्याह--निहव इत्यादिना । औहोयिकारस्य विश्वे(श्व)देवदृष्ट्योपारतौ हेतुमाह--वैश्वदेव इति । प्रजापतिदृष्ट्या हिंकारोपास्यत्वे हेतुः--आनिरुक्तत्यादिति । नीलपीतादिरूपेण निरुक्तत्यविषयत्वात्प्रजापतेरित्यर्थः । अव्यक्तत्वाद्रूपादिरहितत्वादित्यर्थः । प्राणस्य चेति चकारात्स्वरस्य चेत्यर्थः । स्वरहेतुत्वं तन्निर्वर्तकत्वेन तदात्मकत्वम् । अन्नं या इति वाक्यं व्याचष्टे--या इति । अन्नदृष्ट्यर्था इति स्तोभे कर्त-

---

१ ख. ग. छ. ट. सोऽस्ति त° । २ क. ग. ज. झ. ट. °होइका° । ३ क. °यन्तीत्युका° । ४ ख. ञ. °त्ये वा सा° । ५ क. ग. च. ट. ठ. °भ इ° । ६ ठ. °ति त्याऽऽह्व° । ७ क. ग. घ. ठ. ड. °होईका° । ८ घ. ङ. ठ. ड. ढ. °स्य स्व° । ९ क. ट. °होईका° ।

त्येतत्र हेतुमाह— अकेनेति । विरड्दृष्टिर्वागिति स्तोभे कार्येत्यत्र हेतुमाह— वैराज इति ॥ २ ॥

अनिरुक्तस्त्रयोदशः स्तोभः संचरो हुंकारः ॥ ३ ॥

अनिरुक्तोऽव्यक्तत्वादिदं चेदं चेति निर्वक्तुं न शक्यत इत्यतः संचरो विकल्प्यमानस्वरूप इत्यर्थः । कोऽसावित्याह— त्रयोदशः स्तोभो हुंकारः । अव्यक्तो ह्ययमतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्रायः ॥ ३ ॥

अनिरुक्तः कारणात्मा । तस्यानिरुक्तत्वं साधयति—अव्यक्तत्वादिति । स चानेकधा कार्यरूपेण संचरतीति संचरः । हुंकारोऽपि शाखभेदेन विकल्प्यमानस्वरूपत्रयोदशश्चायं वावेत्यारभ्य गम्यमानतश्च कारणदृष्ट्या हुंकारमुपासीतेत्यर्थः । उक्तमेवोपपादयति— अव्यक्तो हीति । तत्र विकल्प्यमानत्वं हेतुः ॥ ३ ॥

स्तोभाक्षरोपासनाफलमाह—

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवꣳ साम्नामुपनिषदं वेदोपनिषदं वेद ॥ ४ ॥

इति च्छान्दोग्योपनिषदि प्रथमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

इति च्छान्दोग्योपनिषद्ब्राह्मणे प्रथमोऽध्यायः समाप्तः ॥ १ ॥

दुग्धेऽस्मै वाग्दोहमित्याद्युक्तार्थम् । य एतामेवं यथोक्तलक्षणां साम्नां सामावयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतद्यथोक्तं फलमित्यर्थः । द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः । सामावयवविषयोपासनाविशेषपरिसमाप्त्यर्थो वेति ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये प्रथमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ छान्दोग्योपनिषद्विवरणे प्रथमोऽध्यायः समाप्तः ॥ १ ॥

---

१ ख. घ. ङ. °दं वेदं वेति । ग. ञ. ठ. °दं °वेदं । २ क. घ. ङ. ट. °कल्पमा° । ३ क. ग. ङ. ट. ठ. ड. ढ. °ह हुं° । ४ क. °कल्पमा° । ५ क. ट. वेदेति ॥ ४ ॥ ६ ग. घ. ङ. च. ट. ठ. ड. °नाथे° । ७ क. °प्त्यर्थ इतिशब्दः ॥ ४ ॥

नैतानि व्यस्तान्युपासनानि । प्रत्येकं फलश्रवणात् । समस्तं पुनरेकमिदमुपासनमेकफलत्वादित्यभिप्रेत्याऽऽह—स्तोभाक्षरेति । उपनिषदं वेदोपनिषदं वेदेत्यावृत्तेस्तात्पर्यमाह—द्विरभ्यास इति । प्रथमप्रपाठकव्याख्यानसमाप्तिरितिशब्दः ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिच्छांकरभाष्यटीकायां
प्रथमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

इति श्रीमत्परमहंसपरिव्राजकशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां
छान्दोग्यभाष्यटीकायां प्रथमोऽध्यायः समाप्तः ॥ १ ॥

(अथ द्वितीयाध्यायस्य प्रथमः खण्डः) ।

ओमित्येतदक्षरमित्यादिना सामावयवविषयमुपासनमनेकफलमुपदिष्टम् । अनन्तरं च स्तोभाक्षरविषयमुपासनमुक्तम् । सर्वथाऽपि सामैकदेशसंबद्धमेव तदिति । अथेदानीं समस्ते साम्नि समस्तसामविषयाण्युपासनानि वक्ष्यामीत्यारभते श्रुतिः । युक्तं ह्येकदेशोपासनानन्तरमेकदेशिविषयमुपासनमुच्यत इति ।

ॐ । समस्तस्य खलु साम्न उपासनꣳ साधु यत्खलु
साधु तत्सामेत्याचक्षते यदसाधु तदसामेति ॥ १ ॥

समस्तस्य सर्वावयवविशिष्टस्य पाञ्चभक्तिकस्य सप्तभक्तिकस्य चेत्यर्थः । खल्विति वाक्यालंकारार्थः । साम्न उपासनं साधु । समस्ते साम्नि साधुदृष्टिविधिपरत्वान्न पूर्वोपासननिन्दार्थत्वं साधुशब्दस्य । ननु पूर्वत्राविद्यमानं साधुत्वं समस्ते साम्न्यभिधीयते । न । साधु सामेत्युपास्त इत्युपसंहारात् । साधुशब्दः शोभनवाची । कथमवगम्यत इत्याह—यत्खलु लोके साधु शोभनमनवद्यं प्रसिद्धं तत्सामेत्याचक्षते कुशलाः । यदसाधु विपरीतं तदसामेति ॥ १ ॥

पूर्वोत्तरप्रपाठकयोः संगतिं दर्शयति—ओमित्येतदित्यादिना । सर्वथाऽपि सामावयवविषयत्वे स्तोभाक्षरविषयत्वे चेत्यर्थः । इतिशब्दो हेत्वर्थः । यस्मादेकदेश-

---

१ ख. घ. ञ. ठ. ञ. ढ. °दि सा° । २ ख. घ. ञ. ट. ठ. ढ. 'बन्धमे° । ३ ग. ट. 'रमनेकदेशवि° । ४ ख. घ. ङ. च. ज. °र्वोक्तोपा° ।

विषयाण्युपासनानि वृत्तानि तस्मात्तानि सनस्तविषयाणि वक्तव्यानीत्यर्थः । एकदेशोपात्तिव्याख्यानन्तर्यमथशब्दार्थः । कथमुक्तवक्ष्यमाणोपासनयोरिदं पौर्वापर्यं तत्राऽऽह—युक्तं हीति । समस्तस्योपासनं साध्विति वचनादवयवोपासनं निन्दितत्वादननुष्ठेयमित्याशङ्क्याऽऽह—समस्त इति । अर्थादस्ति निन्देति शङ्कते—नन्विति । पूर्वत्रापि साधुत्वस्य विद्यमानस्यैव विशेषणत्वेनानुपादानान्नार्थादपि निन्देति परिहरति—न साध्विति । यत्खल्वित्यादि व्याख्यातुं पातनिकामाह—साधुशब्द इति । वाक्यमवतार्य व्याचष्टे—कथमित्यादिना ॥ १ ॥

तदुताप्याहुः साम्नैनमुपागादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ॥ २ ॥

तत्तत्रैव साध्वसाधुविवेककरण उताप्याहुः—साम्नैनं राजानं सामन्तं चोपागादुपगतवान् । कोऽसौ । यतोऽसाधुत्वप्राप्त्याशङ्का स इत्यभिप्रायः । शोभनाभिप्रायेण स साधुनैनमुपागादित्येव तत्रांऽऽहुर्लौकिका बन्धनाद्यसाधुकार्यमपश्यन्तः । यत्र पुनर्विपर्ययो बन्धनाद्यसाधुकार्यं पश्यन्ति तत्रासाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहुः ॥ २ ॥

किं पुनरेवं विवेककरणे कारणमित्याशङ्क्याऽऽह—तत्तत्रेति । विवेककरणेऽपि भेदविकल्पार्थमुतेत्युभयत्र पदम् । साम्नैनमित्यादिना साधुनेत्यादिवाक्यस्य पौनरुक्त्यमाशङ्क्य व्याख्यानव्याख्येयभावान्नैवमित्याह—शोभनेति । शोभनकार्यदर्शने सतीति यावत् । तत्रैव हेत्वन्तरमाह—बन्धनादीति । असाम्नेत्यादि व्याचष्टे—यत्रेति ॥ २ ॥

अथोताप्याहुः साम नो बतेति यत्साधु भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवत्यसाधु बतेत्येव तदाहुः ॥ ३ ॥

अथोताप्याहुः स्वसंवेद्यं साम नोऽस्माकं बतेत्यनुकम्पार्थन्तः संवृत्तमित्याहुः । एतत्तैरुक्तं भवति यत्साधु भवति साधु बतेत्येव तदाहुः । विप-

---

१ ग. ट. °सनस्य निं° । २ घ. ठ. °त्रैवं सा° । ३ ङ. च. ङ. ढ. °न्तं वोपा° । ४ ख. ङ. ङ. ढ. °ख्येवं त° । ५ ख. ञ. °तदाहु° । ६ क. °र्थेयेण ब° । ७ ख. ङ. ञ. ङ. ड. °तापि । चाऽऽहुः । ८ क. ख. ञ. ण. °थतः सं° ।

र्यथे जातेऽसाम नो बतेति । यदसाधु भवत्यसाधु बतेत्येव तदाहुः । तस्मात्सामसाधुशब्दयोरेकार्थत्वं सिद्धम् ॥ ३ ॥

कार्यगम्यं साधुत्वमसाधुत्वं चोक्त्वा स्वानुभवगम्यं तदुपन्यस्यति—अथेति । कार्यात्तस्य साधुत्वादिविवेकानन्तर्यमथशब्दार्थः । स्वसंवेद्यं साधुत्वमसाधुत्वं चेति शेषः । तत्र साधुत्वं स्वानुभवसिद्धमित्येतद्व्युत्पादयति—सामेति । यत्साध्वित्यादिवाक्यस्य पूर्वेण पौनरुक्त्यमाशङ्क्याऽऽह—एतदिति । असामेत्यादि व्याचष्टे—विपर्यय इति । बतेत्याहुरिति संबन्धः । किं तैरुक्तं भवति तदाह—यदसाध्विति । साधुशब्दः शोभनवाचीत्युक्तमुपसंहरति—तस्मादिति ॥ ३ ॥

स य एतदेवं विद्वान्साधु सामेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो धर्मा आ च गच्छेयुरुप च नमेयुः ॥४॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अतः स यः कश्चित्साधु सामेति साधुगुणवत्सामेत्युपास्ते समस्तं साम साधुगुणवद्विद्वांस्तस्यैतत्फलमभ्याशो ह क्षिप्रं ह यदिति क्रियाविशेषणमर्थमेनमुपासकं साधवः शोभना धर्माः श्रुतिस्मृत्यविरुद्धा आ च गच्छेयुरागच्छेयुश्च । न केवलमागच्छेयुरुप च नमेयुरुपनमेयुश्च भोग्यत्वेनोपतिष्ठेयुरित्यर्थः ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य प्रथमः खण्डः ॥ १ ॥

तयोरेकार्थत्वमत्र शब्दार्थः । उपासकमेव विशिनष्टि—समस्तमिति । आगच्छेयुरिति यत्तत्क्षिप्रमेवेति क्रियाविशेषणत्वं यदित्यस्य द्रष्टव्यम् ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य प्रथमः खण्डः ॥ १ ॥

(अथ द्वितीयाध्यायस्य द्वितीयः खण्डः) ।

लोकेषु पञ्चविधꣳ सामोपासीत पृथिवी हिं-

---

१ च. ङ. °भ्याशः क्षिं° । २ क. ग. ट. ठ. °प्रैं यं° । ३ क. ङ. ङ. ढ. °मनध° । ४ ख. म. °युश्चाऽऽगच्छेयुर्न के° । ५ ख. ग. घ. च. ज. ट. ठ. °युश्च ।

कारः । अग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः
प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु ॥ १ ॥

कानि पुनस्तानि साधुदृष्टिविशिष्टानि समस्तानि सामान्युपास्यानीति । इमानि तान्युच्यन्ते लोकेषु पञ्चविधमित्यादीनि । ननु लोकादिदृष्ट्या तान्युपास्यानि साधुदृष्ट्या चेति विरुद्धम् । न । साध्वर्थस्य लोकादिकार्येषु कारणस्यानुगतत्वात् । मृदादिवद्घटादिविकारेषु । साधुशब्दवाच्योऽर्थो धर्मो ब्रह्म वा सर्वथाऽपि लोकादिकार्येष्वनुगतम् । अतो यथा यत्र घटादिदृष्टिर्मृदादिदृष्ट्यनुगतैव सा । तथा साधुदृष्ट्यनुगतैव लोकादिदृष्टिः । धर्मादिकार्यत्वाल्लोकादीनाम् । यद्यपि कारणत्वमविशिष्टं ब्रह्मधर्मयोः, तथाऽपि धर्म एव साधुशब्दवाच्य इति युक्तं साधुकारी साधुर्भवतीति धर्मविषये साधुशब्दप्रयोगात् । ननु लोकादिकार्येषु कारणस्यानुगतत्वादर्थप्राप्तैव तद्दृष्टिरिति साधु सामेत्युपास्त इति न वक्तव्यम् । न । शास्त्रगम्यत्वात्तद्दृष्टेः । सर्वत्र हि शास्त्रमाश्रिता एव धर्मा उपास्या न विद्यमाना अप्यशास्त्रीयाः ।

एकस्योभयदृष्टिविषयत्वमयुक्तम् । नहि घटदृष्टिगोचरः सन्मृदादेरपि गोचरः स्यादिति शङ्कते—नन्विति । एकस्मिन्नपि प्रस्तुतं दृष्टिद्वयमविरुद्धमिति समाधत्ते—न साध्वर्थस्येति । यथा घटादिषु मृदाद्यनुगतं तथा साधुशब्दार्थस्य कारणस्य लोकादिषु कार्येष्वनुगतत्वाद्दृष्टौ साधुदृष्टेरनुगमान्न दृष्टिद्वयस्यैकत्र विरोधोऽस्तीत्यर्थः । तदेव स्फुटयति—साधुशब्देति । साध्वर्थस्य लोकेष्वनुगतिरपिशब्दार्थः । यत्रेति देवदत्तोक्तिः । सा घटादिदृष्टिरतत्रेति शेषः । ननु साधुशब्दार्थयोर्धर्मब्रह्मणोस्तुल्यं कारणत्वम् । तथा चात्र साधुशब्दार्थो न व्यवस्थितः स्यादन्याय्यं चानेकार्थत्वमित्याशङ्क्याऽऽह—यद्यपीति । धर्म एवेत्यत्र तथाऽपीति च वक्तव्यम् । ब्रह्मणि तु परमानन्दे साधुशब्दो भक्त्या गमयितव्यः । न च धर्मस्य निमित्तकारणत्वान्न कार्येऽनुगतिरिति वाच्यम् । कर्मपूर्वसहितदधिपयःप्रभृत्यवयवसमुदायस्य धर्मत्वात्तत्कारणानां च कार्यस्य तत्र तदनुगतिनिर्देशेरिति द्रष्टव्यम् । अपूर्वाभावेन विधिमाक्षिपति—नन्विति । कारणानुगमस्याऽऽनुमानिकत्वेऽपि तद्दृष्टिः कारणमपूर्वमेवेति परि-

---

१ ङ. ढ. °स्यानीति सा° । २ ख. ङ. ञ. ड. °गतो । ३ क. °योः । ध° । ४ ख. घ. ङ. ञ. ड. °ति कार्यत्वि° । ढ. °ति कर्म° । ५ ङ. °मैकार्थ्वि° । ६ ढ. °त्वात्तद° । ७ क. ग. ट. ङ. ढ. °प्राप्त्यैव । ८ ख. ञ. °त्वमणीता । ९ ख. छ. झ. °र्थेका° । १० ख. छ. ञ. °ति ध° । ११ क. ग. ङ. कार्यानु° । १२ क. ख. छ. ञ. ट, ण. °कत्वम° ।

हरति—न शास्त्रगम्यत्वादिति । यश्चार्थादर्थो न स चोदनार्थ इति न्यायेनोक्तं विवृणोति—सर्वत्रेति ।

लोकेषु पृथिव्यादिषु पञ्चविधं पञ्चभक्तिभेदेन पञ्चप्रकारं साधु समस्तं सामोपासीत । कथम् । पृथिवी हिंकारः । लोकेष्विति या सप्तमी तां प्रथमात्वेन विपरिणमय्य पृथिवीदृष्ट्या हिंकारे पृथिवी हिंकार इत्युपासीत । व्यत्यस्य वा सप्तमीश्रुतिं लोकविषयां हिंकारादिषु पृथिव्यादिदृष्टिं कृत्वोपासीत तत्र पृथिवी हिंकारः । प्राथम्यसामान्यात् । अग्निः प्रस्तावः । अग्नौ हि कर्माणि प्रस्तूयन्ते । प्रस्तावश्च भक्तिः । अन्तरिक्षमुद्गीथः । अन्तरिक्षं हि गगनम् । गकारविशिष्टश्चोद्गीथः । आदित्यः प्रतिहारः । प्रतिपाण्यभिमुखत्वान्मां प्रति मां प्रतीति । द्यौर्निधनम् । दिवि निधीयन्ते हीतो गता इत्यूर्ध्वेषूर्ध्वगतेषु लोकदृष्ट्या सामोपासनम् ॥ १ ॥

लोकेष्वित्यादिवाक्ये पञ्चविधसामदृष्ट्या लोकानामुपास्यत्वप्रतीतेरत्रापि हिंकारदृष्ट्या पृथिव्या ध्येयत्वे प्राप्ते प्रत्याह—लोकेष्वतीति । लोकाः पञ्चविधं सामेत्युपासीतेति विभक्तिविपरिणामेन प्रथमवाक्यार्थपर्यवसानात्तदनुसारेणात्रापि पृथिवीदृष्ट्या हिंकारे ध्येये सति पृथिवी हिंकार इति पृथिवीदृष्टिमारोप्य हिंकारमुपासीतेति द्वितीयवाक्यं पर्यवस्यतीत्यर्थः । लोकसंबद्धा सप्तमीश्रुतिर्हिंकारादिषु तत्संबन्धा च द्वितीया लोकेषु नेतव्या । तथा च लोकविषया सप्तमी हिंकारादिषु तत्संबद्धा च द्वितीया लोकेषु व्यत्यस्य पृथिव्यादिदृष्टिं हिंकारादिषु कृत्वोपासीतेति पक्षान्तरमाह—व्यत्यस्येति । ब्रह्मदृष्टिरुत्कर्षादिति व्यायेन पक्षद्वयमुक्त्वा प्रतिवाक्यं व्याचष्टे—तत्रेति । उक्तरीत्याऽन्योपासने प्रस्तुते सतीति यावत् । अध्यासस्य सादृश्यनिबन्धनत्वाद्व्यक्तसादृश्याभावेऽपि यथाकथंचित्कल्पनीयमिति मत्वाऽऽह—प्राथम्येति । लोकेषु पृथिव्याः सामसु च हिंकार्यं च प्राथम्यमस्ति तस्मात्सामान्यादिति यावत् । अग्निदृष्ट्या प्रस्तावोपासने प्रस्तावत्वं सामान्यमाह—अग्नौ हीति । अन्तरिक्षदृष्ट्योद्गीथोपासने गकारसंबन्धसादृश्यं दर्शयति—अन्तरिक्षं हीति । आदित्यदृष्ट्या प्रतिहारोपास्तौ प्रतिशब्दसामान्यं हेतुमाह—प्रतिपाणीति । द्युदृष्ट्या निधनोपासने निधनत्वसामान्यमाह—दिवीति । उक्तमुपासनमुपसंहरति—इत्यूर्ध्वेष्विति ॥ १ ॥

---

१ क. ख. घ. ङ. ठ. ड. ढ. °णम्य° पृ° । २ क. ग. च. ट. °थिव्या ह° । ३ क. ग. ट. ठ. °समी श्रु° । ४ ग. ङ. ढ. °रिक्षे हि गान° । ५ क. ग. ट. °षूर्ध्वे ग° । ६ क. ग. ट. °स्य प्रा° । ७ ख. छ. झ. ट. °ति ऊर्ध्वेगतेष्विति ।

अथाऽऽवृत्तेषु यौंहिंकार आदित्यः प्रस्तावोऽन्तरि-
क्षमुद्गीथोऽग्निः प्रतिहारः पृथिवी निधनम् ॥ २ ॥

अथाऽऽवृत्तेष्ववाङ्मुखेषु पञ्चविधमुच्यते सामोपासनम् । गत्यागतिविशिष्टा हि लोकाः । यथा ते तथादृष्ट्यैव सामोपासनं विधीयते यतोऽत आवृत्तेषु लोकेषु । द्यौर्हिंकारः प्राथम्यात् । आदित्यः प्रस्तावः । उदिते ह्यादित्ये प्रस्तूयन्ते कर्माणि प्राणिनाम् । अन्तरिक्षमुद्गीथः पूर्ववत् । अग्निः प्रतिहारः । प्राणिभिः प्रतिहरणादग्नेः । पृथिवी निधनम् । तत आगतानामिह निधनात् ॥ २ ॥

अथाऽऽवृत्तेष्विति वाक्यं व्याकरोति—अथेति । पृथिवीमुख्येषु द्युपर्यन्तेषु पञ्चविधसामोपासनकथनानन्तर्यमथशब्दार्थः । पूर्वोत्तरग्रन्थयोर्मिथो विरोधं शङ्कित्वा परिहरति—गत्यागतीति । यथा वा ते गतिविशिष्टास्तथादृष्ट्यैव हिंकाराद्युपासनं विहितम् । यथा चाऽऽगतिविशिष्टास्ते तथादृष्ट्यैव तदुपासनं विधीयते । तथा च शास्त्रानुसारेण क्रियमाणयोरुपासनयोर्न विरोधोऽस्तीत्यर्थः । द्विधोपास्तिविषयसंदर्भयोर्विरोधाभावमनूद्य फलितमुपासनं दर्शयति—यत इति । द्युलोकदृष्ट्या हिंकारस्योपास्यत्वे हेतुमाह—प्राथम्यादिति । आवृत्तौ द्युलोकस्याऽऽरम्भे च हिंकारस्य प्राथम्यं द्रष्टव्यम् । आदित्यदृष्ट्या प्रस्तावस्योपास्यत्वे हेतुमाह—उदित इति । पूर्ववदिति गकाराक्षरसामान्यं विवक्षितम् । अग्निदृष्ट्या प्रतिहारोपास्तौ हेतुमाह—प्राणिभिरिति । प्रतिहरणमितस्ततो नयनम् ॥ २ ॥

कल्पन्ते हास्मै लोका ऊर्ध्वाश्चाऽऽवृत्ताश्च य एत-
देवं विद्वाँल्लोकेषु पञ्चविधं सामोपास्ते ॥ ३ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य द्वितीयः खण्डः ॥२॥

उपासनफलं—कल्पन्ते समर्था भवन्ति हास्मै लोका ऊर्ध्वाश्चाऽऽवृत्ताश्च गत्यागतिविशिष्टा भोग्यत्वेन व्यवतिष्ठन्त इत्यर्थः । य एतदेवं विद्वाँल्लोकेषु पञ्चविधं समस्तं साधु सामेत्युपास्त इति सर्वत्र योजना पञ्चविधे सप्तविधे च ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

---

१ ख. ग. ङ. 'दित आदि' । २ क. 'द्विविधो' । ग. ट. द्वित्वोपा' ।

साध्वितिपदं सर्वत्र द्रष्टव्यमित्याह—इति सप्तमेति । सप्तमेत्यस्य व्याख्या—पञ्चविध इत्यादि ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

(अथ द्वितीयाध्यायस्य तृतीयः खण्डः) ।

वृष्टौ पञ्चविध॰ सामोपासीत पुरोवातो हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्यो-तते स्तनयति स प्रतिहारः ॥ १ ॥

वृष्टौ पञ्चविधं सामोपासीत । लोकस्थितेर्वृष्टिनिमित्तत्वादानन्तर्यम् । पुरो-वातो हिंकारः । पुरोवातादुद्ग्रहणान्ता हि वृष्टिः । यथा साम हिंकारादिनि-धनान्तम् । अतः पुरोवातो हिंकारः । प्राथम्यात् । मेघो जायते स प्रस्तावः । प्रावृषि मेघजनने वृष्टेः प्रस्ताव इति हि प्रसिद्धिः । वर्षति स उद्गीथः । श्रे-ष्ठ्यात् । विद्योतते स्तनयति स प्रतिहारः । प्रतिहृतत्वात् ॥ १ ॥

नन्वु लोकदृष्ट्या सामोपास्त्यनन्तरं किमिति वृष्टिदृष्ट्या तदुपास्तिरुपन्यस्यते तत्राऽऽह—लोकस्थितेरिति । पुरोवातदृष्ट्या हिंकारोपासने हेतुमाह—पुरोवा-तादीति । उद्ग्रहणं वर्षोपसंहरणम् । अतःशब्दार्थमाह—प्राथम्यादिति । मेघ-जन्मदृष्ट्या प्रस्तावोपास्तौ हेतुमाह—प्रावृषीति । वर्षणदृष्ट्योद्गीथोपासने हेतुमाह—श्रेष्ठ्यादिति । विद्योतनस्तनयित्नुदृष्ट्या प्रतिहारोपासने कारणमाह—प्रतिहृत-त्वादिति । विद्युतां स्तनयित्नूनां च प्रतिहृतत्वं विप्रकीर्णत्वं तेन प्रतिशब्दसादृश्या-द्विद्योतनादिदृष्ट्या कर्तव्या प्रतिहारोपास्तिरित्यर्थः ॥ १ ॥

उद्गृह्णाति तन्निधनं वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पञ्चविध॰ सामोपास्ते ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

उद्गृह्णाति तन्निधनम् । समाप्तिसामान्यात् । फलमुपासनस्य—वर्षति

---

१ क. ख. ङ. मेघोपज॰ । २ घ. ङ. °ति प्र॰ । ३ ङ. घ. °त् । युदुद्ग्र॰ । ४ क. °सनहे॰ ।

इत्स्मा इत्थात: ॥ तथा वर्षयति इत्सत्यामपि वृष्टौ । य एतदित्यादि पूर्ववत् ॥ २ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

उद्ग्रहणदृष्ट्या निधनोपासने निदानमाह—समाप्नोतीति । वर्षति पर्जन्ये तदुपमन्तृत्वमकिंचित्करमित्याशङ्क्याऽऽह—असत्यामपीति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

(अथ द्वितीयाध्यायस्य चतुर्थः खण्डः)।

सर्वास्वप्सु पञ्चविधꣳ सामोपासीत मेघो यत्सं-
प्लुवते स हिंकारो यद्वर्षति स प्रस्तावो याः प्राच्यः
स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः
समुद्रो निधनम् ॥ १ ॥

सर्वास्वप्सु पञ्चविधं सामोपासीत । दृष्टिपूर्वकत्वात्सर्वासामपामानन्तर्यम् । मेघो यत्संप्लवत एकीभावेनेतरेतरं घनी भवति मेघो यदोऽतस्तदा संप्लुवत इत्युच्यते मेघस्तदाऽपामारम्भः स हिंकारः । यद्वर्षति स प्रस्तावः । आपः सर्वतो व्याप्तुं प्रस्तुताः । याः प्राच्यः स्यन्दन्ते स उद्गीथः । श्रैष्ठ्यात् । याः प्रतीच्यः स प्रतिहारः । प्रतिशब्दसामान्यात् । समुद्रो निधनम् । तन्नित्यत्वादपाम् ॥ १ ॥

किमिति वृष्टिदृष्टेरनन्तरमपां दृष्टिः साग्नि क्षिप्यते तत्राऽऽह—वृष्टिपूर्वकत्वादिति । मेघसंप्लवदृष्ट्या हिंकारमारम्भसामान्यादुपासीतेत्याह—मेघ इति । वर्षदृष्ट्या प्रस्तावस्योपास्यत्वे हेतुमाह—आप इति । प्राच्यो नद्यो गङ्गाद्याः । प्रतीच्यस्तु नर्मदाद्या इति भेदः ॥ १ ॥

न हाप्सु प्रैत्यप्सुमान्भवति य एतदेवं विद्वान्सर्वा-
स्वप्सु पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति छान्दोग्योपनिषदि द्वितीयाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

---

१ क. °देवता वो तदा । ङ. च. ङ. ढ. अदृतं° ।

न ह्याप्सु मैति । नेच्छति चेत् । अप्सुमानम्मान्भवति फलम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

तर्हि गङ्गादावपेक्षितमपि मरणं न स्यादिति चेत्तत्राऽऽह—नेच्छति चेदिति । असावुपासको मरुस्थलीष्वपि यथेच्छमुदकवान्भवतीत्यर्थः ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

(अथ द्वितीयाध्यायस्य पञ्चमः खण्डः) ।

ऋतुषु पञ्चविधꣳ सामोपासीत वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम् ॥ १ ॥

ऋतुषु पञ्चविधं सामोपासीत । ऋतुव्यवस्थाया यथोक्तान्निमित्तत्वादानन्तर्यम् । वसन्तो हिंकारः । प्राथम्यात् । ग्रीष्मः प्रस्तावः । यवादिसंग्रहः प्रस्तूयते हि प्रावृडर्थम् । वर्षा उद्गीथः । प्राधान्यात् । शरत्प्रतिहारः । रोगिणां मृतानां च प्रतिहरणात् । हेमन्तो निधनम् । निवाते निधनात्प्राणिनाम् ॥ १ ॥

किमिति सलिलदृष्ट्यनन्तरमृतुदृष्टिः सॉम्न्यारोप्यते तत्राऽऽह—ऋतुव्यवस्थाया इति ॥ १ ॥

कल्पन्ते हास्मा ऋतव ऋतुमान्भवति य एतदेवं विद्वानृतुषु पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

फलं—कल्पन्ते इ ऋतुव्यवस्थानुरूपं भोग्यत्वेनास्मा उपासकायर्तवः । ऋतुमानार्तवैर्भोगैश्च संपन्नो भवतीत्यर्थः ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

---

१ क. ग. घ. च. ट. ठ. °मान्भ° । २ ख. ग. घ. ञ. ट. ठ. °थोक्तोपास्तिनिमि° । ३ क. ख. ङ. ठ. निधाना° । ४ ख. ग. ञ. सामन्यारो° ।

ऋतुव्यवस्थानुरूपं तत्र क्रियाविशेषणम् । कस्यचिदनुपासितुरपि क्रमेण तत्तद्-ऋतुफलभोगभागितोपपत्तेर्नेदमुपासनानुरूपं फलमित्याशङ्क्याऽऽह—ऋतुमानिति । संपन्नः सर्वदा स्वेच्छावशादिति शेषः ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

(अथ द्वितीयाध्यायस्य षष्ठः खण्डः) ।

पशुषु पञ्चविधꣳ सामोपासीताजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनम् ॥ १ ॥

पशुषु पञ्चविधं सामोपासीत । सम्यग्वृत्तेष्वृतुषु पशव्यः काल इत्यानन्त-र्यम् । अजा हिंकारः । प्राधान्यात्प्राथम्याद्वा । अजः पशूनां प्रथम इति श्रुतेः । अवयः प्रस्तावः । साहचर्यदर्शनाद्[3]जादीनाम् । गाव उद्गीथः । श्रेष्ठ्यात् । अश्वाः प्रतिहारः । प्रतिहरणात्पुरुषाणाम् । पुरुषो निधनम् । पुरुषाश्रय-त्वात्पशूनाम् ॥ १ ॥

ऋतुदृष्टचनन्तरं साम्नि पशुदृष्टचारोपकारणमाह—सम्यगिति । अजादृष्ट्या हिंकारोपासने हेतुद्वयमाह—प्राधान्यादित्यादिना । अजाया यज्ञसंबन्धात्प्राधा-न्यम् । प्राथम्यं तु प्रथमपाठादिति द्रष्टव्यम् । ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्ते मुख्या मुखतो ह्यसृज्यन्तेति श्रुतिरजाप्राधान्ये प्रमाणयति—अज इति । तस्माज्जाता अजावय इति श्रुतेरजानामवीनां च साहचर्यं हिंकारप्रस्तावयोश्च साह-चर्यं प्रसिद्धम् ॥ १ ॥

भवन्ति हास्य पशवः पशुमान्भवति य एतदेवं वि-द्वान्पशुषु पञ्चविधꣳ सामोपास्ते ॥ २ ॥

इति छान्दोग्योपनिषदि द्वितीयाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

फलं—भवन्ति हास्य पशवः पशुमान्भवति । पशुफलैश्च भोगैत्यागादि-भिर्युज्यत इत्यर्थः ॥ २ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

---

१ ग. ट. तत्क्रिया° । २ क. ङ. ढ. °चर्यादजानाम् । ३ ख. ञ ङ. °नात् । गा° । ४ ट. °रोपे का° । ५ ङ. च. °गथागा° ।

पशुमान्भवतीत्यस्य पूर्वेण पौनरुक्त्यं परिहरति—पशुफलेत्येति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

(अथ द्वितीयाध्यायस्य सप्तमः खण्डः)।

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत प्राणो हिं-कारो वाक्प्रस्ताक्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयाꣳसि वा एतानि ॥ १ ॥

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत । परंपरं वरीयस्त्वगुणवत्प्राण-दृष्टिविशिष्टं सामोपासीतेत्यर्थः । प्राणो घ्राणं हिंकारः । उत्तरोत्तरवरीयसां प्रथमत्वात् । वाक्प्रस्तावः । वाचा हि प्रस्तूयते सर्वम् । वाग्वरीयसी प्राणात् । अमत्वमुच्यते वाचा प्राप्तस्यैव तु गन्धस्य ग्राहकः घ्राणः । चक्षुरुद्गीथः । वाचो बहुतरविषयं प्रकाशयति चक्षुरतो वरीयो वाचः उद्गीथः । श्रैष्ठ्यात् । श्रोत्रं प्रतिहारः । प्रतिहृतत्वात् । वरीयश्चक्षुषः सर्वतः श्रवणात् । मनो निधनम् । मनसि हि निधीयन्ते पुरुषस्य भोग्यत्वेन सर्वेन्द्रियाहृता विषयाः । वरीयस्त्वं च श्रोत्रान्मनसः । सर्वेन्द्रियविषयव्यापकत्वात् । अतीन्द्रियविषयेऽपि मनसो मोचर एवेति । यथोक्तहेतुभ्यः परोवरीयाꣳसि प्राणादीनि वा एतानि ॥ १ ॥

पशुप्रसूतपयोघृतादिनिमित्तत्वात्प्राणस्थितेस्तदृष्ट्यनन्तरं प्राणदृष्ट्या सामोपासितं प्रस्तौति—प्राणेष्विति । प्राणशब्दस्य मुख्यप्राणविषयत्वं व्यावर्तयति—घ्राणमिति । मुख्यप्राणादुत्तरेषां वरीयस्त्वासंभवात्तस्य सर्वश्रेष्ठतया निर्धारितत्वात्परंपरं वरीयसां वागादीनां मध्ये प्रथमभाक्त्वेनोक्तत्वाद्घ्राणमत्राप्र प्राणशब्देनेत्यर्थः । कथं प्राणाद्वाचो वरीयस्त्वं तत्राऽऽह—वाचेति । अमत्वं व्यवहितत्वम् । चक्षुषो वरीयस्त्वं समर्थयति—वाच इति । शब्दस्येति यावत् । वाचः शब्दात्सकाशादित्यर्थः । उद्गीथत्वे चक्षुषो हेतुमाह—श्रैष्ठ्यादिति । मनसो वरीयस्त्वे हेत्वन्तरमाह—अतीन्द्रि-

---

१ ख. ना. °णदृष्टिव°। २ क. ग. घ. ट. ठ. प्राणो । ३ ख. ङ. न. ङ. ढ. °प्राप्तं तुच्य°। ४ क. ग. घ. ङ. ट. ठ. ड. ढ. °णः । वा° । ५ ख. ञा. °तरं वि° । ६ क. ग. घ. ट. °हृतवि° । ७ ङ. °व्यापारत्वा° । ८ ख. न. °सि प्राणा° । ९ क. छ. प्राण इति । १० ख. ञ. °च्ये पृथग्भावि° । ११ क. °ण एवा° । १२ क. °ऽद इत्य° ।

येति । इति वरीयस्त्वमिति पूर्वेण संबन्धः । अप्राप्तमप्युच्यते वाचेत्यादयो यथोक्तहेतवः ॥ १ ॥

परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्प्राणेषु पञ्चविधं परोवरीयः सामोपास्त इति तु पञ्चविधस्य ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

एतद्दृष्ट्या विशिष्टं[1] यः परोवरीयः सामोपास्ते परोवरीयो हास्य[2] जीवनं भवतीत्युक्तार्थमिति तु पञ्चविधस्यं[3] साम्न उपासनमुक्तमिति सप्तविधे वक्ष्यमाणविषये बुद्धिसमाधानार्थम् । निरपेक्षो हि पञ्चविधे वक्ष्यमाणे बुद्धिं समाधित्सति ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य सप्तमः खण्डः । ७ ॥

उक्तोपसंहारविरहेऽपि वक्ष्यमाणे बुद्धिसमाधानं किं न स्यादित्याशङ्क्याऽऽह— निरपेक्षो हीति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

(अथ द्वितीयाध्यायस्याष्टमः खण्डः) ।

अथ सप्तविधस्य वाचि सप्तविधꣳ सामोपासीत यत्किंच वाचो हुमिति स हिंकारो यत्प्रेति स प्रस्तावो यदेति स आदिः ॥ १ ॥

अथानन्तरं सप्तविधस्य समस्तस्य साम्न उपासनं साध्विदमारभ्यते । वाचीति सप्तमी पूर्ववत् । वाग्दृष्टिविशिष्टं सप्तविधं सामोपासीतेत्यर्थः । यत्किंच वाचः शब्दस्य हुमिति यो विशेषः स हिंकारो हकारसामान्यात् । यत्प्रेति शब्दरूपं स प्रस्तावः प्रसामान्यात् । यत्—आ, इति स आदिः । आकारसामान्यात् । आदिरित्योंकारः । सर्वादित्वात् ॥ १ ॥

अधिकसंख्याज्ञानस्याल्पसंख्याज्ञानपूर्वकत्वात्पञ्चविधोपासनानन्तरं सप्तविधोपासनं

---

१ अ. ड. °ष्टं प° । २ ड. °स्य समस्तस्य सा° । ३ ग. च. ट. ड. °धे च व° ।

प्रस्तौति—अथेति । पूर्ववल्लोकेष्विवेतिवत्सप्तमी च नेतव्येत्यर्थः । वाक्शब्देन शब्दसामान्यमुच्यते तत्सप्तधाप्रविभक्तसामावयवेष्वारोप्योपासनं कर्तव्यमिति वाक्यार्थमाह—वाग्दुहीति । यत्किंच व.च इति वाक्योपादानं तस्यार्थमाह—शब्दस्येति ॥ १ ॥

यदुदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदु-
पेति स उपद्रवो यन्नीति तन्निधनम् ॥ २ ॥

यदुदिति स उद्गीथः । उत्पूर्वत्वादुद्गीथस्य । यत्प्रतीति स प्रतिहारः । प्रतिसामान्यात् । यदुपेति स उपद्रव उपोपक्रमत्वादुपद्रवस्य । यन्नीति तन्निधनम् । निशब्दसामान्यात् ॥ २ ॥

॥ २ ॥

दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो
भवति य एतदेवं विद्वान्वाचि सप्तविधꣳ सामो-
पास्ते ॥ ३ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्याष्टमः खण्डः ॥ ८ ॥

दुग्धेऽस्मा इत्याद्युक्तार्थम् ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्याष्टमः खण्डः ॥८॥

॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
द्वितीयाध्यायस्याष्टमः खण्डः ॥ ८ ॥

(अथ द्वितीयाध्यायस्य नवमः खण्डः) ।

अथ खल्वमुमादित्यꣳ सप्तविधꣳ सामोपासीत
सर्वदा समस्तेन साम मां प्रति मां प्रतीति
सर्वेण समस्तेन साम ॥ १ ॥

अवयवमात्रे सामन्यादित्यदृष्टिः पञ्चविधेषूक्ता प्रथमे चाध्याये । अथेदानीं खल्वमुमादित्यं समस्ते सामन्यवयवविभागशोऽध्यस्य सप्तविधं सामोपासीत । कथं पुनः सामत्वमादित्यस्येति । उच्यते । उद्गी-

त्वे हेतुवदादित्यस्य सामत्वे हेतुः । कोऽसौ, सर्वदा समो वृद्धिक्षयाभावा-
त्तेन हेतुना सामाऽऽदित्यो मां प्रति मां प्रतीति तुल्यां बुद्धिमुत्पादयति ।
अतः सर्वेण समोऽतः साम समत्वादित्यर्थः । उद्गीथभक्तिसामान्यवचनादेव
लोकादिषूक्तसामान्याद्धिंकारादित्वं गम्यत इति हिंकारादित्वे कारणं नोक्त-
म् । सामत्वे पुनः सवितुरनुक्तं कारणं न सुबोधमिति समत्वमुक्तम् ॥ १ ॥

वाग्दृष्टेरनन्तरमादित्यदृष्टिर्विधीयते । तस्य वाङ्मयत्वात् । न च तद्विधानं युक्त-
म् । पूर्वमप्यादित्यदृष्टिर्विशिष्टोपासनस्योपदिष्टत्वादित्याशङ्क्याऽऽह—अवयवमात्र
इति । तस्य सामत्वे हेतुं पृच्छति—कथमिति । सर्वदेत्यादिवाक्यमुत्तरत्वेनाऽऽद-
त्ते—उच्यत इति । उच्चै. सन्तमादित्यं गायन्तीत्यादित्यस्योद्गीथत्वे हेतुः श्रुत्यो
क्तः । तथा सामत्वेऽपि तस्य हेतुरुच्यत इत्यर्थः । तमेव प्रश्नपूर्वकं विवृणोति—
कोऽसाविति । नोदेता नास्तमेतेत्यादिदर्शनादित्यर्थः । मां प्रतीत्यादि व्याचष्टे—
मां प्रतीति । अन्यशब्दस्यान्यत्र वृत्तिर्नान्तरेण किंचिन्निमित्तमित्यादित्यस्य सामत्वे
हेतुरुच्यते चेत्तद्भेदानां हिंकारादित्वेऽपि कुतो निमित्तं श्रुत्या नोक्तमित्याशङ्क्याऽऽ-
ह—उद्गीथेति । आदित्यस्योद्गीथेन सहोर्ध्वत्वं सामान्यं श्रुत्योक्तं तदनुसारेणास्म-
दुक्तप्राथम्यादिसामान्यं यथा पृथिव्यादिषु हिंकारादित्वं गम्यते तथाऽऽदित्यप्रभेदाना-
मपि हिंकारादित्वं शक्यावगमामिति श्रुत्या तेषां तद्भावे नोक्तं कारणमित्यर्थः । तर्हि
सामत्वेऽपि कारणोत्प्रेक्षासंभवान्न वक्तव्यं कारणमित्याशङ्क्याऽऽह—सामत्वे पुन-
रिति । समत्वं तत्र निमित्तमिति यावत् ॥ १ ॥

तस्मिन्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्या-
त्तस्य यत्पुरोदयात्स हिंकारस्तदस्य पशवोऽन्वाय-
त्तास्तस्मात्ते हिं कुर्वन्ति हिंकारभाजिनो ह्येतस्य
साम्नः ॥ २ ॥

तस्मिन्नादित्येऽवयवविभागश इमानि वक्ष्यमाणानि सर्वाणि भूतान्यन्वाय-
त्तान्यनुगतान्यादित्यमुपजीव्यत्वेनेति विद्यात् । कथं, तस्याऽऽदित्यस्य यत्पुरो-
दयाद्धर्मरूपं स हिंकारो भक्तिस्तत्रेदं सामान्यं यत्तस्य हिंकारभक्तिरूपं तद-
स्याऽऽदित्यस्य साम्नः पशवो गवादयोऽन्वायत्ता अनुगतास्तद्भक्तिरूपमुपजी-
वन्तीत्यर्थः । यस्मादेवं तस्मात्ते हिं कुर्वन्ति पशवः प्रागुदयात् । तस्माद्धिंकार-

---

१ घ. ङ. ङ. °थत्वहे° । २ ख. ञ. °द्धिलया° । ३ ख. घ. ङ. छ. ञ. °ति वा तु° ।
४ ङ. ढ. °थसा° । ५ ख. छ. ञ. °शिष्टस्योपा° । ६ ख. छ. ञ. °र्ध्वत्वसा° ।

भाजिनो ह्येतस्याऽऽदित्याख्यस्य साम्नस्तद्भक्तिभजनशीलत्वाद्धि[1] ते पूर्वं वर्तन्ते ॥ २ ॥

समः सर्वेणेत्युक्तं व्यक्तीकरोति—तस्मिन्निति । वेदनप्रकारं प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । धर्मरूपं सुखकरत्वात् । धर्मकार्यात्मकं रूपमिति यावत् । तदृष्ट्या हिंकारोपासने प्राथम्यं हेतुः । पशवो यथोक्तमादित्यरूपमुपजीवन्तीत्यत्र किं प्रमाणं तदाह—यस्मादिति । तेषां हिंकरणं साधयति—तस्मादित्यादिना । तद्भक्तिभजनशीलत्व दित्यस्मात्प्रागेव तस्मादित्यस्य संबन्धः ॥ २ ॥

अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशꣳसाकामाः प्रस्तावभाजिनो ह्येतस्य साम्नः ॥ ३ ॥

अथ यत्प्रथमोदिते सवितृरूपं तदस्याऽऽदित्याख्यस्य साम्नः[3] स प्रस्तावस्तदस्य मनुष्या अन्वायत्ताः पूर्ववत् । तस्मात्ते प्रस्तुतिं प्रशंसां कामयन्ते[4] । यस्मात्प्रस्तावभाजिनो ह्येतस्य साम्नः ॥ ३ ॥

सवितरि प्रथमोदिते सति यत्तस्य रूपं तदृष्ट्या प्रस्तावस्योपास्यत्वे पूर्वस्मादानन्तर्ये हेतुः । यथोदयात्प्राचीनं रूपं पशुभिरुपजीव्यते तथेत्याह—पूर्ववदिति । उदयात्पराचीनमादित्यरूपं मनुष्या उपजीवन्तीत्यत्र लिङ्गमाह—तस्मादिति । प्रत्यक्षपरोक्षभावेन प्रस्तुतिप्रशंसयोर्भेदः ॥ ३ ॥

अथ यत्संगववेलायाꣳ स आदिस्तदस्य वयाꣳस्यन्वायत्तानि तस्मात्तान्यन्तरीक्षेऽनारम्बणान्यादायाऽऽत्मानं परिपतन्त्यादिभाजीनि ह्येतस्य साम्नः ॥ ४ ॥

अथ यत्संगववेलायां[5] गवां[6] रश्मीनां संगमनं संगमो यस्यां वेलायां गवां[7] वा वर्त्मभिः[8] सा संगववेला तस्मिन्काले यत्सावित्रं रूपं स आदिर्भक्तिविशेष ओंकारस्तदस्य वयांसि पक्षिणोऽन्वायत्तानि । यत एवं

---

१ ख. घ. ङ. ञ. ट. ठ. ड. ढ. °शीलो हि ते व° । २ क. ग. ट. °रूपत्वं सु° । ३ ख. ङ. ञ. ट. ढ. °म्नः प्र° । ४ क. ख. ञ. ड. ढ. °न्ते तस्मा° । ५ ख. ञ. °क्षेणाऽऽर° । ६ क. ग. घ. ङ. च. ट. ठ. ढ. °गवो य° । ७ क. च. °वां व° । ८ क. ख. ग. च. ञ. ट. ठ. °र्त्मभिः सह सं.° ।

तस्मात्तानि वयांस्यन्तरिक्षेऽनारम्बणान्यनालम्बनान्यात्मानमाद्याऽऽत्मानमेवाऽऽलम्बनत्वेन गृहीत्वा परिपतन्ति गच्छन्त्यत आकारसामान्यादादिभक्तिभाजीनि ह्येतस्य साम्नः ॥ ४ ॥

गोशब्दवाच्यानां रश्मीनां जगन्मण्डलेन संगमनं संबन्धगमनमित्यर्थः । वत्सैः संगमनमिति संबन्धः । संगवकालीनमादित्यरूपमारोप्याऽऽदिभक्तेरोंकारस्योपास्यत्वे द्वयोराकारसामान्यं हेतुः । पक्षिणां यथोक्तमादित्यरूपमुपजीव्यमित्यत्र हेतुमाह—यत्र इति ॥ ४ ॥

अथ यत्सप्रति मध्यदिने स उद्गीथस्तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः ॥ ५ ॥

अथ यत्संप्रति मध्यंदिन ऋजुमध्यंदिन इत्यर्थः । स उद्गीथभक्तिस्तदस्य देवा अन्वायत्ताः । द्योतनातिशयात्तत्काले । तस्मात्ते सत्तमा विशिष्टतमाः प्राजापत्यानां प्रजापत्यपत्यानामुद्गीथभाजिनो ह्येतस्य साम्नः ॥ ५ ॥

ऋजुमध्यंदिने यदादित्यस्य रूपं तदृष्टयोद्गीथोपासने श्रैष्ठ्यं हेतुः । तत्कालीनादित्यरूपस्य देवोपजीव्यत्वे हेतुमाह—द्योतनेति । तथाऽपि तस्य देवैरुपजीव्यत्वं कथमिति चेत्तत्राऽऽह— तस्मादिति ॥ ५ ॥

अथ यदूर्ध्वं मध्यंदिनात्पागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः ॥ ६ ॥

अथ यदूर्ध्वं मध्यंदिनात्पागपराह्णाद्यद्रूपं सवितुः स प्रतिहारस्तदस्य गर्भा अन्वायत्ताः । अतस्ते सवितुः प्रतिहारभक्तिरूपेणोर्ध्वं प्रतिहृताः सन्तो नावपद्यन्ते नाधः पतन्ति । तद्द्वारे सत्यर्वीत्यर्थः । यतः प्रतिहारभाजिनो ह्येतस्य साम्नो गर्भाः ॥ ६ ॥

अथ यदूर्ध्वमिति वाक्यमादाय व्याचष्टे—मध्यंदिनादिति । तद्दृष्टया प्रतिहारोपासने प्रतिशब्दसामान्यं हेतुः । तस्मिन्काले सवितुरस्तं गिरिं प्रति हरणात् । यथोक्त

---

१ ख. ङ. च. ञ. ङ. °क्षेणान्तरिक्ष आरम्बणान्याल° । २ ग. °दिने सवितुर्मध्यं । ३ क. ग. घ. ङ ट. ठ. ड. ढ. °न्ति द्वारे । ४ क. ग. ढ. °साम्यं हे ।

मादित्यरूपं गर्भैरुपजीव्यमित्यत्र गमकमाह— अत्र इति । ऊर्ध्वं योनेरुपरिष्टाज्जठरं प्रतीत्यर्थः । यतो गर्भाः पूर्वोक्तविशेषणवन्तोऽत इति यावत् । तद्द्वारं पतनद्वारम् ॥ ६ ॥

अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्याऽऽरण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षꣳ श्वभ्रमित्युपद्रवन्त्युपद्रवभाजिनो ह्येतस्य साम्नः ॥७॥

अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवस्तदस्याऽऽरण्याः पशवोऽन्वायत्ताः । तस्मात्ते पुरुषं दृष्ट्वा भीताः कक्षमरण्यं श्वभ्रं भयशून्यमित्युपद्रवन्त्युपगच्छन्ति दृष्ट्वोपद्रवणादुपद्रवभाजिनो ह्येतस्य साम्नः ॥ ७ ॥

तत्र तत्कालीनादित्यदृष्ट्योपद्रवमुपासीत तस्य तदाऽस्तशैलं प्रत्युपद्रवणादित्याह— अथेति । आरण्यानां पशूनां स्वयंकरूपोपजीवनमुपपादयति— तस्मादित्यादिना । श्वभ्रं गर्तं गुहेति यावत् ॥ ७ ॥

अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्न एवं खल्वमुमादित्यꣳ सप्तविधꣳ सामोपास्ते ॥८॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य नवमः खण्डः ॥ ९ ॥

अथ यत्प्रथमास्तमितेऽदर्शनं जिगमिषति सवितरि तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति पितृपितामहप्रपितामहरूपेण दर्भेषु निक्षिपन्ति तांस्तदर्थं पिण्डान्वा स्थापयन्ति । निधनसंबन्धान्निधनभाजिनो ह्येतस्य साम्नः पितरः । एवंमवयवशः सप्तधा विभक्तं खल्वमुमादित्यं सप्तविधं सामोपास्ते यस्तस्य तदापत्तिः फलमिति वाक्यशेषः ॥ ८ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य नवमः खण्डः ॥ ९ ॥

तत्सवितृरूपमिति शेषः । तद्दृष्ट्या निधनोपासने समाधिसामान्यं हेतुः । यथेक्तमादित्यरूपं पितृभिरुपजीव्यमित्यत्र गमकमाह—तस्मादित्यादिना । तत्र तत्राथशब्द-

---

१ ख. ङ. च. ज. ढ. °वभेदाव° । २ ख. ङ. ञ. ढ. °स्ते तस्य ।

स्तत्तदुपासनानन्तर्यार्थो व्याख्येयः । एवं खल्वित्यादिवाक्यमपेक्षितं पूरयन्व्याकरोति—एवमिति ॥ ८ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य नवमः खण्डः ॥ ९ ॥

(अथ द्वितीयाध्यायस्य दशमः खण्डः) ।

मृत्युरादित्यः । अहोरात्रादिकालेन जगतः प्रमापयितृत्वात्तस्यातितरणायेदं सामोपासनमुपदिश्यते—

अथ खल्वात्मसंमितमतिमृत्यु सप्तविधꣳ सामोपासीत हिंकार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्सममꣳ ॥ १ ॥

अथ खल्वनन्तरम् । आदित्यमृत्युविषयसामोपासनस्याऽऽत्मसंमितं स्वावयवतुल्यतया मितं परमात्मतुल्यतया वा संमितमतिमृत्यु मृत्युजयहेतुत्वात् । यथाऽथर्वभेऽध्याय उद्गीथभक्तिनामाक्षराण्युद्गीथ इत्युपास्यत्वेनोक्तानि, तथेह साम्नः सप्तविधभक्तिनामाक्षराणि समाहृत्य त्रिभिस्त्रिभिः समतया सामत्वं परिकल्प्योपास्यत्वेनोच्यन्ते । तदुपासनेन मृत्युगोचराक्षरसंख्यासामान्येन तं मृत्युं प्राप्य तदतिरिक्ताक्षरेण तस्याऽऽदित्यस्य मृत्योरतिक्रमणायैव संक्रमणं कल्पयति । अतिमृत्यु सप्तविधं सामोपासीत मृत्युमतिक्रान्तमतिरिक्ताक्षरसंख्ययेत्यतिमृत्यु साम । तस्य प्रथमभक्तिनामाक्षराणि हिंकार इत्येतत्त्र्यक्षरं भक्तिनाम प्रस्ताव इति च भक्तेस्त्र्यक्षरमेव नाम तत्पूर्वेण समम् ॥ १ ॥

अथ खल्वात्मसंमितमित्यादेस्तात्पर्यमाह—मृत्युरिति । अनन्तरमित्यस्यापेक्षितं निक्षिपति—आदित्येति । स्वशब्देन सामोच्यते । तस्यावयवा हिंकारादयस्तन्नामाक्षराणां त्रित्वेन त्रित्वेन तुल्यतया मितं ज्ञातं सामेत्यर्थः । यथा परमात्मावगमो मृत्योर्मोक्षणहेतुस्तथेदमुपासनमपीत्यर्थान्तरमाह—परमात्मेति । कीदृगत्रोपासनं विवक्षितमित्यपेक्षायां सदृष्टान्तमुत्तरमाह—यथेत्यादिना । उद्गीथ इत्युद्गीथभक्तेर्नाम । तदक्षराणीति यावत् ।

---

१ ख. ङ. ञ. ढ. °गतो मा° । २ ख. ङ. च. °त्मना तु° । ३ ग. घ. ङ. च. ट. ड. मृत्यवत्यय° । ४ ङ. °थाऽऽद्येऽध्या° । ५ ख. घ. ञ. ठ. °थमाख्या° । ६ क. च. ढ. °कल्प्य त° । ङ. °कल्पते । त° । ७ क. ग. ढ. ठ. ड. °न मृ° । ८ ख. घ. ङ. च. ञ. ठ. ढ. °त्यु सप्तविधं सा° । ९ ख. ङ. ञ. ड. ञ. इत्यतस्त्र्यक्ष° । १० ग. छ. ट. °न तु° । ११ ख. छ. ञ. परमात्मनेति । १२ ङ. °ना । इ° ।

सामत्वं तेषां नामाक्षराणामित्यध्याहार्यम् । तदुपासनं तेषामक्षराणामादित्यदृष्ट्योपासनमित्यर्थः । मृत्युगोचराक्षरसंख्यैकविंशतित्वलक्षणा साऽस्त्येकाऽनेकेष्वक्षरेषु तत्सामान्येन तेष्वक्षरेष्वादित्यदृष्ट्या मृत्युमादित्यमित्यर्थः । अतिक्रमणाय तत्साधनमुपासनमिति शेषः । अतिमृत्यु मृत्योरत्ययहेतुत्वादित्युक्तमेव स्पष्टयति—मृत्युमिति । नामाक्षराणि कथयन्त इति शेषः ॥ १ ॥

आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं तत इहैकं तत्सममू ॥ २ ॥

आदिरिति द्व्यक्षरं सप्तविधस्य साम्नः संख्यापूरण ओंकार आदिरित्युच्यते । प्रतिहार इति चतुक्षरम् । तत इहैकपक्षरमवच्छिद्याऽऽद्यक्षरयोः प्रक्षिप्यते । तेन तत्सममेव भवति ॥ २ ॥

आद्यक्षरयोरादिभक्तिनामाक्षरयोरिति यावत्। तेन प्रक्षेपेण तदादिभक्तिनाम प्रतिहारनाम्ना तुल्यमेवेत्यर्थः ॥ २ ॥

उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यते त्र्यक्षरं तत्सममू ॥ ३ ॥

उद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिशिष्यतेऽतिरिच्यते । तेन वैषम्ये प्राप्ते साम्नः समत्वकरणायाऽऽह—तदेकमपि सदक्षरमिति त्र्यक्षरमेव भवति । अतस्तत्सममू ॥ ३ ॥

॥ ३ ॥

निधनमिति त्र्यक्षरं तत्सममेव भवति तानि ह वा एतानि द्वाविंशतिरक्षराणि ॥ ४ ॥

निधनमिति त्र्यक्षरं तत्सममेव भवति । एवं त्र्यक्षरसमतया सामत्वं संपाद्य यथोक्तान्येवाक्षराणि संख्यायन्ते—तानि ह वा एतानि सप्तभक्तिनामाक्षराणि द्वाविंशतिः ॥ ४ ॥

ननु यथोक्तयाँ रीत्या चतुर्विंशत्यक्षराणि तत्कथं तानि ह वा एतानि द्वाविंशतिरक्षराणीति तत्राऽऽह—एवमिति ॥ ४ ॥

---

१ क. ग. ट. °दित्थादिह° । २ ग. ट. °तिल° । ३ क. ग. ट. °क्रमाय° । ४ क. °करी° । ५ ङ. °या नीत्या ।

एकविꣳशत्याऽऽदित्यमाप्नोत्येकविꣳशो वा इतोऽसावादित्यो द्वाविꣳशेन परमादित्याज्जयति तन्नाकं तद्विशोकम् ॥ ५ ॥

तत्रैकविंशत्यक्षरसंख्ययाऽऽदित्यमाप्नोति मृत्युम्। यस्मादेकविंश इतोऽस्माल्लोकादसावादित्यः संख्यया। द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳश इति श्रुतेरतिशिष्टेन द्वाविंशेनाक्षरेण परं मृत्योरादित्याज्जयत्याप्नोतीत्यर्थः। यच्च तदादित्यात्परं किं तत्। नाकं कमिति सुखं तस्य प्रतिषेधोऽकं तन्न भवतीति नाकं कमेवेत्यर्थः। मृत्युविषयत्वाद्दुःखस्य विशोकं च तद्विगतशोकं मानसदुःखरहितमित्यर्थः। तदाप्नोतीति ॥ ५ ॥

आदित्यस्यास्माल्लोकादेकविंशत्वे श्रुत्यन्तरं प्रमाणयति—द्वादशेति। हेमन्तशिशिरावेकीकृत्य पञ्चर्तव इत्युक्तम्। आदित्यस्याहोरात्राभ्यां पौनःपुन्येन मृत्युहेतुत्वमस्मिँल्लोके दृश्यते। तदयं लोको मृत्युविषयत्वाद्दुःखात्मकस्तदभावाद्ब्रह्मलोकः सुखात्मक इति मत्वाऽऽह—मृत्युविषयत्वादिति ॥ ५ ॥

आप्नोति हाऽऽदित्यस्य जयं परो हास्याऽऽदित्यजयाज्जयो भवति य एतदेवं विज्ञानात्मसंमितमाति-मृत्यु सप्तविधꣳ सामोपास्ते सामोपास्ते ॥ ६ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य दशमः खण्डः ॥ १० ॥

उक्तस्यैव पिण्डितार्थमाह—एकविंशतिसंख्ययाऽऽदित्यस्य जयमाप्नोति। परो हास्यैवंविद आदित्यजयान्मृत्युगोचरात्परो जयो भवति द्वाविंशत्यक्षरसंख्ययेत्यर्थः। य एतदेवं विद्वानित्यादि पूर्वोक्तार्थम्। तस्यैतद्यथोक्तं फलमिति द्विरभ्यासः सप्तविध्यसमाप्त्यर्थः ॥ ६ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य दशमः खण्डः ॥ १० ॥

---

१ ख. ञ. विंशो वा इ°। २ ङ. ङ. ढ. °ꣳ ना°। ३ क. ढ. °त्वात्तद्दुः°। ४ घ. ढ. च. मा°। ५ क. ञ. °त्वात्तद्दुः°। ६ क. ख. ग. ङ. झ. ठ. ड. °प्नोतीहा°। ७ ख. घ. ङ. ञ. ठ. ड. ढ. पिण्डार्थं°। ८ ङ. च. ङ. °यमनुप°। ९ ख ञ. °प्नोत्यनुप°। १० घ. ङ. सामविधास°।

पूर्वेणोत्तरस्य पौनरुक्त्यमाशङ्क्याऽऽह—उक्तस्यैवेति । व्याख्यातस्यैव ग्रन्थस्य समुदायार्थः संक्षिप्य बुद्धिसौकर्यार्थमनन्तरग्रन्थेनोच्यते । तन्न पौनरुक्त्यमित्यर्थः । जयमनु परो जयो भवतीति संबन्धः । परो ह्यस्येत्युपात्तं वाक्यं व्याकरोति—**एवंविद इति** । फलमिति शेष इति यावत् । सप्तविध्यं सप्तविधत्वं तदुपेतसामोपासनस्य समाप्त्यर्थोऽभ्यास इत्यर्थः ॥ ६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य दशमः खण्डः ॥ १० ॥

(अथ द्वितीयाध्यायस्यैकादशः खण्डः) ।

मनो हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् ॥ १ ॥

विना नामग्रहणं पञ्चविधस्य सप्तविधस्य च साम्न उपासनमुक्तम् । अथेदानीं गायत्रादिनामग्रहणपूर्वकं विशिष्टफलानि सामोपासनान्तराण्युच्यन्ते । यथाक्रमं गायत्रादीनां कर्मणि प्रयोगस्तथैव मनो हिंकारो मनसः सर्वकरणवृत्तीनां प्राथम्यात् । तदानन्तर्याद्वाक्प्रस्तावश्चक्षुरुद्गीथः श्रैष्ठ्यात् । श्रोत्रं प्रतिहारः प्रतिहृतत्वात् । प्राणो निधनं यथोक्तानां प्राणे निधनात्स्वापकाले । एतद्गायत्रं साम प्राणेषु प्रोतम् । गायत्र्याः प्राणसंस्तुतत्वात् ॥ १ ॥

ननु पञ्चविधस्य सप्तविधस्य च साम्नो ध्यानं व्याख्यातम् । तथा च ज्ञातविषये वक्तव्यामावादलमनन्तरग्रन्थेनेत्याशङ्क्य पूर्वोत्तरग्रन्थयोरर्थभेदमाह—विनेत्यादिना । गायत्रं रथंतरमित्यादिनामग्रहणेन विशिष्टानि विशिष्टफलानि चेत्यर्थः । कथं पुनर्वक्ष्यमाणेषूपासनेषु निर्देशक्रमसिद्धिस्तत्राऽऽह—यथाक्रममिति । यादृशं क्रममाश्रित्य तेषां कर्मणि प्रयोगः कर्मणामिष्टस्तेनैव क्रमेण तदुपासनोक्तिरित्यर्थः । तत्र प्राणस्य क्रियाज्ञानयोरसंभवात्प्राणस्य प्रधानत्वात्तद्दृष्ट्या गायत्रोपास्तिमादौ दर्शयति—मनो हिंकार इत्यादिना । प्राणमेव वागप्येतीत्यादिश्रुत्या स्वापकाले प्राणे वागादीनां निधनमवधेयम् । प्रोतं प्रगतं प्रतिष्ठितमिति यावत् । गायत्र्याः प्राणेषु प्रतिष्ठितत्वे हेतुमाह-गायत्र्या इति । प्राणो वै गायत्रीति हि श्रुतिः ॥ १ ॥

स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्र-

---

१ क. ग. ङ. ट. ठ. °णप्रतृ° । २ क. ख.-ग. छ. °दृशक° । ३ क. ग. ङ. प्राणं तर्हि वा° । ४ ख. ञ. °वध्येय° ।

जया पशुभिर्भवति महान्कीर्त्या महामनाः
स्यात्तद्व्रतम् ॥ २ ॥
इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्यैकादशः खण्डः ॥ ११ ॥

स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति । अविकलकरणो भवतीत्येतत् । सर्वमायुरेति । शतं वर्षाणि सर्वमायुः पुरुषस्येति श्रुतेः । ज्योगुज्ज्वलं जीवति । महान्भवति प्रजादिभिर्महांश्च कीर्त्या । गायत्रोपासकस्यैतद्व्रतं भवति यन्महामनास्त्वक्षुद्रचित्तः स्यादित्यर्थः ॥ २ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्यैकादशः खण्डः ॥ ११ ॥

* विदुषोऽपि प्राणित्वसिद्धेर्नेदं विद्याफलमित्याशङ्क्याऽऽह— अविकलेति । कथं पुनर्नानाजनीनं सर्वमायुरेको ध्याता गन्तुमलमित्याशङ्क्याऽऽह — शतमिति । शतायुर्वै पुरुष इति श्रुतेरित्युच्यते । ज्योक्शब्दो निपातः । स चोज्ज्वलनार्थः । उज्ज्वलः स्वपरोपकारसमर्थ इति यावत् ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
द्वितीयाध्यायस्यैकादशः खण्डः ॥ ११ ॥

(अथ द्वितीयाध्यायस्य द्वादशः खण्डः) ।

अग्निमन्थति स हिंकारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथोऽङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधन सँशाम्यति तन्निधनमेतद्रथंतरमग्नौ प्रोतम् ॥ १ ॥

अग्निमन्थति स हिंकारः प्राथम्यात् । अग्नेर्धूमो जायते स प्रस्ताव आनन्तर्यात् । ज्वलति स उद्गीथो हविःसंबन्धाच्छ्रैष्ठ्यं ज्वलनस्य । अङ्गारा भवन्ति स प्रतिहारोऽङ्गाराणां प्रतिहृतत्वात् । उपशमः सावशेषत्वादग्नेः संशमो निःशेषोपशमः समाप्तिसामान्यान्निधनमेतद्रथंतरमग्नौ प्रोतम् । मन्थने ह्यग्नेर्गीयते ॥ १ ॥

समग्रप्राणवतो मन्थनकर्तृत्वसंभवात्प्राणदृष्ट्यनन्तरं मन्थनादिदृष्टिमवतारयति—

१ ख. ङ. च. ञ. ढ. °मनस्त्वमक्षु° । २ क. ग. घ. ङ. ज. ठ. ह्यग्निर्गी° ।

अभिमन्यतीत्यादिना । उपशमः संशमश्चेत्यर्थभेदाभावात्पुनरुक्तिमाशङ्क्य सावशेष-निरवशेषत्वाभ्यां विशेषमाह— उपशम इति । कथं पुना रथंतरसाम्नोऽग्नौ प्रतिष्ठितत्वम् । न हि तत्र किंचिन्निमित्तमुपलभ्यतेऽत आह—मन्थने हीति । मन्थनं निमित्तीकृत्याग्नेरुत्पत्तौ रथंतरसाम्नो गीयमानत्वदर्शनादग्नौ तस्य प्रतिष्ठितत्वसिद्धिरित्यर्थः ॥ १ ॥

स य एवमेतद्रथंतरमग्नौ प्रोतं वेद ब्रह्मवर्चस्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न प्रत्यङ्ङग्निमाचामेन्न निष्ठीवेत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य द्वादशः खण्डः ॥१२॥

स य इत्यादि पूर्ववत् । ब्रह्मवर्चसी वृत्तस्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसम् । तेजस्तु केवलं त्विड्भावः । अन्नादो दीप्ताग्निः । न प्रत्यङ्ङग्नेरभिमुखो नाऽऽचामेन्न भक्षयेत्किंचिन्न निष्ठीवेच्छ्लेष्मनिरसनं च न कुर्यात्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य द्वादशः खण्डः ॥१२॥

नन्वत्र ब्रह्मवर्चसीति फलमुक्तं बृहदुपासने तु तेजस्वी भवतीति वक्ष्यते । न च ब्रह्मवर्चसतेजसोर्भेदस्तथा च बृहद्रथंतरोपासनयोर्न फलवैषम्यमत आह—वृत्तेति ॥२॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

(अथ द्वितीयाध्यायस्य त्रयोदशः खण्डः)।

उपमन्त्रयते स हिंकारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रतिं स्त्रीं सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम ॥ १ ॥

उपमन्त्रयते संकेतं करोति प्राथम्यात्स हिंकारः । ज्ञपयते ज्ञापयति

---

१ क. ठ. 'न्नोद्गीथ' । २ ठ. 'ङग्निमग्ने' । ३ क. ग. घ. ङ. ज. ञ. ट. ठ. 'ति स्त्री च' ।

स प्रस्तावः । सहशयनमेकपर्यङ्कगमनं स उद्गीथः । श्रैष्ठ्यात् । प्रति स्त्रीं शयनं स्त्रिया अभिमुखीभावः स प्रतिहारः । कालं गच्छति मैथुनेन पारं समाप्तिं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् । वाय्वम्बुमिथुनसंबन्धात् ॥१॥

उत्तराधरारणिस्थानीययोः स्त्रीपुरुषयोरवाच्ये कर्मणि प्रवृत्तयोर्मन्थनसामान्यान्मन्थनादिदृष्ट्यनन्तरं मैथुनदृष्टिं विदधाति—उपमन्त्रयत इत्यादिना । पुरुषो हि पशुकर्मार्थं स्त्रियं वस्त्रादिना प्रीणयति । तस्मिन्नारम्भसामान्यात्प्रस्तावदृष्टिरित्याह—उपयत इति । कुतो वामदेव्यस्य साम्नो मिथुने प्रोतत्वं तत्राऽऽह—वाय्वम्बुमिथुनेति । वायोरपां च मिथुनतया संबन्धाद्वामदेव्योत्पत्तेरुक्तत्वात्तस्य मिथुने प्रतिष्ठितत्वं युक्तमित्यर्थः ॥ १ ॥

स य एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मि नी भवति मिथनान्मिथनात्प्रजायते सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या न कांचन रिहरेत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य त्रयोदशः खण्डः ॥१३॥

स य इत्यादि पूर्ववत् । मिथुनी भवत्यविधुरो भवतीत्यर्थः । मिथुनान्मिथुनात्प्रजायत इत्यभ्यासेनोक्तस्त्वमुच्यते । न कांचन कांचिदपि स्त्रियं स्वात्मतल्पगामां न परिहरेत्समागमार्थिनीम् । वामदेव्यसामोपासनाङ्गत्वेन विधानात् । एतस्मादन्यत्र प्रतिषेधस्मृतयः । वचनप्रामाण्याच्च धर्मावगतेर्न प्रतिषेधशास्त्रेणास्य विरोधः ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य त्रयोदशः खण्डः ॥१३॥

—:⊙-⊙-⊙-⊙:—

न कांचनेति वाक्यमादाय व्याचष्टे—कांचिदपीति । पराङ्गनां नोपगच्छेदिति स्मृतिविरोधमाशङ्क्याऽऽह—वामदेव्येति । विधिनिषेधयोः सामान्यविशेषविषयत्वेन व्यवस्था प्रसिद्धेति भावः । किंच शास्त्रप्रामाण्यादत्र धर्मोऽवगम्यते न कांचन परिहरेदिति च शास्त्रावगतत्वादवाच्यमपि कर्म धर्मो भवितुमर्हति । तथा च श्रौतेऽर्थे

---

१ क. ग. च. ट. °यङ्के ग°। २ ख. ग. घ. ङ. च. ञ. ट. ड. ढ. °मनमुद्गी°। ३ क. ग. घ. ङ. च. ट. ठ. ड. ढ. ण. °तिस्त्रीश°। ४ क. ख. ग. ङ. ञ. ट. ठ. ड. ढ. ण. स्त्रियोऽभि°। ५ ख. च. ञ. ढ. °सिं च ग°। ६ ख. छ. ञ. °न्यना°।

दुर्बलायाः स्मृतेर्न प्रतिस्पर्धितेत्याह—वचनेति । यथोक्तोपासनावतो ब्रह्मचर्यनियमभावो व्रतत्वेन विवक्षितस्तत्र प्रतिषेधशास्त्रविरोधाशङ्केति भावः ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

(अथ द्वितीयाध्यायस्य चतुर्दशः खण्डः) ।

उद्यन्हिंकार उदितः प्रस्तावो मध्यंदिन उद्गीथोऽपराह्णः प्रतिहारोऽस्तं यन्निधनमेतद्बृहदादित्ये प्रोतम् ॥ १ ॥

उद्यन्सविता स हिंकारः प्राथम्यादर्शनस्य । उदितः प्रस्तावः प्रस्तवनहेतुत्वात्कर्मणाम् । मध्यंदिन उद्गीथः श्रैष्ठ्यात् । अपराह्णः प्रतिहारः । पश्वादीनां गृहान्प्रति हरणात् । यदस्तं यंस्तन्निधनं रात्रौ गृहे निधानात्प्राणिनाम् । एतद्बृहदादित्ये प्रोक्तं बृहत आदित्यदै(दे)वत्यत्वात् ॥ १ ॥

आदित्यस्य प्रजाप्रसवहेतुत्वात्तद्धेतुमैथुनदृष्ट्यन्तरमादित्यदृष्टिमुत्थापयति—उद्यन्नित्यादिना ॥ १ ॥

स य एवमेतद्बृहदादित्ये प्रोत वेद तेजस्व्यन्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या तपन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

स य इत्यादि पूर्ववत् । तपन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

---

१ ख, ग. °न्यः सवि° । २ क. ग. घ ङ. च. ट. ठ. ड. ढ. °त् । अस्तं । ३ घ. च. ठ. °स्तं यन्नि° । ४ ङ. ट. निधना° ।

(अथ द्वितीयाध्यायस्य पञ्चदशः खण्डः)।

अभ्राणि संप्लुवन्ते स हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतम् ॥ १ ॥

अभ्राण्यब्भरणान्मेघ उदकसेक्तृत्वात्[1][2][3] । उक्तार्थमन्यत् । एतद्वैरूपं नाम साम पर्जन्ये प्रोतम् । अनेकरूपत्वात् । अभ्रादिभिः पर्जन्यस्य वैरूप्यम् ॥१॥

आदित्याज्जायते वृष्टिरिति स्मृतेरादित्यकार्यत्वात्पर्जन्यस्याऽऽदित्यदृष्ट्यनन्तरं पर्जन्यदृष्टिं दर्शयति—अभ्राणीति । कथं वैरूपं साम तस्मिन्प्रतिष्ठितं तत्राऽऽह—अनेकेति ॥ १ ॥

स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपाश्च सुरूपाश्च पशूनवरुन्धे सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या वर्षन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

विरूपांश्च सुरूपांश्चाजाविप्रभृतीन्पशूनवरुन्धे प्राप्नोतीत्यर्थः । वर्षन्तं न निन्देत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥
॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

(अथ द्वितीयाध्यायस्य षोडशः खण्डः)।

वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः

---

१ च. °ण्यम्बुभर° । २ ख. घ. ङ. °म्मेघा उ° । ३ ख. घ. ङ. °सेककृत्त्वात् ।

शरत्प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम् ॥ १ ॥

वसन्तो हिंकारः प्रायण्यात्[1]। ग्रीष्मः प्रस्ताव इत्यादि पूर्ववत् ॥ १ ॥

पर्जन्यायत्तत्वाद्दृतुव्यवस्थायास्तदुद्दृष्टेरनन्तरमृतुदृष्टिमाचष्टे—वसन्त इत्यादिना ॥ १ ॥

स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्यर्तून्न निन्देत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोपनिषदि द्वितीयाध्यायस्य षोडशः खण्डः ॥ १६ ॥

एतद्वैराजमृतुषु प्रोतं वेद विराजति ऋतुवद्यथर्तव आर्तवैर्धर्मैर्विराजन्त एवं प्रजादिभिर्विद्वानित्युक्तमन्यत्। ऋतून्न निन्देत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य षोडशः खण्डः ॥१६॥

वैराजस्य साम्नो युक्तमृतुषु प्रोतत्वं तेषां स्वधर्मैर्विराजनादित्याह—एतदिति। यद्ऋतूनामन्नोत्पत्तिनिमित्तत्वाद्विराडात्मनश्चान्नत्वात्तस्य तेषु प्रतिष्ठितत्वात्तद्द्वारा वैराजमपि साम तेषु प्रोतमिति भावः ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य षोडशः खण्डः ॥ १६ ॥

(अथ द्वितीयाध्यायस्य सप्तदशः खण्डः)।

पृथिवी हिंकारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः ॥ १ ॥

पृथिवी हिंकार इत्यादि पूर्ववत्। शक्वर्य इति नित्यं बहुवचनं रेवत्य इव। लोकेषु प्रोताः ॥ १ ॥

---

१ ख. घ. ङ. छ. ढ. प्राधान्यात्। २ क. °दृदृष्टयनं°। ३ ख. ज. °यथाऽऽर्तवर्मार्त°। ४ ख. ज. °अत ए°।

ऋतुषु सम्यग्वृत्तेषु लोकस्थितेः प्रसिद्धत्वादतुदृष्टचनन्तरं लोकदृष्टिमाह—पृथिवीति । रेवत्य शक्वर्य इत्येकस्यैव साम्नो नामधेयं बहुवचनाद्धि बहूनि सामानि प्रतीयन्ते तस्माऽऽह—शक्वर्य इतीति । नित्यबहुवचनत्वमुभयत्र तुल्यमिति द्योतनाय वक्ष्यमाणं दृष्टान्तयति—रेवत्य इवेति । महानाम्नीषु ऋक्षु शक्वर्यो गीयन्ते । तासां चाऽऽपो वै महानाम्नीरित्याद्भिः संबन्धः स्मृतः अप्सु । लोकाः प्रतिष्ठिता इति च श्रुतम् । तथा चास्मात्संबन्धाल्लोकेषु शक्वर्यः प्रतिष्ठिता इत्याह—लोकेष्विति ॥ १ ॥

स य एवमेताः शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न निन्देत्तद्व्रतम् ॥ २ ॥

इति छान्दोग्योपनिषदि द्वितीयाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

लोकी भवति लोकफलेन युज्यत इत्यर्थः । लोकान्न निन्देत्तद्व्रतम् ॥ २ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

(अथ द्वितीयाध्यायस्याष्टादशः खण्डः) ।

अजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः ॥ १ ॥

अजा हिंकार इत्यादि पूर्ववत् । पशुषु प्रोताः ॥ १ ॥

पशूनां लोककार्यत्वाल्लोकदृष्टचनन्तरं पशुदृष्टिमुपन्यस्यति—अजेति । रेवत्य इति सामनामधेयं पूर्ववन्नित्यबहुवचनान्तम् । पशवो वै रेवतीरिति श्रुत्यन्तरमाश्रित्याऽऽह—पशुष्विति ॥ १ ॥

स य एवमेता रेवत्यः पशुषु प्रोता वेद पशुमान्भ-

---

१ ख. घ. ङ. ञ. °न संयु° ।

वति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशु-
भिर्भवति महान्कीर्त्या पशून्न निन्देत्तद्व्रतम् ॥२॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

पशून्न निन्देत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्याष्टादशः खण्डः ॥१८॥

॥ २ ॥

इति श्रीमदानन्दगिरिविरचितं यां छान्दोग्योपनिच्छांकरभाष्यटीकायां
द्वितीयाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

(अथ द्वितीयाध्यायस्यैकोनविंशः खण्डः) ।

लोम हिंकारस्त्वक्प्रस्तावो मांसमुद्गीथोऽस्थि प्रति-
हारो मज्जा निधनमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतम् ॥१॥

लोम हिंकारो देहावयवानां प्राथम्यात् । त्वक्प्रस्ताव आनन्तर्यात् । मांस मुद्गीथः श्रेष्ठ्यात् । अस्थि प्रतिहारः प्रतिहृतत्वात् । मज्जा निधनमान्त्यात् । एतद्यज्ञायज्ञीयं नाम साम देहावयवेषु प्रोतम् ॥ १ ॥

पशुविकारपयोदध्यादिना पुष्टिरङ्गानां दृष्टेति पशुदृष्ट्यनन्तरमङ्गदृष्टिमाह लोमेति। रसो वै यज्ञायज्ञीयमिति श्रुतेरन्नरसविकारेण लोमादीनां संबन्धाद्यज्ञायज्ञीयं सामाङ्गेषु प्रतिष्ठितमित्याह- एतदिति ॥ १ ॥

स य एवमेतद्यज्ञायज्ञीयमङ्गेषु प्रोतं वेदाङ्गी भवति
नाङ्गेन विहूर्छति सर्वमायुरेति ज्योग्जीवति महान्प्र-
जया पशुभिर्भवति महान्कीर्त्या संवत्सरं मज्ञो
नाश्नीयात्तद्व्रतं मज्ञो नाश्नीयादिति वा ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्यैकोनविंशः खण्डः॥१९॥

अङ्गी भवति सम्पन्नाङ्गो भवतीत्यर्थो नाङ्गेन हस्तपादादिना विहीनो भवति न कुटिली भवति पङ्गुः*कुणी वेत्यर्थः । संवत्सरं संवत्सरमात्रं मद्यं मांसानि नाश्नीयान्न भक्षयेत् । बहुवचनं मत्स्योपलक्षणार्थम् । मद्यं मांसानि नाश्नीयात्सर्वदैव नाश्नीयादिति वा तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छाङ्करभाष्ये द्वितीयाध्यायस्यैकोनविंशः खण्डः ॥ १९ ॥

कुणिः श्मश्रुरहितः ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्यैकोनविंशः खण्डः ॥ १९ ॥

(अथ द्वितीयाध्यायस्य विंशः खण्डः) ।

अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजनं देवतासु प्रोतम् ॥ १ ॥

अग्निर्हिंकारः प्रथमस्थानत्वात् । वायुः प्रस्ताव आनन्तर्यसामान्यात् । आदित्य उद्गीथः श्रैष्ठ्यात् । नक्षत्राणि प्रतिहारः प्रतिहृतत्वात् । चन्द्रमा निधनं कर्मिणां तन्निधनात् । एतद्राजनं देवतासु प्रोतं देवतानां दीप्तिमत्त्वात् ॥ १ ॥

अग्न्यादीनामङ्गेषु प्रतिष्ठितत्वादङ्गदृष्ट्यनन्तरमग्न्यादिदृष्टिमुत्थापयति—अग्निरित्यादिना । राजनस्य साम्नो देवतासु प्रोतत्वे हेतुमाह—देवतानामिति ॥ १ ॥

स य एवमेतद्राजनं देवतासु प्रोतं वेदौजसामेव देवतानाꣳ सलोकताꣳ सार्ष्टिताꣳ सायुज्यं गच्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या ब्राह्मणान्न निन्देत्तद्व्रतम् ॥ २ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य विंशः खण्डः ॥ २० ॥

---

* इदं द्विवचनं कुंत्सितकरवाचकस्य प्रसिद्धत्वाच्छ्मश्रुरहितवाचकस्याप्रसिद्धत्वादेकस्यैव टीकायां व्याख्यानम् ।

---

१ ख. °न्निधाना° ।

विद्वत्फलं—एतासामेवाग्न्यादीनां देवतानां सलोकतां समानलोकतां सार्ष्टितां समानर्द्धित्वं सायुज्यं सयुग्भावमेकदेहदेहित्वमित्येतत् । वाशब्दोऽत्र लुप्तो द्रष्टव्यः । सलोकतां वेत्यादि । भावनाविशेषतः फलविशेषोपपत्तेः । गच्छति प्राप्नोति । समुच्चयानुपपत्तेश्च । ब्राह्मणान्न निन्देत्तद्व्रतम् । एते वै देवाः प्रत्यक्षं यद्ब्राह्मणा इति श्रुतेर्ब्राह्मणनिन्दा देवतानिन्देवेति ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य विंशः खण्डः ॥ २० ॥

फलविकल्पार्थं वाशब्दस्यात्रासत्त्वे कथं वाक्यं स्यादित्याशङ्क्याऽऽह—सलोकतां वेत्यादीति । कथं पुनरेकस्मिन्नुपासने फलत्रयं विकल्प्यते तत्राऽऽह—भावनेति । ननु फलत्रयमत्र समुच्चितमिष्यतां किमिति वाशब्दं गृहीत्वा विकल्प्यते तत्राऽऽह—समुच्चयेति । न हि मिथो विरुद्धं फलत्रयमेकत्र समुच्चेतुं शक्यमतोऽपि विकल्पसिद्धिरित्यर्थः । ननु देवतादृष्ट्या राजनस्य साम्नो ध्यानाद्देवता न निन्देदिति वक्तव्ये कथमन्यथोच्यते तत्राऽऽह—एत इति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य विंशः खण्डः ॥ २० ॥

(अथ द्वितीयाध्यायस्यैकविंशः खण्डः) ।

त्रयी विद्या हिंकारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयाꣳसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन्प्रोतम् ॥ १ ॥

त्रयी विद्या हिंकारः । अग्न्यादिसाम्न आनन्तर्यं त्रयीविद्याया अग्न्यादिकार्यत्वश्रुतेः । हिंकारः प्राथम्यात्सर्वकर्तव्यानाम् । त्रय इमे लोकास्तत्कार्यत्वादनन्तरा इति प्रस्तावः । अग्न्यादीनामुद्गीथत्वं श्रैष्ठ्यात् । नक्षत्रादीनां प्रतिहर्तृत्वात्प्रतिहारत्वम् । सर्पादीनां धकारसामान्यान्निधनत्वमेतत्साम नामविशेषाभावात्सामसमुदायः सामशब्दः सर्वस्मिन्प्रोतम् । त्रयीविद्यादि हि सर्वम् । त्रयीविद्यादिदृष्ट्या हिंकार-

---

१ ख. घ. ङ. ञ. °कत्वं सा° । २ ठ. °र्द्धितां सा° । ३ ख. छ. ञ. °रुद्गः° । ४ ख. घ. ञ. °मशब्दसमान्यं स° । घ. ठ. °मशब्दः सामान्यं स° । ङ. ढ. °मसामान्यंस° ।

रादिसामभक्तय उपास्याः । अतीतेष्वपि सामोपासनेषु येषु येषु प्रोतं यद्यत्साम तद्दृष्ट्या तदुपास्यमिति । कर्माङ्गानां(णां) दृष्टिविशेषणाज्यस्येव संस्कार्यत्वात् ॥ १ ॥

अग्न्यादिदृष्ट्यनन्तरं त्रयीविद्यादृष्टिविधाने कारणमाह—अग्न्यादीति । यदग्न्यात्मकं सामोपास्यमुक्तं तस्मादानन्तर्यमुपास्यायास्त्रयीविद्याया युज्यते । ऋग्वेदोऽग्नेर्यजुर्वेदो वायोरादित्यात्सामवेद इति श्रुतेस्त्रय्यास्तत्कार्यत्वावगमादित्यर्थः । तत्कार्यत्वात्त्रयीसाध्यकर्मफलत्वादित्यर्थः । कथं सर्वस्मिन्प्रोतमित्युक्तं त्रयीविद्यादौ प्रोतमिति वक्तव्यत्वादत आह—त्रयीविद्यादीति । कथं पुनरत्र त्रयीविद्यादिदृष्ट्या साम्नो ध्येयत्वं गम्यते तत्राऽऽह—त्रयीति । न चास्यां प्रतिज्ञायां पूर्वेण संदर्भेण विरोधः शङ्कामर्हतीत्याह—अतीतेष्वपीति । तत्र हेतुमाह—कर्माङ्गाना(णा)मिति । दर्शपूर्णमासाधिकारे पत्न्यवेक्षितमाज्यं भवतीति दृष्टिविशेषणमाज्यं संस्क्रियते । तथा सामप्रभेदानां दृष्टिविशेषणत्वाविशेषात्तेषां कर्माङ्गानां(णां) तत्तद्दृष्ट्या संस्कर्तव्यत्वादित्यर्थः ॥ १ ॥

स य एवमेतत्साम सर्वस्मिन्प्रोतं वेद सर्वꣳ ह भवति ॥ २ ॥

सर्वविषयसामविदः फलं—सर्वं ह भवति सर्वेश्वरो भवतीत्यर्थः । निरुपचरितसर्वभावे हि दिक्स्थेभ्यो बलिप्राप्त्यनुपपत्तिः ॥ २ ॥

अथ यथाश्रुतं सर्वात्मत्वमेव किं न स्यादत आह—निरुपचरितेति ॥ २ ॥

तदेष श्लोको यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति ॥ ३ ॥

तदेतस्मिन्नर्थे एष श्लोको मन्त्रोऽप्यस्ति । यानि पञ्चधा पञ्चप्रकारेण हिंकारादिविभागैः प्रोक्तानि त्रीणि त्रीणि त्रयीविद्यादीनि तेभ्यः पञ्चत्रिकेभ्यो ज्यायो महत्तरं परं च व्यतिरिक्तमन्यद्वस्त्वन्तरं नास्ति न विद्यत इत्यर्थः । तत्रैव हि सर्वस्यान्तर्भावः ॥ ३ ॥

सर्वविषयसामविदः सर्वेश्वरत्वमित्यत्र मन्त्रं संवादयति—तदेतस्मिन्निति । परमित्वस्यैव व्याख्यानमन्यदिति । वस्त्वन्तराभावे हेतुमाह—तत्रैवेति ॥ ३ ॥

---

१ घ. ङ. °षु यत्र प्रो° । २ ख. ज्ञ. ढ. °षु प्रो° । ३ खं. ङ. च. ञ. ड. ढ. यत्सा° । ४ क. ग. घ. च. ठ. °शेषेणाऽऽज्य° । ढ. शेषादाज्य° । ५ ङ. ट. ड. °णादाज्य° । ६ क. ग. ट. °रोधश° । ७ ग. ढ. पत्न्यऽवे° । ८ ख. ज. छ. ज. °दनङ्ग° । ९ क. ग. °प्राप्त्युपपत्तेः । त° । ङ. च. ट. ड. °प्राप्त्युप° । १० घ. ठ. ड. ढ. °रं न्य° ।

यस्तद्वेद स वेद सर्वꣳ सर्वा दिशो बलिमस्मै हरन्ति
सर्वमस्मीत्युपासीत तद्व्रतं तद्व्रतम् ॥ ४ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्यैकविंशः खण्डः ॥२१॥

यस्तद्यथोक्तं सर्वात्मकं साम वेद स वेद सर्वम् । स सर्वज्ञो भवतीत्यर्थः। सर्वा दिशः सर्वदिक्स्था अस्मा एवंविदे बलिं भोगं हरन्ति प्रापयन्तीत्यर्थः। सर्वमस्मि भवामीत्येवमेतत्सामोपासीत तस्यैतदेव व्रतम् । द्विरुक्तिः सामोपासनसमाप्त्यर्था ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्यैकविंशः खण्डः ॥२१॥

—○*○—

सर्वज्ञत्वं सर्वेश्वरत्वं च तच्छब्दार्थः । ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्यैकविंशः खण्डः ॥ २१ ॥

(अथ द्वितीयाध्यायस्य द्वाविंशः खण्डः)।

विनर्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः
प्रजापतेर्निरुक्तः सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं
बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वान्तं वरुणस्य
तान्सर्वानेवोपसेवेत वारुणं त्वेव वर्जयेत् ॥ १ ॥

सामोपासनप्रस्तुत्य गानविशेषादिसंपद्द्वारातुरुपदिश्यते । फलविशेषसंबन्धात् । विनर्दि विशिष्टो नदः स्वरविशेष ऋषभकूजितसमोऽस्यातीति विनर्दि गानमिति यावत्शेषः । तव साम्नः संबन्धि पशुभ्यो हितं पशव्यमग्नेरग्निदेवत्यं चोद्गीथ उद्गानम् । तदहमेवं विशिष्टं वृणे प्रार्थय इति कश्चिद्यजमान उद्गाता वा मन्यते । अनिरुक्तोऽमुकसम इत्यविशेषितः प्रजापतेः प्रजापतिदेवत्यः स न गानविशेषः । अनिरुक्तत्वात्प्रजापतेर्निरुक्तः स्पष्टः । सोमस्य सोमदेवत्यः स उद्गीथ इत्यर्थः । मृदु

---

१ ख. अ. °म्नः स्वर्सं° । २ क. ख. ग. घ. ङ. च. झ. ट. ढ. ण. °ग्निदैव° । ३ क. ख. ग. ङ. झ. ण. °तिदैव° । ४ क. ख. झ. ण. °मदैव° ।

श्लक्ष्णं च गानं वायोर्वायुदेवत्यं तत् । श्लक्ष्णं बलवच्च प्रयत्नाधिक्योपेतं चेन्द्रस्यैन्द्रं तद्गानम् । क्रौञ्चं क्रौञ्चपक्षिनिनादसमं बृहस्पतेर्बार्हस्पत्यं तत् । अपध्वान्तं भिन्नकांस्यस्वरसमं वरुणस्यैतद्गानम् । तान्सर्वानेवोपसेवेत प्रयुञ्जीत वारुणं त्वेवैकं वर्जयेत् ॥ १ ॥

सामोपासनं समाप्य चेत्किमुत्तरमन्थेनेत्याकाङ्क्षायाऽऽह—सामेति । आदिशब्देन स्वरादयो वर्णा गृह्यन्ते । किमित्युद्गातुरर्थाक्षेपात्तिरुच्यते तत्राऽऽह—फलेति । मृत्युपरिहारादि फलविशेषस्तत्संबन्धादेषोपास्तिरनुष्ठेयेत्यर्थः । पशुभ्यो हितत्वमस्य वचनाद्गमयितव्यम् । वाक्यस्थमितिशब्दं व्याचष्टे—इति कश्चिदिति । इत्यविशेषितः । अनेन प्रकारेणायमिति विशेषितो व्यवच्छिद्य ज्ञातो न भवतीत्यर्थः । तस्य प्राजापत्यत्वे हेतुमाह—आनिरुक्त्यादिति । नीलपीतादिभिर्निश्चित्यावचनादित्यर्थः ॥ १ ॥

अमृतत्वं देवेभ्य आगायानीत्यागायेत्स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमात्मन आगायानीत्येतानि मनसा ध्यायन्नप्रमत्तः स्तुवीत ॥ २ ॥

अमृतत्वं देवेभ्य आगायानि साधयानि । स्वधां पितृभ्य आगायान्याशां मनुष्येभ्य आशां प्रार्थनां प्रार्थितमित्येतत् । तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमात्मने मह्यमागायानीत्येतानि मनसा चिन्तयन्ध्यायन्नप्रमत्तः स्वरोष्मव्यञ्जनादिभ्यः स्तुवीत ॥ २ ॥

स्वरविशेषज्ञानपूर्वकमुद्गानकाले ध्यातव्यार्थमाह—अमृतत्वमिति । स्वरोष्मव्यञ्जनादिभ्य इत्यत्राऽऽदिशब्देन स्थानप्रयत्नादिसंग्रहः ॥ २ ॥

सर्वे स्वरा इन्द्रस्याऽऽत्मानः सर्व ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्तं यदि स्वरेषूपालभेतेन्द्रꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति वक्ष्यतीत्येनं ब्रूयात् ॥ ३ ॥

सर्वे स्वरा अकारादय इन्द्रस्य बलकर्मण. प्राणस्याऽऽत्मानो देहावयवस्था-

---

१ क. ख. घ. ञ. ण °युदैव° । २ क. ग. च. ठ. °पेतमिन्द्र° । ३ ग. ङ. °निनद° । ४ ख. ङ. ञ. ठ. ड. °स्यरवत्त° । ५ ख ङ. ञ ड. ढ. °णस्य त° । घ. °णस्यैव त° । ६ क. ग. ट. °रादिक° ।

नीयाः सर्वे ऊष्माणः शषसहादयः प्रजापतेर्विराजः कश्यपस्य वाऽऽत्मानः। सर्वे स्पर्शाः कादयो व्यञ्जनानि मृत्योरात्मानस्तमेवंविदमुद्गातारं यदि कश्चित्स्वरेषूपालभेत स्वरस्त्वया दुष्टः प्रयुक्त इत्येवमुपालब्ध इन्द्रं प्राणमीश्वरं शरणमाश्रयं प्रपन्नोऽभूवं स्वरान्प्रयुञ्जानोऽहं स इन्द्रो यत्तव वक्तव्यं त्वा त्वां प्रति वक्ष्यति स एव देव उत्तरं दास्यतीत्येनं ब्रूयात् ॥ ३ ॥

केनाप्याक्षिप्तस्योद्गातुरुद्गानकाले प्रतीकारज्ञानाय स्वरादिदेवताज्ञानमुपन्यस्यति—सर्वे स्वरा इति। शषसहादय इत्यादिशब्दस्तदवान्तरभेदाभिप्रायः। यत्तव वक्तव्यमित्यस्मादूर्ध्वं तच्छब्दो द्रष्टव्यः ॥ ३ ॥

> अथ यद्येनमूष्मसूपालभेत प्रजापतिꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति पेक्ष्यतीत्येनं ब्रूयादथ यद्येनꣳ स्पर्शेषूपालभेत मृत्युꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति धक्ष्यतीत्येनं ब्रूयात् ॥ ४ ॥

अथ यद्येनमूष्मसु तथैवोपालभेत प्रजापतिं शरणं प्रपन्नोऽभूवं स त्वां प्रति पेक्ष्यति संचूर्णयिष्यतीत्येनं ब्रूयात्। अथ यद्येनं स्पर्शेषूपालभेत मृत्युं शरणं प्रपन्नोऽभूवं स त्वाँ प्रति धक्ष्यति भस्मी करिष्यतीत्येनं ब्रूयात् ॥ ४ ॥

तथैव स्वरेष्विवेति यावत् ॥ ४ ॥

> सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति सर्व ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिदद्दानीति सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥ ५ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य द्वाविंशः खण्डः ॥२२॥

यत इन्द्राद्यात्मानः स्वरादयोऽतः सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्याः। तथाऽहमिन्द्रे बलं ददानि बलमादधानीति। तथा सर्व

---

१ ख. ग. ठ. त्वां त्वा प्र°। २ ख. ग. त्वा त्वां प्र°। ३ क. ङ. °दानी°।

ऊष्माणोऽग्रस्ता अन्तरग्रवेशिता अनिरस्ता बहिरभिक्षिप्ता विवृता विवृतप्रयत्नोपेताः प्रजापतेरात्मानं परिददानि प्रयच्छानीति । सर्वे स्पर्शा लेशेन शनकैरनभिनिहिता अनभिनिक्षिप्ता वक्तव्या मृत्योरात्मानं बालानिव शनकैः परिहरद्भिर्मृत्योरात्मानं परिहराणीति ॥ ५ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य द्वाविंशः खण्डः ॥२२॥

देवताज्ञानबलेनोद्गात्रा न प्रमत्तेन भवितव्यं स्वरादीनामन्यथोच्चारणे देवताभेदप्रसङ्गादतः स्वराद्युच्चारणे तात्पर्यं कर्तव्यमित्युद्गातारं शिक्षयति—यत इति । प्रयोगकाले चिन्तनीयमर्थं कथयति—तथेति । यथोक्तरीत्या स्वराणां प्रयोगावस्थायामित्यर्थः । आदधानीति चिन्तयेदिति शेषः । तथेत्यूष्मणां प्रयोगावस्थायामिति यावत् । विवृतप्रयत्नोपेताः प्रयोक्तव्या इति शेषः । तत्रापि ध्यातव्यं दर्शयति—प्रजापतेरिति । अतिद्रुतोच्चारणेन वर्णो वर्णान्तरे यथा निक्षिप्तो न भवति तथा प्रयुज्यमानत्वमनभिक्षिप्तत्वम् । मृत्योरात्मानमिति वाक्योपादानं तस्यार्थमाह—बालानिवेति । यथा लोकः शनकैर्जनादिभ्यो बालान्परिहरति तथा मृत्योरात्मानमहं परिराणीति ध्यात्वा स्पर्शानां प्रयोगः कर्तव्य इत्यर्थः ॥ ५ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
द्वितीयाध्यायस्य द्वाविंशः खण्डः ॥ २२ ॥

(अथ द्वितीयाध्यायस्य त्रयोविंशः खण्डः) ।

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति ॥ १ ॥

ओंकारस्योपासनविध्यर्थं त्रयो धर्मस्कन्धा इत्याद्यारभ्यते । नैवं मन्तव्यं सामावयवभूतस्यैवोद्गीथादिलक्षणस्योंकारस्योपासनोत्फलं प्राप्यत इति । किं तर्हि यत्सर्वैरपि सामोपासनैः कर्मभिश्चाप्राप्यं तत्फलममृतत्वं केवलादोंकारो-

---

१ ङ. ढ. °रक्षि° । २ ख. ञ. °पेता वक्तव्याः प्र° । ३ क. °ददानी° । ४ क. ग. छ. ङ. वर्णा° । ५ क. ट. °थाऽभिक्षि° । ६ क. तस्य तात्पर्यमा° । ७ ख. ञ. °नात्तत्फ° ।

पासनात्माप्यत इति । तत्स्तुत्यर्थं सामप्रकरणे तदुपन्यासः । त्रयस्त्रिंसंख्याका धर्मस्य स्कन्धा धर्मस्कन्धा धर्मविभागा इत्यर्थः । के त इत्याह—यज्ञोऽग्निहोत्रादिः । अध्ययनं सनियमस्य ऋगादेरभ्यासः । दानं बहिर्वेदि यथाशक्तिद्रव्यसंविभागो भिक्षमाणेभ्यः । इत्येष प्रथमो धर्मस्कन्धः । गृहस्थमभवेतत्वात्तन्निर्वर्तकेन गृहस्थेन निर्दिश्यते प्रथम एक इत्यर्थो द्वितीयतृतीयश्रवणान्नाऽऽद्यार्थः । तप एव द्वितीयस्तप इति कृच्छ्रचान्द्रायणादि तद्वांस्तापसः परिव्राड्वा न ब्रह्मसंस्थ आश्रमधर्ममात्रसंस्थो ब्रह्मसंस्थस्य त्वमृतत्वश्रवणात् । द्वितीयो धर्मस्कन्धः । ब्रह्मचार्याचार्यकुले वस्तुं शीलमस्येत्याचार्यकुलवासी । अत्यन्तं यावज्जीवमात्मानं नियमैराचार्यकुलेऽवसादयन्क्षपयन्देहं तृतीयो धर्मस्कन्धः । अत्यन्तमित्यादिविशेषणान्नैष्ठिक इति गम्यते । उपकुर्वाणस्य स्वाध्यायग्रहणार्थत्वान्न पुण्यलोकत्वं ब्रह्मचर्येण । सर्व एते त्रयोऽप्याश्रमिणो यथोक्तैर्धर्मैः पुण्यलोका भवन्ति । पुण्यो लोको येषां त इमे पुण्यलोका आश्रमिणो भवन्ति । अवशिष्टस्त्वनुक्तः परिव्राड्ब्रह्मसंस्थो ब्रह्मणि सम्यक्स्थितः सोऽमृतत्वं पुण्यलोकविलक्षणममरणभावमात्यन्तिकमेति नाऽऽपेक्षिकं देवाद्यमृतत्ववत् । पुण्यलोकात्पृथगमृतत्वस्य विभागकरणात् ।

अधिकृताधिकारार्थ्यङ्गावबद्धान्युपासनान्युक्तानि । संप्रति स्वतन्त्राधिकारिगोचरमोंकारोपासनं विधातुमारभते—ओंकारेति । अङ्गावबद्धोपासनाधिकारे यथोक्तस्वतन्त्रोपासनविधाने कोऽभिप्रायः श्रुतेरित्याशङ्क्याऽऽह—नैवमिति । न स्वतन्त्रस्य तस्योपासनादित्येवकारार्थः । कथं तर्हि मन्तव्यमित्यपेक्षायामाह—किं तर्हीति । सनियमस्य प्राङ्मुखत्वादिनियमसहितस्य पुरुषस्येति यावत् । अभ्यासश्च स्वीकरणं विचारो जपः शिष्येभ्यो दानमावृत्तिश्चेति पञ्चविधः । वेद्यां यद्दीयते तस्य यज्ञाङ्गत्वात्पृथक्फलवत्त्वं नास्तीति मन्यानो विशिनष्टि—बहिर्वेदीति । गृहस्थेन तदात्मनेत्यर्थः । कथं गृहस्थस्य प्राथम्यं ब्रह्मचारिणस्तथात्वादित्याशङ्क्याऽऽह—एक इत्यर्थ इति । उक्तव्याख्याने वाक्यशेषस्य गमकत्वमाह—द्वितीयेति । प्राथम्यमेव प्रथमशब्दस्य नार्थो ब्रह्मचारिप्राथम्यप्रसिद्धिविरोधादित्याह—नाऽऽद्यार्थ इति । कीदृगत्र पारिव्राड् गृह्यते तत्राऽऽह—नेति । कुतोऽत्र ब्रह्मसंस्थो न गृह्यते तत्राऽऽह—ब्रह्म-

---

१ ङ. ढ. °त्यर्थः सा° । २ ख. ञ. °यन्नयं तृ° । ३ घ. ङ. ठ. ड. ढ. °णकस्य । ४ ख. घ. ङ. ञ. ठ. ड. ढ. °वमेत्यात्यन्तिकं ना° । ५ क. ट. °कारणो° । ६ क. ग. ढ. °तश्चाऽऽक° । ७ क. घ. ट. °तो ब्रं° ।

संस्थस्येति । वानप्रस्थग्रहणमुख्यस्य परिव्राजोऽपि प्रदर्शनार्थम् । ब्रह्मचारीत्यादि वाक्यस्य नैष्ठिकविषयत्वं विशेषणसामर्थ्याद्दर्शयति—अत्यन्तमित्यादीति । अथोपकुर्वाणस्यात्र ब्रह्मचारित्वाविशेषात्किमित्युपादानं न भवेत्तत्राऽऽह—उपकुर्वाणस्येति । ननु ब्रह्मचारिणो ब्रह्मचर्येण पुण्यलोको न श्रूयते तत्राऽऽह—सर्व इति । कथमाश्रमिणां पुण्यलोकैकत्वविशेषवतां तदात्मैकत्वमुच्यते तत्राऽऽह—पुण्य इति । आश्रमिषु प्रदर्श्यमानेषु किं परिव्राण्मुख्यो न प्रदर्श्यते तत्राऽऽह—अवशिष्टस्त्विति । कुतो हि पुण्यलोकवैलक्षण्यममृतत्वस्येत्याशङ्क्योक्तम्—आत्यन्तिकमिति । तस्या(स्याऽऽ)पेक्षित(क)त्वाभावे हेतुमाह—पुण्यलोकादीति ।

यदि च पुण्यलोकातिशयमात्रममृतत्वमभविष्यत्ततः पुण्यलोकत्वाद्विभक्तं नावक्ष्यत् । विभक्तोपदेशाच्चाऽऽत्यन्तिकममृतत्वमिति गम्यते । अत्र चाऽऽश्रमधर्मफलोपन्यासः प्रणवसेवास्तुत्यर्थ न तत्फलविध्यर्थम् । स्तुतये च प्रणवसेवाया आश्रमधर्मफलविधये चेति हि भिद्येत वाक्यम् । तस्मात्स्मृतिसिद्धाश्रमफलानुवादेन प्रणवसेवाफलममृतत्वं ब्रुवन्प्रणवसेवां स्तौति । यथा पूर्णवर्मणः सेवा भक्तपरिधानमात्रफला राजवर्मणस्तु सेवा राज्यतुल्यफलेति तद्वत् । प्रणवश्च तत्सत्यं परं ब्रह्म तत्प्रतीकत्वात् । एतद्धयेवाक्षरं ब्रह्म एतद्धयेवाक्षरं परमित्याद्यामनायात्कठके युक्तं तत्सेवातोऽमृतत्वम् ।

अमृतत्वस्य पुण्यलोकात्पृथग्विभागकरणात्ततोऽन्यत्वादात्यन्तिकत्वसिद्धिरिति योजना । उक्तमेवार्थं व्यतिरेकमुखेन(ण) साधयति—यदि चेत्यादिना । ब्रह्मशब्दस्य यथाश्रुतं मुख्यमर्थं गृहीत्वा परब्रह्मात्मना साक्षात्कारवतो निरङ्कुशममृतत्वमुक्तं प्रकरणादालोचनया तु प्रणवप्रतीके ब्रह्मोपासकस्य क्रमेणामृतत्वं भेदबुद्धेरनपायादद्रष्टव्यम् । कर्मणामन्तवत्फलत्वाभिधानेन तन्निन्दया ब्रह्मसंस्थतास्तुतिदर्शनात्तस्याश्च विध्यर्थत्वादमृतत्वकामो ब्रह्मसंस्थः स्यादित्येकार्थपरत्वादेकमिदं वाक्यमित्याह—अत्र चेत्यादिना । स्तुतये फलविधये चेदं वाक्यं किं न स्यादित्याशङ्क्याऽऽह—स्तुतये चेति । अर्थैकत्वादेकं वाक्यं तद्भेदे तद्भेदनियमादित्यर्थः । किंपरं तर्हीदं वाक्यं तत्राऽऽह—तस्मादिति । स्मृतिसिद्धेति । श्रुतेः स्मृत्यर्थानुवादत्वे वैपरीत्यात्तदनुमितश्रुतिसिद्धेति योज्यम् । स्तुतिमेव दृष्टान्तावष्टम्भेन स्पष्टयति—यथेत्यादिना । इतिशब्दोऽध्याहृतस्तुतय इत्यनेन संबध्यते । ननु ब्रह्मतत्त्वसेवातोऽमृतत्वं भवति

---

१ ग. ट. °ह्यप° । २ ख. छ. ञ. °कवि° । ३ क. ग. ट. °त्मत्व° । ४ क. ग. ट. °देशत्वादात्य° । ५ क. ग. घ. ङ. च. ट. ठ. ड. ढ. °तिप्रसि° । ६ क. ग. ठ. ड. °केऽप्युक्तं । ७ ख, छ. ञ. °रतो । ८ ख. छ. ञ. °लवत्त्वाभि । ९ क. ट. °देकवा° ।

न प्रणवसेवनात्तत्किमिति तस्य स्तुतिरित्याशङ्क्य ऽऽह—प्रणवश्चेति । तत्र प्रमाणं दर्शयन्कलितमाह— एतद्ध्येवेति ।

अत्राऽऽहुः केचिच्चतुर्णामाश्रमिणामविशेषेण स्वकर्मानुष्ठानात्पुण्यलोकतेोक्ता ज्ञानवर्जितानां सर्व एते पुण्यलोका भवन्तीति । नात्र परिव्राडवशेषितः । परिव्राजकस्यापि ज्ञानं यमा नियमाश्च तप एवेति । तप एव द्वितीय इत्यत्र तपःशब्देन परिव्राट्तापसौ गृहीतौ । अतस्तेषामेव चतुर्णां यो ब्रह्मसंस्थः प्रणवसेवकः सोऽमृतत्वमेतीति । चतुर्णामधिकृतत्वाविशेषात् । ब्रह्मसंस्थत्वेऽप्रतिषेधाच्च । स्वकर्मच्छिद्रे च ब्रह्मसंस्थतायां सामर्थ्योपपत्तेः । न च यवयवराहादिशब्दवद्ब्रह्मसंस्थशब्दः परिव्राजके रूढः । ब्रह्मणि संस्थितिनिमित्तमुपादाय प्रवृत्तत्वात् । न हि रूढिशब्दा निमित्तमुपाददते । सर्वेषां च ब्रह्मणि स्थितिरुपपद्यते । यत्र यत्र निमित्तमस्ति ब्रह्मणि संस्थितिस्तत्रैव तस्य निमित्तवतो वाचकं सन्तं ब्रह्मसंस्थशब्दं परिव्राडेकविषये संकोचे कारणाभावान्निरोद्धुमयुक्तम् ।

स्वव्याख्यानं वर्जितदोषमुक्त्वा ब्रह्मसंस्थोऽमृतत्वमेतीत्यत्र वृत्तिकारीयं व्याख्यानमुत्थापयति— अत्रेति । ये खल्वाश्रमिणश्चत्वारो ज्ञानवर्जितास्तेषां सर्वेषामप्यविशेषेण स्वाश्रमविहितधर्मानुष्ठानेन पुण्यलोकमागिता सर्व एते पुण्यलोका भवन्तीत्यनूक्ता । न तु पूर्वस्मिन्ग्रन्थे परिव्राडनुक्तः सन्नवशेषितोऽस्तीति योजना । ननु पूर्वस्मिन्ग्रन्थे वाचकपदं परिव्राजो नोपलभ्यते तथा चासावनवशेषितस्तत्राऽऽह—परिव्राजकस्यापीति । ज्ञानं यमा नियमाश्चोपायभूता इति यावत् । परिव्राडपि पूर्वत्राभिहितश्चेद्ब्रह्मसंस्थवाक्यस्य कोऽर्थः स्यादित्याशङ्क्याऽऽह—अत इति । परिव्राजकस्यानवशिष्टत्वेन चतुर्णामुपदिष्टत्वाविशेषोऽतःशब्दार्थः । सामान्यनिर्देशे हेतुमाह—चतुर्णामिति । अप्रतिषेधाच्चेति च्छेदः । नन्वाश्रमान्तराणां कर्मार्थित्वात्तत्रैव व्यापृतत्वान्न ब्रह्मसंस्थतायां सामर्थ्यमस्ति परिव्राजकस्य तु निर्व्यापारस्य ब्रह्मसंस्थता सुकरेत्यत आह—स्वकर्मेति । ननु परिव्राजके ब्रह्मसंस्थशब्दो रूढो गवादिशब्दवत् । तन्नासावाश्रमान्तरमाक्रन्दति तत्राऽऽह—न चेति । निमित्तमादाय प्रवृत्तत्वेऽपि किमिति रूढिर्न स्यादित्याशङ्क्याऽऽह—न हीति । नन्वेष शब्दो नैमित्तिकोऽपि परिव्राजकमात्रमधिकरोति । तत्रैव निमित्तस्य

---

१ क. ङ. °तायाः सा° । २ ख. घ. ङ. च. ञ. ठ. ड. ढ. °णि स्थि° । ३ क. °तिमवोचाम । य° । ४ ख. ङ. ञ. ठ. ड. ढ. °णि स्थि° । ५ ङ. ड. °स्य नि° । ६ क. घ. ङ. ठ. ढ. °कोचका° । ७ ग. ट. °रीयव्या° । ८ ग. ट. तत्र स चाऽऽश्र° ।

सत्यात्तत्राऽऽह--सर्वेषां चेति । ननु पङ्कजादिशब्दा निमित्तमस्तीत्येतावता नेन्दीवरादौ वर्तन्ते किंतु तामरसादिमात्रं विषयी कुर्वन्ति । तथा ब्रह्मसंस्थशब्दो निमित्तवत्यपि गृहस्थादावनवस्थितः परिव्राजकमेव परं गोचरयेदत आह—यत्रेति । ब्रह्मसंस्थशब्दं निरोद्धुमयुक्तामिति संबन्धः ।

न च पारिव्राज्याश्रमधर्ममात्रेणामृतत्वम् । ज्ञानानर्थक्यप्रसङ्गात् । पारिव्राज्यधर्मयुक्तमेव ज्ञानममृतत्वसाधनमिति चेन्न । आश्रमधर्मत्वाविशेषात् । धर्मो वा ज्ञानविशिष्टोऽमृतत्वसाधनमित्येतदपि सर्वाश्रमधर्माणामविशिष्टम् । न च वचनमस्ति परिव्राजकस्यैव ब्रह्मसंस्थस्य मोक्षो नान्येषामिति । ज्ञानान्मोक्ष इति च सर्वोपनिषदां सिद्धान्तः । तस्माद्य एव ब्रह्मसंस्थः स्वाश्रमविहितकर्मवतां सोऽमृतत्वमेतीति ।

रूढिपक्षे दोषान्तरमाह—न चेति । धर्मसहितस्य ज्ञानस्य ज्ञानसहितस्य वा धर्मस्यामृतत्वसाधनत्वान्न ज्ञानानर्थक्यमित्याशङ्क्याऽऽद्यपक्षमनुवदति—पारिव्राज्येति । पारिव्राज्यधर्मेणैवेति नायं नियमो गृहस्थादिधर्माणामप्याश्रमधर्मत्वेन तुल्यत्वात्तद्विशिष्टज्ञानममृतत्वहेतुरित्यपि वक्तुं सुकरत्वादित्यर्थः—नाऽऽश्रमेति । द्वितीयं दूषयति—धर्मो वेति । यदि परिव्राजकधर्मो ज्ञानविशिष्टो मुक्तिहेतुरित्युच्यते तदेतदपि मुक्तिहेतुत्वं सर्वाश्रमधर्माणां ज्ञानविशिष्टानामविशिष्टम् । तथा च न रूढिपक्षेऽपि परिव्राजकस्यैव ज्ञानान्मुक्तिरित्यर्थः । इतश्च परिव्राजकस्यैव मुक्तिभाक्त्वमसिद्धमित्याह—न चेति । मा तर्हि कस्यचिदपि मुक्तिर्भूदिति तत्राऽऽह—ज्ञानादिति । ब्रह्मसंस्थवाक्यार्थमुपसंहरति—तस्मादिति । परिव्राजकस्यैवामृतत्वमित्यनियमाज्ज्ञानादेव तदिति च नियमादित्यर्थः ।

न । कर्मनिमित्तविद्याप्रत्ययोर्विरोधात् । कर्त्रादिकारककियाफलभेदप्रत्ययवत्त्वं हि निमित्तमुपादायेदं कुर्विदं मा कार्षीरिति कर्मविधयः प्रवृत्ताः । तच्च निमित्तं न शास्त्रकृतम् । सर्वप्राणिषु दर्शनात् । सदेकमेवाद्वितीयमात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमिति शास्त्रजन्यः प्रत्ययो विद्यारूपः स्वाभाविकं क्रियाकारकफलभेदप्रत्ययं कर्मविधिनिमित्तमनुपमृद्य न जायते । भेदाभेदप्रत्ययोर्विरोधात् । न हि तैमिरिकद्विचन्द्रादिभेदप्रत्ययमनुपमृद्य तिमिरापगमे चन्द्राद्येकत्वप्रत्यय उपजायते । विद्याविद्याप्रत्ययोर्विरोधात् । तत्रैवं सति यं भेदप्रत्ययमुपादाय कर्मविधयः प्रवृत्ताः स यस्योपमर्दितः सदेक-

---

१ ग. ट. °वत्यपि । २ ख. ग. ङ. ढ. °स्माद्यो ब्रं° । ३ घ. च. ठ. ड. °मेवान्सोऽमृ° । ४ क. ट. °र्भूयादि° ।

मेवाद्वितीयं तत्सत्यं विकारभेदोऽनृतमित्येतद्वाक्यप्रमाणजनितेनैकत्वप्रत्ययेन स सर्वकर्मभ्यो निवृत्तो निमित्तनिवृत्तेः, स च निवृत्तकर्मा ब्रह्मसंस्थ उच्यते, स च परिव्राडेवान्यस्यासंभवात् ।

ब्रह्मसंस्थः समुच्चयानुष्ठायीति वृत्तिकारमतं निराकरोति—न कर्मेति। कर्मनिमित्तप्रत्ययस्य शुद्धब्रह्मात्मतासाक्षात्कारस्य च मिथो विरोधान्न समुच्चयसिद्धिरिति । वस्तुसंग्रहवाक्यं विवृणोति—कर्त्रादीति । कर्मविधयो निषेधाश्चेति द्रष्टव्यम् । तथाऽपि प्रत्ययत्वाविशेषात्कारकाकारकविधिनिषेधयोर्न विरोधोऽस्तीत्याशङ्क्याऽऽह—तत्रेति । प्रत्ययत्वेऽपि शास्त्रीयाशास्त्रीयतया विद्याविद्याभावेन विरोधोऽस्तीत्यर्थः । सति विरोधे किं स्यादत्राऽऽह—स्वाभाविकमिति । विद्यारूपः प्रत्यय इति पूर्वेण संबन्धः । तत्रोक्तमेव हेतुं स्मारयति—भेदेति । तत्र लोकप्रसिद्धमुदाहरणमाह—न हीति । भेदाभेदप्रत्ययोर्विद्याविद्यात्मनोर्विरोधेन समुच्चयासंभवात्तदनुष्ठायी ब्रह्मसंस्थो न भवति चेत्कस्तर्हि ब्रह्मसंस्थः स्यादत्राऽऽह—तत्रेति । उक्तरीत्या समुच्चययोगे सतीति यावत् ।

अन्यो ह्यनिवृत्तभेदप्रत्ययः सोऽन्यत्पश्यञ्शृण्वन्मन्वानो विजानन्निदं कृत्स्नेदं प्राप्नुयामिति हि मन्यते । तस्यैवं कुर्वतो न ब्रह्मसंस्थता । वाचाऽऽरम्भणमात्रविकारानृताभिसंधिप्रत्ययत्वात्। न चासत्यमित्युपमर्दिते भेदप्रत्यये सत्यमिदमनेन कर्तव्यं मयेति प्रमाणप्रमेयबुद्धिरुपपद्यते । आकाश इव तलमलबुद्धिर्विवेकिनः । उपमर्दितेऽपि भेदप्रत्यये कर्मभ्यो न निवर्तते चेत्प्रागिव भेदप्रत्ययोपमर्दनादेकत्वप्रत्ययविधायकं वाक्यमप्रमाणीकृतं स्यात् । अभक्ष्यभक्षणादिप्रतिषेधवाक्यानां प्रामाण्यवद्युक्तमेकत्ववाक्यस्यापि प्रामाण्यम् । सर्वोपनिषदां तत्परत्वात् ।

अन्यस्य गृहस्थादेर्ब्रह्मसंस्थतासंभवमुक्तं साधयति—अन्यो हीति । वाचाऽऽरम्भणमात्रे विकारेऽनृते शरीरादौ ब्राह्मणोऽहमित्याद्यभिसंधानरूपो मिथ्याभिनिवेशात्मको यः प्रत्ययस्तद्वत्त्वादिति हेत्वर्थः । ननु ब्रह्मविदोऽपि संस्कारवशाद्द्वैतसत्यत्वाभिनिवेशपूर्वकं कर्मप्रवृत्तिसंभवान्न ब्रह्मसंस्थता सुप्रतिपाद्येत्यत आह—न चेति । असत्यमिदमिति विवेकेन सत्यत्वाभिनिवेशे शिथिलीकृते पुनः सत्यत्वाभिनिवेशेन न प्रवृत्तिरुपपद्यते । आभासरूपौ तु भेदबुद्धिर्न कर्मप्रवृत्तिहेतुरित्यर्थः । अद्वैतज्ञानवतो निमित्तनिवृत्त्या कर्मनिवृत्तिरवश्यंभाविनीत्युक्तम् । विपक्षे दोषमाह—उपमर्दितेऽपीति ।

---

१ क. ख. अ. °न यः सर्वे° । २ अ. स्यात्तत्रा । ३ छ. उक्तनीत्या । ४ ख. ङ. ञ. ड. ढ. °संधप्र° । ५ ग. ट. °मेये बु° । ६ क. ग. च. ठ. ड. ढ. °रुत्पद्य° । ७ ग. घ. ङ. च. ठ. ड. ढ. °लबु° । ८ ठ. ड. °णीभूतं । ९ ख. ञ. °संस्थान° । १० ख. छ. ञ. °पाद्भेद° ।

एकत्वप्रत्ययजनकं शास्त्रं न भवत्येव प्रमाणं पूर्वप्रवृत्तभेदप्रत्ययविरोधादिति मतमाशङ्क्याऽऽह—अभक्ष्येति। यथा न कलञ्जं भक्षयेदित्यादि शास्त्रं पूर्वप्रवृत्तकलञ्जादिभक्षणप्रत्ययविरोधेऽपि प्रमाणं रागादिदोषात्तस्य प्रत्ययस्याप्रमाणत्वात्तथैव भेदप्रत्ययस्याविद्योत्थत्वात्प्रामाण्यासंभवात्तद्विरोधेऽप्यद्वैतशास्त्रस्य युक्तमेव प्रामाण्यमित्यर्थः। कार्यपरत्वादद्वैते तात्पर्याभावात्कुतस्तच्छास्त्रस्य प्रामाण्यमित्याशङ्क्याऽऽह—सर्वोपनिषदामिति। उपक्रमोपसंहारैकरूप्यादिषड्विधतात्पर्यलिङ्गदर्शनादद्वैते तात्पर्यं तासामवसीयते तद्युक्तमद्वैतशास्त्रस्य स्वार्थे प्रामाण्यमित्यर्थः।

कर्मविधीनामपप्रामाण्यप्रसङ्ग इति चेत्। न। अनुपमर्दितभेदप्रत्ययवत्पुरुषविषये प्रामाण्योपपत्तेः स्वप्नादिप्रत्यया इव प्राक्तबोधात्। विवेकिनामकरणात्कर्मविधिप्रामाण्योच्छेद इति चेन्न। काम्यविध्यनुच्छेददर्शनात्। न हि कामात्मता न प्रशस्तेत्येवं विज्ञानवद्भिः काम्यानि कर्माणि नानुष्ठीयन्त इति काम्यकर्मविधय उच्छिद्यन्तेऽनुष्ठीयन्त एव कामिभिरिति। तथा ब्रह्मसंस्थैर्ब्रह्मविद्भिर्नानुष्ठीयन्ते कर्माणीति न तद्विधय उच्छिद्यन्तेऽब्रह्मविद्भिरनुष्ठीयन्त एवेति।

भेदालम्बनकर्मविधिविरोधान्न द्वैतशास्त्रं स्वार्थे मानमिति शङ्कते—कर्मविधीनामिति। यथा स्वप्नप्रत्ययो गन्धर्वनगरादिप्रत्ययश्च प्राक्तत्त्वज्ञानादृजुं पुरुषमधिकृत्य प्रमाणं तथा कर्मविधीनामप्यविदुषि पुरुषे प्रामाण्यसंभवान्नाद्वैतशास्त्रस्य तद्विरोधोऽस्तीति परिहरति—नानुपमर्दितेति। "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति स्मृतेस्तत्त्वदर्शिनां कर्मभ्यः सकाशादुपरमे सत्यन्येऽप्युपरंस्यन्ते। तथा च कर्मविधिविरोधतादवस्थ्यमिति शङ्कते—विवेकिनामिति। प्रकृतिपरवशत्वाल्लोकस्य नासौ विवेकी प्रकृतिमनुवर्तते। "प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति" इति स्मृतेः। ततो ब्रह्मविदां नैष्कर्म्येऽपि न कर्मविधीनामप्रामाण्यप्रसक्तिरित्युत्तरमाह—न काम्येति। तदेव प्रपञ्चयति—न हीति। इति नोच्छिद्यन्त इति शेषः। अस्तु प्रस्तुते किमायातं तदाह—तथेति। अनुष्ठीयन्त एवेति तद्विधीनामनुच्छित्तिरिति वाक्यशेषः।

परिव्राजकानां भिक्षाचरणादिवदुत्पन्नैकत्वप्रत्ययानामपि गृहस्थादीनामग्निहोत्रादिकर्मानिवृत्तिरिति चेन्न। प्रामाण्यचिन्तायां पुरुषप्रवृत्तेरदृष्टान्तत्वात्। न हि नाभिचरेदिति प्रतिषिद्धमप्यभिचरणं कश्चित्कुर्वन्दृष्ट इति शत्रौ द्वेषरहितेनापि विवेकिनाऽभिचरणं क्रियते। न च कर्मविधिप्रवृत्तिनिमित्ते भेद-

---

१ ख. °वेकिभ्र°। २ क. ग. ट. प्रवृत्तिम°। ३ क. प्रकृते।

प्रत्यवे बाधितेऽग्निहोत्रादौ प्रवर्तकं निमित्तमस्ति, परिव्राजकस्येव भिक्षाचरणादौ बुभुक्षादि प्रवर्तकम् ।

अद्वैतवादिनोऽवश्यंभाविनी कर्मनिवृत्तिरित्युक्तं दृष्टान्तेन विघटयन्नाशङ्कते-परिव्राजकानामिति । अद्वैतधीस्वभावालोचनायां भिक्षाटनादिप्रवृत्तिरप्यघटमानेवेति मन्वानः समाधत्ते— न प्रामाण्येति । समुच्चयस्य प्रामाणिकत्वनिरूपणायां प्रत्ययाभासमूलस्य प्रवृत्त्याभासस्य नोदाहरणत्वम् । अग्निहोत्रादिप्रवृत्तेरप्याभासत्वे प्रामाणिकसमुच्चयसिद्धान्तहानिरतो नैतच्चोद्यमित्यर्थः । एतदेव दृष्टान्तेन स्पष्टयति—न हीति । तद्वदविवेकिना कर्म क्रियमाणं दृष्टमिति विवेकिभिरपि तन्न क्रियते । भिक्षाटनादिप्रवृत्त्याभासस्त्वप्रामाणिकोऽग्निहोत्रादिप्रवृत्तेर्नोदाहरणमिति शेषः । इतश्च नेदमुदाहरणमित्याह—न चेति ।

इहाप्यकरणे प्रत्यवायभयं प्रवर्तकमिति चेत् । न । भेदप्रत्ययवतोऽधिकृतत्वात् । भेदप्रत्ययवान्[1] उपमर्दितभेदबुद्धिर्[2]विद्वान्[3] यः स कर्मण्यधिकृत इत्यवोचाम । यो ह्यधिकृतः कर्मणि तस्य तदकरणे प्रत्यवायो न निवृत्ताधिकारस्य गृहस्थस्येव ब्रह्मचारिणो विशेषधर्माननुष्ठाने । एवं तर्हि सर्वः स्वाश्रमस्थ उत्सन्नैकत्वप्रत्ययः परिव्राडिति चेत् । न । स्वस्वामित्वभेदबुद्ध्यनिवृत्तेः । कर्मार्थत्वाच्चेतराश्रमाणाम्[4] । " अथ कर्म कुर्वीय " इति श्रुतेः । तस्मात्स्वस्वामित्वाभावाद्भिक्षुरेक एव परिव्राट्[5] । न गृहस्थादिः ।

अग्निहोत्रादावपि प्रवर्तकमस्तीति शङ्कते—इहापीति । अकरणकृतं प्रत्यवायाख्यं भयमविवेकिनो विवेकिनो वेति विकल्प्याऽऽद्यमङ्गी करोति-न भेदेति । कर्मणि भेदबुद्धिमतोऽधिकृतत्वेऽपि तस्य तदकरणे किं स्यादित्याशङ्क्याऽऽह—यो हीति । द्वितीयं दूषयति-न निवृत्तेति । विवेकिनो निवृत्ताधिकारस्य प्रत्यवायाप्राप्त्या कर्मसु प्रवर्तकाभावात्कर्मभ्यो निवृत्तिरूपं पारिव्राज्यं चेदतिप्रसङ्गस्तर्हीति शङ्कते—एवं तर्हीति । कर्मसाधनं स्वयज्ञोपवीतादि त्यज्यते न वा । त्यज्यते चेन्न स्वाश्रमधर्मः । ततो यज्ञोपवीताद्यन्तरेण गार्हस्थ्यादिभावासंभवात् । न त्यज्यते चेन्न पारिव्राज्यप्राप्तिः । साधनसंग्रहस्य साध्यार्थत्वादिति परिहरति— न स्वस्वामित्वेति । इतश्चाऽऽश्रमान्तरेषु न पारिव्राज्यमित्याह— कर्मार्थत्वादिति । जायापुत्रवित्तसंपत्त्यानन्तर्यं श्रुतावथशब्दार्थः । गृहस्थादिषु स्वाश्रमस्थेष्वेव पारिव्राज्यस्य दुर्वचत्वे फलितमाह—

---

१ क. ग. ट. °किनां क° । २ ख. ञ. °षः । कृत° । ३ ङ. °द्धिरविद्य° । ४ ठ. ड. °य सर्वैक° । ५ क. ख. ञ. ङ. °कप्र° । ६ ख. ञ. °णामीश्वरोऽथ । ७ क. ग. च. ट. °स्माच्च स्वस्वा° । ८ ङ. ठ. ड. ढ. °रेव । ९ ख. छ. ञ. °नं स्वैर्यं° ।

तस्मादिति । विवेकवशाद्यज्ञोपवीतादौ स्वशब्दार्थे स्वामित्वबुद्ध्यभावादिति यावत् ।

एकत्वप्रत्ययविधिजनितेनैवंप्रत्ययेनैं विधिनिमित्तभेदप्रत्ययस्योपमर्दितत्वाद्यमनियमाद्यनुपपत्तिः परिव्राजकस्येति चेत् । न । बुभुक्षादिनैकत्वप्रत्ययात्प्रच्यावितस्योपपत्तेर्निवृत्त्यर्थत्वात् । न च प्रतिषिद्धसेवाप्राप्तिः । एकत्वप्रत्ययोत्पत्तेः प्रागेव प्रतिषिद्धत्वात् । न हि रात्रौ कूपे कण्टके वा पतित उदितेऽपि सवितरि पतति तस्मिन्नेव । तस्मात्सिद्धं निवृत्तकर्मा भिक्षुक एव ब्रह्मसंस्थ इति ।

यत्तु परिव्राजकस्य निवृत्ताधिकारस्य प्रत्यवायोत्पत्तिरिति तत्रानिष्टापत्तिमाशङ्कते—एकत्वेति । तद्विषयप्रत्ययस्य विधिरुत्पादकं तत्त्वमस्यादिवाक्यं तज्जनितेनैकत्वविषयेण प्रत्ययेनेति यावत् । तथा च यथेष्टचेष्टाप्रसक्तिरिति शेषः । ज्ञानिनो वैधं यमादि नास्ति तत्प्रवृत्तिस्तु संस्कारवशादित्याशयेनाऽऽह—न बुभुक्षादिनेति । यो हि दृष्टेन दोषेण तत्त्वज्ञानात्कर्मचित्प्रच्युतिमापादितस्तस्य संस्कारवशाद्यमानियमानुष्ठानमुपपद्यते । तस्य दोषकृततत्त्वप्रच्युतिप्रसूतानियतचेष्टानिवृत्त्यर्थत्वेनावश्यानुष्ठेयत्वात् । तथा च न यथेष्टचेष्टापत्तिरित्यर्थः । इतश्च विदुषो वैधप्रवृत्त्यभावेऽपि यथेष्टचेष्टा नास्तीत्याह—न चेति । अविदुषोऽपि न यथेष्टचेष्टा विदुषस्तु सा कुतस्त्येति दृष्टान्तेन स्फुटयति—न हीति । अन्येषां ब्रह्मसंस्थत्वासंभवे फलितमुपसंहरति—तस्मादिति

यत्पुनरुक्तं सर्वेषां ज्ञानैवर्जितानां पुण्यलोकतेति । सत्यमेतत् । यच्चोक्तं तपःशब्देन परिव्राडप्युक्त इति । एतदसत् । कस्मात् । परिव्राजकस्यैव ब्रह्मसंस्थतासंभवात् । स एव ह्यवशेषित इत्यवोचाम । एकत्वविज्ञानवतोऽग्निहोत्रादिवत्तपोनिवृत्तेश्च । भेदबुद्धिपत एव हि तपःकर्तव्यता स्यात् । एतेन कर्मच्छिद्रे ब्रह्मसंस्थतासामर्थ्यम् । अप्रतिषेधश्च प्रत्युक्तः । तथा ज्ञानवानेव निवृत्तकर्मा परिव्राडिति ज्ञानवैयर्थ्यं प्रत्युक्तम् ।

परोक्तमनूद्याङ्गी करोति—यत्पुनरिति । उक्तमर्थान्तरमनुवदति—यच्चेति । किं परिव्राजकस्य ज्ञानहीनस्याऽऽश्रममात्रनिष्ठस्य तपःशब्देनोपादानमाहो ज्ञानवतोऽपीति विकल्प्याऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—एतदसादिति । ज्ञानवतोऽपि तपस्वि-

---

१ क. °न मे° । २ ङ. ढ. °न मे° । ३ ख. ङ. ञ. ठ. °तिषेधसे° । ४ क. ग. ट. °यानभिप्रा° । ५ क. ग. ट. ण °ह । बु° । ६ ठ. ड. °नविव° । ७ क. ग. ठ. इत्येतत् । त° । ८ घ. ङ. ढ. °ति । त° । ९ क. ट. °होस्विज्ज्ञान° । १० क. ग. ट. °ति । त° ।

त्वात्तपःशब्देनोपादानमुचितमिति शङ्कित्वा प्रत्याह—कस्मादित्यादिना । तपःशब्देन नासौ गृहीत इति शेषः । तस्य च ज्ञानवतोऽवशिष्टत्वं प्रागेवोपदिष्टमित्याह—स एवेति । इतश्च परमहंसपरिव्राजको न तपःशब्देन परामृष्ट इत्याह—एकत्वेति । तदेव स्फोरयति—भेदेति । यत्तु कर्मच्छिद्रे गृहस्थादेरपि ब्रह्मसंस्थतासामर्थ्यमिति तत्प्रत्याह—एतेनेति । अनिवृत्तभेदप्रत्ययस्य ब्रह्मसंस्थत्वासंभवेनेति यावत् । सामर्थ्यं प्रत्युक्तमिति संबन्धः । यत्तु चतुर्णामपि ब्रह्मसंस्थतायां अप्रतिषेध इति तत्राऽऽह—अप्रतिषेधश्चेति । एकत्वोपदेशेन भेदप्रत्ययनिरासादनिवृतभेदप्रत्ययस्यार्थाद्ब्रह्मसंस्थता प्रतिषिद्धेत्यर्थः । पारिव्राज्यमात्रेणामृतत्वे ज्ञानवैयर्थ्यमुक्तं परिहरति—तथेति ।

यत्पुनरुक्तं यववराहादिशब्दवत्परिव्राजके न रूढो ब्रह्मसंस्थशब्द इति तत्परिहृतम् । तस्यैव ब्रह्मसंस्थतासंभवान्नान्यस्येति । यत्पुनरुक्तं रूढशब्दा निमित्तं नोपाददत इति । तन्न । गृहस्थतक्षपरिव्राजकादिशब्ददर्शनात् । गृहस्थितिपारिव्राज्यतक्षणादिनिमित्तोपादाना अपि गृहस्थपरिव्राजकौवाश्रमिविशेषे विशिष्टजातिमति च तक्षेति रूढा दृश्यन्ते शब्दाः । न यत्र यत्र तानि निमित्तानि तत्र तत्र वर्तन्ते । असिद्ध्यभावात् । तथेहापि ब्रह्मसंस्थशब्दो निवृत्तसर्वकर्मतत्साधनपरिव्राडेकविषयेऽत्याश्रमिणि परमहंसाख्ये वृत्त इह भवितुमर्हति । मुख्यामृतत्वफलश्रवणात् । अतश्चेदमेवैकं वेदोक्तं पारिव्राज्यम् । न यज्ञोपवीतत्रिदण्डकषण्डत्वादिपरिग्रहं इति मुण्डोऽपरिग्रहोऽसङ्ग इति च ।

चोद्यान्तरमनूद्योक्तं परिहारं स्मारयति—यत्पुनरुक्तमिति । तत्र रूढोऽयं शब्द इति शेषं पञ्चम्या सूचयति । चोद्यान्तरमनूद्य दूषयति—यत्पुनरित्यादिना । आदिपदेन पङ्कजादिशब्दो गृह्यते । उक्तं प्रपञ्चयति—गृहस्थितीति । इहापीति प्रकृतवाक्योपादानम् । प्रकृते परमहंसे परिव्राजके ब्रह्मसंस्थपदमित्यत्र हेतुमाह—मुख्येति । इतश्च पारमहंस्यमेव श्रौतमित्याह—अतश्चेति । एवकारार्थं कथयति—न यज्ञोपवीतेति । इतिशब्दः संन्यासप्रकरणे तथाविधश्रुत्यमात्रप्रदर्शनार्थः ।

---

१ ग. ङ. ठ. ड. ण. °क्तं वरा° । २ ग. ङ. ठ. °ति परि° । ३ ग. घ. ङ. च. ट. ठ. °तमेतत् । त° । ४ ख. च. ञ. ठ. ड. ढ. °रूढिश° । ५ ख. ङ. ञ. ढ. °तिप्रव्रज्यात° । ६ ठ. ङ. °काश्र° । ७ क. ग. ट. °श्रमवि° । ८ क. ग. घ. च. ट. ठ. च गृहस्थ इति परिव्राजक इति च त° । ९ घ. °ति च निरू° । ठ. ति च. रू° । १० ख. ञ. °त्र निमि° । ११ ङ. ड. ढ. °त्र व° । १२ ख. ञ. °षयेऽत्या° । ग. च. ङ. ढ. °षयेऽन्त्याश्र° । १३ ख. ङ. ञ. ट. ठ. °ख्ये प्रवृ° । १४ क. ग. घ. च. ट. ठ. °हवान्मुण्डोऽ° । १५ ख. घ. ञ. °ति । श्रु° । १६ क. °शब्दा गृह्यन्ते । ङ° ।

श्रुतिरित्याश्रमिभ्यः परमं पवित्रमित्यादि च श्वेताश्वतरीयं[1] निस्तुतिर्निर्नमस्कार इत्यादिस्मृतिभ्यश्च । 'तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः । तस्मादलिङ्गो धर्मज्ञोऽव्यक्तलिङ्गः' इत्यादिस्मृतिभ्यश्च ।

ब्रह्मसंस्थशब्दस्य परमहंसविषयत्वे श्रुत्यन्तरं संवादयति—श्रुतिरिति । अत्याश्रमिभ्यः पूर्वाश्रमत्रयमतीत्य सर्वकर्म त्यक्त्वा स्थितेभ्यः परमहंसपरिव्राजकेभ्य इति यावत् । परमं पवित्रं निरतिशयपरिशुद्धिकारणं परमपुरुषार्थसाधनं सम्यग्ज्ञानं प्रोवाचेत्यर्थः । स्मृतिभ्यश्च यथोक्तं पारिव्राज्यं सिध्यतीति शेषः । अनाशिषमनारम्भमित्यादिवाक्यसंग्रहार्थमादिपदम् । कर्मणो बन्धहेतुत्वं तच्छब्दार्थः । लिङ्गस्य धर्मकारणत्वराहित्यं तस्मादित्युक्तम् । अलिङ्गो धर्मध्वजित्वरहितः । धर्मज्ञो यथावद्धर्मानुष्ठाता । अधर्मज्ञ इति वा पाठः । धर्मविचारनिष्ठारहितस्तत्रासारत्वप्रत्ययवानित्यर्थः । अलिङ्ग इत्युक्तेऽनाश्रमित्वमाशङ्क्याऽऽह—अव्यक्तेति । न व्यक्तं दम्भेन गृहीतं लिङ्गमाश्रमित्वमस्यास्तीत्यव्यक्तलिङ्गः । किंत्वदम्भेन श्रुतिस्मृत्युक्तप्रकारेण तदस्यास्तीत्यर्थः । आदिपदं त्यज धर्ममधर्मं चेत्यादि ग्रहीतुम् । अत्रापि पूर्वपदान्वयः ।

यत्तु सांख्यैः कर्मत्यागोऽभ्युपगम्यते । क्रियाकारकफलभेदबुद्धेः सत्यत्वाभ्युपगमात् । तन्मृषा । यच्च बौद्धैः शून्यताभ्युपगमादकर्तृत्वमभ्युपगम्यते । तदप्यसत् । तदभ्युपगन्तुः सत्त्वाभ्युपगमात् । यच्चाङ्गैरलसतयाऽकर्तृत्वाभ्युपगमः सोऽप्यसत्कारकबुद्धेरनिवर्तितत्वात्प्रमाणेन । तस्माद्वेदान्तप्रमाणजनितैकत्वप्रत्ययवत एव कर्मनिवृत्तिलक्षणं पारिव्राज्यं ब्रह्मसंस्थत्वं चेति सिद्धम् । एतेन गृहस्थस्यैकत्वाविज्ञाने सति पारिव्राज्यमर्थसिद्धम् ।

ननु कर्मनिवृत्तिमुपदिशता त्वया सांख्यमतमेवाऽऽश्रितं तेनापि शरीरादिव्यापारोपरमद्वारा ध्याननिष्ठतायाः स्वीकृतत्वात्तत्राऽऽह—यच्चेति । न हि तन्मते कूटस्थात्मधिया नैष्कर्म्यं युक्तम् । क्रियाकारकादिबुद्धेराविवेकस्य च सत्यत्वेन ज्ञानमात्रापनोद्यत्वायोगात् । न च सर्वव्यापारोपरमसंभवो मनोबुद्ध्यादीनां तच्छीलत्वात् । न हि क्षणमपीत्यादिस्मृतेः । अतः सांख्यवचो मिथ्यैवेत्यर्थः । ननु बौद्धेनापि नैरात्म्यमिच्छता नैष्कर्म्यमिष्टम् । तथा च कर्मत्यागमुपदिशता त्वयाऽपि तन्मतमेवानुमोदितं नेत्याह—यच्चेति । तदभ्युपगन्तुरित्यत्राकर्तृत्वं तच्छब्दार्थः । " दुःखमित्येव

---

१ क. ग. च. ठ. °ये न स्तु° । २ क. ग. च ट °तिर्न नम° । ३ घ. ठ. सत्यत्वाभ्यु° । ४ ख. च. °सन् । कार° । यद्यप्ययमेव पाठः समीचीन इत्यापाततः प्रतिभाति तथाऽपि यच्चाङ्गैरिति नपुंसकयच्छब्दप्रयोगान्न संगच्छते । उपरिस्थापितलापनिका त्वित्थं सोऽपि प्रमाणेनाविद्यमानकारकबुद्धेरनिवर्तितत्वादेवातस्तदसदिति । असाविति पाठे यदित्यव्ययं वा ज्ञेयम् । ५ क. ग. ट. एतत्कर्म° । ६ ख घ. ङ. च छ. °णं ब्रह्मसंस्थत्वं पारिव्राज्यं चेति । ७ क. °निष्ठायाः ।

यत्कर्म कायक्लेशभयात्त्यजेत् " इति स्मृतेरालस्योपहतैरज्ञैरकर्तृत्वमुपेयते । भवताऽपि कर्म त्यजता तन्मतमाहृतमित्याशङ्क्याऽऽह--यच्चाज्ञैरिति । अकर्तृत्वाभ्युपगम इति च्छेदः । ते हि मोहादेव कर्म त्यजन्तो न तत्फलं लभन्ते । "स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् " इति स्मृतेः । वयं तु प्रमाणवशादेव कर्म त्यजन्तो न व्यामूढपक्षमाद्रियामहे । तस्मान्नैष्कर्म्यं श्रुतिस्मृतिप्रसिद्धमप्रत्याख्येयमिति भावः । पक्षान्तरे नैष्कर्म्योक्तेरमूलत्वे स्थिते फलितमुपसंहरति--तस्मादिति । यत्तु कैश्चिदैकाश्रम्यमाश्रितं तत्प्रत्यादिशति--एतेनेति । एकत्वविज्ञानेन भेदप्रत्ययस्योपमर्दितत्वोपपादनेनेति यावत् । एकत्वविज्ञानं परोक्षं विवक्षितम् । अपरोक्षस्य पारिव्राज्यमन्तरेणायोगात् । तस्योपरतिशब्दितस्य शमादिवत्साधनत्वश्रुतेरिति द्रष्टव्यम् ।

नन्वग्न्युत्सादनदोषभाक्स्यात्परिव्रजन् । "वीरहा वा एष देवानां योऽग्निमुद्वासयते " इति श्रुतेः । नँ । दैवोत्सादितत्वादुत्सन्न एव हि स एकत्वदर्शने जाते । अपागादग्नेरग्नित्वमिति श्रुतेः । अतो न दोषभाग्गृहस्थः परिव्रजन्निति ॥ १ ॥

गृहस्थस्य पारिव्रज्ये श्रुतिविरोधं शङ्कते--नन्विति । ऐकात्म्यमेव सत्यं द्वैतमसत्यमिति विवेके जाते सत्यग्न्यादेरवस्तुत्वाध्यवसायात्तदभिनिवेशशैथिल्यान्न तत्त्यागे दोषप्राप्तिरिति दूषयति--नँ दैवेति । सम्यग्ज्ञाने सत्यग्न्यादेरुत्सन्नत्वे मानमाह--अपागादिति । गृहस्थस्यापि विवेकवतो वैराग्यद्वारा युक्तं पारिव्राज्यमित्याह--अत इति । इतिशब्दो ब्रह्मसंस्थवाक्यव्याख्यानसमाप्त्यर्थः ॥ १ ॥

यत्संस्थोऽमृतत्वमेति तन्निरूपणार्थमाह--

प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त भूर्भुवः स्वरिति ॥ २ ॥

प्रजापतिर्विराट् कश्यपो वा लोकानुद्दिश्य तेषु साराजिघृक्षयाऽभ्यतपदभितापं कृतवान्ध्यानं तपः कृतवानित्यर्थः । तेभ्योऽभितप्तेभ्यः सारभूता त्रयी विद्या संप्रास्रवत्प्रजापतेर्मनसि प्रत्यभादित्यर्थः । तामभ्यतपत् । पूर्ववत् । तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्[७] भूर्भुवः स्वरिति व्याहृतयः ॥ २ ॥

---

१ क. ट. °व्यामोहमू° । २ ख. ञ. श्रुतिरि° । ३ ख. ञ. ड. न वेदेनवो° । क. घ. ङ. च. ठ ढ. न दैवेनैवो° । ४ क. ग. ट. °त्राज्यश्रु° । ५ ञ. ण. न वेदेति । ६ ख. °भितस्तेभ्यः° । ७ ञ. °वन्भूर्भु° । ८ ग. घ. ङ. च. ट. ठ. ड. ढ. °न्त व्या° ।

किं तद्ब्रह्मेत्याकाङ्क्षायामाह—यत्संस्थ इति । लोकानामितो दग्धतयाऽमितापप्रतिमासं व्यवच्छिनत्ति—ध्यानमिति । द्रवात्मत्वाभावे कथं प्रस्रवणं अत्र्याः स्यादित्याशङ्क्याऽऽह—प्रजापतेरिति । पूर्ववदिति । त्रयीविद्यासारजिघृक्षयाऽऽहोचितवानित्यर्थः ॥ २ ॥

तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ओँकारः समास्रवत्तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक्संतृण्णोंकार एवेदꣳ सर्वमोंकार एवेदꣳ सर्वम् ॥ ३ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य त्रयोविंशः खण्डः ॥ २३ ॥

तान्यक्षराण्यभ्यतपत्तेभ्योऽभितप्तेभ्य ओँकारः संप्रास्रवत्तद्ब्रह्म, कीदृशमित्याह—तद्यथा शङ्कुना पर्णनालेन सर्वाणि पर्णानि पत्रावयवजातानि संतृण्णानि निविद्धानि व्याप्तानीत्यर्थः । एवमोंकारेण ब्रह्मणा परमात्मनः प्रतीकभूतेन सर्वा वाक्शब्दजातं संतृण्णा । " अकारो वै सर्वा वाक् " इत्यादिश्रुतेः । परमात्मविकारश्च नामधेयमात्रमित्यत ओंकार एवेदꣳ सर्वमिति । द्विरभ्यास आदरार्थः । लोकादिनिष्पादनकथनमोंकारस्तुत्यर्थमिति ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य त्रयोविंशः खण्डः ॥ २३ ॥

कथं तस्य ब्रह्मशब्दवाच्यत्वमित्याशङ्क्य महत्तरत्वादित्याह—कीदृशमित्यादिना । तत्र ब्रह्मशब्दप्रवृत्तौ हेत्वन्तरं सूचयति—परमात्मन इति । ओँकारावयवस्याकारस्यापि सर्ववाग्व्याप्तिरस्ति किमु वक्तव्यमोंकारस्येति मन्वानः श्रुत्यन्तरमुदाहरति—अकार इति । ओमितीदं सर्वमित्यादिवाक्यमादिपदार्थः । ओंकारव्याप्तत्वेऽपि वाग्जातस्य न तस्य सर्वात्मत्वमाकाशादिपरमात्मविकारस्य पृथगेव विद्यमानत्वादित्याशङ्क्याऽऽह—परमात्मेति । सकलमपि जगत्परमात्मविकारत्वात्तदतिरेकेण नास्ति । स च प्रकृतादोंकारान्नास्तीत्युच्यते । " एतद्वै सत्यकाम परं चापरं च ब्रह्म

---

१ क. °भ्यः सारभूत ओँ°। २ ठ. ड. ढ. °ह्म किंरूपमि°। ३ क. ग. च. ट. °दꣳ किंरूपमि°। ४ ग. घ. ङ. च. ट. ठ. ड. ढ. °नि °वि°। ५ क. ग. घ. च. ट. ठ. ह्मणः प°। ६ ख. ग. घ. च. °निष्यन्दन° । ङ. °निस्पन्दक° । ड. निष्पन्दक° । ढ. °निस्पन्दन° । ढ. ठ. °निष्पन्दन° । ७ क. ग. च. ट. °नमप्योंका° ।

यदोंकारः " इति श्रुतेः । तस्माद्युक्तमोंकारस्य सर्वात्मत्वमित्यर्थः । ॐकारं सर्वात्मकं ब्रह्मरूपमुपासीतेतिविधिसमाप्त्यर्थमितिशब्दः । किमित्योंकारस्य लोकादिद्वारा निष्पत्तिरुच्यते तत्राऽऽह—लोकादीति । स्तुतिश्चोपास्त्यर्था । यत्स्तूयते तद्धीयत इति स्थितेः । तथा च सिद्धमोंकारोपासनममृतत्वफलमिति वक्तुमितिशब्दः ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां द्वितीयाध्यायस्य त्रयोविंशः खण्डः ॥ २३ ॥

(अथ द्वितीयाध्यायस्य चतुर्विंशः खण्डः)।

सामोपासनप्रसङ्गेन कर्मगुणभूतत्वान्निवर्त्योंकारं परमात्मप्रतीकत्वादमृतत्वहेतुत्वेन महीकृत्य प्रकृतस्यैव यज्ञस्याङ्गभूतानि सामहोममन्त्रोत्थानान्युपदिदिक्षन्नाह—

ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवनꣳ रुद्राणां माध्यंदिनꣳ सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनम् ॥ १ ॥

ब्रह्मवादिनो वदन्ति यत्प्रातःसवनं प्रसिद्धं तद्वसूनाम् । तैश्च प्रातःसवनसंबद्धोऽयं लोको वशीकृतः सवनेशानैः । तथा रुद्रैर्माध्यंदिनसवनेशानैरन्तरिक्षलोकः । आदित्यैश्च विश्वैर्देवैश्च तृतीयसवनेशानैस्तृतीयो लोको वशीकृतः । इति यजमानस्य लोकोऽन्यः परिशिष्टो न विद्यते ॥ १ ॥

प्रासङ्गिकं हित्वा प्रकृतमनुसंधत्ते—सामेति । पञ्चविधं सप्तविधं च यज्ञाङ्गीभूतं साम तस्योपासनवचनादोंकारस्य तद्गुणस्य सुतरामेव कर्मगुणत्वे प्राप्ते ततस्तं व्यावर्त्य ब्रह्मप्रतीकत्वात्कैवल्यहेतुत्वेन तमेव महीकृत्य प्रस्तुतयज्ञाङ्गभूतसामादिविज्ञानविधानार्थमुत्तरवाक्यमित्यर्थः । सामहोममन्त्रोत्थानं सामादिज्ञानविधित्सया, तदपरिज्ञाने दोषमाह—ब्रह्मेत्यादिना । तेषां प्रातःसवनेशानत्वेऽपि यजमानस्य का हानिरित्याशङ्क्याऽऽह—तैश्चेति । यथा पृथिवीलोको वसुभिस्तथेति यावत् । अन्तरिक्षलोको वशीकृत इति पूर्वेण संबन्धः । तृतीयो लोको द्युलोकाख्यः । अस्तु तत्तद्देवानां तत्त-

---

१ ख. छ. ण. ह्मस्वरू° । २ क्ष. °र्थ इति° । ३ क. ग. घ. ङ. च. ट. ठ. ड. ढ. °त्वाया-मु° । ४ क. ग. ङ. °बन्धोऽयं । ५ क्ष. °ङ्गभू° । ६ क्ष. °स्थानसा°

लोकवशीकारस्तथाऽपि यजमानस्य लौकित्वे किमायातमित्याशङ्क्याऽऽह—इति यजमानस्येति ॥ १ ॥

क तर्हि यजमानस्य लोक इति स यस्तं न विद्या-
त्कथं कुर्यादथ विद्वान्कुर्यात् ॥ २ ॥

अतः क तर्हि यजमानस्य लोको यदर्थं यजते । न क्वचिल्लोकोऽस्तीत्य-भिप्रायः । " लोकाय वै यजते यो यजते " इति श्रुतेः । लोकाभावे च स यो यजमानस्तं लोकस्वीकरणोपायं साम्नहोममन्त्रोत्थानलक्षणं न विद्यान्न विजानीयात्सोऽज्ञः कथं कुर्याद्यज्ञं न कथंचन तस्य कर्तृत्वमुपपद्यत इत्यर्थः । सामादिविज्ञानस्तुतिपरत्वान्नाविदुषः कर्तृत्वं कर्ममात्रविदः प्रतिषिध्यते । स्तुतये च सामादिविज्ञानस्याविद्वत्कर्तृत्वप्रतिषेधाय चेति हि भिद्येत वाक्य-म् । आद्ये चौषस्तये काण्डेऽविदुषोऽपि कर्मास्तीति हेतुमद्वोचाम । अथैतद्व-क्ष्यमाणं सामाद्युपायं विद्वान्कुर्यात् ॥ २ ॥

पारिशिष्टलोकाभावोऽतःशब्दार्थः । तर्हि देहपातादूर्ध्वमित्येतत् । लोकापेक्षां विनाऽ-पि विधिवशाद्यागो भविष्यतीत्याशङ्क्याऽऽह—लोकायेति । लोकत्रयस्य वस्वाद्यधीनतया यजमानानधीनत्वे तस्य तदधीनत्वार्थं यज्ञाद्यनुष्ठानमित्याशङ्क्याऽऽह—लोकाभावे चेति । अज्ञो यज्ञं स्वर्गादिसाधनीभूतं कथं कुर्यादित्याक्षेपादविद्वत्कर्मानुष्ठाननिन्दापरं वाक्यमित्याशङ्क्याऽऽह—सामादीति । अथेतीदं वाक्यं स्तुत्यर्थं निषेधार्थं च भवि-ष्यति नेत्याह—स्तुतये चेति । इतश्चाविद्वत्कर्तृत्वं निषेद्धुमशक्यमित्याह—आद्ये चेति । मटचीहतेष्वित्यादौ विदुषः संनिधाने तदनुज्ञामन्तरेणाविदुषः कर्म कर्तुमयुक्तम् । प्रत्य-वायप्रसङ्गात् । तत्संनिधौ तु तेनापि क्रियमाणं कर्म न दुष्यतीत्युपपादितमित्यर्थः । अथशब्दो हेत्वर्थः । सामाद्यविज्ञाने यस्माद्यज्ञाद्यकरणमेव प्राप्तं तस्मादित्यर्थः ॥२॥

पुरा प्रातरनुवाकस्योपाकरणाज्जघनेन गार्हपत्यस्यो-
दङ्मुख उपविश्य स वासवꣳ सामाभिगायति ॥ ३ ॥

किं तद्वेद्यमित्याह—पुरा पूर्वं प्रातरनुवाकस्य शस्त्रस्य प्रारम्भाज्जघनेन

---

१ ख. ञ. ण. °स्य लौकिकत्वे° । २ ङ. श्रुतिः । लो° । ३ ख. घ. ञ. °विदुषः कर्तृ° । ४ क. ग. च. ट ठ. °ति भि° । ५ घ. ङ. °स्ये च का° । ६ क. ग. ट. °धेदं । ७ क. ग. ट. निरोद्धुं ।

गार्हपत्यस्य पश्चादुदङ्मुखः सन्नुपविश्य स वासवं वसुदेवत्यं सामाभिगायति ॥ ३ ॥

ज्ञातव्यं सामादि प्रश्नपूर्वकं विवृणोति-किं तदित्यादिना । अप्रगीतमृग्जातं शस्त्रं यत्प्रातःकाले शस्यते प्रातरनुवाकं तस्येति यावत् । उपाकरणादित्यस्यार्थमाह — प्रारम्भादिति । जनयेनेत्येतद्व्याचष्टे-पश्चादिति । स गार्हपत्यस्य पृष्ठत उदग्भागे स्थित्वा वसुदेवताकं सामगानं कृतवानित्यर्थः । स वासवमित्यत्र सशब्दो यजमानविषयः ॥ ३ ॥

लो३कद्वारमपावा३र्णू ३३ पश्येम त्वा वय२ रा
३३३३३ हु३म् आ ३३ ज्या ३ यो ३ आ
३२१११ इति ॥ ४ ॥

लोकद्वारमस्य पृथिवीलोकस्य प्राप्तये द्वारमपावृणु हेऽग्ने तेन द्वारेण पश्येम त्वा त्वां राज्यायेति ॥ ४ ॥

राज्याय त्वद्दर्शनेन त्वदनुज्ञया पृथिवीप्रयुक्तमेगायेत्यर्थः ॥ ४ ॥

अथ जुहोति नमोऽग्नये पृथिवीक्षितें लोकक्षितें
लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक
एताऽस्मि ॥ ५ ॥

अथानन्तरं जुहोत्यनेन मन्त्रेण नमोऽग्नये महीभूतास्तुभ्यं वयं पृथिवीक्षितें पृथिवीनिवासाय लोकक्षितें पृथिवीलोकनिवासायेत्यर्थः । लोकं मे महं यजमानाय विन्द लभस्व । एष वै मम यजमानस्य लोक एता गन्ताऽस्मि ॥५॥

पृथिव्यां क्षियति वसतीति पृथिवीक्षित्तस्मै पृथिवीक्षिते । पृथिवीलोके मया लब्धे तव किं स्यादित्याशङ्क्याऽऽह—एष वै मम यजमानस्येति ॥ ५ ॥

अत्र यजमानः परस्तादायुषः स्वाहाऽपजहि परिधिमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रातःसवनꣳ संप्रयच्छन्ति ॥ ६ ॥

अत्रास्मिँल्लोके यजमानोऽहमायुषः परस्तादूर्ध्वं मृतः सन्नित्यर्थः । स्वाहेति जुहोति । अपजह्यपनय परिधिं लोकद्वारार्गलमित्येवं मन्त्रमुक्त्वो-

---

१ ङ. ठ. ड. °सुदेव° । २ क. ग. ठ. °वाकस्तस्ये° । ३ ख. छ. ञ. ण. °स्यपु° । ४ ङ. ठ. ड. °म-त्वां । ५ क. °ते लोकनिवासाय पृ° । ६ क. °क्षिदमिस्तस्मै ।

त्तिष्ठति । एवमेतैर्वसुभ्यः प्रातःसवनसंबद्धो लोको निष्क्रीतः स्यात्ततस्ते प्रातःसवनं वसवो यजमानाय संप्रयच्छन्ति ॥ ६ ॥

स्वाहाशब्दो मन्त्रसमाप्त्यर्थो होमद्योतकः । सर्वेषु मन्त्रेष्वेतैः सामहोममन्त्रोत्थानैरित्यर्थः ॥ ६ ॥

पुरा माध्यंदिनस्य सवनस्योपाकरणाज्जघनेनाऽऽग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्रꣳ सामाभिगायति ॥ ७ ॥

लो३कद्वारमपावा३र्णू३३प३श्येम त्वा वयं वैरा३३-३३३हु३म् आ३३ज्या३यो३आ३२१११इति ॥८॥

तथाऽऽग्नीध्रीयस्य दक्षिणाग्नेर्जघनेनोदङ्मुख उपविश्य स रौद्रं सामाभिगायेति यजमानो रुद्रदेवत्यं वैराज्याय ॥ ७ ॥ ८ ॥

यथा पृथिवीलोकजयोपायो दर्शितस्तथाऽन्तरिक्षलोकजयोपायोऽपि प्रदर्श्यत इत्याह— तथेति ॥ ७ ॥ ८ ॥

अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक एताऽस्मिꣳ ॥ ९ ॥

अत्र यजमानः परस्तादायुषः स्वाहाऽपजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै रुद्रा माध्यंदिनꣳ सवनꣳ संप्रयच्छन्ति ॥ १० ॥

अन्तरिक्षक्षित इत्यादि समानम् ॥ ९ ॥ १० ॥

अन्तरिक्षे क्षियतीत्यन्तरिक्षक्षिद्वायुस्तस्मै वायवे ॥ ९ ॥ १० ॥

पुरा तृतीयसवनस्योपाकरणाज्जघनेनाऽऽहवनीयस्योदङ्मुख उपविश्य स आदित्यꣳ स वैश्वदेवꣳ सामाभिगायति ॥ ११ ॥

लो३कद्वारमपावा३र्णू३३प१श्येम त्वा वयꣳ स्वारा

---

१ क. घ. च. 'बन्धौ लो' ।

३३३३३हु३म् आ३३ज्या ३ यो ३ आ ३२-
१११ इति ॥ १२ ॥

आदित्यमथ वैश्वदेवं लो३कद्वारमपावा३र्णू३३
पश्येम त्वा वयꣳ साम्रा३३३३हु३म् आ३३ज्या
३यो३आ३२१११ इति ॥ १३ ॥

तथाऽऽहवनीयस्योदङ्मुख उपविश्य स आदित्यं दैवं त्यमादित्यं वैश्वदेवं च सामाभिगायति क्रमेण स्वाराज्याय साम्राज्याय ॥११॥१२॥१३॥

यथा पृथिव्यन्तरिक्षयोरासप्त्युपायस्तथा द्युलोकाप्त्युपायोऽप्युच्यत इत्याह—तयेति । स्वाराज्यमन्तरिक्षे स्वातन्त्र्यम् । आदित्यानामिव स्वातन्त्र्यमिह विवक्षितम् ॥ ११ ॥ १२ ॥ १३ ॥

अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विन्दत ॥ १४ ॥

एष वै यजमानस्य लोक एताऽस्मिन्त्र यजमानः परस्तादायुषः स्वाहाऽपहत परिधिमित्युक्त्वोत्तिष्ठति॥१५॥

दिविक्षिद्भ्य इत्येवमादि समानमन्यत् । विन्दतापहतेति बहुवचनमात्रं विशेषः । याजमानं त्वेतत् । एताऽस्मिन्त्र यजमान इत्यादिलिङ्गात् ॥ १४ ॥ १५ ॥

किमिदं सामाद्यार्त्विज्यमाहो याजमानिकमिति वीक्षायामाह—याजमानं त्विति । आदिपदेन लोकं मे यजमानायेति निर्देशो गृह्यते ॥ १४ ॥ १५ ॥

तस्मा आदित्याश्च विश्वे च देवास्तृतीयꣳसवनꣳ

---

१ ग. ठ. °ति । अथ । २ ङ. °त्यदेव° । ३ क. घ. ङ. च. ठ. ढ. °वाथ वै° । ४ क. °ति वेवक्षा° । ५ ख. ग. °थꣳ स°

संप्रयच्छन्त्येष ह वै यज्ञस्य मात्रां वेद य एवं
वेद य एवं वेद ॥ १६ ॥

इति च्छान्दोग्योपनिषदि द्वितीयाध्यायस्य चतुर्विंशः खण्डः ॥२४॥

इति च्छान्दोग्योपनिषद्ब्राह्मणे द्वितीयोऽध्यायः ॥ २ ॥

एष ह वै यजमान एवंविद्यथोक्तस्य सामादेर्विद्वान्यज्ञस्य मात्रां यज्ञयाथात्म्यं वेद यथोक्तम् । य एवं वेद य एवं वेदेति द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ १६ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये द्वितीयाध्यायस्य चतुर्विंशः खण्डः ॥२४॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ छान्दोग्योपनिषद्विवरणे द्वितीयोऽध्यायः ॥ २ ॥

सामादिविज्ञानफलं कथयति—एष हेति । य एवं वेदेत्यस्य व्याख्या—यथोक्तस्येति । यथोक्तं सामादीत्येतत् । एवमित्युक्तप्रकारोक्तिः । तस्य यज्ञयाथात्म्यविदस्तदनुष्ठानद्वारा तत्फलं संभवतीत्यर्थः ॥ १६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
द्वितीयाध्यायस्य चतुर्विंशः खण्डः ॥ २४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां
छान्दोग्योपनिषद्भाष्यटीकायां द्वितीयोऽध्यायः ॥ २ ॥

(अथ तृतीयाध्यायस्य प्रथमः खण्डः) ।

असौ वा आदित्य इत्याद्यध्यायारम्भे संबन्धः । अतीतानन्तराध्यायान्त उक्तं यज्ञस्य मात्रां वेदेति यज्ञविषयाणि च सामहोममन्त्रोत्थानानि विशिष्टफलप्राप्तये यज्ञाङ्गभूतान्युपदिष्टानि । सर्वयज्ञानां च कार्यनिर्वृत्तिरूपः सविता

---

१ ख. अ. °वं वेद । यं° । ढ. °वं य° । २ घ. ठ. वेदे° । ३ ग. ङ. ट. °दिज्ञा° । ४ क. ग. छ. ठ. ण. °वंविदित्य° । ५ ख. अ. ण. °थोक्तसा° ।

महत्या श्रिया दीप्यते । स एष सर्वेषामेकर्मफलभूतः प्रत्यक्षं सर्वैरुपजीव्यते । अतो यज्ञैकदेशानन्तरं तत्कार्यभूतसवितृविषयमुपासनं सर्वपुरुषार्थेभ्यः श्रेष्ठतमफलं विधास्यामीत्येवमारभते श्रुतिः--

ॐ । असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवꣳशोऽन्तरिक्षमपपो मरीचयः पुत्राः ॥ १ ॥

असौ वा आदित्यो देवमधित्या दि । देवानां मोदनान्मधित्व मध्वसावादित्यः । वस्वादीनां च मोदहेतुत्वं वक्ष्यति सर्वयज्ञफलरूपत्वादादित्यस्य । कथं मधुत्वमित्याह--तस्य मधुनो द्यौरेव भ्रामरस्येव मधुनस्तिरश्चीनश्चासौ वंशश्चेति तिरश्चीनवंशः । तिर्यग्गतेव हि द्यौर्लक्ष्यते । अन्तरिक्षं च मध्वपूपोद्गुवंशे लग्नः सल्लम्बत इवातो मध्वपूपसामान्यादन्तरिक्षं मध्वपूपो मधुनःसवितुराश्रयत्वाच्च । मरीचयो रश्मयो रश्मिस्था आपो भौमाः सवित्राकृष्टाः । एता वा आपः स्वराजो यन्मरीचय इति हि विज्ञायन्ते । ता अन्तरिक्षमध्वपूपस्थरश्म्यन्तर्गतत्वाद्भ्रमरबीजभूताः पुत्रा इव हिता लक्ष्यन्त इति पुत्रा इव पुत्रा मध्वपूपनाड्यन्तर्गता हि भ्रमरपुत्राः ॥ १ ॥

कर्माङ्गबद्धं विज्ञानं परिसमाप्य कर्मफलस्याऽऽदित्यस्य स्वतन्त्रोपास्तिविध्यर्थमध्यायान्तरमारभमाणः संबन्धं प्रतिजानीते--असाविति । पूर्वोत्तरग्रन्थयोः संबन्धं प्रतिज्ञातं प्रकटयितुं वृत्तं कीर्तयति--अतीतेति । विशिष्टफलं पृथिव्यादिलोकत्रयम् । समनन्तरसंदर्भस्य तात्पर्यं वक्तुं पातनिकां करोति--सर्वेति । तस्य प्रेक्षितत्वं सूचयति--महत्येति । कथं पुनरादित्यस्य सर्वेषामेकर्मफलभूतत्वमित्याशङ्क्य सर्वैरुपजीव्यत्वोपलम्भादित्याह--स एष इति । पातनिकां कृत्वोत्तरग्रन्थमुत्थापयति--अत इति । आदित्यस्य कर्मफलत्वादिति यावत् । तदुपदेशे हेत्वन्तरमाह--सर्वपुरुषार्थेभ्य इति । श्रेष्ठतमं फलं क्रमेण मुक्तिलक्षणमस्यास्तीति तथोक्तम् । आदित्ये कर्मफलशब्दप्रवृत्तिनिमित्तमुक्तं व्यक्तीकर्तुमाह--वस्वादीनां चेति । चकारो विद्वत्संग्रहार्थः । वक्ष्यत्यादित्यस्येति संबन्धः । तस्य सर्वा यज्ञानां फलरूपत्वादिति

---

१ घ. च. ढ. °त्यक्षः स° । २ क. ° य व्य° । ३ क. ट. °तमं फ° । ४ क. ग. ङ. ट. ठ. °व भ्रम° । ५ ख. ञ. ण. °पो मधुवं° । ६ घ. °वंशसंल° । ७ च. °शे संल° । ८ क. ग. घ. ङ. ट. ठ. ड. °त्वात् । म° । ९ ङ. च. ठ ड ढ. °यते ता° १० क. ग. ट प्रेक्षित° । ११ ख. ञ. ण. °दिहे°।

हेतुः । वस्वादयश्च कर्मफलभोक्तारस्तत्फलमादित्यं दृष्ट्वा तृप्यन्तीति युक्तमित्यर्थः । आदित्यं मधुदृष्ट्योपासीतेत्युक्तं तत्र प्रसिद्धमधुसाम्यमादित्यस्य श्रुत्युक्तमाकाङ्क्षापूर्वकं दर्शयति—कथमित्यादिना । दिवि तिरश्चीनवंशदृष्टौ निमित्तमाह—तिर्यग्गतेति । अन्तरिक्षनिवासिभिरुपरि विस्तारितनयनैरिति शेषः । अन्तरिक्षे मध्वपूपदृष्टिं कथयति—अन्तरिक्षमिति । मधुन इत्युभयत्र संबन्धः । मरीचयः पुत्रा इति वाक्यं व्याचष्टे—मरीचय इति । आपो समेराकृता रश्मिस्थाः सन्तीत्यत्र प्रमाणमाह—एता इति । स्वराजः स्वतो भासमानस्य सवितुरिति यावत् । तासां पुत्रत्वं प्रकटयति—ता इति । लोके हि भ्रमरबीजभूताः पुत्रा मध्वपूपच्छिद्रस्था दृश्यन्ते । एताश्चाऽऽपोऽन्तरिक्षलक्षणमध्वपूपान्तर्गतरश्मिस्था भवन्ति । ततश्चैतास्वप्सु भ्रमरबीजदृष्टिः कर्तव्येत्यर्थः ॥ १ ॥

तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः । ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः ॥ २ ॥

तस्य सवितुर्मध्वाश्रयस्य मधुनो ये प्राञ्चः प्राच्यां दिशि गता रश्मयस्ता एवास्य प्राच्यः प्रागञ्चनान्मधुनो नाड्यो मधुनाड्य इव मध्वाधारच्छिद्राणीत्यर्थः । तत्र ऋच एव मधुकृतो लोहितरूपं सवित्राश्रयं मधु कुर्वन्तीति मधुकृतो भ्रमरा इव यतो रसानादाय मधु कुर्वन्ति । तत्पुष्पमिव पुष्पमृग्वेद एव । तत्र ऋग्ब्राह्मणसमुदायस्यर्ग्वेदाख्यत्वाच्छब्दमात्रौच्च भोग्यरूपरसनिस्रावसंभवाद्ऋग्वेदशब्देनात्र ऋग्वेदविहितं कर्म तत्रो हि कर्मफलभूतमधुरसनिस्रावसंभवात् । मधुकृद्भिरिव पुष्पस्थानीयाद्ऋग्वेदविहितात्कर्मणोऽप आदाय ऋग्भिर्मधु निर्वर्त्यते । काम्ता आप इत्याह—ताः कर्मणि प्रयुक्ताः सोमाज्यपयोरूपा अग्नौ प्रक्षिप्तास्तत्पाकाभिनिर्वृत्ता अमृता अमृतार्थत्वादत्यन्तरसवत्य आपो भवन्ति । तद्रसानादाय ता वा एता ऋचः पुष्पेभ्यो रसमाददाना एव भ्रमरा ऋचः ॥ २ ॥

प्राचीदिग्गतेष्वादित्यरश्मिषु प्राचीनमधुनाडीदृष्टिर्विधेयेत्याह—तस्येति । मध्वाश्रयस्य लोहितादिरूपं मधु वक्ष्यमाणं तदाधारस्थेत्यर्थः । ऋक्षु मन्त्ररूपासु भ्रमरदृष्टिमारोपयति—तत्रेति । प्रकृतं मधु सप्तम्यर्थः । तासां मधुकृत्वं साधयति—लोहितेति । ऋग्वेदविहिते कर्मणि पुष्पदृष्टिं संपादयति—पुष्प इति । ऋचे मधुकृत इति

---

१ ख. घ. ङ. विस्तारि° । २ ग. °ग्ब्राह्म° । ३ ख. घ. ङ. ठ. ण. °ब्राचार्थभो° । ४ ङ. °कादिभिर्निर्वृ° । ५ क. ग. ङ. °दिमन्तेष्वा° ।

मन्त्राणां पृथक्कृतत्वाद्ऋग्वेदः पुष्पमित्यृग्वेदशब्देन ब्राह्मणसमुदायस्य वक्तव्यत्वात्कर्मं-विहृग्वेदविहिते कर्मणि तच्छब्देन लक्षिते पुष्पदृष्ट्याऽभ्यासेऽपि कुतस्ततो मधुनिष्प-त्तिरित्याशङ्क्याऽऽह—ततो हीति । तदेवोपपादयति—मधुकरैरिति । लोके तावदपः पुष्पाश्रयाः समादाय मधुकरैर्मधु निर्वर्त्यते तथेहापि मधुकरस्थानीयैर्ऋङ्मन्त्रैस्तद्भेद-विहितात्पुष्पस्थानीयात्कर्मणः सकाशादपो गृहीत्वा मधु निष्पाद्यते । तस्मात्कर्मणः स्वफलभूतमधुनिष्पत्तेरुपपत्तेस्तस्मिन्पुष्पदृष्टिरित्यर्थः । ता अमृता आप इति वाक्यं प्रश्नपूर्वकं व्याचष्टे—कास्ता इत्यादिना । कर्मणि प्रयुक्तत्वमभिनयति—अग्नाविति । अग्निपाकाभिनिर्वृत्तत्वमपूर्वात्मत्वं परम्परया मुक्त्यर्थत्वममृतार्थत्वम् । यद्वा रोहितरूपा-मृतनिर्वर्तकत्वं तदर्थवत्त्वम् । उत्कृष्टफलवत्त्वमत्यन्तरसवत्त्वम् । ता वा एता इत्यादि व्याचष्टे—तद्रसानिति । यथा हि पुष्पेभ्यो भ्रमरा रसानाददानास्तान्यभितपन्ति तथैते मन्त्रास्तस्मिन्कर्मणि स्थितानग्न्यादिरसानादाय मधु निर्वर्तयन्तो यथोक्तं कर्मा-भिमतं समालोचयन्ति स्मेत्यर्थः ॥ २ ॥

एतमृग्वेद यतपश्स्तस्याभितप्तस्य यशस्तेज
इन्द्रिय वीर्यमन्नाद्य रसोऽजायत ॥ ३ ॥

एतमृग्वेदमृग्वेदविहितं कर्म पुष्पस्थानीयमभ्यतपन्नभितापं कृतवत्स्व इवैता ऋचः कर्मणि प्रयुक्ताः । ऋग्भिर्हि मन्त्रैः शस्त्राद्यङ्गभावमुपगतैः क्रियमाणं कर्म मधुनिर्वर्तकं रसं मुञ्चतीत्युपपद्यते पुष्पाणीव भ्रमरैरोचूष्यमाणानि । तदेतदाह—तस्यर्ग्वेदस्याभितप्तस्य । कोऽसौ रसो य ऋङ्मधुकराभितापनिः-सृत इत्युच्यते । यशो विश्रुतत्वं तेजो देहगता दीप्तिरिन्द्रियं सामर्थ्योपेतैरि-न्द्रियैरवैकल्यं वीर्यं सामर्थ्यं बलमित्यर्थः । अन्नाद्यमन्नं च तदाद्यं च येनो-पयुज्यमानेनाहन्यहनि देवानां स्थितिः स्यात्तदन्नाद्यमेष रसोऽजायत यागा-दिलक्षणात्कर्मणः ॥ ३ ॥

कथं पुनर्मन्त्राणां भ्रमरस्थानीयानां पुष्पस्थानीयमृग्वेदविहितं कर्माभितप्तवतां फलव-त्त्वमित्याशङ्क्याऽऽह—एता ऋच इति । तासां कर्मणि प्रयुक्तत्वेऽपि किमायातं तदाह—ऋग्भिरिति । अभितप्तस्य रसोऽजायतेति संबन्धः । तं प्रश्नपूर्वकं विशदय-ति—कोऽसाविति ॥ ३ ॥

---

१ क. ग. छ. ट. °त्कथमृग्वे° । २ क. ग. ट. °कादिभिर्निर्वृ° । ३ क. ग. ढ. °र्थत्वम् । ४ क. ग. ट. ठ. °पं च कृ° । ५ ङ. ठ. ड. ण. °राकृष्य° । ६ घ. °पनिर्वृत्त इ° । ७ ख. ञ. °पभुज्य° । ८ ख. ञ. °हितक° । ९ सं. छ. झ. ञ. °तस्यानां फ° ।

तद्वद्यक्षरक्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितꣳ रूपम् ॥ ४ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य प्रथमः खण्डः ॥ १ ॥

यश आद्यनाद्यपर्यन्तं तद्वद्यक्षरद्विशेषेणाक्षरदगमत् । गत्वा च तदादित्यमभितः पार्श्वतः पूर्वभागं सवितुरश्रयदाश्रितवादित्यर्थः । अमुष्मिन्नादित्ये संचितं कर्मफलाख्यं मधु भोक्ष्यामह इत्येवं हि यशआदिलक्षणफलप्राप्तये कर्माणि क्रियन्ते मनुष्यैः केदारानिष्पादनमिव कर्षकैः । तत्प्रत्यक्षं प्रदर्श्यते श्रद्धाहेतोस्तद्वा एतत् किं तद्यदेतदादित्यस्योद्यतो दृश्यते रोहितं रूपम् ॥४॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य प्रथमः खण्डः ॥ १ ॥

तच्छब्दार्थमाह—यश आदीति । अथानुष्ठितकर्मजनितं फलं कथमादित्यमाश्रयतीत्याशङ्क्याऽऽह—अमुष्मिन्निति । दृष्टान्ते भोक्ष्यामहे व्रीह्यादिजनितं फलमित्यभिप्रायेण व्रीह्यादिप्राप्त्यर्थमिति शेषः । किं तत्कर्मफलं यदादित्यमाश्रित्य तिष्ठतीत्याशङ्क्याऽऽह—तत्प्रत्यक्षमिति । कर्मफले प्रत्यक्षे तत्साधने कर्मणि कर्मिणां श्रद्धासिद्ध्यर्थमिति यावत् । तदेव फलं प्रश्नपूर्वकं विशदयति—किमित्यादिना ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य प्रथमः खण्डः ॥ १ ॥

(अथ तृतीयाध्यायस्य द्वितीयः खण्डः) ।

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूꣳष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपः ॥ १ ॥

अथ येऽस्य दक्षिणा रश्मय इत्यादि समानम् । यजूंष्येव मधुकृतो यजुर्वेदविहिते कर्मणि प्रयुक्तानि । पूर्ववन्मधुकृत इव । यजुर्वेदविहितं कर्म पुष्पस्थानीयं पुष्पमित्युच्यते । ता एव सोमाद्या अमृता आपः ॥ १ ॥

मध्यन्तरं दर्शयति—अथेति । वक्तव्यविशेषं कथयति—यजूंषीति । कथं तेषां

---

१ ख. घ. ङ. ञ. ठ. पूर्वं भा° । २ ख. ग. ञ ठ. ण. °धु वर्ष भो° । ३ घ. ङ. च. ज्ञ. ट. ड. °त्येव हि । ४ क. ग. ङ. ट. ड. ठ. °हेतोः । किं ।

मधुकृत्त्वं तदाह—पूर्ववदिति । ऋङ्मन्त्राणामृग्वेदविहिते कर्मणि प्रयुक्तानां यथा पूर्वं मधुकरत्वमुक्तं तथा यजुषामपीत्यर्थः । यजुर्वेदविहिते कर्मणि पुष्पदृष्टिमाचष्टे-यजुर्वेदेति । ता अमृता आप इत्यस्य पूर्ववद्व्याख्यानमित्याह—ता एवेति ॥ १ ॥

तानि वा एतानि यजूꣳष्येतं यजुर्वेदमभ्यतपꣳस्त-
स्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽ-
जायत ॥ २ ॥
तद्वच्यक्षरत्तदादित्यमभितोऽश्रयत्सद्वा एतद्यदेतदादि-
त्यस्य शुक्लꣳ रूपम् ॥ ३ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य द्वितीयः खण्डः ॥२॥

तानि वा एतानि यजूंष्येतं यजुर्वेदमभ्यतपन्नित्येवमादि सर्वं समानम् । मध्वेतदादित्यस्य दृश्यते शुक्लं रूपम् ॥ २ । ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

—○*○—

यजुषामादित्यसंबन्धि मधु प्रत्यक्षं दर्शयति—एतदिति ॥ २ ॥-३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

(अथ तृतीयाध्यायस्य तृतीयः खण्डः) ।

अथ येऽस्य प्रतराञ्छो रश्मयस्ता एवास्य प्रतीच्यो
मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं
ता अमृता आपः ॥ १ ॥
तानि वा एतानि सामान्येतꣳ सामवेदमभ्यतपꣳस्त
स्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽ-
जायत ॥ २ ॥
तद्वच्यक्षरत्तदादित्यमभितोऽश्रयत्सद्वा एतद्यदेतदादि-
त्यस्य कृष्णꣳ रूपम् ॥ ३ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ येऽस्य प्रत्यञ्चो रश्मय इत्यादि समानम् । तथा साम्नां मधु । एतदादित्यस्य कृष्णं रूपम् ॥ १ ॥ २ ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

तृतीयं मधु कथयति—अथेति । ऋचां यजुषां च मधु यथा कथितं तथेति यावत् । तस्य शास्त्रप्रत्यक्षत्वं दर्शयति—एतदिति ॥ १ ॥ २ ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

(अथ तृतीयाध्यायस्य चतुर्थः खण्डः) ।

अथ येऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपः ॥ १ ॥

ते वा एतेऽथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत ॥ २ ॥

तद्वा यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य परं कृष्णꣳ रूपम् ॥ ३ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

===

अथ येऽस्योदञ्चो रश्मय इत्यादि समानम् । अथर्वाङ्गिरसोऽथर्वणाऽङ्गिरसा च दृष्टा मन्त्रा अथर्वाङ्गिरसः कर्मणि प्रयुक्ता मधुकृतः । इतिहासपुराणं पुष्पम् । तयोश्चेतिहासपुराणयोरभ्यनेषे पारिप्लवासु रात्रिषु कर्माङ्गत्वेन विनियोगः सिद्धः । मध्वेतदादित्यस्य परं कृष्णं रूपमतिशयेन कृष्णमित्यर्थः ॥ १ ॥ २ ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

चतुर्थं मधु निदर्शयति—अथेति । किं तत्कर्मेत्याशङ्क्याऽऽह—इतिहासेति । तद्व्याथर्वणानामाङ्गिरसानां च प्रसिद्धं ब्रह्मणं तद्विहितं कर्म पुष्पं पुष्पस्थानीयमि-

---

१ क. ग. ङ. च. ट. ठ. परः । कृ° । २ क. ख. ङ. ढ. °थर्वाङ्गि° । ३ क. ग. ङ. च. ड. ड. ठ. °परं कृ° । ४ ख. छ. °रसत्य च ।

त्यर्थः । यदा प्रसिद्धयोरितिहासपुराणयोरुपादानं तदाऽपि न दूषणमित्याह—तयो-श्चेति । अश्वमेधकर्मणि जामितापरिहारार्थं पारिप्लवो नानाविधोपाख्यानसमुदायो यत्र तत्पारिप्लवमाचक्षीनेति विधिशास्त्रप्रयुज्यते । तासु रात्रिषु तस्यैव कर्मणोऽङ्गत्वेन मनुर्वै-वस्वतो राजेत्येवंप्रकारयोर्विनियोगस्य पूर्वतन्त्रे पारिप्लवार्थाधिकरणेनैव सिद्धत्वात्तत्त-त्संबन्धि कर्म पुष्पमित्यर्थः । अस्यापि मधुनः शास्त्रवश्यत्यक्षतामाह—मध्वेतादिति ॥ १ ॥ २ ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

(अथ तृतीयाध्यायस्य पञ्चमः खण्डः) ।

अथ येऽस्योर्ध्वा रश्मयस्ता एवास्योर्ध्वा मधु-
नाड्यो गुह्या एवाऽऽदेशा मधुकृतो ब्रह्मैव पुष्पं
ता अमृता आपः ॥ १ ॥
ते वा एते गुह्या आदेशा एतद्ब्रह्माभितपश्स्तस्या-
भितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजा-
यत ॥ २ ॥
तद्यच्छ्वस्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादि-
त्यस्य मध्ये क्षोभत इव ॥ ३ ॥

अथ येऽस्योर्ध्वा रश्मय इत्यादि पूर्ववत् । गुह्या गोप्या रहस्या एवाऽऽदेशा लोकद्वारीयादिविधय उपासनानि च कर्माङ्गविषयाणि मधुकृतो ब्रह्मैव शब्दाधिकारात्प्रणवारूढं पुष्पम् । समानमन्यत् । मध्वेतदादित्यस्य मध्ये क्षोभत इव समाहितदृष्टेर्दृश्यते संचलतीव ॥ १ ॥ २ ॥ ३ ॥

पञ्चमं मधु दर्शयति—अथेति । लोकद्वारीयादिविधयो लोकद्वारमपावृणु पश्येम-त्वा वयमित्यादयः । ब्रह्मशब्दार्थमाह—शब्दाधिकारादिति । ऋगादिशब्दानां प्रकृतत्वादित्यर्थः । अस्यापि मधुनः शास्त्रवश्यात्प्रत्यक्षतामाह—मध्वेतादिति । समा-हितदृष्टेः शास्त्रार्थे समाहितचित्तस्यत्यर्थः ॥ १ ॥ २ ॥ ३ ॥

ते वा एते रसानाꣳ रसा वेदा हि रसास्तेषामेते

---

१ क. ग. ट. °भेधे क° । २ क. ङ. °ब्धं° । ३ क. ग. घ. ङ. च. ट. ठ. ण. °र्वा ह° ।

रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृ-
तास्तेषामेतान्यमृतानि ॥ ४ ॥
इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

ते वा एते यथोक्ता रोहितादिरूपविशेषा रसानां रसाः । केषां रसानामित्याह—वेदा हि यस्माल्ले कनिष्यन्दत्वात्सारा इति रसास्तेषां रसानां कर्मभावमापन्नानामप्येते रोहितादिविशेषा रसा अत्यन्तसारभूता इत्यर्थः । तथाऽमृतानाममृतानि । वेदा ह्यमृता नित्यत्वात्तेषामेतानि रोहितादीनि रूपाण्यमृतानि । रसानां रसा इत्यादि कर्मस्तुतिरेषा । यस्यैवंविशिष्टान्यमृतानि फलानीति ॥ ४ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

पञ्च मधूनि व्याख्याय तेषां सर्वेषां ध्येयत्वसिद्ध्यर्थं स्तुतिं प्रकुरुते—ते वा एत इति । तस्मात्तेषामिति संबन्धः । कर्मणि विनियुक्तत्वेन तदङ्गत्वात्तद्भावापत्तिः । वेदानां कार्यत्वेऽपि प्रयत्नपूर्वकत्वाभावान्नित्यत्वम् । या मधूनां स्तुतिः सा कर्मस्तुतिरित्याह—रसानामिति । कर्मस्तुतिमभिनयति—यस्यैवमिति । रसानां रसा अमृतानाममृतानीत्येवंविशिष्टान्यमृतानि यस्य फलं कर्मणस्तस्य महाभाग्यं किं वक्तव्यमिति स्तूयते कर्मेत्यर्थः ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य पञ्चमः खण्डः । ५ ॥

(अथ तृतीयाध्यायस्य षष्ठः खण्डः) ।

तद्यत्प्रथममभृतं तद्वसव उपजीवन्त्यग्निना मुखेन
न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा
तृप्यन्ति ॥ १ ॥

तत्तत्र यत्प्रथममभृतं रोहितरूपलक्षणं तद्वसवः प्राणाः सवनेशाना उपजीवन्त्यग्निना मुखनाम्नाग्निप्रधानाः सन्त उपजीवन्तीत्यर्थः । अन्नाद्यं रसोऽजायतेति वचनात्कवलग्रहणमश्नन्तीति प्राप्तं तन्प्रतिषिध्यते—न वै देवा अश्नन्ति न पिबन्तीति । कथं तर्ह्युपजीवन्तीत्युच्यते—एतदेव हि यथोक्तममृतं रोहितं रूप दृष्ट्वोपलभ्य सर्वकरणैरनुभूय तृप्यन्ति ।

१ ख. ञ. °ते तथो° । २ ख. ञ. °निष्पादत्वा° । ३ ख. ञ. ण. °षां ध्ये° । ४ ग. ञ. ङ. ण. °भ्रासम° । ५ च. °कलक्षणम° । ६ क. ङ °हितरू° ।

दृशेः सर्वकरणद्वारोपलब्ध्यर्थत्वात् । ननु रोहितं रूपं दृष्टेत्युक्तं कथमन्येन्द्रियविषयत्वं रूपस्येति । न । यशआदीनां श्रोत्रादिगम्यत्वात् । श्रोत्रग्राह्यं यशः । तेजोरूपं चाक्षुषम् इन्द्रियं विषयग्रहणकार्यानुमेयं करणसामर्थ्यम् । वीर्यं बलं देहगत उत्साहः प्राणवत्ता । अन्नाद्यं प्रत्यहमुपजीव्यमानं शरीरस्थितिकरं यद्भवति । रसो ह्येवमात्मकः सर्वः । यं दृष्ट्वा तृप्यन्तं सर्वे देवा दृष्ट्वा तृप्यन्तीत्येतत्सर्वं स्वकरणैरनुभूय तृप्यन्तीत्यर्थः । आदित्यसंश्रयाः सन्तो वैगन्ध्यादिदेहकरणदोषरहिताश्च ॥ १ ॥

अमृतानि ध्येयान्युक्त्वा तदुपजीविनो देवनागणाननुचिन्तनीयानुपदिशति—उत्तरेति । कवलग्राहं कवलं गृहीत्वा यथा लोकोऽश्नाति तद्वदित्येतत् । नन्वशनपानाभावे न युक्तमुज्जीवनवचनमित्याशङ्क्य परिहरति—कथमित्यादिना । चक्षुषेति वक्तव्ये कथं सर्वकरणैरित्यधिकमुच्यते तत्राऽऽह—दृशेरिति । चक्षुषैव रूपग्रहणमिति नियममाश्रित्य शङ्कते—नन्विति । कर्मफलभूतस्य रसस्य लोहितामृतात्मकस्य नास्ति चक्षुर्मात्रग्राह्यत्वमिति परिहरति—नेत्यादिना । किमतावता रसस्याऽऽप्यतं तदाह—रसो हीति । इति तस्यापि श्रोत्रादिग्राह्यतेति शेषः । एतदेवेत्यादिवाक्यमुपसंहरति—देवा इति । किं तेषां स्वतन्त्राणां तृप्तिर्नेत्याह—आदित्येति । वैगन्ध्यं दौर्गन्ध्यम् । आदिपदेन संभाविताः सर्वेऽपि देहकरणदोषा गृह्यन्ते ॥ १ ॥

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥ २ ॥

किं ते निरुद्यमा अमृतमुपजीवन्ति । न । कथं तर्हि, एतदेव रूपमभिलक्ष्याधुना भोगावसरो नास्माकमिति बुद्ध्वाऽभिसंविशन्त्युदासते । यदा वै तस्यामृतस्य भोगावसरो भवेत्तदैतस्मादमृतादमृतभोगनिमित्तमित्यर्थः । एतस्माद्रूपादुद्यन्त्युत्साहवन्तो भवन्तीत्यर्थः । न ह्यनुत्साहवतामनुत्थितामलभमानां भोगप्राप्तिर्लोके दृष्टा ॥ २ ॥

एतस्माद्रूपादिति व्याख्यातस्यानुवादमात्रम् । उत्साहवतां देवानां यथोक्तामृतोपजीवित्वमित्यत्र लोकप्रसिद्धिमनुकूलयति —न हीति ॥ २ ॥

स य एतदेवममृतं वेद वसूनामेवको भूत्वाऽग्निर्व मुखेनैतदेवामृत दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

---

१ च. सर्वे यं । २ ख. ङ. च. ञ. ङ. ढ. °न्ति दे° । ३ ख. घ. ङ. च. ञ. ठ. ड. ण. °व्यन्त्येत° । ४ ख. ञ. ण. °भूयाभित्र° । ५ ख. ङ ढ. °दा चैत° । ञ. °दा च त° । ६ ख. ङ. च. ञ. ठ. °दुदैति ।

स यः कश्चिदतदेवं यथोदितमृङ्मधुकरतापरसंसरक्षणमृग्वेदाविहितकर्मपुण्यात्तस्य चाऽऽदित्यसंश्रयणं रोहितरूपत्वं चामृतस्य प्राचीदिग्गतरश्मिनाडीसंस्थतां वसुदेवभोग्यतां तद्विदश्च वसुभिः सहैकतां गत्वाऽग्निना मुखेनाविनं दर्शनमात्रेण तृप्तिं स्वभोगावसर उद्यमनं तत्कालापाये च संवेशनं वेद ... पि वसुवत्सर्वं तथैवानुभवति ॥ ३ ॥

पाठक्रमेणोक्तं ध्येयस्वरूपमनूद्य साधिकारं ध्यानविधिं दर्शयति—स य इति । वसुदेवभोग्यतां वसुभिर्देवैरुपजीव्यत्वमिति यावत् । एतदित्यस्माकं मधु निदर्शयति । एवंशब्दार्थं विशदयति—यथोदितमिति । तथैव श्रुत्युक्तक्रमेणैवेत्यर्थः ॥ ३ ॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

कियन्तं कालं विद्वांस्तदमृतमुपजीवतीत्युच्यते—स विद्वान्यावदादित्यः पुरस्तात्प्राच्यां दिश्युदेता पश्चात्प्रतीच्यामस्तमेता तावद्वसूनां भोगकालस्तावन्तमेव कालं वसूनामाधिपत्यं स्वाराज्यं पर्येता परितो गन्ता भवतीत्यर्थः । न यथा चन्द्रमण्डलस्थः केवलकर्मी परतन्त्रो देवानामन्नभूतः किं तर्ह्याधिपत्यं स्वराड्भावं चाधिगच्छति ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

भोगकालपरिमाणं प्रश्नपूर्वकं निर्धारयति—कियन्तमिति । आधिपत्यं स्वाराज्यमिति विशेषणयोस्तात्पर्यमाह—न यथेति ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

(अथ तृतीयाध्यायस्य सप्तमः खण्डः) ।

अथ यद्द्वितीयममृतं तद्रुद्रा उपजीवन्तीन्द्रेण मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यान्ति ॥ २ ॥

---

१ ग. घ. ङ. ठ. °थोक्तमृ° । ङ. ढ. °थोक्तमेवमृ° । २ ख. ञ. ण. °सक्ष° । ३ ख. म. °मात्रतृ° । ४ घ. ढ. °सिं वसुभो° । च. °सिं वस्तुभो° ।

स य एतदेवममृत वेद रुद्राणामेवैको भूत्वेन्द्रेणैव
मुखेनतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसं-
विशत्येतस्माद्रूपादुदेति ॥ ३ ॥

अथ यद्द्वितीयममृतं तद्वसवो उपजीवन्तीत्यादि समानम् ॥१॥२॥३॥

प्रथममृतमधिकृत्य चिन्तनीयमुक्त्वा द्वितीयममृतमाश्रित्य तद्दर्शयति—अथेति ॥१॥२॥३॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्ता-
वद्दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणामेव तावदा-
धिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य सप्तमः खण्डः ॥७॥

स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावत्ततो द्विगुणं कालं दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणां तावद्भोगकालः ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य सप्तमः खण्डः ॥७॥

—:⊙-⊙-⊙-⊙:—

विद्याफलं कथयति—स यावदिति । यावद्वसूनां भोगकालस्ततो द्विगुणो रुद्राणां भोगकालः । यथा प्रथमामृतध्यायिनां वसुभिस्तुल्यो भोगकालस्तथा द्वितीयामृतध्यायिनामपि रुद्रैस्तुल्यो भोगकाल इत्यर्थः ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

(अथ तृतीयाध्यायस्याष्टमः खण्डः)।

अथ यत्तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन
मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं
दृष्ट्वा तृप्यन्ति ॥ १ ॥
त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुदयन्ति ॥ २ ॥
स य एतदेवममृतं वेदाऽऽदित्यानामेवैको भूत्वा

---

१ ख. ङ. ञ. ठ. 'उदेति'।

वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥
स यावदादित्यो दक्षिणत उदेतोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेताऽऽदित्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्याष्टमः खण्डः ॥८॥

(अथ तृतीयाध्यायस्य नवमः खण्डः) ।

अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥
त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुदयन्ति ॥ २ ॥
स य एतदेवममृतं वेद मरुतामेवैको भूत्वा सोमेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥
स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य नवमः खण्डः ॥९॥

(अथ तृतीयाध्यायस्य दशमः खण्डः) ।

अथ यत्पञ्चममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति ॥ १ ॥

१ ख. ग. ज. ञ. ट. °दुदेति । २ ख. ङ. ज. ञ. ठ. °दुदैति ।

त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्ति ॥२॥
स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेननदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥
स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्व उदेताऽर्वाङस्तमेता साध्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ४ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य दशमः खण्डः ॥ १० ॥

तथा पश्चादुत्तरत ऊर्ध्वमुदेता विपर्ययेणास्तमेता । पूर्वस्मात्पूर्वस्माद्द्विगुणोत्तरोत्तरेण कालेनेत्यपौराणं दर्शनम् । सवितुश्चतुर्दिशमिन्द्रयमवरुणसोमपुरीषूदयास्तमयकालस्य तुल्यत्वं हि पौराणिकं रुक्मम् । मानसोत्तरस्य मूर्धनि मेरोः प्रदक्षिणावृत्तेस्तुल्यत्वादिति ।

इतरामृतध्यायिनां फलानि निर्दिशति—तथेति । विपर्ययेण पुरस्ताद्दक्षिणतोऽधस्ताच्चेत्यर्थः । यथा पुरस्तादुदेता पश्चाच्चास्तमेता ततो दक्षिणतो द्विगुणेन कालेनोदेतोत्तरतश्चास्तमेतेत्युक्तम् । तथ ततो द्विगुणेन कालेन पश्चादुदेता पुरस्ताच्चास्तमेता तावानादित्यानां भोगकालः, तृतीयामृतध्यायिनामपि तावानेव भोगकालः । ततो द्विगुणेन कालेन यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता तावान्मरुतां भोगकालः । चतुर्थामृतध्यायिनामपि तावानेव भोगकालः । ततो द्विगुणेन कालेनोर्ध्वमुदेताऽधस्तादस्तमेता तावान्साध्यानां भोगकालः । पञ्चमामृतचिन्तकानामपि तावानेवेत्यर्थः । यत्पूर्वपूर्वोदयास्तमयकालापेक्षया द्विगुणेन कालेनोत्तरोदयास्तमयावित्युक्तं तत्पुराणविरुद्धमिति शङ्कते—पूर्वस्मात्पूर्वस्मादिति । कथं श्रुत्युक्तस्यार्थस्य पुराणविरुद्धतेत्याशङ्क्याऽऽह—सवितुरिति । उक्तमेव संक्षिपति—मानसोत्तरस्येति । महागिरेर्मेरोः प्राकारवत्परितः स्थितस्य मूर्धनि संलग्नरथचक्रस्य सवितुर्मेरोः प्रदक्षिणावृत्तेस्तुल्यत्वात्कालाधिक्ये कारणाभावाच्च चतसृष्वपि पुरीषूदयास्तमयकालस्य तुल्यत्वम् । उक्तं हि विष्णुपुराणे—

शक्रादीनां पुरे तिष्ठन्सूर्यश्चैष पुरत्रयम् ।
विकर्णौ द्वौ विकर्णस्थश्चीन्कोणान्द्वे पुरे तथा ॥ इति ।

---

१ ख. ङ. ज. ञ. ट. °दुदैति । २ ख. ङ. ज. ञ. ण. °पि स ता° ।

तथा चोक्तम्—

मानसोपरि माहेन्द्री प्राच्यां मेरोः स्थिता पुरी ।
दक्षिणे भानुपुत्रस्य वरुणस्यं तु वारुणे ॥
सौम्ये सोमस्य विपुला तासु दिग्देवताः स्थिताः ।
अमरावती संयमिनी सुखा चैव विभा क्रमात् ॥
लोकपालोपरिष्टात्तु सर्वतो दक्षिणायने ।
काष्ठां गतस्य सूर्यस्य गतिर्यां तां निबोधत ॥
दक्षिणां प्रक्रमेद्भानुः क्षितेषुरिव धावति ।
पुरान्तगो यदा भानुः शक्रस्य भवति प्रभुः ॥
सर्वैः सांयमनैः सौरो ह्युदयो दृश्यते द्विजाः ।
स एवं सुखवत्यां तु निशान्तस्तत्प्रदृश्यते ॥
अस्तमेति यदा सूर्यो विभायां विश्वदृग्विभुः ।
मया प्रोक्तोऽमरावत्यां यथाऽसौ वारितस्करः ॥
तथा संयमिनीं प्राप्य सुखां चैव विभां खगः ।
यदाऽपराह्णस्त्वाग्नेय्यां पूर्वाह्णो नैर्ऋते द्विजाः ॥
तदा स्वपररात्रश्च वायुभागे सुदारुणः ।
ऐशान्यां पूर्वरात्रस्तु गतिरेषाऽस्य सर्वतः ॥ इति ।

तथा चोपरिष्टादमरावत्यास्तिष्ठन्मध्याह्नं तत्रैशकोणस्थानां तृतीययाममाग्नेयकोणस्थानामाद्ययामं संयमिन्यामुदयं च करोति सविता । एवं यदा याम्ये मध्याह्ने तिष्ठति तदैन्द्रेऽस्तमयः । आग्नेये तृतीययामः । नैर्ऋतिकोणे प्रथमो यामः । वारुण उदयः । यदा च वारुणे मध्याह्नस्तदा याम्येऽस्तमयः । नैर्ऋतिकोणे तृतीयो यामः । वायव्ये प्रथमयामः । सौम्य उदयः । यदा च सौम्ये मध्याह्नस्तदा वारुणेऽस्तमयः । वायव्ये तृतीययामः । ईशानकोणे प्रथमो यामः । ऐन्द्र उदयः । तथाऽऽग्नेये कोणे वर्तमानस्तत्रस्थानां मध्यंदिनं यमेन्द्रपुर्योराद्यतृतीययामौ नैर्ऋतीशानकोणयोरुदयास्तमयौ च करोति । एवं सर्वासु दिक्षु विदिक्षु चेति पौराणिके दर्शने तद्विरुद्धमिदं श्रुत्योक्तमित्यर्थः ।

अत्रोक्तः परिहार आचार्यैः—अमरावत्यादीनां पुरीणां द्विगुणोत्तरोत्तरेण कालेनोद्गासः स्यात् । उदयश्च नाम सवितुस्तन्निवासिनां प्राणिनां चक्षुर्गोचरापत्तिस्तदत्ययश्चास्तमनं न परमार्थत उदयास्तमने स्तः । तन्निवासिनां

१ ख. ञ. °स्य च वा° । २ ग. च. °यमनी । ३ ग. ट. °शा तस्य प्रद° । ४ क. °न्तस्थः प्रद° । ५ ङ. ङ. ण. °यमनीं । ६ ख. ग. छ. ञ. ट. °णः । ईशा° । ७ क. °ग्नस्थानां । ८ क. ख. ग. छ. ट. ण. °मौ नैर्ऋ° ।

च प्राणिनामभावे तान्प्रति तेनैव मार्गेण गच्छन्नपि नैवोदेता नास्तमेतेति चक्षुर्गोचरापत्तेस्तदत्ययस्य चाभावात् ।

यद्यपि श्रुतिविरोधे स्मृतिरप्रमाणं तथाऽपि यथाकथंचिद्विरोधपरिहारं द्रविडाचार्योक्तमुपपादयति—अत्रेति । यदाऽमरावती शून्या स्यात्तदा हि तां प्रति पुरस्तादुदेतीतिप्रयोगशून्यत्वाद्भूनां भोगान्तः । एवमुत्तरासां पुरीणां विनाशे द्विगुणकालेन रुद्रादीनां भोगच्युतिः । अत इमां वचनव्यक्तिमाश्रित्य तमेव परिहारमाह—अमरावत्यादीनामिति । तथाऽपि कथं विरोधसमाधिस्तत्राऽऽह—उदयश्चेति । [तदुक्तम्—]

यैर्यत्र दृश्यते भास्वान्स तेषामुदयः स्मृतः ।
तिरोभावं च यत्रैति तदेवास्तमनं रवेः ॥
नैवास्तमनमर्कस्य नोदयः सर्वदा सतः ।
उदयास्तमने नाम दर्शनादर्शने रवेः ॥ इति ।

अमरावत्यादिपुरीषु पूर्वपूर्वापेक्षयोत्तरोत्तरत्रोद्वासकालद्वैगुण्यमस्तु स्तां च दर्शनादर्शने सवितुरुदयास्तमयौ । स वा एष न कदाचनास्तमेति नोदेतीति श्रुतेर्वस्तुतो नोदयास्तमयौ स्तस्तथा च पुरीषु तुल्यत्वेन गच्छतः सवितुरुदयास्तमयकालवैषम्यमयुक्तमित्याशङ्क्याऽऽह— तन्निवासिनां चेति । भोगकालद्वैगुण्यं न सवितृगतेराधिक्यापेक्षयाँ श्रुत्योच्यते येन पुराणविरोधः किं त्वमरात्यादीनां पुरीणां दैत्योपहतानां पूर्वपूर्वापेक्षयोत्तरोत्तरपुरीणां द्विगुणेन कालेनोद्वासात्तदपेक्षयोत्तरोत्तरस्थानेषु भोगकाले द्वैगुण्यं श्रुत्योक्तमिति भावः ।

तथाऽमरावत्याः सकाशाद्द्विगुणं कालं संयमनी पुरी वसत्यतस्तन्निवासिनः प्राणिनः प्रति दक्षिणत इवोदेत्युत्तरतोऽस्तमेतीत्युपचारदृष्टिं चापेक्ष्य । तथोत्तरास्वपि पुरीषु योजना ।

अथोद्वासकालाधिक्याद्भोगच्युतिकालाधिक्यं न भोगकालाधिक्यमत आह—तथेति । यथोद्वासकालद्वैगुण्यमुक्तं तद्वदिति यावत् । अमरावतीनिवासिप्राणिवर्गापेक्षया संयमिनीनिवासिनः प्राणिनः प्रति द्विगुणेन कालेन सवितुरुदयास्तमयाविति युक्तं च वक्तुम् । दर्शनादर्शनयोर्द्विगुणकालभावित्वात् । न च तन्निवासिदृष्ट्यपेक्षया दक्षिणोत्तरयो-

---

१ ख. ङ. च. ञ. °देति ना° । २ ख. ङ. च. ञा. °मेति । घ. ट. °मेता व° । ३ घ. चाप्यभा° । ४ क. ग. ट. °रोधानं च । ५ ख. च. छ. ञ. ण. °यौ तथा । ६ ब. ग. ट. °र्थं स° । ७ क. ग. ट. °या न श्रु° । ८ ख. छ. ञ. ण. °पहृता° । ९ ख. ग. ङ. ट. ण. °री द्वि° । १० ख. ङ. ञ ण. °तर° । ११ ख. ट. °कालद्वै° । १२ ङ. ठ. ड. °वत्या द्विगु° । १३ क. ख. ग. घ. ङ. च. ट. ठ. ड. ढ. ण. °लं सांय° । १४ क. °यमिनी । १५ ट. °यमनी° ।

दयास्तमयौ । तत्तद्दृष्ट्या पूर्वपश्चिमयोरेव तद्भावात् । अस्मद्बुद्धिमपेक्ष्य तु दक्षिणत उदेत्युत्तरतश्चास्तमेतीत्युच्यते । इवशब्दस्तयोस्तन्निवासिननापेक्षया दक्षिणोत्तरत्वयोरसत्त्वं द्योतयतीत्यर्थः । यथाऽमरावत्यपेक्षया संयमिन्यामुद्वासकालाधिक्यमुक्तं तथा तदपेक्षया वारुण्यां तदपेक्षया च विभायां तत्कालाधिक्यमवधेयमित्याह—तथेति । संयमिनीं चान्तर्भाव्य बहुवचनम् ।

सर्वेषां च मेरुरुत्तरतो भवति । यदाऽमरावत्यां मध्याह्नगतः सविता तदा संयमन्यामुद्यन्दृश्यते तत्र मध्याह्नगतो वारुण्यामुद्यन्दृश्यते, तथोत्तरस्यां, प्रदक्षिणावृत्तेस्तुल्यत्वात् ।

इतश्चास्मद्बुद्धिमपेक्ष्य दक्षिणगत्यादिनाऽस्तमनमित्याह—सर्वेषां चेति । उद्यन्तमादित्यं पुरतोऽवलोकयतां वामभागे स्थितत्वान्मेरुः सर्वेषामेवोत्तरतो भवति । तथा चोदयास्तमयाभ्यां पूर्वापरदिग्विभागान्न तत्पुरवासिदृष्ट्यपेक्षया दक्षिणगत इत्यादिवचनं किंत्वस्मद्दृष्ट्यपेक्षयैवेत्यर्थः । उद्वासकालद्वैगुण्यापेक्षया भोगकालद्वैगुण्यमित्युक्तम् । संप्रति सवितृगत्याधिक्यापेक्षयैव भोगकालाधिक्यं किं न स्यादित्याशङ्क्य पुराणविरोधसमाधानासंभवान्नैवमित्याह—यदेत्यादिना । यथा संयमिन्यां मध्याह्नगो वारुण्यामुद्यन्भवति तथा तस्यां मध्याह्नगो विभायामुद्यन्दृश्यत इत्याह—तथेति । उक्तं च वायुप्रोक्ते—

मध्यगस्त्वमरावत्यां यावद्भवति भास्करः ।
वैवस्वते संयमन उदयंस्तत्र दृश्यते ॥
सुखायामर्धरात्रश्च विभायामस्तमेति च ॥ इति ।

इलावृतवासिनां सर्वतः पर्वतप्राकारनिवारितादित्यरश्मीनां सवितोर्ध्व इवोदेताऽर्वागस्तमेता दृश्यते । पर्वतोर्ध्वच्छिद्रप्रवेशात्सवितृप्रकाशस्य ।

कथं पुनः स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्वित्तावदूर्ध्व उदेताऽर्वाङस्तमेतेत्युच्यते । न हि तत्रोद्वासकालस्य वाऽधिक्यत्वमस्ति । येनोदयास्तमयकालाधिक्याद्भोगकालाधिक्यं स्यादत आह—इलावृतेति । मेरोश्चतुर्दिशमिलावृतं नाम वर्षं प्रसिद्धम् । तन्निवासिनां प्राणिनामुभयतः पर्वताभ्यां मानसोत्तरसुमेरुभ्यां प्राकारस्थानीयाभ्यामुभयोर्ध्वस्थितमहाक्षेण विनिवारितादित्यरश्मीनामूर्ध्वमुदेताऽर्वाङस्तमेता च सविता दृश्यते । इवशब्दस्तूदयास्तमययोर्वस्तुतोऽसत्त्वद्योतनार्थ इत्यर्थः । कथं सवि-

---

१ ग. ठ. °यमन्यां । २ क. च. °त्तरो भ° । ३ ख.-च. ञ. ण. °ध्याह्नं ग° । ४ क. ख. ग. घ. ङ. च. ञ. ट. ठ. ड. ढ. °दा सायं° । ५ क. ङ. च. ञ. ढ. °यमिन्यां° । ६ ठ. °ध्याह्नं ग° । ७ क. ग. च. ट. ड. ढ. ण. °ह्नगोचरो वा° । ८ ग. ट °दिधचन° । ९ ग. ट °यमन्यां । १० च. ञ. ण. °वृत्तवा° । ११ ख. ञ. ण. °र्ध्वमुदे° । १२ ग. न. च. त° । १३ ञ. ट. °वृत्तेति । १४ ख. ञ. वृत्तं ना° । १५ क. ट. °नार्थः ।

तोर्ध्वः सन्नुदेत्यर्वाक्तमेति तत्राऽऽह-पर्वतेति । सर्वावृतप्रकाशस्य पर्वतोपरितनेछिद्रे प्रवेशाद्योवर्तिनां प्राणिनामुपरिप्रसारितनेत्राणां सावित्रं प्रकाशं पश्यतां तन्नोदयिव सवितोपलभ्यते प्रदेशान्तरे च दृश्यमानोऽस्तादिवास्तमेति । यथोपरिष्टाद्व्रजन्नेरुपलभ्यमानो मेघस्ततो दूराद्दृशो भूतलस्थैश्चेत्येवावसीयते तथेहापीत्यर्थः ।

तथर्गाद्यमृतोपजीविनामृतानां च द्विगुणोत्तरोत्तरवीर्यवत्त्वमनुमीयते भोगकालद्वैगुण्यलिङ्गेन । उद्यमनसंवेशनादि देवानां चन्द्रादीनां विदुषश्च समानम् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्याष्टमः खण्डः ॥८॥

। १ ॥ २ ॥ ३ ॥ ४ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य नवमः खण्डः ॥ ९ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य दशमः खण्डः ॥१०॥

भोगकालस्याविरोधेनाऽऽधिक्यमापाद्य तेनैव लिङ्गेनातिशयवत्त्वममृतादेरपि कथयति—तथेति । भोगकालाधिक्ये सतीति यावत् । अनुमीयते कल्प्यते । वस्तु भोगकालमाकलय्योद्यमनं तदभावं ज्ञात्वोपरमणमन्यादिमुखत्वं दृष्टिमात्रेण तृप्तिमत्त्वं तत्सर्वं विदुषोऽपि कल्प्यते देवैः सममित्याह—उद्यमनेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
तृतीयाध्यायस्याष्टमः खण्डः ॥ ८ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
तृतीयाध्यायस्य नवमः खण्डः ॥ ९ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
तृतीयाध्यायस्य दशमः खण्डः । १० ॥

(अथ तृतीयाध्यायस्यैकादशः खण्डः) ।

अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल
एव मध्ये स्थाता तदेष श्लोकः ॥ १ ॥

---

१ क. ग. ट. 'दृदृश्यो भू' । २ ख. छ. झ. ण. 'मश्चैवा' । ३ ङ. 'ते वर्तते भो' । ४ क. ग. ट. 'मनानन्तरं' ।

कृत्वैवमुदयास्तमनेन प्राणिनां स्वकर्मफलभोगनिमित्तमनुग्रहं तत्कर्मफलोपभोगक्षये तानि प्राणिजातान्यात्मनि संहृत्याथ ततस्तस्मादनन्तरं प्राप्तानुग्रहकालादूर्ध्वः सन्नात्मन्युदेत्योद्गम्य यान्यत्युदेति तेषां प्राणिनामभावात्स्वात्मस्थो नैवोदेता नास्तमेतैकलोऽद्वितीयोऽनवयवो मध्ये स्वात्मन्येव स्थाता । तत्र कश्चिद्विद्वान्स्वात्मसमाधिवरणो रोदिवाद्यनुभवभोगभागी यथोक्तक्रमेण स्वात्मत्वं सवितारमात्मत्वेनोपेत्य समाहितः सन्नेतं मन्त्रं दृष्ट्वोत्थितोऽन्यस्मै पृच्छते जगाद । ततस्तत्रायमो ब्रह्मलोकार्थिक तत्राप्यहोरात्राभ्यां परिवर्तमानः सविता प्राणिनामायुः क्षपयति यथेहास्माकमित्येवं पृष्टः प्रत्याह । तत्रत्र यथा पृष्टं तथोक्तं चार्थ एष श्लोको भवति तेनोक्तो योगिनेति श्रुतेर्वचनमिदम् ॥ १ ॥

पञ्चभिः पर्यायैर्मुक्तिविद्या यथानदुक्ता । क्रमेण मुक्तिफलपर्यवसायित्वं तस्या दर्शयितुमनन्तरवाक्यमवतारयन्नाऽऽह—कृत्वेत्यादिना । तस्मात्प्राप्यनुग्रहकालादनन्तरमिति तच्छब्दार्थः । ऊर्ध्वः सन्ब्रह्मीभूतो वर्तमान इति यावत् । आत्मन्युदेत्य स्वमहिम्नि प्रकाशं लब्ध्वेत्येतत् । क्षपयतीति प्रयोगात्क्रममुक्तिरत्र विवक्षिता । तत्र विद्वदनुभवं प्रमाणयति—तत्रेति । क्रममुक्तिः सप्तम्यर्थः । यथोक्तक्रमेणासौ वा आदित्यो देवमधित्यादिना पञ्चाग्नितत्त्वेन स्थितमित्यर्थः । स्वमात्मानं वेद्यतया विद्वदात्मसंभूतमित्यर्थः । आत्मत्वेनोपेत्याहंग्रहेण गृहीत्वेत्येतत् । कथं प्रश्न इत्याकाङ्क्षायामाह—यत्र इति । लब्धब्रह्मोपदेशो ब्रह्मविद्योक्तावस्थायां ब्रह्मणो वियुक्तावस्थायां केनचित्पृष्टः प्रत्युवाचेत्यर्थः । कथं प्रत्युक्तिरिति तत्राऽऽह—तत्तत्रेति ॥ १ ॥

न वै तत्र न निम्लोच नोदियाय कदाचन ।
देवास्तेवाहꣳ सत्येन मा विराधिषि ब्रह्मणेति ॥ २ ॥

न वै तत्र यतोऽहं ब्रह्मलोकादायतस्तस्मिन्न वै तत्रैवदस्ति यत्पृच्छसि । न हि तत्र निम्लोचास्तमगमत्सविता न चोदियायोदगतः कुतश्चित्कदाचन कस्मिंश्चिदपि काले इति । तदयास्तमयवर्जितो ब्रह्मलोक इत्यनुपपन्नमित्युक्तः शपथमिव प्रतिषेधे । हे देवाः साक्षिणो यूयं शृणुत यथा मयोक्तं सत्यं वचस्तेन सत्येनाहं ब्रह्मणा ब्रह्मस्वरूपेण मा विराधिषि मा विरुध्येयम(वा)प्राप्तिर्ब्रह्मणो मम मा भूदित्यर्थः ॥ २ ॥

---

१ ख. ग. घ. ङ. 'धो वा म' । २ क. ग. ट. 'भाव' । ३ घ. ङ. ड. ढ. 'गभोगी । ४ ङ. च. ठ. ड. 'यत्त्वमात्मा' । ५ ढ. ड. दृष्ट्वा स्थितो । ६ घ. ठ. 'थोकार्थ' । ७ ख. छ. ञ. ण. 'ब्रह्मणेन भृ' । ८ क. 'विद्वत्त्वा' । ९. 'विद्युक्ता' । १० ख. ञ. ड. ढ. 'दाचित्र कृ' । ११ घ. ठ. ड. 'ब्रह्मव' । ११ क. ग. ङ. च. ट. ठ. ड्युप' । १२ क. ङ. ड. ढ. 'णो मा ।

श्लोकमुपादाय व्याकरोति-न वै तत्रेत्यादिना । निमुम्लोचेत्यस्मिन्नर्थे निम्लोचेति च्छान्दसः प्रयोगः । इतिशब्दः पूर्वार्धव्याख्यासमाप्त्यर्थः । उत्तरार्धमुत्थापयति—उदयास्तमयेति । लोकत्वाविशेषादितरलोकवद्ब्रह्मलोकोऽपि नोदयास्तमयवर्जित इत्युक्तो विद्वानुत्तरार्धेन शपथं कुर्वन्परिहरतीत्यर्थः ॥ २ ॥

सत्यं तेनोक्तमित्याह—श्रुतिः—

न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा
ह[1]वास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद ॥ ३॥

न ह वा अस्मै यथोक्तब्रह्मविदे । नोदेति न निम्लोचति नास्तमेति किं तु ब्रह्मविदेऽस्मै सकृद्दिवा हैव सदैवाहर्भवति स्वयंज्योतिष्ट्वाद्य एतां यथोक्तां ब्रह्मोपनिषदं वेदगुह्यं वेद । एवं तन्त्रेण वंशादित्रयं प्रत्यमृतसंबन्धं च यच्चान्यदवोचामैवं जानातीत्यर्थः । विद्वानुदयास्तमयकालापरिच्छेद्यं नित्यमजं ब्रह्म भवतीत्यर्थः ॥ ३ ॥

एवं मन्त्रदृक्शपथद्वारा निर्णीतेऽर्थे न हेत्याद्या किमर्था श्रुतिरित्याशङ्क्याऽऽह—सत्यमिति । न हेत्याद्यां श्रुतिमादाय व्याचष्टे—यथोक्तेति । ब्रह्मोपनिषदमित्यस्यार्थमाह—वेदगुह्यमिति । एवंशब्दमादाय व्याकरोति—एवमित्यादिना । वंशादित्रयं तिरश्चीनवंशो मध्वपूपो मधुनाडयश्चेत्येवंरूपमित्यर्थः । प्रत्यमृतसंबन्धं च लोहिताद्यमृतेष्वेकैकवस्वादीनां संबन्धमित्यर्थः । अन्यदित्युद्यमनसंवेशनादि गृह्यते । उक्तविद्याफलमुपसंहरति—विद्वानिति ॥ ३ ॥

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः
प्रजाभ्यस्तद्धैतदुद्दालकायाऽऽरुणये ज्येष्ठाय पुत्राय
पिता ब्रह्म प्रोवाच ॥ ४ ॥

तद्धैतन्मधुज्ञानं ब्रह्मा हिरण्यगर्भो विराजे प्रजापतय उवाच[2] । सोऽपि मनवे । मनुरिक्ष्वाकुाद्याभ्यः प्रजाभ्यः प्रोवाचेति विद्यां स्तौति ब्रह्मादिविशिष्टक्रमागतेति । किंच तद्धैतन्मधुज्ञानमुद्दालकायाऽऽरुणये पिता ब्रह्मविज्ञानं ज्येष्ठाय पुत्रायैव प्रोवाच ॥ ४ ॥

---

१ घ. ङ. ट. सर्वदे[3] । २ ङ. ण. °वं मन्त्रे° । ३ ख..छ. ञ. ण. °षदित्य° । ४ ख. छ. ञ. ण. °डयश्चैवं° । ५ ङ. च. ण. °च । स च म° । ६ क. ठ. क्रादिभ्यः । ७ घ. ङ. च. ण. °धुविज्ञा° । ८ ग, ट. °ता ब्रह्मविद्ब्रह्म° । ९ ङ. ङ. ढ. ण. °ह्मब्रह्मवि° । १० ख.°य ब्रह्म प्रो° ।

ननु विद्या सफला चेदुक्ता तर्हि किमुत्तरग्रन्थेनेत्याशङ्क्याऽऽह—तद्धैतदिति । स्तुतिमेवाभिनयति—ब्रह्मादीति । तद्धैनदुद्दालकायेत्यादिना विद्याया योग्यं पात्रं प्रदर्श्यते । तद्वचाचष्टे—किंचेति । इतश्च स्तुत्यर्हमेतद्विज्ञानमित्यर्थः । मधुविज्ञानं व्याकरोति—ब्रह्मविज्ञानमिति ॥ ४ ॥

इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्र-
णाय्याय वाऽन्तेवासिने ॥ ५ ॥

इदं वाव तद्यथोक्तमन्योऽपि ज्येष्ठाय पुत्राय सर्वप्रियार्हाय ब्रह्म प्रब्रूयात् । प्रणाय्याय वा योग्यायान्तेवासिने शिष्याय ॥ ५ ॥

तस्य परोक्षत्वं व्यावर्तयति—इदं वावेति । अथ ज्येष्ठाय पुत्राय ब्रह्म वक्तव्यमिति पूर्वेषामयं नियमो नेदानींतनानामित्यत आह—अन्योऽपीति । पात्रान्तरमनुजानाति—प्रणाय्यायेति ॥ ५ ॥

नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृ-
हीतां धनस्य पूर्णां ददादेतदेव ततो भूय इत्येतदेव
ततो भूय इति ॥ ६ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्यैकादशः खण्डः ॥ ११ ॥

नान्यस्मै कस्मैचन प्रब्रूयात्तीर्थद्वयमनुज्ञातमनेकेषां प्राप्तानां तीर्थानामाचार्यादीनाम् । कस्मात्पुनस्तीर्थसंकोचनं विद्यायाः कृतमित्याह—यद्यप्यस्मा आचार्यायेमां कश्चित्पृथिवीमद्भिः परिगृहीतां समुद्रपरिवेष्टितां समस्तामपि ददादस्या विद्याया निष्क्रयार्थमाचार्याय धनस्यं पूर्णां संपन्नां भोगोपकरणैर्नासावस्य निष्क्रयो यस्मात्ततोऽपि दानादेतदेव यन्मधुविद्यादानं भूयो बहुतरफलमित्यर्थः । द्विरभ्यास आदरार्थः ॥ ६ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्यैकादशः खण्डः ॥ ११ ॥

पुत्रशिष्याभ्यां पात्रान्तरं प्रत्याचष्टे—नेति । तीर्थद्वयं विद्याप्रदानेऽविकारिद्वयमित्यर्थः । निर्धारणे षष्ठी । आचार्यो विद्यादाता । आदिपदाद्धनदायी श्रोत्रियो मेधावी च गृह्यते । सर्वेषामर्थिनामत्राधिकारमाशङ्क्य दूषयति—कस्मादित्यादिना ।

---

१ क. °स्मै त° । २ ख. छ. झ. ण. °मित्याशङ्क्याऽऽह । ३ ख. घ. ङ. ज. ठ. ड. ढ. °स्य ईपू° । ४ ख. छ. झ. ण. °वी यू° ।

आचार्यायेति पुनरुपादानं क्रियापदेन तस्यान्वयद्योतनार्थं विद्यायामादरो वा मुख्यमधिकारकारणं फलतीति भावः ॥ ६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्यैकादशः खण्डः ॥ ११ ॥

(अथ तृतीयाध्यायस्य द्वादशः खण्डः)।

यत एवमतिशयफलैषा ब्रह्मविद्याऽतः सा प्रकारान्तरेणापि वक्तव्येति गायत्री वा इत्याद्यारभ्यते । गायत्रीद्वारेण चोच्यते । ब्रह्मणः सर्वविशेषरहितस्य नेति नेतीत्यादिविशेषप्रतिषेधबहुल्यस्य दुर्बोधत्वात् । सस्यर्चेनेकेषु च्छन्दःसु गायत्र्या एव ब्रह्मज्ञानद्वारतयोपादानं प्राधान्यात् । सोमाहरणादितरच्छन्दोक्षराहरणेनेतरच्छन्दोव्याप्त्या च सर्वसवनव्यापकत्वाच्च यज्ञे प्राधान्यं गायत्र्याः । गायत्रीसारत्वाच्च ब्राह्मणस्य मातरमिव हित्वा गुरुतरां गायत्रीं ततोऽन्यद्गुरुतरं न प्रतिपद्यते यथोक्तं ब्रह्मापीति । तस्यामत्यन्तगौरवस्य प्रसिद्धत्वात् । अतो गायत्रीमुखेनै(णै)व ब्रह्मोच्यते ।

गतेन ग्रन्थेनोत्तरग्रन्थस्य गतार्थत्वं परिहरति—यत इति । सवितृद्वारकब्रह्मविद्यानन्तरं तद्देवतागायत्रीद्वारेण तद्विद्योपदिश्यत इत्यर्थः । ब्रह्मविद्याया विवक्षितत्वे ब्रह्मैवोपदिश्यतां किं गायत्र्युपदेशेनेत्याशङ्क्याऽऽह—गायत्रीति । तथाऽपि च्छन्दोन्तराणि विहाय किमिति गायत्रीद्वारैव ब्रह्मोपदिश्यते तत्राऽऽह—सर्वस्वेति । ब्रह्मज्ञानद्वारतया तदुपायतयेत्यर्थः । प्राधान्ये हेतुमाह—सोमाहरणादिति । सोमस्याऽऽहरणमानयनम् । तत्र साधनत्वं गायत्रीछन्दस्कानामृचां याजकैरिष्यते । तदुक्तं तस्या यज्ञे प्राधान्यमित्यर्थः । यद्वा देवैः सोमाहरणमिच्छद्भिश्छन्दसां गायत्रीत्रिष्टुब्जगतीनां तादर्थ्येन नियोगे जगतीत्रिष्टुभोर्मध्येमार्गमशक्त्या निवृत्तौ गायत्री सोमं प्राप्य रक्षिणस्तस्य विनित्य तं देवेभ्यः समाहरदित्येतरेयकब्राह्मणे सोमो वै राजाऽमुष्मिँल्लोक आसीदित्यत्र प्रसिद्धमतस्तत्प्राधान्यमित्यर्थः । तत्रैव हेत्वन्तरमाह—इतरेति । उष्णिगनुष्टुप्प्रभृतीनीतराणि च्छन्दांसि तेषां पादशोऽक्षराणि सप्ताष्टादिसंख्याकानि तेषामाहरणमापादनं गायत्र्यक्षरैः पादशः षड्भिः क्रियतेऽधिकसंख्याया न्यूनसंख्यामन्तरेणासंभवात्तस्मादितरेषु च्छन्दःसु गायत्र्या व्याप्तेश्च प्राधान्यमित्यर्थः । अथवा गायत्रीव्यतिरिक्तयोस्त्रिष्टुब्जगतीछन्दसोः सोमाहरणोद्यतयोरशक्तयोर्मार्गमध्ये जगत्या त्यक्तानि त्रीण्यक्षराणि

१ क. ग. ङ. ट. ठ. ड. ढ. °ते ब्रह्मस° । ण. °ते ब्रह्म । ब्रह्मणः स° । २ च. दुर्वचत्वा° । ३ ठ. ड. °बोध्यत्वा° । ४ ट. ड. ण. °त्स्वप्यने° । ५ घ. च. ठ. ण. °ण्यस्य । ६ क. °रण ज्य° ।

त्रिष्टुभौ त्वेकमक्षरम्। ततश्चाष्टाचत्वारिंशदक्षरा जगती पञ्चचत्वारिंशदक्षरा संवृत्ता। चतुश्चत्वारिंशदक्षरा त्रिष्टुप्च त्रिचत्वारिंशदक्षरा संवृत्ता। तत्र गायत्री सोममाहरन्ती स्यक्तानामक्षराणामाहरणेन पूर्णतां तयोरापाद्य ते व्याप्य स्थिता तेन तत्प्राधान्यमित्यर्थः। तत्रैव हेत्वन्तरमाह—सर्वसवनेति। सर्वाणि प्रातःसवनं माध्यंदिनं सवनं तृतीयसवनमित्येतानि तेषु गायत्र्या व्यापकत्वं मिश्रणं गायत्रं प्रातःसवनं त्रैष्टुभं माध्यंदिनं सवनं जागतं तृतीयसवनमिति स्थितेऽपि त्रिष्टुब्जगत्योर्गायत्रीन्यायेनोक्तत्वात्तस्याश्च पादाभ्यां मुखेन च सोमाहरणद्वारेण सवनत्रयसंबन्धादतश्च तस्या अस्ति यज्ञे प्राधान्यमित्यर्थः। कर्मणि तत्प्राधान्येऽपि कुतो ब्रह्मविद्यायां तत्प्राधान्यमित्याशङ्क्याऽऽह—गायत्रीति। ब्रह्मविद्यायां तत्प्राधान्यमिति शेषः। गायत्रीमेवाऽऽलम्बनत्वेन प्रतिपद्यते ब्रह्मेत्यत्र लोकप्रसिद्धिमनुकूलयति—तस्यामिति। गायत्र्या ब्रह्मज्ञानद्वारत्वेनोपादानमुक्तहेतुभ्यः सिद्धमित्युपसंहरति—अत इति।

गायत्री वा इदꣳ सर्वं भूतं यदिदं किं च वाग्वै गायत्री वाग्वा इदꣳ सर्वं भूतं गायति च त्रायते च ॥ १ ॥

गायत्री वा इत्यवधारणार्थो वैशब्दः। इदं सर्वं भूतं प्राणिजातं यत्किंच स्थावरं जंगमं वा तत्सर्वं गायत्र्येव। तस्याश्छन्दोमात्रायाः सर्वभूतत्वमनुपपन्नमिति गायत्रीकारणं वाचं शब्दरूपामापादयति गायत्री वाग्वै गायत्रीति। वाग्वा इदं सर्वं भूतम्। यस्माद्वाक्शब्दरूपा सती सर्वं भूतं गायति[10] शब्दयत्यसौ गौरसावश्व इति च त्रायते च रक्षत्यमुष्मान्मा भैषीः किं ते भयमुत्थितमित्यादिना[11] सर्वतो भयान्निवर्त्यमानो वाचा त्रातः स्यात्। यद्वा-भूतं गायति च त्रायते च गायत्र्येव तद्गायति च त्रायते च वाचोऽनन्यत्वाद्गायत्र्याः। नानात्राणाच्च गायत्र्या गायत्रीत्वम् ॥ १ ॥

तथा चेतोर्पणनिगदादिति न्यायेन गायत्र्युपाधिकं ब्रह्मोपास्यमिति प्रतिजानीते—गाय-

---

१ क. ग. ट. °भा चैक°। २ क. °द्य तयोर्व्यवस्थि°। ३ क. ख. ग. छ. ज. ण. °धायास्त-त्रा°। ४ क. ग. ट. °द्वारेणापा°। ५ ख. घ. ङ. च. ञ. ण. °रणां वा°। ६ क. ग. ट. °ति च श्रु°। ७ ङ. ठ. °यति चासौ। ८ क. ग. घ. ट. ङ. °ति त्रा°। ९ ङ. °न्मा हिंसीरिदं ते। १० घ. ट. भैषीरिदं ते। ११ क. ग. ट. ङ. °दि स°। १२ ठ. ङ. स ततो।

त्रीति । निपातमादाय व्याचष्टे-वा इति । अवधारणरूपमेवार्थं स्फुटयन्निदमित्यादि व्याकरोति—इदमिति । तदिदं सर्वं गायत्र्येवेति योजना । गायत्र्याः सर्वात्मकत्वाद्ब्रह्मदृष्ट्योपास्तिर्युक्तेत्युक्ते तत्रानुपपत्तिमाशङ्क्यानन्तरवाक्येनो(णो)त्तरमाह—तस्या इति । कथं वाचो गायत्रीत्वमित्याशङ्क्य तस्याः सर्वभूतसंबन्धं दर्शयति—वागिति । कुतो गायत्रीत्वं तत्राऽऽह—यस्मादिति । भवत्वेवं वाचः स्वरूपं गायत्र्यास्तु किमायातं तदाह—यद्वागिति । गायत्रीनामनिर्वचनादपि वाच्युक्तं रूपं गायत्र्यामेव द्रष्टव्यमित्याह—गानादिति ॥ १ ॥

या वै सा गायत्रीयं वाव सा येयं पृथिव्यस्याꣳ हीदꣳ सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते ॥ २ ॥

या वै सैवंलक्षणा सर्वभूतरूपा गायत्री, इयं वाव सा येयं पृथिवी । कथं पुनरियं पृथिवी गायत्रीति । उच्यते—सर्वभूतसंबन्धात् । कथं सर्वभूतसंबन्धः, अस्यां पृथिव्यां हि यस्मात्सर्वं स्थावरं जंगमं च भूतं प्रतिष्ठितमेतामेव पृथिवीं नातिशीयते नातिवर्तत इत्येतत् । यथा त्रिनेत्राण्यां भूतसंबन्धो गायत्र्या एवं भूतप्रतिष्ठानाद्भूतधात्री पृथिव्यतो गायत्री पृथिवी ॥ २ ॥

अस्ति हि वाचः सर्वभूतात्मकत्वं तद्वाच्यस्य च वाचकातिरेकेणानिरूपणात्तथा च वाग्भूता गायत्री सर्वभूतात्मकेत्युक्तमिदानीं तस्या विधानान्तरमाह—या वै सेति । एवंलक्षणत्वं व्याचष्टे—सर्वेति । गायत्रीमनूद्य पृथिवीत्वं तस्या विहितं प्रश्नपूर्वकमुपपादयति—कथं पुनरिति । गायत्र्याः सर्वभूतसंबन्धस्योक्त्वा त्पृथिव्यास्तत्संबन्धं चोद्यपूर्वकं व्युत्पादयति—कथमिति । सर्वस्य पृथिव्यां प्रतिष्ठितत्वं साधयति—एतामेवेति । तथाऽपि कथं पृथिव्या गायत्रीत्वं तदाह—यथेति ॥ २ ॥

या वै सा पृथिवीयं वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्ह्येते प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥ ३ ॥

या वै सा पृथिवी गायत्रीयं वाव सेदमेव । तत्किं, यदिदमस्मिन्पुरुषे कार्यकारणसंघाते जीवति शरीरं पार्थिवत्वाच्छरीरस्य । कथं शरीरस्य गायत्रीत्वमिति । उच्यते—अस्मिन्ह्येते प्राणा भूतशब्दवाच्याः प्रतिष्ठिताः ।

---

१ क. ग. ट. 'च्युक्तरू' ।

अतः पृथिवीभूतशब्दवाच्यप्राणप्रतिष्ठानाच्छरीरं गायत्री । एतदेव यस्माच्छरीरं नातिशीयन्ते प्राणाः ॥ ३ ॥

संप्रति गायत्र्याः शरीररूपत्वं निरूपयति—या वा इति । गायत्र्यात्मिकां पृथिवीमनूद्य तस्या गायत्रीशरीरयोरभेदे हेतुमाह—पार्थिवत्वादिति । इदानीं गायत्रीशरीरयोरैकत्वं प्रश्नपूर्वकं कथयति—कथमित्यादिना । प्राणानां शरीरे प्रतिष्ठितत्वं प्रकटयति—एतदेवेति ॥ ३ ॥

यद्वै तत्पुरुषे शरीरमिदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे हृदयमस्मिन्ह्येते प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते ॥ ४ ॥

यद्वै तत्पुरुषे शरीरं गायत्रीदं वाव तत् । यदिदमस्मिन्नन्तर्मध्ये पुरुषे हृदयं पुण्डरीकाख्यमेतद्गायत्री । कथमित्याह—अस्मिन्ह्येते प्राणाः प्रतिष्ठिता अतः शरीरवद्गायत्री हृदयम् । एतदेव च नातिशीयन्ते प्राणाः । "प्राणो ह पिता । प्राणो माता ।" [इति] "अहिंसन्सर्वभूतानि" इति च श्रुतेर्भूतशब्दवाच्याः प्राणाः ॥ ४ ॥

अथ गायत्र्या हृदयत्वमाक्षिपति—यद्वै तदिति । गायत्र्याश्चैकत्वं प्रश्नपूर्वकं विवृणोति—एतदित्यादिना । हृदये प्राणानां प्रतिष्ठितत्वं प्रकटयति—एतदेवेति । प्राणानां भूतशब्दवाच्यत्वे तत्संबन्धे सति भूतसंबन्धाद्गायत्र्याः शरीरादिभावः संभवति । तेषां भूतशब्दवाच्यत्वे तु किं मानमित्याशङ्क्याऽऽह—प्राणो हेति । अहिंसावाक्येऽपि प्राणपरं मारणं प्रतिषिध्यते । तथा च भूतशब्दस्तत्र प्रतीतिगोचरो भवत्येवेत्याह—भूतेति ॥ ४ ॥

सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाऽभ्यनूक्तम् ॥ ५ ॥

सैषा चतुष्पदा षडक्षरपदा छन्दोरूपा सती भवति गायत्री षड्विधा वाग्भूतपृथिवीशरीरहृदयप्राणरूपा सती षड्विधा भवति । वाक्प्राणयोरन्यार्थनिर्दिष्टयोरपि गायत्रीप्रकरणत्वात् । अन्यथा षड्विधसंख्यापूरणानुपपत्तेः । तदेतत्तस्मिन्नर्थ एतद्गायत्र्याख्यं ब्रह्म गायत्र्यनुगतं गायत्रीमुखेनो(णो)क्तमृचाऽपि मन्त्रेणाभ्यनूक्तं प्रकाशितम् ॥ ५ ॥

---

१ ठ. ढ. 'व भूत' । २ क. ग. ट. 'णो हि पि' । ३ घ. ञ. 'न्सर्व भू' । ४ क. ठ. 'ति श्रु' । ५ क. ग. ट. 'णो ह्येति । ६ क. ग. घ. च. ट. ठ. 'रपादा । ७ घ. ठ. ड. ढ. 'तदा' ।

आध्यानशेषत्वेन गायत्र्याश्चतुष्पात्त्वं दर्शयति—सैषेति । लक्षयित्वा तस्याः षड्विधत्वमनूद्य साधयति—षड्विधेति । गायत्रीहृदययोः सर्वभूतसंबन्धसिद्ध्यर्थमुपदिष्टयोर्वाक्प्राणयोर्गायत्रीप्रभेदत्वेन कथं व्याख्यानमित्याशङ्क्याऽऽह—वाक्प्राणयोरिति । विधिपक्षे वाक्यशेषयोर्गात्रयोरपि गायत्रीभेदत्वमित्यर्थः । तदेतदभिप्रेत्य वाग्भूतपृथिवीशरीरहृदयप्राणभेदात्षड्विधां गायत्रीमनुचिन्त्याजहल्लक्षणया तदवच्छिन्नब्रह्मत्वं तदनुचिन्तयेदिति तच्छेषत्वेनैव पूर्वोक्ते स्थिते सतीत्यर्थः ॥ ५ ॥

तावानस्य महिमा ततो ज्यायाꣳश्च पूरुषः । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति ॥ ६ ॥

तावानस्य गायत्र्याख्यस्य ब्रह्मणः समस्तस्य महिमा विभूतिर्विस्तारः । यावांश्चतुष्पात्त्वड्विधश्च ब्रह्मणो विकारः पादो गायत्रीति व्याख्यातः । अतस्तस्माद्विकारलक्षणाद्गायत्र्याख्याद्वाचाऽऽरम्भणमात्रात्ततो ज्यायान्महत्तरश्च परमार्थसत्यैकरूपोऽविकारः पूरुषः पुरुषः सर्वपूरणात्पुरि शयनाच्च । तस्यास्य पादः सर्वा सर्वाणि भूतानि तेजोऽबन्नादीनि सस्थावरजंगमानि । त्रिपाद्यवयः पादा अस्य सोऽयं त्रिपात् । त्रिपादमृतं पुरुषाख्यं समस्तस्य गायत्र्यात्मनो दिवि द्योतनवति स्वात्मन्यवस्थितमित्यर्थ इति ॥ ६ ॥

समस्तस्य पादविभागविशिष्टस्येति यावत् । विस्तारमेव विवृणोति—यावानिति । वाचाऽऽरम्भणं विकारो नामधेयमिति वाक्यशेषमाश्रित्य विशिनष्टि—वाचाऽऽरम्भणमात्रादिति । परमार्थसत्यत्वे हेतुमाह—अविकार इति । तावानस्येत्यादि स्पष्टयति—तस्येति । आदिपदेन वायुराकाशश्चेत्युभयमुक्तम् । ततो ज्यायानित्यादि स्फुटयति—त्रिपादिति । समस्तस्यैं प्रपञ्चात्मकस्येत्यर्थः । श्रुताविति शब्दो मन्त्रसमाप्त्यर्थः ॥ ६ ॥

यद्वै तद्ब्रह्मेतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशः ॥ ७ ॥

यद्वै तत्त्रिपादमृतं गायत्रीमुखेनो(णो)क्तं ब्रह्मेतीदं वाव तदिदमेव । तद्योऽयं प्रसिद्धो बहिर्धा बहिः पुरुषादाकाशो भौतिको यो वै स बहिर्धा पुरुषादाकाश उक्तः ॥ ७ ॥

---

१ क. ख. ग छ. ण. °र्थः । तस्मि° । ट. °र्थः । एतस्मि° । २ ख. छ. °णप्रभे° । ३ ब. घ. च. ट. ठ. ड. ढ. ण. °तिर्विस्ता° । ४ च. ङ. ढ. ण. °त्यभूतोऽवि । ५ क. ग. ट. ड. °पुरीश° । ६ घ. च. ठ. °नाद्वा । त° । ७ क. ग. ट. °त्य सर्वत्र° ।

यद्ब्रह्म गायत्र्यवच्छिन्नमुपास्यमुक्तं हृदयाकाशे तद्ध्येयमिति वक्तुं क्रमेण हृदयाकाशमवतारयति—यद्वै तदित्यादिना ॥ ७ ॥

अयं वाव स योऽयमन्तः पुरुष आकाशो यो वै सोऽन्तः पुरुष आकाशः ॥ ८ ॥

अयं वाव स योऽयमन्तः पुरुषे शरीर आकाशो यो वै सोऽन्तः पुरुष आकाशः ॥ ८ ॥

॥ ८ ॥

अयं वाव स योऽयमन्तर्हृदय आकाशस्तदेतत्पूर्ण-मप्रवर्ति पूर्णामप्रवर्तिनीꣳ श्रियं लभते य एवं वेद ॥ ९ ॥

इति छान्दोग्योपनिषदि तृतीयाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

अयं वाव स योऽयमन्तर्हृदये[1] हृदयपुण्डरीक आकाशः । कथमेकस्य सत आकाशस्य त्रिधा भेद इति । उच्यते—बाह्येन्द्रियविषये जागरितस्थाने नभसि दुःखबाहुल्यं दृश्यते । ततोऽन्तःशरीरे स्वप्नस्थानभूते मन्दतरं दुःखं भवति । स्वप्नान्पश्यतो हृदयस्थे पुमर्नभसि न कंचन कामं कामयते न कंचन स्वप्नं पश्यति । अतः सर्वदुःखनिवृत्तिरूपमाकाशं सुषुप्तस्थानम् । अतो युक्तमेकस्यापि त्रिधा भेदान्[3]वाख्यानम् । बहिर्धा पुरुषादारभ्याऽऽकाशस्य हृदये संकोचकरणं चेतःसमाधानस्थानस्तुतये । यथा " त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते । अर्धतस्तु कुरुक्षेत्रमर्धतस्तु पृथूदकम् " इति तद्वत् । तदेतद्धृदयाकाशाख्यं ब्रह्म पूर्णं सर्वगतं न हृदयमात्रपरिच्छिन्नमिति मन्तव्यम् । यद्यपि हृदयाकाशे चेतः समाधीयतेऽप्रवर्ति न कुतश्चित्कचित्प्रवर्तितुं शीलमस्येत्यप्रवर्ति तदनुच्छित्तिधर्मकम् । यथाऽन्यानि भूतानि परिच्छिन्नान्युच्छित्तिधर्मकाणि न तथा हार्दं नभः पूर्णामप्रवर्तिनीम[5]च्छेदात्मिकां श्रियं विभूतिं गुणफलं लभते दृष्टं य एवं यथोक्तं पूर्णाप्रवर्तिगुणं ब्रह्म वेद जानातीत्येव जीवस्तद्भावं प्रतिपद्यत इत्यर्थः ॥ ९ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

---

१ क. ङ. ञ. °ये हृत्पुण्ड° । २ क. ग. च. ठ. ढ. ण. °स्यस्था° ३ ण. °दाद्वाख्या° । ४ क. ग. ङ. °श्चित्प्र° । ५ ङ. ण. °श्चेदात्मि° ।

एकस्याऽऽकाशस्य कथं त्रैविध्यमुक्तमिति शङ्कते—कथमिति । औपाधिकत्रैविध्यमविरुद्धमिति परिहरति—उच्यत इति । बाह्येन्द्रियविषयत्वं तद्विषयशब्दाभ्याश्रयत्वं स्वप्नस्थानभूते नभसीति संबन्धः । न कंचनेत्यादिना निषेधद्वयेन पूर्वप्रकारमवस्थाद्वयं निषिध्यते । निषेधफलमाह—अत्र इति । सर्वदुःखं स्थूलं वासनामयं च तन्निवृत्त्या निरूप्यमाणं हृदयाकाशमित्यर्थः । औपाधिकत्रैविध्यमुपसंहरति—अत्र इति । तथाऽपि किमित्यनेन क्रमेणाऽऽकाशस्य संकोचो हृदये क्रियते तत्राऽऽह—बहिर्धेति । स्थानस्तुतिमुदाहरणेन स्फुटयति—यथेति । अत्र कुरुक्षेत्रमर्धतोऽर्धस्थानीयं पृथूदकमपि तथेति द्विदलयुगलमिव तदुभयं लोकत्रयापेक्षया विशिष्टतरमित्यर्थः । हृदयाकाशे चेतः समाधीयते चेत्तत्रश्चात्र परिच्छिन्नं ब्रह्म प्राप्तमित्याशङ्क्य ऽऽह—तदेतदिति । पूर्णत्वेन जन्मनाशशून्यत्वं सिध्यतीत्याह—अप्रवर्तीति । प्रधानफलत्वं व्यावर्तयति—गुणफलमिति । दृष्टफलवते स्वर्गादिरिति दृष्टमित्युक्तम् । ज्ञानमेव विशिनष्टि—इहैवेति । वर्तमानो देहः सप्तम्यर्थः । यो ह्येवं विद्वानेवं स यथोक्तं फलं लभत इति संबन्धः ॥ ९ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

—:⊙-⊙-⊙-⊙:—

(अथ तृतीयाध्यायस्य त्रयोदशः खण्डः) ।

तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषयः स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद ॥ १ ॥

तस्य ह वा इत्यादिना गायत्र्याख्यस्य ब्रह्मण उपासनाङ्गत्वेन द्वारफलादिगुणविधानार्थमारभ्यते । यथा लोके द्वारपाला राज्ञ उपासनेन वशीकृता राजप्राप्त्यर्था भवन्ति तथेहापीति । तस्येति प्रकृतस्य हृदयस्येत्यर्थः । एतस्यानन्तरनिर्दिष्टस्य पञ्च पञ्चसंख्याका देवानां सुषयो देवसुषयः स्वर्गलोकप्राप्तिद्वारच्छिद्राणि देवैः प्राणादित्यादिभी रक्ष्यमाणानीत्यतो देवसुषयस्तस्य स्वर्गलोकभवनस्य हृदयस्यास्य यः प्राङ्सुषिः

---

१ क. ग. छ. ट. ण. सर्वं दुः° । २ ख. छ. ण. °ति विद°। ३ ख. घ. ङ. च. ञ. ठ ढ. ण. वा एतस्येत्या° । ४ घ. ङ. ठ. राज्ञामुपा° । ५ घ. ट. राज्ञां प्रा° । ङ. राज्ञः प्रा° । ६ घ. च. स्वर्लोक° । ७ ङ. ढ. ण. °कभुव° ।

पूर्वाभिमुखस्य प्राग्गतं यच्छिद्रं द्वारं स प्राञ्चस्तत्स्थस्तेन द्वारेण यः संचरति वायुविशेषः स प्राणनितीति प्राणः । तेनैव संबद्धमव्यतिरिक्तं ब्रह्मचक्षुस्तथैव स आदित्यः " आदित्यो ह वै बाह्यः प्राणः " इति श्रुतेश्चक्षूरूपप्रतिष्ठाक्रमेण हृदि स्थितः । " स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषि " इत्यादि हि वाजसनेयके । प्राणवायुदेवतैव ह्येका चक्षुरादित्यश्च सहाऽऽश्रयेण । वक्ष्यति च—प्राणाय स्वाहेति हुतं हविः सर्वमेतत्पर्यतीति । तदेतत्प्राणाख्यं स्वर्गलोकद्वारपालत्वाद्ब्रह्म । स्वर्गलोकं प्रतिपित्सुस्तेजश्चैतच्चक्षुरादित्यस्वरूपेणाऽऽद्यत्वाच्च सवितुस्तेजोऽन्नाद्यमित्याभ्यां गुणाभ्यामुपासीत । ततस्तेजस्व्यन्नादश्चाऽऽमयावित्वरहितो भवति य एवं वेद तस्यैतद्दुणफलम् । उपासनेन वशीकृतो द्वारपः स्वर्गलोकप्राप्तिहेतुर्भवतीति मुख्यं च फलम् ॥ १ ॥

वक्ष्यमाणज्ञानस्य स्वातन्त्र्यं परिहृत्य प्रकरणभेदं व्यावर्तयितुमुत्तरग्रन्थस्य तात्पर्यमाह—तस्येति । द्वारपालदीत्यादिपदेन तद्वतो विशेषो गृह्यते । ब्रह्मण्युपासनेनाप्रसिद्धितो द्वारपालोपास्तिरयुक्तेत्याशङ्क्याऽऽह—यथेति । इति तदुपास्तिरर्थवतीति शेषः । स्वर्गलोकशब्दः परमात्मविषयः । स्वर्गो लोकमिति ऊर्ध्वो विमुक्त इति श्रुत्यन्तरात् । देवसुषित्वं साधयति—देवैरिति । स्वर्गलोकस्य परमात्मनो भवनमास्पदं तस्येति यावत् । प्राक्त्वेऽनवस्थानाशङ्क्योक्तं पूर्वाभिमुखस्थेति । तत्स्थस्तेनेति । तच्छब्दो हृदयविषयः । तेनेति । प्राणविषयस्तच्छब्दः । तदव्यतिरिक्तत्वं स्वातन्त्र्येण चक्षुषोऽकिंचित्करत्वम् । न हि चक्षुषः प्राणस्य संबन्धो न हि बाह्यस्य तत्संबन्धे निबन्धनमस्ति तत्राऽऽह—चक्षुरिति । अधिष्ठातृत्वेनाऽऽदित्यश्चक्षुषि प्रतिष्ठितश्चक्षुश्च ग्राहकतया रूपे प्रतिष्ठितं रूपदर्शने करणं भवति । तथैव प्राणस्य चक्षुष्ट्वमित्यर्थः । प्राणादित्ययोरैक्ये प्रमाणमाह—आदित्यो हेति । कथं यथोक्तस्याऽऽदित्यस्य हृदयसुषिद्वारस्थानित्वं वासनात्मना हृदये [प्रतिरूपाणि] प्रतिष्ठितानि तद्गाऽनेन क्रमेणाऽऽदित्यो हृदये तिष्ठतीत्यर्थः । तत्र श्रुत्यन्तरं प्रमाणयति—स आदित्य इति । एकदेवताभिन्नत्वादपि प्राणाभेदेन चक्षुरादित्ययोरध्यानं युक्तमित्याह—प्राणेति । आश्रयशब्देन रूपाणि हृदयं चोच्यते द्युलोको वा । आदित्यश्चक्षुषोर्देवस्तदधिष्ठितस्य

---

१ ख. म. ण. प्राग्गच्छती° । २ घ. ङ. च. ठ. ङ. ढ. °तश्चक्षु° । ३ च. °त्यादीति वा° । ४ क. ग. ट. ठ. ड. °दि वा° । ५ ख. ग. घ. ङ. च. ञ. ट. ठ. ड. ढ. °लोकप्र° । ६ ङ. ढ. °जस्त्वेत° । ७ ङ. °णान्नदत्वा° । ८ क. ग. ट. ङ. ढ. °न्नादत्वा° । ९ घ. ङ. ठ. °ति तु मु° । १० क. °मुक्त्वा वेति । ११ ग. ट. °क्तावेति । १२ क. ख. ङ. ञ. ण. °रस्याऽऽत्म° । १३ क. °क्षुषा प्रा° ।

सर्वस्य प्राणात्मत्वे वाक्यशेषमनुकूलयति—वक्ष्यति चेति । न हि प्राणे तृप्यति सर्वस्य तृप्तिस्तादात्म्यमन्तरेण संभवतीति भावः । तदेतत्प्राणाख्यं ब्रह्म स्वर्गलोकं प्रतिपित्सुः सत्पुरुषस्तेनोऽन्नाद्यमत्ताभ्यां गुणाभ्यां विशिष्टमुपासीतेति संबन्धः । किमिति यथोक्तोऽधिकारी प्राणोपासने नियुज्यते तत्राऽऽह—स्वर्गेति । तथाऽपि कथं यथोक्तगुणद्वयवैशिष्ट्यं प्राणाख्यस्य ब्रह्मणः सिध्यति । तत्र तेजःशब्दं व्याकुर्वन्नाह—तेजस्वीति । एतत्प्राणाख्यं ब्रह्मोभयरूपेण तेजस्वी तथा च तेजोगुणविशिष्टतया तदुपासनामर्हति । सवितुश्चान्नदत्वं वृष्टिद्वारेण "आदित्याज्जायते वृष्टिः" इत्यादौ दृष्टमतश्चान्नं च तदाद्यं चेति गुणान्तरविशिष्टत्वेनापि सवितृरूपं प्राणाख्यं ब्रह्म ध्यानार्हमित्यर्थः । किं तर्हि मुख्यं फलमिति तदाह—उपासनेनेति ॥ १ ॥

अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रꣳ स चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान्यशस्वी भवति य एवं वेद ॥ २ ॥

अथ योऽस्य दक्षिणः सुषिस्तत्स्थो वायुविशेषः स वीर्यवत्कर्म कुर्वन्निगृह्य वा प्राणापानौ नानाँ वाऽयमिति व्यानस्तत्संबद्धमेव च तच्छ्रोत्रमिन्द्रियं तथा स चन्द्रमाः । श्रोत्रेण सृष्टा दिशश्चँ चन्द्रमाश्चेति श्रुतेः सहाश्रयौ पूर्ववत्तदेतच्छ्रीश्च विभूतिः श्रोत्रचन्द्रमसोर्ज्ञानान्नहेतुत्वमतस्ताभ्यां श्रीरूपम् । ज्ञानान्नवतश्च यशःख्यातिर्भवतीति यशोहेतुत्वाद्यशस्त्वमतस्ताभ्यां गुणाभ्यामुपासीतेत्यादि समानम् ॥ २ ॥

हृदयस्य पूर्वदिगवस्थितच्छिद्रसंबन्धित्वेन प्राणमुक्त्वा व्यानः श्रोत्रं चन्द्रमाश्चेति त्रितयमितरसंबन्धमुपास्यमित्याह—अथेति । वीर्यवत्कर्म कुर्वन्निति संबन्धः । प्राणापानौ निगृह्य विरुध्य वाऽयमनितीति पक्षान्तरं नानास्कन्धसंधिमर्मसु विविधमनितीति चेष्टत इति विकल्पान्तरं तेन व्यानेन संबन्धः श्रोत्रस्य श्रुयुक्तत्वाद्ध्यानार्थो मन्तव्यः । यथा श्रोत्रस्य व्यानेन संबन्धस्तथा चन्द्रमसोऽपि तेन संबन्धस्य श्रुयुक्तत्वादेव ध्यानार्थतया ग्राह्य इत्याह—तथेति । श्रोत्रचन्द्रमसोः संबन्धे श्रुत्यन्तरमनुकूलयति—श्रोत्रेणेति । यद्विराजः श्रोत्रं तदात्मना दिशश्चन्द्रमाश्चेत्येते सृष्टा इति श्रुतेरित्यर्थः । मिथः संबन्धेऽपि कथमनयोर्न्यूनात्मत्वं व्याने तृप्यतीत्यादिवाक्यशेषादवधेयमित्यर्थः । तदेतद्ध्यानाख्यं ब्रह्म श्रीश्च यशश्चेत्याभ्यां गुणाभ्यामुपासीतेति संबन्धः ।

---

१ क. तृप्ति स° । २ ख. छ. ञ. °लोकप्र° । ३ ख. छ. ञ. ण. मुख्यफ° । ४ ण. °नाऽत्याऽनि° । ५ ख. घ. ञ. °मेवैत° । ६ क. घ. ठ. ड. °श्चन्द्र° । ७ क. ग. °बद्धमु° । ८ क ठ. वेन्व्यान इति ।

कथं तस्य गुणद्वयवतो ध्यानमित्याशङ्क्य श्रोत्रस्य ज्ञानहेतुत्वाच्चन्द्रमसोऽन्नहेतुत्व तयोराश्रयत्वे तदात्मनो व्यानस्यापि तद्गुणत्वोपपत्तिरित्याह—श्रोत्रेति । व्यानाख्ये ब्रह्मणि गुणान्तरं साधयति—ज्ञानेति । उक्तस्य ब्रह्मणो गुणद्वयसंभवोऽतःशब्दार्थः । श्रीमानित्यादिफलवाक्यमादिशब्दार्थः । समानं तेजस्वीत्यादिवाक्येनेति शेषः ॥२॥

अथ योऽस्य प्रत्यङ्सुषिः सोऽपानः सा वाक्सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एवं वेद ॥ ३ ॥

अथ योऽस्य प्रत्यङ्सुषिः पश्चिमस्तत्स्थो वायुविशेषः स मूत्रपुरीषाद्यपनयनधोऽनितीत्यपानः सा तथा वाक् । तत्संबन्धात्तथाऽग्निस्तदेतद्ब्रह्मवर्चसं, वृत्तस्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसम् । अग्निसंबन्धाद्वृत्तस्वाध्यायस्य । अन्नग्रसनहेतुत्वादपानस्यान्नाद्यत्वम् । समानमन्यत् ॥ ३ ॥

हृदयस्य पश्चिमदिगवस्थितसुषिसंबन्धत्वेन पानो वागग्निश्चेति त्रितयमन्योन्यसंबन्धं ध्येयमित्याह—अथ योऽस्येति । सोऽपान इत्यास्यार्थमाह—तत्स्थ इति । सोऽपान इति संबन्धः । अपानशब्दं वायुविशेषे व्युत्पादयति—मूत्रेति । आदिशब्देन शुक्रादि गृह्यते । यथा चक्षुषः श्रोत्रस्य प्राणत्वं व्यानत्वं चोक्तं तथा वागपानो भवत्यपाने तृप्यतीत्यादिश्रुतेरित्याह—सा तथेति । यथा चक्षुरादिद्वारेणाऽऽदित्यादेः प्राणादिरूपत्वमुक्तं तथा वाचोऽविष्ठातृत्वेन संबन्धादग्नेस्तद्द्वारेणापानो भवतीत्याह—तत्संबन्धादिति । तदेतदपानाख्यं ब्रह्मवर्चसमन्नाद्यमित्याभ्यां[3] गुणाभ्यां विशिष्टमुपासीतेति संबन्धः । ब्रह्मवर्चसं व्याचष्टे—वृत्तेति । कथमपानाख्ये ब्रह्मणि यथोक्तो गुणः सिध्यतीत्याशङ्क्याग्निद्वारेत्याह—अग्निसंबन्धादिति । तथाऽपि कथमन्नाद्यत्वमित्याशङ्क्यापानद्वारेणेत्याह—अन्नेति । ब्रह्मवर्चसीत्यादिफलवाक्यं श्रीमानित्यादिना तुल्यार्थत्वान्न व्याख्यानापेक्षमित्याह—समानमिति ॥ ३ ॥

अथ योऽस्योदङ्सुषिः स समानस्तन्मनः स पर्जन्यस्तदेतत्कीर्तिश्च द्युष्टिश्चेत्युपासीत कीर्तिमान्द्युष्टिमान्भवति य एवं वेद ॥ ४ ॥

अथ योऽस्योदङ्सुषिरुद्गतः सुषिस्तत्स्थो वायुविशेषः सोऽशित-

---

१ ङ. ण.° त्वाच्चन्द्रांशत्वा° । २ क. ग. ट. °नीक्ष्यव° । ३ ख. ङ. च. °भ्यां वि° । ४ ख. ङ. ण. °रेणेत्या° । ५ क. ग. ट. °वाक्ये श्री° ।

पीते समं नयतीति समानः । तत्संबद्धं मनोऽन्तःकरणं स पर्जन्यो वृष्ट्यात्मको देवः पर्जन्यनिमित्ताश्चाऽऽप इति । " मनसा सृष्ट्वा आपश्च ववृषुः " इति श्रुतेः । तदेतत्कीर्तिश्च । मनसो ज्ञानस्य कीर्तिहेतुत्वात् । आत्मपरोक्षं विश्रुतत्वं कीर्तिर्यशः । स्वकरणसंवेद्यं विश्रुतत्वं व्युष्टिः कान्तिर्देहगतं लावण्यम् । ततश्च कीर्तिसंभवात्कीर्तिश्चेति । समानमन्यत् ॥ ४ ॥

हृदयस्योत्तरसुषिसंबन्धत्वेन समानो मनः पर्जन्यश्चेति त्रितयं परस्परसंबद्धमुपास्यमित्याह—अथेति । समान इति संबन्धः । समानशब्दं वायुविशेषे व्युत्पादयति—अशितेति । मनसः समानेन संबन्धः समाने तृप्यतीत्यादिश्रुतेर्ग्राह्य इत्याह—तत्संबद्धमिति । मनसि तृप्यति पर्जन्यस्तृप्यतीति वाक्यशेषमाश्रित्य तयोः संबन्धमाह—पर्जन्य इति । श्रुत्यन्तरादपि तयोः संबन्धं वक्तुं पातनिकामाह—पर्जन्येति । शेषः प्रसिद्धिपरामर्शार्थः । तथाऽपि कथं पर्जन्यमनसोः संबन्धसिद्धिरित्याशङ्क्य वायोरपि कारणत्वेनाद्भिः संबन्धात्तद्द्वारा मिथोऽपि तत्सिद्धिरित्याह—मनसीति । तदेतत्समानाख्यं ब्रह्म कीर्तिश्च व्युष्टिश्चेत्याभ्यां गुणाभ्यामुपासीतेति संबन्धः । तत्र ब्रह्मणि कीर्तिरूपं गुणं साधयति—मनस इति । व्युष्टेरर्थान्तरत्वं कीर्तेर्दर्शयति—आत्मेति । ततो व्युष्टेराचष्टे—स्वकरणेति । तामेवानुभूयमानतया कथयति—कान्तिरिति । कथं पुनर्देहगतस्य लावण्यस्य कीर्तितस्तवः शक्यते तत्राऽऽह—ततश्चेति । लावण्यं पञ्चम्यर्थः । इत्यसंकीर्णगुणद्वयविशिष्टमुपासनं सिद्धमित्यर्थः । कीर्तिमानित्यादिफलवाक्यस्य ब्रह्मवर्चसीत्यादिना तुल्यार्थत्वादव्याख्येयत्वमाह—समानमिति ॥ ४ ॥

अथ योऽस्योर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एवं वेद ॥ ५ ॥

अथ योऽस्योर्ध्वः सुषिः स उदान आ पादतलादारभ्योर्ध्वमुत्क्रमणादुत्कर्षार्थं च कर्म कुर्वन्नितीत्युदानः । स वायुस्तदाधारश्चाऽऽकाशस्तदेतद्वायवाकाशयोरोजोहेतुत्वादोजो बलं महत्त्वाच्च मह इति । समानमन्यत् ॥ ५ ॥

हृदयस्योर्ध्वच्छिद्रविशिष्टत्वेनोदानो वायुराकाशश्चेति त्रितयमन्योन्यसंबन्ध(द्ध)मुपास्य-

---

१ क. ङ. ण °स्संबन्धं म° । २ ख. ञ. °णं प° । ३ ख. ण. °बन्धमुं । ४ क. ख. ग. छ. ञ. ट. ण. °बन्धामि° । ५ क. ग. ट. °ति । तदेव वा° । ६ क. ग. ट. °सिद्ध° । ७ क. ग. ट. °भवरु° । ८ घ. ठ. °र्थाच्च क° ।

मित्याह—अथ योऽस्येति । उत्क्रमणादुदान इति संबन्धः । उदाने तृप्यति वायुस्तृप्यतीति वाक्यशेषमाश्रित्याऽऽह— स वायुरिति । वायोराकाशत्वमाधाराधेयभावान्नाद्वायौ तृप्यत्याकाशस्तृप्यतीति श्रुतेश्चेत्याह—तदाधारश्चेति । तदेतदुदानाख्यं ब्रह्म पूर्ववदोजो महश्चेत्याभ्यां विशिष्टमुपासीतेति संबन्धः । उक्तगुणद्वयं निर्दिशति—बाह्याकाशश्चेति । ओजस्वीत्यादिवाक्यस्य कीर्तिमानित्यादिना तुल्यार्थत्वमाह—समानमिति ॥ ५ ॥

ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेवं पञ्च ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद ॥ ६ ॥

ते वा एते यथोक्ताः पञ्चसुषिसंबन्धात्पञ्च ब्रह्मणो हार्दस्य पुरुषा राजपुरुषा इव द्वारस्थाः स्वर्गस्य हार्दस्य लोकस्य द्वारपाः द्वारपालाः । एतैर्हि चक्षुःश्रोत्रघ्राणवाङ्मनःप्राणैर्बहिर्मुखप्रवृत्तैर्ब्रह्मणो हार्दस्य प्राप्तिद्वाराणि निरुद्धानि । प्रत्यक्षं ह्येतदजितकरणतया बाह्यविषयासङ्गानृतप्रारूढत्वान्न हार्दे ब्रह्मणि मनस्तिष्ठति । तस्मात्सत्यमुक्तमेते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपा इति । अतः स य एतानेवं यथोक्तगुणविशिष्टान्स्वर्गस्य लोकस्य द्वारपान्वेदोपास्त उपासनया वशी करोति स राजद्वारपालानिवोपासनेन वशीकृत्य तैरनिवारितः प्रतिपद्यते स्वर्गं लोकं राजानमिव हार्दं ब्रह्म । किंचास्य विदुषः कुले वीरः पुत्रो जायते धीरपुरुषसेवनात् । तस्य चर्णापाकरणेन ब्रह्मोपासनप्रवृत्तिहेतुत्वम् । ततश्च स्वर्गलोकप्रतिपत्तये पारम्पर्येण भवतीति स्वर्गलोकप्रतिपत्तिरेवैकं फलम् ॥ ६ ॥

तस्य ह वा एतस्येत्यादिनोक्तमनुवदति—ते वा इति । कथं ब्रह्मपुरुषास्तत्राऽऽह—राजपुरुषा इति । व्यपदिश्यन्त इत्यर्थः । तेषां द्वारपालत्वं प्रपञ्चयति—एतैर्हीति । तत्र स्वानुभवं प्रमाणयति—प्रत्यक्षं हीति । विवेकवैराग्याभ्यां वशीकृतश्रोत्रादिकग्रामोपेतत्वाभावात्परोक्षशब्दविषय आसङ्गरूपानृताकान्तत्वादित्यर्थः । एतैरेव विषयविमुखैर्ब्रह्मप्राप्तिद्वाराणि समाध्यादिना विवृतानीत्यभिप्रेत्योप-

---

१ क. ख. ग. ङ. ट. °पालाः । २ घ. च. ठ. °प्रत्यूढ° । ३ घ. ट. ड. °पानि° । ४ ख. ग. ठ. हार्दत्र° ।

संहरति—तस्मादिति । ब्रह्मपुरुषानुक्ताननूद्य सफलमुपासनं दर्शयति—अत इति । अनियतानां चक्षुरादीनां ब्रह्मप्राप्तिप्रतिबन्धकत्वं नियतानां तु तत्प्राप्तिहेतुत्वमित्यत-शब्दार्थः । यथोक्तगुणविशिष्टत्वं चक्षुरादीनामादित्याद्यात्मैकत्वम् । अदृष्टं फलमुक्त्वा दृष्टं फलमाह—किंचेति । यथोक्तपुत्रोत्पत्तिर्विवक्षितब्रह्मप्राप्तावनुपयुक्तेत्याशङ्क्याऽऽह—तस्य चेति । पुत्रस्य ध्यानानुसारित्वं हेतुत्वं ततःशब्दार्थः । पारम्पर्येणोपासनाद्वारेणेति यावत् । पुत्रस्य ध्यानद्वारा ब्रह्मप्राप्तिहेतुत्वे फलितमाह—इति स्वर्गेति ॥ ६ ॥

अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिस्तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे सꣳस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद ॥ ७ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

अथ यदसौ विद्वान्स्वर्गं लोकं वीरपुरुषसेवनात्प्रतिपद्यते । यच्चोक्तं त्रिपादस्यामृतं दिवीति तदिदं लिङ्गेन चक्षुःश्रोत्रेन्द्रियगोचरमापादयितव्यम्, यथाऽग्न्यादि धूमादिलिङ्गेन । तथा ह्येवमेवेदमिति यथोक्तेऽर्थे दृढा प्रतीतिः स्यात्। अनन्यत्वेन च निश्चय इति । अत आह—यदतोऽमुष्मादिवो द्युलोकात्परः परमिति लिङ्गव्यत्ययेन ज्योतिर्दीप्यते । स्वयंप्रभं सदामकाशत्वादीप्यत इव दीप्यत इत्युच्यते । अग्न्यादिवज्ज्वलनलक्षणाया दीप्तेरसंभवात् ।

गायत्र्युपाधिकं ब्रह्मोपास्यं तादर्थ्येन द्वारपालोपपत्तिश्च कर्तव्या । ततश्चाङ्गेषु श्रुतानि फलानि समुच्चित्य प्रधानोपासनादेव ब्रह्म प्राप्तिरित्युक्तम्। इदानीं विद्यान्तरं प्रस्तौति—अथेति । परस्ताद्दिवो दीप्यमानं ब्रह्म कौक्षेये ज्योतिषि प्रतीकेऽध्यस्य दृष्टत्वश्रुतत्वाभ्यामुपासितव्यमिति श्रौतमर्थं सिद्धवत्कृत्वाऽऽर्थिकमर्थमादाय तात्पर्यमाह—यदसौ

---

१ ग. द. 'त्मत्व' । २ ख. ङ. झ. 'द्वान्सन्त्व' । ३ क. ण. 'न्यादिर्धूमा' । ४ ङ. च. ङ. 'त्वे च' ।

विद्वानिति । वीराणां वीर्यवतामादित्यादीनां पुरुषाणां सेवनादाध्यानादिति यावत् । लिङ्गेन स्पर्शविशेषेण श्रवणविशेषेण चेत्यर्थः । चक्षुःश्रोत्रेन्द्रियगोचरामिति । मद्दृष्टिं प्रति दृष्टं श्रुतं च मयेत्यापादयितव्यम् । अन्यथा दृष्टत्वश्रुतत्वाभ्यां ब्रह्मणि ध्यानासिद्धेरित्यर्थः । परस्याप्रतिपत्तौ लिङ्गेन प्रत्यायने दृष्टान्तमाह—यथेति । विप्रतिपन्नं प्रति धूमादिलिङ्गेनाग्न्यादि प्रत्याय्यते तथा स्पर्शादिलिङ्गेन दृष्टत्वादिविशिष्टमिदं प्रत्येतव्यमित्यर्थः । यथोक्तस्य ज्योतिषो लिङ्गेन प्रत्यायनं किमिति क्रियते तत्राऽऽह—तथा हीति । लिङ्गद्वारा तस्य प्रत्यायने सति गुणद्वयविशिष्टमेवेदं ज्योतिर्नान्यदेतेवं यथोक्ते परस्मिन्नुपास्यज्योतिषि दृढा धीः स्यात् । तदभावात्तद्गुणस्य ज्योतिषोऽध्यानादित्यर्थः । मा भूत्परस्य ज्योतिषो यथोक्तगुणस्याशेषोपनिषन्मित्याशङ्क्याऽऽह—अनन्यत्वेनेति । कौक्षेयस्य ज्योतिषः संनिकर्षाज्जीवाभेदं परिकल्प्य जाठरं ज्योतिर्ब्रह्मेत्यनन्यत्वेन ध्याने जीवब्रह्मणोरेकतया निश्चयश्चार्थात्सिध्यति । अतो यथोक्तोपास्तिरर्थवतीत्यर्थः । अथशब्दस्य विद्यान्तरारम्भार्थत्वमभ्युपेत्यानन्तरमन्यस्य तात्पर्यमुक्त्वाऽवशिष्टान्यक्षराण्यवतार्य व्याकरोति—अत आहेत्यादिना । यदित्युपक्रम्य ज्योतिरित्युपसंहारात्पर इति पुंलिङ्गप्रयोगमाशङ्क्याऽऽह—परमिति । कदाचित्कपक्काशावाभावात्कथं दीप्यत इति प्रयोगस्तत्राऽऽह—स्वयंप्रभमिति । कस्मादेवेति प्रयुज्यते मुख्यमेव दीप्यमानत्वं किं न स्यादित्याशङ्क्याऽऽह—अन्यादीति । हेतोरुभयत्र संबन्धः ।

विश्वतः पृष्ठेष्वित्येतस्य व्याख्यानं सर्वतः पृष्ठेष्वितीति । संसारादुपरीत्यर्थः । संसार एव हि सर्वः । असंसारिण एकत्वान्निर्भेदत्वाच्च । अनुत्तमेषु तत्पुरुषसमासाशङ्कानिवृत्तय आहोत्तमेषु लोकेष्विति । सत्यलोकादिषु हिरण्यगर्भादिकार्यस्थपरस्येश्वरस्याऽऽसन्नत्वादुच्यत उत्तमेषु लोकेष्विति । इदं वावेदमेव तद्यदिदमस्मिन्पुरुषेऽन्तर्मध्ये ज्योतिश्चक्षुःश्रोत्रग्राह्येण लिङ्गेनौष्ण्येन शब्देन चाऽवगम्यते, यत्त्वचा स्पर्शरूपेण गृह्यते तच्चक्षुषैव । इदमतीतिकरत्वात्त्वचः । अविनाभूतत्वाच्च रूपस्पर्शयोः ।

सर्वशब्दस्य कुत्रचित्तवर्तित्वादात्मनोऽपि तेन संगृहीतत्वात्कथं तस्मादूर्ध्वं ब्रह्मेत्युपपन्नमित्याशङ्क्याऽऽह—संसारादिति । तस्यैव सर्वशब्दवाच्यत्वमुपपादयति—संसार एव हीति । तस्यानेकत्वेन सर्वशब्दार्हत्वादित्यर्थः । आत्मनि सर्वशब्दानुपपत्तिमाह—

---

१ ख. छ. ञ. ण. °त्वमुपे° । २ ख. छ. ञ. ण. °लिङ्गाप्र° । ३ क. ग. घ. ङ. ट. ण. °न वाऽव° । ४ ग. ट. °तवृत्तित्वा° ।

असंसारिण इति । सर्वशब्दस्यानेकार्थवाचित्वादात्मनि चैकत्वात्प्रकारभेदस्य च मिथ्यात्वे तस्मिन्नसंभवात्र तस्य सर्वशब्दास्पदतीतिरित्यर्थः । उत्तमा न भवन्तीत्यनुत्तमास्तेष्विति सत्पुरुषाशङ्कायां तन्निवृत्तिद्वारा बहुव्रीहिसिद्ध्यर्थं विशेषणमित्याह—तत्पुरुषेति । किमिति तेषु परब्रह्म निर्दिश्यते तस्य सर्वगतत्वादित्याशङ्क्याऽऽह—हिरण्यगर्भादीति । तत्कार्यात्मना स्थितं परं ब्रह्मोत्तमेषु लोकेष्वित्युच्यते । तस्य सर्वत्र सत्वेऽपि सत्यलोकादिषु हिरण्यगर्भात्मनाऽतिशयेन नित्याभिव्यक्तत्वादित्यर्थः । यदिति सर्वमाम्ना प्रकृतं ब्रह्म परामृश्यते । तस्योपास्यत्वार्थं संसारादुपरिष्टाद्वस्थानमुक्तम् । इदानीं कौक्षेये ज्योतिषि तदारोपयति—इदमिति । कौक्षेये ज्योतिषि प्रतीके प्रमाणं दर्शयति—चक्षुरिति । चक्षुष्मो भवतीतिफलवचनानुसारेण स्पर्शरूपैक्यमाध्यासिकमादायौष्ण्यस्याक्षुषत्वं द्रष्टव्यम् । रूपस्पर्शयोरैक्याध्यासं स्फुटयति—यस्येति । यदुष्णं तेजो द्रव्यात्मकं त्वगिन्द्रियेण स्पर्शरूपेण गृह्यते तच्चक्षुषैव गृह्यते तत्र हेतुमाह—दृढतीति । तच्चे दृढायां प्रतीतौ हेतुत्वाच्चक्षुषा तादात्म्यारोपादित्यर्थः । यद्रूपवद्भवति तत्स्पर्शवदिति नियमाच्च रूपस्पर्शयोस्तादात्म्याध्यासात्तस्य चाक्षुषत्वसिद्धिरित्याह—अग्निनाभूत वाचेति ।

कथं पुनस्तस्य ज्योतिषो लिङ्गं त्वग्दृष्टिगोचरत्वमापद्यत इति, आह—यत्र यस्मिन्काले । एतदिति क्रियाविशेषणम् । अस्मिञ्शरीरे हस्तेनाऽऽलभ्य संस्पर्शेनोष्णिमानं रूपसहभाविनमुष्णस्पर्शभावं विजानाति । स ह्युष्णिमा नामरूपव्याकरणाय देहमनुप्रविष्टस्य चैतन्यात्मज्योतिषो लिङ्गमव्यभिचारात् । न हि जीवन्तमात्मानमुष्णिमा व्यभिचरति, उष्ण एव जीविष्यञ्जीतो मरिष्यन्निति हि विज्ञायते । मरणकाले च तेजः परस्यां देवतायामिति परेणाविभागत्वोपगमात् । अतोऽसाधारणं लिङ्गमौष्ण्यमग्नेरिव धूपः । अतस्तस्य परस्यैषा दृष्टिः साक्षादिव दर्शनं दर्शनोपाय इत्यर्थः ।

अग्नेर्यो यस्य (?) ज्योतिषो लिङ्गमौष्ण्यं तस्य त्वगिन्द्रियग्राह्यस्य चाक्षुषत्वमुपपादयितुं पृच्छति—कथमिति । तस्यैषा दृष्टिरित्यादिवाक्येनोत्तरं दर्शयन्यत्रेत्यादिना व्याकरोति—आहेत्यादिना । यथैतद्विज्ञानं स्यात्तथेति विज्ञानक्रियायां विशेषणमेतदिति पदमित्यर्थः । संस्पर्शेनोष्णिमानं विजानाति चेत्कथं तर्हि तस्य चाक्षुषत्वमित्याशङ्क्याऽऽह—रूपसहभाविनमिति । भवत्वौपचारिकमौष्ण्यस्य चाक्षुषत्वं तथाऽपि कथं तस्य लिङ्गत्वमित्याशङ्क्य जीवनप्रत्यायनद्वारा कौक्षेयज्योतिषि तस्य लिङ्गत्वं साधयति—स ह्यीति । जीवात्मना तस्याव्यभिचारं स्फोरयति—न ह्यीति । तत्रैव श्रुतिं

१ ग °न्दोऽप्यस्य । २ ग. का. °क्षेये ज्यो° ।

संपद्यति—उष्ण एवेति । यदा जीवस्य लिङ्गमौष्ण्यं तदा परस्यापि ज्योतिषस्तल्लिङ्गं भवति जीवपरयोरेकत्वावगमादित्याह—मरणकाले चेति । वागादि मनसि मनः प्राणे प्राणस्तेजसि तदध्यक्षलक्षणपरस्यां देवतायां परमात्मरूपायां संपद्यत इति श्रुत्या जीवस्य परेण तदर्थात्मना सहाभिन्नत्वस्योपगमाज्जीवस्य लिङ्गं तद्वति परस्य लिङ्गमित्यर्थः । यदा हि जीवस्य परस्य च यथोक्तलिङ्गादवगतिस्तदा तत्र कौक्षेयज्योतिषस्तदधिकरणस्य सुतरामवगतिरस्तीत्याह—अत इति । उष्णस्य जाठरे ज्योतिषि प्रतीके लिङ्गत्वे सति यल्लिङ्गमाह (?)—तस्येति । विष्णोरिव प्रतिमायां जाठरेण ज्योतिषा परस्य ज्योतिषस्तादात्म्यादित्यर्थः ।

तथा तस्य ज्योतिष एषा[1] श्रुतिः श्रवणं श्रवणोपायोऽप्युच्यमानः । यत्र यदा पुरुषो ज्योतिषो लिङ्गं शुश्रूषति श्रोतुमिच्छति तदैतत्कर्णावपिगृह्यैतच्छब्दः क्रियाविशेषणम् । अपिगृह्यापिधायेत्यर्थोऽङ्गुलिभ्यां प्रोर्णुत्य निनदमिव रथस्येव धौष्णो[2] निनदन्तमिव शृणोति नदथुरिव ऋषभक्रूजितमिव शब्दो यथा चाग्नेर्हिर्ध्वलत एवं शब्दमन्तःशरीर उपशृणोति तदेतज्ज्योतिर्दृष्टश्रुतलिङ्गत्वाद्दृष्टं च श्रुतं चेत्युपासीत । तथोपासनाच्चक्षुष्यो दर्शनीयः[3] श्रुतो विश्रुतश्च । यत्स्पर्शगुणोपासननिमित्तं फलं तद्रूपे संपादयति- चक्षुष्य इति । रूपस्पर्शयोः सहभावित्वात् । इष्टत्वाच्च दर्शनीयतायाः । एवं च विद्यायाः फलमुपपन्नं स्यान्न तु मृदुत्वादिस्पर्शवत्त्वे । य एवं यथोक्तौ गुणौ वेद । स्वर्गलोकप्रतिपत्तिस्तूक्तमदृष्टं फलम् । द्विरभ्यास आदरार्थः ॥ ७ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

प्रतीकद्वारा दृष्टद्युपायवत्तस्य श्रवणोपायं लिङ्गान्तरं दर्शयति—तथेति । अपिगृह्य शृणोतीति संबन्धः । यथा श्रवणमेतद्भवति तथा शृणोतीति श्रवणक्रियाया विशेषणमेतच्छब्द इति योजना । प्रोर्णुत्य पिधायेति यावत् । श्रूयमाणशब्दस्य वाच्यार्थभावस्फुटीकरणार्थमनेकदृष्टान्तोपादानम् । कौक्षेयज्योतिष्यारोपितस्य ज्योतिषो ध्येयस्य ध्यानोपायाङ्गत्वेन गुणद्वयमुपदिशति—तदेतदिति । दृष्टमित्युपासने फलमाचष्टे—तथेति । श्रुतमित्युपासने फलमाह—श्रुत इति । कथं पुनः स्पर्शगुणोपासने स्पष्टयो भवतीति वक्तव्ये चक्षुष्यो भवतीत्युच्यते तत्राऽऽह—यत्स्पर्शेति । संपादने निमित्तमाह—रूपस्पर्शयोरिति । इतश्चक्षुष्यो भवतीति फलवचनमुचितमित्याह—इष्टत्वाच्चेति । फलवचनमपि संपादयति न कल्पकमित्याह—एवं चेति । यदा स्पर्श-

---

१ क. °ति तल्लिं° । २ ख. घ. च. ञ. ठ. ण. एवैषा । ३ ख. ङ. ञ. ढ. ण. °ति त° । ४ क. ग. ढ निनाद° । ५ ञ. ड. °था वाऽग्नें° । ६ ग. ट. °क्षेये ज्यो° ।

गुणोपासननिमित्तं फलं रूपे संपाद्यते तदा विद्यायाः श्रुतं फलमुपपन्नमिति फलश्रुतिरनुकूलिता स्यात् । रूपविशेषवति चक्षुष्यशब्दस्य प्रसिद्धत्वादित्यर्थः । यदि पुनर्मृदुत्वादिस्पर्शगुणस्योपासननिमित्तं फलं कल्प्यते तदा चक्षुष्यो भवतीति श्रुतं फलं नैवोपपन्नं स्यात्ततश्च फलश्रुतिरपबाधिता भवेदित्याह—न त्विति । कस्येदं फलमित्यपेक्षायामाह—य एवमिति । ननु परस्य ज्योतिषो जठरे ज्योतिष्यारोपितस्य यथोक्तगुणवतो ध्यानात्कथमिदमत्यल्पं फलमननुरूपमुपदिश्यते तत्राऽऽह—स्वर्गलोकेति । फलवत्त्वं विद्यायामादरो विवक्षितः ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
तृतीयाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

(अथ तृतीयाध्यायस्य चतुर्दशः खण्डः)।

पुनस्तस्यैव त्रिपादमृतस्य ब्रह्मणोऽनन्तगुणवतोऽनन्तशक्तेरनेकभेदोपास्यस्य विशिष्टगुणशक्तिमत्त्वेनोपासनं विधित्सन्नाह—

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत ।
अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके
पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत ॥ १ ॥

सर्वं समस्तं खल्विति वाक्यालंकारार्थो निपातः । इदं जगन्नामरूपविकृतं प्रत्यक्षादिविषयं ब्रह्म कारणं बृद्धतमत्वाद्ब्रह्म । कथं सर्वस्य ब्रह्मत्वमित्यत आह—तज्जलानिति । तस्माद्ब्रह्मणो जातं तेजोबन्नादिक्रमेण सर्वम् । अतस्तज्जम् । तथा तेनैव जननक्रमेण प्रतिलोमतया तस्मिन्नेव ब्रह्मणि लीयते तदात्मतया श्लिष्यत इति तल्लम् । तथा तस्मिन्नेव स्थितिकालेऽनिति प्राणिति चेष्टत इति । एवं ब्रह्मात्मतया त्रिषु कालेष्वविशिष्टं तद्व्यतिरेकेणाग्रहणात् । अतस्तदेवेदं जगत् । यथा चेदं तदेवैकमद्वितीयं तथा षष्ठे विस्तरेण वक्ष्यामः । यस्माच्च सर्वमिदं ब्रह्म, अतः शान्तो रागद्वेषादिदोषरहितः संयतः सन्यत्तत्सर्वं ब्रह्म तद्वक्ष्यमाणैर्गुणैरुपासीत ।

प्रतीकद्वारा ब्रह्मोपासनमुक्त्वा प्रतीकं हित्वा सगुणब्रह्मोपासनमुपन्यस्यति—पुनरित्यादिना । तस्य निरुपाधिकत्वं व्यावर्तयति—अनन्तेति । कथमेकस्यानन्तगुणत्वं तत्राऽऽह—अनन्तशक्तेरिति । ननु पूर्वमेवास्योपासनान्यतिवृत्तानि तथा च वक्ष-

---

१ ख. घ. ङ. °ष्टते तदनम् । अकारलोपश्छान्दसः । इत्येवं । ण. °ष्टते तदन् । इत्येवं ।
२ क. ग. ङ. °ति तदनम् । इत्येवं । ङ. °ति तदन् । इत्येवं । ३ ञ. रागादि° ।

व्यतिरेको नास्तीत्याशङ्क्याऽऽह—अनेकेति । अनेकेषु भेदेषु मायव्याद्युपाधिभूतास्वपि ब्रह्मणो मनोमयत्वादिविशिष्टानुभवत्वेन विशिष्टशक्तिमत्त्वेन चोपासनान्तरविधानार्थमुत्तरवाक्यमित्यर्थः । तत्रेदमा परामर्शे हेतुमाह—प्रत्यक्षादीति । ब्रह्मशब्दस्य विशेषाधिकार्थविषयत्वं व्यावर्तयति—कारणमिति । कथं तस्य ब्रह्मत्वं तत्राऽऽह—बृहत्त्वात्तत्त्वादिति । निरतिशयमहत्त्वादित्यर्थः । सर्वमनूद्य तस्य ब्रह्मत्वविधाने युक्तिं प्रश्नपूर्वकमाह—कथमित्यादिना । तज्जं च तल्लं च तदनं च तज्जलान् । अवयवलोपश्छान्दसः । तत्र तज्जत्वं जगतो व्युत्पादयति—तस्मादिति । तल्लत्वमुत्पादयति—तत्रेति । विपर्ययेण तु क्रमोऽत इति न्यायात्प्रतिलोमतया जनतश्चुल्लक्यादिनेव ब्रह्मणि लीयते जगद्धिति कृत्वा यथा तज्जं तत्रेति योजना । तत्र लयो नाम जगतः शून्यतेति शङ्कां व्यावर्तयति—तदात्मतेति । तदनत्वं प्रतिपादयति—तत्रेति । यथा तज्जं तल्लं च तथा तदनं च जगदित्यर्थः । इति तदनमिति शेषः । युक्तिसिद्धमर्थं निगमयति—एवमिति । ब्रह्मव्यतिरेकेण त्रिष्वपि कालेषु जगतोऽग्रहणात्तदात्मत्वेनाविशिष्टं जगत्तदेव स्यादिति योजना । युक्तिसिद्धमपि जगतो ब्रह्मत्वं प्रत्यक्षादिविरुद्धं नाङ्गीकारमर्हतीति । न हि सद्द्वितीयमद्वितीयं युक्तमित्याशङ्क्याऽऽह—यथा चेति । सर्वस्य ब्रह्मत्वे फलितमाह—यस्माच्चेति ।

कथमुपासीत । क्रतुं कुर्वीत क्रतुर्निश्चयोऽध्यवसाय एवमेव नान्यथेत्यवधिरूपः प्रत्ययस्तं क्रतुं कुर्वीतोपासीतेत्यनेन व्यवहितेन संबन्धः । किं पुनः क्रतुकरणेन कर्तव्यं प्रयोजनम् । कथं वा क्रतुः कर्तव्यः । क्रतुकरणं चाभिप्रेतार्थसिद्धिसाधनं कथमित्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रन्थः । अथ खल्विति हेत्वर्थः । यस्मात्क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीवः । यथाक्रतुर्यस्मिन्लोके जीवस्मिन्पुरुषो भवति तथेतोऽस्माद्देहात्प्रेत्य मृत्वा भवति । क्रत्वनुरूपफलात्मको भवतीत्यर्थः । एवं ह्येतच्छास्त्रतो दृष्टम्—" यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम् " इत्यादि । यत एवं व्यवस्था शास्त्रदृष्टाऽतः स एवं जानन्क्रतुं कुर्वीत यादृशं क्रतुं वक्ष्यामस्तम् । यत एवं शास्त्रप्रमाण्यादुपदिश्यते क्रत्वनुरूपं फलमतः स कर्तव्यः क्रतुः ॥ १ ॥

कियन्तं कालं प्रत्ययप्रवर्तयेदित्याकाङ्क्षायां पूर्वं तत्त्वनिश्चयपर्यन्तमिति दर्शयितुं

---

१ क. ङ. ञ. ण. °न्तरं विधातुमु° । २ ग. ट. °तरं वा° । ३ ञ. °वर्णलो° । ४ ख. ग. ङ. ट. ण. °निर्विशे° । ५ क. ख. घ. च. ज. ठ. ण. °त । ब्रह्म° । ६ ग. ट. ठ. ड. °ग्रं वाऽभि° । ७ ङ. °ग्रप्रमाणादु° ।

व्यवहितं वाक्यमवतार्य व्याचष्टे—कथमित्यादिना । उपासीतेत्यस्य क्रतुं कुर्वीतेत्यनेन व्यवहितेन संबन्ध इति योजना । क्रत्वनुष्ठानस्य फलं पृच्छति—किं पुनरिति । तत्र क्रतुकरणं च केन प्रकारेणेति प्रश्नान्तरं दर्शयति—कथं वेति । ब्रह्मभावसाधनत्वात्क्रतुकरणस्य फलप्रश्नो नास्तीत्याशङ्क्याऽऽह—क्रतुकरणं चेति । न हि जीवस्य स्थितस्य नष्टस्य वा सद्भावः संभवतीति भावः । क्रतुकरणमेवेदं प्रयोजनं स च क्रतुरेव क्रियते तत्करणं वाऽनया रीत्या ब्रह्मसद्भावं साधयतीत्यस्यार्थजातस्य प्रतिपादनार्थमा खण्डसमाप्तेरथेत्यादिरुत्तरो ग्रन्थ इत्याह—इत्यस्यार्थस्येति । अथ खल्वित्यत्र पूर्ववत्खलुशब्दोऽथशब्दस्तु हेत्वर्थ इत्यत्र हेतुरूपमर्थं विवृणोति—यस्मादिति । यद्वाऽथेत्यारभ्य पुरुष इत्यन्तो ग्रन्थो हेत्वर्थ इत्युक्त्वा तमेव हेतुरूपमर्थं दर्शयति—यस्मादिति । यथाक्रतुरित्यस्मादधस्तात्तस्माच्छब्दो द्रष्टव्यः । अस्मिँल्लोक इति श्रुतिमादाय व्याचष्टे—जीवन्निहेति । इह वर्तमनो देहे जीवन्सन्निति यावत् । क्रतुकरणेन किं कर्तव्यं फलमिति प्रश्नं व्याचष्टे—तथेति । क्रत्वनुरूपफलात्मकत्वे पुरुषस्य स्मृतिं संवोदयति—एवं हीति । शास्त्रमेवोदाहरति—यं यमिति । कथं वा क्रतुः कर्तव्य इति प्रश्नं प्रत्याह—यत इति । क्रत्वनुरूपफलात्मकः पुरुषो भवतीत्येवंरूपा व्यवस्थेति यावत् । एवं जानन्क्रत्वनुरूपं फलमिति शास्त्रतः पश्यन्नित्यर्थः । कोऽसौ क्रतुरित्याशङ्क्याऽऽह—यादृगिति । स क्रतुं कुर्वीतेत्यस्यार्थं निगमयति—यत एवमिति ॥ १ ॥

मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः ॥ २ ॥

कथम् । मनोमयो मनःप्रायः । मन्यतेऽनेनेति मनस्तत्सदृश्या विषयेषु प्रवृत्तं भवति तेन मनसा तन्मयः । तथा प्रवृत्त इव तत्राऽनिवृत्त इव च । अत एव प्राणशरीरः प्राणो लिङ्गात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्छितः । "यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः" इति श्रुतेः । स शरीरं यस्य स प्राणशरीरः । "मनोमयः प्राणशरीरनेता" इति च श्रुत्यन्तरात् । भारूपः । भा दीप्तिश्चैतन्यलक्षणं रूपं यस्य स भारूपः ।

क्रतुकरणप्रकारमेव प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । कथमिदं मनः—

---

१ ग. ट. °र्णं वेति । २ क. °र्णं चान° । ३ ख. छ. ञ. ण. °त्मत्वे° । ४ ख. छ. ञ. ण. °श्नं व्याचष्टे । य° । ५ ख. घ. च. ञ. ठ. °व वा । अ° । ६ घ. च. ठ. °तेः प्राणः श° । क. ङ. ठ. °तेः श° । ७ घ. ठ. °क्षणा रू° ।

प्रायत्वमित्यपेक्षायां मनःशब्दार्थप्रदर्शनपूर्वकं तत्प्रायत्वं व्युत्पादयति —मनुत इति। मनोद्वारा तदुपाधिः पुरुषो विषयप्रवणो भवतीत्यर्थः। तत्प्रायत्वफलमाह—तथेति। पुरुषो हि तत्प्रायः सन्मनसि प्रवर्तमाने स्वयमपि तद्वदेव प्रवृत्त इव लक्ष्यते। तथा निवर्तमाने मनसि निवृत्त इव च वगम्यते। वास्तुतस्तु पुरुषो न प्रवृत्तो निवृतो वा ध्यायतीवेत्यादिश्रुतेरित्यर्थः। अत एव मनोमयत्वादेवेति यावत्। संमूर्छितत्वं संपिण्डितत्वम्। विज्ञानशक्तेः क्रियाशक्तेश्चैकस्मिन्नेव लिङ्गात्मनि संपिण्डितत्वे श्रुत्यन्तरं प्रमाणयति—यो वा इति। आथर्वणीं श्रुतिं यथोक्ते विशेषणद्वये प्रमाणयति—मनोमयः प्राणेति। मनोवृत्तिभिर्विभाव्यमानत्वादात्मा मनोमयः प्राण एव प्रत्यगात्मनः सूक्ष्मं शरीरम्। तस्य चासौ स्थूलादेहादेहान्तरं प्रति नेतेत्याथर्वणश्रुतेरात्मनि विशेषणद्वयसिद्धिः। एतच्च विशेषणद्वयं जीवगतमपि तदभेदविवक्षया ब्रह्मणि द्रष्टव्यमित्यर्थः।

सत्यसंकल्पः। सत्या अवितथाः संकल्पा यस्य सोऽयं सत्यसंकल्पः। न यथा संसारिण इवानैकान्तिकफलः संकल्प ईश्वरस्येत्यर्थः। अनृतेन मिथ्याफलत्वहेतुना प्रत्यूढत्वात्संकल्पस्य मिथ्याफलत्वम्। वक्ष्यत्यनृतेन हि प्रत्यूढा इति। आकाशात्मा आकाश इवाऽऽत्मा स्वरूपं यस्य स आकाशात्मा। सर्वगतत्वं सूक्ष्मत्वं रूपादिहीनत्वं चाऽऽकाशतुल्यतेश्वरस्य। सर्वकर्मा। सर्वं विश्वं तेनेश्वरेण क्रियत इति जगत्सर्वं कर्मास्य स सर्वकर्मा। "स हि सर्वस्य कर्ता" इति श्रुतेः। सर्वकामः। सर्वे कामा दोषरहिता अस्येति सर्वकामः। "धर्माविरुद्धो भूतेषु कामोऽस्मि" इति स्मृतेः। ननु कामोऽस्मीति वचनादिह बहुव्रीहिर्न संभवति सर्वकाम इति। न, कामस्य कर्तव्यत्वाच्छब्दादिवत्पारार्थ्यप्रसङ्गाच्च देवस्य। तस्माद्यथेह सर्वकाम इति बहुव्रीहिस्तथा कामोऽस्मीति स्मृत्यर्थो वाच्यः।

सत्यसंकल्प इत्यत्र विशेषणेन ध्वनितमर्थं दर्शयति—न यथेति। इवशब्दस्तथार्थः। कथं संसारिसंकल्पस्यानैकान्तिकफलत्वं तत्राऽऽह—अनृतेनेति। संकल्पस्यानृतेन संसारिणि प्रत्यूढत्वे वाक्यशेषं प्रमाणयति—वक्ष्यतीति। जडाजडयोराकाशेतरयोर्न तुल्यतेत्याशङ्क्याऽऽह—सर्वगतत्वादिति। सर्वकर्मेति सर्वक्रियाश्रयत्वमीश्वरस्योच्यते तदयुक्तं निष्क्रियत्वश्रुतेरित्याशङ्क्य व्याचष्टे—सर्वेति। संसारिण्यो विशेषासिद्ध्यर्थं विशिनष्टि—दोषरहिता इति। उदाहृतां स्मृतिमाश्रित्योक्तमाक्षिपति—नन्विति। कामसामानाधि-

---

१ च. °ता यस्ये°। २ क. च. ण. °ति स स°। ३ क. छ. ञ. ण. °दाहरणस्मृ°। ४ क. °हृतस्मृ°।

करणे वाक्यकोपलम्भाद्दुर्ग्रहिरेवेति परिहरति—न कामेति । तस्य कार्यत्वात्तेन वेद्येन ब्रह्मणोऽादित्यं व्याप्यते चेतनशेषत्वात्तत्कामस्य तदैक्ये ब्रह्मणः स्वाङ्गत्वं हीयते। तथा च कर्मवाक्यासंभवाद्दुर्ग्रहिरेवेत्यर्थः । कथं तर्हि कामोऽप्रमीति तादात्म्यमधिरिरासाद्य तदाह—तस्मादिति । कामेश्वरयोः सामानाधिकरण्यसंभवात्प्रकृतानुपयोगाच्च बहुव्रीहिर्विधेयस्तया स्मृत्यादावपि ब्रह्मपरतन्त्रतामात्रं कामस्य विवक्षितम् । श्रुत्यनुवादेन स्मृतेर्नेतव्यत्वादित्यर्थः ।

सर्वगन्धः । सर्वे गन्धाः सुरभयो यस्य सोऽयं सर्वगन्धः । "पुण्यो गन्धः पृथिव्याम्" इति स्मृतेः । तथा रस आपि विज्ञेयाः । अपुण्यगन्धसंग्रहस्य पाप्मसंबन्धनिमित्तत्वश्रवणात् । "तस्माच्चेमौ गन्धौ विद्यते सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः" इति श्रुतेः । न च पाप्मसंसर्गः ईश्वरस्य अविद्यादिदोषस्यानुपपत्तेः ।

सर्वशब्दादपुण्यगन्धानामपि ग्रहणे प्राप्ते विशिनष्टि—सुरभय इति । सर्वशब्दसंकोचे कारणमाह—पुण्य इति । यथा सर्वगन्ध इत्यत्र सुरभय एव रसास्तत्संबन्धिनो दर्शितास्तथा सर्वरस इत्यत्रापि सुरभय एव रसास्तत्संबन्धिनो ग्राह्या इत्याह—तथेति । अत्रापि सर्वशब्दसंकोचे कारणमाह—अपुण्येति । न तद्ग्रहणं परस्मिन्निति शेषः । तच्छब्दार्थमेवोपपादयति—पाप्मना ह्येति । एष इति घ्राणप्राणोक्तिः । भवतु पाप्मसंसर्गकृतमपुण्यगन्धादिग्रहणं तथापि कथं तदीक्षते सर्वज्ञे नास्तीत्याशङ्क्याऽऽह—न चेति । निमित्तभावादीश्वरस्य न स्वसंबन्धित्वेनापुण्यगन्धादिग्रहणमित्यर्थः । तस्य पाप्मासंसर्गे हेतुमाह—अविद्यादीति । आदिपदेनास्मितारागद्वेषाभिनिवेशादयो गृह्यन्ते ।

सर्वमिदं जगदभ्याच्छोऽभिव्याप्तः । अततेर्व्याप्त्यर्थस्य कर्तरि निष्ठा । तथाऽवाक्युच्यतेऽनयेति वाग्वागेव वाक्यः । यद्वा वचेर्घञन्तस्य करणे वाक्यः । स यस्य विद्यते स वाक्यी । न वाक्यवाक्यी । वाक्प्रतिषेधश्चात्रोपलक्षणार्थः । गन्धरसादिश्रवणादीश्वरस्य प्राप्तानि घ्राणादीनि करणानि गन्धादिग्रहणाय। अतो वाक्प्रतिषेधेन प्रतिषिध्यन्ते तानि । "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः" इत्यादिमन्त्रवर्णात् । अनादरोऽसंभ्रमः । अप्राप्तप्राप्तौ हि संभ्रमः स्यादनाप्तकामस्य । न त्वाप्तकामत्वान्नित्यतृप्तस्येश्वरस्य संभ्रमोऽस्ति क्वचित् ॥ २ ॥

अभ्यात्त इति रूपं तदर्थं च दर्शयन्कर्मणि निष्ठां व्यावर्तयति—अततेरिति ।

---

१ क. ग. ट. वाप्येत । २ घ. ङ. छ. ढ. ण. 'दोषानु' । ३ ग. ङ. ट. ड. द. 'ञ्च । द' । ४ ख. ञ. 'तृप्तेश्च'

वाकशब्दस्य निरूपणप्रकारं दर्शयति—वचेरिति । अत्रेति श्रुतेरीश्वरस्य योजिकः । उपलक्षणार्थो घ्राणादिप्रतिषेधस्येति शेषः । अथेश्वरे घ्राणादिप्रतिरस्कारात्तत्प्रतिषेधो नोपलक्ष्येतात आह—गन्धेति । आदिशब्देन कामादिरुक्तः । युक्तं चान्योपलक्षणं स्वाद्वाक्यस्य प्रतिषेधप्रकरणादित्यत आह—अपाणीति । आदिपदेन स चेति चेत्यनुकृष्य गृह्यते । ईश्वरस्य संभ्रमाभावं प्रतिपादयति—अपाप्तपाप्ता हीति । २ ॥

एष म आत्माऽन्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वैष म आत्माऽन्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः ॥ ३ ॥

एष यथोक्तगुणो मे ममाऽऽत्माऽन्तर्हृदये हृदयपुण्डरीकस्यान्तर्मध्येऽणीयान्व्रीहेर्वा यवाद्वेत्यायत्यन्तसूक्ष्मत्वप्रदर्शनार्थम् । श्यामाकाद्वा श्यामाकतण्डुलाद्वेति परिच्छिन्नपरिमाणादणीयानित्युक्तेऽणुपरिमाणत्वं मा प्रसाङ्क्षीदित्यतस्तत्प्रतिषेधायाऽऽरभते—एष म आत्माऽन्तर्हृदये ज्यायान्पृथिव्या इत्यादिना । ज्यायःपरिमाणाच्च ज्यायस्त्वं दर्शयन्ननन्तपरिमाणत्वं दर्शयति—मनोमय इत्यादिना ज्यायानेभ्यो लोकेभ्य इत्यन्तेन ॥ ३ ॥

यथोक्तस्य परस्य मत्समात्मानमेवं दर्शयति—एष इति । व्रीह्यादेरुपादानस्योपयोगमाह—अत्यन्तेति । अणीयस्त्वज्यायस्त्वव्यपदेशयोर्मिथो विरोधमाशङ्क्य परिहरति—श्यामाकेति । पृथिव्यन्तरिक्षादिदीश्वरस्य सातिशयं महत्त्वं विवक्षितमिति शङ्कां वारयति—ज्यायःपरिमाणाच्चेति । पुनरुक्तेरुपयोगमाह—मनोमय इत्यादिनेति ॥ ३ ॥

सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्याचोऽवाक्यनादर एष म आत्माऽन्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति यस्य

---

१ ख. ङ. ञ. ण. 'आप्त्यका' । २ ख. ञ. ण. 'मू । सर्वपादिति श्या' । ३ ख. घ. ङ. ञ. ट. ठ. 'आत्मादि । ४ ख. घ. ङ. च. ञ. ठ. ड. ढ. ण. 'णवत्वं प्रा' । ५ ख. च. म. 'अवत्वं दू' । ६ ख. छ. ञ. ण. 'शयम' ।

स्यादद्धा न विचिकित्साऽस्तीति ह स्माऽऽह
शाण्डिल्यः शाण्डिल्यः ॥ ४ ॥
इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

यथोक्तगुणलक्षण ईश्वरो ध्येयो न तु तद्गुणविशिष्ट एव । यथा राजपुरुषमानय त्रिवृतं वेत्युक्ते न विशेषणस्याप्यानयने व्यापियते तद्वदिहापि प्राप्तमतस्तन्निवृत्त्यर्थं सर्वकर्मेत्यादि पुनर्वचनम् । तस्मान्मनोमयत्वादिगुणविशिष्ट एवेश्वरो ध्येयः । अत एव षष्ठसप्तमयोरिव तत्त्वमस्यात्मेवेदं सर्वमिति नेह स्वाराज्येऽभिषिञ्चत्येष म आत्मैतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति लिङ्गान्न त्वात्मशब्देन प्रत्यगात्मैवोच्यते । ममेति षष्ठ्याः संबन्धार्थप्रत्यायकत्वादेतमभिसंभवितास्मीति च कर्मकर्तृत्वनिर्देशात् ।

यत्तैर्लक्ष्यते स एवेश्वरः केवल इति यावत् । ईश्वरो यथोक्तगुणो ध्येय इत्युक्ते गुणानामपि ध्यानकर्मत्वं दुर्वारमित्याशङ्क्याऽऽह—यथेति । पुनरुक्तिफलमुपसंहरति—तस्मादिति । सगुणस्येश्वरस्य ध्येयत्वे गमकान्तरमाह—अत एवेति । स्वरूपवाचकस्याऽऽत्मनः श्रुत्यनुपपत्तेर्न तद्बलाद्वैतवाक्यार्थसिद्धिरित्यर्थः ।

ननु षष्ठेऽप्यथ संपत्स्य इति सत्संपत्तेः कालान्तरितत्वं दर्शयति । न, आरब्धसंस्कारशेषस्थित्यर्थपरत्वात् । न कालान्तरितार्थता । अन्यथा तत्त्वमसीत्येतस्यार्थस्य बाधप्रसङ्गात् । यद्यप्यात्मशब्दस्य प्रत्यगर्थत्वं सर्वं खल्विदं ब्रह्मेति च प्रकृतमेष म आत्माऽन्तर्हृदय एतद्ब्रह्मेत्युच्यते, तथाऽप्यन्तर्धानमीषदपरित्यज्यैवैतमात्मानमितोऽस्माच्छरीरात्प्रेत्याभिसंभवितास्मीत्युक्तम् ।

भेदलिङ्गाच्चेदिह भेदो विवक्षितस्तर्हि षष्ठेऽपि तल्लिङ्गदर्शनान्नाखण्डवाक्यार्थसिद्धिरिति शङ्कते—नन्विति । नात्र भेदो विवक्षितः । आरब्धः संस्कारः सुखादिर्येन कर्मणा तच्छेषस्थितौ तात्पर्यादिति परिहरति—नाऽऽरब्धेति । सत्संपत्तौ कालान्तरितत्वमेवात्र विवक्षितं किं न स्यादित्याशङ्क्याऽऽह—नेति । कालान्तरभावित्वे संपत्तेरिष्टे तत्त्वमसीति ब्रह्मभावस्य वर्तमानोपदेशानुपपत्तेरिति हेतुमाह—अन्ययेति । ननु प्रकरणानुगृहीताभ्यामात्मब्रह्मशब्दाभ्यामत्रापि ब्रह्मात्मैक्यमेव विवक्षितमित्यत आह—यद्यपीति । लिङ्गानुगृहीतषष्ठीश्रुतिवशात्प्रकरणानुगृहीते श्रुती कथंचिन्नेतव्ये प्रकरणश्रुतिभ्यां लिङ्गश्रुत्योर्बलवत्त्वादात्मश्रुतेश्चान्यथोपपत्तेरुक्तत्वादिति भावः ।

---

१ क. ग. घ. ङ. च. ट. ठ. ढ. °गुं चेत्यु । २ ख. झ. ण. °णमप्या° । ३ घ. ङ. ठ. ण. °ह्मापीति प्रा° । ४ ठ. ङ. °र्थं पुनः स° । ५ ठ. ङ. °दि वच° । ६ च. ङ. °ज्यैत° । ७ ख. ङ. झ. ण. °ति । न तत्र ।

यथाक्रतुरूपस्याऽऽत्मनः प्रतिपत्ताऽस्मीति यस्यैवंविदः स्याद्धवेद्धा सत्यमेवं स्यामहं प्रेत्यैवं न स्यामिति न च विचिकित्साऽस्तीत्येतस्मिन्नर्थे क्रतुफलसंबन्धे स तथैवेश्वरभावं प्रतिपद्यते विद्वानित्येतदाह स्मोक्तवान्किल शाण्डिल्यो नामर्षिः । द्विरभ्यास आदरार्थः ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

सगुणब्रह्मोपासकस्य सकृत्तत्त्वधीमात्रान्नादृष्टं फलं सिध्यति । किंतु देहपातकालेऽपि साक्षात्कारानुवृत्त्या भवितव्यमित्यमिप्रेत्याऽऽह-यथाक्रतुरूपस्येति । अध्यवसायानुरूपस्य सगुणस्य परमात्मनोऽहं प्रतिपत्ताऽस्मीत्येवंविदो यस्याद्धा स्यान्निश्चयः प्रेत्याहमेव स्यामेव न तु न स्यामिति क्रतुफलसंबन्धे संशयोऽस्ति । स क्रत्वनुसारेणैव परमात्मभावं प्राप्नोति । तथा चाद्धेति वाक्यान्मरणकालेऽपि साक्षात्कारेण भवितव्यमिति प्रतिभातीत्यर्थः । यथोक्तस्यार्थस्य सांप्रदायिकत्वं कथयति-इत्येतदिति । आदरः क्रतुफलसंबन्धविषयः ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

(अथ तृतीयाध्यायस्य पञ्चदशः खण्डः) ।

अस्य कुले वीरो जायत इत्युक्तम् । न वीरजन्ममात्रं पितुस्त्राणाय । "तस्मात्पुत्रमनुशिष्टं लौकिकमाहुः" इति श्रुत्यन्तरात् । अतस्तदीर्घायुष्ट्वं कथं स्यादित्येवमर्थं कोशविज्ञानारम्भः । अभ्यर्हितविज्ञानव्यासङ्गादनन्तरमेव नोक्तं तदिदानीमेवाऽऽरभ्यते—

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलꣳ स एष कोशो वसुधानस्तस्मिन्विश्वमिदꣳ श्रितम् ॥ १ ॥

अन्तरिक्षमुदरमन्तःसुषिरं यस्य सोऽयमन्तरिक्षोदरः कोशः कोश इवा-

---

१ क. ग. ण. °मेव स्या° । २ घ. ठ. °स्तीत्यस्मि° । ३ ञ. °कृद्धीमा° । ४ क. यस्य स्यादद्धा । ५ क. °द्धा निश्च° । ६ क. छ. ण. °मेव स्या° । ७ ख. छ. ञ. ण. °धाऽद्धे° ।

नेकधर्मसहश्यात्कोशः । स च भूमिबुध्नो भूमिर्बुध्नो मूलं यस्य स भूमि-बुध्नो न जीर्यति न विनश्यति त्रैलोक्यात्मकत्वात् । सहस्रमुमकालावधानी यस्य सः ॥ दिशो ह्यस्य सर्वाः सकृपः कोणाः । द्यौरस्य कोशस्योत्तरबुध्निर्विलं स एष यथोक्तगुणः कोशो वसुधानो वसु धीयतेऽस्मिन्प्राणिनां कर्म-फलाख्यमतो वसुधानः । तस्मिन्नन्तर्विश्वं समस्तं प्राणिकर्मफलं सह तत्साधनैरिदं यदृग्ह्यते प्रत्यक्षादिप्रमाणैः श्रितमाश्रितं स्थितमित्यर्थः ॥ १ ॥

आधिदैवविद्याया समनन्तरप्रन्थस्य संबन्धो नास्तीत्याशङ्क्य व्यवहितेन संबन्धं दर्शयितुमनुवदति—अस्येति । संप्रत्युत्तरग्रन्थस्य तात्पर्यं वक्तुं भूमिकां करोति—न जीर्यतीति । तत्र बृहदारण्यकश्रुतिं प्रमाणयति—तस्मादिति । पुत्रस्य लोकत्वा-दिति यावत् । अनुशासनेन विषयीकृतस्य पुत्रस्य लोकप्राप्तिसाधनत्वादनुशासनं वेत्य-ध्ययनम् । पुत्रजन्मोक्त्यनन्तरमेव किमित्येतद्विज्ञानं नोपदिष्टमित्याशङ्क्य ऽऽह—अस्मदिति । गायत्र्युपाधिकब्रह्मोपासनस्य कौक्षेये ज्योतिष्यारोप्य परब्रह्मोपासन-मभ्यर्हितं तस्य च मनोमयत्वादिगुणकब्रह्मोपासनमन्तरङ्गम् । तथा च तद्बलेन वैश्व-र्यादनन्तरमेव कोशविज्ञानं नोक्तमिति निवृत्ते तु व्यासङ्गे तद्दृष्टिरिहानीं यथोक्तफ-लसिद्ध्यर्थमुच्यत इत्यर्थः । कोशशब्देन हिरण्यादिनिक्षेपाधारो मञ्जूषोच्यते । कथं त्रैलोक्यात्मनः कोशत्वं तत्राऽऽह—कोश इवेति । अनेकधर्मसाहश्यं विशदयति—स चेति । तथाऽपि कथमविनाशित्वं तत्राऽऽह—सहस्रेति । त्रैलोक्यात्मनि कोशदृष्टि-स्तत्रापि भूमौ बुध्नदृष्टिरित्युक्तम् । कोशस्य च सापेक्षमविनाशित्वं ध्येयत्वेन दर्शि-तम् । संप्रति दिक्षु कोशकोणदृष्टिः कर्तव्येत्याह—दिशो ह्यस्येति । द्यौ कोशस्यो-र्ध्वनिहितबुद्धिं दर्शयति—द्यौरिति । यथोक्ते कोशे वसुधानत्वदृष्टिं दर्शयति—यथो-क्तेति । तदेव समर्थयते—तस्मिन्निति ॥ १ ॥

तस्य प्राची दिग्जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीची तासां वायुर्वत्सः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदꣳ रोदिति सोऽहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदꣳ रुदम् ॥ २ ॥

---

१ ग. °ककोशध° । २ ग. ङ. ठ. ड. ढ. °त्मत्वा° । ३ क. ग. ठ. °विद्यायाः स° । ४ क. °शासितस्य वे° । ५ क. °ते तद्व्यास° । ६ ख. ङ. ण. °पेक्ष्यम° ।

तस्यास्य प्राची दिग्भाग्गतो भागो जुहूर्नाम जुह्वत्यस्यां दिशि कर्मिणः प्राङ्मुखाः सन्त इति जुहूर्नाम। सहमाना नाम सहन्तेऽस्यां पापकर्मफलानि यमपुर्षा प्राणिन इति सहमाना नाम दक्षिणा दिक्। तथा राज्ञी नाम प्रतीची पश्चिमा दिग्राज्ञी राज्ञा वरुणेनाधिष्ठिता संध्यारागयोगाद्वा। सुभूता नाम भूतिमद्भिरीश्वरकुबेरादिभिरधिष्ठितत्वात्सुभूता नामोदीची। तासां दिशां वायुर्वत्सो दिग्जत्वाद्वायोः। पुरोवात इत्यादिदर्शनात्। स यः कश्चित्पुत्रदीर्घजीविताथ्यैवं यथोक्तगुणं वायुं दिशां वत्समृतं वेद स न पुत्ररोदं पुत्रनिमित्तं रोदनं न रोदिति। पुत्रो न म्रियत इत्यर्थः। यत एवं विशिष्टं कोशदिग्वत्सविषयं विज्ञानमतः सोऽहं पुत्रजीविताथ्यैवमेतं वायुं दिशां वत्सं वेद जाने। अंतो मा पुत्ररोदं [रुदं?] मा रुदं पुत्रमरणानिमित्तम्। पुत्ररोदो मम मा भूदित्यर्थः ॥ २ ॥

कोशकोणत्वेनोक्तासु दिक्ष्ववान्तरविभागमाह—तस्येत्यादिना। दिशां विशिष्टनामवतीनामनुचिन्तनीयत्वमुक्त्वा तत्संबन्धिनं वायुं तद्वत्सममरणधर्माणं चिन्तयेदित्याह—तासामित्यादिना। पुरोवातादीत्यादिशब्दस्तथाविधलौकिकवैदिकप्रयोगसंग्रहार्थः। यथोक्तस्य विज्ञानस्य फलवत्त्वमिदानीं दर्शयति—स य इति। यथोक्तगुणमित्यस्य प्रकटीकरणममृतमिति। सफलमुपासनमुपदिष्टमुपसंहरति—यत इति ॥ २ ॥

अरिष्टं कोशं प्रपद्येऽमुनाऽमुनाऽमुना प्राणं प्रपद्येऽमुनाऽमुनाऽमुना भूः प्रपद्येऽमुनाऽमुनाऽमुना भुवः प्रपद्येऽमुनाऽमुनाऽमुना स्वः प्रपद्येऽमुनाऽमुनाऽमुना॥ ३॥

अरिष्टमविनाशिनं कोशं यथोक्तं प्रपद्ये प्रपन्नोऽस्मि पुत्रायुषे। अमुनाऽमुनाऽमुनेति त्रिर्नाम गृह्णाति पुत्रस्य। तथा प्राणं प्रपद्येऽमुनाऽमुनाऽमुना भूः प्रपद्येऽमुनाऽमुनाऽमुना भुवः प्रपद्येऽमुनाऽमुनाऽमुना स्वः प्रपद्येऽमुनाऽमुनाऽमुना, सर्वत्र प्रपद्य इति त्रिर्नाम गृह्णाति पुनः पुनः ॥ ३ ॥

दीर्घायुष्टं पुत्रस्य कामयमानस्त्रैलोक्यात्मानं कोशाकारं परिकल्प्य तस्य चतस्रो दिशो विशिष्टनामवतीस्तासां स्त्रीत्वं तत्संबन्धेन वायुं तद्वत्सममरणधर्माणं चिन्तयेदिति प्रधानोपासितरुक्ता। संप्रति तदङ्गं जपं दर्शयति-अरिष्टमित्यादिना। अमुना तेन पुत्रेण निमित्तीभूतेन दीर्घायुष्टं निमित्तीकृत्येत्यर्थः। सर्वत्र सर्वेषु प्रपद्य इति

१ घ. च. ठ. ड. ण. °ङ्गी नाम रा°। २ क अतः पु°। ३ क. °मित्तं पु°। ४ क. ग. ङ. °मित्तभू°।

क्रियापदमुपायं दर्शयितुं पुनरुपात्तं निमित्तनिवेदनार्थं च पुनः पुनर्मन्त्रेषु पुत्रस्य त्रिर्नाम गृह्णातीति योजना ॥ ३ ॥

स यदवोचं प्राणं प्रपद्य इति प्राणो वा इदꣳ सर्वं भूतं यदिदं किंच तमेव तत्प्रापत्सि ॥ ४ ॥

स यदवोचं प्राणं प्रपद्य इति व्याख्यानार्थमुपन्यासः । प्राणो वा इदꣳ सर्वं भूतं यदिदं जगत् । यथा वाऽरा नाभाविति वक्ष्यति । अतस्तमेव सर्वं तत्तेन प्राणप्रतिपादनेन प्रापत्सि प्रपन्नोऽभूवम् ॥ ४ ॥

अरिष्टमित्यादिमन्त्रस्य प्रागेव व्याख्यातत्वात्प्राणमित्यादिमन्त्रमादाय व्याचष्टे-- स यदिति । सशब्दो वक्तृविषयः । प्राणस्य सर्वात्मत्वे वाक्यशेषानुगुण्यं दर्शयति- यथेति । तत्सार्वात्म्यमतःशब्दार्थः ॥ ४ ॥

अथ यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचम् ॥ ५ ॥

तथा भूः प्रपद्य इति त्रीँल्लोकान्भूरादीन्प्रपद्य इति तदवोचम् ॥ ५ ॥ ॥ ५ ॥

अथ यदवोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् ॥ ६ ॥

अथ यदवोचं भुवः प्रपद्य इत्यग्न्यादीन्प्रपद्य इति तदवोचम् ॥ ६ ॥ ॥ ६ ॥

अथ यदवोचꣳ स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इत्येव तदवोचं तदवोचम् ॥ ७ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

अथ यदवोचं स्वः प्रपद्य इत्यृग्वेदादीन्प्रपद्य इत्येव तदवोचमिति । उपरिष्टान्मन्त्राञ्जपेत्ततः पूर्वोक्तमजरं कोशं सदिग्वत्सं यथावद्ध्यात्वा । द्विर्वचनमादरार्थम् ॥ ७ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

---

१ ग. ट. ड. ढ. °थाऽरा° । २ ग. घ. ङ. च. ठ. ड. ढ. °ति । अरिष्टान्म° । ३ ख. ग. घ. ङ. च. छ. ठ. ड. ढ. ण. °द्वधाथेद्द्विर्व° ।

कथं पुनरेषां मन्त्राणां जप इत्यपेक्षायां पूर्वोक्तप्रधानविद्यानन्तरमित्याह—उपरिष्टाद्धीति । ध्यात्वोपरिष्टादिति संबन्धः । यथोक्ते विज्ञाने जपे वाऽऽदरः ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य पञ्चदशः खण्डः । १५ ॥

(अथ तृतीयाध्यायस्य षोडशः खण्डः)

पुत्रायुष उपासनमुक्तं जपश्च । अथेदानीमात्मनो दीर्घजीवनायेदमुपासनं जपं च विदधेदाह । जीवन्हि स्वयं पुत्रादिफलेन युज्यते नान्यथा । इत्यत आत्मानं यज्ञं संपादयति—

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशति-
वर्षाणि तत्प्रातःसवनं चतुर्विंशत्यक्षरा गायत्री
गायत्रं प्रातःसवनं तदस्य वसवोऽन्वायत्ताः प्राणा
वाव वसव एते हीदꣳ सर्वं वासयन्ति ॥ १ ॥

पुरुषः पुरुषो जीवनविशिष्टः कार्यकरणसंघातो यथाप्रसिद्ध एव । वाव-शब्दोऽवधारणार्थः । पुरुष एव यज्ञ इत्यर्थः ।

वृत्तमनूद्य पुरुषो वावेत्यादिखण्डान्तरमवतारयति—पुत्रायुष इति । किमित्यात्मनो दीर्घजीवनं समर्थ्यते तत्राऽऽह—जीवन्हीति । यथोक्तफलहेतुभूतां विद्यामुत्थापयति—इत्यत आत्मानमिति । कथं * पूर्वस्याऽऽत्मनो यज्ञत्वं संपाद्यते तत्राऽऽह—पुरुष इति ।

तथा हि सामान्यैः संपादयति यज्ञत्वम् । कथम् । तस्य पुरुषस्य यानि चतुर्विंशतिवर्षाण्यायुषस्तत्प्रातःसवनं पुरुषाख्यस्य यज्ञस्य । केन सामान्येनेत्याह—चतुर्विंशत्यक्षरा गायत्री छन्दो गायत्रं गायत्रीछन्दस्कं हि विधियज्ञस्य प्रातःसवनम् । अतः प्रातःसवनसंपन्नेन चतुर्विंशतिवर्षायुषा युक्तः पुरुषः । अतः विधियज्ञमादृत्याद्यज्ञः । तथोत्तरयोरप्यायुषोः सवनद्वयसंपत्तिस्त्रिष्टुब्जगत्यक्षरसंख्यासामान्यतो वाच्या ।

अवधारणार्थं समर्थयते—तथा हीति । यज्ञावयवमादृत्यात्पुरुषे यज्ञदृष्टिः कर्त-

---

* पूर्वस्येत्यस्य स्थाने भूतस्येति तथा यज्ञत्वमित्यस्य स्थाने भव्यत्वमिति ख. संज्ञितपुस्तके टिप्पणं दृश्यते ।

---

१ घ. ङ. उक्तमुपासनं ज° । २ क. °धत्तदा° । ३ ख. ङ. ञ. ण. °र्यकार° । ४ क. °र्थं पुरुषस्याऽऽ° । ५ ण. घ. च. ट. ठ. ड. ढ. °न्दो गायत्रच्छ° । ६ क. हीत्यादिना य° ।

ध्येत्युक्तम् । कथं सादृश्याद्यज्ञसंपादनमिति पृच्छति—कथमिति । तत्र षोडशाधिकं वर्षशतं पुरुषस्याऽऽयुः फलभूतं तत्रेषां प्रविभज्य चतुर्विंशतिवर्षायुषि प्रातःसवनदृष्टिः कर्तव्येत्याह—तस्येति । गायत्र्याश्छन्दसश्चतुर्विंशत्यक्षरत्वेऽपि कथं शब्दोक्ता प्रातःसवनदृष्टिरित्याशङ्क्याऽऽह—गायत्रीति । विधितोऽनुष्ठीयमानस्य बाह्ययज्ञस्य प्रातःकालोपलक्षितं कर्म प्रातःसवनं तत्र स्तोत्रादि गायत्रच्छन्दस्कं गायत्रं प्रातःसवनमिति च श्रुतिरित्यर्थः । यथोक्ते पुरुषायुषि प्रातःसवने चतुर्विंशत्यक्षराणि फलितमाह—अत इति । तथाऽपि कथं पुरुषायुषस्य यज्ञत्वं तदाह—अत इति । अतःशब्दस्यैवार्थो विधियज्ञसादृश्यादिति । विधिनाऽनुष्ठीयमानो यज्ञो विधियज्ञस्तेन सादृश्यं पुरुषस्य प्रातःसवनसंबन्धस्तस्मात्पुरुषो यज्ञ इत्यर्थः । यथा यथोक्ते पुरुषायुषि प्रातःसवनसंपत्तिस्तथा वक्ष्यमाणयोरपि पुरुषायुषोर्माध्यंदिनं सवनं तृतीयसवनमिति सवनद्वयसंपत्तिर्द्रष्टव्येत्याह—तथेति । चतुर्विंशतिवर्षमितपुरुषायुषि प्रातःसवनमतः संख्यासामान्याद्वक्ष्यमाणपुरुषायुषोः सवनद्वयसंपत्तौ किं कारणमित्याशङ्क्याऽऽह—त्रिष्टुबिति । चतुश्चत्वारिंशदक्षरा त्रिष्टुप्प्रसिद्धा । त्रैष्टुभं च माध्यंदिनं सवनम् । अष्टाचत्वारिंशदक्षरा जगती । जागतं च तृतीयसवनम् । अतः संख्यासामान्यादुत्तरयोः पुरुषायुषोः सवनद्वयसंपत्तिर्युक्तेत्यर्थः ।

किंच तदस्य पुरुषयज्ञस्य प्रातःसवनं विधियज्ञस्येव वसवो देवा अन्वायत्ता अनुगताः । सवनदेवतात्वेन स्वामिन इत्यर्थः । पुरुषयज्ञेऽपि विधियज्ञ इवाग्न्यादयो वसवो देवाः प्राप्ता इत्यतो विशिनष्टि—प्राणा वाव वसवो वागादयो वायवश्च । ते हि यस्मादिदं पुरुषादिप्राणिजातमेते वासयन्ति । प्राणेषु हि देहे वसत्सु सर्वमिदं वसति नान्यथा । इत्यतो वसनाद्वासनाच्च वसवः ॥ १ ॥

पुरुषस्य यज्ञत्वे विधियज्ञेन सह सादृश्यान्तरमाह—किंचेति । प्रातःसवने वसूनां तद्देवतात्वेनान्वयात्तत्त्वमेव संक्षिपति—सवनदेवतात्वेन स्वामिन इत्यर्थ इति । वसूनां सवनस्वामित्वमुभयत्र तुल्यमित्युक्ते प्रसिद्धान्वसून्पुरुषयज्ञेऽपि प्राप्तान्प्रत्युदस्यति—पुरुषयज्ञेऽपीति । तेषु वसुशब्दप्रवृत्तिं साधयति—ते हीति । निमित्तान्तरमाह—प्राणेषु हीति । प्राणानां वसुत्वमुपपादितमुपसंहरति—इत्यत इति ।

तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा

---

१ क. ग. ट. °धा वि° । २ क. °यत्रीछ° । ३ ङ. शब्दे प्रा° । ४ क. ग. ट. °बन्धं तस्मा° । ५ ख. ङ. °र्षमतिषु° । क. ग. छ. ट. ण. °र्षमितिषु° । ६ घ. ङ. च. ड. ण. °न सव-नसंपन्ने वस(य)सि स्वा° । ७ घ, ण. देवताः प्रा° । ८ ट. °नान्वायत्तत्वमे° । क. °नान्वायत्तत्वेनैव ।

वसव इदं मे प्रातःसवनं माध्यंदिनꣳ सवनमनु-
संतनुतेति माऽहं प्राणानां वसूनां मध्ये यज्ञो विलो-
प्सीयेत्युद्धैव तत एत्यगदो ह भवति ॥ २ ॥

तं चेद्यज्ञसंपादितमेतस्मिन्प्रातःसवनसंपन्ने वयसि किंचिद्व्याध्यादि मरण-
श्रङ्काकरणमुपतपेदनुत्पादयेत्स तदा यज्ञसंपादी पुरुष आत्मानं यज्ञं
मन्यमानो ब्रूयाज्जपोदित्यर्थ इमं मन्त्रं हे प्राणा वसव इदं मे प्रातःसवनं मम
यज्ञस्य वर्तते तन्माध्यंदिनं सवनमनुसंतनुतेति माध्यंदिनेन सवनेनाऽऽयुषा
सहिमेकीभूतं संततं कुरुतेत्यर्थः। माऽहं यज्ञो युष्माकं प्राणानां वसूनां
प्रातःसवनेशानां मध्ये विलोप्सीय विलुप्येय विच्छिद्येयेत्यर्थः। इतिशब्दो
मन्त्रपरिसमाप्त्यर्थः। स तेन जपेन ध्यानेन च ततस्तस्मादुपतापादुदेत्युद्ग-
च्छति। उद्गम्य विमुक्तः सन्नगदो ह्यनुपतापो भवत्येव ॥ २ ॥

संप्रति पुरुषयज्ञविद्याङ्गभूतमाशीर्वादप्रयोगं दर्शयति—तं चेदिति। अनुसंतनुते-
त्यत्रानुपदमेकीभावे। मन्त्रजपस्य सानुबन्धित्वं विधियज्ञेन ॥ २ ॥

अथ यानि चतुश्चत्वारिꣳशद्वर्षाणि तन्माध्यंदिनꣳ
सवनं चतुश्चत्वारिꣳशदक्षरा त्रिष्टुप्त्रैष्टुभं माध्यंदि-
नꣳ सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव
रुद्रा एते हीदꣳ सर्वꣳ रोदयन्ति ॥ ३ ॥

अथ यानि चतुश्चत्वारिंशद्वर्षाणीत्यादि समानम्। रुदन्ति रोदयन्तीति
प्राणा रुद्राः। क्रूरा हि ते मध्यमे वयस्यतो रुद्राः ॥ ३ ॥

समानं तस्य यानि चतुर्विंशतिवर्षाणीत्यादिनेति शेषः। प्राणेषु रुद्रशब्दप्रवृत्तौ
निमित्तमाह—रुदन्तीति। यदुक्तं रोदयन्तीति रुद्रा इति तदुपपादयति—क्रूरा
हीति ॥ ३ ॥

तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा रुद्रा

---

१ ग. ङ. ट. ठ. ड. ढ. ण. °रणाश°। २ ख. घ. ङ. झ. ठ. ढ. ण. °नुत मा°। ३ ग. ङ. ट. ड. °तं तत°। ४ च. ट. ठ ड. °शानानां। ५ क. ख. घ. ङ. च. ट. ठ. ड. ण. °प्योर्वि°। ६ क. घ. ङ. °न्त्रस°।

इदं मे माध्यंदिनꣳ सवनं तृतीयसवनमनुसंतनुतेति माऽहं प्राणानाꣳ रुद्राणां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवति ॥ ४ ॥

॥ ४ ॥

॥ ४ ॥

अथ यान्यष्टाचत्वारिꣳशद्वर्षाणि तत्तृतीयसवनमष्टाचत्वारिꣳशदक्षरा जगती जागतं तृतीयसवनं तदस्याऽऽदित्या अन्वायत्ताः प्राणा वावाऽऽदित्या एते हीदꣳ सर्वमाददते ॥ ५ ॥

तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा आदित्या इदं मे तृतीयसवनमायुरनुसंतनुतेति माऽहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो हैव भवति ॥ ६ ॥

तथाऽऽदित्याः प्राणाः । ते हीदं शब्दादिजातमाददतेऽत आदित्यास्तृतीयसवनमायुः षोडशोत्तरवर्षशतं समापयतानुसंतनुत यज्ञं समापयतेत्यर्थः । समानमन्यत् ॥ ५ ॥ ६ ॥

यथा प्राणा वसवो रुद्राश्चोक्तास्तथेति यावत् । तेष्वादित्यशब्दप्रवृत्तौ निमित्तमाह—ते हीति । तं चेदित्यादिना पूर्वेण ग्रन्थेन तं चेदेतस्मिन्नित्यादिवक्ष्यमाणग्रन्थस्य तुल्यार्थत्वान्न व्याख्यानापेक्षेत्याह—समानमन्यदिति ॥ ५ ॥ ६ ॥

निश्चिता हि विद्या फलायेत्येतद्दर्शयन्नुदाहरति—

एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स

---

१ ग. च. ट. ड. 'त्तरं व'।

ह + षोडशं वर्षशतमजीवत्प्र ह षोडशं वर्षशतं
जीवति य एवं वेद ॥ ७ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्य षोडशः खण्डः ॥१६॥

एतद्यज्ञदर्शनं ह स्म वै किल तद्विद्वानाह महिदासो नामतः । इतराया अपत्यमैतरेयः । किं कस्मान्मे ममैतदुपतपनमुपतपसि स त्वं हे रोग योऽहं यज्ञोऽनेन त्वत्कृतेनोपतापेन न प्रेष्यामि न मरिष्याम्यतो मृषा तव श्रम इत्यर्थः । इत्येवमाह स्मेति पूर्वेण संबन्धः । स एवंनिश्चयः सन्षोडशं वर्षशतमजीवत् । अन्योऽप्येवंनिश्चयः षोडशं वर्षशतं प्रजीवति य एवं यथोक्तं यज्ञसंपादनं वेद जानाति स इत्यर्थः ॥ ७ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य षोडशः खण्डः ॥१६॥

महिदासोदाहरणस्य तात्पर्यमाह—निश्चिता हीति । तदेतद्यज्ञदर्शनं विद्वानाह स्मेति संबन्धः । ह वा इति निपातयोः किलेत्यर्थः । उक्तस्यैवोदाहरणस्य प्रसिद्धिविषयः । हे रोग कस्मान्मां त्वमुपतपसीति संबन्धः । कस्मादित्याक्षेपे हेतुमाह—योऽहमिति । यो यज्ञः सोऽहमनेनेति योजना । इतिशब्दस्यान्वयमाचष्टे—इत्येवमिति । निश्चिताया विद्याया ध्यानं प्रति फलं कथयति—स एवमिति । यद्यपि महिदासस्य यथोक्तनिश्चयवतो यथोक्तं तथाऽपीदानींतनस्य किमायातमित्याशङ्क्याऽऽह—अन्योऽपीति । प्रजीवतीति जीवनस्य प्रकर्षो रोगाद्युपतापराहित्यं प्रशब्देनोच्यते । एवंनिश्चय इत्युक्तं पुरुषं विशदयति—य एवमिति ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
तृतीयाध्यायस्य षोडशः खण्डः ॥ १६ ॥

(अथ तृतीयाध्यायस्य सप्तदशः खण्डः) ।

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य
दीक्षाः ॥ १ ॥

स यदशिशिषतीत्यादियज्ञसामान्यनिर्देशः पुरुषस्य पूर्वेणैव संबध्यते ।

+ षोडशाधिका अस्मिन्वर्षशते तत्षोडशं तदस्मिन्नधिकमिति दशान्ताड्ड त्थनेन उप्रत्ययः ।

१ घ. ङ. °सि त्वं । २ च. ण. °व परिश्र° । ३ घ. ङ. ठ. ड. ढ. °थैः । स ए° । ४ क. ग, ढ. °स्य चोदा° । ५ क. ख. ग. छ. झ. ण. यद्यपि । ६ घ. ङ. ठ. ड. ढ. °ते च वं° ।

यदशिशिषत्यशितुमिच्छति । तथा पिपासति पातुमिच्छति । यन्न रमत इष्टाद्यप्राप्तिनिमित्तं यदेवंजातीयकं दुःखमनुभवति ता अस्य दीक्षाः । दुःखसामान्याद्विधियज्ञस्येव ॥ १ ॥

ननु पूर्वेणाऽऽशीर्वादप्रयोगेणोदाहरणेनैव समनन्तरग्रन्थस्य संबन्धो नोपलभ्यते तत्राऽऽह—स यदिति । पूर्वेण तस्य यानि चतुर्विंशतिवर्षाणीत्यादिना साद्दश्यनिर्देशेनेत्यर्थः । एवंजातीयकमशनायादिकृतामिति यावत् । अशिशिषादिषु दीक्षादृष्टौ हेतुमाह—दुःखेति ॥ १ ॥

अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति ॥ २ ॥

अथ यदश्नाति यत्पिबति यद्रमते रतिं चानुभवतीष्टादिसंयोगात्तदुपसदैः समानतामेति । उपसदां च पयोव्रतत्वनिमित्तं सुखमस्ति । अल्पभोजनीयानि चाहान्यासन्नानीति प्रश्वासोऽतोऽशनादीनामुपसदां च सामान्यम् ॥ २ ॥

दीक्षावचनसाद्दश्यात्पुरुषस्य यज्ञत्वमुक्तमिदानीमुपसदुपेतत्वसाद्दश्यादपि तस्य यज्ञत्वं विज्ञेयमित्याह—अथेति । अशनादिषु कथमुपसद्दृष्टिस्तत्राऽऽह—उपसदां चेति । पयोव्रतत्वं पयोभक्षणयुक्तत्वम् । यज्ञे यान्यहान्यल्पभोजनीयानि प्रसिद्धानि तानि चोपसत्सु क्रियमाणान्यासन्नानीति तासु प्रश्वासः स्वास्थ्यविशेषः । अशनादिषु च सोऽस्तीति प्रसिद्धमिति भावः । सुखनिमित्तत्वं क्लेशानिवृत्तिहेतुत्वं च सामान्यम् ॥ २ ॥

अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति ॥ ३ ॥

अथ यद्धसति यज्जक्षति भक्षयति यन्मैथुनं चरति स्तुतशस्त्रैरेव तत्समानतामेति । शब्दवत्त्वसामान्यात् ॥ ३ ॥

स्तुतशस्त्रवैशिष्ट्यसाम्यादपि पुरुषस्य यज्ञत्वमित्याह—अथ यदिति । हासादिषु स्तुतशस्त्रदृष्टौ हेतुमाह—शब्दवत्त्वेति ॥ ३ ॥

अथ यत्तपो दानमार्जवमहिंसा सत्यवचनामिति ता अस्य दक्षिणाः ॥ ४ ॥

अथ यत्तपो दानमार्जवमहिंसा सत्यवचनामिति ता अस्य दक्षिणाः । धर्मपुष्टिकरत्वसामान्यात् ॥ ४ ॥

---

१ ग. °न्याश्वामनानी° । २ ख. छ. ञ. ण. °क्तमु° । ३ क. ख. ग. छ. ञ. ण. °न्यभो° । ४ ख. ग. छ ञ. ट. ण. °न्याश्वासनानी° । ५ ग. घ. ट. °मित्यर्थः । ६ क. °त्सामान्यमे° । ७ घ. ठ. ड. °मंतुष्टि°

दक्षिणावत्त्वसाम्यादपि पुरुषस्य यज्ञत्वमवधेयमित्याह—अथेति । तपोदानादिषु दक्षिणावत्त्वे हेतुमाह—धर्मेति ॥ ४ ॥

तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेवावभृथः ॥ ५ ॥

यस्माच्च यज्ञः पुरुषस्तस्मात्तं जनयिष्यति माता यदा तदाऽऽहुरन्ये सोष्यतीति तस्य मातरं यदा च प्रसूता भवति तदाऽसोष्ट पूर्णिकेति विधियज्ञ इव सोष्यति सोमं देवदत्तोऽसोष्ट सोमं यज्ञदत्त इति, अवः शब्दसामान्याद्वा पुरुषो यज्ञः । पुनरुत्पादनमेवास्य तत्पुरुषाख्यस्य यज्ञस्य यत्सोष्यत्यसोष्टेति शब्दसंबन्धित्वं विधियज्ञस्येव । किंच तन्मरणमेवास्य पुरुषयज्ञस्यावभृथः समाप्तिसामान्यात् ॥ ५ ॥

प्रकारान्तरेण पुरुषस्य यज्ञत्वं साधयति—यस्माच्चेति । "पूङ् प्राणिप्रसवे" "षूङ् अभिषवे" इति धातुद्वयदर्शनात्प्रसवे कण्डने च साधारणः सवनशब्दस्ततः सवनशब्दवत्त्वे सामान्याद्वा पुरुषे यज्ञदृष्टिः कर्तव्येत्यर्थः । पुरुषगतं शब्दसामान्यं विशदयति—पुनरिति । यत्पुनरस्य पुरुषाख्यस्य विधियज्ञस्येव सोष्यतीत्यादिशब्दसंबन्धित्वं तदुत्पादनमेव तदिति योजना । अवभृथसंबन्धित्वादपि पुरुषस्य यज्ञत्वमस्तीत्याह—किंचेति ॥ ९ ॥

तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति तत्रैते द्वे ऋचौ भवतः ॥ ६ ॥

तद्धैतद्यज्ञदर्शनं घोरो नामत आङ्गिरसो गोत्रतः कृष्णाय देवकीपुत्राय शिष्यायोक्त्वोवाच तदेतत्त्रयमित्यादिग्रन्थसहितेन संबन्धः । स चैतद्दर्शनं श्रुत्वाऽपिपास एवान्याभ्यो विद्याभ्यो बभूव । इत्थं च विशिष्टेयं विद्या यत्कृष्णस्य देवकीपुत्रस्यान्या विद्या प्रति तद्विच्छेदकरीति पुरुषयज्ञविद्यां स्तौति । घोर आङ्गिरसः कृष्णायोक्त्वेमां विद्यां किमुवाचेति तदाह—स एवं यथोक्तयज्ञविदन्तवेलायां मरणकाल एतन्मन्त्रत्रयं प्रतिपद्येत । जपेदित्यर्थः । किं तदित्यत आह—अक्षितमसीति नमस्तं वाऽसीत्येकं यजुः सामर्थ्यादादित्यस्थं प्राणं चैकीकृत्याऽऽह । तथा त्वमेवाऽऽहाच्युतं स्वरूपादमच्युतमसीति द्वितीयं

१ क. °दृक्षा° । २ ग. ट. °वत्त्वा° । ३ ख. ङ. ण. °दित्यं ।

यजुः । प्राणसंशितं प्राणश्च स संशितं सम्यक्तनूकृतं च सूक्ष्मं तत्त्वमसीति तृतीयं यजुः । तत्रैतस्मिन्नर्थे विद्यास्तुतिपरे द्वे ऋचौ मन्त्रौ भवतो न जपार्थे । त्रयं प्रतिपद्येतेति त्रित्वसंख्याबाधनात् । पञ्चसंख्या हि तदा स्यात् ॥ ६ ॥

पुरुषे यज्ञदृष्टिरुक्ता संप्रति विशिष्टपुरुषसंबन्धेन विद्यां स्तोतुं विद्याङ्गं च जपं विधातुमुपक्रमते—तद्धैनदिति । देवकीपुत्रस्यैतद्दर्शनश्रवणफलमाह—स चेति । किमर्थेयं गुरुशिष्याख्यायिकेत्याह—इत्थं चेति । अक्षितमसीति कीदृशीं देवतां प्रत्युच्यते तत्राऽऽह—सामर्थ्यादिति । निकृष्टस्य स्तुतिसंबन्धायोगात्पुरुषयज्ञे सवनदेवतान्तरानुपपत्तेश्च प्राणानामेवाऽऽधिदैविकं रूपमादित्याख्यं जप्यमन्त्रार्थत्वेन संबध्यत इत्यर्थः । द्वितीयमन्त्रस्यार्थान्तरं वारयति—तथेति । प्रथममन्त्रवदित्यर्थः । न च द्वयोरेकार्थत्वे सत्यन्यतरस्य वैयर्थ्यं द्वयोरपि जप्यत्वेनोपयुक्तत्वादिति द्रष्टव्यम् । मन्त्रार्थप्रतिपाद्यं सावित्रं तत्त्वमृग्भ्यामपि प्रतिपादितमिति प्रत्ययदार्ढ्यार्थमाह—तत्रेति । किमिति विद्यास्तुतिपरत्वमनयोरिष्यते जपार्थत्वमेव किं न स्यात्तत्राऽऽह—नेत्यादिना । अनयोर्जपार्थत्वेऽपि त्रित्वसंख्यायाः सत्त्वान्न सा बाध्येत्याशङ्क्याऽऽह—पञ्चेति । अनयोर्जप्यत्वे पञ्चकं प्रतिपद्येतेति पञ्चसंख्याया वक्तव्यत्वात्त्रित्वं बाधितं स्यादित्यर्थः ॥ ६ ॥

आदित्यस्य रेतसः । उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरꣳ स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति ॥ ७ ॥

इति छान्दोग्योपनिषदि तृतीयाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

===

आदिदित्यत्राऽऽकारस्यानुबन्धस्तकारोऽनर्थक इच्छन्दश्च । प्रत्नस्य चिरंतनस्य पुराणस्येत्यर्थः । रेतसः कारणस्य बीजभूतस्य जगतः सदाख्यस्य ज्योतिः प्रकाशं पश्यन्ति । आशब्द उत्सृष्टानुबन्धः पश्यन्तीत्यनेन संबध्यते । किं तज्ज्योतिः पश्यन्ति । वासरमहरहरिव तत्सर्वतो व्याप्तं ब्रह्मणो ज्योतिः । निवृत्तचक्षुषो ब्रह्मविदो ब्रह्मचर्यादिनिवृत्तिसाधनैः शुद्धान्तःकरणा आ समन्ततो ज्योतिः पश्यन्तीत्यर्थः ।

---

१ ब. °तं सम्म° । २ क. घ. °णस्य सं° । ३ ग. ट. °त्याशङ्क्याऽऽह । ४ ग. ढ. बीजभू° । ५ क. ख. ग. ङ. च. ञ. ठ. ड. ढ. ण. °धनेन शु° ।

[परः परमिति लिङ्गव्यत्ययेन, ज्योतिष्परत्वात् । यदिष्यते दीप्यते दिवि द्योतनवति परस्मिन्ब्रह्मणि वर्तमानम् । येन ज्योतिषेद्धः सविता तपति चन्द्रमा भाति विद्युद्द्योतते ग्रहतारागणा विभासन्ते ।

" आदित्यप्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम् । परो यदिध्यते दिवि " इति मन्त्रस्य प्रतीकग्रहणमादित्यप्रत्नस्य रेतस इति, तत्पदच्छदपूर्वकं व्याचष्टे—आदित्यादिना । इच्छब्दश्चानर्थक इति पूर्वेण संबन्धः । किं तत्कारणमित्यपेक्षायां सदेव सोम्येदमित्यादिश्रुतिसिद्धं ब्रह्मेत्याह—सदाख्यस्येति । आनन्दं ब्रह्मणो विद्वानितिवत्प्रत्नस्य ज्योतिरिति संबन्धो द्रष्टव्यः । उत्सृष्टानुबन्धो ध्वस्ततत्कारः स इति यावत् । ननु ब्रह्मस्वरूपभूतमेतज्ज्योतिर्नैव सर्वे पश्यन्तो दृश्यन्ते तत्राऽऽह—निवृत्तचक्षुष इति । निवृत्तानि विमुखीकृतानि विषयेभ्यश्चक्षूंषि करणानि येषां ते तथा । अत एव ब्रह्मविदः, " कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् " इति श्रुत्यन्तरम् । तत्रैवोपायान्तरं सूचयति—ब्रह्मचर्यादीति ।

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥

[इत्युक्तं] ब्रह्मचर्यम् । आदिपदेनाहिंसास्तेयादयो गृह्यन्ते । एतैर्निवृत्तिप्रधानैः साधनैः शुद्धमुद्दीपितमन्तःकरणं येषां ते तथा । व्यत्ययं हेतुमाह—ज्योतिष्परत्वादिति । यत्स्वमहिम्नि प्रतिष्ठितं दीप्यते तत्परं ज्योतिरिति संबन्धः । दीप्यमानत्वं विवृणोति—येनेति ।

किंचान्यो मन्त्रदृगाह यथोक्तं ज्योतिः पश्यन् । उद्वयं तमसोऽज्ञानलक्षणात्परि परस्तादिति शेषः । तमसो वाऽपनेतृ यज्ज्योतिरुत्तरमादित्यस्थं परिपश्यन्तो वयमुदगन्मेति व्यवहितेन संबन्धः । तज्ज्योतिः स्वः स्वमात्मीयमस्मद्धृदि स्थितम् । आदित्यस्थं च तदेकं ज्योतिः । यदुत्तरमुत्कृष्टतरमूर्ध्वतरं वाऽपरं ज्योतिरपेक्ष्य पश्यन्त उदगन्म वयम् । कमुदगन्मेत्याह । देवं द्योतनवन्तं देवत्रा देवेषु सर्वेषु सूर्यं रसानां रश्मीनां प्राणानां च जगत ईरणात्सूर्यस्तमुदगन्म गतवन्तो ज्योतिरुत्तमं सर्वज्योतिर्भ्य उत्कृष्टतममहो मात्रा

---

१ घ. ङ. च. ढ. ण. °णा दिवि° । २ क. °व सौम्ये° । ३ क. मितिश्रु° । ४ क. °तिर्न च स° । ५ क. °श्यन्ति त° । ६ क. ट. °त्ययस्यं हे° । ७ क. °ह्मिन्न प्र° । ८ क. °तिष्ठद्दीप्य° । ग. ट. °तिष्ठं दी° । ९ क. ग. कथमु° ।

वयमित्यर्थः। इदं तज्ज्योतिर्यदस्माभिः स्तुतं यद्यजुस्त्रयेण प्रकाशितम् द्विरभ्यासो यज्ञकल्पनापरिसमाप्त्यर्थः ॥ ७ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

मन्त्रान्तरमवतारयति—किंचेति । इतश्च विद्यास्तुत्यर्थेति यावत् । किमाहेत्यपेक्षायां द्वितीयं मन्त्रमादत्ते—उद्वयमिति । तं व्याकरोति—तमस इत्यादिना । तस्यैव ज्योतिषः प्रमाने ज्योतिर्नान्यदस्तीत्यर्थः । देवत्वेन प्रत्यगात्मत्वमाह—स्वैरिति । तयोरैकत्वं स यश्चायमित्यादिषु श्रुत्यन्तरसिद्धं दर्शयति—आदित्यस्थमिति । तत्पदार्थं त्वंपदार्थं चोक्त्वा तयोरैक्यमुक्तमिदानीमेकीभूतं ज्योतिर्विशिनष्टि—यदुत्तरमिति । एकत्वधीफलं कथयति—पश्यन्त इति । फलमेव प्रश्नपूर्वकं विवृणोति—कमित्यादिना । फलविषयं स्वानुभवं दर्शयति—अहो इति । मन्त्राणां मन्त्रयोश्चैकवाक्यत्वमुपसंहरति—इदं तदिति ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

(अथ तृतीयाध्यायस्याष्टादशः खण्डः) ।

मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवमाकाशो ब्रह्मेत्युभयमादिष्टं भवत्यध्यात्मं चाधिदैवतं च ॥ १ ॥

मनोमय ईश्वर उक्त आकाशात्मेति च ब्रह्मणो गुणैकदेशत्वेन । अथेदानीं मनआकाशयोः समस्तब्रह्मदृष्टिविधानार्थं आरम्भो मनो ब्रह्मेत्यादि । मनो मनुतेऽनेनेत्यन्तःकरणं तद्ब्रह्म परमित्युपासीतेति । एतदात्मविषयं दर्शनमध्यात्मम् । अथाधिदैवतं देवताविषयमिदं वक्ष्यामः । आकाशो ब्रह्मेत्युपासीत । एवमुभयमध्यात्ममधिदैवतं चोभयं ब्रह्मदृष्टिविषयमादिष्टमुपदिष्टं भवति । आकाशमनसोः सूक्ष्मत्वात् । मनसोपलब्धृत्वाच्च ब्रह्मणो योग्यं मनो ब्रह्मदृष्टेः । आकाशश्च सर्वगतत्वात्सूक्ष्मत्वादुपाधिहीनत्वाच्च ॥ १ ॥

---

१ ख. ख. ञ. °र्यद्वाभ्यामृग्भ्यां । २ घ. ठ. °तं प्रकाशितं य° । ३ घ. च. छ, ण. °नास° । ४ ख. ञ. ण. °तीयम° । ५ क. ग. ट. स्व इति । ६ ग. ट. °कथी° । ७ क. ग. कथमि° । ८ ञ, ड, °गत्वा° । ९ ग. °त्वाद्रूपं° ।

ननु यज्ञविज्ञानेन वक्ष्यमाणविज्ञानस्य न संगतिरस्तीति कथं पौर्वापर्यमित्याशङ्क्यानन्तरखण्डस्य व्यवहितेन संबन्धमाह—मनोमय इति । इति चेश्वर उक्त इति पूर्वेण संबन्धः । तत्र ब्रह्मणो गुणयोरेकदेशत्वेन मन आकाशश्चोक्त इत्याह—ब्रह्मण इति । यथोक्तगुणकब्रह्मदृष्ट्या समर्थस्य तयोरेव संपूर्णब्रह्मदृष्टिकथनार्थमुत्तरग्रन्थमवतारयति—अथेति । एवमुभयमुपदिष्टं भवतीति संबन्धः । तदेवोभयं विभजते—अध्यात्ममिति । कथं मनोदृष्टिविषयत्वेनाध्यात्मं मनो ब्रह्मेत्युपासनं विधित्स्यते तत्राऽऽह—मनसेति । तथाऽपि कथं ब्रह्मदृष्टेराकाशं विषयी भवति न हि तेनोपलभ्यते ब्रह्मेत्याशङ्क्याऽऽह—आकाशश्चेति । ब्रह्मदृष्टेर्योग्यमिति पूर्वेण संबन्धः ॥ १ ॥

तदेतच्चतुष्पाद्ब्रह्म वाक्पादः प्राणः पादश्चक्षुः पादः श्रोत्रं पाद इत्यध्यात्ममथाधिदैवतमग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इत्युभयमेवाऽऽदिष्टं भवत्यध्यात्मं चैवाधिदैवतं च ॥ २ ॥

तदेतन्मनआख्यं चतुष्पाद्ब्रह्म, चत्वारः पादा अस्येति । कथं चतुष्पात्त्वं मनसो ब्रह्मण इत्याह—वाक्प्राणश्चक्षुः श्रोत्रमित्येते पादा इत्यध्यात्मम् । अथाधिदैवतमाकाशस्य ब्रह्मणोऽग्निर्वायुरादित्यो दिश इत्येते । एवमुभयमेव चतुष्पाद्ब्रह्माऽऽदिष्टं भवत्यध्यात्मं चैवाधिदैवतं च ॥ २ ॥

अध्यात्ममधिदैवतं च विहितस्योपासनस्याङ्गानुचिन्तनं दर्शयति—तदेतदिति । मनसश्चतुष्पात्त्वं प्रश्नपूर्वकं व्युत्पादयति—कथमित्यादिना । आधिदैविकस्याऽऽकाशस्य चतुष्पात्त्वं प्रकटयति—अथेत्यादिना । मनआकाशयोरुक्तं चतुष्पात्त्वं निगमयति—एवमिति ॥ २ ॥

वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ३ ॥

तत्र वागेव मनसो ब्रह्मणश्चतुर्थः पाद इतरपादत्रयापेक्षया । वाचा

---

१ क. ख. ग. घ. ट. 'दृश्यत्व' । २ क. 'त्वं प्र' । ३ ग. 'वत्वं ते(ये)ना' । ४ क. ख. घ. ण. 'ष्टफल' ।

हि पादेनैव गन्तव्यादि वक्तव्यविषयं प्रति तिष्ठति । अतो मनसः पाद इव वाक् । तस्या वाचो द्रोणः पादः । तेनापि गन्धविषयं प्रति चैति क्रामति । तथा चक्षुः पादः भोक्तं पद इत्येवमध्यात्मं चतुष्पात्त्वं मनसो ब्रह्मणः । अथाधिदैवतमादित्यदिश आकाशस्य ब्रह्मण उदर इव गोः पादा विलग्ना उपलक्ष्यन्ते । तेन तस्याऽऽकाशस्याग्न्यादयः पादा उच्यन्ते । एवमुभयमध्यात्मं चैवाधिदैवतं चतुष्पादादिष्टं भवति । तत्र वागेव मनसो ब्रह्मणश्चतुर्थः पादः । सोऽग्निनाऽधिदैवतेन ज्योतिषा भाति च दीप्यते तपति च संतापं चौष्ण्यं करोति । अथवा तैलघृताद्याग्नेयाशनेनेद्धा वाग्भाति च तपति च वदनायोत्साहवती स्यादित्यर्थः । विद्वत्फलं भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं यथोक्तं वेद ॥ ३ ॥

आध्यात्मिकान्पादान्प्रपञ्चयति—तत्रेति । पादत्वं वाचो व्युत्पादयति—वाचा हीति । यथा गवादिं गन्तव्यं पादेनैव प्राप्नोति देवदत्तोऽपि वाचैव पादेन वक्तव्यं विषयं प्रतिक्रमते । तेन तस्या युक्तं पादत्वमित्यर्थः । प्राणस्य वाच इव पादत्वं दर्शयति—तेनापीति । आधिदैविकान्पादान्विवृणोति—अथेति । यथा गोरुदरे पादा लग्ना लक्ष्यन्ते तथाऽऽकाशस्योदर इवाग्न्यादयो लग्ना दृश्यन्ते । तस्मात्तस्य ते पादा इव भवन्तीत्यर्थः । द्विविधपादविवरणमुपसंहरति—एवमिति । संप्रत्याध्यात्मिकपादानामाधिदैविकपादैराधिष्ठेयतया संबन्धोऽनुचिन्तनीय इति दर्शयितुमुपक्रमते—तत्रेति । सोऽग्निनेत्यादेरर्थान्तरमाह—अथवेति । कीर्तियशसोः प्रत्यक्षत्वपरोक्षत्वाभ्यां भेदः ॥ ३ ॥

प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा
भाति च तपति च भाति च तपति च कीर्त्या
यशसा ब्रह्मवर्चसेन य एवं वेद ॥ ४ ॥
चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा
भाति च तपति च भाति च तपति च कीर्त्या
यशसा ब्रह्मवर्चसेन य एवं वे ॥ ५ ॥

---

१ ग. घ. ट. ठ. ड. °देनैव । २ ख. ञ. ण. °दिर्वक्तं° । क. ठ. °दिवद्वक्तं° । ३ च. ठ. °क्तव्यं वि° । ४ ङ. ड. ढ. °ति प्रतिति° । ५ ठ. ड. प्राणं पा° । ६ घ. च. ढ. चङ्क्रमिति । ७ ख ञ. ठ. °मतीति । ८ ङ. °मिर्वायुरादित्यो दि° । ९ ख. ञ. ढ. °त्मं चाधि° । १० ख. ङ. च. ञ. ट. °ति च चै° । ११ ख. च. ञ. °पं चोष्णं क° । १२ घ. वचना° । १३ च. ठ ड. ढ. °दनोत्सा° । १४ ण. °तेनेति य ।

श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः स दिग्भिर्ज्योतिषा
भाति च तपति च भाति च तपति च कीर्त्या
यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥ ६ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्याष्टादशः खण्डः ॥१८॥

तथा प्राण एव ब्रह्मणश्चतुर्थः पादः। स वायुना गन्धाय भाति च तपति च। तथा चक्षुरादित्येन रूपग्रहणाय श्रोत्रं दिग्भिः शब्दग्रहणाय। विद्याफलं समानं सर्वत्र ब्रह्मसंपत्तिरदृष्टं फलं य एवं वेद। द्विरुक्तिर्दर्शनसमाप्त्यर्था ॥ ४ ॥ ५ ॥ ६ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्याष्टादशः खण्डः ॥१८॥

सर्वत्रेत्युभयतः संबध्यते ॥ ४ ॥ ५ ॥ ६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
तृतीयाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

(अथ तृतीयाध्यायस्यैकोनविंशः खण्डः)

आदित्यो ब्रह्मणः पाद उक्त इति तस्मिन्सकलब्रह्मदृष्ट्यर्थमिदमारभ्यते—

आदित्यो ब्रह्मेत्यादेशस्यस्तस्योपव्याख्यानमसदेवेदमग्र आसीत्। तत्सदासीत्तत्समभवत्तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निरभियत ते आण्डकपाले रजतं च सुवर्णं चाभवताम् ॥ १ ॥

आदित्यो ब्रह्मेत्यादेश उपदेशस्तस्योपव्याख्यानं क्रियते स्तुत्यर्थम्। असदेवेदमग्र आसीत्। असदेव[1] अकृतनामरूपमिदं जगदशेषमग्रे प्रागवस्थायामुत्पत्तेरासीन्न त्वसदेव। कथमसतः सज्जायेतेत्यसत्कार्यत्वस्य प्रतिषेधात्। सन्विहासदेवेति विधानाद्विकल्पः स्यात्। न, क्रियास्विव वस्तुनि विकल्पानुपपत्तेः। कथं तर्हीदमसदेवेति। नन्ववोचामाव्याकृतनामरूपत्वादसदिवासदिति। नन्वेवशब्दोऽवधा-

---

१ क. ग. ङ. °न्यात्मना भा°। २ ङ. च. ङ. °दग्रे।

रणार्थः। सत्यमेवं, न तु सत्त्वाभावमवधारयति। किं तर्हि नामरूपव्याकृतविषये सच्छब्दप्रयोगो दृष्टः। तच्च नामरूपव्याकरणमादित्यायत्तं प्रायशो जगतः। तदभावे ह्यन्धं तम इदं न प्रज्ञायेत किंचनेत्यतस्तत्स्तुतिपरे वाक्ये सदपीदं प्रागुत्पत्तेर्जगदसदेवेत्यादित्यं स्तौति ब्रह्मदृष्ट्यर्हत्वाय। आदित्यनिमित्तो हि लोके सदिति व्यवहारः। यथाऽसदेवेदं राज्ञः कुलं सर्वगुणसंपन्ने पूर्णवर्मणि राजन्यसतीति तद्वत्। न च सत्त्वमसत्त्वं वेह जगतः प्रतिपिपादयिषितमादित्यो ब्रह्मेत्यादेशपरत्वात्। उपसंहरिष्यत्यन्त आदित्यं ब्रह्मेत्युपास्त इति।

खण्डान्तरस्य संगतिमाह—आदित्य इति। तस्येत्यादित्यो गृह्यते। अनभिव्यक्तनामरूपत्वाभिप्रायेणासच्छब्दो गौणो व्याख्यातस्तत्रैवकारावष्टम्भेन शङ्कते—नन्विति। कथमसतः सज्जायेतेत्यसत्कारणत्वस्य षष्ठे निराकरिष्यमाणत्वात्तत्र सत्कारणं भवतु प्रकृते तु सावधारणादसच्छब्दादसदेव कारणं विवक्षितमित्युदितानुदितहोमवद्विकल्प इत्यर्थः। क्रियायाः कर्तृतन्त्रत्वात्तदिच्छया तत्र विकल्पाद्वस्तुनस्तु सिद्धस्य तदिच्छानुविधायित्वान्न विकल्पः संभवति। न हि स्थाणुरेव कस्यचिदपेक्षया पुरुषो भवतीति परिहरति—न क्रियास्विवेति। विकल्पासंभवे वाक्यस्य गतिर्वक्तव्येति पृच्छति—कथमिति। अत्रच्छब्दस्य वा गतिरवधारणस्य वा पृच्छयो तत्राऽऽद्यं प्रत्याह—नन्विति। द्वितीयं शङ्कते—नन्वेवशब्द इति। तस्य का गतिरिति शेषः। पूर्वकालीनसत्त्वाभिधायकासीच्छब्दस्य वाक्यशेषे श्रवणान्नोपक्रमे च(ऽपि) सत्त्वमात्रावधारणं विवक्षितं किंत्वभिव्यक्त्यभावावधारणमादित्यस्तुत्यर्थमिति समाधत्ते—सत्यमेवमिति। क्व पुनरियमादित्यस्तुतिरुपयुज्यते तत्राऽऽह—ब्रह्मदृष्टीति। जगतो नामरूपव्याकरणमादित्यायत्तमिति तदुपपादयति—आदित्येति। तथाऽपि कथमादित्यस्तुतिरित्याशङ्क्य दृष्टान्तेन दर्शयति—ययेति। किंचोपक्रमोपसंहारैकरूप्येणाऽऽदित्ये ब्रह्मदृष्टिविधिपरमिदं वाक्यं न तस्य कारणासत्त्वे तात्पर्यं कल्पयितुं शक्यमनन्यथासिद्धकल्पकाभावादित्याह—न चेति। तत्परत्वं कथमवगतमित्याशङ्क्योपसंहारस्योपक्रमानुसारित्वादित्याह—उपसंहरिष्यतीति।

तत्सदासीत्तदसच्छब्दवाच्यं प्रागुत्पत्तेः स्तिमितमनिस्पन्दमसदिव सत्कार्याभिमुखमीषदुपजातप्रवृत्ति सदासीच्चतो लब्धपरिस्पन्दं तत्समभवद्दृश्यतरनामरूपव्याकरणेनाङ्कुरीभूतमिव बीजम्। ततोऽपि क्रमेण स्थूलीभवत्त-

---

१ च. ढ. ङ. राजकु°। २ क. च. ब. ट. ड. ढ. °त्वं चेह°। ३ ङ. वेदं ज°। ४ क ख. ङ. ण. °तोऽपि ल°।

दद्भ्य आण्डं समवर्तत संहृत्तम् । आण्डमिति दैर्घ्यं छान्दसम् । तदण्डं संवत्सरस्य कालस्य प्रसिद्धस्य मात्रां परिमाणमभिन्नस्वरूपमेवाशयत स्थितं बभूव । ततः संवत्सरपरिमाणात्कालादूर्ध्वं निरभिद्यत निर्भिन्नं वयसामिवाण्डम् । तस्य निर्भिन्नस्याण्डस्य कपाले द्वे रजतं च सुवर्णं चाभवतां संहृत्ते ॥ १ ॥

कथं तस्यासच्छब्दवाच्यत्वं तदाह—स्तिमितमिति । सत्त्वं तर्हि कथमिति तदाह—कार्येति । बीजस्योच्छूनतावत्कारणस्य सिसृक्षावस्थां दर्शयति—ईषदिति । लब्धपरिस्पन्दं प्राप्तपरिणामं सद्भूतसूक्ष्माकारेणाभवदित्यर्थः । सूक्ष्मभूतोत्पत्त्यनन्तरं स्थूलभूतोत्पत्तिमाह—ततोऽपीति । भूतसूक्ष्माकारप्राप्तेरनन्तरं पञ्चीकरणप्रक्रिययाऽन्योन्यावयवानुप्रवेशेन स्थूलभूतावस्थमासीदित्यर्थः । स्थूलेभ्यश्च भूतेभ्योऽण्डनिर्वृत्तिं प्रतिजानीते—अद्भ्य इति । अप्सहितेभ्यो भूतेभ्य इत्यर्थः ॥ १ ॥

तद्यद्रजतꣳ सेयं पृथिवी यत्सुवर्णꣳ सा द्यौर्यज्जरायु
ते पर्वता यदुल्बꣳ समेघो नीहारो या धमनयस्ता
नद्यो यद्वास्तेयमुदकꣳ स समुद्रः ॥ २ ॥

तयोः कपालयोर्यद्रजतं कपालमासीत्सेयं पृथिवी पृथिव्युपलक्षितमधोऽण्डकपालमित्यर्थः । यत्सुवर्णं कपालं सा द्यौर्द्युलोकोपलक्षितमूर्ध्वं कपालमित्यर्थः । यज्जरायु गर्भपरिवेष्टनं स्थूलमण्डस्य द्विशकलीभावकाल आसीत्ते पर्वता बभूवुः । यदुल्बं गर्भपरिवेष्टनं तत्सह मेघैः समेघो नीहारोऽवश्यायो बभूवेत्यर्थः । या गर्भस्य जातस्य देहे धमनयः शिरास्ता नद्यो बभूवुः । यत्तस्य वस्तौ भवं वास्तेयमुदकं स समुद्रः ॥ २ ॥

अवश्यायशब्देन हिममुच्यते ॥ २ ॥

अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा
उलूलवोऽनूदतिष्ठन्त्सर्वाणि च भूतानि सर्वे च कामा-
स्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽ-
नूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामाः ॥ ३ ॥

१ क. ग. °भवे° । २ क. ग. घ. ङ. ज. झ. ट ठ. °र्वे चैव का° ।

अथ यत्तदजायत गर्भरूपं तस्मिन्नण्डे सोऽसावादित्यस्तमादित्यं जायमानं घोषाः शब्दा उलूलव उरूरवो विस्तीर्णरवा उदतिष्ठन्नुत्थितवन्त ईश्वरस्येवेह प्रथममुत्पन्नानि सर्वाणि च स्थावरजंगमानि भूतानि सर्वे च तेषां भूतानां कामाः काम्यन्त इति विषयाः स्त्रीवस्त्रान्नादयः । यस्मादादित्यजन्मनिमित्ता भूतकामोत्पत्तिस्तस्मादेवंरूपत्वेऽपि तस्याऽऽदित्यस्योदयं प्रति प्रत्यायनं प्रत्यस्तमयनं च प्रत्यथवा पुनः पुनः प्रत्यागमनं प्रत्यायनं तत्प्रति तन्निमित्तीकृत्येत्यर्थः । सर्वाणि च भूतानि सर्वे च कामा घोषा उलूलवश्चानूत्तिष्ठन्ति । प्रसिद्धं चैतदुदयादौ सवितुः ॥ २ ॥

उलूलव इत्युत्सवकालीनाः शब्दविशेषा देशविशेषे प्रसिद्धाः । स्त्रीवस्त्रान्नादय उदतिष्ठन्निति पूर्वेण संबन्धः । किमत्र प्रमाणमित्याशङ्क्याऽऽह——प्रसिद्धं हीति । एतदिति भूताद्युत्थानम् ॥ २ ॥

स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनꣳ साधवो घोषा आ च गच्छेयुरुप च निम्रेडेरन्निम्रेडेरन् ॥ ४ ॥

इति च्छान्दोग्योपनिषदि तृतीयाध्यायस्यैकोनविंशः खण्डः ॥१९॥

इति च्छान्दोग्योपनिषद्ब्राह्मणे तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

स यः कश्चिदेतमेवं यथोक्तमहिमानं विद्वान्सन्नादित्यं ब्रह्मेत्युपास्ते स तन्नाम प्रतिपद्यत इत्यर्थः । किंच दृष्टं फलमभ्यर्थ्याहः क्षिप्रं तद्विदो यदिति क्रियाविशेषणमेनमवंविदं साधवः शोभना घोषाः । साधुत्वं घोषादीनां यदुपभोगे पापानुबन्धाभावः । आ च गच्छेयुरागच्छेयुश्चोप च निम्रेडेरनुपनिम्रेडेरंश्च न केवलमागमनमात्रं घोषाणामुपसुखयेयुश्चोपसुखं च कुर्युरित्यर्थः ।

---

१ घ. च. ठ. °मानमनुधो° । २ ख. ज. °दप्यपि । ३ च. °स्तम° । ४ ठ. ड. ढ. °मं प्र° । ५ घ. क. ड. पुनरागं° । ६ ग. घ. च. ट. °यादौ स° । ७ क. च. °भ्यासो ह° । ८ क. ङ. ञ. ड. ढ. °भ्यासः हि° ।

द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थ आदरार्थश्च ॥ ४ ॥

इति श्रीछान्दोग्योपनिषच्छांकरभाष्ये तृतीयाध्यायस्यैकोनविंशः खण्डः॥ १९॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ छान्दोग्योपनिषद्विवरणे तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

अदृष्टफलमाहत्योक्त्वा दृष्टफलमाचष्टे—किंचेति । तद्विदो दृष्टफलमिति संबन्धः । क्रियाविशेषणमिति । एवंविदं साधवो घोषा आगच्छेयुरिति यत्तत्क्षिप्रमप्रतिबन्धेनेत्यर्थः । आदित्ये ब्रह्मदृष्टिरादरस्य विषयः ॥ ४ ।

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां तृतीयाध्यायस्यैकोनविंशः खण्डः ॥ १९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां छान्दोग्यभाष्यटीकायां तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

(अथ चतुर्थाध्यायस्य प्रथमः खण्डः)।

वायुप्राणयोर्ब्रह्मणः पाददृष्टयध्यासः पुरस्ताद्वर्णितः । अथेदानीं तयोः साक्षाद्ब्रह्मत्वेनोपास्यत्वायोत्तरमारभ्यते । सुखावबोधार्थोऽऽख्यायिकाविद्यादानग्रहणविधिप्रदर्शनार्थो च श्रद्धादानानुद्धतत्वादीनां च विद्याप्राप्तिसाधनत्वं प्रदर्श्यत आख्यायिकया—

ॐ । जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस स ह सर्वत आवस[1] न्मापयांचक्रे सर्वत एव मेऽत्स्यन्तीति ॥ १ ॥

जानश्रुतिर्जनश्रुतस्यापत्यम् । ह ऐतिह्यार्थः । पुत्रस्य पौत्रः पौत्रायणः स एव श्रद्धादेयः श्रद्धापुरःसरमेव ब्राह्मणादिभ्यो देयमस्येति श्रद्धादेयः ।

---

१ क. ख. ग. ट. °साद्यो° । २ ख. घ. ङ. ट. ण. दृष्टं फ° । ३ ख. च. ठ. ङ. ण. °द इत्येति° ।

बहुदायी प्रभूतं दातुं शीलमस्येति बहुदायी । बहुपाक्यो बहु पक्तव्यमहन्यहनि गृहे यस्यासौ बहुपाक्यः । भोजनार्थिभ्यो बह्वन्नस्य गृहेऽन्नं पच्यत इत्यर्थः । एवंगुणसंपन्नोऽसौ जानश्रुतिः पौत्रायणो विशिष्टे देशे काले च कस्मिंश्चिदास बभूव । स ह सर्वतः सर्वासु दिक्षु ग्रामेषु नगरेषु चाऽऽवसथानेत्य वसन्ति येष्वित्थावसथास्तान्मापयांचक्रे कारितवानित्यर्थः । सर्वत एव मे ममान्नं तेष्वावसथेषु वसन्तोऽत्स्यन्ति भोक्ष्यन्त इत्येवमभिप्रायः ॥१॥

आदित्यस्य सूत्रावच्छेदभेदत्वात्तदुपासनानन्तरं सूत्रोपासनमुपन्यस्यते । नन्वध्यात्ममधिदैवतं च वायुप्राणयोः सूत्रात्मभूतयोरुपासनं पूर्वाध्याये ऽपि व्याख्यातं तथा च कोऽत्र विशेषो येन तदुपासनं पुनरारभ्यतेऽत आह—वायुप्राणयोरिति । साक्षात्पादकल्पनं विनेति यावत् । ब्रह्मत्वेन ब्रह्मकार्यरूपेणेत्यर्थः । विद्येति ।

धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा ।
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ॥

इति स्मृतिमनुसंधाय पुष्कलधनमादाय रैक्वो राज्ञे विद्यां प्रादाज्जानश्रुतिश्च शास्त्रार्थं ज्ञात्वा पुष्कलधनं दत्त्वैव श्रद्धादिसंपन्नस्ततो विद्यामाददौ । तथाऽन्योऽपि विद्याया दाता ग्रहीता वा स्यादिति तद्दानग्रहणयोर्विधिप्रदर्शनार्था चाऽऽख्यायिकेत्यर्थः । ननु षट्शतानि गवामित्यादिदर्शनाद्धनदानमेव विद्याग्रहणे साधनमिह प्रतीयते न तु श्रद्धादीत्याशङ्क्याऽऽह—श्रद्धेति । आदिपदेन तात्पर्यप्रणिपातादयो गृह्यन्ते । आख्यायिकया तदु ह पुनरेवेत्यादिलक्षणयेति यावत् । जनश्रुतस्य पुत्रो यस्तस्य पौत्रः पौत्रायणः स च प्रकृतो जानश्रुतिरेवेत्याह—पुत्रस्येति । श्रद्धया देयस्याल्पत्वशङ्कां वारयति—बहुदायीति । बहुपाक्यस्य फलमाह—भोजनेति । उक्तस्य राज्ञो वर्तमानत्वाभावादसत्त्वमाशङ्क्योक्तमेवमिति । स्वसमीपं प्राप्तेभ्य एवार्थिभ्योऽन्नं ददातीत्याशङ्क्याऽऽह—स हेति ॥ १ ॥

अथ ह हंसा निशायामतिपेतुस्तद्धैवꣳ हꣳसो हꣳसमभ्युवाद हो होऽयि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिरातत्तं तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीरिति ॥ २ ॥

तत्रैवं सति राजनि तस्मिन्धर्मकाले हर्म्यतलस्थेऽथ ह हंसा निशायां रात्रावतिपेतुः । ऋषयो देवता वा राज्ञोऽन्नदानगुणैस्तोषिताः सन्तो

---

१ ख. छ. ञ. ण. 'णयोरु' । २ ख. 'ष्कलं व' । ३ ग. ट. 'नमे' । ४ क. ख. ञ. ण. 'त्वमा' । ५ क. 'करा' । ६ ग. ट. 'मीपप्रा' ।

हंसरूपा भूत्वा राज्ञो दर्शनगोचरेऽतिपेतुः पतितवन्तः । तत्तस्मिन्काले तेषां पततां हंसानामेकः पृष्ठतः पतन्नग्रतः पतन्तं हंसमभ्युवादाभ्युक्तवान्हो होऽयीति भो भो इति संबोध्य भल्लाक्ष भल्लाक्षेत्यादरं दर्शयन्यथा पश्य पश्माऽऽश्चर्यमिति तद्वत् । भल्लाक्षेति मन्ददृष्टित्वं सूचयन्नाह । अथवा सम्यग्ब्रह्मदर्शनाभिमानवत्त्वात्तस्यासकृदुपालब्धस्तेन पीड्यमानोऽमर्षितया वत्सूचयति भल्लाक्षेति । जानश्रुतेः पौत्रायणस्य सं तुल्यं दिवा द्युलोकेन ज्योतिः प्रभास्वरमन्नदानादिजनितप्रभावजमाततं व्याप्तं द्युलोकस्पृगित्यर्थः । दिवाऽङ्गा वा सं ज्योतिरित्येतत् । तन्मा प्रसाङ्क्षीः सङ्गनं सक्तिं तेन ज्योविषा संबन्धं मा कार्षीरित्यर्थः । तत्प्रसङ्गनेन तज्ज्योतिस्त्वा त्वां मा प्रधाक्षीर्मा दहत्वित्यर्थः । पुरुषव्यत्ययेन वा प्रधाक्षीदिति ॥ २ ॥

विशिष्टान्नदानफलं दर्शयितुमारभते—तत्रेति । वाक्यार्थं दर्शयति—ऋषभ इति । संबोधनाभ्यासस्य विषयमाह—आदरं दर्शयन्निति । तदेव दृष्टान्तेन स्पष्टयति—यथेति । भल्लाक्षशब्दार्थमाह—भद्रेति । भल्लाक्षशब्दो भद्राक्षविषयः सन्विरुद्धलक्षणया मन्ददृष्टित्वसूचकः । भल्लाक्षशब्दस्य विषयान्तरमाह—अथवेति । तस्य पृष्ठगामिनो हंसस्य महात्मा नातिक्रमणीयो विजानतेति सम्यग्दर्शनाभिमानशालित्वात्तेनाग्रगामी हंसो जानश्रुतिमतिचिक्रमिषुरमर्षितया पीड्यमानः सन्न त्वं धर्मं जानासि ज्ञानाभिमानं तु वहसीत्युपालब्धवन्तत्र भल्लाक्षेत्युपालम्भस्वरूपं सूचयतीत्यर्थः । पृष्ठगामी हंसो निन्दापूर्वकमग्रगामिनं(णं) हंसं संबोध्य किंमूचिवानित्यपेक्षायामाह—जानश्रुतेरिति । मा प्रधाक्षीरिति पाठे कथं मा प्रधक्षीदित्युच्यते तत्राऽऽह—पुरुषव्यत्ययेनेति । मध्यमपुरुषं प्रथमपुरुषं कृत्वा व्याख्यानमित्यर्थः ॥ २ ॥

तमु ह परः प्रत्युवाच कम्बर एनमेतत्तन्तꣳ सयुग्वानमिव रैक्कमात्थेति यो नु कथꣳ सयुग्वा रैक्क इति ॥ ३ ॥

तमेवमुक्तवन्तं पर इतरोऽग्रगामी प्रत्युवाचारे निकृष्टोऽयं राजा वराकस्तं कमु एनं सन्तं केन माहात्म्येन युक्तं सन्तमिति कुत्सयत्येनमेवं सबहुमानमेवद्-

---

१ ख. ग. च ङ. ट. ठ. ण. 'रे निपे' । २ इ. च. ढ. ण. 'मं राज्ञो ज्यो' । ३ क. किमुक्तवा' । ४ ग. ङ. 'रेऽतिनि' ।

चक्रमात्थ रैक्वमिव, सयुग्वानं सह ÷ युग्वना गन्त्र्या वर्तत इति सयुग्वा रैक्वः । अमिवाऽऽत्थैनम् । अननुरूपमस्मिन्नयुक्तमीदृशं वक्तुं रैक्व इवेत्यभिप्रायः । इतरश्चाऽऽह । यो नु कथं त्वयोच्यते सयुग्वा रैक्व इत्युक्तवन्तं भगवान् आह शृणु यथा स रैक्वः ॥ ३ ॥

एतमेवं प्राणिमात्रं राजानमधिकृत्य सबहुमानमेतद्वचनमात्थेति कुत्सयतीति संबन्धः । तत्र वैधर्म्यदृष्टान्तमाह—रैक्वमिवेति । युगं वहन्तीति युग्यो बलीवर्दोऽश्वो वाऽऽख्यायतीति युग्या शकटी तया सह वर्तत इति सयुग्वा रैक्वः । = वकारो मत्वर्थीयः । त्वं रैक्वं ज्ञानमाहात्म्ययुक्तमधिकृत्य यथा प्रशंसावचनं तथा कर्मिणमेवं राजानमधिकृत्य कथमेवमात्थेत्यर्थः । उक्तं वाक्यार्थं संकलयति—अननुरूपमिति । अस्मिन्वराके राजनि धर्ममात्रनिष्ठे नेदमनुरूपं वचनं रैक्वे पुनर्विज्ञानवति यथोक्तं वचो युक्तमेवेति, इतरः पृष्ठगामी हंसः । यः सयुग्वा रैक्वस्त्वयोच्यते स कथं तु स्यादित्यन्वयः ॥ ३ ॥

यथा कृतायविजितायाधरेयाः संयन्त्येवमेनꣳ सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥ ४ ॥

यथा लोके कृतायः कृतो नामायो द्यूतसमये प्रसिद्धश्चतुरङ्कः स यदा जयति द्यूते प्रवृत्तानां तस्मै विजिताय तदर्थमितरे त्रिद्व्येकाङ्का अधरेयास्त्रेताद्वापरकलिनामानः संयन्ति संगच्छन्तेऽन्तर्भवन्ति । चतुरङ्के कृतायेत्रिद्व्येकाङ्कानां विद्यमानत्वात्तदन्तर्भवन्तीत्यर्थः । यथाऽयं दृष्टान्त एवमेनं रैक्वं कृतायस्थानीयं त्रेतोद्वापरस्थानीयं सर्वं तदभिसमैत्यन्तर्भवति रैक्वे । किं तद्यत्किंच लोके सर्वाः प्रजाः साधु शोभनं धर्मजातं कुर्वन्ति तत्सर्वं रैक्वस्य धर्मेऽन्तर्भवति । तस्य च फले सर्वप्राणिधर्मफलमन्तर्भवतीत्यर्थः । तथाऽन्योऽपि कश्चिद्यस्तद्वेद वेद । किं तद्वेद्यं स रैक्वो वेद ।

÷ यद्यपि सर्वपुस्तकेषु युग्ययेति पाठो दृश्यते तथाऽपि वकारो मत्वर्थीय इति टीकानुसारेण सयुग्वानमिति मूलानुसारेण च प्रामादिक एवेति भाति । अत्र वनो र चेति सूत्रेण ङीब्रेफोभावस्तु छान्दसः । अयस्मयादीनि छन्दसीति भसंज्ञायां यस्येति चेत्यलोपे यलोपः । = वकारपदेन वकारघटितो वनिर्लक्ष्यते ।

१ क. ण. °यः । तमित° । २ क. ख. ग. छ. ज. ट. ण. युग्या । अयं पाठः प्रामादिकः । ३ ङ. ण. संकल्पयति । ४ क. ग. घ. झ. ठ. °समेति । ५ क. °तादिस्था° । ख. का. ण. °तादापरादिस्था° । घ. °तायस्था° । ६ क. घ. च. ठ. °समेत्य° ।

तद्वेद्यमन्योऽपि यो वेद तमपि सर्वप्राणिधर्मजातं तत्फलं च रैक्वमिवाभिसमैतीत्यनुवर्तते । स एवंभूतो मया विद्वानेतदुक्त एवमुक्तो रैक्वत्स एव कवायस्थानीयो भवतीत्यभिप्रायः ॥ ४ ॥

स रैक्वो येन प्रकारेण स्यात्तं प्रकारं शृण्विति प्रतिज्ञाय प्रकारमादिदर्शयिषया दृष्टान्तमाह—यथेति । द्यूतस्य समयः संकेतस्तदनुष्ठानकालो येन द्यूतविद्याग्रामेणेति सोऽक्षस्तस्य कश्चिद्भागोऽयशब्दवाच्यस्तत्र यश्चतुरङ्को भागश्चत्वारोऽङ्का अस्मिन्निति व्युत्पत्तेः कृतनामव्यवहृतेन यदा द्यूते प्रवृत्तानां मध्ये स कोऽपि जयति तदा तस्मै कृतनामवते विजितायाधरेयाः संयन्तीति संबन्धः । तदर्थं व्याचष्टे—तदर्थमिति । अधरेयान्व्याकरोति—अधरेया इति । तानेव विशिनष्टि—त्रेतेति । अक्षस्य यस्मिन्भागे त्रयोऽङ्काः स त्रेता नामायो भवति । यत्र तु द्वावङ्कौ स द्वापरनामकः । यत्रैकोऽङ्कः स कलिसंज्ञ इति विभागः । तादर्थ्येनेतरानङ्कान्(णा)-मन्तर्भावमुक्तं व्यक्तीकरोति—चतुरङ्क इति । तदन्तर्भवन्ति तस्मिन्कृते त्रेतादयस्तेऽन्तर्भवन्तीति यावत् । महासंख्यायामवान्तरसंख्यान्तर्भावः प्रसिद्ध एवेत्यर्थः । दृष्टान्तमनूद्य दार्ष्टान्तिकमाह—यथेति । रैक्वमभिव्याप्य सर्वं समैतीत्यस्यार्थं संक्षिपति—अन्तर्भवतीति । रैक्वे सर्वस्यान्तर्भावं प्रश्नपूर्वकं प्रकटयति—किं तदित्यादिना । तद्धर्मस्य महत्त्वादन्येषां च धर्मजातस्याल्पत्वात्तस्येतस्मिन्नन्तर्भावः संभवतीत्यर्थः । किंच सर्वेषां प्राणिनां धर्मफलमल्पीयस्त्वान्महत्तरे रैक्वस्य धर्मफलेऽन्तर्भवतीत्याह—तस्य चेति । न केवलं रैक्वस्यैतन्माहात्म्यं किंत्वन्यस्यापि ज्ञानवतोऽस्तीति जानश्रुतेरनुग्रहार्थमाह—तथेति ॥ ४ ॥

तदु ह जानश्रुतिः पौत्रायण उपशुश्राव स ह संजिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रैक्वमात्थेति यो नु कथꣳ सयुग्वा रैक्व इति ॥ ५ ॥
यथा कृतायविजितायाधरेयाः संयन्त्येवमेनꣳ सर्वं तदभिसमैति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति ॥ ६ ॥

---

१ ख. ङ. ञ. °न्यो यो । २ ण. सर्वं प्रा° । ३ क. ग. घ. च. ठ. °समेती° । ४ क. ग. ठ. °तो रैक्वोऽपि म° । ५ ञ. °स्तस्य ग्रह° । ६ क. °त्पत्तेरतस्मै स कृ° । ख. ङ. ण. °त्पत्तेस्तस्मै कृ° । ञ. °त्पत्तेस्तस्य कृ° । ग. ठ. °त्पत्तेः स कृ° । ७ ञ. यत्रैकाङ्कः । ८ क. ख. ङ. ण. समे. ती° । ९ क. घ. ञ. ठ. °समेति ।

तदु ह तदेतदीदृशं हंसवाक्यमात्मनः कुत्सारूपमन्यस्य विदुषो रैक्वादेः प्रशंसारूपमुपशुश्राव श्रुतवान्हर्म्यतलस्थो राजा जानश्रुतिः पौत्रायणः । तच्च हंसवाक्यं स्मरन्नेव पौनःपुन्येन रात्रिशेषमतिवाहयामास । ततः स बन्दिभी राजा स्तुतियुक्ताभिर्वाग्भिः प्रतिबोध्यमान उवाच क्षत्तारं संजिहान एव शयनं निद्रां वा परित्यजन्नेव हेऽङ्ग वत्सारे ह सयुग्वानमिव रैक्वमात्थ किं मामू । स एव स्तुत्यर्हो नाहमित्यभिप्रायः । अथवा सयुग्वानं रैक्वमात्थ गत्वा मम तद्दिदृक्षा, तदेवशब्दोऽवधारणार्थोऽनर्थको वा वाच्यः । स च क्षत्ता प्रत्युवाच रैक्वानयनकामो राज्ञोऽभिप्रायज्ञो यो नु कथं सयुग्वा रैक्व इति, राज्ञैवं चोक्त आनेतुं तच्चिह्नं ज्ञातुमिच्छन्यो नु कथं सयुग्वा रैक्व इत्यवोचत् । स च भल्लाक्षवचनमेवावोचत् ॥ ५ ॥ ६ ॥

प्रतिपन्नहंसवचनखेदित इतरो राजा रात्रिशेषमतिवाह्य शयनं जहदात्मनः समीपस्थं स्तुतिकर्तारं क्षत्तारमङ्कारे हेत्यादिवाक्यमुक्तवान् । तस्याभिप्रायमाह—स एवेति । कथमिवशब्दो द्वितीये घटते तत्राऽऽह—तदेति । अवधारणस्यापि नोपयोगोऽस्तीति चेत्तत्राऽऽह—अनर्थको वेति । प्रश्नवाक्यं व्याचष्टे—राज्ञेति । यो नु कथमित्यादि पूर्ववद्व्याख्येयम् ॥ ५ ॥ ६ ॥

स ह क्षत्ताऽन्विष्य नाविदामिति प्रत्येयाय तꣳ होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्च्छेति ॥ ७ ॥

तस्य स्मरन्स ह क्षत्ता नगरं ग्रामं वा गत्वाऽन्विष्य रैक्वं नाविदं न ज्ञातवानस्मीति प्रत्येयाय प्रत्यागतवान् । तं होवाच क्षत्तारमरे यत्र ब्राह्मणस्य ब्रह्मविद एकान्तेऽरण्ये नदीपुलिनादौ विविक्ते देशेऽन्वेषणाऽनुमार्गणं भवति तत्तत्रैनं रैक्वमर्च्छ ऋच्छ गच्छ तत्र मार्गणं कुर्वित्यर्थः ॥ ७ ॥

तस्यैति कर्मणि षष्ठी ॥ ७ ॥

सोऽधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश तꣳ हाभ्युवाद त्वं नु भगवः सयुग्वा रैक्व इत्यहꣳ ह्यरा३ इति ह प्रतिजज्ञे स ह क्षत्ताविदमिति प्रत्येयाय ॥ ८ ॥

इति छान्दोग्योपनिषदि चतुर्थाध्यायस्य प्रथमः खण्डः ॥ १ ॥

---

१ ङ. च । २ ख. ञ. °रण्यन° । ३ ख. घ. च. ज. ण. °विक्तदे° । ४ क. ख. च. ञ. °ङ्गं ग° । ५ ख. ञ. कर्षमा° ।

इत्युक्तः क्षत्ताऽन्विष्य तं विजने देशेऽधस्ताच्छकटस्य गन्त्र्याः पापमानं खर्जुं कषमाणं कण्डूयमानं दृष्ट्वाऽयं नूनं सयुग्वा रैक्व इत्युप समीप उपावि-वेश विनयेनोपविष्टवान् । तं च रैक्वं ह्याभ्युवादोक्तवान् । त्वमसि हे भगवो भगवन्सयुग्वा रैक्व इति । एवं पृष्टोऽहमस्मि ह्यरा३ अर इति हानादर एव प्रतिजज्ञेऽभ्युपगतवान् । स त्वं विज्ञायाविदं विज्ञातवानस्मीति प्रत्ययाय प्रत्यागत इत्यर्थः ॥ ८ ॥

इति श्रीच्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य प्रथमः खण्डः ॥ १ ॥

मया हि गार्हस्थ्यं चिकीर्ष्यते तदर्थं च धनमर्थ्यते न चायं तादर्थ्येन किंचिदुप-कर्तुमित्याशयेनानादरं विज्ञातवानस्मि यदुक्तलक्षणं रैक्वं तस्य च गार्हस्थ्याभिप्रायं धनार्थित्वं चेति शेषः ॥ ८ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य प्रथमः खण्डः ॥ १ ॥

(अथ चतुर्थाध्यायस्य द्वितीयः खण्डः) ।

तद्ध ह जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्क-मश्वतरीरथं तदादाय प्रतिचक्रमे तꣳ ह्याभ्युवाद ॥ १ ॥

तत्र ऋषेर्गार्हस्थ्यं प्रत्याभिमुख्यं बुद्ध्वा धनार्थितां चो ह, एव जानश्रु-तिः पौत्रायणः षट् शतानि गवां निष्कं कण्ठहारमश्वतरीरथमश्वतरीभ्यां युक्तं रथं तदादाय धनं गृहीत्वा प्रतिचक्रमे रैक्वं प्रति गतवान् । तं च गत्वाऽभ्युवाद ह्याभ्युक्तवान् ॥ १ ॥

क्षत्तृवचने श्रुत्वे सतीति सप्तम्यर्थः । धनार्थितां च बुध्वेति पूर्वेण संबन्धः । उहश-ब्दस्य पूर्ववदत्राप्येवकारोऽर्थः ॥ १ ॥

रैक्वेमानि षट् शतानि गवामयं निष्कोऽयमश्वतरी-रथो नु म एतां भगवो देवताꣳ शाधि यां देवता-मुपास्स इति ॥ २ ॥

---

१ क. ग. घ. ङ. चा. ट. ठ. ड. ढ. 'नं क' । ञ. 'नं खर्जुं क' । २ क. ख. ण. कर्षमा' । ३ ठ. ड. 'यं स नू' । ४ क. ग. घ. ङ. च. ञ. ठ. ड. ढ. ण. इति समीप उपोपवि' । ५ ख. ग. ङ. च. ट. कण्डयहा' । घ. ड. ढ. कण्डयं हा' । ६ ण. 'न्' । स ते ।

हे रैक्व गवां षट् शतानीमानि तुभ्यं मयाऽऽनीतान्यथं निष्कोऽश्वतरीरथ-श्चायमेतद्धनमादत्स्व भगवोऽनुशाधि च मे मामेतां वां च देवतां त्वमुपास्से तद्देवतोपदेशेन मामनुशाधीत्यर्थः ॥ २ ॥

॥ २ ॥

तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति तदु ह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे ॥ ३ ॥

तमेवमुक्तवन्तं राजानं प्रत्युवाच परो रैक्वः । अहेत्ययं निपातो विनिग्रहार्थीयोऽन्यत्रेह त्वनर्थकः । एवशब्दस्य पृथक्प्रयोगात् । हारेत्वा हारेण युक्तेत्वा गन्त्री सेयं हारेत्वा गोभिः सह तवैवास्तु तवैव तिष्ठतु न ममापर्याप्तेन कर्मार्थमनेन प्रयोजनमित्यभिप्रायो हे शूद्रेति । ननु राजाऽसौ क्षत्तृसंबन्धात्स इक्षत्तारमुवाचेत्युक्तम् । विद्य ग्रहणाय च ब्राह्मणसमीपगमाच्छूद्रस्य चानधिकारात्कथमिदमननुरूपं रैक्वेणोच्यते हे शूद्रेति । तत्राऽऽहुराचार्याः—हंसवचनश्रवणाच्छुगेनमाविवेश । तेनासौ शुचा श्रुत्वा रैक्वस्य महिमानं वा द्रवतीति ऋषिरात्मनः परोक्षज्ञतां दर्शयञ्शूद्रत्याहेति । शूद्रबुद्ध्या धनमेवैनं विद्याग्रहणायोपजगाम नैं च शुश्रूषया । न तु जात्यैव शूद्र इति । अपरे पुनराहुरल्पं धनमाहृतमिति रैक्वेनमुक्त्वाच्छूद्रेति । लिङ्गं च बह्वाहरण उपादानं धनस्येति । तदु हर्षेभंतं ज्ञात्वा पुनरेव जानश्रुतिः पौत्रायणो गवां सहस्रमधिकं जायां चर्षेरभिमतां दुहितरमात्मनस्तदादाय प्रतिचक्रमे क्रान्तवान् ॥ ३ ॥

अत्रापि विनिग्रहार्थत्वसंभवे किमित्यानर्थक्यमित्याशङ्क्य तेवैवेत्येवकारादेव विनिग्रहसिद्धिरित्याह—एवशब्दस्येति । गार्हस्थ्यार्थिनस्तव कर्मानुज्ञानार्थमिदं धनं तिष्ठतादिति चेन्नेत्याह—न ममेति । शूद्रशब्देन जानश्रुतेः सर्वधनमनुचितमिति चोदयति—नन्विति । तस्माच्छूद्रत्वे हेत्वन्तरमाह—विद्याग्रहणायेति । तस्य श्रुतिद्वारा विद्याधिकारो नास्तीत्यपशूद्राधिकरणे निर्धारितमित्याशयेनाऽऽह—शूद्रस्य चेति ।

---

१ ख. ग. च. ट. ठ. ड. ण. °यं च नि° । २ ख. ङ. ण. °वैवाव । ३ ख. ग. घ., ङ. च. ज. ट. ठ. ड. ढ. ण. °वचःश्रव° । ४ ग. घ. ङ. ढ. ठ. ड. ढ. ण. न छु° । ५ ङ. ध्यात्वा । ६ क. ख. छ. ज. ण. °तामिति ।

जानश्रुतेः सति क्षत्रियत्वे शूद्रसंबोधनमयोग्यमित्युपसंहरति—कथमिति । न जाति-शूद्रो जानश्रुतिः किंतु क्षत्रियोऽस्मिन्गौणः शूद्रशब्द इत्येकदेशिमतोपन्यासेन परिहरति—तत्रेति । तेन शुगाविष्टत्वेनासौ जानश्रुतिः शुचा हेतुना रैक्वमाद्रवतीति शूद्रः श्रुत्वा वा हंसवाक्यं रैक्वमाद्रवतीति नैमित्तिकं तत्र शूद्रपदमित्यर्थः । तथापि किमिति शूद्रपदेन राजानमृषिः संबोधयतीत्याशङ्क्याऽऽह—ऋषिरिति । उक्तप्रकारद्वयसमाधावितिशब्दः । प्रकारान्तरेण जानश्रुतेः शूद्रत्वं गौणं व्युत्पादयति—शूद्रवद्दहेति । न च शुश्रूषया तेन शूद्र इति शेषः । मुख्यं शूद्रत्वं क्षत्तृसंबन्धेन व्यावर्तयति—न त्विति । क्षत्रिये जानश्रुतौ शूद्रशब्दप्रवृत्तौ निमित्तान्तरमाह—अपरे पुनरिति । तत्र गमकं दर्शयति—लिङ्गं चेति । यद्वर्मेतमधिकधनार्थित्वमिति यावत् । अधिकं षट्शतेभ्यः सकाशादिति शेषः ॥ २ ॥

तꣳ होच्युवाद रैक्वेदꣳ सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायाऽयं ग्रामो यस्मिन्नास्सेऽन्वेव मा भगवः शाधीति ॥ ४ ॥

तस्याह मुखमुपोद्गृह्णन्वाचाऽऽजहारेमाः शूद्रानेनैव मुखेनाऽऽलापयिष्यथा इति ते हत रैक्वपर्णा नाम महावृषेषु यत्रास्मा उवासं तस्मै होवाच ॥ ५ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य द्वितीयः खण्डः ॥२॥

रैक्वेदं गवां सहस्रमयं निष्कोऽयमश्वतरीरथ इयं जायार्थं मम दुहिताऽऽनीताऽयं च ग्रामो यस्मिन्नास्से तिष्ठसि स च त्वदर्थं मया कल्पितः । तदेतत्सर्वमादायानुशाध्येव मा मां हे भगव इत्युक्तस्तस्या जायार्थमानीताया राज्ञो दुहितुर्हैव मुखं द्वारं विद्याया दाने तीर्थमुपोद्गृह्णज्ञानमित्यर्थः ।

ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियः ।
विद्यया वा विद्यां प्राह तानि तीर्थानि षण्मम ॥

---

१ ङ. न शुं । २ क. ग. ट. क्षत्रसं । ३ क. 'सं स त' । ४ घ. ङ. ठ. ड. ण. मुखमिव मुखं । ५ ख. घ. न. ण. प्राहैता ।

इति विद्यावा वचनं विज्ञायते हि । एवं जानन्नुपोहहस्तुवाच्योक्तवान् । आजहाराऽऽहृतवान्भवान्यादिमा गा यद्यान्यद्धनं तत्साध्विति वाक्यशेषः । शूद्रेति शूद्रोक्तानुकृतिमात्रं न तु कारणान्तरापेक्षया पूर्ववत् । अनेनैव मुखेन त्रियाग्रहणतीर्थेनाऽऽकाशविष्यया आलाग्रयसीति मां भाणयसीत्यर्थः । ते हैते ग्रामा रैकपर्णा नाम त्रिरूपावा महाढ्येषु देशेषु यत्र शेषु ग्रामेषूवासीषितवान्रैकस्तानसौ ग्रामान्मेनेदादस्मै रैकाय राजा । तस्मै राज्ञे धनं दत्त्वते ह किलोवाच विद्यां स रैकः ॥ ४ ॥ ५ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

विद्यादाने तस्या द्वारत्वं तद्दातुश्च ब्रह्मज्ञानदातीर्थतां जानन्नुवाचेति संबन्धः । ब्रह्मज्ञानदातुर्विद्यादानतीर्थत्वे प्रमाणमाह—ब्रह्मचारीति । तस्या द्वारतां विद्यादाने तद्दातुस्तीर्थतां च जानन्नुवाचेत्युक्तमनुवदति—एवं जानन्निति । किमुक्तमित्यपेक्षायामाह—आजहारेति । तत्र वैधर्म्यदृष्टान्तमाह—पूर्ववदिति । अल्पधनहरणनिच्छायां कारणापेक्षायां शूद्रेति संबोधनवदित्यर्थः । रैकेण ग्रामादिकं गृहीत्वा विद्या जानश्रुतये दत्तेत्यस्मान्प्रति श्रुतिर्ज्ञापयति—ते हैत इति । महाढ्येषु महापुण्येष्विति यावत् ॥ ४ ॥ ५ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

(अथ चतुर्थाध्यायस्य तृतीयः खण्डः) ।

६

वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति ॥ १ ॥

वायुर्वा संवर्गो वायुर्वाव्यो वावेत्यवधारणार्थः । संवर्गः संवर्जनात्संग्रहणात्संग्रसनाद्वा संवर्गः । वक्ष्यमाणा अग्न्याद्या देवता आत्मभावमापादयतीत्यतः संवर्गः । संवर्जनाख्यो गुणो ध्येयो वायुवत् । कुतायान्तर्भावदृष्टान्तात् । कथं संवर्गत्वं वायोरित्याह । यदा यस्मिन्काले वा अग्निरुद्वायत्युद्वासनं शाम्यत्युपशाम्यति तदाऽसावग्निर्वायुमेवाप्येति

---

१ क. 'ते । एं' । २ ख. ग. ङ. ण. 'न्नुगवा' । ३ क. आपय' । ४ च. 'मान्ददावस्मै । ५ ख. घ. ञ. ठ. ण. 'नदा' । ६ ग. 'द्वास्य' । ७ क. ङ. घ. च. ठ. ण. 'मुर्वाव्यो । ८ ख. 'द्वासय' ।

वायुस्त्वाभाव्यमधिगच्छति । तथा यदा सूर्योऽस्तमेति वायुमेवाप्येति । यदा चन्द्रोऽस्तमेति वायुमेवाप्येति । ननु कथं सूर्याचन्द्रमसोः स्वरूपावस्थितयोर्वायावपिगमनम् । नैष दोषः । अस्तमनेऽदर्शनप्राप्तेर्वायुनिमित्तत्वात् । वायुना ह्यस्तं नीयते सूर्यः । चलनस्य वायुकार्यत्वात् । अथवा मण्डले सूर्याचन्द्रमसोः स्वरूपभ्रंशे तेजोरूपयोर्वायावेवापिगमनं स्यात् ॥ १ ॥

कथं विद्यामुक्तवानित्याशङ्क्याधिदैवतं तदुक्तिप्रकारं दर्शयति—वायुरित्यादिना। प्राणो वाव संवर्ग इति वक्ष्यमाणेनापुनरुक्तायैवं व्याचष्टे—वायुर्वाव इति । संवर्जनादित्यस्य व्याख्या संग्रहणादिति । संग्रहणपक्षं समर्थयते—वक्ष्यमाणा इति । किमिति संवर्गत्वं वायोरुपदिश्यते तत्र श्रुत्यन्तरं प्रमाणयति—कुतायेति । संग्रसनाद्वेत्युक्तं पक्षमाकाङ्क्षापूर्वकं व्युत्पादयति—कथमित्यादिना । सूर्याचन्द्रमसोर्वायावपिगमनमाक्षिपति—नन्विति । आप्रलयात्तयोरधिकारपदे स्थित्यङ्गीकारात्स्वरूपावस्थितत्वं द्रष्टव्यम् । सूर्यादेः स्वरूपभ्रंशेऽपि वायावप्यतः संभवतीति समाधत्ते—नैष दोष इति । अस्तमने सति सूर्यादेरदर्शनप्राप्तेर्वायुनिमित्तत्वं व्युत्पादयति—वायुना हीति । सूर्यग्रहणं चन्द्रमसोऽप्युपलक्षणम् । गौणस्तर्हि वायावप्ययः सूर्यादेरित्याशङ्क्य पक्षान्तरमाह—अथवेति । संसर्तिसमये हि संहरति वेत्यर्थः ॥ १ ॥

यदाऽऽप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृङ्क्त इत्यधिदैवम् ॥ २ ॥

तथा यदाऽऽप उच्छुष्यन्त्युच्छोषमाप्नुवन्ति तदा वायुमेवापियन्ति । वायुर्हि यस्मादेवैतानप्यात्मभावकान्संवृङ्क्ते । अतो वायुः संवर्गगुण उपास्य इत्यर्थः । इत्यधिदैवं देवतासु संवर्गदर्शनमुक्तम् ॥ २ ॥

॥ २ ॥

अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणꣳ श्रोत्रं प्राणं मनः प्राणो ह्येवैतान्सर्वान्संवृङ्क्त इति ॥ ३ ॥

अथानन्तरमध्यात्मभावानि संवर्गदर्शनमिदमुच्यते । प्राणो मुख्यो

१ ख. ग. ङ. 'पुरुषभावमधिग' । २ ग. घ. च. छ. ट. ण. सूर्यचन्द्रयो' । ङ. ठ. ड. ढ. सूर्यश्च । च' । ३ ख. च. प्रलयकाले । ४ क. ख. ण. 'सूर्याच' । ५ ख. छ. ङ. ञ. वायव्य' । ६ ख. ग. ण. 'नन्यृक्तम्' ।

वाव संवर्गः । स पुरुषो यदा यस्मिन्काले स्वपिति प्राणमेव वागप्येति वायुमिवाग्निः प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः प्राणो हि यस्मादेवैतान्वागादीन्सर्वान्संवृङ्क्त इति ॥ ३ ॥

कथं प्राणस्य संवर्गत्वमित्याशङ्क्याऽऽह—स पुरुष इति । तस्मात्संवर्ग इत्यध्यात्ममिति शेषः ॥ ३ ॥

तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु ॥ ४ ॥

तौ वा एतौ द्वौ संवर्गौ संवर्जनगुणौ वायुरेव देवेषु संवर्गः प्राणः प्राणेषु वागादिषु मुख्यः ॥ ४ ॥

वायुप्राणावधिदैवताध्यात्मभेदेन संवर्गगुणमुक्त्वोपसंहरति—तावितीति ॥ ४ ॥

अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे तस्मा उ ह न ददतुः ॥ ५ ॥

अथैतयोः स्तुत्यर्थमियमाख्यायिकाऽऽरभ्यते । हेत्वैतिह्यार्थः । शौनकं च शुनकस्यापत्यं शौनकं कापेयं कपिगोत्रमभिप्रतारिणं च नामतः काक्षसेनस्यापत्यं काक्षसेनिं भोजनायोपविष्टौ परिविष्यमाणौ सूपकारैर्ब्रह्मचारी ब्रह्मविच्छौण्डो बिभिक्षे भिक्षितवान् । ब्रह्मचारिणो ब्रह्मविन्मानितां बुद्ध्वा तं जिज्ञासमानौ तस्मा उ भिक्षां न ददतुर्न दत्तवन्तौ ह किमयं वक्ष्यतीति ॥ ५ ॥

अथ हेत्यादिवाक्यं व्याचष्टे—अथैतयोरिति । ब्रह्मविच्छौण्डो ब्रह्मविदां मध्ये शूरमात्मानं मन्यमान इति यावत् । बुद्ध्वा लिङ्गविशेषेणेति शेषः । जिज्ञासमानाविति युक्तमेव व्यनक्ति—किमयमिति ॥ ५ ॥

स होवाच महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपास्तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन्बहुधा वसन्तं यस्मै वा एतदन्नं तस्मा एतन्न दत्तमिति ॥ ६ ॥

---

१ ख. घ. च. ञ. ट. ढ. ण. °र्थमा । २ ख. ञ. °नार्थे प° । ३ ङ. ढ. ढ. °ङ्ख्या जि° । ४ क. ग. ट. तं विजि° । ५ क. ख. ग. घ. च ज. ट. ठ. ण. ड ढ भि° । ६ ग. ढ. °षः तं जि° ।

स होवाच ब्रह्मचारी । महात्मनश्चतुर इति द्वितीयाबहुवचनम् । देव एकोऽग्न्यादीन्वायुर्वागादीन्प्राणः । कः स प्रजापतिर्जगार ग्रसितवान् । कः स जगारेति प्रश्नभेके । भुवनस्यं भवन्त्यस्मिन्भूतानीति भुवनं भूरादिः सर्वो लोकस्तस्य गोपा गोपायिता रक्षिता गोप्तेत्यर्थः । तं कं प्रजापतिं हे कापेय नाभिपश्यन्ति न जानन्ति मर्त्या मरणधर्माणोऽविवेकिनो वा हेऽमि-मतारिन्बहुधाऽध्यात्माधिदैवताधिभूतप्रकारैर्वसन्तम् । यस्मै वा एतदहन्य-हन्यन्नमदनायाऽऽहियते संस्क्रियते च तस्मै प्रजापतय एतदन्नं न दत्त-मिति ॥ ६ ॥

चतुर इति द्वितीयाबहुवचनदर्शनान्महात्मन इति तादृगेवेत्याह—द्वितीयेति । यद्वा महात्मन इत्यस्य पञ्चम्यादौ चतुर इत्यस्य च समीचीने प्रयोगदर्शनादिह तथा मा भूदिति मत्वाऽऽह-महात्मन इति । अतो हि जगारेति संबन्धः । कः शब्दः प्रजा-पतिविषयो व्याख्यातः । संप्रति पक्षान्तरमाह—कः स इति । यस्ताञ्जगार स कः स्यादिति प्रश्नभेके वदन्तीत्यर्थः । अत्तारं प्राणमात्मानं चैकत्वेन पश्यन्ब्रह्मचारी मह्यं भिक्षां यन्न ददतुर्भवन्तौ तत्तस्मै देवायैव न ददतुरित्यज्ञत्वमेव तयोर्दर्शयन्नाह— यस्मा इति ॥ ६ ॥

तदु ह शौनकः कापेयः प्रतिमन्वानः प्रत्येया-याऽऽत्मा देवानां जनिता प्रजानाꣳ हिरण्यदꣳष्ट्रो वनसोऽनसूरिर्महान्तमस्य महिमानमाहुरनयमानो यदन्नमत्तीति वै वयं ब्रह्मचारिन्नेदमुपास्महे दत्ता-स्मै भिक्षामिति ॥ ७ ॥

तदु ह ब्रह्मचारिणो वचनं शौनकः कापेयः प्रतिमन्वानो मनसाऽऽलोचय-न्ब्रह्मचारिणं प्रत्येयायाऽऽजगाम । गत्वा चाऽऽह यं त्वमवोचो न पश्यन्ति मर्त्या इति तं वयं पश्यामः । कथम् । आत्मा सर्वस्य स्थावरजंगमस्य । किंच देवानामग्न्यादीनामात्मानि संहृत्य प्रसित्वा पुनर्जनितोत्पादयिता वायु-रूपेणाधिदैवतमग्न्यादीनाम् । अध्यात्मं च प्राणरूपेण वागादीनां प्रजानां च जनिता । अथवाऽऽत्मा देवानामग्निवागादीनां जनिता प्रजानां स्थावर-

---

१ ङ. ण. सर्वली° । २ घ. ङ. ठ. ड. जानते । ३ ङ. ठ. ण. °देवाधि° । ४ क. °त्वाऽऽह । ५ ख. घ. ञ. ठ. ण. °स्मा स स° । ६ ण. °रस्य ज° । ७ ण. °स्य च । किं° । ८ ख. घ. ङ. च ञ. ठ. जनयिता ।

जगमानाम् । हिरण्यदंष्ट्रोऽमृतदंष्ट्रोऽभयदंष्ट्र इति यावत् । बृमसो भक्षण श्लीलः । अनसूरिः सूरिर्मेधावी न सूरिरसूरिस्तत्प्रतिषेधोऽनसूरिः । सूरिरेवेत्यर्थः । महान्तमतिप्रमाणमप्रमेयत्वस्य प्रजापतेर्महिमानं विभूतिमाहुर्ब्रह्मविदः । यस्मात्स्वयमन्यैरप्यप्राप्योऽप्रस्थमाणो यद्वनमग्निरागादिदेवतारूपमत्ति भक्षयतीति । वा इति निरर्थकः । वयं हे ब्रह्मचारिन्, आ, इदमेवं यथोक्तलक्षणं ब्रह्म वयमा उपास्महे । वयमिति व्यवहितेन संबन्धः । अन्ये न वयमिदमुपास्महे किं तर्हि परमेव ब्रह्मोपास्महे इति वर्णयन्ति । दत्तास्मै विद्यामित्यतोऽवरमृत्यान् ॥ ७ ॥

दर्शनमेव प्रश्नद्वारा विशदयति—कथमित्यादिना । अधिदैवतमग्न्यादीनां वायुरूपेण जानीतेति संबन्धः । तस्याः प्रायमिकं कृत्वा दर्शयति—आत्मनीति । अग्न्यादीन्प्रलयकाले देवः स्वात्मनि वायुरूपेण प्रसित्वा पुनरुत्पत्त्यवस्थायामुत्पादयितेति योजना । अध्यात्मं वागादीनपि स्वापावस्थायां स्वात्मनि प्राणरूपे संहृत्य पुनः प्रबोधावस्थायां तेषामुत्पादयिता देवः प्राणरूपेणेत्याह—अध्यात्मं चेति । देवानामग्न्यादीनां प्रजानां वागादीनां च जनितेत्युक्तम् । संप्रति व्यक्त्यान्तरमाह—अथवेति । अभयदंष्ट्रः सर्वसंहर्तुरपि न कापि भयनिमित्तमस्तीत्यर्थः । प्रजापतेर्महिम्नोऽतिप्रमाणत्वं प्रकटयति—यस्मादिति । इतिशब्दात्परस्याध्यच्छब्दस्य संबन्धः । तदर्थश्च यस्मादित्युक्तस्तस्मात्प्रजापतेर्महिमानमतिप्रमाणमाहुरिति पूर्वेण संबन्धः । वै वयमित्यादिभागं पदच्छेदपूर्वकमादाय व्याचष्टे—वयमित्यादिना । क्रियापदेन वयमित्यस्य संबन्धमुक्तमुपपादयति—वयमितीति । ब्रह्मचारिन्निदं वयमा समन्तादुपास्महे ब्रह्मेत्युक्त्वा प्रकारान्तरेण पदच्छेदपूर्वकं व्याख्यानान्तरमाह—अन्ये नेति । शौनकस्याभिप्रतारिणश्च ज्ञानातिशयं दर्शयित्वा यतिश्च ब्रह्मचारी चेत्यादिस्मृतिमनुसृत्याऽऽह—दत्तेति ॥ ७ ॥

तस्मा उ ह ददुस्ते वा एते पञ्चान्ये पञ्चान्ये दश
सन्तस्तत्कृतं तस्मात्सर्वासु दिक्ष्वन्नमेव दश कृतꣳ
सैषा विराडन्नादी तदेदꣳ सर्वं द्रष्टꣳ सर्वस्येदं द्रष्टं
भवत्यन्नादो भवति य एवं वेद य एवं वेद ॥ ८ ॥

इति छान्दोग्योपनिषदि चतुर्थाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

---

१ क. 'वैयेऽन' । २ ख. ग. 'यैकम्' । म' । ३ क. 'ख्यान्त' ।

तस्मा उ ह ददुस्ते हि भिक्षाम् । ते वै ये ग्रस्यन्तेऽग्न्यादयो यश्च तेषां ग्रसिता वायुः पञ्चान्ये वागादिभ्यः, तथाऽन्ये तेभ्यः पञ्चाध्यात्मं वागादयः प्राणश्च, ते सर्वे दश भवन्ति संख्यया, दश सन्तस्तत्कृतं भवति ते, चतुरङ्क ऐकाय एवं चत्वारस्त्र्यङ्काय एवं त्रयोऽपरे द्व्यङ्काय एवं द्वावन्यावेकाङ्काय एवमेकोऽन्य इत्येवं दश सन्तस्तत्कृतं भवति । यत एवं तस्मात्सर्वासु दिक्षु दशस्वप्यग्न्याद्या वागाद्याश्च दशसंख्यासामान्यादन्नमेव दशाक्षरा विराड् विराडन्नमिति हि श्रुतिः । अतोऽन्नमेव दशसंख्यत्वात् । तत एव दश कृतं कृतेऽन्तर्भावाच्चतुरायत्वेनेत्यवोचाम ।

आख्यायिकाद्वारा प्रकृतायां संवर्गविद्यायामात्मा देवानामित्यादि गुणजातमुपदिश्य गुणान्तरमुपदेष्टुमनन्तरवाक्यमवतारयति—ते वा इति । तद्व्याचष्टे—ये ग्रस्यन्त इति । त एते वागादिभ्यः सकाशादन्ये पञ्चेति संबन्धः । अधिदैवतमग्न्यादीन्वायुसहितान्पञ्चोक्त्वा तेनैव प्रकारेणाध्यात्ममपि तेभ्यः सकाशादन्ये प्राणसहिता वागादयः पञ्च सन्तीत्याह—तथेति । अवान्तरसंख्याविनिवेशमुक्त्वा तत्रैव महासंख्यानिवेशं दर्शयति—ते सर्व इति । दशसंख्यासंबन्धात्तेषां संख्येयेति कृतायोपलक्षितं द्यूतं कृतमित्युच्यते । तत्र दशसंख्यावत्त्वस्य वक्तव्यत्वादिति द्रष्टव्यम् । यदुक्तमग्न्यादयो वागादयश्च दश सन्तस्तत्कृतं भवतीति तदुपपादयति—चतुरङ्क इत्यादिना । एकस्तावदयो द्यूते चतुरङ्को दृश्यते तद्वदग्न्यादयो वागादयश्च ग्रस्यमानाश्चत्वारो भवन्ति । यथा च द्यूते त्रेतानामकोऽपरस्त्र्यङ्को गृह्यते तथाऽग्न्यादयो वागादयश्चैकैकन्यूनाख्यः । तथा च तत्र द्वापरनामायो द्व्यङ्को जायते तद्वद्वागादिष्वग्न्यादिषु च द्वौ द्वौ वर्जयित्वा द्वौ द्वौ भवतः । तथा च तत्र कलिसंज्ञायो भवत्येकाङ्को योऽग्न्यादीनां ग्रसिता वायुर्वागादीनां ग्रसिता प्राणश्चैकस्तेभ्यो ग्रस्यमानेभ्योऽन्य इत्येवं ग्रसितृत्वेन ग्रस्यमानत्वेन च दश सन्तरते पूर्वोक्तं कृतं भवतीत्यर्थः । द्यूतस्य सर्वान्नात्तृत्वप्रसिद्ध्या दशसंख्यावतां देवानां कृतत्वसंपादनेनान्नात्तृत्वं संपादितम् । इदानीं दशसंख्यावत्त्वेनैव विराट्त्वसंपादनेन तेषामन्नत्वं संपादयति—यत इति । अग्न्यादिषु वागादिषु च मिलितेषु दशसंख्यावत्त्वेऽपि कथमनेन तद्वत्त्वं तथा च कथं संख्यासामान्यं तेषामन्नसंख्यासामान्यसंपादनमित्याशङ्क्याऽऽह—दशाक्षरेति । विराड् दशसंख्यावती प्रसिद्धा सा चान्नमिति श्रूयते । तथा च यथोक्तेष्वग्न्यादिषु वागादिषु च समुदितेषु संख्यासामान्याद्विराट्त्वं संपाद्यान्नत्वसंपादनं सुशकमित्याह—अत इति । तेषु कृतत्वेनान्न(न्नात्तृ)त्वं संपादि-

---

१ ख. ग. ङ. च. ञ. ठ. ढ. ण. एक आय । २ ख. ञ. °राडिति । विरा° । ३ ङ. °ति श्रु° । ४ क. ञ. ङ. °संख्यात्वात् । ५ घ. ठ. कृतान्त° । ६ क. ग. ट. °च्च चतु° । ७ ख. छ. ण. °वदायौ । ८ ण. °मकाय° । ९ क. च. °संज्ञोऽयो । १० क. छ. ञ. °षु च वा ।

तमुपसंहरति—तत एवेति । द्यूतस्यायचतुष्टयविशिष्टत्वेन कृतोपलक्षितेन तत्र दशसंख्यायाः सत्त्वात्तत एव संख्यासामान्यादन्न्यादयश्च कृतं भवति ततश्च तेषामृत्तृत्वमित्युक्तमित्यर्थः ।

सैषा विराड् दशसंख्या सत्यन्नं चान्नाद्यन्नादिनी च कृतत्वेन । कृते हि दशसंख्याऽन्तर्भूताऽतोऽन्नमन्नादिनी च सा । तथा विद्वान्दशदेवतात्मभूतः सन्विराट्त्वेन दशसंख्ययाऽन्नं कृतसंख्ययाऽन्नादी तयाऽन्नान्नादिन्येदं सर्वं जगद्दशधादिक्संस्थं दृष्टं कृतसंख्याभूतयोपलब्धम् । एवंविदोऽस्य सर्वं कृतसंख्याभूतस्य दशधादिक्संबद्धं दृष्टमुपलब्धं भवति । किंचान्नादश्च भवति य एवं वेदं यथोक्तदर्शी । द्विरभ्यास उपासनसमाप्त्यर्थः ॥ ८ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

संप्रति प्रकृतेष्वन्न्यादिषु विराट्त्वमन्नत्वमत्तृत्वमिति त्रयमुपसंहरति—सैषेति । विराजो विधेयत्वात्तस्याश्च स्त्रीलिङ्गतया सैषेति विधेयलिङ्गभाजनम् । त एते प्रकृता देवा विराडित्यवगन्तव्या । सा च दशदेवतात्मिका दशसंख्यावती भवत्यन्नमिति देवतानामन्नत्वसिद्धिः । अन्नादीत्यस्य विराजा संबन्धादन्नादिनीति व्याख्यानम् । ततश्च देवतात्मिका विराट् कृतत्वेनान्नादिनीति तदात्मकानामन्न्यादीनामप्यत्तृत्वसिद्धिरित्यर्थः । विराट्त्वेनान्नत्वं कृतत्वेनात्तृत्वं चेति संपत्तिद्वयमन्न्यादौ दर्शितमुपसंहरति—कृते हीति । कृतोपलक्षिते द्यूते दशसंख्याऽन्तर्भूता प्रसिद्धा । सा चान्न्यादौ दर्शिता । तथा संख्यासामान्याद्द्यूतगतमत्तृत्वमन्न्यादिषु संपाद्यते । तेनेदं दशकमन्नादीत्युच्यते विराड् वेदे दशसंख्यावतीत्युक्तम् । सा चान्नम् । विराडन्नमित्युक्तत्वात् । ततश्च विराट्संपत्त्या भवति प्रकृतं दशकमन्नमित्यर्थः । सगुणं संवर्दिदर्शयिषुक्त्वा तत्फलं वक्तुं विद्वत्स्वरूपं संगिरते—तथेति । यथाऽन्न्यादीनां विराट्त्वेनान्नत्वं कृतत्वेन चान्नादत्वं तथा वायुमन्न्याद्यात्मकं प्राणं च वागाद्यात्मकमेकीकृत्याऽऽत्मत्वेन विद्वान्दशदेवतास्वरूपभूतः सन्दशसंख्यया विराट्त्वेनान्नं कृतशब्दितयुगं तद्गतदशसंख्यावच्छिन्नतया कृतत्वेनान्नादी भवतीत्यर्थः । फलोक्त्युपयोगित्वेनार्थान्तरमाह—तयेति । कृतोपलक्षितद्यूतस्थसंख्यावच्छिन्नत्वेनावस्थितयाऽन्नत्वेनान्नादित्वेन व्यवस्थितया सर्वमिदं जगद्दशसु

---

१ क. ख. घ. ङ. ञ. ट. ठ. ण. °न्नादि° । २ घ. ङ. ठ. ड. ढ. ण. °ख्या विद्यतेऽन्त° । ३ घ. ङ. ट. ड. °दिक्स्थं द्र° । ४ क. ख. ग. घ. ङ. च. ञ. ट. ड. ढ. °वं य° । ५ क. °ख्यातम् । ६ ग. ङ. ट. °नाऽऽस्थि° ।

दिक्षु संस्थितं दृष्टमुपलब्धं भवति न हि देवतादृशकं हित्वा जगन्नाम किंचिदस्ति । तथा च दृष्टे देवतादृशके दृष्टमेव सर्वं जगद्भवेदित्यर्थः । भूमिकामेवं कृत्वा विद्याफलं दर्शयति—एवंविद इति । वायुं प्राणमत्तारमात्मत्वेन पश्यतः कृतसंख्यावच्छिन्नतया स्थितस्य दशदेवताभूतस्य सर्वं जगद्दृष्टं भवति । दृष्टदेवतातिरिक्तस्य जगतोऽभावादित्यर्थः । यो यथोक्तदर्शी प्राणो भूत्वा सर्वत्रान्नादश्च भवतीति फलान्तरम् ॥ ८ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
चतुर्थाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

—:⊙-⊙-⊙-⊙:—

(अथ चतुर्थाध्यायस्य चतुर्थः खण्डः) ।

सत्यकामो ह जाबालो जबालां मातरमामन्त्रयांचक्रे ब्रह्मचर्यं भवति विवत्स्यामि किंगोत्रो न्वहमस्मीति ॥ १ ॥

सर्वं वागाद्यन्नादि चान्नान्नादत्वसंस्तुतं जगदेकीकृत्य षोडशधा प्रविभज्य तस्मिन्ब्रह्मदृष्टिर्विधातव्येत्यारभ्यते । श्रद्धातपसोर्ब्रह्मोपासनाङ्गत्वमदर्शनाऽऽख्यायिका । सत्यकामो ह नामतो हशब्द ऐतिह्यार्थो जबालाया अपत्यं जाबालो जबालां स्वां मातरमामन्त्रयांचक्र आमन्त्रितवान् । ब्रह्मचर्यं स्वाध्यायग्रहणाय । हे भवति विवत्स्याम्याचार्यकुले, किंगोत्रोऽहं किमस्य मम गोत्रं सोऽहं किंगोत्रो न्वहमस्मीति ॥ १ ॥

पूर्वेण संबन्धं दर्शयितुमुत्तरस्य तात्पर्यमाह—सर्वमिति । एकीकृत्य कारणरूपेणैक्यमादायेत्यर्थः । तर्हि तस्मिन्ब्रह्मदृष्टिरेव विधीयतां किमित्याख्यायिका प्रणीयते तत्राऽऽह—श्रद्धातपसोरिति । ब्रह्मचर्यवासस्योद्देश्यं फलं दर्शयति—स्वाध्यायेति । आचार्यो हि माणवकमुपनयते विज्ञातकुलगोत्रमेवेति मन्वानः पृच्छति—किंगोत्रोऽहमिति ॥ १ ॥

सा हैनमुवाच नाहमेतद्वेद तात यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साऽहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रुवीथा इति ॥ २ ॥

---

१ ख. ग. सर्वमिदं ज° । २ ख. घ. ङ. ञ. ढ. ण. °नार्थमाख्या° । ३ ञ. °देश्यफ°।

एवं पृष्टा जबाला सा हैनं पुत्रमुवाच—नाहमेतत्तव गोत्रं वेद हे तात यद्गोत्रस्त्वमसि । कस्मान्न वेत्सीत्युक्ताऽऽह—बहु भर्तृगृहे परिचर्याजातमतिथ्यभ्यागतादि चरन्त्यहं परिचारिणी परिचरन्तीति परिचरणशीलैर्बहुं परिचरणचित्ततया गोत्रादिस्मरणे मम मनो नाभूत् । यौवने च तत्काले त्वामलभें लब्धवत्यस्मि । तदैव ते पितोपरतः । अतोऽनाथाऽहं साऽहमेतन्न वेद यद्गोत्रस्त्वमसि । जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि । स त्वं सत्यकाम एवाहं जाबालोऽस्मीत्याचार्याय ब्रुवीथाः । यद्याचार्येण पृष्ट इत्यभिप्रायः ॥ २ ॥

अतिथ्यभ्यागताद्यधिकृत्य परिचर्याजातं बहु चरन्ती भर्तृगृहे यतोऽहं स्थिता तेन परिचरन्ती सती परिचरणचित्ततया गोत्रादीन्नापृच्छम् । तथा च तत्स्मरणे मनो मम नाऽऽसीदिति । गोत्रादिप्रश्नाभावे हेत्वन्तरमाह—यौवन इति । यद्यपि तस्यामवस्थायां लज्जया गोत्रादि नाप्राक्षीस्तथाऽपि कालान्तरे किमिति पितरं न पृष्टवतीत्याशङ्क्याऽऽह—तदैवेति । तथाऽपि किमित्यन्यमभिज्ञं नाप्राक्षीरित्याशङ्क्याऽऽह—अत इति । प्रथमं लज्जया पितरं प्रति न प्रश्नः पुनश्च तस्योपरतत्वात्पश्चान्न दुःखबाहुल्यादन्यं प्रति प्रश्न इति स्थिते प्रश्नाभावफलमाह—साऽहमीति । किं तर्हि तव ज्ञानमस्ति तदाह—जबाला त्विति । एवं स्थिते किमाचार्यं प्रति मया वक्तव्यमित्याशङ्क्याऽऽह—स त्वमिति । नापृष्टः कस्यचिद्ब्रूयादिति न्यायं सूचयति—यदीति । ॥ २ ॥

स ह हारिद्रुमतं गातममेत्योवाच ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति ॥ ३ ॥
तꣳ होवाच किंगोत्रो नुꣳ सोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्म्यपृच्छं मातरꣳ सा मामँ प्रत्यब्रवीद्बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साऽहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति सोऽहꣳ सत्यकामो जाबालोऽस्मि भो इति ॥ ४ ॥

---

१ क. °तृंगेहे । २ घ. ठ. °न्ती प° । ङ. ढ. °न्ती परिचरणचि° । ३ ग. ट. °ति परिचरणचि° । ४ ग. च. ठ. °वाहमतस्तच्चित्त° । ५ ख. ग. छ. झ. ट. ण. °तृंगेहे । ६ ख. झ. तु सौम्या° । ७ ज. मां ।

स ह सत्यकामो हारिद्रुमतं हारिद्रुमतोऽपत्यं हारिद्रुमतं गौतमं गोत्रत एत्य गत्वोवाच ब्रह्मचर्यं भगवति पूजावति त्वयि वत्स्याम्यत उपेयामुपगच्छेयं शिष्यतया भगवन्तमित्युक्तवन्तं तं होवाच गौतमः । किंगोत्रो नु सोम्यासीति विज्ञातकुलगोत्रः शिष्य उपनेतव्य इति पृष्टः प्रत्याह सत्यकामः । स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि । किं त्वपृच्छं पृष्टवानस्मि मातरम् । सा मया पृष्टा मां प्रत्यब्रवीन्माता । बह्वहं चरन्तीत्यादि पूर्ववत् । तस्या अहं वचः स्मरामि सोऽहं सत्यकामो जाबालोऽस्मि भो इति ॥ ३ ॥ ४ ॥

मातृवचनश्रवणान्तरं किं कृतवानित्यपेक्षायामाह—स हेति । आचार्यसमीपे ब्रह्मचर्यवासः शिष्यभावादृते न सिध्यतीत्यभिमन्वानायोक्तम्—अत इति । किमनया काकदन्तपरीक्षया भवता त्वमहमुपनेतव्योऽस्मीत्याशङ्क्याऽऽह—विज्ञातेति । मातरं पृष्ट्वा विज्ञायाऽऽगम्यतामित्याशङ्क्याऽऽह—किंत्वित्यादिना ॥ ३ ॥ ४ ॥

तꣳ होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधꣳ सोम्याऽऽहरोप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानामबलानां चतुःशता गा निराकृत्योवाचेमाः सोम्यानुसंव्रजेति ता अभिप्रस्थापयन्नुवाच नासहस्रेणाऽऽवर्तयेति स ह वर्षगणं प्रोवास ता यदा सहस्रꣳ संपेदुः ॥ ५ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य चतुर्थः खण्डः ॥४॥

तं होवाच गौतमो नैतद्वचोऽब्राह्मणो विशेषेण वक्तुमर्हत्यार्जवार्थसंयुक्तम् । ऋजवो हि ब्राह्मणा नेतरे स्वभावतः । यस्मान्न सत्याद्ब्राह्मणजातिधर्मादगा नापेतवानसि । अतो ब्राह्मणं त्वामुपनेष्येऽतः संस्कारार्थं होमाय समिधं सोम्याऽऽहरेत्युक्त्वा तमुपनीय कृशानामबलानां गोयूथान्निराकृत्यापकृष्य चतुःशता चत्वारि शतानि गवामुवाचेमा गाः सोम्यानुसंव्रजानुगच्छ । इत्युक्तस्ता अरण्यं प्रत्यभिप्रस्थापयन्नुवाच—नासहस्रेणापूर्णेन सह-

---

१ ख. ञ नु सोम्या° । २ क. ख. ग. ञ. ट. °गोत्रसि° । घ. °गोत्रो हि सि° । ३ क. ख. ग. ञ. ट. ण. तं हेत्यादिना । ४ ख. ञ. ढ. °धꣳ सौम्या° । ५ ख. ञ. °मां सौम्या° । ६ ख. ञ. °र्धं सौम्या° । ७ ख. ग. ञ. ट. ण. °त्यापकृ° । ८ क. ग. ट. ठ. ढ. °मा गा इमाः सो° ।

स्नेण नाऽऽवर्तेत न प्रत्यागच्छेयम् । स एवमुक्त्वा गा अरण्यं तृणोदकबहुलं द्वंद्वरहितं प्रवेश्य स ह वर्षगणं दीर्घं प्रोवास प्रोषितवान् । ताः सम्यग्गावो रक्षिता यदा यस्मिन्काले सहस्रं संपेदुः संपन्ना बभूवुः ॥ ५ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

ब्राह्मणस्य वाऽनृतं विना कथमार्जवसंयुक्तवचनमित्याशङ्क्याऽऽह—ऋजवो हीति । क्षत्रियादीनामपि केषांचिदार्जवमस्तीत्याङ्क्याऽऽह—नेतर इति । ऋजुवचनत्वेन ब्राह्मणत्वं प्रतिजानीते—यस्मादिति । उपनीयाध्याप्य चेति शेषः । तस्यानुग्रहार्थं शुश्रूषामादिष्टवानित्याह—कृशानामिति । आचार्यनियोगश्च शिष्येण सफलीकर्तव्य इत्याशयेनाऽऽह—इत्युक्त इति । संपन्ना बभूवुस्तदैनमृषभोऽभ्युक्तवानिति संबन्धः ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

(अथ चतुर्थाध्यायस्य पञ्चमः खण्डः)।

अथ हैनमृषभोऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव प्राप्ताः सौम्य सहस्रꣳ स्मः प्रापय न आचार्यकुलम् ॥ १ ॥

तमेतं श्रद्धातपोभ्यां सिद्धं वायुदेवता दिक्संबन्धिनी तुष्टा सत्यृषभमनुप्रविश्यर्षभापन्नाऽनुग्रहायाथ हैनमृषभोऽभ्युवादाभ्युक्तवान्सत्यकाम३ इति संबोध्य, तमसौ सत्यकामो भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ । प्राप्ताः सौम्य सहस्रं स्मः पूर्णा तव प्रतिज्ञाऽतः प्रापय नोऽस्मानाचार्यकुलम् ॥ १ ॥

कथमृषभः सत्यकामं प्रति वक्तुमलं न हि लोके बलीवर्दस्य मनुष्यं प्रति प्रतिवचनं दृष्टमत आह—तमेतमिति । सत्यकामं श्रद्धादिसंपन्नमेनमथ तस्यामवस्थायामृषभोऽनुग्रहायाभ्युवादेति संबन्धः । ऋषभस्य स्वरूपमाह—वायुदेवतेति । अरण्ये तत्र तत्र गाश्चारयतः श्रद्धापूर्वकं तपश्चरतो वायुदेवता कथं तुष्टेत्याशङ्क्याऽऽह—दिक्संबन्धिनीति ॥ १ ॥

---

१ ख. छ. ञ. ण. °चनेन । २ ख. झ. ञ. सौम्य । ३ ख. ङ. ञ ठ. ड. ण. तमेनं । ४ ठ. °वैभमाप° । ५ ण. दत्तवानित्यर्थः । प्रा° । ६ ख. घ. ञ. सौम्य । ७ ण. मेनामि° ।

ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति
तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला
दक्षिणा दिक्कलोदीची दिक्कलैष वै सौम्य चतुष्कलः
पादो ब्रह्मणः प्रकाशवान्नाम ॥ २ ॥

किंचाहं ब्रह्मणः परस्य ते तुभ्यं पादं ब्रवाणि कथयानि । इत्युक्तः प्रत्युवाच—ब्रवीतु कथयतु मे मह्यं भगवान् । इत्युक्त ऋषभस्तस्मै सत्यकामाय होवाच । प्राची दिक्कला ब्रह्मणः पादस्य चतुर्थो भागः । तथा प्रतीची दिक्कलाँ दक्षिणा दिक्कलोदीची दिक्कलैष वै सौम्य ब्रह्मणः पादश्चतुष्कलश्चतस्रः कला अवयवा यस्य सोऽयं चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम प्रकाशवानित्येव नामाभिधानं यस्य । तथोत्तरेऽपि पादास्त्रयश्चतुष्कला ब्रह्मणः ॥ २ ॥

वाक्यान्तरं च मदीयं श्रूयतामित्याह—किंचेति । वायुदेवता दिक्संबन्धिनीत्युक्त्वाद्दिगोचरमेव दर्शनमुवाचेत्याह—प्राचीति । ब्रह्मणः पादस्येति व्यधिकरणे षष्ठ्यौ । एकपाँद एव ब्रह्मेति विभ्रमं व्युदस्यति—तथेति ॥ २ ॥

स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥ ३ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य पञ्चमः खण्डः ॥५॥

स यः कश्चिदेवं यथोक्तमेतं ब्रह्मणश्चतुष्कलं पादं विद्वान्प्रकाशवानित्यनेन गुणेन विशिष्टमुपास्ते तस्येदं फलं प्रकाशवानस्मिँल्लोके भवति प्रख्यातो भवतीत्यर्थः । तथाऽदृष्टं फलं प्रकाशवतो ह लोकान्देवादिसंबन्धिनो मृतः

१ क. ञ. सौम्य । २ घ. ठ. ड. ढ. ण. °यामि । इ° । ३ क. ख. ग. घ. ङ. ञ. ट. ठ. ड. °ला तथा द° । ४ ख. ञ. सौम्य । ५ ख. ञ. ण. °स्य पादस्य सोऽ° । ६ ग. ट. °पादेव । ७ ख. छ. ञ. ण. विश्रम्भं ।

सञ्जयति प्राप्नोति । य एतमेवं विद्वांश्चतुष्फलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य पञ्चमः खण्डः ॥५॥

प्रथमपादोपासकस्य दृष्टमदृष्टं च फलमाह—स य इत्यादिना । कस्येदं फलमित्युक्ते पूर्वोक्तमेवोपासकमनुवदति—य एतमिति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

(अथ चतुर्थाध्यायस्य षष्ठः खण्डः) ।

अग्निष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥

सोऽग्निस्ते पादं वक्तेत्युपररामर्षभः स सत्यकामो ह श्वोभूते परेद्युर्नैत्यकं नित्यं कर्म कृत्वा गा अभिप्रस्थापयांचकाराऽऽचार्यकुलं प्रति । ताः स्वैश्वरन्त्य आचार्यकुलाभिमुख्यः प्रस्थिता यत्र यस्मिन्काले देशेऽभि सायं निशायामभिसंबभूवुरेकत्राभिमुख्यः संभूताः, तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ऋषभवचो ध्यायन् ॥ १ ॥

अवशिष्टं पादत्रयं कथं द्रष्टव्यमिति बुभुत्समानं सत्यकामं प्रत्याह—सोऽग्निरिति । अविदुषो विद्याभिमाननिमित्तकर्मत्यागो न युक्त इति मत्वाऽऽह—सत्यकाम इति । अभि सायं बभूवुः सायंकालं प्राप्ता इति यावत् । तस्य ब्रह्मचर्यमव्यावृत्तमिति सूचयति—तत्रेति । उपोपविवेश तत्रोपशब्दाभ्यां गवामग्नेश्च सामीप्ये निवेशनमस्योच्यते । अर्थिने विद्या वक्तव्येति सूचयति—ऋषभेति ॥ १ ॥

तमग्निरभ्युवाद सत्यकाम इति भगव इति ह प्रतिशुश्राव ॥ २ ॥

---

१ क. ख. ग. घ. ङ. च. ञ. ट. ठ. ड. ढ. °मिष्टे पा° । २ च. °त्युक्त्वोप° । ३ क. ख. ग. ङ. ञ. ट. ठ. ड. ण. °भः सत्य° । ४ ख. घ. ङ च. ञ. ठ. ड. ढ. ण. °कं कृ° । ५ ठ. °स्मिन्देशे । ६ क. °भिब° । ७ च. ठ. प्राङ्मुख उपो° । ८ ण. °श स ऋ° । ९ क. ग. ट. °भीष्यानि° ।

तमग्निरभ्युवाद सत्यकाम३ इति संबोध्य, तमसौ सत्यकाम्मो भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ ॥ २ ॥

॥ २ ॥

ब्रह्मणः सौम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच पृथिवी कलाऽन्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सौम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम ॥ ३ ॥

ब्रह्मणः सौम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच पृथिवी कलाऽन्तरिक्षं कला द्यौः कला समुद्रः कलेत्यात्मगोचरमेव दर्शयन्नग्निरब्रवीत् । एष वै सौम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम ॥ ३ ॥

आत्मगोचरमग्नेश्चास्य विद्यमानामित्यर्थः । यद्वा पृथिव्यादिरूपेणाग्नेरवस्थानादग्निविषयमित्यर्थः । यथोक्तपादे गुणविशेषं निर्दिशति—एष वा इति ॥ ३ ॥

स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्तेऽनन्तवानस्मिँल्लोके भवत्यनन्तवतो ह लोकाञ्जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते ॥ ४ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

स यः कश्चिद्यथोक्तं पादमनन्तत्ववत्त्वेन गुणेनोपास्ते स तथैव तद्गुणो भवत्यस्मिँल्लोके मृतश्चानन्तवतो ह लोकान्स जयति य एतमेवमित्यादि पूर्ववत् ॥४॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

द्वितीयपादोपासकस्य द्विविधं फलं दर्शयति—स य इति । यथोक्तं चतुष्कलमिति यावत् । तथैवोपास्यगुणानुरोधेनेत्यर्थः । तद्गुणस्तेन गुणेन गुणवाननन्तवानविच्छिन्नसंतानो भवतीत्यर्थः । अनन्तवतो लोकानक्षयानित्येतत् ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

---

१ क. ख. सौम्य । २ ख. ञ. सौम्य । ३ ख. ङ. ञ. सौम्य । ४ ख. घ. ञ. सौम्य । ५ क. °धोक्तपा° । ६ क. ग. ङ. च. ढ. ठ. ड. ड. °न्तत्वेन । ७ ङ. °स्ते त° । ८ च. छ. ङ. °काञ्जय° ।

(अथ चतुर्थाध्यायस्य सप्तमः खण्डः)।

—○*○—

हꣳसस्ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राग्नि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥

तꣳ हꣳस उपनिपत्याभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥ २ ॥

सोऽग्निर्हंसस्ते पादं वक्तेत्युक्त्वोपरराम । हंस आदित्यः । शौक्ल्यात्पवनसामान्याच्च । स ह श्वोभूत इत्यादि समानम् ॥ १ ॥ २ ॥

अवशिष्टपादद्वयं कथं ज्ञातव्यमिति जिज्ञासमानं प्रत्याह—सोऽग्निरिति । पक्षिविशेषविषयत्वं हंसशब्दस्य व्यावर्तयति—आदित्य इति । कथं तत्र हंसशब्दस्य प्रवृत्तिरित्याशङ्क्याऽऽह—शौक्ल्यादिति ॥ १ ॥ २ ॥

ब्रह्मणः सौम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाचाग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सौम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम ॥ ३ ॥

स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिँल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥ ४ ॥

इति छान्दोग्योपनिषदि चतुर्थाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

===

अग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सौम्येति ज्योतिर्विषयमेव च दर्शनं प्रोवाचातो हंसस्याऽऽदित्यत्वं प्रतीयते । विद्वत्फलं—

---

१ ख. ञ. सौम्य । २ ख. ञ सौम्य । ३ ख. ञ. सौम्ये°।

ज्योतिष्मान्दीप्तियुक्तोऽस्मिँल्लोके भवति । चन्द्रादित्यादीनां ज्योतिष्मत एवं च मृत्वा लोकं जयति । समानमुत्तरम् ॥ ३ ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

आदित्योऽपि स्वविषयमेव दर्शनमुक्तवानित्याह—अग्निरिति । तृतीये पादेऽपि गुणविशेषमुपदिशति—एष वा इति । यतो हेतोर्ज्योतिर्विषयमेव दर्शनमुक्तवानत एव तस्याऽऽदित्यत्वं प्रतिभातीत्यादित्यत्वे हंसस्य गमकान्तरमाह—ज्योतिर्विषयमेवेति । य एतमेवं विद्वानित्याद्युत्तरम् ॥ ३ ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

(अथ चतुर्थाध्यायस्याष्टमः खण्डः) ।

मद्गुष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राग्नि सायं वावुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश ॥ १ ॥

हंसोऽपि मद्गुष्टे पादं वक्तेत्युपरराम । मद्गुरुदक्करः पक्षी । स चाप्संबन्धात्प्राणः । स ह श्वोभूत इत्यादि पूर्ववत् ॥ १ ॥

अवशिष्टं पादान्तरं तर्हि कथं ज्ञायतामित्याशङ्क्याऽऽह—हंसोऽपीति । मद्गुशब्दस्य वाच्यमर्थमन्वाचष्टे—मद्गुरिति । तस्य कथं सत्यकामं प्रत्युपदेष्टृत्वमत आह—स चेति । १ ॥

तं मद्गुरुपनिपत्याभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव ॥ २ ॥

ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैव वै सौम्य चतुष्कलः पादो ब्रह्मण आयतनवतोऽम ॥ ३ ॥

---

१ क. ग. च. ट. ड. °व मृ° । २ च. ढ. ण. °त्युक्त्वोप° । ३ ख. झ. ञ. सौम्य । ४ ख. ञ. सौम्य ।

स च मद्गुः प्राणः स्वविषयमेवं च दर्शनमुवाच प्राणः कलेत्याद्यायतनवानित्येवं नाम। आयतनं नाम मनः सर्वकरणोपहृतानां भोगानां तद्यस्मिन्पादे विद्यत इत्यायतनवान्नाम पादः ॥ २ ॥ ३ ॥

तं मद्गुरुपनिपत्येत्यत्र मद्गुशब्दार्थं पूर्वोक्तमेव स्मारयति—मद्गुः प्राण इति। प्राणः कलेत्याद्यायतनवानित्येवमिति यथोक्तगुणं समर्थयते—आयतनमित्यादिना। तद्यस्मिन्पादे वर्तते सोऽयमायतनवान्नाम पाद इति द्रष्टव्यमिति योजना ॥ २ ॥ ३ ॥

स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्त आयतनवानस्मिँल्लोके भवत्यायतनवतो ह लोकाञ्जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ॥ ४ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्याष्टमः खण्डः ॥ ८ ॥

तं पादं तथैवोपास्ते यः स आयतनवानाश्रयवानस्मिँल्लोके भवति। तथाऽऽयतनवत एव सावकाशाल्लोकान्मृतो जयति। य एतमेवमित्यादि पूर्ववत् ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्याष्टमः खण्डः ॥ ८ ॥

द्विविधं विद्याफलमभिप्रेते—तं पादमिति। तथैवाऽऽयतनवत्त्वगुणाक्रान्तत्वेनैवेत्यर्थः ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्याष्टमः खण्डः ॥ ८ ॥

(अथ चतुर्थाध्यायस्य नवमः खण्डः)।

प्राप हाऽऽचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम १
इति भगव इति ह प्रतिशुश्राव ॥ १ ॥

स एवं ब्रह्मवित्सन्प्राप ह प्राप्तवानाचार्यकुलम्। तमाचार्योऽभ्युवाद सत्यकाम२ इति। भगव इति ह प्रतिशुश्राव ॥ १ ॥

॥ १ ॥

---

१ ब. च. °व द°। २ ख. छ. ञ. ण. °वान्पाद। ३ ब. °नगु°।

ब्रह्मविदिव वै सौम्य भासि को नु त्वाऽनुशशासे-
त्यन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवाꣳस्त्वेव मे
कामे ब्रूयात् ॥ २ ॥

ब्रह्मविदिव वै सौम्य भासि । प्रसन्नेन्द्रियः प्रहसितवदनश्च निश्चिन्तः कृतार्थो ब्रह्मविद्भवति । अत आचार्यो ब्रह्मविदिव भासीति को न्विति वितर्क-यन्नुवाच—कस्त्वामनुशशासेति । स चाऽऽह सत्यकामोऽन्ये मनुष्येभ्यः । देवता मामनुशिष्टवत्यः । कोऽन्यो भगवच्छिष्यं मां मनुष्यः सन्ननुशासितुमुत्सहेने-त्यभिप्रायः । अतोऽन्ये मनुष्येभ्य इति ह प्रतिजज्ञे प्रतिज्ञातवान् । भगवां-स्त्वेव मे कामे ममेच्छायां ब्रूयात्किमन्यैरुक्तेन नाहं तद्गणयामीत्यभिप्रायः ॥ २ ॥

ब्रह्मविदिव भासीत्युक्ते कीदृशो ब्रह्मविदित्यपेक्षायामाह—प्रसन्नेन्द्रिय इति । सत्यकामस्यापि तल्लक्षणवत्त्वमतःशब्दार्थः । मां त्वदाचार्यमवज्ञाय मच्छिष्यं त्वां कोऽन्यो मनुष्यो मच्छापादभीतः शिष्यत्वेनाऽऽदायानुशासनं कृतवान्यदनुशासनात्ते ब्रह्मविद्या जातेति साक्षेपं पृच्छति—कस्त्वामिति । मनुष्येभ्यः सकाशादन्ये माम-नुशिष्टवन्त इति सामान्यप्रतिज्ञां विभजते—देवता इति । देवतानामेवोपदेष्टृत्वं व्यतिरेकद्वारा विशदयति—कोऽन्य इति । प्रतिज्ञां निगमयति—अत इति । मया तर्हीदानीं न किंचिदस्ति तव कर्तव्यमित्याशङ्कां वारयति—भगवानेति ॥ २ ॥

श्रुतꣳ ह्येव मे भगवद्दृशेभ्य आचार्याद्धैव विद्या
विदिता साधिष्ठं प्रापतीति तस्मै हैतदेवोवाचात्र ह
न किंचन वीयायेति वीयायेति ॥ ३ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य नवमः खण्डः ॥ ९ ॥

किंच श्रुतं हि यस्मान्मम विद्यत एवास्मिन्नर्थे भगवद्दृशेभ्यो भगवत्स-मेभ्य ऋषिभ्यः । आचार्याद्धैव विद्या विदिता साधिष्ठं साधुतमत्वं प्रापतीति प्राप्नोतीत्यतो भगवानेव ब्रूयादित्युक्त आचार्योऽब्रवीत्तस्मै तामेव देवतैरुक्तां विद्याम् । अत्र ह न किंचन षोडशकलविद्यायाः किंचिदेकदेशमात्रमपि न

---

१ ख. ञ. सौम्य । २ ख. ञ. सौम्य । ३ क. ग. घ. ट. ड. भव° । ४ क. ग. ठ. °न्येऽनु° । ५ ख. घ. ज. ञ. ठ. ण. °पदिति । ६ क. ख. ग. ङ. ञ. ड. ढ. ण. °पदिति । ७ घ. ठ. °शायां किं° ।

धीयाय न विगतमित्यर्थः । द्विरभ्यासो विद्यापरिसमाप्त्यर्थः ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य नवमः खण्डः ॥ ९ ॥

इतश्च भगवानेव ब्रवीतु मे विद्यामित्याह—किंचेति । तदेव कारणं दर्शयति—श्रुतमिति । अस्मिन्नर्थ आचार्यादेव विद्या श्रोतव्यैवंलक्षणे । श्रुतमेव विशदयति—आचार्यादिति । विदिता प्राप्तेति यावत् । आचार्याधीना धीरेव फलवतीत्यतःशब्दार्थः । विद्यान्तरमाचार्येणोक्तमिति शङ्कामेवकारेण वारयति—[तामेवेति] । दैवतैराचार्येण च सत्यकामायोक्तां विद्यामस्मान्प्रति श्रुतिर्ज्ञापयति—अत्रेति । न विगतं किंतु पूर्णैव विद्या वाय्वादिभिराचार्येण चोपदिष्टेति शेषः । तत्रापि पादचतुष्टयानुध्यानसमुच्चितमेकमेव विज्ञानं तत्फलं च संहृत्यैकविज्ञानफलत्वेन परिणेयमेकैकपादोपासनस्य कृतार्थत्वाहेतुत्वादित्याचार्योपदेशस्यैव सार्थकत्वमिति द्रष्टव्यम् ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य नवमः खण्डः ॥ ९ ॥

अथ चतुर्थाध्यायस्य दशमः खण्डः) ।

पुनर्ब्रह्मविद्यां प्रकारान्तरेण वक्ष्यामीत्यारभते गतिं च तद्विदोऽग्निविद्यां च । आख्यायिका पूर्ववच्छ्रद्धातपसोर्ब्रह्मविद्यासाधनत्वप्रदर्शनार्था—

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्य ह द्वादश वर्षाण्यग्नीन्परिचचार स ह स्मान्यानन्तेवासिनः समावर्तयꣳस्तꣳ ह स्मैव न समावर्तयति ॥ १ ॥

उपकोसलो ह वै नामतः कमलस्यापत्यं कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्यै ह ऐतिह्यार्थः । तस्याऽऽचार्यस्य द्वादश वर्षाण्यग्नीन्परिचचाराग्नीनां परिचरणं कृतवान् । स ह स्माऽऽचार्योऽन्यान्ब्रह्मचारिणः स्वाध्यायं ग्राहयित्वा समावर्तयंस्तमेवोपकोसलमेकं न समावर्तयति स्म ह ॥ १ ॥

सप्रपञ्चब्रह्मोपासनमुक्त्वा कार्यब्रह्मोपासनसमुच्चितं कारणब्रह्मोपासनं वक्तुं खण्डान्त-

---

१ क. °लती° । २ ङ. °ण प्रव° । ३ ख. °कोशलो । ४ ख. घ. ट. °कोशलो । ५ ङ. ण. °स्य हाऽऽचा° । ६ क. कोशल° ।

रमवतारयति—पुनरिति । न केवलं ब्रह्मविद्याशेषत्वादित्यर्थः । पूर्ववदिति । यथा पूर्वस्मिन्खण्डे श्रद्धातपसोर्ब्रह्मोपासनाङ्गत्वप्रदर्शनायाऽऽख्यायिकेत्युक्तं तद्वदित्यर्थः ॥ १ ॥

तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन्परिचचा-
रीन्मा त्वाऽग्नयः परिप्रवोचन्प्रब्रूह्यस्मा इति तस्मै
हाप्रोच्यैव प्रवासांचक्रे ॥ २ ॥

तमाचार्यं जायोवाच तप्तो ब्रह्मचारी कुशलं सम्यगग्नीन्परिचचारीत्परिचरितवान् । भगवांश्चाग्निषु भक्तं न समावर्तयति । अतोऽस्मद्भक्तं न समावर्तयतीति ज्ञात्वा त्वामग्नयो मा परिप्रवोचन्गर्हां तव मा कुर्युः । अतः प्रब्रूह्यस्मै विद्यामिष्टामुपकोसलायेति । तस्मा एवं जाययोक्तोऽपि हाप्रोच्यैवानुक्त्वैव किंचित्प्रवासांचक्रे प्रवसितवान् ॥ २ ॥

तप्त इति । भवदपेक्षितां शुश्रूषां विदधानो बहुकायक्लेशं कृतवानित्यर्थः । विवक्षितशुश्रूषाकरणमेव विशदयति—कुशलमिति । किमिति भवत्या मां ब्रूहीदमिदानीमुच्यते । न हि मत्तोऽन्यत्र त्वदनुरागो युक्तिमानित्याशङ्क्य भगवति स्नेहादित्याह—भगवानिति । अग्नीन्परिचरमाणब्रह्मचारिणोऽसमावर्तनमतःशब्दार्थः । गर्हापरिहारो द्वितीयेनातःशब्देन परामृश्यते । आचार्यशुश्रूषापरं शिष्यं देवतैवानुगृह्णातीति ज्ञापयितुमारभते—तस्मा इति ॥ २ ॥

स ह व्याधिनाऽनशितुं दध्रे तमाचार्यजायोवाच
ब्रह्मचारिन्नशान किं नु नाश्नासीति स होवाच
बहव-इमेऽस्मिन्पुरुषे कामा नानात्यया व्याधिभिः
प्रतिपूर्णोऽस्मि नाशिष्यामीति ॥ ३ ॥

स होपकोसलो व्याधिना मानसेन दुःखेनानशितुमनशनं कर्तुं दध्रे धृतवान्मनः । तं तूष्णीमग्न्यागारेऽवस्थितमाचार्यजायोवाच—हे ब्रह्मचारिन्नशान भुङ्क्ष्व किं नु कस्मान्नु कारणान्नाश्नासीति । स होवाच बहवोऽनेकेऽस्मिन्पुरुषेऽकृतार्थे प्राकृते कामा इच्छाः कर्तव्यं प्रति नानाऽत्ययोऽतिगमनं येषां व्याधीनां कर्तव्यचिन्तानां ते नानात्यया व्याधयः । कर्तव्यतापाप्तिनिमित्तानि चित्तदुःखानीत्यर्थः । तैः प्रतिपूर्णोऽस्मि । अतो नाशिष्यामीति ॥ ३ ॥

---

१ ख. घ. °कोशला° । २ ख. ञ. जायो° । ३ क. ब्रूहीतीद° । ४ घ. °कोशलो ।

आचार्याभिप्रायमजानतः शिष्यस्य दुःखप्राप्तिं दर्शयति—स होति । अतिगमनं वस्तुस्वरूपमतीत्य विषयेषु प्रवेश इति यावत् । नानात्मया इति कामानां विशेषणम् । कथं तेन व्याधयो विशेष्यन्ते तत्राऽऽह—कर्तव्येति । कामा एव व्याधय इत्यर्थः ॥३॥

अथ हाग्रयः समूदिरे ततो ब्रह्मचारी कुशलं नः पर्यचारीद्धन्तास्मै प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ॥ ४ ॥

उक्त्वा तूष्णींभूते ब्रह्मचारिण्यथ हाग्रयः शुश्रूषया वर्जिताः कारुण्याविष्टाः सन्तस्त्रयोऽपि समूदिरे संभूयोक्तवन्तः । हन्तेदानीमस्मै ब्रह्मचारिणेऽस्मद्भक्ताय दुःखिताय तपस्विने श्रद्दधानाय सर्वेऽनुशास्योऽनुप्रब्रवाम ब्रह्मविद्यामिति। एवं संप्रधार्य तस्मै होचुरुक्तवन्तः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ॥४॥

आचार्यप्रवासात्तज्जायाया ब्रह्मचारिण्यनुग्रहात्तस्य चानशनाध्यवसायादनन्तरमित्यथशब्दार्थः । हन्तेति यद्यर्थोऽस्मद्भक्तं ब्रह्मचारिणमुपेक्ष्य देशान्तरं गतस्तर्हीति यावत् । अथ पुनरेत्याऽऽचार्यो ब्रह्मविद्यामस्मै विवक्षितां च वक्ष्यति किं त्वरयेत्याशङ्क्याऽऽह—दुःखितायेति । ब्रह्मविद्यासाधनसंपत्तिमस्य दर्शयति—तपस्विन इति ॥ ४ ॥

स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणं च हास्मै तदाकाशं चोचुः ॥ ५ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य दशमः खण्डः ॥ १० ॥

===

स होवाच ब्रह्मचारी—विजानाम्यहं यद्भवद्भिरुक्तं प्रसिद्धपदार्थकत्वात्प्राणो ब्रह्मेति । यस्मिन्सति जीवनं यदपगमे च न भवतीति तस्मिन्वायुविशेषे लोके रूढोऽतो युक्तं ब्रह्मत्वं तस्य । तेन प्रसिद्धपदार्थकत्वाद्विजानाम्यहं यत्प्राणो ब्रह्मेति । कं च तु खं च न विजानामीति । ननु कंखंशब्दयोरपि सुखाकाशविषयत्वेन प्रसिद्धपदार्थकत्वमेव, कस्माद्ब्रह्मचारिणोऽज्ञानम् । नूनं

---

१ ठ. °वै प्र° । २ ग. ङ. °तां व° । ३ ठ. °थैत्वा° । ४ क. ग. ङ. च. ट ढ. °ति । स य° । ५ च. ढ. °खं च त° । ६ ठ. °ध्यत्वा° । ७ ख. घ. ञ. ण. °शयोर्विष° ।

सुखस्य कंशब्दवाच्यस्य क्षणध्वंसित्वात्खशब्दवाच्यस्य चाऽऽकाशस्याचेतनस्य कथं ब्रह्मत्वमिति मन्यते । कथं च भवतां वाक्यमप्रमाणं स्यादिति । अतो न विजानामीत्याह ।

प्राणो ब्रह्मेति भवद्भिरुक्तं तदहं विजानामीति संबन्धः । तत्र हेतुमाह—प्रसिद्धेति । प्राणपदस्य प्रसिद्धार्थत्वमेव समर्थयते—यस्मिन्निति । एवंभूतः प्राणशब्द इति शेषः । प्राणशब्दस्य प्रसिद्धार्थत्वेऽपि कुतो ब्रह्मत्वं तस्मिन्प्रसिद्धमित्याशङ्क्याऽऽह—अत इति । कार्यकरणसंघाते नष्टेऽप्रहणादित्यतःशब्दार्थः । स्वकीयज्ञानसमुच्चयार्थश्चकारः । विजानाम्यहमित्युक्तमुपसंहरति—तेनेति । स्वेनाज्ञातं ब्रह्मचारी दर्शयति—कं चेति । तस्याज्ञानमाक्षिपति—नन्विति । प्राणशब्दस्य वायुविशेषविषयत्वेन प्रसिद्ध्यर्थत्ववदित्यपेरर्थः । ब्रह्मचारिणोऽभिप्रायं दर्शयन्नुत्तरमाह—नूनमिति । ननु विरुद्धार्थत्वादग्नीनां वाक्यं भवत्वप्रमाणमित्याशङ्क्याऽऽह—कथं चेति । विरुद्धार्थत्वप्रतीतेरासवाक्यस्य चाप्रामाण्यायोगाद्युक्तं ब्रह्मचारिणोऽज्ञानमिति निगमयति—अत्र इति ।

तमेवमुक्तवन्तं ब्रह्मचारिणं ते ह्याग्नय ऊचुः । यद्वाव यदेव वयं कमवोचाम तदेव खमाकाशमित्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजात्सुखान्निर्वर्तितं स्यान्नीलेनेव विशेष्यमाणमुत्पलं रक्तादिभ्यः । यदेव खमित्याकाशमवोचाम तदेव च कं सुखमिति जानीहि । एवं च सुखेन विशेष्यमाणं खं भौतिकादचेतनात्खान्निर्वर्तितं स्यान्नीलोत्पलवदेव । सुखमाकाशस्थं नेतरल्लौकिकमाकाशं च सुखाश्रयं नेतरद्भौतिकमित्यर्थः । ननु वाकाशं चेत्सुखेन विशेषयितुमिष्टमस्त्वन्यतरदेव विशेषणं यद्वाव कं तदेव खमित्यतिरिक्तमितरत् । यदेव खं तदेव कमिति पूर्वविशेषणं वा । ननु सुखाकाशयोरुभयोरपि लौकिकसुखाकाशाभ्यां व्यावृत्तिरिष्टेत्यवोचाम ।

खस्य विशेषणत्वं कस्य च विशेष्यत्वमित्यङ्गीकारे फलं कथयति—इत्येवमिति । कस्य विशेषणत्वं खस्य विशेष्यत्वमित्येवमपि विशेषणविशेष्यत्वमवगन्तव्यमित्याह—यदेवेति । यथोक्तविशेषणविशेष्यभावे फलमाह—एवं चेति । यद्वावेत्यादिवाक्यार्थमुक्तमेव प्रतिपत्तिसौकर्यार्थं संक्षिपति—सुखमिति । इतरेतरविशेषणविशेष्यत्वमाक्षिपति—नन्विति । अन्यतरदेवेत्यत्र यदेव खमित्येतदुच्यते यद्वाव कं तदेव खमित्यत्र यद्वाव कमितीतरद्विशेषणमतिरिक्तमधिकमकिंचित्करमिति योजना । यदि तु यदेव खं तदेव कमिति खेन कं विशेष्यते, तदा यदेव खमित्येतदेव विशेषणमस्तु ।

---

१ क. ङ. भगव° । २ ख. छ. झ. ण. °पि ब्रह्मत्वं कुतः प्रसि° । ३ क. झ. ट. °र्थकार° । ४ क. ग. घ. ङ. च. ट. खमाका° । ५ ख. छ. झ. ण. °रविशे° । ६ ख. ग. छ झ. ठ. ण. विशिष्यते ।

यद्वाव कमिति पूर्वविशेषणमकिंचित्करमित्याह—यदेवेति । वाशब्दोऽतिरिक्तमित्ये-तदनुकर(र्ष)णार्थः । विशेषणयोरर्थवत्त्वं पूर्वोक्तं सिद्धान्ती स्मारयति—नन्विति । तथा च सुखस्य लौकिकसुखाद्व्यावृत्त्यर्थं यदेव खमिति विशेषणमाकाशस्य च लौकिकाकाशाद्व्यावृत्त्यर्थं यद्वाव कमिति विशेषणमर्थवदिति शेषः ।

सुखेनाऽऽकाशे विशेषिते व्यावृत्तिरुभयोरर्थप्राप्तेवेति चेत्सत्यमेवं किंतु सुखेन विशेषितस्यैवाऽऽकाशस्य ध्येयत्वं विहितं न त्वाकाशगुणस्य विशेषणस्य सुखस्य ध्येयत्वं विहितं स्यात् । विशेषणोपादानस्य विशेषनियन्तृत्वेनेत्युपपन्नम् । अतः खेन सुखमपि विशेष्यते ध्येयत्वाय । कुतश्चैतन्निश्चीयते । कंशब्दस्यापि ब्रह्मशब्दसंबन्धात्कं ब्रह्मेति । यदि हि सुखगुणविशिष्टस्य खस्य ध्येयत्वं विवक्षितं स्यात्कं खं ब्रह्मेति ब्रूयुरृषयः प्रथमम् । न चैवमुक्तवन्तः । किं तर्हि कं ब्रह्म खं ब्रह्मेति । अतो ब्रह्मचारिणो मोहापनयनाय कंखंशब्दयोरितरेतरविशेषणविशेष्यत्वनिर्देशो युक्त एव यद्वाव कमित्यादिः ।

अन्यतरविशेषणवशादपि यथोक्तव्यावृत्तिसिद्धेरकिंचित्करं विशेषणद्वयमिति शङ्कते—सुखेनेति । यदा सुखेनाऽऽकाशं विशेष्यते तदा भूताकाशादाकाशं व्यावर्तितं भवति सुखस्य तद्विशेषणत्वायोगात् । सुखमपि लौकिकसुखाद्व्यवच्छिद्यते । लौकिकसुखस्याऽऽकाशविशेषणत्वानुपपत्तेः । अतः सुखेनाऽऽकाशस्याऽऽकाशेन सुखस्य वा विशेषितत्वसामर्थ्यात्प्राप्तैव सुखाकाशयोर्लौकिकसुखाकाशाभ्यां व्यावृत्तिरित्यन्यतरदेव विशेषणमर्थवदित्यर्थः । किमन्यतरस्यैव विशेषणस्य व्यावर्तकत्वमित्यापाद्यते किंवा तस्यैवार्थवत्त्वमिति तत्राऽऽद्यमङ्गी करोति—सत्यमेवमिति । द्वितीयं दूषयति—न त्वित्यादिना । विशिष्टस्यैव ध्येयत्वे विशेषणस्यापि ध्येयत्वं सिध्यतीति चेन्नैवं दण्डी प्रैषानन्वाहेतिवद्विशेषणस्यान्यथासिद्धत्वादित्याह—विशेषणेति । द्वयोरपि विशेषणयोरर्थवत्त्वं निगमयति—अत्र इति । विधान्तरेण ध्येयत्वासंभवादित्यतःशब्दार्थः । खमिव सुखेनेत्यपेरर्थः । इतश्च सुखाकाशयोरितरेतरविशेषणविशेष्यत्वमेषितव्यमित्याह—कुतश्चेति । कुतःशब्दोपात्तमितःशब्दार्थं स्फुटयति—कंशब्दस्येति । खं ब्रह्मेति खंशब्दस्य ब्रह्मशब्दसंबन्धवदित्यपेरर्थः । गुणगुणिनोरुभयोरपि ध्येयत्वसिद्ध्यर्थमितरेतरविशेषणविशेष्यत्वं कंशब्दस्य खंशब्दस्य च प्रत्येकं ब्रह्मशब्दसंबन्धादपि स्वीकर्तव्यमित्युक्तं व्यतिरेकद्वारा साधयति—यदि हीति । उक्तरीत्या

---

१ क. च. °मेव किं° । २ ग. ङ. च. ञ. ट. ण. °नयाय । ३ ख. छ. ण. °करवि° । ४ ग. °ब्धमिति लौ° । ५ ख. छ. ञ. ण. सत्यमेवेति ।

द्वयोरपि ध्येयत्वमतःशब्दार्थः । ब्रह्मचारिणो मोहो नामान्योन्यविशेषणविशेष्यत्वाग्रहणादाकाशस्यैव गुणिनो ध्येयत्वं न तु सुखस्य गुणस्येति विभ्रमः ।

तदेतदग्निभिरुक्तं वाक्यार्थमस्मद्बोधाय श्रुतिराह—प्राणं च हास्मै ब्रह्मचारिणे । तस्याऽऽकाशस्तदाकाशः । प्राणस्य संबन्ध्याश्रयत्वेन हार्दं आकाश इत्यर्थः । सुखगुणवत्त्वनिर्देशौचित्तं चाऽऽकाशं सुखगुणविशिष्टं ब्रह्म तत्स्थं च प्राणं ब्रह्मसंपर्कादेव ब्रह्मेत्युभयं प्राणं चाऽऽकाशं च समुचित्य ब्रह्मणी ऊचुरग्नय इति ॥ ५ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य दशमः खण्डः ॥ १० ॥

प्राणं चेत्यादि वाक्यं नाग्नीनां न ब्रह्मचारिणः । तथा च कथमुपास्त्याधिकारीदं निर्वहतीत्याशङ्क्याऽऽह—तदेतदिति । आकाशस्य प्राणसंबन्धित्वं कथं विधयेत्यपेक्षायामाह—आश्रयत्वेनेति । कार्यब्रह्मोपासनसमुचितं कारणब्रह्मोपासनमुपसंहर्तुमितिशब्दः ॥ ५ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य दशमः खण्डः ॥ १० ॥

(अथ चतुर्थाध्यायस्यैकादशः खण्डः) ।

अथ हैनं गार्हपत्योऽनुशशास पृथिव्यग्निरन्नमादित्य इति य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ १ ॥

संभूयाग्नयो ब्रह्मचारिणे ब्रह्मोक्तवन्तः । अथानन्तरं प्रत्येकं स्वस्वविषयां विद्यां वक्तुमारेभिरे । तत्राऽऽदावेनं ब्रह्मचारिणं गार्हपत्योऽग्निरनुशशास । पृथिव्यग्निरन्नमादित्य इति ममैताश्चतस्रस्तनवः । तत्र य आदित्य एष पुरुषो दृश्यते सोऽहमस्मि गार्हपत्योऽग्नियश्च गार्हपत्योऽग्निः स एवाहमादित्ये पुरुषोऽस्मीति । पुनः परावृत्त्या स एवाहमस्मीति वचनम् । पृथिव्यन्नयोरिव भोज्यत्वलक्षणयोः संबन्धो न गार्हपत्यादित्ययोः । अतृत्वपक्षतृत्वपक्षाभ्यां धर्मा अविशिष्टा इत्यत एकत्वमेवानयोरत्यन्तम् । पृथिव्यन्नयोस्तु भोज्यत्वेनाऽऽभ्यां संबन्धः ॥ १ ॥

---

१ ख. छ. ण. तु कस्य । २ च. ठ. ड. हार्दाका° । ३ ख. ग. घ. ङ. च. ञ. ट. ड. ढ. ण. °शात्तच्चाऽऽका° । ४ ख. ग. छ. ञ. ठ. ण. °कायामि° । ५ ख. ञ. °शत्वध° । ६ च. ङ. ढ. °शकत्वध° । ६ ङ. ड. ढ. °वाऽऽवयो° । ७ घ. ङ. च. ठ. ड. ढ. ण. °नाऽऽवाभ्यां ।

प्रधानविद्यामुपदिश्याङ्गविद्याविधानायोपक्रमते--संभूयेति । अनन्तरं प्रधानविद्योपदेशादिति शेषः । अग्निविद्यां वक्तुमारब्धानामग्नीनां मध्ये प्रथममिति श्रुतावथशब्दार्थः । पृथिव्यादिचतुष्टयमनूद्याग्न्यादित्ययोरवान्तरभेदं दर्शयति-तत्रेति । एवमग्न्यादित्ययोस्तादात्म्यमितीतिशब्दार्थः । य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मीत्येतावतैव तयोस्तादात्म्यसिद्धेः स एवाहमस्मीति पुनरुक्तिरनर्थकेत्याशङ्क्याऽऽह-पुनरिति । भोज्यत्वं लक्षणं स्वभावो ययोस्तयोर्गार्हपत्येन यथा संबन्धस्तथा गार्हपत्यादित्ययोर्न संबन्धः किंतु तादात्म्यलक्षण एवेत्यत्र हेतुमाह-अत्तृत्वेति । पृथिव्यादावपि तादात्म्यं किं न स्यादित्याशङ्क्याऽऽह-पृथिवीति । आभ्यामग्न्यादित्याभ्यामिति यावत् । स एवाहमस्मीति परावृत्त्या पुनर्वचनं यथोक्तार्थविशेषसिद्ध्यर्थमिति भावः ॥ १ ॥

स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्यैकादशः खण्डः ॥ ११ ॥

स यः कश्चिदेवं यथोक्तं गार्हपत्यमग्निमन्नाद्यादत्वेन चतुर्धा प्रविभक्तमुपास्ते सोऽपहते विनाशयति पापकृत्यां[1] पापं कर्म । लोकी लोकैर्वांश्चास्मदीयेन लोकेनाऽऽग्नेयेन तद्वान्भवति यथा वयमिह च लोके सर्वं वर्षशतमायुरेति प्राप्नोति ज्योगुज्ज्वलं जीवति नाप्रख्यात इत्येतत् । न चास्यावराश्च ते पुरुषाश्चास्य विदुषः संततिजा इत्यर्थः[2] । न क्षीयन्ते संतत्युच्छेदो न भवतीत्यर्थः । किंच तं वयमुपभुञ्जामः पालयामोऽस्मिꣳश्च लोके जीवन्तममुष्मिꣳश्च परलोके[3] । य एतमेवं विद्वानुपास्ते यथोक्तं तस्यैतत्फलमित्यर्थः ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्यैकादशः खण्डः ॥ ११ ॥

उक्तायां विद्यायां गार्हपत्यविषयायां द्विविधं फलं दर्शयति--स यः कश्चिदित्यादिना । कस्यैतत्फलमित्यपेक्षायामुक्तमेव संक्षिपति--य एतमेवमिति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्यैकादशः खण्डः ॥ ११ ॥

---

१ ब. पापक° । २ ख. ल. °कवानस्म° । ३ क. °वांश्च मदी° । ४ ग. ङ. च. ठ. ड. °र्थः क्षी° । ५ ख. ग. °मोऽस्मिँल्लोके । ६ घ. ङ. ठ. परे लो° ।

(अथ चतुर्थाध्यायस्य द्वादशः खण्डः) ।

अथ हैनमन्वाहार्यपचनोऽनुशशासाऽऽपो दिशो नक्षत्राणि चन्द्रमा इति य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ १ ॥
स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

अथ हैनमन्वाहार्यपचनोऽनुशशास दक्षिणाग्निरापो दिशो नक्षत्राणि चन्द्रमा इत्येता मम चतस्रस्तनवश्चतुर्धाऽहमन्वाहार्यपचन आत्मानं प्रविभज्यावस्थितः। तत्र य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मीति पूर्ववत् । अन्नसंबन्धाज्ज्योतिष्ट्वसामान्याच्चान्वाहार्यपचनचन्द्रमसोरेकत्वं[1] दक्षिणा(ण)दिक्संबन्धाच्च। अपां नक्षत्राणां च पूर्ववदन्नत्वेनैव संबन्धः । नक्षत्राणां चन्द्रमसो भोग्यत्वप्रसिद्धेः । अपामन्नोत्पादकत्वादन्नत्वं दक्षिणाग्नेः पृथिवीवद्गार्हपत्यस्य । समानमन्यत् ॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

गार्हपत्योपदेशानन्तर्यमथशब्दार्थः । अन्वादिचतुष्टयमनूद्य दक्षिणाग्नौ चन्द्रे च विशेषं दर्शयति—तत्रेति । अन्वाहार्यपचनचन्द्रमसोस्तादात्म्येनान्नेन नक्षत्राणां च ताभ्यां भोज्यत्वेन संबन्ध इति वक्तुं पुनर्वचनमित्याह—स एवेति । कथं पुनरन्वाहार्यपचनचन्द्रमसोस्तादात्म्यं तत्राऽऽह—अन्नसंबन्धादिति । प्रसिद्धं हि दर्शपूर्णमासयोरन्वाहार्यपचने हविःश्रपणम् । ते चन्द्रं प्राप्यान्नं भवतीत्यादौ चन्द्रमसि प्रसिद्धोऽन्नसंबन्धः । तस्मात्तयोस्तादात्म्यमित्यर्थः । तयोरेकत्वे हेत्वन्तरमाह—ज्योतिष्ट्वेति । तत्रैव हेत्वन्तरमाह—दक्षिणेति । अन्वाहार्यपचनो हि दक्षिणाग्निरुच्यते । चन्द्रमाश्च दक्षिणेन पथा प्राप्यमाणो दक्षिणस्यां दिशि भवतीति गम्यते। उत्तरादिगधिष्ठातुरपि तस्य तत्संबन्धानिवारणात्तद्युक्तं तयोरैक्यमित्यर्थः । अपां नक्ष-

१ क. ग. ट. °त्वं च द° । २ घ. च. °ग्यत्वेन प्र° ।

त्राणां च चन्द्रवदन्वाहार्यपचनेन तादात्म्यमाशङ्क्याऽऽह—अपामिति । पूर्ववत्पृथिव्यग्नेर्योस्तयोर्गार्हपत्यादित्याभ्यामन्नत्वेन संबन्धवदिति यावत् । संबन्धोऽन्वाहार्यपचनचन्द्रमसोरित्यामिति शेषः । कथं नक्षत्राणामन्नत्वं तत्राऽऽह—नक्षत्राणामिति । कथं पुनरपामन्नत्वं तदाह—अपामिति । दक्षिणाग्नेर्दक्षिणाग्निं प्रतीति यावत् । पृथिव्या गार्हपत्याग्निं प्रत्यन्नत्ववदित्युदाहरणार्थः । स य एतमेवं विद्वानित्याद्यन्यदित्युक्तम् ॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

(अथ चतुर्थाध्यायस्य त्रयोदशः खण्डः) ।

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ॥ १ ॥

स य एतमेवं विद्वानुपास्तेऽपहते पाप्मकृत्यां लोकी भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मꣳश्च लोकेऽमुष्मꣳश्च य एतमेवं विद्वानुपास्ते ॥ २ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति ममाप्येतावतस्तनवः । य एष विद्युति पुरुषो दृश्यते सोऽहमस्मीत्यादि पूर्ववत्सामान्यात् । दिवा(द्यु)काशयोस्त्वाश्रयत्वाद्विद्युदाहवनीययोर्भोग्यत्वेनैव संबन्धः । समानमन्यत् ॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

गार्हपत्यस्य दक्षिणाग्नेश्चोपासनानन्तर्यमथशब्दार्थः । तत्रावान्तरभेदं दर्शयति—य एष इति । सोऽहमस्मीत्याद्यन्यत्समानमिति संबन्धः । यथा पूर्वं ज्योतिष्ट्वाविशेषाद्गार्हपत्यादित्ययोरन्वाहार्यपचनचन्द्रमसोश्च साम्यमुक्तं तथा ज्योतिष्ट्वसामान्याद्विद्युदा-

---

१ ख. ग. °योर्गो° । २ क. °साम्याद्वि° ।

हवनीययोस्तादात्म्यमेष्टव्यमित्याह — पूर्ववदिति । कथं तर्हि ताभ्यां दिवा(द्यवा)काशयोः संबन्धस्तत्राऽऽह — दिवा(द्यवा)काशयोरस्त्विति । आहवनीयस्य फलत्वाद्दिवो विषयत्वं तत्र होमादिद्वारा निष्पन्नापूर्वस्य द्युलोकफलत्वाभ्युपगमाद्द्युतस्वाकाशाश्रयत्वं प्रसिद्धमतो विद्युदाहवनीययोर्भोग्यत्वेनैव दिवा(द्यवा)काशयोः संबन्ध इत्यर्थः । स य एतमेवमित्याद्यन्यदित्युक्तम् ॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

(अथ चतुर्थाध्यायस्य चतुर्दशः खण्डः) ।

ते होचुरुपकोसलैषा सौम्य तेऽस्मद्विद्याऽऽत्मविद्या चाऽऽचार्यस्तु ते गतिं वक्तेत्याजगाम हास्याऽऽचार्यस्तमाचार्योऽभ्युवादोपकोसल३ इति ॥ १ ॥

ते पुनः संभूयोचुर्हेपकौसलैषा सौम्य ते तवास्मद्विद्याऽग्निविद्येत्यर्थः । आत्मविद्या पूर्वोक्ता प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति च । आचार्यस्तु ते गतिं वक्ता विद्याफलप्राप्तय इत्युक्त्वोपरेमुरग्नयः । आजगाम हास्याऽऽचार्यः कालेन । तं च शिष्यमाचार्योऽभ्युवादोपकौसल३ इति ॥ १ ॥

अग्नीनां मिथो विसंवादं व्यावर्तयति — ते पुनरिति । तथाऽप्यात्मविद्या श्रोतव्येत्याशङ्क्याऽऽह — आत्मविद्येति । कथमाचार्योपदेशमन्तरेण भगवदुपदेशवशादेव मे विद्या फलवत्याचार्याद्धैव विद्या विदिता साधिष्ठमित्यादि हि प्रागुक्तमत आह — आचार्यस्त्विति ॥ १ ॥

भगव इति ह प्रतिशुश्राव ब्रह्मविद इव सौम्य ते मुखं भाति को नु त्वाऽनुशशासेति को नु माऽनुशिष्याद्धो इतीहापेव निह्नुत इमे नूनमीदृशा अन्यादृशा इतीहाग्नीनभ्यूदे किं नु सौम्य किल तेऽवोचन्निति ॥ २ ॥

---

१ ख. ग. छ. ट. ण. °कपाल° । ञ. °कपाकत्वा° । २ ख. °कौशलै° । ३ ख. ङ. सौम्य ४ ख. घ. °कोशल । ५ ण. °कोशलै° । ६ ख. घ. ञ. सौम्य । ७ ण. °कोशल । ८ क. ग. ट. °यादेव । ९ ख. ञ. सौम्य । १० ख. ञ. सौम्य ।

इदमिति ह प्रतिजज्ञे लोकान्वाव किल मैसाय तेऽ-
वोचन्नहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो
न श्लिष्यन्त एवंमवावादि पापं कर्म न श्लिष्यत
इति ब्रवीतु मे भगवानिति तस्मै होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य चतुर्दशः खण्डः ॥१४॥

===

भगव इति ह प्रतिशुश्राव । ब्रह्मविद इव सौम्य ते मुखं प्रसन्नं भाति को नु त्वाऽनुशशासेत्युक्तः प्रत्याह । को नु माऽनुशिष्यादनुशासनं कुर्याद्भो भगवंस्त्वयि प्रोषित इतीहापेव निह्नुतेऽपनिह्नुत इवेति व्यवहितेन संबन्धो न चापनिह्नुते न च यथावदग्निभिरुक्तं ब्रवीतीत्यभिप्रायः । कथमिमेऽग्नयो मया परिचरिता उक्तवन्तो नूनं यतस्त्वां दृष्ट्वा वेपमाना इवेदृशा दृश्यन्ते पूर्वमन्यादृशाः सन्त इतीहाग्नीनभ्यूदेऽभ्युक्तवान्काकाऽग्नीन्दर्शयन् । किं नु सौम्य किल ते तुभ्यमवोचन्नग्नय इति पृष्ट इत्येवमिदमुक्तवन्त इत्येवं ह प्रतिजज्ञे प्रतिज्ञातवान्प्रतीकमात्रं किंचिन्न सर्वं यथोक्तमग्निभिरुक्तमवोचत् । यत आहाऽऽचार्यो लोकान्वाव पृथिव्यादीन्हे सौम्य किल तेऽवोचन्न ब्रह्म साकल्येन । अहं तु ते तुभ्यं तद्ब्रह्म यदिच्छसि त्वं श्रोतुं वक्ष्यामि, शृणु तस्य मयोच्यमानस्य ब्रह्मणो ज्ञानमाहात्म्यं यथा पुष्करपलाशे पद्मपत्र आपो न श्लिष्यन्त एवं यथा वक्ष्यामि ब्रह्मैवंविदि पापं कर्म न श्लिष्यते न संबध्यत इत्येवमुक्तवत्याचार्ये आहोपकौसलो ब्रवीतु मे भगवानिति तस्मै होवाचाऽऽचार्यः ॥ २ ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य चतुर्दशः खण्डः ॥१४॥

अपनिह्नुत इवेत्यत्रेवशब्दतात्पर्यं दर्शयति—न चेति । उक्तमभिप्रायमाकाङ्क्षापूर्वकं विवृणोति—कथमित्यादिना । काका स्वरभङ्गेन(ण) भीतः सन्नुक्तवानस्फुटमिति यावत् । भीतिं शिष्यस्यापनयन्नाचार्यो ब्रूते—किं नु सौम्येति । आचार्यवाक्यस्थमितिशब्दमनूद्य व्याचष्टे—इत्येवमिति । पृष्टः सन्निति पूर्वेण संबन्धः । यस्मादग्निभिरुक्तमाचार्याय प्रतीकद्वारा शिष्यो निवेदितवांस्तस्मादाचार्यः प्राप्तः साव-

---

१ ख. ञ. सौम्य । २ ख. ञ सौम्य । ३ ख. ञ. सौम्य । ४ ख. ञ. ड. सौम्य । ५ ख. ञ. ड. यदीच्छ° । ६ घ. ण. °कोशलो । ७ ञ. सौम्येति । ८ क. °वाक्स्थमि° ।

काशमित्याह—यत इति । कं [ब्रह्म] खं ब्रह्मेत्यादिना ब्रह्मापि तैरुक्तमित्याशङ्क्याऽऽह —न ब्रह्मेति । कथं तर्हि साकल्येन ब्रह्म ज्ञातव्यमित्यत आह— अहं त्विति । ब्रह्मज्ञाने किं स्यादित्याशङ्क्याऽऽह—शृण्विति ॥ २ ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

(अथ चतुर्थाध्यायस्य पञ्चदशः खण्डः) ।

य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तस्यैष्यन्नस्मिन्सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति ॥ १ ॥

य एषोऽक्षिणि पुरुषो दृश्यते निवृत्तचक्षुर्भिर्ब्रह्मचर्यादिसाधनसंपन्नैः शान्तैर्विवेकिभिर्दृष्टेर्द्रष्टा । " चक्षुषश्चक्षुः " इत्यादिश्रुत्यन्तरात् । नन्वग्निभिरुक्तं वितथं यत आचार्यस्तु ते गतिं वक्तेति गतिमात्रस्य वक्तेत्यवोचन्भविष्यद्विषयापरिज्ञानं चाग्नीनाम् । नैष दोषः । सुखाकाशस्यैवाक्षिणि दृश्यत इति द्रष्टुरनुवादात् । एष आत्मा प्राणिनामिति होवाचैवमुक्त्वानेतद्यदेवाऽऽत्मतत्त्वमवोचाम । एतदमृतममरणधर्म्यविनाश्यत एवाभयं यस्य हि विनाशाशङ्का तस्य भयोपपत्तिस्तदभावादभयमत एवैतद्ब्रह्म बृहदनन्तमिति । किंचास्य ब्रह्मणोऽक्षिपुरुषस्य माहात्म्यं तत्तत्र पुरुषस्य स्थानेऽक्षिणि यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति पक्ष्मावेव गच्छति न चक्षुषा संबध्यते पद्मपत्रेणेवोदकम् । स्थानस्यापीत्थंमाहात्म्यं किं पुनः स्थानिनोऽक्षिपुरुषस्य निरञ्जनत्वं वक्तव्यमित्यभिप्रायः ॥ १ ॥

कथमुपसन्नायाऽऽचार्यो ब्रह्मचारिणे ब्रह्मविद्यामुक्तवानित्यत आह—य एष इति । अक्षिस्थाने तदुपलक्षितो द्रष्टा य एष पुरुषो दृश्यत इति संबन्धः । नासौ सर्वेषां छायात्मातिरिक्तो दृष्टिगोचरतामापद्यतीत्याशङ्क्य विकारिणो विशिनष्टि—निवृत्तेति । निवृत्तानि विषयेभ्यो विमुखानि चक्षूंषि[3] बाह्यानि करणानि येषां तैरिति यावत् । बाह्यकरणानां स्ववशत्वार्थिनं विशेषणान्तरमाह[4]—ब्रह्मचर्यादीति । मनसो विषयपारवश्यराहित्ये विशेषणान्तरमाह—शान्तैरिति । तेषां निवृत्तचक्षुष्ट्वे हेतुमाह—

---

१ क. °मित्याह । ग. ट. °मित्याशङ्क्याऽऽह । २ ख. ञ. °नाशशं° । ३ ख. छ. ञ. ण. बाह्यक° । ४ ख. ञ. ण. °मादत्ते । ब्र°. छ. मादत्ते ।

विवेकिभिरिति । पुरुषोऽक्षिणि द्रष्टेत्यत्र बृहदारण्यकश्रुतिं प्रमाणयति—चक्षुष इति । आचार्येणापूर्वविद्योपदेशाद्मीनामुक्तिर्मिथ्या प्राप्तेति शङ्कते—नन्विति । अग्निवचनस्य गत्यन्तरमाह—भविष्यदिति । नाग्नीनामुक्तिर्मृषा नापि तेषां भावेष्यद्विषयाज्ञानमिति दूषयति—नैष दोष इति । यत्सुखगुणैकमाकाशमुपास्यमग्निभिरुपदिष्टं तस्यैव कारणब्रह्मणो द्रष्टृरूपस्याक्षिणि दृश्यत इत्यनुवादो गतिव्याख्यानायाऽऽचार्येण क्रियते तन्नास्ति दोषद्वयमित्यर्थः । अक्षिणि दृश्यत इति प्रयोगादाचार्येण च्छायात्मा विवक्षित इत्याशङ्क्याऽऽह—एष इति । इतश्च नायं पुरुषच्छायात्मेत्यनन्तरवाक्यमवतार्य व्याकरोति—एतदित्यादिना । इतिशब्दो यथोक्तगुणैरुपास्यः पुरुषो न च्छायात्मा भवितुमर्हतीत्यर्थः । असङ्गत्वाच्च नायं छायात्मेत्याह—किंचेति । माहात्म्यं स्थानद्वारेणोच्यत इति शेषः । किमेतावता पुरुषस्याऽऽयातमित्याशङ्क्याऽऽह—स्थानस्यापीति ॥ १ ॥

एतꣳ संयद्वाम इत्याचक्षत एतꣳ हि सर्वाणि वामान्यभिसंयन्ति सर्वाण्येनं वामान्यभिसंयन्ति य एवं वेद ॥ २ ॥

एतं यथोक्तं पुरुषं संयद्वाम इत्याचक्षते । कस्मात् । यस्मादेतं सर्वाणि वामानि वननीयानि संभजनीयानि शोभनान्यभिसंयन्त्यभिसंगच्छन्तीत्यतः संयद्वामः । तथैवंविदमेनं सर्वाणि वामान्यभिसंयन्ति य एवं वेद ॥ २ ॥

तस्यैवोपास्यत्वार्थं गुणान्तरं दर्शयति—एतमिति । पुरुषस्य संयद्वामत्वं ब्रह्मविदुक्त्या सिद्धमपि नाम्नैवमन्तरेण व्यक्तं भवतीति शङ्कते—कस्मादिति । अवयवार्थोपन्यासेन परिहरति—यस्मादिति । गुणोपास्तिफलमाह—तथेति । उपास्यगुणानुसारेणेत्यर्थः । एवंविदं संयद्वामगुणविशिष्टपुरुषोऽस्मीति वेदितारमित्येतत् ॥ २ ॥

एष उ एव वामनीरेष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेद ॥ ३ ॥

एष उ एव वामनीर्यस्मादेव हि सर्वाणि वामानि पुण्यकर्मफलानि पुण्यानुरूपं प्राणिभ्यो नयति प्रापयति वहति चाऽऽत्मधर्मत्वेन । विदुषः फलं—सर्वाणि वामानि नयति य एवं वेद ॥ ३ ॥

---

१ ग. ट. °णमा° । २ क. ग. ट. °त्याह । ३ घ. ठ. °भिग° । ४ ख. ञ. नाभ्वयार्थ° । म. नावयवार्थ° । ५ ख. छ. ञ. ण. °शिष्टः पु° ।

गुणान्तरमुपास्यत्वाय दर्शयति—एष इति । तद्द्युत्पादयति—एष इति ॥ ३ ॥

एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति
सर्वेषु लोकेषु भाति य एवं वेद ॥ ४ ॥

एष उ एव भामनीरेष हि यस्मात्सर्वेषु लोकेष्वादित्यचन्द्राग्न्यादिरूपेभाति दीप्यते । " तस्य भासा सर्वमिदं विभाति " इति श्रुतेरतो भामानि नयतीति भामनीः । य एवं वेदासावपि सर्वेषु लोकेषु भाति ॥ ४ ॥

गुणान्तरं ध्यानायोक्त्वा द्युत्पादयति—एष इत्यादिना । आदित्यादिरूपेणास्यैव दीप्यमानत्वे श्रुत्यन्तरमनुकूलयति—तस्येति । गुणोपास्तिफलमाह—य एवमिति ॥ ४ ॥

अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदि च नार्चि-
षमेवाभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापू-
र्यमाणपक्षाद्यान्षड्दङ्ङेति मासाꣳस्तान्मासेभ्यः सं-
वत्सरꣳ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो
विद्युतं तत्पुरुषोऽमानवः स [1]एनान्ब्रह्म गमयत्येष
देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमा-
वर्तं नाऽऽवर्तन्ते नाऽऽवर्तन्ते ॥ ५ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

अथेदानीं यथोक्तब्रह्मविदो गतिरुच्यते । यद्यद्यु चैवास्मिन्नेवंविदि शव्यं शवकर्म मृते कुर्वन्ति यदि च न कुर्वन्ति ऋत्विजः सर्वथाऽप्येवंवित्तेन शवकर्मणाऽकृतेनापि प्रतिबद्धो न ब्रह्म प्राप्नोति न च कृतेन शवकर्मणाऽस्य कश्चनाभ्यधिको लोकः । " न कर्मणा वर्धते नो कनीयान् " इति श्रुत्यन्तरात् । शवकर्मण्यनादरं दर्शयन्विद्यां स्तौति न पुनः शवकर्मैवंविदो न कर्तव्यमिति । अक्रियमाणे हि शवकर्मणि कर्मणां फलारम्भे प्रतिबन्धः कश्चिदनुमीयतेऽन्यत्र । यत इह विद्याफलारम्भकाले शवकर्म स्याद्वा न वेति विद्यावतोऽप्रतिबन्धेन फलारम्भं दर्शयति । ये सुखाकाशमक्षिस्थं संयद्वामो-

१ ट. ठ. एतान्ब्र° ।

वामनीर्भामनीरित्येवंगुणमुपासते प्राणसहितामग्निविद्यां च तेषामन्यत्कर्म भवतु मा वा भूत्सर्वथाऽपि तेऽर्चिषमेवाभिसंभवन्त्यर्चिरभिमानिनीं देवतामभिसंभवन्ति प्रतिपद्यन्त इत्यर्थः।

गतिं वक्तुं पूर्वोक्तब्रह्मविद्यायामधिकगुणानेवाऽऽचार्योऽन्ववादीदिदानीं तामेव गतिमवतारयति–अथेति। तां वक्तुं पातनिकां करोति–यद्यदीति। करणाकरणाभ्यां विदुषो न वृद्धिर्नापि हानिरित्यत्र श्रुत्यन्तरं प्रमाणयति–न कर्मणेति। अथ यदु चैवेत्यादिवाक्यस्य तात्पर्यं दर्शयति–शवकर्मणीति। तात्पर्यान्तरं दर्शयति–न पुनरिति। यदि विदुषोऽपि शवकर्म कर्तव्यं कस्तर्हि तस्य विशेषस्तत्राऽऽह– अक्रियमाणे ह्रीति। अन्यत्रेत्यविद्यावानुच्यते। इहेति। प्रस्तुतवाक्यस्य विद्यावतो वोक्तिरिति शवकर्मण्यनादरपूर्वकमिति शेषः। विद्यावतः शवकर्मभावाभावयोरप्रतिबन्धः फलं सिध्यति। अविद्यावतस्तु शवकर्माकरणे कर्माणि न फलदानीति विद्यास्तुतिरिहामिप्रेतेति भावः। तेऽर्चिषमेवेत्यत्र तच्छब्दार्थं व्याचष्टे—ये सुखाकाशमिति।

अर्चिषोऽर्चिर्देवताया अहरहरभिमानिनीं देवतामह्न आपूर्यमाणपक्षं शुक्लपक्षदेवतामापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङुत्तरां दिशमेति सविता तान्मासानुत्तरायणदेवतां तेभ्यो मासेभ्यः संवत्सरं संवत्सरदेवतां ततः संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्रस्थांस्तान्पुरुषः कश्चिद्ब्रह्मलोकादेत्यामानवो मानव्यां सृष्टौ भवो मानवो न मानवोऽमानवः स पुरुष एनान्ब्रह्म सत्यलोकस्थं गमयति गन्तृगन्तव्यगमयितृत्वव्यपदेशेभ्यः। सन्मात्रब्रह्मप्राप्तौ तदनुपपत्तेः। ब्रह्मैव सन्ब्रह्माप्येतीति हि तत्र वक्तुं न्याय्यम्। सर्वभेदनिरासेन सन्मात्रप्रतिपत्तिं वक्ष्यति। न चादृष्टो मार्गोऽगमनायोपतिष्ठते। "स एनमविदितो न भुनक्ति" इति श्रुत्यन्तरात्। एष देवपथो देवैरर्चिरादिभिर्गमयितृत्वेनाधिकृतैरुपलक्षितः पन्था देवपथ उच्यते। ब्रह्म गन्तव्यं तेन चोपलक्षित इति ब्रह्मपथः। एतेन प्रतिपद्यमाना गच्छन्तो ब्रह्मेमं मानवं मनुसंबन्धिनं मनोः सृष्टिलक्षणमावर्तं नाऽऽवर्तन्त आवर्तन्तेऽस्मिञ्जननमरणप्रबन्धचक्रारूढा घटीयन्त्रवत्पुनः पुनरित्यावर्ततस्तं न प्रतिपद्यन्ते। नाऽऽवर्तन्त इति द्विरुक्तिः सफलाया विद्यायाः परिसमाप्तिप्रदर्शनार्था ॥ ५ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

---

१ घ. ठ. ढ. ण. °तु वा मा भू° । २ अ. °क्वि° । ३ ख. ग. ट. °र्माणि च फ° । ४ क. ख. ग. ङ. च. ञ. ट. ठ. ड. ण. एतान्त्र° । ५ घ. ङ. ठ. ढ. ण. °र्तस्तमावर्तं न ।

सत्यलोकस्थमिति देशव्यवच्छेदेन किमिति व्याख्यायते मुख्यमेव ब्रह्म ब्रह्मशब्दालम्बनं किं नोच्यते तत्राऽऽह-गतिगन्तव्येति । एतेभ्यो हेतुभ्यः सत्यलोकस्थं ब्रह्म न मुख्यमिति संबन्धः । मुख्यब्रह्मप्राप्तावपि यथोक्तव्यपदेशा भविष्यन्तीत्याशङ्क्याऽऽह—सन्मात्रेति । तदनुपपत्तेर्न तादृग्ब्रह्म ब्रह्मशब्दामिति शेषः । अनुपपत्तिमेव स्फोरयति—ब्रह्मैवेति । तत्रेति मुख्यप्राप्तिरुच्यते । कस्यचिदपि सन्मात्रब्रह्मप्राप्तिरत्र नास्तीत्याशङ्क्याऽऽह-सर्वभेदेति । वक्ष्यति षष्ठेऽध्याये श्रुतिरिति शेषः । जीवस्य सन्मात्रं ब्रह्म पारमार्थिकं रूपं चेदुपासकस्यापि न गतिरुचिता तस्यापि ब्रह्मातिरिक्तस्वरूपाभावादित्याशङ्क्याऽऽह—न चेति । एकत्वलक्षणो मार्गो न दृष्टश्चेद्गमनाय नोपतिष्ठते । न हि ध्याननिष्ठस्यादृष्टमेकत्वं गमनं वारयितुं पारयत्यज्ञानप्रतिबन्धात् । तस्य गमनभ्रान्तिसंभवादित्यर्थः । यद्वैकत्वलक्षणो मार्गो नावगतो न गमनाय मोक्षायोपस्थितो भवतीत्यर्थः । तत्र प्रमाणमाह—स एनमिति । स परमात्मा प्रत्यक्त्वेनाज्ञातः सन्नेनमधिकारिणं मुक्तिप्रदानेन न पालयतीत्यर्थः । प्रकृतां गतिमुपसंहरति—एष इति । गतिफलं निगमयति—एतेनेति । इममिति विशेषणादनावृत्तिरस्मिन्कल्पे कल्पान्तरे त्वावृत्तिरिति सूच्यते । आवर्तशब्दं व्याकरोति—आवर्तन्त इति । सफलाया यथोक्तेन गतिपूर्वकेण फलेन सहिताया इति यावत् । कार्यब्रह्मोपासनसमुच्चिता कारणब्रह्मोपासना यथोक्ता न विद्यासहिताऽविद्याऽत्र विवक्षिता तस्या इत्यर्थः ॥ ९ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
चतुर्थाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

—:⊙-⊙-⊙-⊙:—

(अथ चतुर्थाध्यायस्य षोडशः खण्डः) ।

रहस्यप्रकरणे प्रसङ्गादारण्यकत्वसामान्याच्च यज्ञे क्षत उत्पन्ने व्याहृतयः प्रायश्चित्तार्था विधातव्यास्तदभिज्ञस्य चर्त्विजो ब्रह्मणो मौनमित्यत्र इदमारभ्यते—

एष ह वै यज्ञो योऽयं पवत एष ह यन्निदꣳ सर्वं
पुनाति यदेष यन्निदꣳ सर्वं पुनाति तस्मादेष एव
यज्ञस्तस्य मनश्च वाक्च वर्तनी ॥ १ ॥

एष ह वा एष वायुर्योऽयं पवतेऽयं यज्ञः । ह वा इति प्रसिद्धार्थाद्योतकौ

१ ख. छ. ञ. ण. देशाव° । २ क. ग. ट. °ह्मश° । ३ क. °न्मात्रब्र° । ४ घ. ङ. ढ. ण. °द्धार्थ द्यो° ।

निपातौ । वायुप्रतिष्ठो हि यज्ञः प्रसिद्धः श्रुतिषु । " स्वाहा वातेधाः " " अयं वै यज्ञो योऽयं पवते " इत्यादिश्रुतिभ्यः । वात एव हि चलनात्मकत्वात्क्रियासमवायी । " वात एव यज्ञस्याऽऽरम्भको वातः प्रतिष्ठा " इति च श्रवणात् । एष ह यन्नच्छंश्चलन्निदं सर्वं जगत्पुनाति पावयति शोधयति । न ह्यचलतः शुद्धिरस्ति । दोषनिरसनं चलतो हि दृष्टं न स्थिरस्य । यद्यस्माच्च यन्नेष इदं सर्वं पुनाति तस्मादेष एव यज्ञो यत्पुनाति । तस्यास्यैवं विशिष्टस्य यज्ञस्य वाक्च मन्त्रोच्चारणे व्यापृता । मनश्च यथाभूतार्थज्ञाने व्यापृतम् । ते एते वाङ्मनसे वर्तनी मार्गौ याभ्यां यज्ञस्तायमानः प्रवर्तते ते वर्तनी । " प्राणापानपरिचलनवत्या हि वाचश्चित्तस्य चोत्तरोत्तरक्रमो यज्ञः " इति हि श्रुत्यन्तरम् । अतो वाङ्मनसाभ्यां यज्ञो वर्तत इति वाङ्मनसे वर्तनी उच्येते यज्ञस्य ॥ १ ॥

पूर्वोत्तरग्रन्थयोरसंगतिमाशङ्क्य प्रासङ्गिकीं संगतिमाह—रहस्यप्रकरण इति । रहस्यमुपासनं तत्प्रकरणे विदुषां फलप्राप्तये मार्गोपदेशप्रसङ्गेन यज्ञस्य समाप्तिगमनायानन्तरग्रन्थेन मार्गोपदेशादस्ति संगतिरित्यर्थः । किंच पूर्वोत्तरग्रन्थयोरारण्यकत्वेन समानत्वादपि संगतिरस्तीत्याह—आरण्यकत्वेति । किंचाग्निविषया विद्या प्रकृता यज्ञे चैं सिद्धेऽग्निसंबन्धे यदि किमपि क्षतमुत्पद्यते तदा प्रायश्चित्तार्था व्याहृतयो विधातव्या इत्यनन्तरग्रन्थप्रवृत्तिरिति संगत्यन्तरमाह—यज्ञ इति । प्रकृतायामुपासनायां मौनमङ्गी क्रियते वाग्व्यापारे विक्षिप्तचित्ततया ध्यानानुष्ठानासिद्धेः । ऋत्विग्विशेषस्य च प्रायश्चित्ताभिज्ञस्य मौनमत्र विधीयते तेनास्ति मिथः संगतिरित्याह—तदाभिज्ञस्येति । यज्ञस्य देवतोद्देशेन द्रव्यत्यागात्मकत्वात्क्रियायाश्च क्षणभङ्गिन्या गतिमत्त्वायोगान्मार्गोपदेशासंभवात्कथमाद्या संगतिरित्याशङ्क्य गतिमत्त्वं संपादयितुं यज्ञस्य वायुरूपत्वमाह—एष इत्यादिना । यज्ञो वाग्व्याश्रयो वाग्व्यात्मक इति श्रौती प्रसिद्धिस्तामेव प्रकटयति-वायुप्रतिष्ठ इति । श्रुतीरुदाहरति—स्वाहेति । स्वाहाकारमुच्चार्य वाते वायौ धीयते क्षिप्यत इति वातेधा यज्ञः । श्रुत्यन्तरमाह—अयमिति । आदिशब्देन वाताद्यज्ञः प्रयुज्यतामिति श्रुतिर्गृह्यते । आदर्शितश्रुतीनामर्थं संगृह्णाति—वात इति । यो यज्ञः क्रियासमवायी तत्समुदायात्मकः स वायुरेव । द्वयोश्चलनात्म-

---

१ घ. ङ. ढ. ण. इत्येवमादि° । २ ख. ङ. च. ञ. ड. ण. °नं च च° । ३ ख. ञ. °र्वं जगत्पुना° । ४ घ. ङ. च. ठ. °ज्ञो यः पुना° । ५ ख. घ. ङ. ञ. ट. ड. ढ. ण. °भ्यां वर्तनीभ्यां य° । ६ ख. ञ. ठ. ण. °त्तरं क° । घ. ङ. च. ढ. °त्तरिक° । ७ ङ. ढ. यज्ञः । ८ ठ. ण. °भ्यां वर्तनीभ्यां य° । ९ क. ख. ग. च. ञ. ट. °ज्ञो वर्तनीभ्यां व° । १० क. ग. ट. वा ।

कत्वाविशेषात् । तस्माद्वायुप्रतिष्ठस्तदात्मको यज्ञ इत्यर्थः । वायुप्रतिष्ठो यज्ञ इत्यत्र श्रुत्यन्तरमाह—वात एवेति । पवनत्वश्रुत्याऽपि वायुयज्ञयोरेकत्वमाह—एष ह यान्निति । विनाऽपि वायुं शुद्धिः सिध्यतीत्याशङ्क्याऽऽह-न हीति । अचलतो विहितक्रियामननुतिष्ठत इति यावत् । शुद्धिर्नाम दोषनिरासः । स च निषिद्धं प्रत्यक्षं यतमानस्य सिध्यति । न तु निषिद्धक्रियात्यागोदासीनस्य दोषनिरासात्मिका शुद्धिः संभवति । चलनं च वायुः । तस्माद्वायुरेव चलनद्वारा सर्वं जगत्पुनातीत्याह—दोषेति । वायोरस्तु पावनत्वं प्रकृते किमायातमित्याशङ्क्याऽऽह—यद्यस्मादिति । वाय्वात्मना गतिविशिष्टस्य यज्ञस्य मार्गद्वयमुपदिशति—तस्येति । एवं विशिष्टस्य पावनस्य वायुरूपस्येति यावत् । यज्ञस्योक्तमार्गद्वयवैशिष्ट्ये सोपस्कारमैतरेयवाक्यमुदाहरति—प्राणेति । प्राणापानाभ्यामुच्छ्वासनिःश्वासाभ्यां परिचलनं विद्यते यस्यास्तस्या वाचश्चित्तस्य च पूर्वापरभावक्रमेण यज्ञः संपाद्यते । मनसा हि ध्यायन्वाचमभिव्याहरन्पूर्वापरीभावेन यज्ञं संपादयतीत्यर्थः । यज्ञस्य मार्गद्वयविशिष्टत्वमुपसंहरति—अत इति ॥ १ ॥

तयोरन्यतरां मनसा सꣳस्करोति ब्रह्मा वाचा होताऽध्वर्युरुद्गाताऽन्यतराꣳ स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यववदति ॥ २ ॥

अन्यतरामेव वर्तनीꣳसꣳस्करोति हीयतेऽन्यतरा स यथैकपाद्व्रजनूरथो वैकेन चक्रेण वर्तमानो रिष्यत्येवमस्य यज्ञो रिष्यति यज्ञꣳ रिष्यन्तं यजमानोऽनुरिष्यति स इष्ट्वा पापीयान्भवति ॥ ३ ॥

तयोर्वर्तन्योरन्यतरां वर्तनीं मनसा विवेकज्ञानवता संस्करोति ब्रह्मर्त्विग्वाचा वर्तन्या होताऽध्वर्युरुद्गातेत्येते त्रयोऽप्यृत्विजोऽन्यतरां वाग्लक्षणां वर्तनीं वाचैव संस्कुर्वन्ति । तत्रैवं सति वाङ्मनसे वर्तनी संस्कार्ये यज्ञे । अथ स ब्रह्मा यत्र यस्मिन्काल उपाकृते प्रारब्धे प्रातरनुवाके शस्त्रे पुरा पूर्वं परिधानीयाया ऋचो ब्रह्मैतस्मिन्नन्तरे काले व्यवदति मौनं परित्यजति

---

१ क. ङ. ज. ट. थ. °तेनिꣳसं° । २ च. ण. °कविज्ञा° ।

यदि तदाऽन्यतरामेव वाग्वर्तनीं संस्करोति । ब्रह्मणाऽसंस्क्रियमाणा मनोवर्तनी हीयते विनश्यति छिद्री भवत्यन्यतरा । स यज्ञो वाग्वर्तन्यैवान्यतरया वर्तितुमशक्नुवन्निरिष्यति । कथमिवेत्याह । स यथैकपात्पुरुषो व्रजन्गच्छन्नध्वानं रिष्यति, रथो वैकेन चक्रेण वर्तमानो गच्छन्रिष्यत्येवमस्य यजमानस्य कुब्रह्मणा यज्ञो रिष्यति विनश्यति । यज्ञं रिष्यन्तं यजमानोऽनुरिष्यति । यज्ञपाणो हि यजमानः । अतो युक्तो यज्ञरेषे रेषस्तस्य । स तं यज्ञमिष्ट्वा तादृशं पापीयान्पापतरो भवति ॥ २ ॥ ३ ॥

तयोरन्योन्यमुपकार्योपकारकभावं दर्शयति–तयोरिति । वाचा सम्यक्प्रयुक्तयेति शेषः । संस्कृतायां च वाग्वर्तन्यां तयैव यज्ञो निष्पन्नो भवतीत्याह–वाचैवेति । किं तर्हि मनोवर्तन्या संस्क्रियत इत्याशङ्क्याऽऽह–तत्रेति । यज्ञस्य द्वाभ्यां मार्गाभ्यां नीयमानत्वे पूर्वोक्तरीत्या स्थिते सतीति यावत् । मनोवर्तन्याः संस्काराभावे प्रत्यवायं दर्शयति–अथेत्यादिना । मनोवर्तनी ब्रह्मणा वाग्वर्तनी च होतृप्रभृतिभिः संस्कार्येति व्यवस्थान्तरमित्यर्थः । स ब्रह्मेत्यन्वयं सूचयति–ब्रह्मेति । पुनरुक्तिस्तस्य क्रियापदेन संबन्धद्योतनार्था । एतस्मिन्नन्तरे काले प्रातरनुवाकशस्त्रमारभ्य;तत्परिसमाप्तेरन्तराल-स्थायामित्यर्थः । वाचो होत्रादिभिः संस्कार्यत्वमस्तु, मनसश्च ब्रह्मसंस्कार्यत्वं मा भूदेतावता यज्ञस्य किमायातमित्याशङ्क्याऽऽह–स यज्ञ इति । यज्ञभ्रंशमेवाऽऽकाङ्क्षाद्वारा व्युत्पादयति—कथमित्यादिना । नाशेऽपि यज्ञस्य यजमानस्य किमायातमित्याशङ्क्याऽऽह–यज्ञपाणो हीति । वाग्वर्तनीसंस्काराभावेऽपि तुल्यो दोषः ॥२॥३॥

अथ यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा व्यवदत्युभे एव वर्तनी सꣳस्कुर्वन्ति न हीयतेऽन्यतरा ॥ ४ ॥

स यथोभयपाद्व्रजन्रथो वोभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठत्येवमस्य यज्ञः प्रतितिष्ठति यज्ञं प्रतितिष्ठन्तं यजमानोऽनुप्रतितिष्ठति स इष्ट्वा श्रेयान्भवति ॥ ५ ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य षोडशः खण्डः ॥१६॥

---

१ ख. °ह्मणो य° । घ. ङ. च. ढ. °ह्मणर्त्विग्वतो य° । ठ. °ह्मणर्त्विजा य° । २ ग. ढ. °तमत आह ।

अथ पुनर्यत्र ब्रह्मा विद्वान्मौनं परिगृह्य वाग्विसर्गमकुर्वन्वर्तते यावत्परिधानीयाया न व्यवदति तथैव सर्वर्त्विजं उभे एव वर्तनी संस्कुर्वन्ति न हीयतेऽन्यतराऽपि । किमिवेत्याह । पूर्वोक्तविपरीतौ दृष्टान्तौ । एवमस्य यजमानस्य यज्ञः स्ववर्तनीभ्यां वर्तमानः प्रतितिष्ठति स्वेनाऽऽत्मनाऽविनश्यन्वर्तत इत्यर्थः । यज्ञं प्रतितिष्ठन्तं यजमानोऽनुप्रतितिष्ठति स यजमान एवं मौनविज्ञानवद्ब्रह्मोपेतं यज्ञमिष्ट्वा श्रेयान्भवति श्रेष्ठो भवतीत्यर्थः ॥ ४ ॥५॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य षोडशः खण्डः ॥१६॥

मौनगुणं दर्शयति—अथ पुनरिति । तथैव सम्यगनुष्ठातार इति यावत् । तथा सति ब्रह्मा चान्ये चर्त्विजो द्वे वर्तन्यौ संस्कुर्वन्त्येवेत्याह—नेति । वर्तनीद्वयसंस्कारे किं स्यादित्यपेक्षायामाह—एवमिति ॥ ४ ॥ ५ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य षोडशः खण्डः ॥ १६ ॥

(अथ चतुर्थाध्यायस्य सप्तदशः खण्डः) ।

अत्र ब्रह्मणो मौनं विहितं तद्वेषे ब्रह्मत्वकर्मणि चान्यस्मिंश्च होत्रादिकर्मवैषे व्याहृतिहोमः प्रायश्चित्तमिति तदर्थं व्याहृतयो विधातव्या इत्याह—

प्रजापतिर्लोकानभ्यतपत्तेषां तप्यमानानाꣳरसान्प्रावृहदग्निं पृथिव्या वायुमन्तरिक्षादादित्यं दिवः ॥१॥

प्रजापतिर्लोकानभ्यतपल्लोकानुद्दिश्य तत्र साराजिघृक्षया ध्यानलक्षणं तपश्चचार । तेषां तप्यमानानां लोकानां रसान्साररूपान्प्रावृहदुद्धृतवाञ्ग्राहेत्यर्थः । कान् । अग्निं रसं पृथिव्याः । वायुमन्तरिक्षात् । आदित्यं दिवः॥१॥

नित्यानुष्ठानमुक्त्वा नैमित्तिकप्रायश्चित्तविधानार्थमुपक्रमते—अत्रेति । तद्वेषे ब्रह्मणो मौनभ्रंशे सतीति यावत् । रसान्विशेषतो ज्ञातुं पृच्छति—कानिति ॥ १ ॥

---

१ क. च. ण. °व ते स°। २ ण. °र्त्विजोऽत उ°। ञ. °र्त्विजस्ते ए°। ३ ख. ञ. ण. °र्वन्तीत्येवे°। ४ ख. ञ. °ह ते इति । छ. ण. °ह ञत इति । ५ ख. ग. ञ. ट. ण. °हितमथ त° । ६ ख. ञ. ड. ण. °श्चकार ।

स एतास्तिस्रो देवता अभ्यतपत्तासां तप्यमानानाꣳ रसान्प्रावृहदग्नेर्ऋचो वायोर्यजूꣳषि सामान्यादित्यात् ॥ २ ॥

पुनरप्येवमेवमन्याद्याः स एतास्तिस्रो देवता उद्दिश्याभ्यतपत् । ततोऽपि सारं रसं त्रयीविद्यां जग्राह ॥ २ ॥

एवं यथा लोकानभ्यतपत्तथेति यावत् । जग्राहेति संबन्धः ॥ २ ॥

स एतां त्रयीं विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्रावृहद्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यः ॥ ३ ॥

तद्यदक्तो रिष्येद्भूः स्वाहेति गार्हपत्ये जुहुयादृचामेव तद्रसेनर्चां वीर्येणर्चां यज्ञस्य विरिष्टꣳ संदधाति ॥ ४ ॥

स एतां पुनरभ्यतपत्त्रयीं विद्याम् । तस्यास्तप्यमानाया रसं भूरिति व्याहृतिमृग्भ्यो जग्राह । भुवरिति व्याहृतिं यजुर्भ्यः । स्वरिति व्याहृतिं सामभ्यः । अत एव लोकदेववेदरसा महाव्याहृतयः । अतस्तत्र यज्ञे यद्यक्त ऋक्संबन्धाद्ऋनिमित्तं रिष्येद्यज्ञः क्षतं प्राप्नुयात्भूः स्वाहेति गार्हपत्ये जुहुयात् । सा तत्र प्रायश्चित्तिः । कथम्, ऋचामेव तदिति क्रियाविशेषणं, रसेनर्चां वीर्येणौजसर्चां यज्ञस्य ऋक्संबन्धिनो यज्ञस्य विरिष्टं विच्छिन्नं क्षतरूपमुत्पन्नं संदधाति प्रतिसंधत्ते ॥ ३ ॥ ४ ॥

तदेव विवृणोति—भूरिति व्याहृतिमित्यादिना । प्रथमोऽतःशब्दो यत इत्यस्मिन्नर्थे । यद्यक्त इति । ऋक्शब्दस्तस्मिन् । उक्तप्रायश्चित्तमेवाऽऽऽक.ङ्क्षापूर्वकं विवृणोति—कथमित्यादिना । क्रियाविशेषणमिति । यज्ञस्य क्षतं संदधातीति यत्तद्ऋचामेव रसेन संदधातीत्यर्थः । ओजसा संदधातीति संबन्धः ॥ ३ ॥ ४ ॥

अथ यदि यजुष्टो रिष्येद्भुवः स्वाहेति दक्षिणाग्नौ

---

१ घ. °नरेवम° । २ ठ. ड. °वम° । ३ ङ. °मेवान्या° । ४ ङ. ड. ढ. °न्याद्या दे° । ख. ग. घ. च. ञ. ठ. ण. °न्याद्यास्ति° । ५ घ. च. ठ. ड. ढ. °त्रयीं वि° । ६ झ. ट. °व इति । ७ घ. ण. रसान् । ८ क. ग. ञ. ट. ठ. ण. °व इति । ९ ख. ग. घ. च. ञ. ठ. ठ. ड. ढ. ज. °यः । यत° । ङ. °थः । यत्त° ।

जुहुयाद्यजुषामेव तद्रसेन यजुषां वीर्येण यज्ञस्य विरिष्टꣳ संदधाति ॥ ५ ॥
अथ यदि सामतो रिष्येत्स्वः स्वाहेत्याहवनीये जुहुयात्साम्नामेव तद्रसेन साम्नां वीर्येण साम्नां यज्ञस्य विरिष्टꣳ संदधाति ॥ ६ ॥

अथ यदि यजुष्टो यजुर्निमित्तं रिष्येद्भुवः स्वाहेति दक्षिणाग्नौ जुहुयात् । तथा सामनिमित्ते रेषे स्वः स्वाहेत्याहवनीये जुहुयात् । तथा पूर्ववद्यज्ञं संदधाति । ब्रह्मनिमित्ते तु रेषे त्रिष्वग्निषु तिसृभिर्व्याहृतिभिर्जुहुयात् । त्रय्या हि विद्यायाः स रेषः । " अथ केन ब्रह्मत्वमित्यनयैव त्रय्या विद्यया " इति श्रुतेः । न्यायान्तरं वा मृग्यं ब्रह्मत्वनिमित्ते रेषे ॥ ५ ॥ ६ ॥

तथा= च यथोक्ते साधने सतीत्यर्थः । यथा पूर्वस्मिन्प्रायश्चित्ते यज्ञस्य क्षतमिव रसेन होता संदधाति तथा द्वितीयतृतीयप्रायश्चित्तयोरपि यजुषां साम्नां च रसेनाध्वर्युरुद्गाता च तत्क्षतं संधत्त इत्याह—पूर्ववदिति । होत्राद्यपराधाधीनयज्ञभ्रंशे प्रायश्चित्तमुक्त्वा ब्रह्मापराधकृते यज्ञनाशे किं प्रायश्चित्तमित्याशङ्क्याऽऽह—ब्रह्मेति । यथायथोक्तप्रायश्चित्ते लिङ्गं दर्शयति—त्रय्या हीति । ब्रह्मणस्त्रयीसारत्वे प्रमाणमाह—अथ केनेति । साधारणकार्यस्य साधारणसामग्रीजन्यत्वनियमाद्वेदत्रयसाधारणे ब्रह्मत्वे वेदत्रयसाधारणमेव प्रायश्चित्तं वाच्यमित्येको न्यायो दर्शितः । संप्रत्यैस्यैव वेदैकत्वप्रसिद्धेर्ब्रह्मणः सर्ववेदार्थाभिज्ञस्य ज्ञानमाहात्म्येनैव दोषनिरासान्नान्यत्प्रायश्चित्तं विधेयमिति न्यायान्तरमाह—न्यायान्तरं वेति ॥ ५ ॥ ६ ॥

तद्यथा लवणेन सुवर्णꣳ संदध्यात्सुवर्णेन रजतꣳ रजतेन त्रपु त्रपुणा सीसꣳ सीसेन लोहं लोहेन दारु दारु चर्मणा ॥ ७ ॥
एवमेषां लोकानामासां देवतानामस्यास्त्रय्या विद्याया वीर्येण यज्ञस्य विरिष्टꣳ संदधाति भेषजकृतो ह वा एष यज्ञो यत्रैवंविद्ब्रह्मा भवति ॥ ८ ॥

---

* चकारोऽधिकः ।

---

१ घ. च. ण. °मित्तं रिष्येत्स्वः स्वा° । २ च. °मित्तरे° । ३ क. °ज्ञध्वंसे प्रा° । ४ क. ग. ट. °ति । अथ यथो° । ख. ञ. °ति । यथो° । ५ क. ख. ग. ण. °त्यज्ञस्यै° । ग. ट. °त्यक्षस्यै° । ६ क. ख. ञ. ण. वेदैक° । ७ ग. ट. °सिद्धब्रह्म° ।

तद्यथा लवणेन सुवर्णं संदध्यात् । क्षारेण टङ्कणादिना खरे मृदुत्वकरे हि तत् । सुवर्णेन रजतमशक्यसंधानं संदध्यात् । रजतेन तथा त्रपु त्रपुणा सीसं सीसेन लोहं लोहेन दारु दारु चर्मणा चर्मबन्धनेन । एवमेषां लोकानामासां देवतानामस्यास्त्रय्या विद्याया वीर्येण रसाख्येनौजसा यज्ञस्य विरिष्टं संदधाति । भेषजकृतो ह वा एष यज्ञः । रोगार्त इव पुंमांश्चिकित्सकेन सुशिक्षितेनैष यज्ञो भवति । कोऽसौ । यत्र यस्मिन्यज्ञ एवंविद्यथोक्तव्याहृतिहोमप्रायश्चित्तविद्ब्रह्मर्त्विग्भवति स यज्ञ इत्यर्थः ॥ ७ ॥ ८ ॥

वस्तुस्वभाववैचित्र्यादुत्पन्नस्यापि क्षतस्य केनचित्संधानं भवतीत्यत्र दृष्टान्तानाह—तद्यथेत्यादिना । किं तत्र साधनमिति तदर्शयति—क्षारेणेति । खरे सुवर्णे वह्निसंयुक्ते द्रवीभूते क्षारप्रक्षेपेण टङ्कणादिना मृदुकरणं मिथोऽवयवसंयोजनं संधानं प्रसिद्धमित्यर्थः । रजतं सुवर्णेन स्वरसतस्तावदशक्यसंधानं तथाऽपि वह्निसंयोगपूर्वकं पूर्ववदेव तत्रापि प्रसिद्धं संधानमित्याह—सुवर्णेनेति । रजतेनेत्यादावपि यथोक्तं द्रष्टव्यम् । संदधाति ब्रह्मेति शेषः । भेषजेनेव कृतः संस्कृत इति यावत् । तदेव स्फुटयति—रोगार्त इति । भवति संस्कृत इति शेषः ॥ ७ ॥ ८ ॥

एष ह वा उदक्प्रवणो यज्ञो यत्रैवंविद्ब्रह्मा भवत्येवंविदꣳ ह वा एषा ब्रह्माणमनुगाथा यतो यत आवर्तते तत्तद्गच्छति ॥ ९ ॥

किंचैष ह वा उदक्प्रवण उदङ्निम्नो दक्षिणोच्छ्रायो यज्ञो भवति । उत्तरमार्गप्रतिपत्तिहेतुरित्यर्थः । यत्रैवंविद्ब्रह्मा भवत्येवंविदं ह वै ब्रह्माणमृत्विजं प्रत्येषाऽनुगाथा ब्रह्मणः स्तुतिपरा । यतो यत=आवर्तते कर्म प्रदेशादृत्विजां यज्ञः क्षतीभवंस्तत्तद्यज्ञस्य क्षतरूपं प्रतिसंदधत्प्रायश्चित्तेन गच्छति परिपालयतीत्येतत् ॥ ९ ॥

इतश्चैवंविदा ब्रह्मणा भवितव्यमित्याह—किंचेति । गाथाशब्दो गायत्र्यादिच्छन्दोव्यतिरिक्तच्छन्दोविषयः । यतो यतः प्रदेशात्कर्माऽऽवर्तत इत्युक्तं विवृणोति—

= आवर्तनमृत्विक्कृतं क्षतम्

---

१ घ. ङ. ठ. ढ. °ङ्कणकादि° । २ क. ख. ग. च. ञ. ट. खरेषु । ३ ण. पुरुषश्चि° । ४ ख. ग. घ. ङ. च. ञ. ट. ठ. ड. ण. °णोच्छ्रयो ।

ऋत्विजामिति । यत्र यत्र प्रदेशे यज्ञस्य क्षतिरध्वर्युप्रभृतीनामभवत्तत्र तत्र यज्ञस्य क्षतरूपं प्रायश्चित्तेन प्रतिसंदधानो ब्रह्मा कर्तॄन्परिपालयतीति संबन्धः ॥ ९ ॥

मानवो ब्रह्मैवैक ऋत्विक्कुरूनश्वाऽभिरक्षत्येवंविद्ध्वै वै ब्रह्मा यज्ञं यजमानꣳ सर्वाꣳश्चर्त्विजोऽभिरक्षति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं नानेवंविदम् ॥ १० ॥

इति च्छान्दोग्योपनिषदि चतुर्थाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

इति च्छान्दोग्योपनिषद्ब्राह्मणे चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

मानवो ब्रह्मा मौनाचरणान्मननाद्वा ज्ञानवत्त्वाच्चतो ब्रह्मैवैकर्त्विक्कुरून्कर्तॄन् । योदृनारूढानश्वा वडवा यथाऽभिरक्षत्येवंविद्ध्वै वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति । तत्कृतदोषापनयनात् । यत एवंविशिष्टो ब्रह्मा विद्वांस्तस्मादेवंविदमेव यथोक्तव्याहृत्यादिविदं ब्रह्माणं कुर्वीत नानेवंविदं कदाचनेति । द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ १० ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये चतुर्थाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ छान्दोग्योपनिषद्विवरणे चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

ऋत्विजि ब्रह्मणि मानवशब्दप्रवृत्तौ निमित्तद्वयमाह—मौनेति । ज्ञानातिशयस्तच्छब्दार्थः । कर्तॄनभिरक्षतीति संबन्धः । उक्तमर्थं दृष्टान्तेन प्रकटयति—योदृनित्यादिना । प्रकरणार्थमुपसंहरति—एवमिति ॥ १० ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां चतुर्थाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां छान्दोग्योपनिषद्भाष्यटीकायां चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

---

१ छ. °इक्षं° । २ ख. ग. ङ. ज. झ. ञ. ट. त. थ. °द्ध ह वै । ३ ग. घ. ङ. च. ट. ठ. ड. ढ. °च्चातो । ४ ख. घ. ङ. ट. ड. ढ. °द्ध ह वै । ५ क. °यस° ।

(अथ पञ्चमाध्यायस्य प्रथमः खण्डः)।

सगुणब्रह्मविद्याया उत्तरा गतिरुक्ता। अथेदानीं पञ्चमेऽध्याये पञ्चाग्निविदो गृहस्थस्योर्ध्वरेतसां च श्रद्धालूनां विद्यान्तरशीलिनां तामेव गतिमनूद्यान्या दक्षिणा दिक्संबन्धिनी केवलकर्मिणां धूमादिलक्षणा पुनरावृत्तिरूपा तृतीया च ततः कष्टतरा संसारगतिर्वैराग्यहेतोर्वक्तव्येत्यारभ्यते। प्राणः श्रेष्ठो वागादिभ्यः प्राणो वाव संवर्ग इत्यादि च बहुशोऽतीते ग्रन्थे प्राणग्रहणं कृतम्। स कथं श्रेष्ठो वागादिषु सर्वैः संहत्यकारित्वाविशेषे कथं च तस्योपासनामिति तस्य श्रेष्ठत्वादिगुणविधित्सयेदमनन्तरमारभ्यते—

ॐ। यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ॥ १ ॥

यो ह वै कश्चिज्ज्येष्ठं च प्रथमं वयसा श्रेष्ठं च गुणैरभ्यधिकं वेद स ज्येष्ठश्च ह वै श्रेष्ठश्च भवति। फलेन पुरुषं प्रत्यभिमुखीकृत्याऽऽह—प्राणो वाव ज्येष्ठश्च वयसा वागादिभ्यः। गर्भस्थे हि पुरुषे प्राणस्य वृत्तिर्वागादिभ्यः पूर्वं लब्धात्मिका भवति यया गर्भो विवर्धते चक्षुरादिस्थानावयवनिष्पत्तौ सत्यां पश्चाद्वागादीनां वृत्तिलाभ इति प्राणो ज्येष्ठो वयसा भवति। श्रेष्ठत्वं तु प्रतिपादयिष्यति सुहय इत्यादिनिदर्शनेन। अतः प्राण एव ज्येष्ठश्च श्रेष्ठश्चास्मिन्कार्यकरणसंघाते ॥ १ ॥

वृत्तमनूद्य वर्तिष्यमाणाध्यायस्य संगतिं संगिरते—सगुणेति। विद्यान्तरं पञ्चाग्निविद्यातिरिक्ता सगुणविद्या। तच्छीलिनां तन्निष्ठानामिति यावत्। तामेव गतिमर्चिरादिलक्षणामित्यर्थः। ततो गतिद्वयात्तृतीया च विद्याकर्मरहितानामिति शेषः। अथ क्रमेण मुक्तिसंभवादुत्तरा गतिरुच्यतां किमिति दक्षिणा तृतीया च संसाररूपा गतिरतिनिकृष्टा व्यपदिश्यते तत्राऽऽह—कष्टतरेति। सगुणब्रह्मविद्यावतामर्चिराद्यां गतिमुक्त्वा समुच्चितानामसमुच्चितानां कर्मणां संसारगतिप्रभेदरूपं फलं वक्तुमयमारम्भ इत्यर्थः। कर्मविधिश्च धनसंपत्तौ सत्यां भवति। तत्संपत्तिश्च ब्राह्मणस्य श्रैष्ठ्ये सत्येव

---

१ क. ङ. °क्षिणदि°। २ ङ. ङ. ढ. °णो ब्रह्म प्राण आकाश इ°। ३ ग. घ. च. ट. ठ. °वर्गः प्राणो ब्रह्म प्राण आकाश इ°। ४ ग. घ. ङ. च. ठ. ड. ढ. °दि ब°। ५ ग. ट. °शेषात्क°। ६ ठ. वेदोपास्ते स। ७ क. ख. ङ. ञ. ठ. ढ. °र्थकार°।

संभवतीति श्रैष्ठ्यसिद्धये प्राणोपासनं पूर्वत्रानुक्तं वक्तव्यमित्यनन्तरग्रन्थसंगतिं वदन्प्रसङ्गं करोति—प्राणः श्रेष्ठ इत्यादिना । प्राणो ब्रह्मेत्यादिवाक्यमपि शब्दार्थः । उदाहृतानुदाहृतश्रुत्यन्तरसमुच्चयार्थश्चकारः । प्राणस्य वागादिभ्यः श्रैष्ठ्यमुक्तमाक्षिपति—स कथमिति । सर्वैर्वागादिभिः संहत्य प्राणस्य कार्यकरत्वे संप्रतिपन्ने स एव कथं श्रेष्ठो निर्धार्यते तेषामन्यतमस्यैव श्रैष्ठ्यं किं न स्यादित्यर्थः । तस्यैवोपास्यतया श्रैष्ठ्यमाशङ्क्य वागादीनामन्यतमस्योपास्यत्वमपास्य प्राणस्यैव नोपास्यत्वं हेत्वभावादित्याक्षेपान्तरमाह—कथं चेति । प्राणस्य श्रेष्ठत्वं ज्येष्ठत्वमित्यादिगुणविधानार्थमेव तावत्प्रथममारभ्यते—यो ह वै ज्येष्ठं चेति । औद्यं चोद्यं परिहरति—प्रथममिति । प्राणस्यैवोपासनं न वागादीनामित्येतदनन्तरमारभ्यतेऽथ ह प्राण उच्चिक्रमिषन्नित्यादिनेति द्वितीयं चोद्यमुद्धरति—इदमनन्तरमिति । कोऽसौ ज्येष्ठत्वश्रेष्ठत्वगुणो वेदितव्य इत्यत आह—फलेनेति । कुतो वागादिभ्यो ज्यैष्ठ्यं प्राणस्य प्रतीतं सर्वे हि वागादयः सप्राणाः सहैव गर्भस्थे स्वतो वृत्तिभागिनो भवन्ति तत्राऽऽह—गर्भस्थे हीति । तत्र गर्भविवृद्धिदर्शनं प्रमाणयति——यथेति । कदा तर्हि वागादीनां वृत्तिलाभस्तत्राऽऽह—चक्षुरादीति । प्राणस्य ज्यैष्ठ्यं प्रतिपादितं निगमयति—इति प्राण इति । गुणद्वयमुपारयत्वाय दर्शितं निगमयति—अत इति ॥ १ ॥

यो ह वै वसिष्ठं वेद वसिष्ठो ह स्वानां भवति वाग्वाव वसिष्ठः ॥ २ ॥

यो ह वै वसिष्ठं वसितृतममाच्छादयितृतमं वसुमत्तमं वा यो वेद स तथैव वसिष्ठो ह भवति स्वानां ज्ञातीनाम् । कस्तर्हि वसिष्ठ इत्याह । वाग्वाव वसिष्ठो वाग्धि मनो हि पुरुषा वसन्त्यभिभवन्त्यन्यान्वसुमत्तमाश्चातो वाग्वसिष्ठः ॥ २ ॥

तदर्थत्वेनैव गुणान्तरं दर्शयति—यो ह वा इति । वसुमत्तमं धनवत्त्वादन्येषां निवासकारणमित्यर्थः । तथैवेत्युपासनानुसारेणेति यावत् । वसिष्ठो ह भवतीति वासयितॄं वेत्यर्थः । वाचो वसिष्ठत्वं समर्थयते—वाग्धि मनो हीति । वसुमत्तमाश्च तेनान्यान्निवासयन्तीति शेषः ॥ २ ॥

यो ह वै प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मिँश्च लोकेऽमुष्मिँश्च चक्षुर्वाव प्रतिष्ठा ॥ ३ ॥

---

१ क. आद्यचो° । ख. छ. ञ. ण. आद्यं प° । २ ख. छ. ञ. ण. °तीयचो° । ३ घ. ङ. ट. ड. वस्तृत° । ४ क. °ता वेत्य° । ५ ख. ङ. °श्चक्षु° ।

यो ह वै प्रतिष्ठां वेद स चास्मिँल्लोकेऽमुष्मिंश्च परे प्रतितिष्ठति ह । का तर्हि प्रतिष्ठेत्याह । चक्षुर्वाव प्रतिष्ठा । चक्षुषा हि पश्यन्समे च दुर्गे च प्रतितिष्ठति यस्मादतः प्रतिष्ठा चक्षुः ॥ ३ ॥

गुणान्तरमाध्यानायोपदिशति-यो हेति । प्रतिष्ठात्वं चक्षुषो विशदयति-चक्षुषा हीति ॥ ३ ॥

यो ह वै संपदं वेद सꣳ हास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्च श्रोत्रं वाव संपत् ॥ ४ ॥

यो ह वै संपदं वेद तस्या अस्मै दैवाश्च मानुषाश्च कामाः संपद्यन्ते ह । का तर्हि संपदित्याह—श्रोत्रं वाव संपत् । यस्माच्छ्रोत्रेण वेदा गृह्यन्ते तदर्थविज्ञानं च ततः कर्माणि क्रियन्ते ततः कामसंपदित्येवं कामसंपद्धेतुत्वाच्छ्रोत्रं वाव संपत् ॥ ४ ॥

गुणान्तरमाह-यो ह वा इति । दैवाः कामाः स्वर्गादयो वा मानुषाः पश्वादयः । श्रोत्रस्य संपत्त्वं साधयति—यस्मादिति । इत्येवं यस्मात्तस्मादिति योजना ॥४॥

यो ह वा आयतनं वेदाऽऽयतनꣳ ह स्वानां भवति मनो ह वा आयतनम् ॥ ५ ॥

यो ह वा आयतनं वेदाऽऽयतनं ह स्वानां भवत्याश्रयो भवतीत्यर्थः । किं तदायतनमित्याह—मनो ह वा आयतनम् । इन्द्रियोपहृतानां विषयाणां भोक्तृत्वर्थानां प्रत्ययरूपाणां मन आयतनमाश्रयः । अतो मनो ह वा आयतनमित्युक्तम् ॥ ५ ॥

संप्रति गुणान्तरमाह-यो हेति । कथं पुनरायतनत्वं मनसः सिद्धमित्यत आह-इन्द्रियोपहृतानामिति ॥ ५ ॥

अथ ह प्राणा अहꣳश्रेयसि व्यूदिरेऽहꣳ श्रेयानस्मीहꣳ श्रेयानस्मीति ॥ ६ ॥

अथ ह प्राणा एवं यथोक्तगुणाः सन्तोऽहं श्रेयस्यहंश्रेयानस्मीहं श्रेयानस्मीत्येतस्मिन्नयोजने व्यूदिरे नाना विरुद्धं चोदिर उक्तवन्तः ॥ ६ ॥

यथोक्ता गुणा मुख्यप्राणगामिनो न प्रत्येकं वागादिषु भवन्तीति वक्तुमाख्यायिकां प्रमाणयति—अथेति ॥ ६ ॥

---

१ घ. ङ. ञ. ण. चास्मिंश्च लोके । २ च. ठ. °वतीत्या° । ३ क. ख. छ. ञ. ण. °प्रण° ।

ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन्को नः श्रेष्ठ इति तान्होवाच यस्मिन्व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठ इति ॥ ७ ॥

ते ह ते हैवं विवदमाना आत्मनः श्रेष्ठत्वविज्ञानाय प्रजापतिं पितरं जनयितारं कंचिदेत्योचुरुक्तवन्तो हे भगवन्को नोऽस्माकं मध्ये श्रेष्ठोऽभ्यधिको गुणैरित्येवं पृष्टवन्तः । तान्पितोवाच ह यस्मिन्वो युष्माकं मध्य उत्क्रान्ते शरीरमिदं पापिष्ठमिवातिशयेन जीवतोऽपि समुत्क्रान्तप्राणं ततोऽपि पापिष्ठतरमिवातिशयेन दृश्येत कुणपमस्पृश्यमशुचि दृश्येत स वो युष्माकं श्रेष्ठ इत्यवोचत्काका तद्दुःखं परिजिहीर्षुः ॥ ७ ॥

कंचिद्विराजं कश्यपादीनामन्यतमं वेत्यर्थः । शरीरस्य पापिष्ठत्वं पापकायप्रधानत्वम् । इवशब्दोऽवधारणार्थः । उक्तमेवार्थं संक्षिप्याऽऽह—कुणपमिति । त्यक्तप्राणं शवरूपमिति यावत् । ननु प्रजापतिः सर्वज्ञो मुख्यमेव प्राणं किमिति श्रेष्ठं नाभिवदति तत्राऽऽह—काकेति । अयं श्रेष्ठ इत्युक्ते यत्तेषां वागादीनां दुःखं तत्परिहर्तुमिच्छन्प्रजापतिः स्वरूपभङ्गोपायविशेषेण श्रेष्ठमुक्तवान्न स्फुटमित्यर्थः ॥ ७ ॥

सा ह वागुच्चक्राम सा संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् ॥ ८ ॥

चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथाऽन्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः ॥ ९ ॥

---

१ घ. ङ. च. ठ. ढ. ण. °ष्ठतावि° । २ घ, ङ. ण. °त्येवमुक्तवन्तः । ढ. °त्येवमुक्तवतस्तान्पि° । ३ घ. ङ. ठ. ड. °ष्ठमेवा° । ४ क. ग. ढ. °रमेवा° । ५ ख. ग. ङ. ञ. ट. ण. °हीर्षन् । ६ क. °ष्टत्वमु° ।

श्रोत्रꣳ होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् ॥ १० ॥ मनो होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः ॥ ११ ॥

तथोक्तेषु पित्रा प्राणेषु सा ह वागुच्चक्रामोत्क्रान्तवती । सा चोत्क्रम्य संवत्सरमात्रं प्रोष्य स्वव्यापाराच्निवृत्ता सती पुनः पर्येत्येतरान्प्राणानुवाच—कथं केन प्रकारेणाशकत शक्तवन्तो यूयं मद्दते मां विना जीवितुं धारयितुमात्मानमिति ते होचुर्यथा कला इत्यादि । कला मूका यथा लोकेऽवदन्तो वाचा जीवन्ति । कथम् । प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवं सर्वकरणचेष्टां कुर्वन्त इत्यर्थः । एवं वयमज्जीविष्मेत्यर्थः । आत्मनोऽश्रेष्ठतां प्राणेषु बुद्ध्वा प्रविवेश ह वाक्पुनः स्वव्यापारे प्रवृत्ता बभूवेत्यर्थः । समानमन्यच्चक्षुर्होच्चक्राम श्रोत्रं होच्चक्राम मनो होच्चक्रामेत्यादि । यथा बाला अमनसोऽप्ररूढमनस इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

अन्यदित्यस्य विषयमाह—चक्षुरिति । बालानामपि बहिरन्तरिन्द्रियत्वाविशेषात्कथममनस इति विशेषणमत आह—अप्ररूढेति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

अथ ह प्राण उच्चिक्रमिषन्स यथा सुहयः पड्वीशशङ्कून्संखिदेदेवमितरान्प्राणान्समखिदत्तꣳ हाभिसमेत्योचुर्भगवन्नेधि वै नः श्रेष्ठोऽसि मोत्क्रमीरिति ॥ १२ ॥

---

१ च. °त्सरं संवत्सरमा° । २ घ. ठ. शक्नुव° । ३ ख. ग. ङ. ञ. ट. ड. °मसा स° । ४ च. ज. °मज्जी° । ५ घ. °पारप्र° । ६ च. ठ. °रेषु प्र° ।

एवं परीक्षितेषु वागादिष्वथानन्तरं ह स मुख्यः प्राण उच्चिक्रमिषन्नुत्क्रमितुमिच्छन्किमकरोदित्युच्यते । यथा लोके सुहयः शोभनोऽश्वः पड्वीशङ्कून्पादबन्धनकीलान्परीक्षणायाऽऽरूढेन कशया हतः सन्सांखिदेत्समुत्खनेत्समुत्पाटयेत्, एवमितरान्वागादीन्प्राणान्समखिदत्समुद्धृतवान् । ते प्राणाः संचालिताः सन्तः स्वस्थाने स्थातुमनुत्सहमाना अभिसमेत्य मुख्यं प्राणं तमूचुर्हे भगवन्नेधि भव नः स्वामी यस्मात्त्वं नोऽस्माकं श्रेष्ठोऽसि मा चास्मादेहादुत्क्रमीरिति ॥ १२ ॥

परीक्षितेषु श्रेष्ठतारहितेषु निरूप्य निश्चितेष्वित्येतत् । पदनशीलाः पादास्तेषां संहतिः पड्वितस्तस्या ईशा नियामकाः शङ्कवो वर्णविकारश्छान्दसः । तान्यथोक्तान्श्वो युगपदुत्पाटयेद्यथेति दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह—एवमिति ॥ १२ ॥

अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठाऽस्मि त्वं तत्प्रतिष्ठाऽसीति ॥ १३ ॥

अथ हैनꣳ श्रोत्रमुवाच यदहꣳ संपदस्मि त्वं तत्संपदसीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति ॥ १४ ॥

अथ हैनं वागादयः प्राणस्य श्रेष्ठत्वं कार्येणाऽऽपादयन्त आहुर्बलिमिव हरन्तो राज्ञे विशः । कथं, वाक् तावदुवाच—यदहं वसिष्ठोऽस्मि । यदिति क्रियाविशेषणं यद्वसिष्ठत्वगुणाऽस्मीत्यर्थः । त्वं वसिष्ठस्तेन वसिष्ठत्वगुणेन त्वं तद्वसिष्ठोऽसि । तद्गुणस्त्वमित्यर्थः । अथवा तच्छब्दोऽपि क्रियाविशेषणमेव । त्वत्कृतस्त्वदीयोऽसौ वसिष्ठत्वगुणोऽज्ञानान्ममेति मयाऽभिमत इत्येतत् । तथोत्तरेषु योज्यं चक्षुःश्रोत्रमनःसु ॥ १३ ॥ १४ ॥

मयि श्रेष्ठत्वधीर्युष्माकमस्तीति कथं ज्ञातुं शक्यमित्याशङ्क्याऽऽह—अथेति । वचनं प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । क्रियाविशेषणत्वमेव विशदयति—यद्वसिष्ठत्वेति । वसिष्ठत्वेन गुणेनाहं गुणवानस्मीति यत्तत्त्वमेवेति योजना । अनन्तरं वाक्य-

---

१ च. ठ. °कीलकान्प° । २ घ. ङ. च. ञ. ण. °रानन्यान्वाग° । ३ ख. घ. ङ. च. ञ. ठ. ढ. ण. श्रेष्ठता । ४ क. ग. घ. ङ. ट. ठ. ड. ढ. ण. राज्ञो । ५ घ. ठ. ढ. °गुणोऽस्मी° । ६ ख. घ. च. ञ. ठ. ड. °न त° । ७ क. ग. ङ. ञ. ट. ढ. ण. °ण एव । ८ ग. ढ. °कमिति । ९ ख. छ. ञ. ट. ण. °न्तरवा° ।

मादाय व्याचष्टे-त्वमित्यादिना । तद्वसिष्ठ इति समस्तपदमिति गृहीत्वा व्याख्याय पक्षान्तरमाह—अथवेति । यच्छब्दवदित्यपेरर्थः । अहं वसिष्ठत्वगुणोऽस्मीति यत्तत्त्वमेव वसिष्ठत्वगुणोऽसीति कथमिदानीमुच्यते । अन्यथा हि पूर्वमभिधानं तवाऽऽसीदित्याशङ्क्याऽऽह—त्वत्कृत इति । वाचि दर्शितं न्यायं चक्षुरादावतिदिशति—तथेति । १३ ॥ १४ ॥

न वै वाचो न चक्षूꣳषि न श्रोत्राणि न मनाꣳसीत्याचक्षते प्राणा इत्येवाऽऽचक्षते प्राणो ह्येवैतानि सर्वाणि भवति ॥ १५ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

===

श्रुतेरिदं वचो युक्तमिदं वागादिभिर्मुख्यं प्राणं प्रत्याभिहितं यस्मान्न वै लोके वाचो न चक्षूंषि न श्रोत्राणि न मनांसीति वागादीनि करणान्याचक्षते लौकिका आगमज्ञा वा किं तर्हि प्राणा इत्येवाऽऽचक्षते कथयन्ति । यस्मात्प्राणो ह्येवैतानि सर्वाणि वागादीनि करणजातानि भवत्यतो मुख्यं प्राणं प्रत्यनुरूपमेव वागादिभिरुक्तमिति प्रकरणार्थमुपसंजिहीर्षति ।

वागादिवचनादुत्थाय प्राणाधीनतां वागादेः श्रुतिरेव कथयतीत्युत्तरस्य न वै वाच इत्यादेस्तात्पर्यमाह—श्रुतेरिति । तदेव च सोपस्कारं व्याकरोति—युक्तमित्यादिना । यदि सर्वाण्येव करणानि वाक्तन्त्राणि स्युस्तर्हि वाच इत्येव तानि ब्रूयुः । यदि चक्षुस्तन्त्राणि स्युस्तदा सर्वाण्येव चक्षूंषीति वदेयुः । न चैवं वदन्ति, प्राणा इति तु तानि कथयन्ति । तस्मात्प्राणपारतन्त्र्यं करणानां सिद्धमित्यर्थः । वागादिभिरुक्तं त्वं तद्वसिष्ठोऽसीत्यादि प्राणस्यैव यथोक्तगुणवतो ध्येयत्वं प्रकरणार्थः । साक्षादुपसंहारादर्शनादुपसंजिहीर्षतीत्युक्तम् ।

ननु कथमिदं युक्तं चेतनावन्त इव पुरुषा अहंश्रेष्ठतायै+विवदन्तोऽन्योन्यं स्पर्धेरन्निति । न हि चक्षुरादीनां वाचं प्रत्याख्याय प्रत्येकं वदनं संभवति । तथाऽपगमो देहान्पुनः प्रवेशो ब्रह्मगमनं प्राणस्तुतिर्वोपपद्यते ।

आख्यायिकाया यथाश्रुतमर्थमाक्षिपति—नन्विति । यथा पुरुषाश्चेतनावन्तो विवदमानाः स्पर्धन्ते तथा वागादयाऽचेतनाः स्वकीयश्रेष्ठत्वसिद्ध्यर्थं विप्रतिपन्ना मिथः

+ उत्तरत्रेवात्रापि विवदमाना इत्येव युक्तः पाठः ।

१ क ग. ट. ढ. °धानस्तवा° । २ ख. ञ. °मुख्यमा° । ३ च. ठ. °ति च वा° । ४ ट. ठ. ढ. वचनं ।

स्पर्धेरन्निति नैव युक्तमचेतनेषु स्पर्धादेरदर्शनादित्यर्थः । किंच वाग्व्यतिरिक्तानामन्योन्यं वचनमेवानुचितं वचनस्य वाग्व्यापारत्वादित्याह—न हीति । किंच वागादीनां देहादुत्सर्पणाद्ययुक्तमचेतनत्वादित्याह—तथेति । वाशब्दो न हीत्यस्यानुकर्षणार्थः ।

तत्राग्न्यादिचेतनावद्देवताधिष्ठितत्वाद्वागादीनां चेतनावत्त्वं तावत्सिद्धमागमतः । तार्किकसमयविरोध इति चेद्देह एकस्मिन्ननेकचेतनावत्त्वे । न । ईश्वरस्य निमित्तकारणत्वाभ्युपगमात् । ये तावदीश्वरमभ्युपगच्छन्ति तार्किकास्ते मनआदिकार्यकरणानामाध्यात्मिकानां बाह्यानां च पृथिव्यादीनामीश्वराधिष्ठितानामेव नियमेन प्रवृत्तिमिच्छन्ति रथादिवत् । न चास्माभिरग्न्याद्याश्चेतनावत्यो ऽपि देवता अध्यात्मं भोक्तृत्वेऽभ्युपगम्यन्ते, किं तर्हि, कार्यकरणवतीनां हि तासां प्राणैकदेवतामेदानामध्यात्माधिभूताधिदैवभेदकोटिविकल्पानामध्यक्षतामात्रेण नियन्तेश्वरोऽभ्युपगम्यते । स ह्यकरणः । " अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः " इत्यादिमन्त्रवर्णात् । " हिरण्यगर्भं पश्यत जायमानम् " " हिरण्यगर्भं जनयामास पूर्वम् " इत्यादि च श्वेताश्वतरीयाः पठन्ति । भोक्ता कर्मफलसंबन्धी देहे तद्विलक्षणो जीव इति वक्ष्यामः ।

अग्न्यादयश्चेतनावत्यो देवतास्ताभिरधिष्ठितत्वात्तादात्म्याभिप्रायेण वागादीनां चेतनावत्त्वसंभवाद्वदनादिव्यवहारः संभवतीत्यग्निर्वाग्भूत्वा मुखं प्राविशदित्यादिश्रुतिमनुसृत्योत्तरमाह—तत्रेति । एकस्मिन्देहेऽनेकचेतनावतीं प्रसह्य विरुद्धानेकाभिप्रायानुविधायित्वेन देहस्योन्मथनप्रसङ्गादक्रियत्वप्रसङ्गाद्वा नानेकचेतनाधिष्ठितत्वमेकस्य देहस्य संभवतीति शङ्कते—तार्किकेति । किमेकशरीरमनेकचेतनाधिष्ठितं न भवति किंवा तैर्निर्णीतकर्तृभोक्त्राधिष्ठितमिति विकल्प्याऽऽद्यं दूषयति—नेति । अस्ति हि परमते शरीरस्य जीवाधिष्ठितस्यैवेश्वराधिष्ठितत्वं तथा चैकशरीरमनेकचेतनाधिष्ठितं न भवतीति नास्ति सेश्वरवादिनां शङ्केत्यर्थः । संग्रहवाक्यं विवृणोति—ये तावदिति । अचेतनानां चेतनाधिष्ठितानामेव प्रवृत्तिरित्यत्र दृष्टान्तमाह—रथादिवदिति । द्वितीयं प्रत्याह—न चेति । कार्यकरणानामधिष्ठातृदेवता तर्हि तत्कार्यकरणानां किमधिष्ठातृदेवतान्तरमिति पृच्छति—किं तर्हीति । देवताकार्यकरणानामधिष्ठातृदेवतान्तरमिष्टं चेदनवस्था स्यादिति मन्वानं प्रत्याह—कार्यकरणवतीनामिति । शाकल्यब्राह्मण-

---

१ क. देहोत्सर्पं° । २ ग. ट. °हात्सर्पं° । ३ क. घ. ङ. ढ. °र्यकार° । ४ क. ग. ट. °त्यो दे° । ५ घ. °त्मं कर्त्र्यो भो° । ६ ङ. ढ. °र्यकार° । ७ क. ग. ट. °तां वि° । ८ क. ग. ट. °र्यकार° । ९ क. ग. ट. र्यकार° । १० क. ग. ट. °र्यकार° । ११ क. ग. ट. °र्यकार° ।

मनुसृत्याऽऽह—प्राणेति । ननु भूयस्यो देवताः कथं तासां प्राणलक्षणैकदेवता-प्रभेदत्वमत आह—अध्यात्मेति । अध्यात्माधिभूताधिदैवानां भेदकोटिर्विकल्पो यासामिति विग्रहः । नियन्तृत्वप्रयुक्तव्यापारवत्त्वं वारयितुं विशिनष्टि—अध्यक्षता-मात्रेणेति । अथेश्वरस्यापि नियन्तृत्वात्कार्यकरणवत्त्वं देवतानामिव स्यादिति चेन्ने-त्याह—स हीति । अकरणत्वमकार्यत्वस्योपलक्षणम् । तत्र श्रुतिं प्रमाणयति—अपाणीति । आदिपदेन च न तस्य कार्यं करणं च विद्यत इत्यादिमन्त्रवर्णो गृहीतः । सूत्रात्मा हिरण्यगर्भः सा चैका समष्टिरूपा देवता तदवस्थाभेदानां देवतानामीश्वरो नियन्तेत्युक्तं तत्र प्रमाणमाह—हिरण्यगर्भेति । आदिपदेन हिरण्यगर्भः समव-र्ततेत्यादि गृह्यते । देवतानामीश्वरस्य चास्मिन्देहे भोक्तृत्वाभावे कस्य भोक्तृत्वमित्यत आह—भोक्तेति । तद्विलक्षणो देवतेश्वराभ्यां व्यावृत्त इति यावत् ।

वागादीनां चेह संवादः कल्पितो विदुषोऽन्वयव्यतिरेकाभ्यां प्राणश्रे-ष्ठतानिर्धारणार्थम् । यथा लोके पुरुषा अन्योन्यमात्मनः श्रेष्ठतायै विवद-मानाः कंचिद्गुणविशेषाभिज्ञं पृच्छन्ति—को नः श्रेष्ठो गुणैरिति । तेनोक्ता एकैकस्येनादः कार्यं साधयितुमुद्यच्छते येनादः कार्यं साध्यते स वः श्रेष्ठ इत्युक्तास्तथैवोद्यच्छन्त आत्मनोऽन्यस्य वा श्रेष्ठतां निर्धारयन्ति । तथेयं संव्यवहारे वागादिषु कल्पितवती श्रुतिः । कथं नाम विद्वान्वागादीनामेकै-कस्याभावेऽपि जीवनं द्रष्टुं नतु प्राणस्येति प्राणश्रेष्ठतां प्रतिपद्येतेति । तथा च श्रुतिः कौषीतकिनाम्—"जीवति वाग्अपेतो मूकान्हि पश्यामो जीवति चक्षु-रपेतोऽन्धान्हि पश्यामो जीवति श्रोत्रापेतो बधिरान्हि पश्यामो जीवति मनोपेतो बालान्हि पश्यामो जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्नः" इत्याद्या ॥ १५ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

वागादिशब्दवाच्याश्चेतनावत्यो देवता इति स्वीकृत्याऽऽख्यायिकायाः स्वार्थनि-र्वृत्त्यर्थमुक्तमिदानीं तस्यास्तात्पर्यमाह—वागादीनां चेति । कल्पनाप्रयोजनमाह—विदुष इति । यथोक्तां कल्पनां दृष्टान्तेन स्पष्टयति—यथेत्यादि । तेनोक्ता इत्यु-क्तमेव व्यनक्ति—एकैकस्येनेति । विदुष इत्यादिनोक्तं प्रयोजनं प्रकटयति—कथं नामेति । विद्वान्प्राणश्रेष्ठतां कथं नाम प्रतिपद्येतेति संबन्धः । प्रतिपत्तिप्रकारं

---

१ क. ग. ट. °र्यकार° । २ ख. ञ. °न न । ३ क. ख. छ. ञ. ट. °कृतेत्य° । ४ ञ. °णार्थः । य° । ५ क. ख. ञ, ट. °च्छन्तु ये° । ६ क. घ. ङ. ङ. °पद्यत इति । ७ क. ग. ट. °याश्चार्थ° ।

संक्षिपति—वागादीनामिति । फलवती कल्पनेति शेषः । दृष्टेऽप्यर्थे श्रुतिमनुग्राहकत्वेन दर्शयति—तथा चेति ॥ १५ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

(अथ पञ्चमाध्यायस्य द्वितीयः खण्डः)।

स होवाच किं मेऽन्नं भविष्यतीति यत्किंचिदिदमाश्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षं न ह वा एवंविदि किंचनानन्नं भवतीति ॥ १ ॥

स होवाच मुख्यः प्राणः किं मेऽन्नं भविष्यतीति । मुख्यं प्राणं प्रष्टारमिव कल्पयित्वा वागादीन्प्रतिवक्तॄनिव कल्पयन्ती श्रुतिराह—यदिदं लोकेऽन्नजातं प्रसिद्धमा श्वभ्यः श्वभिः सहाऽऽशकुनिभ्यः सह शकुनिभिः सर्वप्राणिनां यदन्नं तत्तवान्नमिति होचुर्वागादय इति । प्राणस्य सर्वमन्नं प्राणोऽत्ता सर्वस्यान्नस्येत्येवं प्रतिपत्तये कल्पिताख्यायिकारूपाद्व्याहृत्य स्वेन श्रुतिरूपेणाऽऽह । तद्वा एतद्यत्किंचिल्लोके प्राणिभिरन्नमद्यतेऽनस्य प्राणस्य तदन्नं प्राणेनैव तदद्यत इत्यर्थः । सर्वप्रकारचेष्टाव्याप्तिगुणप्रदर्शनार्थमन इति प्राणस्य प्रत्यक्षं नाम । प्राद्युपसर्गपूर्वत्वे हि विशेषगतिरेव स्यात् । तथा च सर्वान्नानामत्तुर्नामग्रहणमिमीदं प्रत्यक्षं नामान इति सर्वान्नानामत्तुः साक्षादभिधानम् । न ह वा एवंविदि यथोक्तप्राणविदि प्राणोऽहमस्मि सर्वभूतस्थः सर्वान्नानामत्तेति तस्मिन्नेवंविदि ह वै किंचन किंचिदपि प्राणिभिराद्यं सर्वैरनन्नमन्नाद्यं न भवति सर्वमेवंविद्यन्नं भवतीत्यर्थः । प्राणभूतत्वाद्विदुषः । "प्राणाद्वा एष उदेति प्राणेऽस्तमेति" इत्युपक्रम्य—"एवंविदो ह वा उदेति सूर्य एवंविद्यस्तमेति" इति श्रुत्यन्तरात् ॥ १ ॥

वागादीनां स्वामी श्रैष्ठ्यादिगुणः प्राणोऽस्मीति विद्यादिति प्रधानविद्यामुपदिश्य तद्दर्शनाङ्गभूतान्नवासोदृष्टिविधानार्थे प्रक्रमे प्रथममन्नदृष्टिं विधातुं प्रसङ्गं प्रकुरुते—स होवाचेति । मुख्यस्य प्राणस्य प्रष्टृत्वं वागादीनां प्रतिवक्तृत्वं च काल्पनिकमित्याह—मुख्यमिति । यदिदमित्युक्तमेव च यत्पदं वाक्यार्थकल्पनार्थं यदन्नमित्यत्रानूद्यते ।

---

१ ग. ठ. 'ष्टेऽर्थे । २ ठ यत्किंचिद्यदि° । ३ ख. ङ. ञ. ड. ढ. ण. नाम स° । ४ ख. ञ. °विदोऽन्नं ।

तद्वा एतदित्याद्युत्तरवाक्यस्य पूर्ववाक्यादर्थभेदाभावमाशङ्क्याऽऽह—प्राणस्येति । प्राणशब्दं विहायानशब्दप्रयोगे तात्पर्यमाह—सर्वप्रकारेति । अन चेष्टायामितिधातुजन्यस्यानशब्दस्योपादानं सर्वप्रकारचेष्टया प्राणस्य व्याप्तिगुणप्रदर्शनार्थम् । तथा च यः कोऽपि दहति शोषयति प्लावयति वा स सर्वोऽपि प्राण एवेति युक्तं प्राणस्यान इति नामेत्यर्थः । प्रत्यक्षं पूर्वोक्तधातुजैन्मनामेति यावत् । उक्तमेवार्थं समर्थयते—प्रादीति । अनशब्दस्येति शेषः । न प्राणस्य सर्वचेष्टाव्याप्तिरित्येवकारार्थः । तथा च प्राणादिशब्दोपादाने विशेषव्याप्तिरेवेति स्थिते सतीत्यर्थः । अन इति प्रत्यक्षमिदं नाम सर्वान्नानामत्तुर्नामग्रहणमिति संबन्धः । तदेव व्याचष्टे—सर्वान्नानामिति । ततश्च प्राणशब्दस्य प्राणविदः सर्वमन्नं चेत्तद्विदुषो भक्ष्याभक्ष्यविभागासिद्धौ तद्विषयं शास्त्रं विरुध्येतेत्याशङ्क्याऽऽध्यात्मिकं रूपं हित्वाऽऽधिदैविकेन रूपेण तस्य सर्वान्नत्वे विभागशास्त्रमाध्यात्मिकपरिच्छेदविषयत्वेनाविरुद्धमित्याह—प्राणभूतत्वादिति । प्राणभूतो विद्वानित्यत्र श्रुत्यन्तरं संवादयति—प्राणादिति ॥ १ ॥

स होवाच किं मे वासो भविष्यतीत्याप इति होचु-
स्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः
परिदधति लम्भुको ह वासो भवत्यनग्नो ह भवति ॥२॥

स होवाच पुनः प्राणः । पूर्ववदेव कल्पना । किं मे वासो भविष्यतीत्याप इति होचुर्वागादयः । यस्मात्प्राणस्य वास आपस्तस्माद्वा एतदशिष्यन्तो भोक्ष्यमाणा भुक्तवन्तश्च ब्राह्मणा विद्वांस एतत्कुर्वन्ति । किम् । अद्भिर्वासस्थानीयाभिः पुरस्ताद्भोजनात्पूर्वमुपरिष्टाच्च भोजनादूर्ध्वं च परिदधति परिधानं कुर्वन्ति मुख्यैस्य प्राणस्य लम्भुको लम्भनशीलो वासो ह भवति । वाससो लब्धैव भवतीत्यर्थः । अनग्नो ह भवति । वाससो लम्भुकत्वेनार्थसिद्धैवानग्नतेत्यनग्नो ह भवतीत्युत्तरीयवान्भवतीत्येतत् ।

प्राणविद्याङ्गत्वेनान्नदृष्टिरुपदिष्टा । संप्रति तदङ्गत्वेन वासोदृष्टिं प्रस्तौति—स होवाचेति । अत्रापि प्राणस्य प्रष्टृत्वं वागादीनां प्रतिवक्तृत्वं च कल्पितमेवेत्याह—पूर्ववदिति । अपां प्राणं प्रति वासोरूपत्वे गमकमाह—यस्मादिति । वासोदृष्टिफलमाचष्टे—लम्भुक इति । अनग्नो ह भवतीत्यस्य पौनरुक्त्यमाशङ्क्यार्थविशेषमाह—वाससइति ।

---

१ क. °अन्यना° । २ ङ. °ख्यप्रा° । ३ ग. घ. ङ. च. ञ. ट. ठ. ड. ढ. ण. वासो ।

भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं शुद्ध्यर्थं विज्ञातं तस्मिन्प्राणस्य वास इति दर्शनमात्रमिह विधीयते । अद्भिः परिदधतीति[2] नाऽऽचमनान्तरम् । यथा लौकिकैः प्राणिभिरद्यमानमन्नं प्राणस्येति दर्शनमात्रं तद्वत्किं मेऽन्नं किं मे वास इत्यादिप्रश्नप्रतिवचनयोस्तुल्यत्वात् । यद्याचमनपूर्वं तादर्थ्येन क्रियेत तर्हि कृम्याद्यन्नमपि प्राणस्य भक्ष्यत्वेन विहितं स्यात् । तुल्ययोर्विज्ञानार्थयोः प्रश्नप्रतिवचनयोः प्रकरणस्य विज्ञानार्थत्वादर्धजरतीयो न्यायो न युक्तः कल्पयितुम् ।

आचमनान्तरं प्राणविदो विधीयत एवंविदशिष्यन्नाचामेदिति श्रुतेरित्याशङ्क्याऽऽह—भोक्ष्यमाणस्येति । आदिपदेन[5] प्रतिवचने गृह्येते । सर्वप्राणिभोग्येऽन्ने तस्यान्नमिति-दृष्टिवदाचमनीयास्वप्सु तस्य विधीयते वासोदृष्टिरित्युक्तं व्यतिरेकद्वारा विवृणोति—यदीति । तादर्थ्येनानन्नतार्थत्वेनेति यावत् । अथ पूर्वमन्नदृष्टिरेव विधीयते सर्वान्न-भक्षणस्य प्रमाणविरुद्धत्वादिह त्वपूर्वमाचमनमविरोधाद्विधीयतामित्याशङ्क्याऽऽह—तुल्ययोरिति ।

यत्तु प्रसिद्धमाचमनं प्रायत्यार्थं प्राणस्यान्नमतार्थं च न भवतीत्युच्यते न तथा वयमाचमनमुभयार्थं ब्रूमः । किं तर्हि प्रायत्यार्थाचमनसाधनभूता आपः प्राणस्य वास इति दर्शनं चोद्यत इति ब्रूमः । तत्राऽऽचमनस्योभयार्थत्वप्रसङ्गदोषचोदनाऽनुपपन्ना । वासोऽर्थ एवाऽऽचमने तद्दर्शनं स्यादिति चेत् । न । वासोज्ञानार्थवाक्ये वासोर्थापूर्वाचमनविधाने तत्रान्नमतार्थत्वदृष्टिविधाने च वाक्यभेदः । आचमनस्य तदर्थत्वमन्यार्थत्वं चेति प्रमाणाभावात् ॥ २ ॥

एकस्याऽऽचमनस्य शुद्ध्यर्थत्वमन्नमतार्थत्वं च वक्तुमशक्यं विरोधादित्याशङ्क्याऽऽह—यत्त्विति । विरोधो यथा स्यात्तथेति शक्यम् । तर्हि कीदृगाचमनं विवक्षितमित्याह—किं तर्हीति । प्रयतस्य भावः प्रायत्यं तदर्था याऽऽचमनक्रिया तत्साधनभूतास्वप्सु वासःसंकल्पनं क्रियान्तरमत्र विधित्सितमित्याह—प्रायत्येति । क्रियाभेदे फलित-माह—तत्रेति । अन्यार्थास्वप्स्वन्यार्थत्वचिन्तने प्रमाणविरोधाद्विधियोगेन वासोर्थमा-चमनान्तरमेव विधेयं तत्र चान्नमतार्थत्वचिन्तनमुचितमिति शङ्कार्थः । वासोर्थापूर्वाचम-नविधाने तत्रान्नमतार्थत्वदृष्टिविधाने च वाक्यभेदप्रसङ्गात्प्रसिद्धाचमनसाधनभूतास्वप्सु

---

१ ङ. च. ठ. ड. निर्ज्ञातं । २ घ. ङ. ण. °ति चाऽऽच° । ३ ङ. च. ड. ढ. क्रियते । ४ ख. घ. ङ. ठ. ण. °दा क्रिया । ५ क. ग. घ. ङ. च. ठ. ड. ढ. ण. °णस्येति भ° । ६ क. ग. ङ. °न प्रश्नप्र° । ७ ग. ढ. °तार्थेने° । ८ च. छ. झ. ण. °र्थद° ।

वासोदृष्टिपरमेव च वाक्यमित्युत्तरमाह—नेत्यादिना । वासोर्थत्वमन्यार्थत्वं दृष्ट्यर्थत्वमित्युक्ते प्राणस्यैकस्य वाक्यस्याप्रमाणत्वप्रसङ्गादिति यावत् ॥ २ ॥

तद्धैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येनच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ३ ॥

तदेतत्प्राणदर्शनं स्तूयते । कथम् । तद्धैतत्प्राणदर्शनं सत्यकामो जाबालो गोश्रुतये नाम्ना वैयाघ्रपद्याय व्याघ्रपदोऽपत्यं वैयाघ्रपद्यस्तस्मै गोश्रुत्याख्यायोक्त्वोवाचान्यदपि वक्ष्यमाणं वचः । किं तदुवाचेत्याह—यद्यपि शुष्काय स्थाणव एतद्दर्शनं ब्रूयात्प्राणविज्जायेरन्नुत्पद्येरन्नेवास्मिन्स्थाणौ शाखाः प्ररोहेयुश्च पलाशानि पत्राणि, किमु जीवते पुरुषाय ब्रूयादिति ॥३॥

तद्धैतदित्यादि वाक्यं च विधानार्थं नापि फलवचनं तथा च व्यर्थमित्याशङ्क्याऽऽह—तदेतदिति । स्तुतिमेव प्रश्नपूर्वकं विवृणोति—कथमिति । जीवते पुरुषाय प्राणविद्यावदेतद्दर्शनं ब्रूयात्तदाऽस्मिन्महाफलं भवतीति किमु वक्तव्यमिति योजना ॥ ३ ॥

यथोक्तप्राणदर्शनविद इदं मन्थौदनरूपं कर्माऽऽरभ्यते—

अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्याꣳ रात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् ॥ ४ ॥

अथानन्तरं यदि महन्महत्त्वं जिगमिषेद्गन्तुमिच्छेन्महत्त्वं प्राप्तुं यदि कामयेतेत्यर्थः । तस्येदं कर्म विधीयते । महत्त्वे हि सति श्रीरुपनमते । श्रीमतो ह्यर्थप्राप्तं धनं ततः कर्मानुष्ठानं ततश्च देवयानं पितृयाणं वा पन्थानं प्रतिपत्स्यत इत्येतत्प्रयोजनमुररीकृत्य महत्त्वमेप्सोरिदं कर्म न विषयोपभोगकामस्य । तस्यायं कालादिविधिरुच्यते—अमावास्यायां दीक्षित्वा दीक्षित इव भूमिशयनादिनियमं कृत्वा तपोरूपं सत्त्ववचनं ब्रह्मचर्यमित्यादिधर्मवान्भूत्वे-

---

१ ख. ङ. ट. °प्येतच्छु° । २ ङ. °न्थाख्यक° । ३ घ. ङ च. ठ. °ङ्त्वप्राप्तिं यं° । ४ ङ. ङ. ठ. °नमूरी° ।

त्यर्थः । न पुनर्दैक्षमेव कर्मजातं सर्वमुपादत्ते । अतद्विकारत्वान्मन्थाख्यस्य कर्मणः । " उपसद्व्रती " इतिश्रुत्यन्तरात्पयोमात्रभक्षणं च शुद्धिकारणं तप उपादत्ते । पौर्णमास्यां रात्रौ कर्माऽऽरभते सर्वौषधस्य ग्राम्यारण्यानामोषधीनां यावच्छक्त्यल्पमल्पमुपादाय तद्वितुषीकृत्याऽऽममेव पिष्टं दधिमधुनोरौदुम्बरे कंसाकारे चमसाकारे वा पात्रे श्रुत्यन्तरात्प्रक्षिप्योपमथ्याग्रतः स्थापयित्वा ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावावसथ्य आज्यस्याऽऽवापस्थाने हुत्वा स्रुवेसंलग्नं मन्थे संपातमवनयेत्संस्रवमेवः पातयत् ॥ ४ ॥

गोदोहनवदधिकृताधिकारमिदं कर्म प्राणविदोऽस्मिन्नधिकारोऽस्तीत्याह—यथोक्तेति। अनन्तरं प्राणविद्यानिष्पत्तेरिति शेषः । वाक्यशेषं पूरयति—तस्येति । महत्त्वद्वारा विषयोपभोगकामुकस्य कर्मविधायि शास्त्रं श्येनादिशास्त्रवदनर्थफलमेवेत्याशङ्क्याऽऽह—महत्त्वे हीति । तस्येति प्रकृतमन्थाख्यकर्मोक्तिः । कालादित्यादिशब्दो द्रव्यादिसंग्रहार्थः । दैक्षं दीक्षायां भवं मौञ्ज्यम्यज्ञनादि न सर्वमेवायमनुतिष्ठति । प्रकृतिधर्मा हि विकृतावनुवर्तन्ते । प्रकृतिवद्विकृतिः कर्तव्येति न्यायात् । न चेदं कर्म कस्यचिद्विकृतिरतो यथोक्तधर्मवत्त्वमेवात्र विवक्षितमित्यर्थः । दीक्षित्वेत्यनेन विवक्षितं धर्मान्तरमाह—उपसदिति । उपसदो नामेष्टयः प्रवर्ग्याहःसु प्रसिद्धाः । तासु व्रतं पयोमात्रभक्षणं तदुपेतो भूत्वा मन्थं संपाद्य जुहोतीति वाजसनेयके समानप्रकरणे श्रवणादिति यावत् । पिष्टं कृत्वा तदाममपक्वमेव दधिमधुनोः संबन्धिपात्रे प्रक्षिप्येति संबन्धः । औदुम्बरत्वे नियमः । पात्रस्थाऽऽकारे तु विकल्पः । कथमश्रुतं पात्रमत्र कल्प्यते तत्राऽऽह—श्रुत्यन्तरादिति । औदुम्बरे कंसाकारे कंसे चमसे वेति वाजसनेये श्रवणात्सर्वशाखाप्रत्ययन्यायेनापेक्षितं पात्रमत्र गृहीतामित्यर्थः । आवसथसंबन्धी लौकिकोऽग्निरावसथ्यो विवक्षितो यस्मिन्नौपासनाख्यं कर्म क्रियते । आज्यस्य हुत्वेति संबन्धः । आवापस्थानमाहुतिप्रक्षेपप्रदेशो गृह्योक्तः ॥ ४ ॥

वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत्संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् ॥ ५ ॥

---

१ घ. ङ. च. ढ. ण. °न्मन्थक° । २ क. ख. ग. घ. च. ञ. ट. ण. °च्छक्त्याऽल्प° । ३ ढ. स्रुचि सं° । ४ ख. घ. ञ. ट. ण. °वल° । ५ ढ. ण. °मत्र पा° । ६ ग. मौण्डयाभ्य° । ७ क. ख. ग. छ. ञ. ट. ण. °बन्धं पा° । ८ ख. छ. ञ. पात्रं क° । ९ ख. ङ. ढ. ण. °किकाग्नि° ।

समानमन्यत् । वासिष्ठाय प्रतिष्ठायै संपद आयतनाय स्वाहेति प्रत्येकं तथैव संपातमवनयेद्धुत्वा ॥ ५ ॥

वासिष्ठाय स्वाहेत्यादिवाक्यं पूर्ववाक्येन(ण) तुल्यार्थमित्याह—समानमिति । तुल्यत्वमेव स्पष्टयति—वासिष्ठायेति । स्वाहेति मन्त्रं समुच्चार्य हुत्वेति संबन्धः । तथैव प्रथमहोमानन्तरमित्यर्थः ॥ ५ ॥

अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्यमो नामास्यमा हि ते सर्वमिदꣳ स हि ज्येष्ठः श्रेष्ठो राजाऽधिपतिः स मा ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ राज्यमाधिपत्यं गमयत्वहमेवेदꣳ सर्वमसानीति ॥ ६ ॥

अथ प्रतिसृप्याग्नेरीषदपसृप्याञ्जलौ मन्थमाधाय जपतीमं मन्त्रम् । अमो नामास्यमा हि ते । अम इति प्राणस्य नाम । अन्नेन हि प्राणः प्राणिति देह इत्यतो मन्थद्रव्यं प्राणस्यान्नत्वात्प्राणत्वेन स्तूयतेऽमो नामासीति । कुतः । यतोऽमा सह हि यस्मात्ते तव प्राणभूतस्य सर्वं समस्तं जगदिदमतः । स हि प्राणभूतो मन्थो ज्येष्ठः श्रेष्ठश्च । अत एवं च राजा दीप्तिमानधिपतिश्चाधिष्ठाय पालयिता सर्वस्य । स मा मामपि मन्थः प्राणो ज्यैष्ठ्यादिगुणपूगमात्मनो गमयत्वहमेवेदं सर्वं जगदसानि भवानि प्राणवत् । इतिशब्दो मन्त्रपरिसमाप्त्यर्थः ॥ ६ ॥

आहुत्यानन्तर्यमथशब्दार्थः । भवतु प्राणस्येदं नाम मन्थस्य तु कथं मन्त्रार्थत्वमित्याशङ्क्याऽऽह—अन्नेन हीति । प्रतिज्ञातेऽर्थे प्रश्नपूर्वकं हेतुमाह—कुत इति । अतश्चामो नामासीति पूर्वेण संबन्धः । हेतुं व्याचष्टे—यस्मादिति ॥ ६ ॥

अथ खल्वेतयर्चा पच्छ आचामति तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य भोजनमित्याचामति श्रेष्ठꣳ सर्वधातममित्याचामति तुरं भगस्य धीमहीति सर्वं पिबति निर्णिज्य कꣳसं चमसं वा पश्चादग्नेः

---

१ ग. ट. मन्त्रमु° । २ क. ग. घ. च. ञ. ट. ठ. °मतोऽमौ नामासीत्यर्थः । स° । ३ घ. ठ. °व रा° । ४ घ. ङ. च. ड. ण. °णो ज्येष्ठादि° । ५ क. ग. झ. ढ. °न्त्रस° । ६ ख. झ. ण. सप्रश्न°।

संविशति चर्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः
स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात् ॥ ७ ॥

अथानन्तरं खल्वेतया वक्ष्यमाणयर्चा पच्छः पादश्च आचामति भक्षयति, मैन्त्रस्यैकैकेन पादेनैकैकं ग्रासं भक्षयति । तद्भोजनं सवितुः सर्वस्य प्रसवितुः । प्राणमादित्यं चैकीकृत्योच्यते । आदित्यस्य वृणीमहे प्रार्थयेमहि मन्थरूपम् । येनान्नेन सावित्रेण भोजनेनोपभुक्तेन वयं सवितृस्वरूपापन्ना भवेमेत्यभिप्रायः । देवस्य सवितुरिति पूर्वेण संबन्धः । श्रेष्ठं प्रशस्यतमं सर्वान्नेभ्यः सर्वधातमं सर्वस्य जगतो धारयितृतममतिशयेन विधातृतममिति वा । सर्वथा भोजनविशेषणम् । तुरं त्वरं तूर्णं शीघ्रमित्येतत् । भगस्य देवस्य सवितुः स्वरूपमिति शेषः । धीमहि चिन्तयेमहि । विशिष्टभोजनेन संस्कृताः शुद्धात्मानः सन्त इत्यभिप्रायः । अथवा भगस्य श्रियः कारणं महत्त्वं प्राप्तुं कर्म कृतवन्तो वयं तद्धीमहि चिन्तयेमहीति सर्वं च मन्थलेपं पिबति निर्णिज्य प्रक्षाल्य कंसं कंसाकारं चमसं चमसाकारं वौदुम्बरं पात्रम् । पीत्वाऽऽचम्य पश्चादग्नेः प्राक्शिराः संविशति चर्मणि वाऽजिने स्थण्डिले केवलायां वा भूमौ । वाचंयमो वाग्यतः सन्नित्यर्थः । अप्रसाहो न प्रसह्यते नाभिभूयते स्वप्नाद्यनिष्टस्वप्नदर्शनेन यथा तथा संयतचित्तः सन्नित्यर्थः । स एवंभूतो यदि स्त्रियं पश्येत्स्वप्नेषु तदा विद्यात्समृद्धं ममेदं कर्मेति ॥ ७ ॥

अनन्तरं जपकर्मणः सकाशादिति शेषः । तदेव स्पष्टयति—मैन्त्रस्येति । मन्त्रस्यैकैकेन पादेन मन्थस्यैकैकं ग्रासं भक्षयतीति योजना । भोजनं मन्थरूपमिति संबन्धः । तत्कथं सवितुः स्यात्प्राणस्य हि मन्थद्रव्यमन्नमित्युक्तं तत्राऽऽह—प्राणमिति । उच्यते सवितुर्भोजनमिति शेषः । प्राणादित्ययोरेकत्वे फलितं वाक्यार्थमाह—आदित्यस्येति । मन्थरूपं तद्भोजनमिति पूर्वेण संबन्धः । प्रार्थनाविषयं भोजनमेव विशिनष्टि—येनेति । तस्यैव विशेषणान्तरं श्रेष्ठमित्यादि । स्थितिकारणत्वमुक्त्वा जनकत्वं पक्षान्तरमाह—अतिशयेनेति । जगद्धात्रीत्वं फलदाने ध्यातुः शैघ्र्यम् । किमिति भोजने कथ्यमाने ध्यानमुच्यते तत्राऽऽह—विशिष्टेति । शुद्धधीत्वं ध्यानकारणमुक्त्वा प्रकृतकर्मवत्प्रेप्सितमहत्त्वे हेतुत्वादपि ध्यानमनुष्ठेयमित्याह—अथवेति । सावित्रं रूपमुक्तं नियमेनौदुम्बरं वैकल्पिताकारे विशेषः । पात्रं प्रक्षाल्य पिबतीति

---

१ ग. ङ. ङ. ढ. मन्थस्यै° । २ क. °कैकया° । ३ ङ. द. °मही° । ४ ख. घ. ङ. ञ. ङ. ढ. °ग्ने त° । ५ ग. मन्थस्ये° ।

संबन्धः । मन्थलेपं पात्रं प्रक्षाल्य पीत्वाऽऽचमनपूर्वकमग्नेः पश्चिमभागे कृष्णाजिनव्यवहितायां केवलायां वा भूमौ प्राक्शिरा भूत्वा शयीतेत्याह-पीत्वेति । शयानस्य कर्तव्यं दर्शयति—वाचंयम इति । तस्य स्वप्ने कथंचिदुत्तमस्त्रीदर्शने शुभागमः सूच्यत इत्याह—स एवंभूत इति ॥ ७ ॥

तदेष श्लोको यदा कर्मसु काम्येषु स्त्रियꣳ स्वप्नेषु
पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने
तस्मिन्स्वप्ननिदर्शने ॥ ८ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य द्वितीयः खण्डः ॥२॥

तदेतस्मिन्नर्थ एष श्लोको मन्त्रोऽपि भवति । यदा कर्मसु काम्येषु कामार्थेषु स्त्रियं स्वप्नेषु स्वप्नदर्शनेषु स्वप्नकालेषु[1] वा पश्यति समृद्धिं तत्र जानीयात् । कर्मणां फलनिष्पत्तिर्भविष्यतीति जानीयादित्यर्थः । तस्मिन्स्त्र्यादिप्रशस्तस्वप्नदर्शने सतीत्यभिप्रायः । द्विरुक्तिः कर्मसमाप्त्यर्था[2] ॥ ८ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य द्वितीयः खण्डः ॥२॥

॥ ८ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
पञ्चमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

(अथ पञ्चमाध्यायस्य तृतीयः खण्डः) ।

—:⊙-⊙-⊙-⊙:—

ब्रह्मादिस्तम्बपर्यन्ताः संसारगतयो वक्तव्या वैराग्यहेतोर्मुमुक्षूणामित्यत आख्यायिकाऽऽरभ्यते—

श्वेतकेतुर्हाऽऽरुणेयः पञ्चालानाꣳ समितिमेयाय तꣳ
ह प्रवाहणो जैवलिरुवाच कुमारानु त्वाऽशिषत्पिते-
त्यनु हि भगव इति ॥ १ ॥

श्वेतकेतुर्नामतो हेत्यैतिह्यार्थः । अरुणस्यापत्यमारुणिस्तस्यापत्यमारुणेयः पञ्चालानां जनपदानां समितिं सभामेयायाऽऽजगामं[3] । तमागतवन्तं

---

१ घ. ठ. °षु प° । २ घ. ङ. च. ढ. °र्मपरिस° । ३ ख. ग. ङ. ञ. ट. ड. ढ. °याय ज° । ४ ख. ग. ङ. ढ. ठ. ड. ढ. ण. 'म । तं ग° ।

ह प्रवाहणो नामतो जीवलस्यापत्यं जैवलिरुवाचोक्तवान् । हे कुमारानु त्वा त्वामशिषदन्वशिषत्पितेति । किमनुशिष्टस्त्वं पित्रेत्यर्थः । इत्युक्तः स आहानु ह्यनुशिष्टोऽस्मि भगव इति सूचयन्नाह ॥ १ ॥

प्राणविद्या तदङ्गकर्म चेत्युभयमुक्तमिदानीमग्निविद्यामाख्यातुकामस्तावदाख्यायिकातात्पर्यमाह—ब्रह्मादीति । तासां च वक्तव्यत्वे हेतुमाह—वैराग्यहेतोरिति । राजा कुमारेति संबोधयन्नभिमानं श्वेतकेतोरपनिनीषति ॥ १ ॥

वेत्थ यदितोऽधि प्रजाः प्रयन्तीति न भगव इति वेत्थ यथा पुनरावर्तन्तं३ इति न भगव इति वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्तना३ इति न भगव इति ॥ २ ॥

तं होवाच यद्यनुशिष्टोऽसि वेत्थ यदितोऽस्माल्लोकादध्यूर्ध्वं यत्प्रजाः प्रयान्ति यद्गच्छन्ति तत्किं जानीष इत्यर्थः । न भगव इत्याहेतरो न जानेऽहं तद्यत्पृच्छसि । एवं तर्हि वेत्थ जानीषे यथा येन प्रकारेण पुनरावर्तन्त इति । न भगव इति प्रत्याह । वेत्थ पथोमार्गयोः सहप्रयाणयोर्देवयानस्य पितृयाणस्य च व्यावर्तनमितरेतरवियोगस्थानं सह गच्छतामित्यर्थः । न भगव इति ॥२॥

यथेत्यस्यार्थमाह—येनेति । विद्वदविदुषोस्तुल्यमार्गयोः सतोर्द्वौ मार्गौ तयोर्मध्ये देवयानस्येत्यादि योज्यम् । उक्तं वाक्यार्थं संक्षिपति—इतरेतरेति । विदुषां च कर्मिणां च मार्गद्वयमधिकृत्य सह प्रस्थितानां यत्रा मिथो वियोगो भवति तत्किं वेत्थेत्यर्थः ॥२॥

वेत्थ यथाऽसौ लोको न संपूर्यत३ इति न भगव इति वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति नैव भगव इति ॥ ३ ॥

वेत्थ यथाऽसौ लोकः पितृसंबन्धी यं प्राप्य पुनरावर्तन्ते बहुभिः प्रयद्भिरपि येन कारणेन न संपूर्यत इति । न भगव इति प्रत्याह । वेत्थ यथा येन क्रमेण पञ्चम्यां पञ्चसंख्याकायामाहुतौ हुतायामाहुतिनिर्वृत्ता आहुतिसाधनाश्चाऽऽपः पुरुषवचसः पुरुष इत्येवं वचोऽभिधानं यासां हूयमानानां क्रमेण षष्ठाहुतिभूतानां ताः पुरुषवचसः पुरुषशब्दवाच्या भवन्ति पुरुषा-

१ ण. °हिपतेति किं° । २ क. °कायास्तात्प° । ३ ङ. ङ. ढ. सप्र° । ४ ञ. °षां क° ।

ख्यां लभन्त इत्यर्थः । इत्युक्तो नैव भगव इत्याह । नैवाहमत्र किंचन [1]जानामीत्यर्थः ॥ ३ ॥

पितृलोकसंबन्धिनं लोकमेव व्याकरोति-यं प्राप्येति । आहुतिनिर्वृत्ता इत्यस्या(स्य) व्याख्यानमाहुतिसाधनाश्चेति । अपूर्वरूपागामपां भूतान्तरसमुच्चयार्थकारः । अथवा पयोघृतादिरूपेणाऽऽहुतिं साधयन्तीति चाऽऽहुत्या पुनरपूर्वात्मना निष्पन्ना इत्यर्थः । क्रमेणेति । श्रद्धासोमवृष्ट्यन्नरेतसां हवनद्वारेणेति यावत् । षष्ठाहुतिभूतानामन्त्येष्टि-विधानेन शरीराहुतिद्वारा सूक्ष्मतां गतानामित्यर्थः ॥ ३ ॥

[2]अथानु किमनुशिष्टोऽवोचथा यो हीमानि न विद्यात्कथꣳ सोऽनुशिष्टो ब्रुवीतेति स हाऽऽयस्तः पितुरर्धमेयाय तꣳ होवाचाननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाऽशिषमिति ॥ ४ ॥

अथैवमज्ञ. सन्किमनु कस्मात्त्वमनुशिष्टोऽस्मीत्यवोचथा उक्तवानसि । यो हीमानि मया पृष्टान्यर्थजातानि न विद्यान्नैं विजानीयात्कथं स विद्वत्स्वनु-शिष्टोऽस्मीति ब्रुवीत । इत्येवं स श्वेतकेतू राज्ञाऽऽयस्त आयासितः सन्पितुर्धं स्थानमेयाँयाऽऽगतवांस्तं च पितरमुवाचाननुशिष्यानुशासनमकृत्वैव मा मां किल भगवान्समावर्तनक लेऽब्रवीदुक्तवाननु त्वाऽशिषमन्वशिषं त्वामिति ॥४॥

त्वत्पृष्टार्थजातातिरिक्तविषयमनुशासनं ममास्तीत्यनुशिष्टोऽस्मीत्युक्तमित्याशङ्क्याऽऽह—यो हीति ॥ ४ ॥

पञ्च मा राजन्यबन्धुः प्रश्नानप्राक्षीत्तेषां नैकंचना-शकं विवक्तुमिति स होवाच यथा मा त्वं तदैतान-वदो यथाऽहमेषां नैकंचन वेद यद्यहमिमानवेदिष्यं कथं ते नावक्ष्यमिति ॥ ५ ॥

स ह गौतमो राज्ञोऽर्धमेयाय तस्मै ह प्राप्तायार्हां चकार स ह प्रातः सभाग उदेयाय तꣳ होवाच मानुषस्य भगवन्गौतम वित्तस्य वरं वृणीथा इति

---

१ ङ. °जान इत्य° । २ क. ण. ङ. ज. झ. ठ. ड, त. थ. अथ नु । ३ ग. ठ. °न जा° । ४ क. ख. च. ञ. ङ. ण. °याय ग° ।

स होवाच तवैव राजन्मानुषं वित्तं यामेव कुमारस्यान्ते वाचमभाषथास्तामेव मे ब्रूहीति स ह कृच्छ्री बभूव ॥ ६ ॥

यतः पञ्च पञ्चसंख्याकान्प्रश्नान्राजन्यबन्धू राजन्या बन्धवोऽस्येति राजन्यबन्धुः स्वयं दुर्वृत्त इत्यर्थः । अपाक्षीत्पृष्टवांस्तेषां प्रश्नानां नैकंचनैकमपि नाशकं न शक्तवानहं विवक्तुं विशेषेणार्थतो निर्णेतुमित्यर्थः । स होवाच पिता यथा मा मां वत्स त्वं तदाऽऽगतमात्रं एवैतान्प्रश्नानवद उक्तवानसि तेषां नैकंचनाशकं विवक्तुमिति तथा मां जानीहि, त्वदीयाज्ञानेन लिङ्गेन मम तद्विषयमज्ञानं जानीहीत्यर्थः । कथं, यथाऽहमेषां प्रश्नानामेकंचनैकमपि न वेद न जान इति । यथा त्वमेवौद्दालकिस्तान्प्रश्नान न जानीषे तथाऽहमप्येतान्न जान इत्यर्थः । अतो मय्यन्यथाभावो न कर्तव्यः । कुत एतदेवं यतो न जाने यद्यहमिमान्प्रश्नानवेदिष्यं विदितवानस्मि कथं ते तुभ्यं पिताय पुत्राय समावर्तनकाले पुरा नावक्ष्यं नोक्तवानस्मीत्युक्त्वा स ह गौतमो गोत्रतो राज्ञो जैवलेरर्धं स्थानमेयाय गतवान् । तस्मै ह गौतमाय प्राप्तायार्हामर्हणां चकार कृतवान् । स च गौतमः कृतातिथ्य उषित्वा परेद्युः प्रातःकाले सभागे सभां गते रैवतेयुदेयाय । भजनं भागः पूजा सेवा सह भागेन वर्तमानो वा सभागः पूज्यमानोऽन्यैः स्वयं गौतम उदेयाय राजानमुद्गतवान् । तं होवाच गौतमं राजा मानुषस्य भगवन्गौतम मनुष्यसंबन्धिनो वित्तस्य ग्रामादेर्वरं वरणीयं कामं वृणीथाः प्रार्थयेथाः । स होवाच गौतमस्तवैव तिष्ठतु राजन्मानुषं वित्तम् । यामेव कुमारस्य मम पुत्रस्यान्ते समीपे वाचं पञ्चप्रश्नलक्षणामभाषथा उक्तवानसि तामेव वाचं मे मह्यं ब्रूहि कथयेत्युक्तो गौतमेन राजा स ह कृच्छ्री दुःखी बभूव । कथं त्विदमिति ॥ ५ ॥ ६ ॥

अननुशिष्य त्वामन्वशिषमिति कथमुक्तवानस्मीत्याशङ्क्याऽऽह—यत इति । नैकं-

---

१ ङ. ण. °वो यस्ये° । २ क. ग. च. ट. °गममात्रमेवै° । ३ ठ. °त्रमेवै° । ४ ग. ट. °मेतान्न° । ५ ख. ण. °वाङ्क न जा° । ६ क. ग. च. ठ. °तो य° । ७ ख. ग. च. ज. ट. ड. ण. °र्हणं च° । ८ ग. घ. ङ. ट. ठ. ढ. सभाग° । ९ ग. च. ढ. ड. ढ. राजन्युदे° । १० घ. च. ट. ड. °थं त्विद° ।

चनेत्युक्तमेव नञ्पदं नाशकमिति संबन्धं दर्शयितुं पुनरुपात्तम्। अतो मां प्रति तव मिथ्यावादिता सिद्धेति शेषः। पिता स्वकीयमिथ्यावादित्वशङ्कां परिहरति—स होवाचेति। यथा मा त्वमित्यादिवाक्यं पूरयित्वा व्याख्यायानन्तरवाक्यमाकाङ्क्षापूर्वकमुत्थापयति—कथमित्यादिना। तद्वचाचष्टे—यथेति। अज्ञानाविशेषोऽतःशब्दार्थः। अन्यथाभावो ज्ञातेऽपि विषये तवानुक्तिरिति यावत्। त्वदीयमज्ञानं कुतो हेतोर्मया ज्ञातव्यमित्याशङ्कामुद्धाव्यानन्तरवाक्येनोत्तरमाह—कुत इत्यादिना। अतस्तव पात्रभूतस्यानुपदेशान्मदीयमज्ञानं ज्ञातव्यमिति शेषः। अर्हणां योग्यां पूजामित्यर्थः। समागपदं सप्तम्यन्तं राजविषयं प्रथमान्तं गौतमविषयमिति भेदः। गौतममागतं योगक्षेमार्थिनं बुद्ध्वा राजा प्रसन्नः सन्नुक्तवानित्याह—तं होवाचेति। तर्हि कृतकृत्यस्य तव किमित्यागमनमित्याशङ्क्याऽऽह—यामेवेति। कृच्छ्रीभावमभिनयति—कथमिति ॥ ५ ॥ ६ ॥

तꣳ ह चिरं वसेत्याज्ञापयांचकार तꣳ होवाच यथा मा त्वं गौतमावदो यथेयं न प्राक्त्वत्तः पुरा विद्या ब्राह्मणान्गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ॥ ७ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

सं ह कृच्छ्रीभूतोऽप्रत्याख्येयं ब्राह्मणं मन्वानो न्यायेन विद्या वक्तव्येति मत्वा तं ह गौतमं चिरं दीर्घकालं वसेत्येवमाज्ञापयांचकाराऽऽज्ञप्तवान्, यत्पूर्वं प्रत्याख्यातवान्राजा विद्यां यच्च पश्चाच्चिरं वसेत्याज्ञप्तवान्, तन्निमित्तं ब्राह्मणं क्षमापयति हेतुवचनोक्त्या। तं होवाच राजा सर्वविद्यो ब्राह्मणोऽपि सन्यथा येन प्रकारेण मा मां हे गौतमावदस्त्वं तामेव विद्यालक्षणां वाचं मे ब्रूहीत्यज्ञानात्तेन त्वं जानीहि। तत्रास्ति वक्तव्यं यथा येन प्रकारेणेयं विद्या प्राक्त्वत्तो ब्राह्मणान्न गच्छति, नःगतवती न च ब्राह्मणा अनया विद्ययाऽनुशासितवन्तः, तथैतत्प्रसिद्धं लोके यतस्तस्मादु पुरा पूर्वं सर्वेषु लोकेषु क्षत्रस्यैव क्षत्रजातेरेवानया विद्यया प्रशासनं प्रशास्तृत्वं शिष्याणामभूद्भूव।

---

१ ग. ट. °ज्ञातावि°। २ ग. घ. ङ. च. ठ. ड. ढ. स कुं°। ३ ङ. ड. क्षमयति। च. ठ. ड. क्षामयति। ४ घ. ङ. च. ज. ठ. °नुशिष्टव°।

क्षत्रियपरम्परयैवेयं विद्यैतावन्तं कालमागता । तथाऽप्यहमेतां तुभ्यं वक्ष्यामि त्वत्संप्रदानादूर्ध्वं ब्राह्मणान्गामिष्यति । अतो मया यदुक्तं तत्क्षन्तुमर्हसीत्युक्त्वा तस्मै होवाच विद्यां राजा ॥ ७ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

गौतमस्य वचनं राज्ञो दुःखीभावकारणं तर्हि प्रत्याख्यायतामित्याशङ्क्याऽऽह—स होति । किमिति तर्हि चिरं वसेत्युक्तवानित्यत आह—न्यायेनेति । संवत्सरं वसेति यावत् । वक्तव्या विद्येति शेषः । कथं राज्ञो ब्राह्मणं प्रत्याज्ञां कुर्वतो न प्रत्यवायः स्यादित्याशङ्क्याऽऽह—यत्पूर्वमिति । प्रत्याख्यानादिविषयं हेतुवचनम् । न केवलं विद्यावशादेव श्रैष्ठ्यं किंतु जातितोऽपीत्यपेरर्थः । तर्हि ब्रूहि तां वाचमित्याशङ्क्याऽऽह—तत्रेति । विद्याप्रवचने प्रस्तुते सतीति यावत् । यथेत्यस्यापेक्षितं पूरयति—तथेति । प्रसिद्धमेव स्फोरयति—तस्मादिति । ब्राह्मणानामनया विद्यया प्रशास्तृत्वस्य प्रागभावादिति यावत् । इतिशब्दोपात्तमर्थं कथयति—क्षत्रियेति । उक्तप्रत्याख्यानादिकारणमतःशब्दार्थः ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

(अथ पञ्चमाध्यायस्य चतुर्थः खण्डः) ।

पञ्चम्यामाहुतावाप इत्ययं प्रश्नः प्राथम्येनापाक्रियते । तदपाकरणमन्वितरेषामपाकरणमनुकूलं भवेदिति । अग्निहोत्राहुत्योः कार्यारम्भो यः स उक्तो वाजसनेयके—" तं प्रति प्रश्नाः । उत्क्रान्तिराहुत्योर्गतिः प्रतिष्ठा तृप्तिः पुनरावृत्तिर्लोकं प्रत्युत्थायी " इति । तेषां चापाकरणमुक्तं तत्रैव—ते वा एते आहुती हुते उत्क्रामतस्ते अन्तरिक्षमाविशतस्ते अन्तरिक्षमेवाऽऽहवनीयं कुर्वाते वायुं समिधं मरीचीरेव शुक्लामाहुतिं ते अन्तरिक्षं तर्पयतस्ते तत उत्क्रामत इत्याद्येवमेव पूर्ववदिदं तर्पयतस्ते तत आवर्तेते । इमामाविश्य तर्पयित्वा पुरुषमाविशतः । ततः स्त्रियमाविश्य लोकं प्रत्युत्थायी भवति " इति । तत्राग्निहोत्राहुत्योः कार्यारम्भमात्रमेवमकारं भवतीत्युक्तम् । इह तु तं कार्यारम्भमग्निहोत्रापूर्वविपरिणामलक्षणं पञ्चधा प्रविभज्याग्नित्वेनोपासनमुत्तरमार्गप्रतिपत्तिसाधनं विधित्सन्नाह—

असौ वाव लोको गौतमाग्निस्तस्याऽऽदित्य

---

१ क. ग. ट. °क्तव्यवि° । २ क. ग. ट. ङ. ण. °र्वेप° ।

एव समिद्रश्मयो धूमोऽहरर्चिश्चन्द्रमा अ-
ङ्गारा नक्षत्राणि विस्फुलिङ्गाः ॥ १ ॥

असौ वाव लोको गौतमाग्निरित्यादि। इह सायंप्रातरग्निहोत्राहुती हुते पथ-आदिसाधने श्रद्धापुरःसरे आहवनीयाग्निसमिद्धूमार्चिरङ्गारविस्फुलिङ्गभा-विते कर्त्रादिकारकभाविते चान्तरिक्षक्रमेणोत्क्रम्य द्युलोकं प्रविशन्त्यौ सूक्ष्म-भूते अप्समवायित्वादप्शब्दवाच्ये श्रद्धाहेतुत्वाच्च श्रद्धाशब्दवाच्ये तयोरधि-करणोऽग्निरन्यच्च तत्संबन्धं समिदादीत्युच्यते। या चासावग्न्यादिभावनाऽऽ-हुत्योः साऽपि तथैव निर्दिश्यते। असौ वावँ लोकोऽग्निर्हे गौतम यथाऽ-ग्निहोत्राधिकरणमाहवनीय इह। तस्याग्नेर्द्युलोकाख्यस्याऽऽदित्य एव समि-त्तेन हीद्धोऽसौ लोको दीप्यते। अतः समिन्धनात्समिदादित्यः। रश्मयो धूमस्तदुत्थानात्, समिधो हि धूम उत्तिष्ठति। अहरार्चिः प्रकाशसामा-न्यात्, आदित्यकार्यत्वाच्च चन्द्रमा अङ्गाराः। अहःप्रशमेऽभिव्यक्तेः। अर्चिषो हि प्रशमेऽङ्गारा अभिव्यज्यन्ते। नक्षत्राणि विस्फुलिङ्गाश्चन्द्रमसोऽ-वयवा इव विप्रकीर्णत्वसामान्यात् ॥ १ ॥

ननु यथाप्रश्नमेव प्रतिवचनमुचितं पञ्चमं तु प्रश्नं प्राथम्येन प्रतिवदता क्रमो निरा-कृतस्तत्र किं कारणमत आह—पञ्चम्यामिति। अर्थक्रममनुसृत्य पाठक्रमोऽभिधा-तव्य इत्यर्थः। ननु वाजसनेयकेऽग्निहोत्रप्रकरणेऽग्निहोत्राहुत्यपूर्वपरिणामं जगादित्युक्तं तदेवेहापि विवक्षयत इति चेत्किमनेन पिष्टपेषणन्यायेनेत्याशङ्क्यार्थभेदं वक्तुमग्निहोत्र-प्रकरणस्थितमर्थमनुवदति—अग्निहोत्राहुत्योरिति। उक्तप्रकारमेव प्रदर्शयन्प्रथमं याज्ञवल्क्यस्य जनकं प्रति षट् प्रश्नानुत्थापयति—तं प्रतीति। कार्यारम्भस्तच्छब्दा-र्थः। अग्निहोत्राहुत्यन्तापूर्वपरिणामो जगादित्थ। तत्राग्निहोत्रे सायं प्रातश्च हुतयो-राहुत्योरस्माल्लोकादुत्क्रान्तिः। उत्क्रान्तयोः परलोकं प्रति गतिः। गतयोस्तत्र प्रतिष्ठा। प्रतिष्ठितयोः स्वाश्रये संपाद्यमाना तृप्तिः। तृप्तिमापाद्यावस्थितयोः पुनरिमं लोकं प्रत्यावृत्तिः। आवृत्तयोराश्रयः पुमान्कथममुं लोकं प्रत्युत्थानशीलो भवतीति कार्यारम्भमधिकृत्य षट् प्रश्नाः प्रवृत्ता इत्यर्थः। तत्रैव वाजसनेयके याज्ञवल्क्यं प्रति जनकस्य प्रतिवचनं दर्शयति—तेषां चेति। अपूर्वरूपे खल्वाहुती यज-मानमुत्क्रामन्तं परिवेष्टयोत्क्रामतः। ते च धूमादिना यजमानेऽन्तरिक्षमाविशति

---

१ ङ. च. ठ. ढ. लोक इत्या°। २ क. ग. च. ट. °रिक्षं क्र°। ३ ङ. ढ. °म्य सू°। ४ ख. घ. च. ज. °बद्धं स°। ५ घ. च. ठ. ण. °व द्युलो°। ६ क. अहूनः प्र°। ७ क. °वक्षितमिति।

तदाश्रितत्वात्तदाविशतः । ते पुनरन्तरिक्षस्थयजमानानुकूलतया स्थिते स्वयमन्तरिक्षाधिकरणे तदाहवनीयमिव कुर्वाते । आहुत्यधिकरणस्याऽऽहवनीयत्वात् । तत्र वायुं समिधमिव कुरुतः । वायुनाऽन्तरिक्षस्य समिध्यमानत्वात् । शुङ्कां शुद्धामाहुतिमिव मरीचीरेवाऽऽदधाते । मरीचीनामन्तरिक्षे व्याप्तत्वात् । ते चान्तरिक्षस्थे तन्निष्ठं यजमानं फलोन्मुखमादधाते । ते पुनरन्तरिक्षादुत्क्रामति यजमाने सहोत्क्रामतः । यजमाने च द्युलोकमाविशति सहाऽऽविशतः । तमाविश्य तमेवाऽऽहवनीयं कुर्वाते आदित्यं समिधमित्याद्यन्तरिक्षवदेवोक्तम् । यथा वाऽऽहुती पूर्वमन्तरिक्षं तर्पयत इत्युक्तं तथैव द्युलोकस्थयजमानं फलदानेन सुखिनमातन्वाते । ते चाऽऽरब्धक्षये ततो द्युलोकाद्यजमाने पृथिवीमाविशत्यब्भूते सहाऽऽवेशते । पृथिवीं चाऽऽविश्य व्रीह्यादिना स्वाश्रयं श्लेषयित्वा रेतःसिचं पुरुषमाश्रयद्वारेणाऽऽविशतः । पुरुषाच्च रेतोद्वारा द्वितीयां प्रकृतिमाविश्य गर्भीभूतं स्वाश्रयं कर्मानुष्ठानयोग्यं देहभागिनमापादयतः । ततोऽसौ पारलौकिकं कर्मानुष्ठायान्ते लोकं प्रत्युत्थानशीलो भवति । इति सर्वं जनकेनोक्तमित्यर्थः । तथाऽपि कथमर्थभेदसिद्धिरित्याशङ्क्याह[6]—तत्रेति । वाजसनेयकं सप्तम्यर्थः । प्रकृतश्रुतेरर्थविशेषं दर्शयति—इह त्विति । पञ्चधा द्युपर्जन्यपृथिवीपुरुषयोषित्प्रकारैरिति यावत् । पञ्चाग्निसंबन्धमवतार्य प्रथमपर्यायस्य तात्पर्यमाह—इहेति । अयं लोको भूलोकस्तस्मिन्नित्यर्थः । आहुत्योरप्सववायित्वसिद्ध्यर्थं विशिनष्टि—पयआदीति । तयोः श्रद्धात्वसिद्ध्यर्थं श्रद्धापुरःसरे इत्युक्तम् । तयोरधिकरणोऽग्निरित्यादिकल्पनोपयोगित्वेन विशेषणान्तरमादत्ते—आहवनीयेति । तयोः स्वातन्त्र्यं परिहरति—कर्त्रादीनि । अधिकरणशब्दो भावप्रधानो धर्मिपरः । कल्पनिको द्युलोकौरुष्योऽग्निसंबन्धमिति तच्छब्दोऽग्निविषयः । अन्यच्चेत्युक्तं स्पष्टयति—समिदादीति । आदिशब्दो धूमार्चिरङ्गारादिविषयः । पर्यायतात्पर्यमुक्त्वाऽक्षराणि व्याकरोति—असावित्यादिना । इहेत्येतल्लोकनिर्देशः पूर्वेण संबध्यते । तदुत्थानादित्यत्र तच्छब्देनाऽऽदित्यो गृहीतः ॥ १ ॥

तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः
सोमो राजा संभवति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य चतुर्थः खण्डः ॥४॥

तस्मिन्नेतस्मिन्यथोक्तलक्षणेऽग्नौ देवा यजमानप्राणा अग्न्यादिरूपा

१ ख. ग. छ. अ. ट. ण. शुद्धा° । २ क. ख. छ. अ. ण. °रिक्षे च यदे° । ३ ख. ण. °र्थे वि° । ४ ख. ग. छ. अ. ट. ण. °यं सप्तम्यर्थः । ५ क. ग. ढ. °काद्याख्योऽ° । ६ ख. छ°. ण, °वद्भमि° ।

अधिदैवतम् । श्रद्धामग्निहोत्राहुतिपरिणामावस्थारूपाः सूक्ष्मा आपः श्रद्धाभाविताः श्रद्धा उच्यन्ते । " पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति " इत्यपां होम्यतया प्रश्ने श्रुतत्वात् । " श्रद्धा वा आपः श्रद्धामेवाऽऽरभ्य प्रणीय प्रचरन्ति " इति च विज्ञायते । तां श्रद्धामजूषां जुह्वति । तस्या आहुतेः सोमो राजाऽपां श्रद्धाशब्दवाच्यानां द्युलोकाग्नौ हुतानां परिणामः सोमो राजा संभवति । यथर्ग्वेदादिपुष्परसा ऋगादिमधुकरोपनीतास्त आदित्ये यज्ञादिकार्यं[1] रोहितादिरूपलक्षणमारभन्त इत्युक्तं तथेमा अग्निहोत्राहुतिसमवायिन्यः सूक्ष्माः श्रद्धाशब्दवाच्या आपो द्युलोकमनुप्रविश्य चान्द्रं[2] कार्यमारभन्ते फलरूपमग्निहोत्राहुत्योः । यजमानाश्च तत्कर्तार आहुतिमया आहुतिभावनाभाविता आहुतिरूपेण कर्मणाऽऽकृष्टाः श्रद्धाप्समवायिनो द्युलोकमनुप्रविश्य सोमभूता भवन्ति । तदर्थं हि तैरग्निहोत्रं हुतम् । अत्र त्वाहुतिपरिणाम एव पञ्च अग्निसंबन्धक्रमेण प्राधान्येन विवक्षित उपासनार्थं न यजमानानां गतिः । तां त्वविदुषां धूमादिक्रमेणोत्तरत्र वक्ष्यति विदुषां चोत्तरां विद्याकृताम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

—○*○—

अध्यात्माधिदैवविभागेन देवान्विशदयति—यजमानेति । प्रत्ययविशेषत्वेन श्रद्धाया होम्यत्वानुपपत्तिरित्याशङ्क्य श्रद्धां व्याकरोति—अग्निहोत्रेति । किंच प्रश्नप्रतिवचनयोरेकार्थत्वात्प्रश्ने चापां होम्यतया श्रुतत्वात्प्रतिवचनेऽपि ताः श्रद्धाशब्दिता होम्यतया विवक्षिता इत्याह—पञ्चम्यामिति । अप्सु श्रद्धाशब्दस्य वृद्धव्यवहारप्रयोगाभावान्नैवमित्याशङ्क्याऽऽह—श्रद्धेति । कथमापः श्रद्धाशब्देन प्रसिद्धवदुच्यन्ते तत्राऽऽह—श्रद्धामिति । श्रद्धापूर्वकहोममुद्दिश्य पयःसोमाज्यादिसाधनं संपाद्य जुहोतीति तैत्तिरीयकाः पठन्ति । तथा चाप्सु श्रद्धाशब्दः संभवतीत्यर्थः । उक्तमर्थं दृष्टान्तेन स्पष्टयति—यथेत्यादिना । उक्तं मधुविद्यायामिति शेषः । चान्द्रं कार्यं चन्द्रसमीपस्थं तत्सदृशं शरीरमित्यर्थः । तथाऽपि यजमानानां कथं फलत्व(लित्व)मत आह—यजमानाश्चेति । आहुती तच्छब्दवाच्ये प्राधान्यं मयडर्थः । तदेव स्पष्टयति—आहुतिभावनाभाविता इति । तत्संस्तुतास्तदनुसारिणस्तदाश्रया इत्यर्थः । तद्भावितत्वफलमाह—आहुतिरूपेणेति । तेनाऽऽकृष्टत्वं वशीकृतत्वम् । आहुतिभाविता इत्युक्तं स्पष्टयति—श्रद्धेति । तत्पूर्वकं पयःसोमादिसाध्यं यत्कर्म तदाश्रया इत्यर्थः । सोमभूतास्तत्समीपस्थं शरीरं प्राप्य तत्स्वरूपा

---

१ घ. ठ. °र्यं लोहि° । २ ङ. ञ. ण. चान्द्रका° । ३ च. °वक्ष्यत । ४ क. °च्छब्देन गृह्यते प्रा° ।

इत्यर्थः । कथं सोमसारूप्यं धर्मिणां फलमित्याशङ्क्याऽऽह—तदर्थमिति । यजमानानां सोमभावो गतिमन्तरेण न सिध्यति । तथा च वक्तव्या गतिरित्याशङ्क्याऽऽह—अत्रेति । अहवनीयोऽग्निः सप्तम्यर्थः । सा तर्हि कुत्रोच्यते न हि तदुक्तिमन्तरेण यथोक्तं फलं सिध्यत्यत आह—तां त्विति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

(अथ पञ्चमाध्यायस्य पञ्चमः खण्डः) ।

पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो विद्युदर्चिरशनिरङ्गारा ह्रादनयो विस्फुलिङ्गाः ॥ १ ॥

द्वितीयहोमपर्यायार्थमाह—पर्जन्यो वाव पर्जन्य एव गौतमाग्निः । पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवताविशेषः । तस्य वायुरेव समित् । वायुना हि पर्जन्योऽग्निः समिध्यते । पुरोवातादिप्राबल्ये वृष्टिदर्शनात् । अभ्रं धूमो धूमकार्यत्वाद्धूमवच्च लक्ष्यमाणत्वात् । विद्युदर्चिः । प्रकाशसामान्यात् । अशनिरङ्गाराः । काठिन्याद्विद्युत्संबन्धाद्वा । ह्रादनयो विस्फुलिङ्गाः । ह्रादनयो गर्जितशब्दाः । मेघानां विप्रकीर्णत्वसामान्यात् ॥ १ ॥

द्वितीयहोमसंबन्धी द्वितीयः पर्यायस्तस्यार्थं निर्ज्ञातुं तमेव पर्यायमादत्ते श्रुतिरित्यर्थः । पुरोवातादीत्यादिशब्देन वर्षहेतुर्वायुभेदो गृह्यते । उक्तं चाभ्राणां धूमकार्यत्वं पौराणिकैः—

यज्ञधूमोद्भवं त्वभ्रं द्विजानां च हितं सदा ।
दावाग्निधूपसंभूतमभ्रं वनहितं स्मृतम् ॥
मृतधूमोद्भवं त्वभ्रमशुभं च भविष्यति ।
अभिचाराग्निधूमोत्थं भूतनाशाय वै द्विजाः ॥ इति ॥ १ ॥

तस्मिन्नेतस्मिन्नग्नौ देवाः सोमꣳ राजानं जुह्वति तस्या आहुतेर्वर्षꣳ संभवति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य पञ्चमः खण्डः ॥५॥

तस्मिन्नेतस्मिन्नग्नौ देवाः पूर्ववत्सोमं राजानं जुह्वति । तस्या आहुतेर्वर्षं

---

१ क. मिगं फ° ।

संभवति । श्रद्धाख्या आपः सोमाकारपरिणता द्वितीये पर्याये पर्जन्याग्निं प्राप्य वृष्टित्वेन परिणमन्ते ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

अध्यात्मं यजमानस्य प्राणा इन्द्रादयस्त्वधिदैवतं देवा इत्याह—पूर्ववदिति। सोमं राजानमित्यादि व्याचष्टे—श्रद्धाख्या इति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

(अथ पञ्चमाध्यायस्य षष्ठः खण्डः) ।

पृथिवी वाव गौतमाग्निस्तस्याः संवत्सर एव समिदाकाशो धूमो रात्रिरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गाः ॥ १ ॥

पृथिवी वाव गौतमाग्निरित्यादिपूर्ववत् । तस्याः पृथिव्याख्यस्याग्नेः संवत्सर एव समित् । संवत्सरेण हि कालेन समिद्धा पृथिवी व्रीह्यादिनिष्पत्तये भवति । आकाशो धूमः पृथिव्या इवोत्थित आकाशो दृश्यते । यथाऽग्नेर्धूमः । रात्रिरर्चिः पृथिव्या ह्यवकाशात्मिकाया अनुरूपा रात्रिः । तमोरूपत्वात् । अग्नेरिवानुरूपमर्चिः । दिशोऽङ्गारा उपशान्तत्वसामान्यात् । अवान्तरदिशो विस्फुलिङ्गाः क्षुद्रत्वसामान्यात् ॥ १ ॥

॥ १ ॥

तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नꣳ संभवति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

===

तस्मिन्नित्यादि समानम् । तस्या आहुतेरन्नं व्रीहियवादि संभवति ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

अथ पञ्चमाध्यायस्य सप्तमः खण्डः) ।

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्प्राणो धूमो जिह्वाऽर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः ॥ १ ॥

पुरुषो वाव गौतमाग्निः । तस्य वागेव समित् । वाचा हि मुखेन समिध्यते पुरुषो न मूकः । प्राणो धूमो धूम इव मुखान्निर्गमनात् । जिह्वाऽर्चिर्लोहितत्वात् । चक्षुरङ्गाराः । भास आश्रयत्वात् । श्रोत्रं विस्फुलिङ्गाः । विप्रकीर्णत्वसाम्यात् ॥ १ ॥

॥ १ ॥

तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुतेरेतः संभवति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

समानमन्यत् । अन्नं जुह्वति व्रीह्यादिसंस्कृतम् । तस्या आहुते रेतः संभवति ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

(अथ पञ्चमाध्यायस्याष्टमः खण्डः) ।

योषा वाव गौतमाग्निस्तस्या उपस्थ एव समिद्यदुपमन्त्रयते स धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः ॥ १ ॥

योषा वाव गौतमाग्निः । तस्या उपस्थ एव समित् । तेन हि सा पुत्रोत्पादनाय समिध्यते । यदुपमन्त्रयते स धूमः । स्त्रीसंभवादुपमन्त्रणस्य । योनिरर्चिर्लोहितत्वात् । यदन्तः करोति तेऽङ्गाराः । अग्निसंबन्धात् । अभिनन्दाः सुखलवा विस्फुलिङ्गाः । क्षुद्रत्वात् ॥ १ ॥

॥ १ ॥

१ घ. ङ. च. ठ. ङ. °र्णत्वात् । २ ङ. ण. °सामान्यात् ।

तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः संभवति ॥२॥
इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति। तस्या आहुतेर्गर्भः संभवतीति। एवं श्रद्धासोमवर्षान्नरेतोहवनपर्यायक्रमेणाऽऽप एव गर्भीभूतास्ताः। तत्रापामाहुतिसमवायित्वात्प्राधान्यविवक्षाऽऽपः पञ्चम्यामाहुतौ पुरुषवचसो भवन्तीति। न त्वाप एव केवलाः सोमादिकार्यमारभन्ते। न चाऽऽपोऽत्रिवृत्कृताः सन्तीति। त्रिवृत्कृतत्वेऽपि विशेषसंज्ञालाभो दृष्टः पृथिवीयमिमा आपोऽयमग्निरित्यन्यतमबाहुल्यनिमित्तः। तस्मात्समुदितान्येव भूतान्यब्बाहुल्यात्कर्मसमवायीनि सोमादिकार्यारम्भकाण्याप इत्युच्यन्ते। दृश्यते च द्रवबाहुल्यं सोमवृष्ट्यन्नरेतोदेहेषु। बहुद्रवं च शरीरं यद्यपि पार्थिवम्। तत्र पञ्चम्यामाहुतौ हुतायां रेतोरूपा आपो गर्भीभूताः॥ २ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

तस्या आहुतेर्गर्भः संभवतीत्युक्तं व्यक्तीकरोति—एवमिति। यथोक्तया रीत्या श्रद्धादीनां रेतोन्तानां यानि द्युलोकादिषु योषिदन्तेष्वग्निषु हवनानि तेषामेकैकस्मिन्पर्याये यः क्रमो व्याख्यातस्तेनेति यावत्। कथं पुनरापो गर्भीं भवन्ति भूतान्तराणामपि तुल्यो गर्भीभावस्तस्य पाञ्चभौतिकत्वादत आह—तत्रेति। भूतानां मध्ये। किमित्यपां प्राधान्यविवक्षयैव निर्देशस्तासामेव केवलानां कार्यारम्भकत्वविवक्षा किं न स्यात्तत्राऽऽह—न त्विति। भूतान्तरासहकृतानां केवलानामपामारम्भकत्वे यदारब्धं कार्यं न तद्भोगायतनं तस्य जलबुद्बुदवदत्यन्तचञ्चलत्वादित्यर्थः। केवलानामप्यत्वमुपेत्योक्तमिदानीं तदेव नास्तीत्याह—न चेति। इतिशब्दस्तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति श्रुतेरिति हेत्वर्थः। सर्वस्य त्रिवृत्कृतत्वे कथं दृष्टो विशेषव्यपदेशो युज्येतेत्याशङ्क्याऽऽह—त्रिवृत्कृतत्वेऽपीति। अपां प्राधान्यविवक्षया प्रश्नप्रतिवचनयोरपूशब्द इत्युक्तमुपसंहरति—तस्मादिति। केवलानामपामसत्त्वादिति यावत्। कथमारम्भकेषु भूतेष्वपां बाहुल्यमवगतमित्याशङ्क्य कार्यद्वारा तदधिगतिरित्याह—दृश्यते चेति। सोमादीनामब्बाहुल्येऽपि कथं पार्थिवशरीरस्य तद्बाहुल्यमित्याशङ्क्याऽऽह—बहुद्रवं चेति। पञ्चमश्रुत्यनिर्णयमुपसंहर्तुं पातनिकां करोति—तत्रेति। योषाग्नाविति यावत्। गर्भीभूताः पुरुषवचसो भवन्तीति संबन्धः ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

१ च. ठ. °भूताः। २ क. °कारी°। ३ ख. ग. ण. गर्भा भ°।

(अथ पञ्चमाध्यायस्य नवमः खण्डः) ।

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वा नव वा मासानन्तः शयित्वा यावद्वाऽथ जायते ॥ १ ॥

इति त्वेवं तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति व्याख्यात एकः प्रश्नः । यत्तु द्युलोकादिमां प्रत्यावृत्तयोराहुत्योः पृथिवीं पुरुषं स्त्रियं क्रमेणाऽऽविश्य लोकं प्रत्युत्थायी भवतीति वाजसनेयक उक्तं तत्प्रासङ्गिकमिहोच्यते । इह च प्रथमे प्रश्न उक्तं वेत्थ यदितोऽधि प्रजाः प्रयन्तीति । तस्य चायमुपक्रमः । स गर्भोऽपां पञ्चमः परिणामविशेष आहुतिकर्मसमवायिनीनां श्रद्धाशब्दवाच्यानामुल्बावृत उल्बेन जरायुणाऽऽवृतो वेष्टितो दश वा नव वा मासानन्तर्मातुः कुक्षौ शयित्वा यावद्वा यावता कालेन न्यूनेनातिरिक्तेन वाऽथानन्तरं जायते ।

उक्तार्थं वाक्यं योजयति—इति त्विति । अपां गर्भीभावोक्तिमात्रेण पुरुषवचस्त्वस्य निर्णीतत्वादलमुत्तरग्रन्थेनेत्याशङ्क्य तस्य तात्पर्यमाह—यत्त्विति । आहुत्योः संबन्धीति शेषः । प्रासङ्गिकं गर्भीभावोक्तिप्रसङ्गादागतमिति यावत् । इहेति प्रकृतश्रुत्युक्तिः प्रासङ्गिकासंगतिं त्यक्त्वा साक्षादेव पूर्वोत्तरग्रन्थयोरस्ति संगतिरिति तात्पर्यान्तरमाह—इह चेति । प्रजानामूर्ध्वगमनमुत्तरत्र निरूपयिष्यते । तादर्थ्येन तासामुत्पत्तिरादावुच्यत इत्यर्थः । द्विधा संगतिमुक्त्वा वाक्याक्षराणि योजयति—स गर्भ इति । सोमवृष्ट्यन्नरेतांस्यपेक्ष्य पञ्चमत्वं गर्भाख्यस्य परिणामस्य द्रष्टव्यम् । अपां प्रकृतत्वद्योतनार्थमाहुतीत्यादि विशेषणद्वयम् । अथवा पूर्वोक्तात्कालान्न्यू [ने]नाधिकेन वा कालेन यावता जन्तुः समग्राङ्गो जायते तावता कालेन कुक्षौ शयित्वेति संबन्धः । अनन्तरं योनितो निर्गमनकारणीभूतकर्माभिव्यक्तेरिति शेषः ।

उल्बावृत इत्यादि वैराग्यहेतोरिदमुच्यते । कष्टं हि मातुः कुक्षौ मूत्रपुरीषवातपित्तश्लेष्मादिपूर्णे तदनुलिप्तस्य गर्भस्योल्बाशुचिपटावृतस्य लोहितरेतोशुचिबीजस्य मातुराशितपीतरसानुप्रवेशेन विवर्धमानस्य निरुद्धशक्तिबलवीर्यतेजःप्रज्ञाचेष्टस्य शयनम् । ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निःसृतिर्जन्मेति वैराग्यं ग्राहयति । मुहूर्तमप्यसह्यं दश वा नव वा मासानतिदीर्घकालमन्तः शयित्वेति च ॥ १ ॥

१ क. ग. घ. ङ. ज. झ. ट. ठ. त. थ. 'वा मा'। २ ख. ञ. 'शङ्क्याऽऽह । ३ ग. ट. 'मूर्ध्वं ग'। ४ क. द्विविधां । ५ ख. घ. ङ. च. ञ. ठ. ण. 'दीर्घं का' । ६ क. ग. घ. च. ट. ण. 'ति स ।

उल्बावृतत्वं कुक्षौ चिरं शयनं योनितो निःसरणमित्येतदशेषमतिप्रसिद्धं किमिति श्रुत्या व्यपदिश्यते तत्राऽऽह-उल्बावृत इत्यादीति । वैराग्यार्थत्वमस्य स्फुटयति-कष्टं हीति । श्लेष्मादीत्यादिशब्देनासृक्पूयस्नायुमज्जादीनि गृह्यन्ते । तदनुलिप्तस्येति तच्छब्दो मूत्रपूरीषादिविषयः । शक्तिर्बुद्धिसामर्थ्यम् । बलं देहसामर्थ्यम् । वीर्यमिन्द्रियसामर्थ्यम् । तेजः शरीरगता कान्तिः । प्रज्ञा चेतना जीवनधर्मः । चेष्टा प्राणधर्मः । ता निरुद्धा यस्य तस्येति विग्रहः । मातुरुदरे शयानस्य कष्टत्वेऽपि तदुदराद्योनिद्वारा निःसरणं सुखकरमिति चेन्नेत्याह—तत इति । तद्ग्राहकत्वप्रकारमेवाभिनयति—मुहूर्तमपीति । यन्मातुरन्तः शयनं मुहूर्तमपि दुःसहं तत्कथं दीर्घकालं शयितुं शक्यम् । कथं च दश वा नव वा मासानन्तः शयित्वा पुनर्योनिद्वारा दुष्करं निःसरणं दुःसह्यं स्यादिति वैराग्यं ग्राहयति श्रुतिरित्यर्थः ॥ १ ॥

स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति यत एवेतो यतः संभूतो भवति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य नवमः खण्डः ॥ ९ ॥

===

स एवं जातो यावदायुषं पुनः पुनर्घटीयन्त्रवद्गमनागमनाय कर्म कुर्वन्कुलालचक्रवद्वा तिर्यग्भ्रमणाय यावत्कर्मणोपात्तमायुस्तावज्जीवति । तमेनं क्षीणायुषं प्रेतं मृतं दिष्टं कर्मणा निर्दिष्टं परलोकं प्रति यदि चेज्जीवन्वैदिके कर्मणि ज्ञाने वाऽधिकृतस्तेमेनं मृतमितोऽस्मादग्नयेऽग्न्यर्थमृत्विजो हरन्ति पुत्रा वाऽन्त्यकर्मणे । यत एवेत आगतोऽग्नेः सकाशाच्छ्रद्धाद्याहुतिक्रमेण, यतश्च पञ्चभ्योऽग्निभ्यः संभूत उत्पन्नो भवति तस्मा एवाग्नये हरन्ति स्वामेव योनिमग्निमापादयन्तीत्यर्थः ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य नवमः खण्डः ॥ ९ ॥

—:⊙-⊙-⊙-⊙:—

जातस्य पुनरनर्थो नास्तीत्याशङ्क्याऽऽह—स एवमिति । यावदायुषमित्येतद्व्याचष्टे—पुनरिति । घटीयन्त्रवदूर्ध्वगमनार्थं वा निषिद्धं कर्म पौनःपुन्येनाऽऽचरन्यावत्कर्मणाऽऽर्जितमायुस्तावदस्मिन्देहे जीवति ततो म्रियते । तथा च जातस्य मृत्युध्रौव्यान्नास्ति सम्यग्ज्ञानं विना स्वस्तिप्राप्तिरित्यर्थः । अस्तु तर्हि मृतस्य कृतकृत्यतेत्याश-

---

१ क. °ज्जादि गृह्यते । त° । २ क. ख. ग. घ. ङ. ञ. ट. ड. ढ. °र्षं पुनर्घ° । ३ क. घ. ङ. ट. ड. ढ. °मेवं क्षी° । ४ ङ. च. ण. °णि विज्ञा° । ५ घ. ठ °स्तदैनं । ङ. च. °स्तदैवं मृ° । ६ ञ. °मेतं मृ° । ञ. मेवं मृ° । ७ क. ट. °दूर्ध्वं ग° ।

ङ्क्चाऽऽह--तेनेति । सर्वस्य तर्हि मृतस्य परलोकित्वं स्यादिति चेन्नेत्याह—यदिति । तदा परलोकं प्रति कर्मणा निर्दिष्टमिति पूर्वेण संबन्धः । युक्तं च तन्मृतस्याग्न्यर्थं नयनमित्याह—यत इति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य नवमः खण्डः ॥ ९ ॥

(अथ पञ्चमाध्यायस्य दशमः खण्डः) ।

तद्य इत्थं विदुः । ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षड्दङ्ङेति मासाꣳस्तान् ॥ १ ॥ मासेभ्यः संवत्सरꣳ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवयानः पन्था इति ॥ २ ॥

वेत्थ यदितोऽधि प्रजाः प्रयन्तीत्ययं प्रश्नः प्रत्युपस्थितोऽपाकर्तव्यतया तत्तत्र लोकं प्रत्युत्थितानामधिकृतानां गृहमेधिनां य इत्थमेवं यथोक्तं पञ्चाग्निदर्शनं द्युलोकाद्यग्निभ्यो वयं क्रमेण जाता अग्निस्वरूपाः पञ्चाग्न्यात्मान इत्येवं विदुर्जानीयुः । कथमवगम्यत इत्थं विदुरिति गृहस्था एवोच्यन्ते नान्य इति । गृहस्थानां ये त्वनित्थंविदः केवलेष्टापूर्तदत्तपरास्ते धूमादिना चन्द्रं गच्छन्तीति वक्ष्यति । ये चारण्योपलक्षिता वैखानसाः परिव्राजकाश्च श्रद्धा तप इत्युपासते तेषां चेत्थंविद्भिः सहार्चिरादिना गमनं वक्ष्यति पारिशेष्यादग्निहोत्राहुतिसंबन्धाच्च गृहस्था एव गृह्यन्त इत्थं विदुरिति ।

स उल्बावृत इत्यादिनोक्तमनुवदति--वेत्थेति । प्रत्युपस्थितः प्रजोत्पत्तिप्रदर्शनेन प्रसङ्गत इति यावत् । तद्य इत्थं विदुरित्येतद्व्याचष्टे—तत्तत्रेत्यादिना । सप्तम्यर्थमेव स्फोरयति—लोकमिति । निर्धारणार्था षष्ठी । वेदनप्रकारमनुवदति—द्युलोकादीति । तेऽर्चिषमभिसंभवन्तीत्युत्तरत्र संबन्धः । साधारणोक्तेर्विशेषे संकोचो हेतुं विना न सिध्यतीति शङ्कते—कथमिति । पारिशेष्यं संकोचमिति

१ क. छ. तमेवमिति । २ क. पारलौकिकत्वं । ३ घ. एतान्ब्र° । ४ च. °त्युत्थायिना । ५ ख. ञ. ट. °दिग° । ६ क. ठ. °त्तिद° । ७ क. स्फुट्यति ।

परिहरति—गृहस्थानामिति। षष्ठी निर्धारणे। अतश्च केवलकर्मिणो गृहस्था न विदुरिति ग्रहणमर्हन्तीति शेषः। परिव्राजका वानप्रस्थाश्च गृह्यन्तामिति चेन्नेत्याह—ये चेति। केषां तर्हीह ग्रहणमत आह—पारिशेष्यादिति। गृहस्थ एव हेत्वन्तरमाह—अग्निहोत्रेति। तदाहुत्यपूर्वपरिणामात्मकं जगदत्र पञ्चधा प्रविभज्याग्नित्वेन दर्शनमुत्तरमार्गप्राप्तिसाधनं चोच्यते। अतो विद्यायास्तत्संबन्धाद्गृहस्थानामपि तत्संबन्धस्य प्राप्तत्वात्तेषामेवेह ग्रहणमुचितमित्यर्थः।

ननु ब्रह्मचारिणोऽप्यगृहीता ग्रामश्रुत्याऽरण्यश्रुत्या चानुपलक्षिता विद्यन्ते कथं पारिशेष्यसिद्धिः। नैष दोषः। पुराणस्मृतिप्रामाण्यादूर्ध्वरेतसां नैष्ठिकब्रह्मचारिणामुत्तरेणार्यम्णः पन्थाः प्रसिद्धः। अतस्तेऽप्यरण्यवासिभिः सह गमिष्यन्ति। उपकुर्वाणकास्तु स्वाध्यायग्रहणार्था इति न विशेषनिर्देशार्हाः।

पारिशेष्यमाक्षिपति—नन्विति। ग्रामे सपत्नीको वासः। न च ब्रह्मचारिणां पत्नीसंबन्धः। तन्न ग्रामश्रुत्या ब्रह्मचारिणो गृहीताः। गुरुकुलवासित्वाच्च नारण्यश्रुत्योपलक्षिताः। ततस्तेषामिह ग्रहणसंभवान्न पारिशेष्यमित्यर्थः। किं नैष्ठिकब्रह्मचारिणोऽत्रेत्थं विदुरिति गृह्येरन्किं वोपकुर्वाणा इति विकल्प्याऽऽद्यं दूषयति—नैष दोष इति।

अष्टाशीतिसहस्राणि यतीनामूर्ध्वरेतसाम्।
स्मृतं स्थानं तु यत्तेषां तदेव गुरुवासिनाम्॥

इत्यादिपुराणस्मृतेः श्रुतिमूलत्वेन प्रामाण्यान्नैष्ठिकब्रह्मचारिणामूर्ध्वरेतसामादित्यसंबन्धेनोत्तरायणेनोपलक्षितो देवयानाख्यो मार्गो यावता प्रसिद्धस्तस्मात्तेषामरण्यवासिभिः सहाखण्डितब्रह्मचर्येणैवार्चिरादिगतिलाभान्न पञ्चाग्नित्वेन प्रयोजनमिति पारिशेष्यसिद्धिरित्यर्थः। द्वितीयं प्रत्याह—उपकुर्वाणकास्त्विति। ते हि स्वाध्यायग्रहणार्थास्तस्मिन्गृहीते स्वेच्छावशादाश्रमान्तरं गृह्णन्तस्तत्फलेनैव फलवन्तो भवन्तीति न गृहस्थादिभ्यो विभज्येत्थं विदुरिति निर्देशमर्हन्तीत्यर्थः।

ननूर्ध्वरेतस्त्वं चेदुत्तरमार्गप्रतिपत्तिकारणं पुराणस्मृतिप्रामाण्यादिष्यत इत्थंवित्त्वमनर्थकं प्राप्तम्। न। गृहस्थान्प्रत्यर्थवत्त्वात्। ये गृहस्था अनित्थंविदस्तेषां स्वभावतो दक्षिणो धूमादिः पन्थाः प्रसिद्धस्तेषां य इत्थं विदुः सगुणं वाऽन्यद्ब्रह्म विदुः। "अथ यदु चैवास्मिञ्शव्यं कुर्वन्ति यदि नार्चिषमेव" इति लिङ्गादुत्तरेण ते गच्छन्ति। ननूर्ध्वरेतसां गृहस्थानां

---

१ क. ग. ट. ड. °ताश्च वि°। २ ग. ड. ढ. अपि नेत्थं विदुस्ते°। ३ ख. घ. ङ. च. ञ. ठ. ड. ण. दक्षिणतो। ४ ङ. ढ. ण. °मादिप°।

च समान आश्रमित्व ऊर्ध्वरेतसामेवोत्तरेण पथा गमनं न गृहस्थानामिति न युक्तमग्निहोत्रादिवैदिककर्मबाहुल्ये च सति । नैष दोषः । अपूता हि ते । शत्रुमित्रसंयोगनिमित्तं हि तेषां रागद्वेषौ । तथा धर्माधर्मौ हिंसानुग्रहनिमित्तौ । हिंसानृतमायाब्रह्मचर्यादि च बहुशुद्धिकारणमपरिहार्यं तेषाम् । अतोऽपूताः । अपूतत्वान्नोत्तरेण पथा गमनम् । हिंसानृतमायाब्रह्मचर्यादिपरिहाराच्च शुद्धात्मानो हीतरे शत्रुमित्ररागद्वेषादिपरिहाराच्च विरजसस्तेषां युक्त उत्तरः पन्थाः । तथा च पौराणिकाः—

ये प्रजामीषिरेऽधीरास्ते श्मशानानि भेजिरे ।
ये प्रजां नेषिरे धीरास्तेऽमृतत्वं हि भेजिरे ॥ इत्याहुः ।

किं नैष्ठिकानां ब्रह्मचारिणामुत्तरमार्गप्राप्तिसंभवादनर्थकमित्थंवित्त्वं प्राप्तमिति श्रुतिविरोधाद्द्वितीये तु पारिशेष्यात्सिद्धितादवस्थ्यमिति शङ्कार्थः । किमित्थंवित्त्वं नैष्ठिकान्प्रत्यनर्थकमित्युच्यते किंवा सर्वानेव प्रतीति विकल्प्याऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—न गृहस्थानिति । तान्प्रत्यर्थवत्त्वमेवेत्थंवित्त्वस्य विभज्य समर्थयते—ये गृहस्था इति । स्वभावतस्तदनुष्ठितेष्टापूर्तबलादित्यर्थः । तेषामेव गृहस्थानां मध्ये ये केचिदुक्तेन प्रकारेणेत्थं पञ्चाग्निदर्शनं विदुरग्निभ्योऽन्यद्वा सगुणं ब्रह्म विदुस्ते देवयानेनोत्तरेण पथा गच्छन्तीति संबन्धः । न केवलं गृहस्थानां पञ्चाग्निवित्त्वमेव किंतु सगुणब्रह्मवित्त्वमपि तेषामस्तीति प्रमाणमाह—अथेति । अन्त्येष्टिकरणाकरणयोरविशेषेण ब्रह्मविदामार्चिरादिगतिश्रवणादस्ति गृहस्थानामपि ब्रह्मवित्त्वमिति गम्यते । पारिव्राज्यकादिष्वन्त्येष्ट्यसंभवेन विद्यास्तुतेरपि दुर्वचत्वादित्यर्थः । विहितत्वाविशेषादाश्रमाणां तुल्यत्वमाश्रित्य शङ्कते—नन्विति । साम्यमुक्त्वा गृहस्थेषु विशेषं दर्शयति—अग्निहोत्रादीति । वैदिकानि कर्माणि भूयांसि सन्ति । तेषां च बाहुल्ये सत्यग्निदुषामूर्ध्वरेतसामेव देवयानेन पथा गमनं न गृहस्थानामित्ययुक्तं साधनभूयस्त्वे फलभूयस्त्वन्यायविरोधादित्यर्थः । आश्रमित्वाविशेषेऽपि धर्मविशेषाद्विशुद्धितारतम्यसंभवान्नैकरूप्यमिति परिहरति—नैष दोष इति । कथं गृहस्थानामग्निहोत्रादिभूयोधर्मवतां विद्याहीनानामप्यपूतत्वं तत्राऽऽह—शत्रुमित्रेति । अब्रह्मचर्यादीत्यादिपदेन परिग्रहित्वादि गृह्यते । अशुद्धिबाहुल्यकारणमतःशब्दार्थः । तुल्यमूर्ध्वरेतसामप्यशुद्धिहेतुबाहुल्यादपूतत्वमित्याशङ्क्याऽऽह—हिंसेति । ऊर्ध्वरेतसां पूतत्वे सिद्धे फलितमाह—तेषामिति । ऊर्ध्वरेतसां देवयाने पथ्यनुप्रवेशे प्रमाणमाह—तथा चेति । पौराणिका आहुरिति संबन्धः ।

---

१ ख. ञ. सामान्य° । २ ठ. °र्भणां बा° । ३ क. °मित्तौ हि । ४ ङ. ङ. ढ. ततो । ५ क. °मप्यप° । ६ ग. ट. °त्वत्वा° ।

इत्थंविदां गृहस्थानामारण्यवासिनां च समानमार्गत्वेऽमृतत्वफले च सत्यरण्यवासिनां विद्यानर्थक्यं प्राप्तम् । तथा च श्रुतिविरोधः । "न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः" इति । "स एनमविदितो न भुनक्ति" इति च विरुद्धम् । न । आभूतसंप्लवस्थानस्यामृतत्वेन विवक्षितत्वात् । तत्रैवोक्तं पौराणिकैः—"आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते" इति । यच्चाऽऽत्यन्तिकममृतत्वं तदपेक्षया न तत्र दक्षिणा यन्ति स एनमविदितो न भुनक्तीत्याद्याः श्रुतय इत्यतो न विरोधः । न च पुनरावर्तन्ते इतीमं मानवमावर्तं नाऽऽवर्तन्त इत्यादिश्रुतिविरोध इति चेत् । न । इमं मानवमिति विशेषणात्तेषामिह न पुनरावृत्तिरस्तीति च । यदि ह्येकान्तेनैव नाऽऽवर्तेरन्निमं मानवमिहेति च विशेषणमनर्थकं स्यात् । इममिहेत्याकृतिमात्रमुच्यत इति चेत् । न । अनावृत्तिशब्देनैव नित्यानावृत्त्यर्थस्य प्रतीतत्वादाकृतिकल्पनाऽनर्थिका । अत इममिहेति च विशेषणार्थवत्त्वायान्यत्राऽऽवृत्तिः कल्पनीया । न च सदेकमेवाद्वितीयमित्येवंप्रत्ययवतां मूर्धन्यया नाड्याऽर्चिरादिमार्गेण गमनम् । "ब्रह्मैव सन्ब्रह्माप्येति" "तस्मात्तत्सर्वमभवत्" "न तस्य प्राणा उत्क्रामन्ति । अत्रैव समवलीयन्ते" इत्यादिश्रुतिशतेभ्यः ।

आश्रमधर्ममात्रमार्गद्वारेणामृतत्वमूर्ध्वरेतसामुक्तमाक्षिपति—इत्थंविदामिति । तेषां विद्यानर्थक्यमिष्टमेवेत्याशङ्क्याऽऽह—तथा चेति । स परमात्मा स्वयमज्ञातः सन्नेनमधिकारिणमपवर्गप्रदानेन न पालयतीति च वाक्यं विद्यामन्तरेणामृतत्वं ब्रुवतो विरुद्धमित्यर्थः । ऊर्ध्वरेतसाममृतत्वस्याऽऽपेक्षिकत्वात्तत्र विद्यानर्थक्यमेवेति परिहरति—नाऽऽभूतेति । आपेक्षिकममृतत्वमित्यत्र प्रमाणमाह—तत्रैवेति । यत्र प्रजाः कामयमाना मुक्तिभाजो न भवन्तीत्युक्तं तत्रैव तत्संनिधाविति यावत् । कथं तर्हि यथोक्तश्रुतिविरोधसमाधिरित्याशङ्क्याऽऽह—यच्चेति । आदिशब्दस्तमेवं विद्वानमृत इह भवतीत्यादिश्रुतिसंग्रहार्थः । आपेक्षिकामृतत्वे श्रुतिविरोधो न शक्यते परिहर्तुमिति शङ्कते—न चेति । आदिशब्दस्तेषामिह न पुनरावृत्तिरित्यादिवाक्यसंग्रहार्थः । इममिहेति विशेषणावष्टम्भेन निराचष्टे—नेत्यादिना । तदेव व्यतिरेकमुखेन(ण) विशदयति—यदीति । सर्वकल्पेषु श्रुतेरेतादृशत्वादिममिहेति पदद्वयसामान्येन सर्वकल्पविषये विशेषणानर्थक्यं दुर्वारमित्युत्तरमाह—नानावृत्तीति । विधान्तरेण विशेषणार्थसंभवे फलितमाह—अत इति । यस्मिन्कल्पे ब्रह्मलोकप्राप्तिस्तस्मात्कल्पान्तरमन्यत्रेत्युक्तम् ।

---

१ ख. ग. ट. ड. ण. °ण्यनिवा° । २ क. ण. °तत्त्वे फ° । ञ. °तत्फलत्वे च । ३ ख. ग. ञ. ट. ण. °ण्यनिवा° । ४ ग. ट. यान्ति । ५ ग. यान्ति । ६ ख. ग. ञ. ट. ठ. ड. °न्त इमं । ७ घ. ङ. ढ. ण. °ना निरर्थि° । ८ घ. ङ. च. ठ. ड. ढ. ण. °वनीय° । ९ ग. ङ. ढ. °भ्यः । त°।

ऊर्ध्वरेतसामाश्रमधर्ममात्रनिष्ठानाममृतत्वमापेक्षिकमुपक्षिप्तं संप्रति तेषामेव साक्षात्कृतब्रह्मतत्त्वानामात्यन्तिकममृतत्वं गतिनिरपेक्षं सिध्यतीत्याह—न चेति । तेषां गत्यादिनिरपेक्षमात्यन्तिकममृतत्वं भवतीत्यत्र प्रमाणमाह—ब्रह्मैवेति ।

ननु तस्माज्जीवादुत्क्रमिष्योः प्राणा नोत्क्रामन्ति सहैव गच्छन्तीत्ययमर्थः कल्प्यत इति चेत् । न । अत्रैव समवैलीयन्त इति विशेषणानर्थक्यात् । सर्वे प्राणा अनूत्क्रामन्तीति च प्राणैर्गमनस्य प्राप्तत्वात् । तस्मादुत्क्रामन्तीत्यनाशङ्क्यैवैषा । यदाऽपि मोक्षस्य संसारगतिवैलक्षण्यात्प्राणानां जीवेन सहाऽऽगमनमाशङ्क्य तस्मान्नोत्क्रामन्तीत्युच्यते तदाऽप्यत्रैव समवैलीयन्त इति विशेषणमनर्थकं स्यात् ।

न तस्मात्प्राणा उत्क्रामन्तीति माध्यंदिनश्रुतिमनुसृत्य न तस्येत्यादिकाण्वश्रुतिरपि नेतर्येति शङ्कते—ननु तस्मादिति । वाक्यशेषविरोधान्नैवमिति दूषयति—नात्रेति । श्रुत्यन्तरालोचनायामपि न स्वयूथ्यकल्पनेत्याह—सर्वे प्राणा इति । प्राणैः सह जीवस्येति शेषः । संसारदशायां प्राणैः सह विज्ञानात्मनो गमनेऽपि मोक्षे नास्ति प्राणानां जीवेन सह गमनमित्याशङ्कायां न तस्मादित्यादिवाक्यमित्याशङ्क्याऽऽह—यदाऽपीति ।

न च प्राणैर्वियुक्तस्य गतिरुपपद्यते जीवत्वं वा । सर्वगतत्वात्सदात्मनो निरवयवत्वात्प्राणसंबन्धमात्रमेव ह्यग्निस्फुलिङ्गवज्जीवत्वभेदकारणमित्यतस्तद्वियोगे जीवत्वं गतिर्वा नैव शक्या परिकल्पयितुं श्रुतयश्चेत्प्रमाणम् । न ह्यतोऽणुरवयवः स्फुटितो जीवाख्यः सद्रूपं छिद्रीकुर्वन्गच्छतीति शक्यं कल्पयितुम् । तस्मात् " तयोर्ध्वमायन्नमृतत्वमेति " इति सगुणब्रह्मोपासकस्य प्राणैः सह नाड्या गमनं सापेक्षमेव चामृतत्वं न साक्षान्मोक्ष इति गम्यते । " तदपराजिता पूस्तऽरं मदीयं सरः " इत्याद्युक्त्वा " तेषामेवैष ब्रह्मलोकः " इति विशेषणात् ।

भवतु प्राणानामत्रैव समवैलयस्तथाऽपि जीवस्य गमनायत्तममृतत्वमित्याशङ्क्याऽऽह—न चेति । कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि । कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति । स प्राणमसृजतेति श्रुतेरिति शेषः । किंच प्राणैर्वियुक्तस्य चिदात्मनो जीवत्वं नोपपद्यते प्राणोपाधिकस्यैव तस्य जीवशब्दवाच्यत्वादित्याह—जीवत्वं

× ऐरं मण्डस्तेन पूर्णमैरं मदीयं तदुपयोगिनां मदकरं हर्षोत्पादकम् ।

१ ग. घ. ङ. ढ. °त्यर्थः । २ घ. ङ. च. ठ. ड. ढ. °वनीय° । ३ घ. ङ. च. ञ. ठ. ड. ढ. ण. °वनीय° । ४ ग. °ते । त° । ५ ठ. नैव श° । ६ ख. ञ. °तोऽण्व° । ७ ख. छ. ञ. ण. °वनय° । ८ ख. छ. ण. °स्मिन्वह° ।

चेति । उक्तमर्थं समर्थयते—सर्वगतत्वादिति । चिदात्मा हि कल्पनायामधिष्ठाने सति यतो निर्भागं सर्वस्याऽऽत्मा तस्मादग्नेर्विस्फुलिङ्गवज्जीवत्वारूपभेदसंपादनं तस्य प्राणसंबन्धमात्रमेवेति वैदिकानां प्रसिद्धम् । तथा च प्राणवियोगे चिदात्मनो जीवत्वं गतिर्वा न शक्यते कल्पयितुम् । तस्मात्पूर्णत्वादिप्रतिपादकश्रुतीनां प्रमाणत्वादित्यर्थः । सदात्मनः सर्वमतस्य जीवाख्यभेदकरणं न प्राणोपाधिकृतं किं तु स्वत एव तस्यांशो जीवस्तथा चाग्निविस्फुलिङ्गवत्तस्य गत्युपपत्तिरित्याशङ्क्याऽऽह—न चेति । निष्कलं निष्क्रियं शान्तमित्यादिश्रुतेरिति शेषः । प्रकरणार्थमुपसंहरति—तस्मादिति । निर्गुणब्रह्मविदामात्यन्तिकामृतत्वस्य गमनादिनिरपेक्षत्वादिति यावत् । सगुणब्रह्मोपासकस्य सापेक्षममृतत्वमित्यत्र विशेषणश्रुतिमनुकूलयति—तदपरा जितेति । आदिपदेन तदश्वत्थः सोमसवन इत्यादि गृह्यते । तेषामेव ब्रह्मविदामेष पूर्वोक्तविशेषगुणो ब्रह्मणः सत्याख्यस्य लोको नान्येषामकृतात्मनामिति विशेषदर्शनादमृतत्वं तेषां तल्लोकनिवासिभिः समं सापेक्षमेवेति निर्धारितमित्यर्थः ।

अतः पञ्चाग्निविदो गृहस्था ये चेमेऽरण्ये वानप्रस्थाः परिव्राजकाश्च सह नैष्ठिकब्रह्मचारिभिः श्रद्धा तप इत्येवमाद्युपासते श्रद्दधानास्तपस्विनश्चेत्यर्थः । उपासनशब्दस्तात्पर्यार्थः । इष्टापूर्ते दत्तमित्युपासत इति यद्वत् । श्रुत्यन्तराद्ये च सत्यं ब्रह्म हिरण्यगर्भाख्यमुपासते ते सर्वेऽर्चिषमर्चिरभिसंभवन्तीं देवतामभिसंभवन्ति प्रतिपद्यन्ते । समानमन्यच्चतुर्थगतिव्याख्यानेन एष देवयानः पन्था व्याख्यातः सत्यलोकावसानो नाण्डाद्बहिः । " यदन्तरा पितरं मातरं च " इति मन्त्रवर्णात् ॥ १ ॥ २ ॥

ऊर्ध्वरेतसामाश्रममात्रनिष्ठानामपि ब्रह्मलोको लभ्यते गृहस्थानां पुनर्विदुषामेवेत्युपपाद्य प्रकृतश्रुतिव्याख्यानमनुवर्तयति—अत इति । पूर्वोक्तपारिशेष्यादिवशादिति यावत् । परिव्राजकाश्चेत्यमुख्यसंन्यासिनस्त्रिदण्डिनो गृह्यन्ते मुख्यसंन्यासिनां ब्रह्मसंस्थोऽमृतत्वमेतीति पृथक्कृतत्वात् । श्रद्धा सत्यमित्युपासत इति श्रुत्यन्तरम् । पञ्चाग्निविदो गृहस्थाः स्वाश्रममात्रप्रवणा ऊर्ध्वरेतसः सत्यब्रह्मोपासकाश्चोभये सर्वशब्देनोच्यन्ते । चतुर्थे यदुपकोसलविद्यायां[2] गतिव्याख्यानमतिवृत्तं तेन समानमर्चिषोऽहरित्यादिवाक्यव्याख्यानं तथा च तन्न पृथक्कर्तव्यमित्याह—समानमिति । उत्तरमार्गव्याख्यानमुपसंहरति—एष इति । देवयानेन पथा बहिरण्डाद्ब्रह्मवास्थितं ब्रह्म गन्तव्यमित्येके तान्प्रत्याह—नाण्डादिति । तत्र हेतुमाह—यदन्तरेति । पितरं द्युलोकं मातरं च पृथिवीं मध्ये ये द्वे सती अशृणवं ताभ्यामिदं विश्वं कर्मज्ञानाधिकृतं गच्छति न चाण्डाद्बहिरस्ति गतिद्वयमित्यर्थः ॥ १ ॥ २ ॥

---

१ क. छ. ट. श्रुतौ । २ घ. ण. °तुर्थे ग° । ३ क. °कोशल° ।

अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूम-
मभिसंभवन्ति धूमाद्रात्रिꣳ रात्रेरपरपक्षमपरपक्षाद्या-
न्षड्दक्षिणैति मासाꣳस्तान्नैते संवत्सरमभिप्राप्नु-
वन्ति ॥ ३ ॥

अथेत्यर्थान्तरप्रस्तावनार्थो य इमे गृहस्था ग्रामे । ग्राम इति गृहस्थानाम-साधारणं विशेषणमरण्यवासिभ्यो व्यावृत्त्यर्थम् । यथा वानप्रस्थपरिव्राजकानामरण्यं विशेषणं गृहस्थेभ्यो व्यावृत्त्यर्थं तद्वत् । इष्टापूर्ते इष्टमग्निहोत्रादि वैदिकं कर्म पूर्तं वापीकूपतडागारामादिकरणम् । दत्तं बाह्येभ्यो द्रव्यसंविभागो दत्तम् । इत्येवंविधं परिचरणपरित्राणाद्युपासते । इति-शब्दस्य प्रकारदर्शनार्थत्वात् । ते दर्शनवर्जितत्वाद्धूमं धूमाभिमानिनीं देवतामभिसंभवन्ति प्रतिपद्यन्ते । तयाऽतिवाहिता धूमाद्रात्रिं रात्रिदेवतां रात्रेरपरपक्षदेवताः पूर्वं कृष्णपक्षाभिमानिनीमपरपक्षाद्यान्षण्मासान्दक्षिणा दक्षिणां दिशमेति सविता । तान्मासान्दक्षिणायनषण्मासाभिमानिनीर्देवताः प्रतिपद्यन्त इत्यर्थः । संघचारिण्यो हि षण्मासदेवता इति मासानीति बहुवचनप्रयोगस्तासु । नैते कर्मिणः प्रकृताः संवत्सरं संवत्सराभिमानीं देवतामभिप्राप्नुवन्ति । कुतः पुनः संवत्सरप्राप्तिप्रसङ्गो यतः प्रतिषिध्यते । अस्ति हि प्रसङ्गः संवत्सरस्य ह्येकस्यावयवभूते दक्षिणोत्तरायणे तत्रार्चिरादिमार्ग-प्रवृत्तानामुदगयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता । अत इहापि तदवयवभूतानां दक्षिणायनमासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापद्येत्यतस्तत्प्राप्तिः प्रतिषिध्यते—नैते संवत्सरमभिप्राप्नुवन्तीति ॥ ३ ॥

वेत्थ यदितोऽधि प्रजाः प्रयन्तीत्यस्य प्रश्नस्य प्रतिवचनं देवयानोपदेशेन व्याख्यातं संप्रति पितृयाणोपदेशेनापि ग्रामनिवासित्वाविशेषादित्याशङ्क्याऽऽह—ग्राम इतीति । सपत्नीको हि वासो ग्राम इत्युच्यते । न च सपत्नीकत्वमूर्ध्वरेतसां युक्तम् । तथा च गृहस्थानामेव ग्रामविशेषणमसाधारणं न च तदनर्थकमूर्ध्वरेतोभ्यस्तेषां व्यावृत्त्यर्थत्वादित्यर्थः । तदेव दृष्टान्तेन स्फुटयति—यथेति । वेद्यन्तर्भावव्यासेधाद्बाह्येवेदीति विशेषणमादौ दत्तमिति प्रतीकोपादानं पुनर्व्याख्यातस्यानुवाद इत्यपुनरुक्तिः । इतिशब्दा-

---

१ क. ग. ङ. ट. °संभा° । २ ख. ञ. ण. °नविव° । ३ क. °तामाभिमुख्येन सं° । ४ क. ङ. च. ण. °वमेव कृ° । ५ ङ. ङ. ढ. °स्ति प्र° । ६ ख. ञ. °णे द्वे त° । ७ क. ङ. °त्वात् । त° ।

र्थमाह—इत्येवंविधमिति । परिचरणं गुर्वादिशुश्रूषा । परिवाणं रक्षणम् । आदिपदं नित्यस्वाध्यायादिसंग्रहार्थम् । उपासते तात्पर्येणानुतिष्ठन्तीति यावत् । कथमितिशब्दस्य यथोक्तार्थत्वमिति ह स्मोपाध्यायः कथयतीतिवत्प्रकृतमात्रगामित्वादित्याशङ्क्याऽऽह—इतिशब्दस्येति । देवयानाधिकृतेभ्यः सकाशात्पितृयाणाधिकृतेषु विशेषान्तरमाह—नैत इति । अप्राप्तप्रतिषेधोऽयमिति शङ्कते—कुत इति । प्राप्तिं दर्शनयन्नुत्तरमाह—अस्ति हीति । पूर्ववद्यथा पूर्वं देवयानेन पथाऽवयवेभ्योऽवयविनः संवत्सरस्य प्राप्तिस्तथेति यावत् ॥ ३ ॥

मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ॥ ४ ॥

मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसम् । कोऽसौ यस्तैः प्राप्यते चन्द्रमा य एष दृश्यतेऽन्तरिक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां तं चन्द्रमसमन्नं देवा इन्द्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चन्द्रभूताः कर्मिणो देवैर्भक्ष्यन्ते । नन्वनर्थायेष्टादिकरणं यद्यन्नभूता देवैर्भक्ष्येरन् । नैष दोषः । अन्नमित्युपकरणमात्रस्य विवक्षितत्वात् । न हि ते कवलोत्क्षेपेण देवैर्भक्ष्यन्ते । किं तर्ह्युपकरणमात्रं देवानां भवन्ति ते स्त्रीपशुभृत्यादिवत् । दृष्टश्चान्नशब्द उपकरणेषु स्त्रियोऽन्नं पशवोऽन्नं विशोऽन्नं राज्ञापित्यादि । न च तेषां रूपादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्ति । तस्मात्कर्मिणो देवानामुपभोग्या अपि सन्तः सुखिनो देवैः क्रीडन्ति । शरीरं च तेषां सुखोपभोगयोग्यं चन्द्रमण्डल आप्यमारभ्यते । तदुक्तं पुरस्ताच्छ्रद्धाशब्दा आपो द्युलोकाग्नौ हुताः सोमो राजा संभवतीति । ता आपः कर्मसमवायिन्य इतरैश्च भूतैरनुगता द्युलोकं प्राप्य चन्द्रत्वमापन्नाः शरीराद्यारम्भका इष्टादिपासकानां भवन्ति । अन्त्यायां च शरीराहुतावग्नौ हुतायामग्निना दह्यमाने शरीरे तदुत्था आपो धूमेन सहोर्ध्वं यजमानमावेष्टय चन्द्रमण्डलं प्राप्य कुशमृत्तिकास्थानीया बाह्यशरीरारम्भका भवन्ति । तदारब्धेन च शरीरेणेष्टादिफलमुपभुञ्जाना आसते ॥ ४ ॥

अन्नशब्दस्य यथाश्रुतमर्थं गृहीत्वा चोदयति—नन्विति । औपचारिकमर्थं गृहीत्वा परिहरति—नैष दोष इति । वृद्धप्रयोगमन्तरेण कथमुपकरणविषयोऽन्नशब्दो व्यु-

---

१ ख. ग. अस्तीति । २ ङ. °द्यापूर्तादि° ।

ख्यायते तत्राऽऽह—दृष्टश्चेति । भवतु कर्मिणां देवान्प्रत्युपकरणत्वं तथाऽपि स्वयमुपभोगाभावादनर्थकमिष्टादिकरणमित्याशङ्क्याऽऽह—न चेति । अन्योपभोग्यानामपि स्वयंभोगेसत्त्वं तस्मादित्युच्यते । तथाऽपि तेषां मृतानामशरीरिणां कथं मुख्योपभोगः संभवतीत्याशङ्क्याऽऽह—शरीरं चेति । कथमपां चन्द्रलोके तद्देहारम्भकत्वं तदाह—तदुक्तमिति । अथापां सोमत्वमेवात्र प्रतीयते न तु कर्मिदेहारम्भकत्वमित्याशङ्क्याऽऽह—ता आप इति । कर्मसमवायिनीनामपां कर्मापूर्वद्वारा यजमानदेहप्रतिष्ठानां कथं द्युलोकप्रवेशादि संभवतीत्याशङ्क्याऽऽह—अन्त्यायां चेति । अद्भिरारब्धस्य शरीरस्य भोगायतनत्वं दर्शयति—तदारब्धेनेति ॥ ४ ॥

तस्मिन्यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति ॥ ५ ॥

यावत्तदुपभोगनिमित्तस्य कर्मणः क्षयः संपतन्ति येनेति संपातः कर्मणः क्षयो यावत्संपातं यावत्कर्मणः क्षय इत्यर्थः । तावत्तस्मिंश्चन्द्रमण्डल उषित्वाऽथानन्तरमेतमेव वक्ष्यमाणमध्वानं मार्गं पुनर्निवर्तन्ते । पुनर्निवर्तन्त इति प्रयोगात्पूर्वमप्यसकृच्चन्द्रमण्डलं गता निवृत्ताश्चाऽऽसन्निति गम्यते । तस्मादिह लोके इष्टादिकर्मोपचित्य चन्द्रं गच्छन्ति । तत्क्षये चाऽऽवर्तन्ते । क्षणमात्रमपि तत्र स्थातुं न लभ्यते । स्थितिनिमित्तकर्मक्षयात् । स्नेहक्षयादिव प्रदीपस्य ।

तद्देवानामन्नमित्यादि व्याख्याय तस्मिन्नित्यादि व्याचष्टे—यावदिति । चन्द्रलोकस्तच्छब्दार्थः । यावत्संपातमुषित्वेति श्रूयते कथमन्यथा व्याख्यायते तत्राऽऽह—संपतन्तीति । पुनःशब्दप्रयोगस्य तात्पर्यमाह—पुनरिति । अथेत्यादिवाक्यार्थमुपसंहरति—तस्मादिति । तच्छब्दपरामृष्टं हेतुं स्पष्टयति—स्थितीति । यथा दीपस्य स्नेहक्षये स्थितिनिमित्ताभावादस्थितिस्तथा चन्द्रलोके स्थितिनिमित्तस्येष्टादेर्भोगेन क्षयात्तत्र स्थित्यसंभवादावृत्तिरेवेत्यर्थः ।

तत्र किं येन कर्मणा चन्द्रमण्डलमारूढस्तस्य सर्वस्य क्षये तस्मादवरोहणं किंवा सावशेष इति । किं ततः । यदि सर्वस्यैव क्षयः कर्मणश्चन्द्रमण्डलस्थस्यैव मोक्षः प्राप्नोति । तिष्ठतु तावत्तत्रैव मोक्षः स्यान्न वेति । तत आगतस्येह शरीरोपभोगादि न संभवति । ततः शेषेणेत्यादिस्मृतिविरोधश्च

---

१ ख. ग. °पयोगा° । २ ञ. °गवत्त्वं । ३ ट. °देहे प्रतिष्ठितानां । ४ ठ. ड. °वदु° । ५ क. °सृष्टहे° । ६ घ. ङ. च. ण. °हति किं° । ७ क. ग. ट. °प्नोतीति ।

स्यात् । नन्विष्टापूर्तदत्तव्यतिरेकेणापि मनुष्यलोके शरीरोपभोगनिमित्तानि कर्माण्यनेकानि संभवन्ति । न च तेषां चन्द्रमण्डल उपभोगः । अतोऽक्षीणानि तानि । यन्निमित्तं चन्द्रमण्डलमारुढस्तान्येव क्षीणानीत्यविरोधः । शेषशब्दश्च सर्वेषां कर्मत्वसामान्यादविरुद्धः । अत एव च तत्रैव मोक्षः स्यादिति दोषाभावः । विरुद्धानेकयोन्युपभोगफलानां च कर्मणामेकैकस्य जन्तोरारम्भकत्वसंभवात् । न चैकस्मिञ्जन्मनि सर्वकर्मणां क्षय उपपद्यते । ब्रह्महत्यादेश्चैकैकस्य कर्मणोऽनेकजन्मारम्भकत्वस्मरणात् । स्थावरादिपाप्मानां चात्यन्तमूढानामुत्कर्षहेतोः कर्मण आरम्भकत्वासंभवात् । गर्भभूतानां च स्रंसमानानां कर्मासंभवे संसारानुपपत्तिः । तस्मान्नैकस्मिञ्जन्मनि सर्वेषां कर्मणामुपभोगः ।

तस्मिन्यावत्संपतमुषित्वेत्यत्र विचारयति—तत्रेति । तस्य चन्द्रमण्डलप्रापकस्यातिरिक्तस्य च सर्वस्य कर्मणः क्षये सतीति यावत् । सावशेषो भुक्तात्कर्मणः सकाशादतिरिक्तेन केनचित्कर्मणा सहितः सन्नित्यर्थः । पक्षद्वयेऽपि फलं पृच्छति—किं तत इति । तत्राऽऽद्यं पक्षं पूर्वपक्षमुखेन(ण) प्रतिचिक्षिप्सुस्तत्फलमाह—यदीति । तत्रैव दूषणान्तरमाह—तिष्ठन्विति । चन्द्रमण्डलं सप्तम्यर्थः । ततश्चन्द्रमण्डलादित्येतत् । इहेत्येतल्लोकोक्तिः । आदिपदं शुभाशुभकर्मानुसारिसर्वव्यापारसंग्रहार्थम् । न केवलं सर्वकर्मक्षयपक्षे मुक्तिरेव विरुध्यते किंतु स्मृतिश्चेत्याह—तत इति । चन्द्रलोके भोक्तव्यस्य कर्मणो भोगेन क्षयादूर्ध्वं शेषेणानुपभुक्तेन कर्मणा जन्म प्रतिपद्यन्त इत्याद्या स्मृतिः सर्वकर्मक्षयपक्षे विरुध्यत इत्यर्थः । सर्वकर्मक्षयपक्षे पूर्वपक्षिणोऽन्यथावादिना प्रतिक्षिप्ते सावशेषपक्षमुत्तरवादी प्रतिपद्यते—नन्विति । तान्यपि चन्द्रमण्डले भुक्तान्येवेति नावशेषोऽस्तीत्याशङ्क्याऽऽह— न चेति । न हि सर्वकर्मवशाच्चन्द्रमण्डलप्राप्तिरिति भावः । तर्हि चन्द्रमण्डले कर्मफलोपभोगाभावादलं तदारोहेणेत्याशङ्क्याऽऽह— यन्निमित्तमिति । अविरोधश्चन्द्रमण्डले भोगस्य शेषकर्मसद्भावस्य चेति शेषः । यत्तु ततः शेषेणेत्यादिस्मृतिविरोध इति तत्राऽऽह—शेषशब्दश्चेति । निःशेषेष्वपि भुक्तेषु कर्मस्वभुक्तकर्मसु शेषशब्दो न विरुध्यतेऽभुक्तानां कर्मणां कर्मत्वस्य तुल्यत्वान्नात्र सावशेषपक्षे स्मृतिविरोधोऽस्तीत्यर्थः । यच्चन्द्रमण्डलस्थस्यैव मोक्षः स्यादिति तत्राऽऽह—अत एवेति । शेषकर्मसद्भावादेवेति यावत् । इतश्च कर्मशेषसिद्धिरित्याह—विरुद्धेति । आरम्भकत्वसंभवादेकजात्युपभोग्यकर्मक्षयेऽपि कर्मशेषः संभवतीति शेषः । अथैकस्मिञ्जन्मनि सर्वाणि क्षीयन्ते कर्माशयस्यैकभवि-

१ ङ. °पत्तेः । त° । २ क. ग. ट. °पक्षिमु° । ३ ग. ट. °चिकीर्षुस्त° । ४ ग. ट. °स्तत्त्वफल° । ५ ग. ट. °णा म्र° ।

कत्वादित्याशङ्क्याऽऽह—न चेति । ऐकभविकन्यायस्योपरिष्टान्निराकरिष्यमाणत्वादित्यर्थः । इतश्च शेषकर्मसिद्धिरित्याह—ब्रह्महत्यादेश्चेति । श्वसूकरखरोष्ट्राणामित्यादिस्मरणम् । घृतमाण्डस्नेहशेषवद्दुष्कृतस्यैव कर्मणः शेषात्पुनरावृत्तिर्भविष्यतीत्यत आह—स्थावरादीति । शेषकर्मसिद्धौ हेत्वन्तरमाह—गर्भभूतानामिति । कर्मशेषसद्भावमुपसंहरति—तस्मादिति । एकस्यापि कर्मणोऽनेकजन्महेतुत्वं तच्छब्दार्थः ।

यत्तु कैश्चिदुच्यते सर्वकर्माश्रयोपमर्देन प्रायणे कर्मणां जन्मारम्भकत्वम् । तत्र कानिचित्कर्माण्यनारम्भकत्वेनैव तिष्ठन्ति कानिचिज्जन्माऽऽरभन्त इति नोपपद्यते । मरणस्य सर्वकर्माभिव्यञ्जकत्वात्स्वगोचराभिव्यञ्जकप्रदीपवदिति । तदसत् । सर्वस्य सर्वात्मकत्वाभ्युपगमात् । न हि सर्वस्य सर्वात्मकत्वे देशकालनिमित्तावरुद्धत्वात्सर्वात्मनोपमर्दः कस्यचित्कचिदभिव्यक्तिर्वा सर्वात्मनोपपद्यते । तथा कर्मणामपि साश्रयाणां भवेत् । यथा च पूर्वानुभूतमनुष्यमयूरमर्कटादिजन्माभिसंस्कृता विरुद्धानेकवासना मर्कटत्वप्रापकेन(ण) कर्मणा मर्कटजन्माऽऽरभमाणेन नोपमृद्यन्ते तथा कर्माण्यप्यन्यजन्मप्राप्तिनिमित्तानि नोपमृद्यन्त इति युक्तम् । यदि हि सर्वाः पूर्वजन्मानुभववासना उपमृद्येरन्मर्कटजन्मनिमित्तेन कर्मणा मर्कटजन्मन्यारब्धे मर्कटस्य जातमात्रस्य मातुः शाखायाः शाखान्तरगमने मातुरुदरसंलग्नत्वादिकौशलं न प्राप्नोति । इह जन्मन्यनभ्यस्तत्वात् । न चातीतानन्तरजन्मनि मर्कटत्वमेवाऽऽसीत्तस्येति शक्यं वक्तुम् । "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" इति श्रुतेः । तस्माद्वासनावन्नाशेषकर्मोपमर्द इति शेषकर्मसंभवः । यत एवं तस्माच्छेषेणोपभुक्तात्कर्मणः संसार उपपद्यत इति न कश्चिद्विरोधः ।

मतान्तरमुत्थापयति—यच्चिवति । यावत्प्रवृत्तफलं कर्म न क्षीयते तावत्प्रवृत्तिप्रतिबन्धादन्यानि कर्माणि स्वफलं नाऽऽरभन्ते । मरणकाले तु प्रतिबन्धकाभावात्सर्वकर्माश्रयसंघातोपमर्देन तेषामुत्तरशरीरारम्भकत्वमविरुद्धमित्यर्थः । तथाऽपि कथं शेषकर्मसद्भावसिद्धिरित्यत आह—तत्रेति । अनारब्धकर्मणां सर्वेषामुत्तरशरीरारम्भकत्वे सतीति यावत् । प्रायणकाले यानि कर्माण्यभिव्यक्तानि तान्येवोत्तरशरीरारम्भकाणीतरेषां तु न शरीरारम्भकत्वमिति दूषयति—तदसदिति । मधुब्राह्मणोक्तेन

---

१ क. ङ. च. ढ. °म्मान्तरमार° । २ ग. घ. ट. ठ. ड. ढ. °बद्ध° । ३ घ. ठ. ढ. ण. °पि स्वाश्र° । ४ च. ढ. ण. °णां च भ° । ५ घ. ङ. च. ढ. ण. °जन्म प्रार° । ६ ग. ट. ड. पूर्वानु° । ७ च. ठ. °नुभूतवा° । ८ क. ग. ङ. च. ट. ड. ढ. °पयुक्ता° ।

न्यायेन सर्वस्य सर्वात्मकत्वाङ्गीकारादेहस्यापि तथात्वान्न सर्वात्मनोपमर्दोपपत्तिरित्यर्थः । उक्तमर्थमुपपादयितुं सामान्यन्यायमाह—न हीति । सर्वं सर्वस्य कारणं कार्यं चेति न्यायेन सर्वस्य सर्वात्मकत्वे स्थिते सति कस्यचित्क्वचित्सर्वात्मनोपमर्दस्तथाऽभिव्यक्तिर्वा नोपपद्यते । प्रतीयमानोपमर्दादेर्देशविशेषादिकृतत्वादित्यर्थः । उक्तन्यायं प्रकृते योजयति—तथेति । इतश्च कर्मशेषः संभवतीति क्रमवत्तायां दृष्टान्तमाह—यथा चेति । पूर्वं क्रमेणानुभूतानि यानि मनुष्यादिजन्मानि तैरभिसंस्कृताः संपादिता विरुद्धा या भूयस्यो वासनारतज्जातिविशेषप्रापकेन(ण) कर्मणा तस्मिन्नार-भ्यमाणे न निरुध्यन्त इत्यर्थः । दार्ष्टान्तिकमाह—तथेति । दृष्टान्तं विवृणोति—यदि हीति । व्यवहितवासनोच्छेदेऽपि नाव्यवहितदेशो(वासनो)च्छिद्यते तथा चानन्तरजन्मोत्थवासनासामर्थ्यान्मर्कटशिशोर्यथोक्तकौशलमविरुद्धमित्याशङ्क्याऽऽह—न चेति । किंच पूर्वप्रज्ञा चेत्यविशेषेण पूर्वजन्मार्जितवासना जीवमनुगच्छतीति श्रवणादव्यवहित-पूर्वजन्मवासनैव तमन्वेतीति न शक्यं विशेषतो वक्तुमित्याह—तं विद्येति । दृष्टान्तमुपपाद्य दार्ष्टान्तिकं निगमयति—तस्मादिति । शेषकर्मसद्भावे फलितमाह—यत इति । उपभुक्तात्कर्मणः शेषेणेति संबन्धः कश्चिदिति । श्रौतो वा स्मार्तो वा यौक्तिको वा लौकिको वेत्यर्थः ।

कोऽसावध्वा यं प्रति निवर्तन्त इत्युच्यते । यथेतं यथागतं निवर्तन्ते । ननु मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमिति गमनक्रम उक्तो न तथा निवृत्तिः । किं तर्ह्याकाशाद्वायुमित्यादि, कथं यथेतमित्युच्यते । नैष दोषः । आकाशप्राप्तेस्तुल्यत्वात्पृथिवीप्राप्तेश्च । न चात्र यथेतमेवेति नियमोऽनेवंविधमपि निवर्तन्ते । पुनर्निवर्तन्त इति तु नियमः । अत उपलक्षणार्थमेतद्यथेतमिति । अतो भौतिकमाकाशं तावत्प्रतिपद्यन्ते । यास्तेषां चन्द्रमण्डले शरीरारम्भिका आप आसंस्तास्तेषां तत्रोपभोगनिमित्तानां कर्मणां क्षये विलीयन्ते । घृतरूंस्थानमिवाग्निसंयोगे ता विलीना अन्तरिक्षस्था आकाशभूता इव सूक्ष्मा भवन्ति ता अन्तरिक्षाद्वायुर्भवन्ति । वायुर्भूतिष्ठा वायुभूता इतश्चामुतश्चोह्यमानास्ताभिः सह क्षीणकर्मा वायुभूतो भवति । वायुर्भूत्वा ताभिः सहैव धूमो भवति । धूमो भूत्वाऽभ्रमब्भरणपात्ररूपो भवति ॥ ५ ॥

एतमेवाध्वानमिति प्रकृतमध्वानं प्रश्नपूर्वकं विशदयति—कोऽसावित्यादिना ।

---

१ ग. ठ. °ध्यादीनि ज° । २ क. ग. छ. °पयुक्ता° । ३ ग. घ. ङ. च. ट. ठ. °त्याद्या क° । ४ ख. ग. ञ. ढ. °प्रविष्टा वा° ।

यथेतमित्युक्तमाक्षिपति—नन्विति । किं यथेतमित्येतदेव न संभवति किंवा यथेतमेवेति नियमो नोपपद्यते तत्राऽऽद्यं दूषयति—नैष दोष इति । द्वितीयं प्रत्याह—न चेति । अत्रेति निवृत्तिरुक्ता । अनेवंविधमपीति । यथा गतिक्रमो दर्शितो न तथा निवृत्तिर्नियता किं तु विधान्तरेणापि संभवतीत्यर्थः । निवृत्तेः क्रमनियमाभावे कीदृशो नियमो विवक्षित इत्याशङ्क्याऽऽह—पुनरिति । केनाभिप्रायेण तर्हि यथेतमित्युक्तमत आह—अत इति । गतिक्रमवन्निवृत्तिक्रमे नियमाभावोऽतःशब्दार्थः । उक्तं च यथेतमनेवं चेति । निवृत्तिनियमे फलितमाह—अत इति । परमात्मानं व्यावर्तयितुं भौतिकमित्युक्तम् । कथं पूर्वसिद्धाकाशतादात्म्यापत्तिरवरोहतां सिध्यतीत्याशङ्क्य तत्साम्यगमनमेव तद्भावापत्तिरित्युपचर्यते स्वाभाव्यापत्तिरिति न्यायादित्याह—यास्त्वेषामिति । घृतस्य संस्थानं काठिन्यम् । तास्वाकाशभूतासु तत्परिवेष्टिताः कर्मिणोऽध्यवरोहन्तस्तद्भूता इव भवन्तीत्यर्थः । आकाशाद्वायुमित्यस्यार्थं साधयति—ता अन्तरिक्षादिति ॥ ५ ॥

अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्तेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति ॥ ६ ॥

अभ्रं भूत्वा ततः सेचनसमर्थो मेघो भवति । मेघो भूत्वोन्नतेषु प्रदेशेष्वथ प्रवर्षति । वर्षधारारूपेण शेषकर्मा पततीत्यर्थः । त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इत्येवंप्रकारा जायन्ते । क्षीणकर्मणामनेकत्वाद्बहुवचननिर्देशः । मेघादिषु पूर्वेष्वेकरूपत्वादेकवचननिर्देशः । यस्माद्गिरितटदुर्गनदीसमुद्दारण्यमरुदेशादिसंनिवेशसहस्राणि वर्षधाराभिः पतितानाम् । अतस्तस्माद्धेतोर्वै खलु दुर्निष्प्रपतरं दुर्निष्क्रमणं दुर्निःसरणम् । यतो गिरितटादुद्कस्रोतसोह्यमाना नदीः प्राप्नुवन्ति ततः समुद्रं ततो मकरादिभिर्भक्ष्यन्ते । तेऽप्यन्येन । तत्रैव चैं सह मकरेण समुद्रे विलीनाः समुद्रम्भोभिर्जलधरैराकृष्टाः पुनर्वर्षधाराभिर्मरुदेशे शिलातटे वाऽगम्ये पतितास्तिष्ठन्ति कदाचिद्व्यालमृगादिपीता भक्षिताश्चान्यैः । तेऽप्यन्यैरित्येवंप्रकाराः परिवर्तेरन् ।

---

१ च. ततो जलते°। २ ङ. च. °ति धा°। ३ क. °कारा: क्षीणकर्माणो जा°। ४ ण. °स्तद्धे°। ५ ग. ङ. ट. ड. ढ. ण. च म°।

कदाचिदभक्ष्येषु स्थावरेषु जातास्तत्रैव शुष्येरन् । भक्ष्येष्वपि स्थावरेषु जातानां रेतःसिग्देहसंबन्धो दुर्लभ एव बहुत्वात्स्थावराणामित्यतो दुर्निष्क्रमणत्वम् ।

उन्नतेषु समुद्रादिव्यतिरिक्तेषु प्रदेशेष्विति यावत् । त इत्यनुशयिनो निर्दिश्यन्ते । इहेति पृथिवी कथ्यते । कथमस्मिन्वाक्ये बहुवचनेनानुशयिनां बहूक्त्या निर्देशः कृतस्तत्राऽऽह—क्षीणकर्मणामिति । कथं तर्हि मेघो भूत्वा प्रवर्षतीत्यादावेकवचन निर्देशस्तत्राऽऽह—मेघादिष्विति । ये पूर्वं मेघादयो नभोन्तास्तेषु प्रत्येकमभिमानिदेवतानामेकरूपत्वात्तदुपश्लिष्टानामनुशयिनामप्येकवचनेन निर्देशो युक्त इत्यर्थः । अतो वै खल्वित्यादिवाक्यं व्याचष्टे—यस्मादिति । अनुशयिनां दुःशकं निःसरणमित्युक्तं प्रपञ्चयति—यत इत्यादिना । मकरादिभिर्भक्षितानामनुशयिनां तेभ्यस्तत्समानजातीयत्वेन समुद्भवो भविष्यतीति चेन्नेत्याह—तेऽपीति । मकरादयोऽपि जलचारिभिरन्यैर्भक्ष्यन्ते तथा च समुद्रे पतितानामनुशयिनां तत्रैव लयः स्यादित्यर्थः । नन्वेवमनुशयिनः समुद्रे लीना न ततः पुनरुद्धर्तुं शक्यन्ते । तथा च कृतविनाशः स्यादित्याशङ्क्याऽऽह—जलधरैरिति । समुद्राम्भोभिरिति तृतीया सहार्थे । तर्हि सर्पव्याघ्रोपभुक्तानामनुशयिनां तत्समानजातीयदेहभोगः स्यादिति चेन्नेत्याह—भक्षिताश्चेति । यैस्तर्हि सर्पादयो भक्ष्यन्ते तेभ्यस्तत्समानजातीयत्वेनानुशयिनामुद्भवः स्यादिति चेन्नेत्याह—तेऽपीति । तथाऽपि यथोक्तरीत्या परिवर्तनात्ते रेतःसिग्योगमपि यदा कदाचित्प्रपद्येरन्निति चेन्नेत्याह—कदाचिदिति । तथाऽपि भक्ष्येषु जातानां रेतःसिग्योगः सुलभः स्यादिति चेन्नेत्याह—भक्ष्येष्वपीति । इतिशब्दो यच्छब्देन पूर्वेण संबध्यते ।

अथवाऽतोऽस्माद्व्रीहियवादिभावाद्दुर्निष्पपतरं दुर्निर्गमतरम् । दुर्निष्पपतरमिति तकार एको लुप्तो द्रष्टव्यः । व्रीहियवादिभावो दुर्निष्पपतस्तस्मादपि दुर्निष्पपतद्रेतःसिग्देहसंबन्धो दुर्निष्पपततर इत्यर्थः । यस्मादूर्ध्वरेतोभिर्बालैः पुंस्त्वरहितैः स्थविरैर्वा भक्षिता अन्तराले शीर्यन्ते । अनेकत्वादन्नादानाम् । कदाचित्काकतालीयन्यायेन रेतःसिग्मिर्भक्ष्यन्ते यदा तदा

---

१ क. ग. ठ. °नुशायि°। २ क. ग. ञ. ट. °नुशायि°। ३ क. ख. ग. ञा. ट. ण. °नुशायि°। ४ क. ग. छ. ञ. ट. °नुशायि° । ५ क. ग. ञ. ट. °नुशायि° । ६ ख. छ. ञा. ण. °द्रे परिप°। ७ क. ग. ट. °नुशायि° । ८ क. ग. ठ. °नुशायि°। ९ ख. छ. ञ. ण. न ङ° । १० ख. छ. ञा. ण. °दित्यत आह । ११ क. ग. ञा. ट. °नुशायि°। १२ ख. छ. ञा. ण. यैर्हि । १३ क. ट. °नुशायि° । १४ क. ग. घ. च. ट. ठ. ण. °मनत° । १५ ख. घ. ठ. °पतत° । १६ ख. च. ञ. °ले शिशी° । १७ ख. ग. घ. ङ. ञ. ढ. ठ. ढ. ण. °र्लीयेन रे° । १८ क. °न्यायेन रे° ।

रेतःसिग्भावं गतानां कर्मणो वृत्तिलाभः । कथम् । यो यो ह्यन्नमत्त्यनुशयिभिः संश्लिष्टं रेतःसिग्यश्च रेतः सिञ्चत्यृतुकाले योषिति तद्भूय एव तदाकृतिरेव भवति । तदवयवाकृतिभूयस्त्वं भूय इत्युच्यते रेतोरूपेण योषितो गर्भाशयेऽन्तः प्रविष्टोऽनुशयी । रेतसो रेतःसिगाकृतिभावितत्वात् । " सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतम् " इति हि श्रुत्यन्तरात् । अतो रेतःसिगाकृतिरेव भवतीत्यर्थः ।

पूर्वमतःशब्दो हेतुपरतया व्याख्यातः संप्रति व्रीह्याद्यवधिवाचकत्वेन तं व्याचष्टे—अथवेति । दुर्निष्पततरमिति तकारसहिते पाठे सति विवक्षितमर्थमाह—व्रीहियवादीति । तत्र हेतुमाह—यस्मादिति । तर्हि तेषामन्तराले विशीर्णानां देहमागित्वाभावादनुशयवैयर्थ्यमित्याशङ्क्याऽऽह—कदाचिदिति । काकतालीयया वृत्त्या यादृच्छिकन्यायेनेति यावत् । अनुशयाख्यस्य कर्मणो भाविदेहारम्भैकार्थत्वान्मुख्यं प्रश्नपूर्वकं विवृणोति—कथमित्यादिना । अनुशयिनो रेतःसिगाकारभाक्त्वे हेतुमाह—रेतस इति । तस्य रेतःसिगाकृत्या तदंशेन भावितत्वात्संस्कृतत्वात्तदङ्गसंभूतत्वात्तद्रूपेण गर्भाशयमनुप्रविष्टोऽनुशयी रेतःसिगाकृतिर्भवतीत्यर्थः । रेतसो रेतःसिगङ्गसमुत्थत्वे प्रमाणमितरेयकश्रुतिरित्याह—सर्वेभ्य इति । रेतोरूपेण गर्भाशयं प्रविष्टस्य रेतःसिगाकारत्वमुक्तं निगमयति—अत इति ।

तथा हि । पुरुषात्पुरुषो जायते गोर्गवाकृतिरेव न जात्यन्तराकृतिस्तस्माद्युक्तं तद्भूय एव भवतीति । ये त्वन्येऽनुशयिभ्यश्चन्द्रपण्डलमनारुह्यैव पापकर्मभिर्घोरैर्व्रीहियवादिभावं प्रतिपद्यन्ते पुनर्मनुष्यादिभावं तेषां नानुशयिनामिव दुर्निष्पततरम् । कस्मात् । कर्मणा हि तैर्व्रीहियवादिदेह उपात्त इति तदुपभोगनिमित्तक्षये व्रीह्यादिस्तम्बदेहविनाशे यथाकर्मार्जितं देहान्तरं नवं नवं जलौकावत्संक्रमन्ते सविज्ञाना एव । " सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति " इति श्रुत्यन्तरात् ।

अनुशयिनो रेतःसिगाकारत्वे लौकिकानुभवमनुकूलयति—तथा हीति । चन्द्रस्थलस्खलितानामवरोहतां व्रीह्यादिदेहसंश्लिष्टानां द्राघीयसा कालेन देहान्तरलाभश्चेत्तर्हि

---

१ ग. घ. ट. ढ. ण. °नुशायि° । २ ग. ङ. ट. ड. ढ. °ति । रे° । ३ ग. घ. च. ट. ठ. ड. ण. योषिति । ४ ङ. °येऽनुप्र° । ५ च. °नुशायी° । ६ क. ग. ट. °म्भार्थं मुख्यं । ७ छ. झ. ण. °न्मुख्यप्र° । ८ क. °नुशायि° । ९ ग. झ. ड. ण. °नुशायि° । १० क. घ. च. °रुह्यैव । ङ. °रुह्यैवं पा° । ११ क. ङ. °वंगतास्तेषां । १२ क. ख. घ. छ. ढ. °नुशायि° । १३ ग. घ, ट, ठ. ढ. °वं ज° । १४ घ. ङ. ठ. ण. जलौका° । १५ छ. °नुशायि° ।

व्रीह्यादिदेहाभिमानिनामपि दुःशकं निष्क्रमणं व्रीह्यादिदेहबन्धविशेषादित्यत आह— ये त्विति । व्रीह्यादिदेहसंबन्धाविशेषे कुतस्तद्देहभाजां ततो निःसरणमशक्यं न भवतीत्याशङ्क्य विशेषमाह—कस्मादित्यादिना । 'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः" इत्यादिश्रुतिस्मृत्योर्येषां कर्मानिमित्तं स्थावरं जन्म तेषां कर्मक्षय एवावधिः । अवरोहतां तु कर्मासंकीर्तनाद्वैषम्यमित्यर्थः । यथा जलूका तृणात्तृणान्तरं दीर्घभूता संक्रमते न तथाऽनुशयिनो व्रीह्यादिदेहभाजोऽपि तत्त्यागेन देहान्तरं गच्छन्ति । तद्विषयविज्ञानवन्त एवं गच्छन्तीत्यत्र बृहदारण्यकश्रुतिं प्रमाणयति— सविज्ञान इति ।

यद्यप्युपसंहृतकरणाः सन्तो देहान्तरं गच्छन्ति तथाऽपि स्वप्नवद्देहान्तरप्राप्तिनिमित्तकर्मोद्भावितवासनाज्ञानेन सविज्ञाना एव देहान्तरं गच्छन्ति । श्रुतिप्रामाण्यात् । तथाऽर्चिरादिना धूमादिना च गमनं स्वप्न इवोद्भूतविज्ञानेन । लब्धवृत्तिकर्मनिमित्तत्वाद्गमनस्य । न तथाऽनुशयिनां व्रीह्यादिभावेन जातानां सविज्ञानमेवं रेतःसिग्योषिद्देहसंबन्ध उपपद्यते । न हि व्रीह्यादिलवनकण्डनपेषणादौ च सविज्ञानानां स्थितिरस्ति ।

अथोपसंहृतकरणानां विज्ञानेन कारणसंभवात्कथं सविज्ञानत्वं तत्राऽऽह—यद्यपीति । दृष्टकारणाभावेऽप्यदृष्टमेवैकं वासनात्मकं ज्ञानोत्पत्तौ निमित्तमिति तेन सविज्ञाना एव गच्छन्ति देहान्तरमित्यत्र हेतुमाह—श्रुतिप्रामाण्यादिति । श्रुतिरत्र बृहदारण्यकश्रुतिः । यथा सविज्ञानानामेव व्रीह्यादिदेहान्तरगमनं तथा ज्ञानिनामर्चिरादिना कर्मिणां धूमादिना च गमनं स्वप्नवदुद्भूतवासनात्मकविज्ञानेन सविज्ञानानामेवेत्याह— तथेति । तेषां सविज्ञानत्वे हेतुमाह—लब्धवृत्तीति । अनुशयिनामपि तर्हि व्रीह्यादिषु संश्लिष्टानां रेतःसिगादिदेहसंबन्धः सविज्ञानानामेवेति चेन्नेत्याह—न तथेति । अनुपपत्तौ हेतुमाह—न हीति । व्रीह्यादिसंश्लिष्टानामनुशयिनां सविज्ञानत्वे तल्लवनादौ तज्जीववत्तेषामपि प्रवासप्रसङ्गान्न रेतःसिग्देहसंबन्धः सिध्येदित्यर्थः ।

ननु चन्द्रमण्डलादप्यवरोहतां देहान्तरगमनस्य तुल्यत्वाज्जलूकावत्सविज्ञानतैव युक्ता । तथा सति घोरो नरकानुभव इष्टापूर्तादिकारिणां चन्द्र-

---

१ ग. ट. 'दिस्मृ' । २ ख. ग. छ. ट. ण. 'वरज' । ३ ख. ग. छ. ञ. ट. ण. 'व न ग' । ४ ख. च. ञ. ठ. ड. 'नुशायि' । ५ ङ. ण. 'ज्ञानानामे' । ६ ग. ट. ठ. ढ 'व च रे' । ७ ग. ट. 'ने कर' । ८ ख. छ. ञ. ण. 'ज्ञानमे' । ९ घ. ङ. ण 'ज्जलौका' । १० ग. च. ट. ठ. ड. ढ. 'था च स' ।

मण्डलादारभ्य प्राप्तो यावद्ब्रह्माणादिजन्म । तथा च सत्यनर्थायैवेष्टापूर्तादयु-पासनं विहितं स्यात् । श्रुतेश्चामाण्यं प्राप्तं वैदिकानां कर्मणामनर्थानुबन्धि-त्वात् ।

व्रीह्यादिषु देहान्तरं गच्छत्सु विज्ञानत्वोपलम्भादनुशयिष्वपि देहान्तरप्राप्तेरविशेषा-दुक्तं सविज्ञानत्वमिति शङ्कते— नन्विति । तृणात्तृणान्तरं प्रति जलूकागमनवद्वरो-हतामपि देहाद्देहान्तरं प्रति गमनस्य तुल्यत्वाद्व्रीह्यादिवदुक्ता सविज्ञानतेति योजना । अस्तु तेषां सविज्ञानत्वं का हानिरित्यत आह — तथा सतीति । इष्टापूर्तादिकारि-णामन्तराले नरकानुभवे । तथा च सति तदनुष्ठानस्यानर्थार्थं विहितत्वे श्रेयःसाधन-विषयककर्मकाण्डं विरुध्येतेत्याह — श्रुतेश्चेति ।

न । वृक्षारोहणपतनवद्विशेषसंभवात् । देहाद्देहान्तरं प्रतिपित्सोः कर्मणो लब्ध-वृत्तित्वात्कर्मणोद्भावितेन विज्ञानेन सविज्ञानत्वं युक्तम् । वृक्षाग्रमारोहत इव फलं जिघृक्षोः । तथाऽर्चिरादिना गच्छतां सविज्ञानत्वं भवेत् । धूमादिना च चन्द्रमण्डलमारुरुक्षताम् । न तथा चन्द्रमण्डलादवरुरुक्षतां वृक्षाग्रादिव प-ततां सचेतनत्वम् । यथा च मुद्गराद्यभिहतानां तदभिघातवेदनानिमित्तसंमू-र्च्छितप्रतिबद्धकरणानां स्वदेहेनैव देशाद्देशान्तरं नीयमानानां विज्ञानशून्यता दृष्टा तथा चन्द्रमण्डलान्मानुषादिदेहान्तरं प्रत्यवरुरुक्षतां स्वर्गभोगनिमित्त-कर्मक्षयान्मृदिताद्देहानां प्रतिबद्धकरणानाम् । अतस्तेऽपरित्यक्तदेहबीजभूता भिरद्भिर्मूर्छिता इवाऽऽकाशादिक्रमेणेमामवरुह्य कर्मनिमित्तजातिस्थावरदेहैः संश्लिष्यन्ते प्रतिबद्धकरणतयाऽनुद्भूतविज्ञाना एव ।

यथा बुद्धिपूर्वं वृक्षमारोहतां सविज्ञानत्वेऽपि तस्मादबुद्धिपूर्वं पततां न सविज्ञानत्वं विज्ञायते तथा चन्द्रमण्डलमारोहतां सविज्ञानत्वेऽपि ततोऽवरोहतां नैव तदस्ति । उद्भूतकर्माभावात् । इत्यारोहावरोहयोर्ज्ञानविशेषसंभवान्नैवमिति परिहरति— न वृक्षेति । संग्रहवाक्यं विवृणोति— देहादित्यादिना । चकारादुच्चतां सविज्ञानत्वं भवेदिति संबन्धः । अवरोहतां जीवानां सर्वथा विज्ञानशून्यत्वमयुक्तं तेषां चैतन्यस्वा-भाव्यादवृक्षात्पततामपि विज्ञानमात्रमस्त्येवेत्याशङ्क्य दृष्टान्तरमाह— यथा चेति । तेन मुद्गरादिना योऽभिघातस्तेन हेतुना यद्वेदनाख्यं निमित्तं तेन संमूर्छितानि संदष्टानि प्रतिबद्धानि वा करणानि येषां तेषामिति यावत् । मृदितोऽभिनष्टो देहोऽस्मयः

---

१ ख. ग. ङ. ट. ड. °र्थायेष्टा° । २ ङ. ठ. ड. ण. °ष्टाद्यु° । ३ ख. ग. छ. ञ. ट. ण. °हान्त° । ४ ख. ग. छ. ज. ण. °ष्टादि° । ५ च. ठ. ण. तत्फलं । ६ ङ. स्वर्भोग° । ७ च. °हभावी° । ८ ख. छ. ञ. ण. °पूर्वकं वृ° । ९ क. ख ङ. ञ. °पूर्वकं प° । १० ख. छ. ञ. ण. °तनात्म्य° ।

स्थूलो देहो येषां तेषां तत एव प्रतिबद्धकरणानां युक्ता विज्ञानशून्यतेति संबन्धः। यथोक्तदृष्टान्तवशाच्चन्द्रमण्डलादवरोहन्तो विज्ञानशून्याः सिध्यन्तीति निगमयति- अत इति। तथाऽपि मूर्छितानां स्थूलदेहसद्भावादेशान्तरगमनं युक्तम्। अवरोहतां तु तदभावे कथं व्रीह्यादिभावः संभवतीत्यत आह—अपरित्यक्तेति। न परित्यक्तं देहभावस्य बीजं कर्मापूर्वं याभिस्ताभिरङ्गिरुपहिता जीवा मूर्छितवद्विज्ञानशून्या गमनादिक्रमेण पृथिवीं प्राप्य कर्मफलभूतजातिस्थावरशरीरैः संश्लेष्यन्त इति संबन्धः। स्थावरदेहसंबन्धित्वोक्तदूतजीववत्तदा सविज्ञानत्वं संभवतीत्याशङ्क्याऽऽह—प्रतिबद्धेति व्रीह्यादिसंश्लेषावस्थायामनुशयिनां कर्मणोऽनुद्भूतवृत्तित्वात्करणानां च तत्र वृत्तिलाभाभावादनुद्भूतविज्ञानत्वं युक्तमित्यर्थः।

तथा लवनकण्डनपेषणसंस्कारभक्षणरसादिपरिणामरेतःसेककालेषु मूर्छितवदेव। देहान्तरारम्भकस्य कर्मणोऽलब्धवृत्तित्वात्। देहबीजभूताप्संबन्धापरित्यागेनैव सर्वास्ववस्थासु वर्तन्त इति जलूकावच्चेतनावत्त्वं न विरुध्यते। अन्तराले त्वविज्ञानं मूर्छितवदेवेत्यदोषः।

न केवलं व्रीह्यादिसंश्लेषकालेऽनुद्भूतविज्ञानत्वं किंतु व्रीह्यादेर्लवनादिकालेऽपीत्याह—तथेति। पाकः संस्कारः। रसादीत्यादिशब्देन शोणितमांसमेदोऽस्थिमज्जरेतांस्युच्यन्ते। तस्मिन्काले मूर्छितवदनुद्भूतविज्ञानत्वे देहाद्बहिर्निर्गतानां प्राग्देहान्तरप्राप्तेस्तदस्त्येवेति हेतुमाह—देहेति। अलब्धवृत्तित्वादिति च्छेदः। कथं पुनरनुशयिनां विज्ञानशून्यत्वे तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसंहरतीत्यादौ सचेतना जलूका दृष्टान्तत्वेनोपादीयते तत्राऽऽह—देहबीजभूतेति। सर्वास्ववस्थासु तासु व्रीह्यादिसंश्लेषलवनादिदशादीति यावत्। न चेतनावत्त्वं जलूकादृष्टान्ते विवक्षितं किं तु सातत्यमात्रमिति भावः। जलूकावत्त्वं जलूकासादृश्यमनुशयेनेत्यर्थः। आरोहतां सविज्ञानत्वमवरोहतां विज्ञानरहित्यमित्युपाद्याऽऽरोहतामपि यावत्स्वस्थानेभ्यः करणान्युपसंहृत्य हृदयेऽवस्थानं तावदेव सविज्ञानत्वं न देहाद्बहिर्निर्गतानां प्राग्देहान्तरप्राप्तेस्तदस्त्यनुशयिनां तु चन्द्रमण्डलादवरुक्षतामपि न भाविदेहपर्यन्ता वासना दीर्घा भवति प्रमाणाभावादित्याह—अन्तराले त्विति। चन्द्रमण्डलादवरोहतां देहान्तरगमनस्य तुल्यत्वेऽपि विज्ञानशून्यत्वमदुष्टमित्युपसंहरति—इत्यदोष इति।

न च वैदिकानां कर्मणां हिंसायुक्तत्वेनोभयहेतुत्वं शक्यमनुमातुम्।

---

१ ख. छ. ञ. ण. 'भिरु'। २ ख. छ. ञ. ण. °त्वाद्बृ°। ३ ख. ग. ङ. ञ. ट. ठ. ड. °हार°। ४ घ. ङ. च. जलौका°। ५ ञ. °नुशायि°। ६ ग. घ. ट. ठ. ड. ढ. ण. °यसाधनत्वं।

हिंसायाः शास्त्रचोदितत्वात् । " अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः " इति श्रुतेः शास्त्रचोदिताया हिंसाया नाधर्महेतुत्वमभ्युपगम्यते । अभ्युपगतेऽप्यधर्महेतुत्वे मन्त्रैर्विषादिवत्तदपनयोपपत्तेर्न दुःखकार्यारम्भकत्वोपपत्तिर्वैदिकानां कर्मणां मन्त्रेणेव विषभक्षणस्येति ॥ ६ ॥

यत्तु हिंसानुग्रहात्मकत्वादिकर्मणां स्थावरत्वमपि तत्फलमेव तथा च वैदिकानां कर्मणामनर्थानुबन्धित्वादप्रामाण्यं श्रुतेरिति तत्राऽऽह—न चेति । उभयहेतुत्वमर्थानर्थहेतुत्वमिति यावत् । अहिंसन्नित्यादिश्रुतेः शास्त्रचोदितवैदिकेषु कर्मसु हिंसा नानर्थहेतुरित्याह—अभ्युपगतेऽपीति । यद्यपि स्वरूपेण हिंसाऽनर्थहेतुरभ्युपगम्यते तथाऽपि तद्युक्तानां वैदिककर्मणां नानर्थारम्भकत्वं यथा स्वरूपेण विषद्रव्यादेर्मरणज्वरादिहेतुत्वेऽपि मन्त्रशर्करादिभिः सहोपयुक्तं सन्न तत्कार्यारम्भकं तथा हिंसायाः स्वतोऽधर्महेतुत्वेऽपि वैदिककर्मनिष्ठाया न तद्धेतुत्वं वैदिकैरेव कर्मभिस्तत्कृतदोषापनयनसिद्धेरित्यर्थः । पूर्वोक्तमेव दृष्टान्तं स्पष्टयति—मन्त्रेणेति । तेन सहोपभुक्तस्य विषस्यानर्थहेतुत्वेन पुष्टिहेतुत्ववद्वैदिककर्मानुप्रविष्टाया हिंसायाः पुरुषार्थत्वमेव । अशुद्धमिति चेन्न । शब्दादिति न्यायादित्यर्थः ॥ ६ ॥

> तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रियोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा ॥ ७ ॥

तत्तत्र तेष्वनुशयिनां य इह लोके रमणीयं शोभनं चरणं शीलं येषां ते रमणीयचरणा रमणीयचरणेनोपलक्षितः शोभनोऽनुशयः पुण्यं कर्म येषां ते रमणीयचरणा उच्यन्ते । क्रौर्यानृतमायावर्जितानां हि शक्य उपलक्षयितुं शुभानुशयसद्भावः । तेनानुशयेन पुण्येन कर्मणा चन्द्रमण्डले भुक्तशेषेणाभ्याशो ह क्षिप्रमेव यदिति क्रियाविशेषणं ते रमणीया क्रौर्यादिवर्जिता योनिमापद्येरन्प्राप्नुयुर्ब्राह्मणयोनिं वा क्षत्रियोनिं वा वैश्ययोनिं वा स्व-

---

१ ख. छ. ञ. ण. °त्तत्वा° । २ ख. छ. ञ. ण. °नां वेदोक्तानां क° । ३ ञ. ण. °पभुक्तं । ४ ग. ट. °पभुक्त° । ५ ख. छ. ञ. ण. °कधर्मा° । ६ घ. ज. ठ. अभ्यासो । ७ च. ठ. अभ्यासो । ८ क. ज. वा शूक° । ९ ख. ग. वा चाण्डा° । १० घ. ञ. च. ङ. ढ. °नुशायि° । ११ घ. ण. पुण्यक° । १२ घ. °भ्यासो ह । १३ ख. ग. घ. ङ. ञ. ट. ठ. ड. ढ. क्षिप्रं य° ।

कर्मानुरूपेण । अथ पुनर्ये तद्विपरीताः कपूयचरणोपलक्षितकर्माणोऽशुभानुशया अभ्यासो[1] हेः[2] यत्ते कपूयां यथाकर्म योनिमापद्येरन्कपूयामेव धर्मसंबन्धवर्जितां जुगुप्सितां योनिमापद्येरञ्श्वयोनिं वा[3] सूकरयोनिं वा[4] चण्डालयोनिं वा स्वकर्मानुरूपेणैव । ये तु रमणीयचरणा द्विजातयस्ते स्वकर्मस्थाश्चेदिष्टादिकारिणस्ते धूमादिगत्या गच्छन्त्यागच्छन्ति च पुनः पुनर्घटीयन्त्रवत् । विद्यां चेत्प्राप्नुयुस्तर्हि[5]दाऽर्चिरादिना गच्छन्ति ॥ ७ ॥

तद्भूय एव भवतीत्येतत्प्रसङ्गागतं परिसमाप्य प्रकृतं श्रुतिव्याख्यानमनुवर्तयति—तत्तत्रेति । अन्याधिष्ठिते पूर्ववदभिलापादिति न्यायेन तेषु व्रीह्यादिषु संश्लिष्टा येऽनुशयिनस्तेषां मध्ये ये केचिदस्मिँल्लोके चन्द्रमण्डलप्राप्तेः प्रागवस्थायामनुष्ठिताभुक्तरमणीयचरणास्ते रमणीयां योनिमापद्येरन्निति संबन्धः । उक्तमेव स्पष्टयति—शोभन इति । कथं रमणीयचरणानुरोधेन शोभनोऽनुशयो लक्ष्यते तत्राऽऽह—क्रौर्येति । ते खल्वनुशयिनो रेतःसिग्योगानन्तरं तेन कर्मणा रमणीयां योनिमापद्येरन्निति यत्तत्क्षिप्रमेवेति योजना[6] । तत्रापि हेतुमाह—स्वकर्मेति । अथेति प्रतीकं गृहीत्वा व्याचष्टे—पुनरिति । तद्विपरीतास्तेभ्यो विलक्षणा इति यावत् । ते कपूयां योनिमशुभानुशयवशाद्रेतःसिग्योगानन्तरमापद्येरन्निति यत्तदपि क्षिप्रमेवेति योजना[7] । तत्रापि विकल्पे कारणमाह—स्वकर्मेति[8] । योनिविकल्पे तृतीयं पन्थानमवतारयितुं पूर्वोक्तौ पन्थानौ संक्षिप्यानुवदति—ये त्विति । शुभानुशयवशाद्ये केचिद्ब्राह्मणादियोनिमापन्नास्ते स्ववर्णाश्रमविहितकर्मनिष्ठाः सन्तो यदीष्टादिकर्म कृतवन्तस्तदा दक्षिणेन पथा चन्द्रं गच्छन्ति । तत्र च भोगैकशेषे भोगेन क्षीणे पुनरवशिष्टेन कर्मणा पृथिवीमागच्छन्ति । एवं घटीयन्त्रवत्पुनः पुनरारोहन्तोऽवरोहन्तश्च केवलकर्मिणो दृश्यन्ते । ये[9]द्द्विजातयः स्वकर्मस्थाः सन्तो ध्यानं लभेरन्नुत्तरेण यानेनेतो ब्रह्मलोकं गच्छन्तीत्यर्थः ॥ ७ ॥

अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयꣳ स्थानं तेनासौ लोको न संपूर्यते तस्माज्जुगुप्सेत तदेष श्लोकः ॥ ८ ॥

---

१ घ. अभ्यासो । २ ङ. °ह क्षिप्रं य° । ३ क. ख. ङ. च. ढ वा शूक° । ४ क. ङ. ङ. ण. वा चाण्डा° । ५ ङ. ढ. ण. °तयः स्व° । ६ क. °ष्टापूर्तादि° । ७ क. ग. च. ट. ठ. °दिना गच्छ° । ८ ख. ङ. च. ढ. ण. °स्ततोऽर्चि° । ९ ख. छ. ञ. ण. °त्तदपि क्षिप्र° । १० ग. ठ. °ना योनिविकल्पहे° । ११ ख. ग. ञ. ढ. ण °भाश° । १२ ग. ढ. °ति । तृ° । १३ ख. छ. ण. °क्तव्यक° ।

यदा तु न विद्यासेविनो नापि[1] ष्टापूर्तादिकर्म सेवन्ते तदाऽथैतयोः पथोर्यथोक्तयोरर्चिर्धूमादिलक्षणयोर्न कतरेणान्यतरेण चनापि यन्ति तानीमानि भूतानि क्षुद्राणि दंशमशककीटादीन्यसकृदावर्तीनि भवन्ति। अत उभयमार्गपरिभ्रष्टा असकृज्जायन्ते म्रियन्ते चेत्यर्थः। तेषां जननमरणसंततेरनुकरणमिदमुच्यते। जायस्व म्रियस्वेतीश्वरनियोगवेष्टेव्यते। जननमरणलक्षणैव कालधर्मणा भवति। न तु क्रियासु भोगेषु वा कालोऽस्तीत्यर्थः। एतत्क्षुद्रजन्तुलक्षणं तृतीयं पूर्वोक्तौ पन्थानावपेक्ष्य स्थानं संसरताम्। येनैवं दक्षिणमार्गगा अपि पुनरागच्छन्त्यनधिकृतानां ज्ञानकर्मणोरगमनमेव दक्षिणेन पथेति। तेनासौ लोको न संपूर्यते। पञ्चमस्तु प्रश्नः पञ्चाग्निविद्यया व्याख्यातः। पथो दक्षिणोत्तरमार्गभेदमपाकृतो दक्षिणोत्तरयोः पथोर्व्यावर्तनाऽपि मृतानामग्नौ प्रक्षेपः सकाशात्तो व्यावर्तनाऽन्येऽर्चिरादिना यन्त्यन्ये धूमादिना पुनरुत्तरदक्षिणायने षण्मासान्नाप्नुवन्तः संयुज्य पुनर्व्यावर्तन्ते। अन्ये संवत्सरमन्ये मासेभ्यः पितृलोकमिति व्याख्याता। पुनरावृत्तिरपि क्षीणानुशयानां चन्द्रमण्डलादाकाशादिक्रमेणोक्ता। अमुष्य लोकस्यापूरणं स्वशब्देनैवोक्तम्। तेनासौ लोको न संपूर्यत इति। यस्मादेवं कष्टा संसारगतिस्तस्माज्जुगुप्सेत। यस्माच्च जन्ममरणजनितवेदनानुभवदुःखक्षणाः क्षुद्रजन्तवो ध्वान्ते च घोरे दुस्तरे प्रवेशिताः सागर इवागाधेऽपारे निराशाश्चोत्तरणं प्रति तस्माच्चैवंविधां संसारगतिं जुगुप्सेत वीभत्सेत घृणी भवेन्मा भूदेवंविध संसारमहोदधौ घोरे पात इति। तदेतस्मिन्नर्थे एष श्लोकः पञ्चाग्निविद्यास्तुतये ॥ ८ ॥

इदानीं तृतीयस्थानमुपदिशति—यदा तिविति। पौनःपुन्येन लोष्टनध्यायैकवचनात्तयोः सर्वप्राणिषु विवक्षातः पुनर्जायन्ते म्रियन्ते चेत्यस्मिन्नर्थे जायस्व म्रियस्वेति प्रयोग इत्याह—तेषामिति। यद्वा सर्वेश्वरो मार्गद्वयभ्रष्टं दृष्ट्वा तं जायस्व म्रियस्वेति प्रेरयत्येतदिहोच्यत इति द्रष्टव्यम्। तेनाविद्यादि वाक्यं व्याचष्टे—येनैवमिति। उक्तया रीत्या निर्गलितान्यप्रतिपत्तिं निश्चित्य प्रतिपत्तिलौकर्यं कथयति—पञ्चमस्त्विति। व्यावर्तनाऽपि व्याख्यातेत्युत्तत्र संबन्धः। मृतानामविदुषां विदुषां चेत्यर्थः। अन्येऽप्यन्तरं विदुषां कर्मिणां च संवत्सरमिति ज्ञानिनो गृह्यन्ते। अन्ये

---

१ क. 'ष्टापूर्तादि'। २ च. ढ. ण. 'पां च ज'। ३ ङ. ङ. ढ. 'स्वेति ज'। ४ ख. च. थ. ण. 'नित्ता चे'। ५ क. 'णत्व'। ६ ङ. 'यापिनो भवन्ति। न। च. 'यातना। ७ क. 'पर्तं भ'। ८ ग. ढ. तत्र। ९ क. 'सु शोभनेषु भो'। १० क. . 'विद्यात्या व्या'। ११ ख. ग अ. ढ. ण. 'क्षणेना'। १२ घ. ढ. ण. जनवद'। १३ ख. ग. घ. ढ. ठ. ङ. दुरुत्तरे। १४ ङ. अ. त. थ्रु'। १५ ग. ढ. 'विधसं'।

तिलोकमिति केवलकर्मिण इति विभागः । क्षीणपुण्यानां चन्द्रलोके भोक्तव्यं कर्म भोगेन क्षपितवतामिति यावत् । स्वरूपमेवानुवदति—तेनेति । किंपर्यमेषां महायासवर्ती तीव्रः संसारगतिरुक्तेत्याशङ्क्याऽऽह—यस्मादिति । तृतीयस्थानस्य कष्टत्वं दृष्टमिति—यस्माच्चेति । जन्मादिना जनिता या वेदना तदनुभवे कृतः क्षणोऽवसरो नान्यत्र येषां तथा । ऽष्ठल इति च्छेदः । तृतीयस्थानवदिहरयोरावृत्तिमत्त्वात्तुल्या कष्टतेत्यभिप्रेत्याह—तस्माच्चेति । संसारगत्युपवर्णनस्य तात्पर्यमुक्त्वा पञ्चाग्निविद्यायामनुष्ठानसिद्ध्यर्थं तस्याः स्तावकं श्लोकमुदाहृत्य व्याचष्टे—तदेतस्मिन्नित्यादिना । पञ्चाग्निविद्यामाहात्म्यं सङ्गम्यर्थः ॥ ८ ॥

स्तेनो हिरण्यस्य सुरां पिबंश्च गुरोस्तल्पमावसन्ब्रह्महा चैते पतन्ति चत्वारः पञ्चमश्चाऽऽचरंस्तैरिति ॥ ९ ॥

स्तेनो हिरण्यस्य ब्राह्मणसुवर्णस्य हर्ता । सुरां पिबन्ब्राह्मणः सन् । गुरोश्च तल्पं दारानावसन् । ब्रह्महा ब्राह्मणस्य हन्ता चेत्येते पतन्ति चत्वारः । पञ्चमश्च तैः सहाऽऽचरन्निति ॥ ९ ॥

॥ ९ ॥

अथ ह य एतानेवं पञ्चाग्नीन्वेद न सह तैरप्याचरन्पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवं वेद य एवं वेद ॥ १० ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य दशमः खण्डः ॥ १० ॥

अथ ह पुनर्यो यथोक्तान्पञ्चाग्नीन्वेद स तैरप्याचरन्महापातकिभिः सह न पाप्मना लिप्यते शुद्ध एव । तेन पञ्चाग्निदर्शनेन पावितो यस्मात्पूतः पुण्यो लोकः प्राजापत्यादिर्यस्य सोऽयं पुण्यलोको भवति य एवं वेद यथोक्तं समस्तं पञ्चभिः प्रश्नैः पृष्टपर्यन्तं वेद । द्विरुक्तिः समस्तप्रश्ननिर्णयप्रदर्शनार्था ॥ १० ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य दशमः खण्डः ॥ १० ॥

---

१ ख. छ. ज. ण. °शयिनां । २ ख. ङ. ञ. ण. भोक्तव्ये कं° । ३ ख. छ. ज. झ. °यौ °ह° । ४ क. ग. घ. ङ. च. ट. ठ. ड. ढ. पतितैः ।

पञ्च महापातकिनः श्लोके निर्दिश्यन्ते न तु पञ्चाग्निविद्यास्तुतिरिह भातीत्याशङ्क्याऽऽह—अथेति । शुद्धत्वे हेतुमाह—तेनेति । कस्येदं फलमित्यपेक्षायां पूर्वोक्तविद्यावन्तमनुवदति—य एवमिति ॥ १० ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य दशमः खण्डः ॥ १० ॥

(अथ पञ्चमाध्यायस्यैकादशः खण्डः) ।

दक्षिणेन पथा गच्छतामन्नभाव उक्तस्तद्देवानामन्नं तं देवा भक्षयन्तीति क्षुद्जन्तुलक्षणा च कष्टा संसारगतिरुक्ता । तदुभयदोषपरिजिहीर्षया वैश्वानरात्मभावप्रतिपत्त्यर्थमुत्तरो ग्रन्थ आरभ्यते । अत्यन्नं पश्यसि प्रियमित्यादिलिङ्गात् । आख्यायिकां तु सुखावबोधार्थां विद्यासंप्रदानन्यायप्रदर्शनार्थां च—

प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमाꣳसां चक्रुः को न आत्मा किं ब्रह्मेति ॥ १ ॥

प्राचीनशाल इति नामत उपमन्योरपत्यमौपमन्यवः । सत्ययज्ञो नामतः पुलुषस्यापत्यं पौलुषिः । तथेन्द्रद्युम्नो नामतो भल्लवस्यापत्यं भाल्लवेयः । जन इति नामतः शर्कराक्षस्यापत्यं शार्कराक्ष्यः । बुडिलो नामतोऽश्वतराश्वस्यापत्यमाश्वतराश्विः । पञ्चापि ते हैते महाशाला महागृहस्था विस्तीर्णाभिः शालाभिर्युक्ताः संपन्ना इत्यर्थः । महाश्रोत्रियाः श्रुताध्ययनवृत्तसंपन्ना इत्यर्थः । ते एवंभूताः सन्तः समेत्य संभूय क्वचिन्मीमांसां विचारणां चक्रुः कृतवन्त इत्यर्थः । कथम् । को नोऽस्माकमात्मा किं ब्रह्मेत्यात्मब्रह्मशब्दौ निरवयवविशेषणविशेष्यत्वम् । ब्रह्मेत्यध्यात्मपरिच्छन्नमात्मानं निवर्तयत्यात्मेति च सत्यव्यतिरिक्ताऽऽदित्यादिब्रह्मण उपस्थानं निवर्तयति । अभेदनाऽतश्चैव ब्रह्म ब्रह्मेऽऽमेत्येवं सर्वात्मा वैश्वानरो ब्रह्म ।

---

१ क. घ. ङ. °का सु° । २ ङ. च. ढ. ण. °लाभिः संयुक्ताः । ३ घ. ङ. °रणं च° । ४ ग. ङ. च. ट. ठ. ड. ढ. त्वं ।

आत्मेत्येवतत्सिद्धं भवति । मूर्धा ते व्यपतिष्यदन्योऽभविष्यदित्यादिलिङ्गात ॥ १ ॥

पूर्वोत्तरसंदर्भयोः संबन्धं दर्शयन्नुत्तरसंदर्भमवतारयति—दाक्षिणेनेत्यादिना । उत्तरग्रन्थस्य वैश्वानराख्यात्तृभावप्रतिपत्त्यर्थत्वे गमकमाह—अत्सीति । विद्यायाः संप्रदानं शिष्यस्तस्य न्यायो विनयादिसंपत्तिस्तत्प्रदर्शनार्था चाऽऽख्यायिका । दृश्यते चात्र प्राचीनशालप्रभृतीनां तत्संपत्तिरित्याह—विद्येति । कथमात्मब्रह्मशब्दयोरितरेतरविशेषणविशेष्यत्वं व्यावर्त्याभावादित्याशङ्क्याऽऽह—ब्रह्मेति । उक्तरीत्या मिथो विशेषणविशेष्यत्वे फलितमाह—अभेदेनेति । इतश्चोपास्यस्य सर्वात्मत्वं गम्यते परोक्षोपासनस्य निन्दितत्वाद्भूम्न ऋतुवज्ज्यायस्त्वमिति न्यायादित्याह—मूर्धेति ॥ १ ॥

ते ह संपादयांचक्रुरुद्दालको वै भगवन्तोऽयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति तꣳ हन्ताभ्यागच्छामेति तꣳ हाभ्याजग्मुः ॥ २ ॥

ते ह मीमांसन्तोऽपि निश्चयमलभमानाः संपादयांचक्रुः संपादितवन्त आत्मन उपदेष्टारम् । उद्दालको वै प्रसिद्धो नामतो भगवन्तः पूजावन्तोऽयमारुणिररुणस्यापत्यं संप्रति सम्यगिममात्मानं वैश्वानरमस्मदभिप्रेतमध्येति । तं हन्तेदानीमभ्यागच्छामेत्येवं निश्चित्य तं हाभ्याजग्मुर्गतवन्तस्तमारुणिम् ॥ २ ॥

भगवन्तः सन्तः संपादयांचक्रिरिति पूर्वेण संबन्धः ॥ २ ॥

स ह संपादयांचकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव प्रतिपत्स्ये हन्ताहमन्यमध्यनुशासानीति ॥ ३ ॥

स ह तान्दृष्ट्वैव तेषामागमनप्रयोजनं बुद्ध्वा संपादयांचकार । कथम् । प्रक्ष्यन्ति मां वैश्वानरमिमे महाशाला महाश्रोत्रियास्तेभ्योऽहं न सर्वमिव पृष्टं प्रतिपत्स्ये वक्तुं नोत्सहे । अतो हन्ताहमिदानीमन्यमेषामध्यनुशासानि वक्ष्याम्युपदेष्टारमिति ॥ ३ ॥

॥ ३ ॥

---

१ क. °रयोः सं° । २ क. ख. ग. घ. ङ. च. ट. ठ. ड. ढ. ण. °तो ह भ° । ३ क. ग. घ. च. ट. ढ. °ग्मुस्तं गत° । ठ. ण. °ग्मुस्तं ह गत° । ४ क. ग. च. ट. ठ. ड. ढ. °वन्तः । आर्षम् °ष ।

तान्होवाचाश्वपतिर्वै भगवन्तोऽयं कैकेयः संप्रतीममात्मानं वैश्वानरमध्येति तꣳ हन्ताभ्यागच्छामेति तꣳ हाभ्याजग्मुः ॥ ४ ॥

एवं संपाद्य तान्होवाच । अश्वपतिर्वै नामतो भगवन्तोऽयं कैकयस्तापत्यं कैकयः संप्रति सम्यगिममात्मानं वैश्वानरमध्येतीत्यादि समानम् ॥ ४ ॥

अश्वपतिरित्यादौ भगवन्त इति प्राचीनशालप्रभृतयः संबोध्यन्ते ॥ ४ ॥

तेभ्यो ह प्रातेभ्यः पृथगर्हाणि कारयांचकार स ह प्रातः संजिहान उवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतो यक्ष्यमाणो वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति ॥ ५ ॥

ते होचुर्यं न हैवार्थेन पुरुषश्चरेत्तꣳ हैव वदेदात्मानमेवेमं वैश्वानरꣳ संप्रत्यध्येषि तमेव नो ब्रूहीति ॥ ६ ॥

तान्होवाच प्रातर्वः प्रतिवक्ताऽस्मीति ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान्हानुपनीयैवैतदुवाच ॥ ७ ॥

इति छान्दोग्योपनिषदि पञ्चमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

तेभ्यो ह राजा प्रातेभ्यः पृथक्पृथगर्हाण्यर्हणानि पुरोहितैर्भृत्यैश्च कारयांचकार कारितवान् । स ह्यन्येद्यू राजा प्रातः संजिहान उवाच विनयेनोपगम्यैतद्धनं मत्त उपादद्धवमिति तैः प्रत्याख्यातो मयि दोषं पश्यन्ति नूनं यतो न प्रतिगृह्णन्ति मत्तो धनमिति मन्दान आत्मनः सदृवृत्तां प्रति-

१ च. ठ. 'ति । स तैः ।

पिपादयिषञ्चाह । न मे मम जनपदे स्तेनः पारस्वहर्ता विद्यते । न कदर्योऽदाता सति विभवे । न मद्यपो द्विजोत्तमः सन् । नानाहिताग्निः शतगुः । नाविद्वानधिकारानुरूपम् । न स्वैरी पञ्चारेषु गन्ता । अत एव स्वैरिणी कुतो दुष्टचारिणी न संभवतीत्यर्थः । तैश्च न वयं धनेनार्थिन इत्युक्त आह्लल्यं मत्वैते धनं नैं गृह्णन्तीति । यक्ष्यमाणो वै कतिभिरहोभिरहं हे भगवन्तोऽस्मि । तदर्थं कल्पं धनं मया यावदेकैकस्मै यथोक्तमृत्विजे धनं दास्यामि तावत्प्रत्येकं भगवद्भ्योऽपि दास्यामि । वसन्तु भगवन्तः पश्यन्तु च मम यागमित्युक्तास्ते होचुः । येन हैवार्थेन प्रयोजनेन यं प्रति चरेद्गच्छेत्पुरुषस्तं हैवार्थं वदेत् । इदमेव प्रयोजनमागमनस्येत्यर्थं न्यायः सताम् । वयं वैश्वानरज्ञानार्थिनः । आत्मानमेवैं वैश्वानरं संप्रत्यध्येषि सम्यग्जानासि । अतस्तमेव नोऽस्मभ्यं ब्रूहीत्युक्तस्तान्होवाच । प्रातर्वो युष्मभ्यं प्रतिवक्ताऽस्मि प्रतिवाक्यं दातास्मीत्युक्तास्ते ह राज्ञेऽभिप्रायज्ञाः समित्पाणयः समिद्भारहस्ता अपरेद्युः पूर्वह्णे राजानं प्रतिचक्रमिरे गतवन्तः । यत एवं महाशाला महाश्रोत्रिया ब्राह्मणाः सन्तो महाशालत्वाद्यभिमानं हित्वा समिद्भारहस्ता जातितो हीनं राजानं विद्यार्थिनो विनयेनोपजग्मुः । तथाऽन्यैर्विद्योपादित्सुभिर्भवितव्यम् । तेभ्यश्चादाद्व्यामनुपनीयैवोपनयनमकृत्वैवं तान् । यथा योग्येभ्यो विद्यामदात्तथाऽन्येनापि विद्या दातव्येत्याख्यायिकार्थः । एतद्वैश्वानरविज्ञानमुवाचेति वक्ष्यमाणेन संबंधः ॥ ५ ॥ ६ ॥ ७ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

स हेत्यादि सोपस्करं व्याचष्टे—म हान्येद्युरित्यादिना । यथोक्तं शास्त्रसिद्धमिति यावत् । किं तर्हि भगवद्गमनस्य प्रयोजनं तदाह—वयं चेति । तन्नमापि नास्तीति शङ्कां निरस्यति—आत्मानमिति । शिष्यभावेनोपसन्नेभ्यो विद्या दातव्या न यथाकथंचिदिति राज्ञेऽभिप्रायः । ते हेत्यादिवाक्यस्य तात्पर्यं दर्शयति—यत इति । योगक्षेमार्थं राजानं प्रत्युपगमनमिष्टमेवेति मन्वानो विशिनष्टि—विद्यार्थिन इति । तथेत्यत्रानःशब्दो द्रष्टव्यः । उपनयनं पदयोर्नि(पा)तनम् । वक्ष्यमाणं

---

१ च. दुराचा° । २ ट. तैर्वयं धनेना° । ङ. तैर्न व° । ३ क. धनार्थि° । ४ ङ. न प्रतिगृ° । ५ ङ. °न्तोऽस्मीति त° । ६ ख. ग. ञ. ट. °या महात्रा° । ७ क. °द्विद्यां विवक्षुरनु° । ८ ङ. °व तां तथा । ९ ख. ग. ङ. ञ. ड. ण. °रज्ञा° । १० ङ. ड. ढ. °न्धः ॥ ११ ॥ औ° । ११ क. ग. ट. सोपस्करं । १२ क. °नम्र° ।

वैश्वानरविज्ञानं तेनैतदित्यस्य संबन्ध इति यावत् । आख्यायिकातात्पर्यमुपसंहरति—यथोक्तमिति ॥ ६ ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

(अथ पञ्चमाध्यायस्य द्वादशः खण्डः)।

औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते ॥ १ ॥

स कथमुवाचेत्याह—औपमन्यव हे कमात्मानं वैश्वानरं त्वमुपास्स इति पप्रच्छ । नन्वयमन्याय आचार्यः सञ्जिष्यं पृच्छतीति । नैष दोषः । यद्वेत्थ तेन सोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति न्यायदर्शनात् । अन्यत्रापि चाचार्यस्याप्रतिभानवति शिष्ये प्रतिभोत्पादनार्थः प्रश्नो दृष्टोऽजातशत्रोः, कैष तदाऽभूत्कुत एतदागादिति । दिवमेव द्युलोकमेव वैश्वानरमुपास्से भगवो राजन्निति होवाच । एष वै सुतेजाः शोभनं तेजो यस्य सोऽयं सुतेजा इति प्रसिद्धो वैश्वानर आत्माऽऽत्मनोऽवयवभूत्वाद्यं त्वमात्मानमात्मैकदेशमुपास्से तस्मात्सुतेजसो वैश्वानरस्योपासनात्तव सुतमभिषुतं सोमरूपं कर्मणि प्रसुतं प्रकर्षेण च सुतमासुतं चाहर्गणादिषु तव कुले दृश्यतेऽतीव कर्मिणस्त्वत्कुलीना इत्यर्थः ॥ १ ॥

शिष्यो हि प्रष्टाऽऽचार्यस्तु प्रतिवक्तेति न्यायेन शङ्कते—नन्विति । वाक्यशेषानुष्टम्भेन दूषयति—नैष दोष इति । बृहदारण्यकश्रुत्यालोचनायामपि नैतदन्यथेत्यमित्याह—अन्यत्रापीति । आचार्यस्याजातशत्रोरिति संबन्धः । तस्याऽऽत्मत्वे हेतुमाह—आत्मन इति । एकदेशरूपो ज्योतिष्टोमादिरहर्गणस्तत्र सुतं सोमरूपं लताद्रव्यमहर्गणे प्रसुतं सत्त्वासुतमिति भेदः । तवेति पुनर्वचनमन्वयदर्शनार्थम् ॥ १ ॥

अन्नमन्नं पश्यति प्रियमन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानर-

---

१ ड. ट. ण. °मपन्या° । २ क. ख. ग. घ. ङ. ञ. ट. ढ. °ञाप्यप्र° । ३ क. ख. ग. च. ञ. ङ. ढ. ण. °मात्मानमात्म° । ४ ख. ञ. ङ. ढ. ण. कर्म प्र° । ५ क. शिष्या हि प्रष्टार आचा°।

मुपास्ते मूर्धा तेऽपतिष्यद्यन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

===

अन्नमन्नं दीप्ताग्निः सन्पश्यसि च पुत्रपौत्रादि प्रियमिष्टम् । अन्योऽप्यन्नं पश्यति च प्रियं भवतस्तस्य तुल्यं प्रमुमामुमामित्यादि कर्मित्वं ब्रह्मवर्चसं कुले यः कश्चिदेतं यथोक्तमेवं वैश्वानरमुपास्ते । मूर्धा त्वात्मनो वैश्वानरस्यैव न समस्तो वैश्वानरः । अतः समस्तबुद्ध्या वैश्वानरस्योपासनान्मूर्धा शिरस्ते विपरीतग्राहिणो व्यपतिष्यद्विपतितमभविष्यत् । यद्यदि मां नाऽऽगमिष्यो नाऽऽगतोऽभविष्यः । साध्वकार्षीर्यन्मामागतोऽसीत्यभिप्रायः ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

न केवलं प्राचीनशालनिष्ठमिदं फलं किंत्वन्यस्यापि भवतीत्याह—अन्योऽपीति । तर्हि यथोक्तवैश्वानरज्ञानादेव कृतकृत्यतेत्याशङ्क्याऽऽह—मूर्धा त्विति । अक्षरार्थमुक्त्वा विवक्षितार्थमाह—साध्विति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

(अथ पञ्चमाध्यायस्य त्रयोदशः खण्डः) ।

अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाचैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु विश्वरूपं कुले दृश्यते ॥ १ ॥

अथ होवाच सत्ययज्ञं पौलुषिं हे प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाच । शुक्लनीलादिरूपत्वाद्विश्वरूपत्वमादित्यस्य सर्वरूपत्वाद्वा । सर्वाणि रूपाणि हि त्वाष्ट्राणि यतोऽतो वा विश्वरूप आदित्य स्तदुपासनात्तव बहु विश्वरूपमिहामुत्रार्थमुपकरणं दृश्यते कुले ॥ १ ॥

---

१ ख. ङ. छ. ज. ट. °त्यस्यापि भु° । २ क. भुक्तमि° । ३ ख. ग. ञ. ट. °र्भा ते वि° ।

अथ प्राचीनशाले तूष्णींभूते जिज्ञासमाने सत्यनन्तरमित्यर्थः । आदित्यस्य शुक्लत्वादिरूपत्वमष्टमे स्पष्टी भविष्यति । तस्य सर्वरूपत्वेन विश्वरूपत्वमुक्तमुपपादयति—सर्वाणीति ॥ १ ॥

प्रवृत्तोऽश्वतरीरथो दासीनिष्कोऽत्स्यन्नं पश्यसि प्रियमत्स्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचान्धोऽभविष्यो यन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

===

किंच त्वामनु प्रवृत्तोऽश्वतरीभ्यां युक्तो रथोऽश्वतरीरथो दासीनिष्को दासीभिर्युक्तो निष्को हारो दासीनिष्कः । अत्स्यन्नमित्यादि समानम् । चक्षुर्वैश्वानरस्य तु सविता । तस्य समस्तंबुद्ध्योपासनादन्धोऽभविष्यश्चक्षुर्हीनोऽभविष्यो यन्मां नाऽऽगमिष्य इति पूर्ववत् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य त्रयोदशः खण्ड ॥ १३ ॥

अत्स्यन्नमित्यादि चक्षुष्ट्वेतदित्यतः प्राक्तनमिति शेषः । चक्षुष्ट्वेतदित्यादिवाक्यं व्याचष्टे—चक्षुरित्यादिना । तत्रापि तात्पर्यं यथापूर्वं द्रष्टव्यमित्याह—पूर्ववदिति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

अथ पञ्चमाध्यायस्य चतुर्दशः खण्डः) ।

अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो राजन्निति होवाचैष वै पृथग्वर्त्माऽऽत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वां पृथग्बलय आयान्ति पृथग्रथश्रेणयोऽनुयन्ति ॥ १ ॥

---

१ क. ख. ग. घ. च. ज. ञ. ट. ठ. त. थ. °विष्यद्यन्मां । २ ङ. च. ङ. ण. °स्तद्दृष्ट्योपा° । ३ घ. ठ. ड. ण. °व्यचक्षु° । ४ क. ग. ब. ङ. झ. ट. ठ. त. थ. आययन्ति ।

अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैय्याघ्रपद्य कं त्वमात्मानमुपास्स इत्यादि समानम्। पृथग्वर्त्मा नाना वर्त्मानि यस्य वायोरावहोद्वहादिभिर्भेदैर्वर्तमानस्य सोऽयं पृथग्वर्त्मा वायुः। तस्मात्पृथग्वर्त्मात्मनो वैश्वानरस्योपासनात्पृथङ्नानादिक्कास्त्वां बलयो वस्त्रान्नादिलक्षणा बलय आयन्त्यागच्छन्ति। पृथग्रथश्रेणयो रथपङ्क्तयोऽपि त्वामनुयन्ति ॥ १ ॥

सत्ययज्ञोपरमान्तरमित्यथशब्दार्थः। पृथगित्यतः प्राक्तनमादिपदेन गृहीतम्। पृथग्वर्त्मेति प्रतीकमादाय व्याचष्टे—नानेति। आभिमुख्येनाऽऽगच्छन्नावहः। ऊर्ध्वेन वहतीत्युद्वहः। तस्मात्त्वामित्यादि व्याचष्टे—तस्मादिति। नानादिक्का नानाविधासु दिक्षु भवा इत्येतत् ॥ १ ॥

अत्स्यन्नं पश्यसि प्रियमत्स्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यद्यन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

अत्स्यन्नमित्यादि समानम्। प्राणस्त्वेष आत्मन इति होवाच प्राणस्ते तवोदक्रमिष्यदुत्क्रान्तोऽभविष्यद्यन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

अत्स्यन्नमित्यादि समानमित्यत्राऽऽदिपदमुपास्त इत्यन्तवाक्यसंग्रहार्थम्। उत्तरवाक्येऽप्यभिप्रायसाम्यं मत्वाऽऽह—प्राणस्त्वेति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

(अथ पञ्चमाध्यायस्य पञ्चदशः खण्डः)।

अथ होवाच जनश्र शार्कराक्ष्य कं त्वमात्मानमुपास्स इत्याकाशमेव भगवो राजन्निति होवाचैष

---

१ क. ख. ग. घ. च. ञ. ट. ठ. ड. ण. °र्मा ऽऽत्मा ना° । २ ख. घ. ञ. ड. ढ. °विभेदै° । ३ क. ख. ग. च. ञ. ट. ठ. °र्मा ऽऽत्मा वा° । ४ क. °स्त्वां प्रति व° । ५ क. ग. घ. क. च. ट. ठ. ड. आययस्वा° ।

वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपास्से
तस्मात्त्वं बहुलोऽसि प्रजया च धनेन च ॥ १ ॥

अथ होवाच जनमित्यादि समानम् । एष वै बहुल आत्मा वैश्वानरः । बहुलत्वमाकाशस्य सर्वगतत्वाद्बहुलगुणोपासनाच्च । त्वं बहुलोऽसि प्रजया च पुत्रपौत्रादिलक्षणया धनेन च हिरण्यादिना ॥ १ ॥

इन्द्रद्युम्नोपरमानन्तरर्यमथशब्दार्थः । अत्राऽऽदिपदमेष इत्यस्मात्प्राक्तनवाक्यसंग्रहार्थम् । कथमाकाशस्य बहुलत्वमत आह—बहुलत्वमिति ॥ १ ॥

अत्स्यन्नं पश्यसि प्रियमत्स्यन्नं पश्यति प्रियं भवत्य-
स्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमु-
पास्ते संदेहस्त्वेष आत्मन इति होवाच संदेहस्ते
व्यशीर्यन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य पञ्चदशः खण्डः॥१५॥

---

[1]संदेहस्त्वेष संदेहो मध्यमं शरीरं वैश्वानरस्य । दिहेरुपचयार्थत्वान्मांसरुधिरास्थ्यादिभिश्च बहुलं शरीरं तत्संदेहस्ते तव शरीरं व्यशीर्यच्छीर्णमभविष्यद्यन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य पञ्चदशः खण्डः ॥१५॥

कथं शरीरस्य[3] मध्यमे भागे संशयवाची संदेहशब्दो वर्तते तत्राऽऽह—दिहेरिति । आकाशस्य सर्वगतत्वेन बहुलत्वाद्देहस्य[4] च परिच्छिन्नत्वेन तदभावात्कथमाकाशं वैश्वानरस्य शरीरं स्यादित्याशङ्क्याऽऽह—मांसेति । तच्छरीरमिति संबन्धः ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
पञ्चमाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

(अथ पञ्चमाध्यायस्य षोडशः खण्डः)।

अथ होवाच बुडिलमाश्वतराश्विं वैयाघ्रपद्य कं
त्वमात्मानमुपास्स इत्यप एव भगवो राजन्निति

---

१ ख. ङ. ण. °ना पशुभिरश्वाजादिभिः सं । ञ. °ना पशुभिरश्वादिभिः सं° । ड. °ना पशुभिश्च गोश्वादिभिः सं° । २ क. च. °ध्यमश° । ३ ख, ङ. ञ. ण. °रम° । ४ ख, छ. ञ. °स्य प° ।

होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमु-
पास्से तस्मात्त्वꣳ रयिमान्पुष्टिमानसि ॥ १ ॥

अथ होवाच बुडिलमाश्वतराश्विमित्यादि समानम् । एष वै रयिरात्मा वैश्वानरो घनरूपः । अद्भ्योऽन्नं ततो घनमिति । तस्माद्रयिमान्घनवांस्त्वं पुष्टिमांश्च शरीरेण पुष्टैश्चान्नैर्निमित्तत्वात् ॥ १ ॥

जनस्योपरमानन्तर(र्ये)मथशब्दार्थः । कथमबात्मको वैश्वानरो रयिरिति घनेन निर्दिश्यते तत्राऽऽह—अद्भ्य इति । आयुर्वै घृतमितिवत्कार्यवाचकेन कारणं लक्ष्यत इत्यर्थः । तस्माद्यथोक्तवैश्वानरोपासनादित्येतत् । घनरूपवैश्वानरोपासनाद्धनवानित्येव वक्तव्ये कथं पुष्टिमानित्यधिकावापस्तत्राऽऽह—पुष्टैश्चेति ॥ १ ॥

अत्स्यन्नं पश्यसि प्रियमत्स्यन्नं पश्यति प्रियं भव-
त्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानर-
मुपास्ते बस्तिस्त्वेष आत्मन इति होवाचँ बस्ति-
स्ते व्यभेत्स्यद्यन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य षोडशः खण्डः ॥१६॥

बस्तिस्त्वेष आत्मनो वैश्वानरस्यँ बस्तिर्मूत्रसंग्रहस्थानँ बस्तिस्ते व्यभेत्स्य-द्भिन्नोऽभविष्यद्यन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य षोडशः खण्डः ॥१६॥

मूत्राशयो धनुर्वक्रो बस्तिरित्यभिधीयत इत्याशयेनाऽऽह—बस्तिरिति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य षोडशः खण्डः ॥ १६ ॥

(अथ पञ्चमाध्यायस्य सप्तदशः खण्डः) ।

अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मा-
नमुपास्स इति पृथिवीमेव भगवो राज-

---

१ घ. ठ. °ग्रहेतुत्वा° । २ क. ख. ग. घ. ङ. च. ठ. ड. ण. °तू । बस्ति° । ३ ख. ग. घ. ङ. झ. ठ. ण. त. थ. °स्ते बस्ति° । ४ ख. ग. घ. ङ. ज. झ. ठ. त. थ. °च बस्ति° । ५ ख. ग. घ. ङ. च. ट. ठ. ड. ण. °स्य बस्ति° । ६ ख. ग. ठ. ड. ढ. ण. संहारस्था° । ७ ख. ग. घ. ङ. च. ठ. ण. °नं बस्ति° । ८ ख. ग. छ. ञ. ण. °क्रो बस्ति° । ९ ख. छ. ण. °द्द । बस्ति° ।

न्निति होवाचैष वै प्रतिष्ठाऽऽत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च ॥ १ ॥
अत्स्यन्नं पश्यसि प्रियमत्स्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां मन्मां नाऽऽगमिष्य इति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

अथ होवाचोद्दालकमित्यादि समानम् । पृथिवीमेव भगवो राजन्निति होवाच । एष वै प्रतिष्ठा पादौ वैश्वानरस्य । पादौ ते व्यम्लास्येतां विम्लानावभविष्यतां श्लथीभूतौ यन्मां नाऽऽगमिष्य इति ॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य सप्तदशः खण्डः ॥१७॥

प्राचीनशालप्रभृतिषु पञ्चसु मौनमातिष्ठमानेष्वनन्तरमित्यथशब्दार्थः ॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

—○*○—

(अथ पञ्चमाध्यायस्याष्टादशः खण्डः) ।

तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वाꣳसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति ॥ १ ॥

तान्यथोक्तवैश्वानरदर्शनवतो होवाच । एते यूयं वै खल्वित्वनर्थकौ । यूयं पृथगिवापृथक्सन्तमिममेकं वैश्वानरमात्मानं विद्वांसोऽन्नमत्थ परिच्छिन्नात्मबुद्ध्येत्येवद्धस्तिदर्शन इव जात्यन्धाः । यस्त्वेतमेवं यथोक्तावयवैर्द्युमूर्धादिभिः

---

१ क. °तां शिथिलीभू° । २ ख; ञ. °द्धयेत्यर्थः । हस्ति° । ३ क, ग, घ, च, ट, ठ, ड, °दिभिर्वि° ।

पृथिवीपादान्तैर्विशिष्टमेकं प्रादेशमात्रं प्रादेशैर्मूर्धादिभिः पृथिवीपादान्तैरध्यात्मं मीयते ज्ञायत इति प्रादेशमात्रम् । मुखादिषु वा करणेष्वैक्त्वेन मीयत इति प्रादेशमात्रः । द्युलोकादिपृथिव्यन्तप्रदेशपरिमाणो वा प्रादेशमात्रः । प्रकर्षेण शास्त्रेणाऽऽविश्यन्त इति प्रादेशा द्युलोकादय एवं तावत्परिमाणः प्रादेशमात्रः । शाखान्तरे तु मूर्धादिश्चिबुकपर्यन्त इति प्रादेशमात्रं कल्पयन्ति । इह तु न तथाऽभिप्रेतः । तस्य ह वा एतस्याऽऽत्मन इत्याद्युपसंहारात् । प्रत्यगात्मतयाऽभिविमीयतेऽहमिति ज्ञायत इत्यभिविमानस्तमेतमात्मानं वैश्वानरं विश्वान्नरान्नयति पुण्यपापानुरूपां गतिं सर्वात्मैष ईश्वरो वैश्वानरो विश्वो नर एव वा सर्वात्मत्वात् । विश्वैर्वा नरैः प्रत्यगात्मतया प्रविभज्य नीयत इति वैश्वानरस्तमेवमुपास्ते यः सोऽदन्नाद्यो सर्वेषु लोकेषु द्युलोकादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु शरीरेन्द्रियमनोबुद्धिषु तेषु ह्यात्मकल्पनाव्यपदेशः प्राणिनामन्नमत्ति वैश्वानरविरात्मा सन्नन्नमत्ति । न यथाऽज्ञः पिण्डमात्राभिमानः सन्नित्यर्थः ॥ १ ॥

उद्दालकान्तेषु विद्यार्थिषूपसन्नेषु सामस्त्येन वैश्वानरविद्यां वक्तुकामस्तेषां मिथ्याज्ञानमनुवदति—तानित्यादिना । अनर्थकाविवानर्थकौ निपातौ न त्वनर्थकावेव । तेषां मिथ्याज्ञानित्वप्रसिद्धिरसारकत्वात् । यूयमित्यन्वयार्थं प्रागुक्तमपि पाठक्रमेण पुनरनूद्य पृथगिव विद्वांस इति संबन्धः । यथा जात्यन्धा हस्तिदर्शने भिन्नदृष्टयो भवन्ति तथा यूयं वैश्वानरमात्मानमेकमपि सर्वात्मकं सन्तं भिन्नमिव विद्वांसः परिच्छिन्नासत्स्वरूपेणाऽऽत्मानं बुद्धवन्तः । तथा च मिथ्यादर्शिनो यूयं प्रागेव प्रत्यवायान्मामागतवन्तः साधु कृतवन्त इत्यर्थः । प्रधानविद्यां वक्तुं पातनिकां कृत्वा तामिदानीमुपदिशति—यस्त्वित्यादिना । एतमेवंभूतं यस्तूपास्ते स सर्वेष्वन्नमत्तीति संबन्धः । एवंशब्दार्थमाह—यथोक्तेति । एकं समस्तं त्रैलोक्यात्मकमिति यावत् । प्रादेशमात्रमित्येतद्विभजते—प्रादेशैरिति । यथोक्तैराधिदैविकैरवयवैरध्यात्मं प्रत्यगात्मन्येवायं मीयत इति व्युत्पत्त्या प्रादेशमात्रस्तामिति यावत् । प्रकारान्तरेण व्याचष्टे—

---

१ ख. ग. घ. च. ञ. ट. ठ. ण. °त्रं प्रदे° । २ ख. ञ. ड. ढ. ण. °मात्रो मु° । ३ क. ख. ग. ञ. ट. °ष्वकर्तृत्वे° । ४ ख. घ. ञ. ण. °ति प्रदे° । ५ ठ. वा प्रदे° । ६ ठ. ड. ढ. एता° । ७ ख. ग. घ. ङ. ञ. प्र. °दिचिबु° । ८ ख. ञ. ड. ढ. ण. °तिष्ठित इ° । ९ ठ. प्रैतम् । त° । १० ङ. ठ. विश्वान° । ११ च. ठ. वा विश्वात्म° । १२ ड. ण. °त्मकत्वा° । १३ ङ. °थाऽन्यः पि° । ढ. ण. °थाऽन्योऽज्ञः । १४ च. °मानी स° । १५ ख. छ. ञ. ण. °ते । प्रदे° ।

मुखादिषु वेति । तेषु हि प्रदेशेष्वयमंशत्वेन साक्षित्वया मीयत इति व्युत्पत्त्या तथोच्यत इत्यर्थः । विधान्तरेण व्याचष्टे—द्युलोकादीति । अर्थान्तरमाह—प्रकर्षेणेति । आमनन्ति चैनमस्मिन्निति न्यायेन पक्षान्तरमाह—शाखान्तरे त्विति । अस्तु तर्हि जाबालश्रुत्यनुसारेण मूर्धानमारभ्याधरफलैकपर्यन्ते देहावयवे संपादितो वैश्वानरः प्रादेशमात्र इति नेत्याह—इह त्विति । सर्वात्मत्वेन वैश्वानरस्योपसंहारदर्शनान्नात्र जाबालश्रुतिरनुसर्तव्येत्यर्थः । विशेषणान्तरं व्याचष्टे—प्रत्यगात्मतयेति । सर्वेश्वरत्वं सर्वात्मत्वं सर्वप्रत्यक्षत्वं वा हेतूकृत्य वैश्वानरशब्दमनेकधा व्याकरोति—विश्वानित्यादिना । ईश्वरो वैश्वानर इत्यत्र वैश्वानरपदमुभयत्र संबध्यते । स वैश्वानरविदन्नमदन्सर्वेषु लोकादिषु स्थित्वाऽन्नमत्तीति संबन्धः । कथमात्मशब्देन शरीरादयो गृह्यन्ते तत्राऽऽह—तेषु हीति । सर्वेषु लोकेष्वित्यादिवाक्यस्य तात्पर्यार्थं दर्शयति—वैश्वानरविदिति ॥ १ ॥

तस्य ह वा एतस्याऽऽत्मनो वैश्वानरस्य मूर्धैव सुते-
जाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्माऽऽत्मा संदेहो
बहुलो[3] बस्तिरेव रयिः पृथिव्येव पादौ[4] उर एव वेदि-
र्लोमानि[5] बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन
आस्यमाहवनीयः ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

कस्मादेवम् । यस्मात्तस्य ह वै प्रकृतस्यैवैतस्याऽऽत्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्माऽऽत्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ । अथवा विध्यर्थमेतद्वचनमेवमुपास्य इति । अथेदानीं वैश्वानरविदो भोजनेऽग्निहोत्रं संपिपादयिषन्नाह—एतस्य वैश्वानरस्य भोक्तुरुर एव वेदिराकारसामान्यात् । लोमानि बर्हिर्वेद्यामिवोरसि लोमान्यास्तीर्णानि न दृश्यन्ते । हृदयं गार्हपत्यो हृदयाद्धि मनः प्रणीतमिवानन्तरी भवत्यतोऽन्वाहार्यपचनोऽग्निर्मनः । आस्यं मुखमाहवनीय इवाऽऽहवनीयो हूयतेऽस्मिन्नन्नमिति ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

वैश्वानरोपासकः सर्वात्मा सन्नन्नमत्तीत्येवं कस्माद्धेतोर्निश्चितमित्याशङ्कामनूद्य हेतुप्रदर्शनपरत्वेनोत्तरत्वेनोत्तरं[6] वाक्यमुपादत्ते—कस्मादित्यादिना । वैश्वानरस्य

१ क. ग. ट. °मकर्तृत्वे° । २ क. ग. ट. °लप° । ३ ख. घ. ङ. ज. झ. ठ. ढ. थ. °लो व°स्ति° । ४ झ. ट. °दा उर । ५ ख. ग. घ. ङ. ठ. ड. ढ. °लो वस्ति° । ६ क. ट. °नोत्तरं° ।

सर्वात्मत्वात्तदुपासकस्यापि तदात्मतया सर्वात्मत्वादसौ सर्वात्मा भूत्वा सर्वत्रान्नमत्तीति युक्तमित्यर्थः । तस्येत्यादिवाक्यस्य तात्पर्यान्तरमाह—अथवेति । प्रधानविद्यामुक्त्वा तदङ्गप्राणाग्निहोत्रं दर्शयितुकामो भूमिकां करोति—अथेति । संपादयितुमिच्छन्नादौ तदङ्गान्यश्वपतिराहेत्यर्थः । वेदिरिति स्थण्डिलमात्रं गृह्यते । अग्निहोत्रे तावन्मात्रस्योपयुक्तत्वादितरस्य दर्शपूर्णमासाद्यङ्गत्वात् । वेद्यामास्तीर्यन्ते ये दर्भा[स्ते] बहिःशब्देनोच्यन्ते । हृदयस्य गार्हपत्यत्वं मनःप्रणयनहेतुत्वात् । प्रणीतमुत्पन्नमिवेत्यर्थः । आहवनीयसादृश्यं च मुखस्य दर्शयति—आहवनीय इति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

(अथ पञ्चमाध्यायस्यैकोनविंशः खण्डः) ।

तयद्भक्तं प्रथममागच्छेत्तद्धोमीयꣳ स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति ॥ १ ॥

तत्तत्रैवं सति यद्भक्तं भोजनकाल आगच्छेद्भोजनार्थं[1] तद्धोमीयं तद्धोतव्यमग्निहोत्रसंपन्मात्रस्य विवक्षितत्वान्नाग्निहोत्राङ्गेतिकर्तव्यतामाग्निरिह स भोक्ता यां प्रथमामाहुतिं जुहुयात्तां कथं जुहुयादित्याह—प्राणाय स्वाहेत्यनेन मन्त्रेणाऽऽहुतिशब्दादवदानप्रमाणमन्नं प्रक्षिपेदित्यर्थः । तेन प्राणस्तृप्यति ॥ १ ॥

एवं सतीत्युक्तन्यायेनाग्निहोत्रे संपादिते सतीत्यर्थः । संपादितस्याग्निहोत्रत्वस्य सामान्यादन्युद्धरणादीनि तदङ्गान्यत्र भवेयुरित्याशङ्क्य तद्बुद्धिमात्रस्य विवक्षितत्वान्नैवमित्याह—अग्निहोत्रेति । इहेति वैश्वानरविदो भोजनमुच्यते । प्रकृतहोमतावान्तरविभागमाह—स भोक्तेति । कथमिति मन्त्रो वा द्रव्यपरिमाणं वा फलं वा पृच्छ्यते तत्र प्रथमं प्रत्याह-प्राणायेति। यदि द्वितीयस्तत्राऽऽह—आहुतीति । अवदानस्य प्रमाणं परिमाणं कर्मणां प्रमाणं प्रसिद्धं तेन परिमितमिति यावत् । तृतीयश्चेत्तत्राऽऽह—तेनेति ॥ १ ॥

प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किंच द्यौश्चाऽऽदित्यश्चाधितिष्ठत-

---

१ ग. घ. ङ. छ, ट. ठ. ड. °र्थं तद्धोमार्थं होमी° ।

स्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिर-
न्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्यैकोनविंशः खण्डः॥ १९॥

प्राणे तृप्यति चक्षुस्तृप्यति चक्षुरादित्यो द्यौश्चेत्यादि तृप्यति यच्चान्यद्द्यौश्चाऽऽदित्यश्च स्वामित्वेनाधिष्ठितस्तच्च तृप्यति तस्य तृप्तिमनु स्वयं भुञ्जानस्तृप्यत्येवं प्रत्यक्षम् । किंच प्रजादिभिश्च । तेजः शरीरेस्था दीप्तिरुज्ज्वलत्वं प्रागल्भ्यं वा, ब्रह्मवर्चसं वृत्तस्वाध्यायनिमित्तं तेजः ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्यैकोनविंशः खण्डः ॥१९॥

भुञ्जानस्य तृप्तौ प्रत्यक्षं प्रमाणं प्राणादेस्तृप्तौ शास्त्रमिति विभागमभिप्रेत्याऽऽह— प्रत्यक्षमिति । प्रजादिभिश्च भोक्ता तृप्यतीति संबन्धः ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां पञ्चमाध्यायस्यैकोनविंशः खण्डः ॥ १९ ॥

(अथ पञ्चमाध्यायस्य विंशः खण्डः) ।

अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति ॥ १ ॥

व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किंच दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिर-
न्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य विंशः खण्डः ॥ २० ॥

(अथ पञ्चमाध्यायस्यैकविंशः खण्डः) ।

अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति ॥ १ ॥

---

१ ख. च. ञ. ठ. ड. ण. °त्येव प्र° । २ ग. घ. ङ. च. ठ. ढ. °रगता दी° ।

अपाने तृप्यति वाक्तृप्यति वाचि तृप्यन्त्यामग्नि-
स्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां
तृप्यन्त्यां यत्किंच पृथिवी चाग्निश्चाधितिष्ठतस्तृ-
प्यति तस्यानु तृप्तिं तृप्यति[1] प्रजया पशुभिरन्नाद्येन
तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्यैकविंशः खण्डः॥२१॥

(अथ पञ्चमाध्यायस्य द्वाविंशः खण्डः)।

अथ यां चतुर्थीं जुहुयात्तां जुहुयात्समानाय स्वाहेति
समानस्तृप्यति ॥ १ ॥
समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्ज-
न्यस्तृप्यति पर्जन्ये तृप्यति विद्युत्तृप्यति विद्युति
तृप्यन्त्यां यत्किंच विद्युच्च पर्जन्यश्चाधितिष्ठतस्त-
त्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्ना-
द्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य द्वाविंशः खण्डः॥२२॥

(अथ पञ्चमाध्यायस्य त्रयोविंशः खण्डः)

अथ यां पञ्चमीं जुहुयात्तां जुहुयाद्व्यानाय स्वाहेत्यु-
दानस्तृप्यति ॥ १ ॥
उदाने तृप्यति त्वक्तृप्यति त्वचि तृप्यन्त्यां
वायुस्तृप्यति वायौ तृप्यत्याकाशस्तृप्यत्या-
काशे तृप्यति यत्किंच वायुश्चाऽऽकाशश्चाधि-

---

१ क. ख. ग. घ. ङ. ज. झ. ञ. ट. त. °ति का°।

तिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया
पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यास्य त्रयोविंशः खण्डः ॥२३॥

अथ यां द्वितीयां तृतीयां चतुर्थीं पञ्चमीमिति समानम् ॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य विंशः खण्डः ॥ २० ॥
॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्यैकविंशः खण्डः ॥ २१ ॥
॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य द्वाविंशः खण्डः ॥२२॥
॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये पञ्चमाध्यायस्य त्रयोविंशः खण्डः॥२३॥
॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
चतुर्थाध्यायस्य विंशः खण्डः ॥ २० ॥

॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
पञ्चमाध्यायस्यैकविंशः खण्डः ॥ २१ ॥

॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
पञ्चमाध्यायस्य द्वाविंश खण्डः ॥ २२ ॥

॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
पञ्चमाध्यायस्य त्रयोविंशः खण्डः ॥ २३ ॥

(अथ पञ्चमाध्यायस्य चतुर्विंशः खण्डः)

स य इदमविद्वानग्निहोत्रं जुहोति यथाऽङ्गारानपोह्य
भस्मनि जुहुयात्तादृक्तत्स्यात् ॥ १ ॥

स यः कश्चिदिदं वैश्वानरदर्शनं यथोक्तमविद्वान्सन्नग्निहोत्रं प्रसिद्धं जुहोति यथाऽङ्गारानाहुतियोग्यानपोह्यानाहुतिस्थाने भस्मनि जुहुयात्तादृक्तुल्यं तस्य तदग्निहोत्रहवनं स्याद्वैश्वानरविदोऽग्निहोत्रमपेक्ष्येति प्रसिद्धाग्निहोत्रनिन्दया वैश्वानरविदोऽग्निहोत्रं स्तूयते ॥ १ ॥

---

१ च. ट. नमन्यत् ॥ २० ॥ २ आ. ठ. ड. ढ. ण. °ते । अत° ।

प्रसिद्धाग्निहोत्रनिन्दाद्वारेण वैश्वानरविदो यथोक्तमग्निहोत्रमवश्यकर्तव्यतायै स्तौति—स य: कश्चिदित्यादिना ॥ १ ॥

अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति ॥ २ ॥

अतश्चैतद्विशिष्टमग्निहोत्रम् । कथम् । अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य यथोक्तवैश्वानरविज्ञानवतः सर्वेषु लोकेष्वित्याद्युक्तार्थम् । हुतमन्नमत्तीत्यनयोरेकार्थत्वात् ॥ २ ॥

प्राणाग्निहोत्रस्य वैशिष्ट्ये हेत्वन्तरमतःशब्दोपात्तं प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । नैयमिकाग्निहोत्रनिन्दाद्वारा प्राणाग्निहोत्रस्तुत्यनन्तरं विधान्तरेण तस्यैव निरवद्यता कीर्त्यत इत्यथशब्दार्थः । एतदिति वैश्वानरदर्शनमुक्तम् । एवमिति । वैश्वानरस्योक्तसर्वात्मत्वादिप्रकारेणेत्यर्थः । अग्निहोत्रमिति सांपादिकमग्निहोत्रं गृह्यते । कथमिदमुक्तार्थं सर्वेषु लोकादिष्वन्नमत्तीति वाक्यं व्याख्यातं तस्य सर्वेषु लोकादिषु हुतं भवतीत्यन्यादृशमिदं वाक्यं तत्राऽऽह—हुतमिति ॥ २ ॥

तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवꣳ हास्य सर्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति ॥ ३ ॥

किंच तद्यथेषीकायास्तूलमग्रमग्नौ प्रोतं प्रक्षिप्तं प्रदूयेत प्रदह्येत क्षिप्रमेवं हास्य विदुषः सर्वात्मभूतस्य सर्वान्नानामत्तुः सर्वे निरवशिष्टाः पाप्मानो धर्माधर्माख्या अनेकजन्मसंचिता इह च प्राग्ज्ञानोत्पत्तेर्ज्ञानसहभाविनश्च प्रदूयन्ते प्रदह्येरन्वर्तमानशरीरारम्भकपाप्मवर्जे, लक्ष्यं प्रति मुक्तेषुवत्प्रवृत्तफलत्वात्तस्य न दाहः । य एतदेवं विद्वानग्निहोत्रं जुहोति भुङ्क्ते ॥ ३ ॥

इतश्च वैश्वानरविद्यावतोऽग्निहोत्रं विशिष्टमिति वक्तुं वैश्वानरविद्यां स्तौति—किं चेति । तत्र वैश्वानरविद्यामाहात्म्ये दृष्टान्त इति यावत् । इषीकाया मुञ्जामध्यवर्तितृणस्येत्येतत् । सर्वशब्दात्प्रारब्धकर्मणोऽपि दशाहमाशङ्क्याऽऽह—वर्तमानेति ।

---

१ ण. °रमिव: । २ ख. छ. ञ. ण. °त्मकत्वा° । ३ ञ. ठ. °मग्नौ । ४ ख. ग. घ. ङ. ञ. ट. ड. ढ. °न्ते त° ।

वैश्वानरविद्याया महाफलत्वे सिद्धे तद्वतोऽग्निहोत्रं विशिष्टमिति तत्कर्तुः सर्वदोषास्पर्शित्वमित्याशयेनाऽऽह—य एतदिति ॥ ३ ॥

तस्माद्यु हैवंविद्यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य तद्वैश्वानरे हुतꣳ स्यादिति तदेष श्लोकः ॥ ४ ॥

स यद्यपि चण्डालायोच्छिष्टानर्हायोच्छिष्टं प्रयच्छेदुच्छिष्टं दद्यात्प्रतिषिद्धमुच्छिष्टदानं यद्यपि कुर्यादात्मनि हैवास्य चण्डालदेहस्थे वैश्वानरे तद्धुतं स्यान्नाधर्मनिमित्तमिति विद्यामेव स्तौति । तदेतस्मिन्स्तुत्यर्थे श्लोको मन्त्रोऽप्येष भवति ॥ ४ ॥

विद्यामेव विद्यास्तुतिद्वाराऽग्निहोत्रमिति यावत् । स्तुत्यर्थेऽग्निहोत्रस्य स्तुतिरूपो योऽर्थस्तस्मिन्नित्येतत् ॥ ४ ॥

यथेह क्षुधिता बाला मातरं पर्युपासत एवꣳ सर्वाणि भूतान्यग्निहोत्रमुपासत इत्यग्निहोत्रमुपासत इति ॥ ५ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य चतुर्विंशः खण्डः॥२४॥

इति च्छान्दोग्योपनिषद्ब्राह्मणे पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

यथेह लोके क्षुधिता बुभुक्षिता बाला मातरं पर्युपासते कदा नो माताऽन्नं प्रयच्छतीत्येवं सर्वाणि भूतान्यन्नादान्येवंविदोऽग्निहोत्रं भोजनमुपासते कदा त्वसौ भोक्ष्यत इति । जगत्सर्वं विद्वद्भोजनेन तृप्तं भवतीत्यर्थः । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ ५ ॥

इति च्छान्दोग्योपनिषदि पञ्चमाध्यायस्य चतुर्विंशः खण्डः ॥ २४ ॥

—:⊙-⊙-⊙-⊙:—

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ छान्दोग्योपनिषद्भाष्ये पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

मन्त्रस्य तात्पर्यार्थं दर्शयति— जगदिति । विदुषो वैश्वानरात्मनः सर्वात्मत्वादित्यर्थः ॥ ६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
पञ्चमाध्यायस्य चतुर्विंशः खण्डः ॥ २४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां छान्दोग्योपनिषद्भाष्यटीकायां
पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

(अथ षष्ठाध्यायस्य प्रथमः खण्डः) ।

हरिः ॐ ।

श्वेतकेतुर्हाऽऽरुणेय आस तꣳ ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति ॥ १ ॥

श्वेतकेतुर्हाऽऽरुणेय आसेत्याद्यध्यायसंबन्धः । सर्वं खल्विदं ब्रह्म तज्जलानित्युक्तं कथं तस्माज्जगदिदं जायते तस्मिन्नेव च लीयतेऽनिति च तेनेवेत्येतदुक्तव्यम् । अनन्तरं चैकस्मिन्भुक्ते विदुषि सर्वं जगत्तृप्तं भवतीत्युक्तं तदेकत्वे सत्यात्मनः सर्वभूतस्थस्योपपद्यते नाऽऽत्मभेदे कथं च तदेकत्वमिति तदर्थोऽयं षष्ठोऽध्याय आरभ्यते । पितापुत्राख्यायिका विद्यायाः सारिष्ठत्वप्रदर्शनार्था । श्वेतकेतुरिति नामतो हेत्यैतिह्यार्थः । आरुणेयोऽरुणस्य पौत्र आस बभूव । तं पुत्रं हाऽऽरुणिः पिता योग्यं विद्याभाजनं मन्वानस्तस्योपनयनकालात्ययं च पश्यन्नुवाच हे श्वेतकेतोऽनुरूपं गुरुं कुलस्य नो गत्वा वस ब्रह्मचर्यम् । न चैतद्युक्तं यदस्मत्कुलीनो हे सोम्याननूच्यानधीत्य ब्रह्मबन्धुरिव भवतीति ब्राह्मणान्बन्धून्व्यपदिशति न स्वयं ब्राह्मणवृत्त इति ॥ १ ॥

वर्तिष्यमाणाध्यायस्यातीतेन संदर्भेण संबन्धं वक्तुं प्रतीकं गृहीत्वा तं प्रतिजानीते—श्वेतकेतुरिति । तमेव प्रकटयन्प्रथमं तृतीयेनाध्यायेनास्य संबन्धं कथयति—सर्वमिति । एतदुक्तव्यं तदर्थोऽयं षष्ठो ध्याय आरभ्यत इति संबन्धः । व्यवहितं संबन्धमुक्त्वाऽव्यवहितं तमादर्शयति—अनन्तरं चेति । अध्यायतात्पर्यमुक्त्वाऽऽख्या-

१ ख. ञ. वै सौम्या° । च. ठ. ड. °सेत्यध्या° । ग. घ. ट. °नित्यु° । ४ घ. ङ. च. ट. ढ. °तृप्यती° । ५ क. °ख्यार्थम् । आ° । ६ ख. ङ. ञ. ठ. ड. हे सौम्या° ।

यिकातात्पर्यमाह—पितेति । पिता प्रतिवक्ता पुत्रश्च प्रष्टेत्येवंविधेयमाख्यायिका । सा च विद्यायाः सारिष्ठत्वद्योतनार्था । पिता हि पुत्राय सारतममेवोपदिशतीत्यर्थः । कुलस्यानुरूपमित्यादिवचनान्न कुलाधमस्य गुरुत्वमिति गम्यते । ब्रह्मचर्यमध्ययनार्थमिति शेषः । गत्वेत्यादिवचनान्माणवकाधीनमध्ययनमिति सूचितम् । मा भूदुपनयनमध्ययनं चेत्याशङ्क्याऽऽह—न चैतदुक्तमिति ॥ १ ॥

स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तꣳ ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः ॥२॥

तस्यातः प्रवासोऽनुमीयते पितुः । येन स्वयं गुणवान्सन्पुत्रं नोपनेष्यति । स पित्रोक्तः श्वेतकेतुर्द्वादशवर्षः सङ्ख्येत्याऽऽचार्यं, यावच्चतुर्विंशतिवर्षो बभूव तावत्सर्वान्वेदांश्चतुरोऽप्यधीत्य तदर्थं च बुद्ध्वा महामना महद्गम्भीरं मनो यस्यासत्प्रमात्मानमन्यैर्मन्यमानं मनो यस्य सोऽयं महामना अनूचानमान्यनूचानमात्मानं मन्यत इत्येवंशीलो यः सोऽनूचानमानी स्तब्धोऽप्रणतस्वभाव एयाय गृहम् । तमेवंभूतं हाऽऽत्मनोऽननुरूपशीलं स्तब्धं मानिनं पुत्रं दृष्ट्वा पितोवाचं सद्धर्मावतारचिकीर्षया । श्वेतकेतो यन्विदं महामना अनूचानमानी स्तब्धश्चासि कस्तेऽतिशयः प्राप्त उपाध्यायादुतापि तमादेशमादिश्यत इत्यादेशः केवलशास्त्राचार्योपदेशगम्यमित्येतेन वा परं ब्रह्माऽऽदिश्यते स आदेशस्तमप्राक्ष्यः पृष्टवानस्याचार्यम् ॥२॥

किमिति पिता स्वयमेवोपनीयं पुत्रं नाध्यापयति तत्राऽऽह—तस्येति । अतःशब्दः स्वगृहविषयः । अनुमानं कल्पनं तत्र कल्पकमाह—येनेति । अनूचानोऽनुवचनसमर्थः । कर्मव्युत्पत्त्या करणव्युत्पत्त्या चाऽऽदेशशब्दो व्याख्यातः ॥ २ ॥

येनाश्रुतꣳ श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति

---

१ ख. ग. छ. ञ. ट. ण. °तरमे° । २ ख. छ. ञ. ण. °नं वेत्या° । ३ क. ख. ञा. °न्नु सौम्ये° । ४ ग. ढ. °मानस्य । ५ ख. घ. ञ. ठ. ण. °नोऽस्य । ६ ङ. ढ. गृहान् । ७ ख. घ. च. ञ. ढ. ण. °तं महात्म° । ८ ख. ङ. ञ. स्तब्धमा° । ९ ग. ट. ड. °च तं स° । १० ङ. ढ. °र्मात्मा धर्मावं° । ११ क. ङ. °तेऽसावादे° ।

कथं नु भगवः स आदेशो भवतीति ॥ २ ॥

तमादेशं विशिनष्टि येनाऽऽदेशेन श्रुतेनाश्रुतमप्यन्यच्छ्रुतं भवत्यमतं मतमतर्कितं तर्कितं भवत्यविज्ञातं विज्ञातमनिश्चितं निश्चितं भवतीति । सर्वानपि वेदानधीत्य सर्वं चान्यद्वेद्यमधिगम्याप्यकृतार्थ एव भवति यावदात्मतत्त्वं न जानातीत्याख्यायिकातोऽवगम्यते । ददेतदद्भुतं श्रुत्वाऽऽह कथं न्वेतदप्रसिद्धमन्यविज्ञानेनान्याद्विज्ञातं भवतीत्येवं मन्वानः पृच्छति कथं नु केन प्रकारेण हे भगवः स आदेशो भवतीति ॥ २ ॥

किमित्यधीत्य सर्ववेदमधिगततदर्थं च पुत्रमात्मविद्यामधिकृत्य पिता पृच्छति तस्य सर्ववेदाध्ययनादिनैव कृतार्थत्वादित्याशङ्क्याऽऽह–सर्वानपीति । तदेतदद्भुतं श्रुत्वाऽऽहेत्युक्तं विवृणोति–कथं न्विति ॥ २ ॥

यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातꣳ स्याद्वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ ४ ॥

यथा स आदेशो भवति तच्छृणु हे सौम्य । यथा लोक एकेन मृत्पिण्डेन रुचककुम्भादिकारणभूतेन विज्ञातेन सर्वमन्यत्तद्विकारजातं मृन्मयं मृद्विकारजातं विज्ञातं स्यात् । कथं मृत्पिण्डे कारणे विज्ञाते कार्यमन्यद्विज्ञातं स्यात् । नैष दोषः । कारणेनानन्यत्वात्कार्यस्य । यन्मन्यसेऽन्यस्मिन्विज्ञातेऽन्यन्न ज्ञायत इति । सत्यमेवं स्यात् । यद्यन्यत्कारणात्कार्यं स्यान्न त्वेवमन्यत्कारणात्कार्यम् । कथं तर्हीदं लोक इदं कारणमयमस्य विकार इति । शृणु । वाचाऽऽरम्भणं वागारम्भणं वागालम्बनमित्येतत् । कोऽसौ विकारो नामधेयं नामैव नामधेयम् । स्वार्थे धेयप्रत्ययः । वागालम्बनमात्रं नामैव केवलं न विकारो नाम वस्त्वस्ति परमार्थतो मृत्तिकेत्येव तु मृत्तिकैव सत्यं वस्त्वस्ति ॥ ४ ॥

---

१ ख. ञ. ठ. ण. °ज्ञातेना° । २ च. °वलक्षणं वस्तूपलक्ष्यत इत्येवं म° । ३ ठ. मन्यमानः । ४ ख. ञ. ण. °न नु प्र° । घ. ट. °न तु प्र° । ५ ख. घ. ङ. ञ. °था सौम्यै° । ६ ख. ञ. ण. °थाऽऽदे° । ७ ख. ङ. ञ. सौम्य । ८ °न करक° । ९ ग. घ. ङ. च. ट. ठ. ड. °त् नन्नु क° । १० ड. ढ. तर्हि लो° । ११ ट. लोके का ।

मृन्मयमित्यस्य व्याख्या मृद्विकारजातमिति । तद्यथा मृत्पिण्डेन विज्ञातेन विज्ञातं स्यात्तथाऽन्यदपि सर्वं कारणेन विज्ञातेन तद्विकारजातं विज्ञातं भवतीति योजना । अन्यविज्ञानादन्यविज्ञानमदृष्टत्वादश्लिष्टमिति शङ्कते—कथमिति । कार्यकारणयोरन्यत्वासिद्धेर्नैवमिति परिहरति—नैष दोष इति । तदेव स्फुटयति—यन्मन्यस इत्यादिना । अन्यत्वाभावे लोकप्रसिद्धिविरोधं शङ्कते—कथं तर्हीति । वाचाऽऽरम्भणमित्यत्र वाचेति तृतीया षष्ठ्यर्थे द्रष्टव्या । नामधेयमित्यस्यार्थं कथयति—नामैवेति । विकारस्य मिथ्यात्वे किं परमार्थतोऽस्तीत्याशङ्क्याऽऽह—मृत्तिकेत्वेवेति ॥ ४ ॥

यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातꣳ स्याद्वाचाऽऽरम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥ ५ ॥

यथा सौम्यैकेन लोहमणिना सुवर्णपिण्डेन सर्वमन्यद्विकारजातं कटकमुकुटकेयूरादि विज्ञातं स्यात् । वाचाऽऽरम्भणमित्यादि समानम् ॥ ५ ॥

॥ ५ ॥

यथा सोम्यैकेन नखनिकृन्तनेन सर्वं काष्णायसं विज्ञातꣳ स्याद्वाचाऽऽरम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवꣳ सोम्य स आदेशो भवतीति ॥ ६ ॥

न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्कथं मे नावक्ष्यन्निति भगवाꣳस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच ॥ ७ ॥

इति छान्दोग्योपनिषदि षष्ठाध्यायस्य प्रथमः खण्डः ॥ १ ॥

यथा सोम्यैकेन नखविकृन्तनेनोपलक्षितेनꣳ कृष्णायसपिण्डेनेत्यर्थः । सर्वं काष्णायसं कृष्णायसविकारजातं विज्ञातं स्यात् । समानमन्यत् । अनेकदृष्टा-

---

१ ख. घ. ङ. ज. ञ. ञ. ठ. °था सौम्यै° । २ क. ग. ङ. ढ. ढ. °था च सो° । ख. ञ. °था सौम्यै° । घ. °था च सौम्यै° । ३ ख. घ. ञ. ञ. °था सौम्यै° । ४ ख. व. ङ. सौम्य । ५ ख. घ. ङ. ञ. सौम्येति । ६ ख. ञ. °था च सोम्यै° । च. ङ. ढ. ण. °था च सौम्यै° । ७ ख. ङ. च. ञ. ण. °न काष्णीय° ।

न्तोपादानं दार्ष्टान्तिकानेकभेदानुगमार्थं दृढप्रतीत्यर्थं च। एवं सौम्य स आदेशो यो मयोक्तो भवतीत्युक्तवति पितर्याहेतरो न वै नूनं भगवन्तः पूजावन्तो गुरवो मम ये त एतदेवमद्भ्यवदुक्तं वस्तु नावेदिषुर्न विज्ञातवन्तो नूनम्। यद्यदि ह्यवेदिष्यन्विदितवन्त एतद्वस्तु कथं मे गुणवते भक्तायानुगताय नादक्ष्यन्नोक्तवन्तस्तेनाहं मन्ये न विदितवन्त इति। अवाच्यमपि गुरोर्न्यग्भावमवादीत्पुनर्गुरुकुलं प्रति प्रेषणभयात्। अतो भगवांस्त्वेव मे मह्यं तद्वस्तु येन सर्वज्ञत्वं ज्ञातेन मे स्यात्तद्ब्रवीतु कथयत्वित्युक्तः पितोवाच तथाऽस्तु सौम्येति ॥ ७ ॥ ८ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य प्रथमः खण्डः ॥ १ ॥

एकेनैव दृष्टान्तेन विवक्षितार्थसिद्धौ किमनेकदृष्टान्तोपादानेनेत्याशङ्क्याऽऽह— अनेकेति। न वा इत्यादिप्रतीकमादाय व्याचष्टे—भगवन्त इति। तेषामज्ञाने हेतुमाह—यदित्यादिना। ननु श्वेतकेतुर्गुरूणामज्ञानमाचक्षाणो गुरुद्रोहीः प्रत्यवायी स्यादित्याशङ्क्याऽऽह—अवाच्यमपीति। गुरूणामज्ञानमतःशब्दार्थः ॥ ६ ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य प्रथमः खण्डः ॥ १ ॥

(अथ षष्ठाध्यायस्य द्वितीयः खण्डः)।

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायेत ॥ १ ॥

सदेव सदित्यस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरञ्जनं निरवयवं विज्ञानं यदवगम्यते सर्ववेदान्तेभ्यः। एवशब्दोऽवधारणार्थः। किं तदवधार्यते इत्याह। इदं जगन्नामरूपक्रियाबद्धिकृतमुपलभ्यते यत्तत्सदेवाऽऽसीदित्यासीच्छब्देन संबध्यते। कदा सदेवेदमासीदित्युच्यते। अग्रे जगतः प्रागुत्पत्तेः।

यद्विज्ञानेन सर्वविज्ञानं लभ्यते तद्विज्ञानं प्रतिज्ञातं प्रकटीकर्तुं प्रथमं सर्वस्य सन्मात्रत्वं प्रतिजानीते - सदेवेति। सच्छब्दस्य सामान्यविषयत्वं व्युदस्यति—

---

१ ख. ङ. ञ. सौम्ये। २ क. ग. ङ. ट. ण. °तद्भव°। ३ ख. ङ. ञ. सौम्येति। ४ ख. ञ. °व सौम्ये°। ५ घ. ङ. च. छ. ङ. ढ. ण. °नं नित्यं नि°। ६ ङ. °बधार्यत। ७ ख. छ. ञ. ण. लभते।

सदितीति । तस्य पृथिव्यादिभ्यो विशेषं दर्शयति—सूक्ष्मेति । आकाशादिभ्यो विशेषमाह—निर्विशेषमिति । अन्त्यविशेषव्यावृत्त्यर्थं विशेषमाह—सर्वगतमिति । तस्य तात्स्थ्यं व्यावर्तयति—एकमिति । प्रत्यगभिन्नस्य तस्य संसारित्वं वारयति—निरञ्जनमिति । निष्क्रियत्वेन तत्कूटस्थत्वमाह—निरवयवमिति । यथोक्ते वस्तुनि प्रमाणमाह—यदवगम्यत इति ।

किं नेदानीमिदं सद्येनाग्र आसीदिति विशेष्यते । न । कथं तर्हि विशेषणम् । इदानीमपीदं सदेव किंतु नामरूपविशेषणवदिदंशब्दबुद्धिविषयं चेतीदं च भवति । प्रागुत्पत्तेस्त्वग्रे केवलसच्छब्दबुद्धिमात्रगम्यमेवेति सदेवेदमग्र आसीदित्यवधार्यते । न हि प्रागुत्पत्तेर्नामवद्रूपवद्वेदमिति ग्रहीतुं शक्यं वस्तु सुषुप्तकाल इव । यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति सुषुप्ते सन्मात्रमेव केवलं वस्त्विति तथा प्रागुत्पत्तेरित्यभिप्रायः ।

विशेषणानुसारेण शङ्कते—किं नेदानीमिति । वर्तमानदशायामसत्त्वं जगतो नास्तीत्याह—नेति । सदा सत्त्वाविशेषे विशेषणं न निर्वहतीति शङ्कते—कथमिति । किं विशेषणसामर्थ्यादिदानीमसत्त्वं जगतश्चोद्यते किंवा विशेषणस्यार्थवत्त्वं पृच्छ्यते तत्राऽऽद्यं दूषयति—इदानीमपीति । प्रत्यक्षविरोधान्न वर्तमानावस्थायां जगदसत्त्वमिद्धिरित्यर्थः । द्वितीयं प्रत्याह—किंत्विति । यच्चेदं वर्तमानं जगन्नामरूपविशेषणवदालक्ष्यते तदिदंशब्दस्य तद्बुद्धेश्च विषयभावेन स्थितं भवतीति कृत्वेदमिदमिदानीमित्यपि व्यवह्रियते तदेव त्वग्रे प्रागुत्पत्तेः सच्छब्दस्तद्बुद्धिश्चेत्येतावन्मात्रगम्यमेव न त्विदंशब्दस्य तद्बुद्धेश्च विषयो भवतीत्यग्रे सदेवेदमासीदित्यवधार्यते तस्माद्विशेषणमिदंशब्दबुद्धिव्यावृत्त्यपेक्षं प्राक्कालीने जगत्यविरुद्धमित्यर्थः । अथावर्तमानावस्थायामपि जगतः सत्त्वे किमिति तत्रेदंशब्दबुद्धी न क्रमेते अत आह—न हीति । यथा सुषुप्ते काले सदपि वस्तु नेदंशब्दबुद्ध्योर्गोचरं तथा प्रागुत्पत्तेः सदपि जगन्नामवत्त्वेन रूपवत्त्वेन चेदमिति न व्यवहर्तुं शक्यं करणोपसंहारस्योभयत्र तुल्यत्वादित्यर्थः । सुषुप्तेऽपि वस्तुनो न सत्त्वं मानाभावादित्याशङ्क्याऽऽह—यथेति । नहि तत्र वस्तुनोऽसत्त्वमुत्थितस्य परामर्शादनुभूतस्यानुभवितुश्चाभावे तदयोगात् । न च तत्र विभक्तं वस्तु दृश्यते सुषुप्त्यभावप्रसङ्गादतस्तत्र केवलसन्मात्रं वस्त्विति यथाऽवगमस्तथा प्रागुत्पत्तेरपि सर्वं सन्मात्रमुक्तमेवेत्यर्थः ।

---

१ ख. छ. ञ. ण. °षवि° । २ घ. च. विशेष्येत । ३ ग. ट. °ह्याप्येत । ४ ख. ञ. ण. °मित्यादि व्य° । ५ ग. ट. 'वलं स' ।

यथेदमुच्यते लोके पूर्वाह्णे घटादि सिसृक्षुणा कुलालेन मृत्पिण्डं प्रसारितमुपलभ्य ग्रामान्तरं गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावाद्यनेकभेदभिन्नं कार्यमुपलभ्य मृदेवेदं घटशरावादि केवलं पूर्वाह्ण आसीदिति तथेहाप्युच्यते। सदेवेदमग्र आसीदिति । एकमेवेति । स्वकार्यपतितमन्यन्नास्तीत्येकमेवेत्युच्यते। अद्वितीयमिति । मृद्व्यतिरेकेण मृदो यथाऽन्यद्घटाद्याकारेण परिणमयितृकुलालादिनिमित्तकारणं दृष्टं तथा सद्व्यतिरेकेण सतः सहकारिकारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यतेऽद्वितीयमिति नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयम्। ननु वैशेषिकपक्षेऽपि सत्सामानाधिकरण्यं सर्वस्योपपद्यते। द्रव्यगुणादिषु सच्छब्दबुद्ध्यनुवृत्तेः। सद्द्रव्यं सन्गुणः सत्कर्मेत्यादिदर्शनात्। सत्यमेवं स्यादिदानीं प्रागुत्पत्तेस्तु नैवेदं कार्यं सदेवाऽऽसीदित्यभ्युपगम्यते वैशेषिकैः प्रागुत्पत्तेः कार्यस्यासत्त्वाभ्युपगमात् । न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति। तस्माद्वैशेषिकपरिकल्पितात्सतोऽन्यत्कारणमिदं सदुच्यते मृदादिदृष्टान्तेभ्यः ।

उक्तमेवार्थं संप्रतिपन्नेनोदाहरणान्तरेण समर्थयते—यथेत्यादिना। किमिदं सदित्यपेक्षायां लक्षणमाह—एकमिति। अवतारिते लक्षणवाक्ये प्रथमं विशेषणयोरर्थमाह—स्वकार्येति। सजातीयस्वगतभेदहीनमित्यर्थः। विशेषणान्तरमादाय व्याकरोति—अद्वितीयमितीति। विजातीयभेदशून्यमित्यर्थः। यदुक्तं सत्सामानाधिकरण्यात्सदेव सर्वमिति तत्राऽऽरम्भवादी शङ्कते—नन्विति । किं कार्यस्य सत्सामानाधिकरण्यं वर्तमानदशायां परपक्षेऽपि संभवतीत्युच्यते किंवा प्रागवस्थायामपीति विकल्प्याऽऽद्यमङ्गी करोति—सत्यमिति। द्वितीयं दूषयति—प्रागुत्पत्तेस्त्विति । लक्षणवाक्यं च परपक्षे दुर्गोज्यमित्याह—न चेति। वाक्यद्वयपर्यालोचनतया परपक्षासंभवमुपसंहरति—तस्मादिति। दृष्टान्तदार्ष्टान्तिकयोरैकरूप्यादृष्टान्तानां कार्यकारणाभेदनिष्ठत्वाच्च वैशेषिकपक्षासिद्धिरित्याह—मृदादीति।

तत्तत्र हैतस्मिन्प्रागुत्पत्तेर्वस्तुनिरूपणे एके वैनाशिका आहुर्वस्तु निरूपयन्तोऽसत्सद्भावमात्रं प्रागुत्पत्तेरिदं जगदेकमेवाग्रेऽद्वितीयमासीदिति । सद्भावमात्रं हि प्रागुत्पत्तेस्तत्त्वं कल्पयन्ति बौद्धाः । न तु सत्प्रतिद्वंद्वि वस्त्वन्तरमिच्छन्ति। यथा सच्चासदिति गृह्यमाणं यथाभूतं तद्विपरीतं तत्त्वं भवतीति नैयायिकाः। ननु सद्भावमात्रं प्रागुत्पत्तेश्चेदमभिप्रेतं वैनाशिकैः। कथं प्रागुत्पत्तेरिदमासीदसदेकमेवाद्वितीयं चेति कालसंबन्धः संख्यासंबन्धोऽ-

---

१ क. ग. ट. °येहोच्य° । २ ग. घ. च. ट. ठ. °ज्ञासीदित्ये° । ३ ख. ञ. °तं विप° ।

द्वितीयत्वं चोच्यते तैः । बाढं न युक्तं तेषां भावाभावमात्रमभ्युपगच्छताम् । असत्त्वमात्राभ्युपगमोऽप्ययुक्त एवाभ्युपगन्तुरनभ्युपगमानुपपत्तेः । इदानीमभ्युपगन्ताऽभ्युपगम्यते न प्रागुत्पत्तेरिति चेत् । न । प्रागुत्पत्तेः सदभावस्य प्रमाणाभावात् । प्रागुत्पत्तेरसदेवेति कल्पनानुपपत्तेः ।

वैशेषिकपक्षासंभवेऽपि वैनाशिकपक्षो भविष्यतीति शङ्कते-तत्त्वेति । असच्छब्दस्य तुच्छ्यावृत्तिविषयत्वं वारयति—अभावमात्रमिति । सतोऽन्यदसदिति स्थितेरसद्वादिनाऽपि प्रतियोगिभूतं सदास्थितमित्याशङ्क्याऽऽह—सदभावमात्रमिति । तदेव वैधर्म्यदृष्टान्तेन स्फुटयति—यथेति । सदिति यथाभूतमसदिति च ततो विपरितं गृह्यमाणं सच्चासच्चेति द्विविधं तत्त्वं भवतीति यथा नैयायिका वदन्ति द्वे तत्त्वे सदसती भावाभावाविति तैरभ्युपगमान्न तथा बौद्धैर्द्विविधं तत्त्वमिष्टं सदत्यन्ताभावोऽसदित्यभ्युपगमादप्रतीतप्रतियोगिकाभावस्यात्यन्ताभावतया शशविषाणं नास्तीत्यादौ प्रसिद्धत्वादित्यर्थः । तमिमं वैनाशिकपक्षं शिष्यमुखेन(ण) दूषयति—नन्वित्यादिना । शिष्योक्तमङ्गी करोति—बाढमिति । भावस्य योऽभावस्तन्मात्रमसदित्यभ्युपगच्छतां तेषां पक्षे न युक्तं कालसंबन्धाद्यसत इति युक्तमेव त्वयोक्तमित्यर्थः । किंच तन्मते यस्य कस्यचिदसत्त्वमिष्टं सर्वस्य वेति विकल्प्याऽऽद्यमुपेत्य द्वितीयं दूषयति—असत्त्वेति । किमभ्युपगन्ता यदा कदाचिदभ्युपगन्तव्यः किंवा प्रागवस्थायामपीति विकल्प्याऽऽद्यमङ्गीकृत्य द्वितीयं दूषयन्नाशङ्कते—इदानीमिति । स किं तदानीमसत्त्वान्नाभ्युपगम्यते किंवा तदभ्युपगन्तुरभावान्नाऽऽद्य इत्याह—न प्रागुत्पत्तेरिति । न द्वितीयः । प्रागुत्पत्तेर्नगदसदित्यस्याभ्युपगन्ता संप्रत्यभ्युपगम्यते तथा प्रागवस्थायामभ्युपगन्ता सन्नित्यस्याप्यभ्युपगन्तुरिदानीमभ्युपगमसंभवान्न हि प्रागुत्पत्तेस्तत्सत्त्वे मानाभावः । विमतः कालो ज्ञातृमत्तावान्कालत्वात्संमतवदित्यनुमानादित्याह—प्रागुत्पत्तेरिति ।

ननु कथं वस्त्वाकृतेः शब्दार्थत्वेऽसदेकमेवाद्वितीयमिति पदार्थवाक्यार्थोपपत्तिस्तदनुपपत्तौ चेदं वाक्यमप्रमाणं प्रसज्येतेति चेति । नैष दोषः । सद्ग्रहणनिवृत्तिपरत्वाद्वाक्यस्य । सदित्ययं तावच्छब्दः सदाकृतिवाचकः । एकमेवाद्वितीयमित्येतौ च सच्छब्देन समानाधिकरणौ । तथेदमासीदिति च । तत्र नञ् सद्वाक्ये प्रयुक्तः सद्वाक्यमेवावलम्ब्य सद्वाक्यार्थविषयां बुद्धिं सदेकमेवाद्वितीयमिदमासीदित्येवंलक्षणां ततः सद्वाक्यार्थान्निवर्तयत्यश्वालूढ इवाश्वालम्बनोऽश्वं तदभिमुखविषयान्निवर्तयति तद्वत् । न तु पुनः सद्भावमेवाभिधत्ते । अतः पुरुषस्य विपरीतग्रहणनिवृत्यर्थपरमिदमसदेवेत्यादि-

वाक्यं प्रयुज्यते । दर्शयित्वा हि विपरीतग्रहणं ततो निवर्तयितुं शक्यत इत्यर्थवत्त्वाद्असदादिवाक्यस्य श्रौतत्वं प्रामाण्यं च सिद्धमित्यदोषः । तस्मादसतः सर्वाभावरूपात्सद्विद्यमानमजायत समुत्पन्नम् । अडभावश्छान्दसः ॥ १ ॥

परपक्षं दूषयित्वा वाक्यतात्पर्यं दर्शयितुं चोदयति—नन्विति । + अन्यापोहस्य शब्दार्थत्वे सत्यपोह्यवस्तुनस्तदर्थत्वे वा कथमसदिति शब्दस्यार्थसिद्धिराकृतेश्च मीमांसकपक्षियया शब्दार्थत्वे सत्येकमद्वितीयमितिपदयोराकृतिवाचकत्वायोगादर्थानुपपत्तिस्तदभावे च पदार्थसंसर्गाद्यात्मनो वाक्यार्थस्यानुपपत्तिर्वाक्यार्थस्यानुपपत्तौ च निर्विषयमिदं वाक्यमप्रमाणं स्यादित्यर्थः । सदभिनिवेशनिवृत्त्यर्थमिदं वाक्यं न तु शून्यमेव साक्षादभिधत्ते तन्न वाक्याप्रामाण्यमिति परिहरति—नैष दोष इति । तथाऽपि कथमसदादिशब्दानामगृहीतशक्तिकत्वे वाक्यार्थोपपत्तिरित्याशङ्क्याऽऽह—सदित्ययमिति । एकमद्वितीयमिति शब्दद्वयवदिदमासीदिति च शब्दौ सच्छब्देन समानाधिकरणावेवेत्याह—तथेति । सदेवेत्यादिवाक्यस्योक्तविधयाऽर्थवत्त्वेऽपि कथमसदेवेत्यादिवाक्यमर्थवदित्याशङ्क्याऽऽह—तत्रेति । इवशब्दो यद्वदित्यस्मिन्नर्थे तद्वदिति पृथक्प्रयोगात् । किमिति वाक्यस्य सदभिनिवेशनिवृत्तिपरत्वं सद्भावपरत्वमेव किं न स्यादित्याशङ्क्याऽऽह—न खिति । सदभावस्यात्यन्ताभावलक्षणस्य तुच्छत्वाच्छब्दशक्तिगोचरत्वासंभवादित्यर्थः । अन्यपरत्वासंभवे सदभिनिवेशनिवृत्तिपरत्वं वाक्यस्य सिद्धमित्युपसंहरति—अत इति । प्राक्काले पुरुषस्य सदभिनिवेशनिवृत्तिरत्र विवक्षिता चेत्तर्हि तदानीमेव प्रयोक्तव्यं किमित्यसदेवेदमग्र आसीदिति प्रयुक्तमित्याशङ्क्याऽऽह—दर्शयित्वा हीति । अथवा सदेवेत्यादिना स्वपक्षमुक्त्वा तद्दृढीकरणार्थत्वेनासदेवेत्यादिनाऽनुवादोऽयमिति तात्पर्यान्तरमाह—दर्शयित्वा हीति । प्रथमे पक्षे तस्मादित्यादिवाक्यस्यार्थाभावाद्द्वितीयः पक्षो गृहीतस्तत्र कारणस्यासत्त्वमुक्तमिदानीं कार्यस्यापि तदर्शयति—तस्मादिति । अजायतेति वक्तव्ये कथं श्रुत्या जायतेति प्रयुक्तमित्याशङ्क्याऽऽह—अडभाव इति ॥ १ ॥

कुतस्तु खलु सोम्यैवꣳ स्यादिति होवाच कथ-

+ अश्वादन्योऽनश्वो धर्मविरुद्धोऽधर्मो ज्ञानाभावोऽज्ञानम् ।

---

१ क. ग. ङ. ढ. °वत्ताऽस° । २ घ. च. ठ. ड. °स्य प्रा° । ३ ग. ट. °क्तिकत्वे । ४ ख. म. ण. °ति श° । ५ क. ख. छ. झ. ण. °गादित्यर्थः । किं° । ६ ग. ट. °णार्थेना° । ७ ख. घ. ङ. झ. ट. °लु सौम्यै° ।

असतः सज्जायेतेति । सत्त्वेव सोम्येदमग्र आसीदेक-
मेवाद्वितीयम् ॥ २ ॥

तदेतद्विपरीतग्रहणं महावैनाशिकपक्षं दर्शयित्वा प्रतिषेधति । कुतस्तु प्रमाणात्खलु हे सोम्यैवं स्यादसतः सज्जायेतेत्येवं कुतो भवेन्न कुतश्चित्प्र-मादेवं संभवतीत्यर्थः । यद्यपि बीजोपमर्देऽङ्कुरो जायमानो दृष्टोऽभावा-देवेति तदप्यभ्युपगमविरुद्धं तेषाम् । कथम् । ये तावद्बीजावयवा बीजसं-स्थानविशिष्टास्तेऽङ्कुरेऽप्यनुवर्तन्त एव न तेषामुपमर्दोऽङ्कुरजन्मनि । यत्पुनर्बीजाकारसंस्थानं तद्बीजावयवव्यतिरेकेण वस्तुभूतं न वैनाशिकैरभ्यु-पगम्यते यदङ्कुरजन्मन्युपमृद्येत । अथ तदस्त्यवयवव्यतिरिक्तं वस्तुभूतं तथा च सत्यभ्युपगमविरोधः । अथ संवृत्याऽभ्युपगतं बीजसंस्थानरूपमुपमृद्यत इति चेत् । केयं संवृतिर्नाम किमसत्त्वभाव उत भाव इति । यद्यभावो दृष्टान्ताभावः । अथ भावस्तथाऽपि नाभावादङ्कुरोत्पत्तिर्बीजावयवेभ्यो ह्यङ्कुरोत्पत्तिः ।

कुतस्तु खल्वित्यादिवाक्यालोचनायामपि द्वितीयः पक्षो ग्राह्य इत्यभिप्रेत्याऽऽह—तदेतदिति । विमतमभावपुरःसरं कार्यत्वादङ्कुरवदिति प्रमाणं शङ्कते—यद्यपीति । अप्रसिद्धविशेषणत्वं मत्वा परिहरति—तदपीति । बीजोपमर्देनाङ्कुरोत्पत्तेरिष्टत्वा-त्कथमप्रसिद्धविशेषणतेति शङ्कते—कथमिति । किमङ्कुरोत्पत्तौ बीजावयवा उप-मृद्यन्ते किं वा बीजाकारसंस्थानमिति विकल्प्याऽऽद्यं प्रत्याह—ये तावदिति । द्वितीयं दूषयति—यत्पुनरिति । तत्किं परमार्थस्तु किं वा संवृतिसिद्धं नाऽऽद्योऽ-भ्युपगमविरोधादित्युक्तं द्वितीयमुत्थापयति—अथ संवृत्येति । संवृतिं विकल्पयति—केयमिति । आद्ये भावस्याभावादुत्पत्तौ दृष्टान्ताभावः संवृतेरवस्तुत्वेन च बीजस-त्त्वासाधकत्वादित्याह—यदीति । द्वितीयमनूद्य दूषयति—अथेति । तत्त्वं यया संवि-द्यत आच्छाद्यते सा संवृतिर्लौकिकी बुद्धिः सा चेद्भावरूपेष्टा तर्हि तया बीजावयवा-नामङ्कुराकारपरिणामसिद्धेर्दृष्टान्तासिद्धिरित्यर्थः ।

अवयवा अप्युपमृद्यन्त इति चेत् । न तदवयवेषु तुल्यत्वात् । यथा वैना-शिकानां बीजसंस्थानरूपोऽवयवी नास्ति तथाऽवयवा अपीति तेषामप्युपम-र्दानुपपत्तिः । बीजावयवानामपि सूक्ष्मावयवास्तदवयवानामप्यन्ये सूक्ष्म-रावयवा इत्येवं प्रसङ्गस्यानिवृत्तेः सर्वत्रोपमर्दानुपपत्तिः । सद्बुद्धयनुवृत्तेः

---

१ ख. ङ. ञ. °व सौम्ये° । २ ङ. ञ ठ. हे सौम्ये° । ३ ख. ङ. ञ. ट. ण. °ज्ञायते । ४ ख. ग. छ. ट. णं. °तीयप° । ५ क. ग ट. °ति श° । ६ क. छ. ञ. ण. °न बी° ।

सत्त्वानिवृत्तिश्चेति सद्वादिनां सत एव सदुत्पत्तिः सेत्स्यति । न त्वसद्वादिनां दृष्टान्तोऽस्त्वसतः सदुत्पत्तेः । मृत्पिण्डाद्घटोत्पत्तिर्दृश्यते सद्वादिनां तद्भावे भावात्तदभावे चाभावात् ।

लौकिकबुद्धिमनाश्रित्य परमतमेवाऽऽदाय शङ्कते—अवयवा इति । असत्यवयविन्युपमर्दायोगवदवयवेष्वपि तदयोगस्य तुल्यत्वान्नेदं चोद्यमित्युत्तरमाह—न तदवयवेष्विति । तदेव स्फुटयति—यथेति । नन्वसत्पक्षे परमावयवी नास्त्यवयवास्तु सन्त्येवेति चेत्तत्राऽऽह—बीजावयवानामपीति । तर्हि तेषामङ्कुरजन्मन्युपमर्दः स्यादिति चेत्तत्राऽऽह—तदवयवानामपीति । न चाङ्कुरजन्मन्यवयवपरम्पराविश्रान्तिभूमिरुपपद्यते तस्याः शून्यत्वे तदुपमर्दे सत्कारणवादापातात् । अशून्यत्वेऽपि कार्यत्वे कादाचित्कद्रव्यस्य सावयवत्वेनोक्तदोषतादवस्थ्यात्कार्यत्वे भावश्चेदुपमर्दासिद्धिरभावश्चेत्तदुपमर्दे सत्कारणवादापत्तिरेवेति भावः । असद्वादस्याप्रामाणिकत्वमुक्त्वा सद्वादस्य प्रामाणिकत्वमाह—सद्बुद्धीति । परमते दृष्टान्ताभावमुक्तमनूद्य स्वमते तत्सत्त्वं च समुचिनोति—न त्विति ।

यद्यभावादेव घट उत्पद्येत घटं विना मृत्पिण्डो नोपादीयेत । अभावशब्दबुद्ध्यनुवृत्तिश्च घटादौ प्रसज्येत न त्वेतदस्त्यतो नासतः सदुत्पत्तिः । यदप्याहुर्मृद्बुद्धिर्घटबुद्धेर्निमित्तमिति मृद्बुद्धिर्घटबुद्धेः कारणमुच्यते न तु परमार्थत एव मृद्घटो वाऽस्तीति तदपि मृद्बुद्धिर्विद्यमाना विद्यमानाया एव घटबुद्धेः कारणमिति नासतः सदुत्पत्तिः । मृद्घटबुद्ध्योर्निमित्तनैमित्तिकतयाऽऽनन्तर्यमात्रं न तु कार्यकारणत्वमिति चेत् । न । बुद्धीनां नैरन्तर्ये गम्यमाने वैनाशिकानां बहिर्दृष्टान्ताभावात् । अतः कुतस्तु खलु सौम्यैवं स्यादिति होवाच कथं केन प्रकारेणासतः सज्जायेतेति । असतः सदुत्पत्तौ न कश्चिदपि दृष्टान्तप्रकारोऽस्तीत्यभिप्रायः । एवमसद्वादिपक्षमुन्मथ्योपसंहरति सत्त्वेव[3] सोम्येदमग्र आसीदिति स्वपक्षसिद्धिम् ।

घटस्याप्यभावादेवोत्पत्तेरिष्टत्वाद्दृष्टान्तासंप्रतिपत्तिरित्याशङ्क्याऽऽह—यदीति । किंच यद्यस्योपादानं दृष्टं तच्छब्दप्रत्ययौ तत्रानुवर्तेते यथा तथाऽभावश्चेद्घटादेरुपादानं तच्छब्दधियौ तत्रानुवृत्ते स्यातां न चानुवर्तेते तस्मादसतः सदुत्पत्तिरयुक्तेत्याह—अभावेति । भावस्य सतो मृत्पिण्डस्य घटादिकारणत्वमन्वयव्यतिरेकाभ्यामुक्तं तत्रान्वयव्यतिरेकयोरन्यथासिद्धिमुद्भावयति—यदपीति । तस्मिन्नपि पक्षे न मत्पक्षक्षतिः-

---

१ क. ग. ट. मृद्बुद्धिघट° । २ ख. ङ. अ. सौम्यैवं । ३ ख. घ. ङ. अ. °व सौम्ये° ।

रित्युत्तरमाह—तदपीति । यदुक्तं सद्बुद्धेः सद्बुद्धिं प्रति कारणत्वमिति तदसिद्धमिति शङ्कते—मृद्घटबुद्ध्योरिति । सत्त्वसिद्धौ हि पूर्वभावित्वं कारणत्वं कार्यत्वं चोत्तरभावित्वं युक्तं बुद्धीनां चासत्त्वादानन्तर्यमात्रेण व्यवह्रियते निमित्तनैमित्तिकत्वमित्यर्थः । असतीनामपि बुद्धीनामानन्तर्येण निमित्तनैमित्तिकत्वमित्येतन्न शक्यं संभावयितुं दृष्टान्ताभावादित्युत्तरमाह—न बुद्धीनामिति । कुतस्तु खल्वित्यादिवाक्यं व्याख्यातमुपसंहरति—अत इति । पूर्वमसतः सदुत्पत्तौ दृष्टान्ताभाव उक्त इदानीमन्यदुपसंहृतमिति शङ्कां वारयति—असत इति । स्वपक्षसिद्धिमुपसंहरतीति संबन्धः ।

ननु सद्बुद्धिनोऽपि सतः सदुत्पद्यत इति नैव दृष्टान्तोऽस्ति । घटाद्घटान्तरोत्पत्त्यदर्शनात् । सत्यमेवं न सतः सदन्तरमुत्पद्यते किं तर्हि सदेव संस्थानान्तरेणावतिष्ठते । यथा सर्पः कुण्डली भवति । यथा च मृच्चूर्णपिण्डघटकपालादिभेदैः । यद्येवं सदेव सर्वप्रकारावस्थं कथं प्रागुत्पत्तेरिदमासीदित्युच्यते । ननु न श्रुतं त्वया सदेवेत्यवधारणमिदंशब्दवाच्यस्य कार्यस्य । प्राक्तर्हि प्रागुत्पत्तेरसदेवाऽऽसीन्नेदंशब्दवाच्यमिदानीमिदं जातमिति । न । सत एवेदंशब्दबुद्धिविषयतयाऽवस्थानाद्यथा मृदेव पिण्डघटादिशब्दबुद्धिविषयत्वेनावतिष्ठते तद्वत् ।

सिद्धान्तेऽपि दृष्टान्तासिद्धिस्तुल्येति शङ्कते—नन्विति । यद्यपि मृदो घटोत्पत्तिर्दृष्टा तथाऽपि न मृदो मृदन्तरं घटाद्घटान्तरमुत्पद्यमानमुपलभ्यते तस्मान्न सतः सदन्तरोत्पत्तिरित्यर्थः । किं सदन्तरस्य सतः सकाशादुत्पत्तिरेव वार्यते किंवा कारणत्वं सतो निराक्रियते तत्राऽऽद्यमङ्गी करोति—सत्यमिति । द्वितीयं निराकरोति—किं तर्हीति । तत्रापि दृष्टान्ताभावमाशङ्क्याऽऽह—यथेति । कुण्डलीभावे कार्यत्वप्रसिद्धिर्नास्तीत्याशङ्क्योदाहरणान्तरमाह—यथा चेति । प्रभेदैरवतिष्ठत इति संबन्धः । सत एव सर्वप्रकारेणावस्थाने प्राक्कालिकं कार्यस्य सत्त्ववचनमयुक्तं तस्य सर्वदा सत्त्वाविशेषादिति शङ्कते—यद्येवमिति । प्रागवस्थं हि कारणं सन्मात्रत्वं च कार्यस्यावधार्यते तथा च कारणस्यैव सतस्तेन तेनाऽऽकारेणावस्थानमित्यङ्गीकारेऽपि कार्यस्य प्राक्कालिकं सत्त्वावधारणमविरुद्धमित्युत्तरमाह—नन्विति । कार्यस्य कारणमात्रत्वं चेदवधृतं तर्हि कारणमेवाऽऽसीन्न कार्यं तदसदेवेदानीं जातमित्यसत्कार्यवादिमतमायातमिति शङ्कते—प्राप्तमिति । कारणस्यैव कार्यरूपेणावस्थानान्नासत्कार्यवादापत्तिरिति दृष्टान्तेन परिहरति—नेत्यादिना ।

ननु यथा मृद्रूपत्वेवं पिण्डघटाद्यपि तद्रूपसद्बुद्धेरन्यबुद्धिविषयत्वात्का-

१ क. मृद्बुद्धिरट° । २ ग. घ. ङ. च. ट. ठ. ड. ढ. ण. °प्रकारै । य° ।

र्थस्य सतोऽन्यद्वस्त्वन्तरं स्यात्कार्यजातं यथाऽश्वाद्गौः । न । पिण्डघटादीनामितरेतरव्यभिचारेऽपि मृत्त्वाव्यभिचारात् । यद्यपि घटः पिण्डं व्यभिचरति पिण्डश्च घटं तथाऽपि पिण्डघटौ मृत्त्वं न व्यभिचरतस्तस्मान्मृन्मात्रं पिण्डघटौ । व्यभिचरति त्वश्वं गौरश्वो वा गाम् । तस्मान्मृदादि संस्थानमात्रं घटादयः । एवं सत्संस्थानमात्रमिदं सर्वमिति युक्तं प्रागुत्पत्तेः सदेवेति । वाचाऽऽरम्भणमात्रत्वाद्विकारसंस्थानमात्रस्य ।

विमतमुपादानाद्भिद्यते तद्विलक्षणबुद्धिविषयत्वाद्यथाऽश्वबुद्धिविलक्षणविषयो महिषस्तथो भिद्यते । तथा च कथं सत एवेदंधीविषयानिर्वाच्यावस्थाङ्गीकारेणासत्कार्यवादापत्तिसमाधिरिति चोदयति—नन्विति । विलक्षणबुद्धिविषयत्वस्य भेदमात्रसाधकत्वे सिद्धसाधनं तात्त्विकभेदसाधकत्वे दृष्टान्तासिद्धिरित्यभिप्रेत्याऽऽह—नेति । किंच कार्यस्य व्यभिचारित्वेन रज्जुसर्पादिवन्मिथ्यात्वानुमानादनिर्वाच्यसंस्थानादेव कार्यबुद्ध्यालम्बनत्वं सतोऽङ्गीकर्तव्यमित्याह—पिण्डेति । तदेव स्फुटयति—यद्यपीति । मृत्त्वमन्तरेण पिण्डघटयोः स्वरूपाभावादिति तच्छब्दार्थः । अव्यभिचारे मृत्त्वमित्यादिदृष्टान्तः । अव्यभिचारफलमाह—तस्मादिति । दृष्टान्तातिमर्थं दार्ष्टान्तिके समर्थयति—एवमिति । पृथगेव प्रथमानस्य कार्यस्य कथं सन्मात्रत्वमित्याशङ्क्याऽऽह—वाचाऽऽरम्भणेति ।

ननु निरवयवं सन्निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यज इत्यादिश्रुतिभ्यो निरवयवस्य सतः कथं विकारसंस्थानमुपपद्यते । नैष दोषः । रज्ज्वाद्यवयवेभ्यः सर्पादिसंस्थानवद्बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानोपपत्तेः । वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सदेव सत्यमिति श्रुतेः । एकमेवाद्वितीयं परमार्थत इदंबुद्धिकालेऽपि ॥ २ ॥

कार्यमिथ्यात्वं स्फुटीकर्तुं चोदयति—नन्विति । यथा खलु ज्ञातेभ्यो रज्ज्वाद्यवयवेभ्यः सर्पादिसंस्थानमनिर्वाच्यमिष्टं तथा श्रुतिजनितजगत्कारणतत्त्वबुद्ध्यनुपपत्त्या कल्पितेभ्यः । सतो मायोपाधिकस्यावयवेभ्यो विकारसंस्थानमुपपद्यते तस्मादयं द्वैतप्रपञ्चो ब्रह्मविवर्तः संभवतीति परिहरति—नैष दोष इति । ब्रह्मविवर्तो जगदित्यत्र श्रुतिमनुकूलयति—वाचाऽऽरम्भणमिति । प्रपञ्चमिथ्यात्वे फलितमुपसंहरति—एकमेवेति ॥ २ ॥

तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत

---

१ क. ङ. ढ. °रत्यर्थं । २ ख. घ. ङ. च. ञ. ठ. ड. ढ. ण. °नस्य । ३ ख. छ. ञ. ढ. °क्षणो म° । ४ क. ग. छ. ढ. दार्ष्टान्ते ।

तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते ॥ ३ ॥

तत्सदैक्षतेक्षां दर्शनं कृतवत्[1]। अतश्च न प्रधानं सांख्यपरिकल्पितं जगत्कारणम् । प्रधानस्याचेतनत्वाभ्युपगमात्[2] । इदं तु सच्चेतनमीक्षितृत्वात्[3] । तत्कथमैक्षतेत्याह—बहु प्रभूतं स्यां भवेयं प्रजायेय प्रकर्षेणोत्पद्येय । यथा मृद्घटाद्याकारेण यथा वा रज्ज्वादि सर्पाद्याकारेण बुद्धिपरिकल्पितेन । असदेव तर्हि सर्वं यद्गृह्यो रज्जुरिव सर्पाद्याकारेण । न । सत एव द्वैतभेदेनान्यथागृह्यमाणत्वान्नासत्त्वं कस्यचित्क्वचिदिति ब्रूमः। यथा सतोऽन्यद्वस्त्वन्तरं परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वमसत्त्वं ब्रुवते तार्किका न तथाऽस्माभिः कदाचित्कचिदपि सतोऽन्यदभिधानमभिधेयं वा वस्तु परिकल्प्यते । सदेव तु सर्वमभिधानमभिधीयते च यदन्यबुद्धया । यथा रज्जुरेव सर्पबुद्धया सर्प इत्यभिधीयते यथा वा पिण्डघटादि मृदोऽन्यबुद्धया पिण्डघटादिशब्देनाभिधीयते लोके रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्तेते यथा च मृद्विवेकदर्शिनां घटादिशब्दबुद्धी तद्वत्सद्विवेकदर्शिनामन्यविकारशब्दबुद्धी निवर्तेते । यतो वाचो निवर्तन्ते । अप्राप्य मनसा सहेति । अनिरुक्तेऽनिलयन इत्यादिश्रुतिभ्यः ।

अद्वितीयवस्त्वसमर्थनार्थमुत्तरवाक्यमुत्थाप्य व्याचष्टे—तत्सादिति । सच्छब्दवाच्यं जगत्कारणं प्रधानमिति केचित्तदप्येतेन निरस्तमित्याह—अतश्चेति । ईक्षापूर्वकारित्वादिति यावत् । अचेतनत्वाभ्युपगमान्न तस्येक्षापूर्वकं स्रष्टृत्वमिति शेषः । परिणामविवर्तवादावाश्रित्योदाहरणद्वयम् । बहु स्यामित्यादिश्रुतितात्पर्यं वक्तुं निरस्तमेव चोद्यमुद्भावयति—असदेवेति । बहु स्यां प्रजायेयेत्यनेनेक्षितुरेव कार्यकारापत्तिवचनेन वैशेषिकादिमतमेतन्निरस्तमिति श्रुतितात्पर्यं दर्शयन्नुत्तरमाह— नेत्यादिना । तदेव प्रपञ्चयति—यथेत्यादिना । प्रतिज्ञातमर्थं मतद्वयानुसारेण दृष्टान्ताभ्यां स्पष्टयति—यथा रज्जुरिति । अज्ञानान्वयव्यतिरेकाभ्यां रज्जुसर्पादेरज्ञानमयत्वं च द्वैताभिनिवेशस्य सन्मात्राविवेके सत्येवोत्पत्तेर्विचारेण तद्विवेके चानुत्पत्तेर्द्वैतमप्यज्ञानमयमेव तस्य तु तत्त्वं सन्मात्रमधिष्ठानं वाङ्मनसातीतमित्यर्थः । तस्य वाङ्मनसातीतत्वे प्रमाणमाह—यत इति । अन्यदेव तद्विदितादित्यादिवाक्यमादिपदार्थः ।

---

१ ग. चन शो° । २ ङ. च. ढ. °त् । कथ° । ३ ख. घ. ङ. च. ञ. ठ. ड. ण. °चिदि° । ४ क. ग. ट. °दिर्मृदोऽ° । ५ ख. ङ. ञ. ढ. ण °दर्शनात्तु स° ।

एवमीक्षित्वा तत्तेजोऽसृजत तेजः सृष्टवत् । ननु तस्माद्वा एतस्मादात्मन आकाशः संभूत इति श्रुत्यन्तर आकाशाद्वायुस्ततस्तृतीयं तेजः श्रुतमिह कथं प्राथम्येन तस्मादेव तेजः सृज्यते तत एव चाऽऽकाशमिति विरुद्धम् । नैष दोषः । आकाशवायुसर्गानन्तरं तत्सत्तेजोऽसृजतेतिकल्पनोपपत्तेः । अथवाऽविवक्षित इह सृष्टिक्रमः सत्कार्यमिदं सर्वमतः सदेकमेवाद्वितीयमित्येतद्विवक्षितम् । मृदादिदृष्टान्तात् । अथवा त्रिवृत्करणस्य विवक्षितत्वात्तेजोबन्नानामेव सृष्टिमाचष्टे । तेज इति प्रसिद्धं लोके दग्धृ पक्तृ प्रकाशकं रोहितं चेति । तत्सत्सृष्टं तेज ऐक्षत तेजोरूपसंस्थितं सदैक्षततेत्यर्थः । बहु स्यां प्रजायेयेति पूर्ववत् । तदपोऽसृजत । आपो द्रवाः स्निग्धाः स्यन्दिन्यः शुक्लाश्चेति प्रसिद्धा लोके । यस्मात्तेजसः कार्यभूता आपस्तस्माद्यत्र क्वचं देशे काले वा शोचति संतप्यते स्वेदते प्रस्विद्यते वा पुरुषस्तेजस एव तत्तदाऽऽपोऽधि जायन्ते ॥ ३ ॥

तैत्तिरीयकश्रुतिविरोधमाशङ्कते—नन्विति । तथाऽपि कथं विरोधधीरित्याशङ्क्याऽऽह—इति विरुद्धमिति । अस्यां श्रुतौ सतः सकाशादेव प्राथम्येन तेजः सृज्यमानमुच्यते श्रुत्यन्तरे तु तस्मादेव सतः सकाशादाकाशं प्राथम्येन सृष्टमित्युपदिष्टं तथा च कथमिदं मिथो विरुद्धं सिध्यतीत्यर्थः । तैत्तिरीयकश्रुत्यनुसारेण च्छान्दोग्यश्रुतेर्व्याख्यानसंभवान्न विरोधोऽस्तीति परिहरति—नैष दोष इति । सृष्टिक्रमस्य विवक्षितत्वमङ्गीकृत्योक्तं तदेव नास्त्यद्वितीयत्वं तु सतो विवक्षितमिति पक्षान्तरमाश्रित्याऽऽह—अथवेति । तत्र गमकं दर्शयति—मृदादीति । मृदादिकार्यं घटादि तद्व्यतिरेकेण नास्ति मृदाद्येव तु सत्यमितिदृष्टान्तेऽपादानाद्ब्रह्मणः सतस्तेजोबन्नादिकार्यं तदतिरेकेण नास्ति सन्मात्रमेव सत्यमिति दार्ष्टान्तिकेऽपि विवक्षितं प्रतिभातीत्यर्थः । तत्तेजोऽसृजतेत्यादिश्रुतेस्तात्पर्यान्तरमाह—अथवा त्रिवृत्करणस्येति । तासां त्रिवृतं त्रिवृतमेकैकां करवाणीत्यादौ त्रिवृत्करणस्येष्टत्वात्त्रयाणामेव भूतानामिह सृष्टिरुच्यते । न चैवं पञ्चीकरणमविवक्षितमिति वाच्यम् । भूतत्रयसृष्टिश्रुतौ श्रुत्यन्तरसिद्धाकाशादिसृष्टेरुपलक्षणत्वत्त्रिवृत्करणश्रुत्या पञ्चीकरणोपलक्षणात् । तथाच श्रुत्यन्तरसिद्धयोराकाशवाय्वोस्तेजःप्रभृतिष्वन्तर्भावमभिप्रेत्य लघूपायेन सर्वस्य सन्मात्रत्वं मन्तव्यमिति मन्वाना श्रुतिस्त्रिवृत्करणमेवाऽऽचक्षणा तदनुरोधेन त्रयाणामेव सृष्टिमाहेत्यर्थः । तेजसोऽचेतनस्य कथमीक्षितृत्वमित्याशङ्क्य वाक्यार्थमाह—तेजोरूपेति । अपां तेजःकार्यत्वे लोकानुभवमनुकूलयति—यस्मादिति ॥ ३ ॥

---

१ क. °स्तृती° । २ क. °सिद्धं लो° । ३ ख. ञ. ण. °चन दे° । ४ ग. ट. °यश्च° ।

ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति
ता अन्नमसृजन्त तस्माद्यत्र क्व च वर्षति
तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं
जायते ॥ ४ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य द्वितीयः खण्डः ॥२॥

ता आप ऐक्षन्त पूर्ववदेवाबकारसंस्थितं सदैक्षतेत्यर्थः । बह्व्यः प्रभूताः स्याम भवेम प्रजायेमहृत्पद्येमहीति । ता अन्नमसृजन्त पृथिवीलक्षणम् । पार्थिवं ह्यन्नं यस्मादप्कार्यमन्नं तस्माद्यत्र क्व च वर्षति देशे तत्तत्रैव भूयिष्ठं प्रभूतमन्नं भवति । अतोऽद्भ्य एव तदन्नाद्यमधिजायते । ता अन्नमसृजन्तेति पृथिव्युक्ता पूर्वमिह तु दृष्टान्तेऽन्नं च तदाद्यं चेति विशेषणाद्व्रीहियवौ उच्यन्ते । अन्नं च गुरु स्थिरं धारणं कृष्णं च रूपतः प्रसिद्धम् । ननु तेजःप्रभृतिष्वीक्षणं न गम्यते हिंसादिप्रतिषेधाभावाद्वासादिकार्यानुपलम्भाच्च तत्र कथं तत्तेज ऐक्षतेत्यादि । नैष दोषः । ईक्षितृकारणपरिणामत्वात्तेजःप्रभृतीनां सत एवेक्षितुर्नियतक्रमविशिष्टकार्योत्पादकत्वाच्च तेजःप्रभृतीक्षत इवेक्षत इत्युच्यते भूतम् ।

पृथिव्यामन्नशब्दप्रयोगे हेतुमाह—पार्थिवं हीति । अपां कार्यमन्नमित्यत्रापि लोकप्रसिद्धिं दर्शयति—यस्मादिति । ता अन्नमसृजन्तेत्यत्राद्भ्योऽन्नसृष्टिरुपदिष्टा दृष्टान्तेऽपि तामेवस्तत्सृष्टिरुपदिश्यते तथा च पौनरुक्त्यमित्याशङ्क्याथविशेषं दर्शयति—अन्नमिति । तत्तेज ऐक्षतेत्यादौ यथाश्रुतमर्थं गृहीत्वा चोदयति—नन्विति । प्राणिषु हिंसाप्रतिषेधवदनुग्रहविधानवच्च तेजःप्रभृतिषु तदभावात्तेष्वीक्षणकार्यदृष्टिवदेते तदृष्टयभावाच्च नैतेष्वीक्षणं प्रामाणिकं तथा च प्रकृतं प्रमत्तगीतमित्यर्थः । तेषां गौणमीक्षितृत्वमुपेत्य परिहरति—नैष दोष इति ।

ननु सतोऽप्युपचरितमेवेक्षितृत्वम् । न । सदीक्षणस्य केवलशब्दगम्यत्वान्न शक्यमुपचरितं कल्पयितुम् । तेजःप्रभृतीनां त्वनुमीयते मुख्येक्षणाभाव इति युक्तमुपचरितं कल्पयितुम् । ननु सतोऽपि मृदुत्कारणत्वादचेतनत्वं शक्यम-

---

१ घ. च. ङ. °यिष्ठम° । २ क. ग. ट. °ष्ठं बहुतरम° । ३ क. ग. ट. °यत इति । ता° । ४ ठ. ढ. °षणेन व्रीहि° । ५ ख. ङ. ञ. ढ. ण. °वा वा उ° । घ. च. ठ. ङ. °वाद्युच्यते । अ° । ६ क. ग. ट. °रं च धा° । ७ ग. घ. च. ट. ठ. °वेक्षित्रित्यु° । ८ ग. ङ. ङ. ढ. ण. °यत ईक्षु° ।

नुपातुम् । अतः प्रधानस्यैवाचेतनस्य सतश्चेतनार्थत्वान्नियतकालक्रमविशिष्ट-कार्योत्पादकत्वाच्चैक्षतेक्षतेति शक्यमनुमातुमुपचरितमेवेक्षणम् । दृष्टश्च लोकेऽचेतने चेतनवदुपचारः । यथा कूलं पिपतिषतीति तद्वत्सतोऽपि स्यात् । न । तत्सत्यं स आत्मेति तस्मिन्नात्मोपदेशात् । आत्मोपदेशोऽप्युपचरित इति चेद्यथा ममाऽऽत्मा भद्रसेन इति सर्वार्थकारिण्यनात्मन्यात्मोपचारस्तद्वत् । न । सदस्मीति सत्सत्याभिसंधस्य तस्य तावदेव चिरमिति मोक्षोपदेशात् ।

सतोऽपि गौणमीक्षणमुपचारप्राये पाठादिति शङ्कते—नन्विति । संनिधेः शब्दस्य बलीयस्त्वमुपेत्य परिहरति— न सदीक्षणरथेति । तुल्यं तेजःप्रभृतिष्वपि शब्द-गम्यत्वमीक्षणस्येति चेन्नेत्याह— तेजःप्रभृतीनां त्विति । विमतमीक्षितं न भव-त्यचेतनत्वात्कुम्भवदित्यनुमानात्तेजोमुख्ये जगतीक्षणासंभवात्तत्र श्रुतं तदौपचारिकमु-चितमित्यर्थः । सांख्योऽनुमानावष्टम्भेन शङ्कते—नन्विति । अचेतनस्य कथमीक्ष-णमित्याशङ्क्याऽऽह— अत इति । अनुमातुं कल्पयितुमिति यावत् । कथमचेतने चेतनवदुपचारस्तत्राऽऽह— दृष्टश्चेति । आत्मशब्दावष्टम्भेन परिहरति—नेत्यादिना । आत्मोपदेशोऽपि प्रधाने गौणो भविष्यतीति शङ्कते— आत्मोपदेशोऽपीति । तामेव शङ्कां दृष्टान्तद्वारा विवृणोति—यथेति । इदं परिहरन्नस्मिन्नात्मोपदेशो गौणे न भवति तन्निष्ठस्य मोक्षोपदेशादित्युत्तरमाह—नेत्यादिना ।

सोऽप्युपचार इति चेत् । प्रधानात्माभिसंधस्य मोक्षसामीप्यं वर्तत इति मोक्षोपदेशोऽप्युपचरित एव । यथा लोके ग्रामं गन्तुं प्रस्थितः प्राप्तवानहं ग्राममिति ब्रूयात्त्वरापेक्षया तद्वत् । न । येन विज्ञातेनाविज्ञातं विज्ञातं भव-तीत्युपक्रमात् । सत्येकस्मिन्विज्ञाते सर्वं विज्ञातं भवति तदनन्यत्वाँत्सर्व-स्याद्वितीयवचनाच्च । न चान्यद्विज्ञातव्यमवशिष्टं श्रावितं श्रुत्याऽनुमेयं वा लिङ्गतोऽस्ति येन मोक्षोपदेश उपचरितः स्यात् । सर्वस्य च प्रपाठकार्थ-स्योपचरितत्वपरिकल्पनायां वृथा श्रमः परिकॅल्पयितुः स्यात्पुरुषार्थसाधन-विज्ञानस्य तर्केणैवाधिगतत्वात्तस्य । तस्माद्वेदप्रामाण्यान्न श्रुतार्थपरित्यागः । अतश्चेतनावत्कारणं जगत इति सिद्धम् ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

---

१ ख. ञ. ङ. ढ. ण. °त्वाच्चेक्षत इवेक्षत इति । २ ङ. °ति तत्स° । ङ. ढ. °ति सत्या° । ३ क. ङ. °त् । मोक्षोऽप्यु° । ४ क. ग. ट. ढ. °त्वाच्च सर्व° । ५ ग. घ. च. ट. ठ. °कल्पितः स्या° ।

मोक्षोपदेशोऽप्युपचरितो भविष्यतीति शङ्कते—सोऽपीति । शङ्कामेव विवृणोति—प्रधानात्मेति । एकविज्ञानेन सर्वविज्ञानोपदेशमाश्रित्य परिहरति—न येनेति । उक्तमेव विवृणोति—सत्येकस्मिन्निति । सतोऽन्यस्य ज्ञातव्यस्याप्रामाणिकत्वाच्च सतो ज्ञाने सर्वज्ञानोपदेशो युक्तिमानित्याह—न चेति । संप्रति हि प्रधानज्ञाने तद्विकारस्य तदभिन्नस्य ज्ञानं तस्य च पुरुषार्थत्वात्तज्ज्ञाने पुरुषाणामपि ज्ञानमुपचर्यते तस्मादेकविज्ञानेन सर्वविज्ञानोपदेशान्न मोक्षोपदेशमुख्यत्वसिद्धिरित्याशङ्क्याऽऽह—सर्वस्य चेति । कथमुपनिषदारम्भो वृथेत्युच्यते पुमर्थसाधनज्ञानार्थत्वादित्याशङ्क्याऽऽह—पुरुषार्थेति । तस्यानुमानवादिनः सांख्यस्य मते मुक्तिहेतोर्ज्ञानस्य जडाजडयोरैक्यानुपपत्तिरित्यादिना तर्केणैव सिद्धत्वादुपनिषदारम्भो वृथेवेत्यर्थः । श्रुतेर्मुख्यार्थत्वे बाधकाभावात्तत्परित्यागायोगादीक्षित्यधिकरणन्यायेन प्रधानवादासिद्धिरिति परमतनिरसनमुपसंहरति—तस्मादिति । प्रधानवादासंभवे परिशेषायातं स्वमतं निगमयति—अत इति ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

(अथ षष्ठाध्यायस्य तृतीयः खण्डः) ।

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्या-
ण्डजं जीवजमुद्भिज्जमिति ॥ १ ॥

तेषां जीवाविष्टानां खल्वेषां पक्ष्यादीनां भूतानामेषामिति प्रत्यक्षनिर्देशान्न तु तेजःप्रभृतीनां तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वादसति त्रिवृत्करणे प्रत्यक्षनिर्देशानुपपत्तेः । देवताशब्दप्रयोगाच्च तेजःप्रभृतिष्विमास्तिस्रो देवता इति । तस्मात्तेषां भूतानां पक्षिसरीसृपस्थावरादीनां त्रीण्येव नातिरिक्तानि बीजानि कारणानि भवन्ति । कानि तानीत्युच्यन्ते । अण्डजमण्डाज्जातमण्डजमण्डजमेवाऽऽण्डजं पक्ष्यादि । पक्षिसर्पादिभ्यो हि पक्षिसर्पादयो जायमाना दृश्यन्ते । तेन पक्षी पक्षिणां बीजं सर्पः सर्पाणां तथाऽन्यदप्यण्डाज्जातं तज्जातीयानां बीजमित्यर्थः ।

महाभूतानामचेतनानां ब्रह्मकार्यतोक्ता संप्रति जीवाविष्टानां भौतिकानामपि परम्परया ब्रह्मकार्यतैवेति वक्तुं तान्यनुवदति—तेषामिति । पूर्वाध्याये येषां गत्यागती

---

१ ख. छ. ञ. ण. °देशवशा° । २ ख. छ. ञ. °देशान्मुख्य° । ३ ख. ञ. ण. °पत्तेः । दे° । ४ घ. च. ढ. ड. °तान्युच्य° । ५ क. °णां बीजं त° ।

दर्शिते तृतीयं च स्थानमुक्तं तानि तच्छब्देन परामृश्यन्ते । तेषां प्रसिद्धत्वद्योतनार्थं खल्वित्युक्तम् । भूतानां त्रीण्येव बीजानि भवन्तीत्युत्तरत्र संबन्धः । भूतशब्दस्य तेजःप्रभृतिषु रूढत्वात्तेषामिह ग्रहणं किं न स्यादित्याशङ्क्याऽऽह—एषामितीति । भूतानां प्रत्यक्षत्वमेषामिति निर्दिश्येत । संभवति च पक्ष्यादीनां प्रत्यक्षतेति तान्येवात्र भूतानि विवक्षितानि न तु तेजःप्रभृतीनि तेषां प्रत्यक्षत्वायोगादित्यर्थः । तेजः-प्रभृतीनां प्रत्यक्षत्वायोगादेषामिति निर्देशानुपपत्तिं समर्थयते—तेषामिति । तेषां प्रत्यक्षतया निर्देशासंभवे हेत्वन्तरमाह—देवताशब्देति । देवतानां परोक्षत्वप्रसिद्धिरेतेषु च देवतापदप्रयोगान्नैतेषां प्रत्यक्षत्वोपपत्तिरित्यर्थः । तस्मान्महाभूतानामत्र भूतशब्देनोपादानायोगादित्यर्थः । आण्डजं पक्ष्यादीत्येतत्प्रत्यक्षेणोपादयति—पक्षिसर्पादिभ्यो हीति । अन्यदपीति गोधाद्युच्यते ।

नन्वण्डाज्जातमण्डजमुच्यतेऽतोऽण्डमेव बीजमिति युक्तं कथमण्डजं बीजमुच्यते । सत्यमेवं स्यादि त्वदिच्छातन्त्रा श्रुतिः स्यात्स्वतन्त्रा तु श्रुतिर्यत आहाऽऽण्डनाद्येव बीजं नाण्डादीनि । दृश्यते चाण्डनाद्यभावे तज्जातीयसंतत्यभावो नाण्डाद्यभावे । अतोऽण्डजादीन्येव बीजान्यण्डजादीनाम् । तथा जीवाज्जातं जीवजं जरायुजमित्येतत्पुरुषपश्वादि । उद्भिज्जमुद्भिनत्तीत्युद्भित्स्थावरं ततो जातमुद्भिज्जं धाना वोद्भित्ततो जायत इत्युद्भिज्जं स्थावरबीजं स्थावराणां बीजमित्यर्थः । स्वेदजसंशोकजयोरण्डनोद्भिज्जयोरेव यथासंभवमन्तर्भावः । एवं त्रयधारणं त्रीण्येव बीजानीत्युपपन्नं भवति ॥ १ ॥

अण्डज्जातमितिव्युत्पत्त्यनुसारेणाण्डमेव बीजं न त्वण्डजमिति शङ्कते—नन्विति । पौरुषेयी व्युत्पत्तिः श्रुत्या बाध्येति परिहरति—सत्यमित्यादिना । न केवलं श्रुतेरेषां व्यवस्था किंतूपपत्तेश्चेत्याह—दृश्यते चेति । सत्येवाण्डजादौ तज्जातीयमण्डजादि संतत्या जायते तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यामण्डजाद्येवाण्डजजातिकारणम् । यद्यप्यण्डाद्यभावे नाण्डजादि जायते तथाऽप्यण्डादिभावेऽण्डजाद्यभावेऽपि तद्भवतीति नान्वयः । तस्मादण्डजादीनामण्डजान्येव बीजानि नाण्डादीनीत्यर्थः । धानाशब्दो बीजविषयः । ननु स्वेदजं संशोकजमिति बीजद्वयमवशिष्यते तत्किमिति न व्युत्पाद्यते तत्राऽऽह—स्वेदजेति । स्वेदजमुद्भिद्य जायमानं दंशमशकादि तदुद्भिज्जेऽन्तर्भवति । संशोकादौष्ण्याज्जायमानं यूकादि तदण्डजेऽन्तर्भवति । यद्वा स्वेदजं यूकादि तदण्डजेऽन्तर्भूतं संशोकादौष्ण्याद्भूमिमुद्भिद्य जातं मशकादि तस्योद्भिज्जेऽन्तर्भावः । तथा

---

१ ख. च. ञ. ण. °नि न° । २ घ. ङ. च. ठ. ड. ढ. °जमित्युच्य° । ३ क. ग. ढ. °न्त्रा श्रु° । ४ क. ग. ढ. °योराण्ड° । ५ क. ख. ग. छ. ञ. ढ. ण. °नाण्डादि । ६ क. ख. ञ. ण. °दमु° ।

च न तयोरस्ति पृथग्युत्पादनापेक्षेत्यर्थः । स्वेदजादेरण्डजादावन्तर्भावस्य प्रापकमाह—एवमिति ॥ १ ॥

सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ॥ २ ॥

सेयं प्रकृता सदाख्या तेजोबन्नयोनिर्देवतोक्तैक्षतेक्षितवती यथापूर्वं बहु स्यामिति । तदेव बहुभवनं प्रयोजनं नाद्यापि निर्वृत्तमित्यत ईक्षां पुनः कृतवती बहुभवनमेव प्रयोजनमुररीकृत्य । कथम् । हन्तेदानीमहमिमा यथोक्तास्तेजआद्यास्तिस्रो देवता अनेन जीवेनेति । स्वबुद्धिस्थं पूर्वसृष्ट्यनुभूतप्राणधारणमात्मानमेव स्मरन्त्याहानेन जीवेनाऽऽत्मनेति । प्राणधारणकर्त्रात्मनेति वचनात्स्वात्मनोऽव्यतिरिक्तेन चैतन्यस्वरूपतयाऽविशिष्टेनेत्येतद्दर्शयति । अनुप्रविश्य तेजोबन्नभूतमात्रासंसर्गेण लब्धविशेषविज्ञाना सती नाम च रूपं च नामरूपे व्याकरवाणि विस्पष्टमाकरवाण्यसौनामाऽयमिदंरूप इति व्याकुर्यामित्यर्थः ।

जीवाविष्टानां भूतानां सत्कार्यत्वं प्रकरणप्रामाण्यादुक्तमिदानीं जीवानां विशिष्टरूपेण ब्रह्मकार्यत्वेऽपि न स्वरूपेण तत्कार्यत्वं ब्रह्मैवोप विपविष्टं जीवव्यवहारास्पदमित्यङ्गीकारात्तथा च ब्रह्मणि विज्ञाते जीवविज्ञानं सेत्स्यति जीवानां च भोगायतनानि भौतिकानि कार्याणि तेषां नामरूपनिर्माणं वक्तव्यमित्यभिप्रेत्योत्तरग्रन्थमादाय व्याकरोति—सेयमित्यादिना । यथा बहु स्यामिति पूर्वमीक्षितवती तथा किमिति पुनरीक्षत प्रयोजनाभावादित्याशङ्क्याऽऽह—तदेवेति । इदानीं महाभूतसृष्टेरनन्तरमिति यावत् । ब्रह्मणो मायोपाधिकस्य कारणत्वान्मायोपाधिवशात्पूर्वसृष्टावनुभूतत्वं तत्संस्कारस्य बुद्धिस्थत्वं स्मरणं चेत्यादि न विरुद्धमिति द्रष्टव्यम् । आत्मनेतिविशेषणस्य तात्पर्यमाह—प्राणेति । निर्विकल्पकचिन्मात्ररूपा देवता मायावशान्महाभूतानि सृष्ट्वा तेषु यदा प्रविष्टा तदा तदारब्धेषु सूत्रविराट्प्रभृतिषु समष्टिव्यष्ट्यात्मसु देहेषु प्रविश्य तत्तेद्दाभिमानवती देवदत्तादिनाम्ना रूपेण च शौक्ल्यादिना संयोज्य पिण्डं व्याकरोतीत्याह—अनुप्रविश्येति ।

ननु न युक्तमिदमसंसारिण्याः सर्वज्ञाया देवताया बुद्धिपूर्वकमनेकशतसहस्रानर्थाश्रयं देहमनुप्रविश्य दुःखमनुभविष्यामीति संकल्पनमनुप्रवेशश्च

१ क. च. ण. °भूतं प्रा° । २ क. ग. ङ. °रूपत्वेन ब्र° । ३ ङ. °त्तरं प्र° । ४ ख. घ. ण. °वतादि° ।

स्वातन्त्र्ये सति । सत्यमेवं न युक्तं स्याद्यदि स्वेनैवाविकृतेन रूपेणानुप-विशेयं दुःखमनुभवेयमिति च संकल्पितवती न त्वेवम् । कथं तर्हि। अनेन जीवेनाऽऽत्मनाऽनुप्रविश्येति वचनात् । जीवो हि नाम देवताया आभा-समात्रम् । बुद्ध्यादिभूतमात्रासंसर्गजनित आदर्श इव प्रविष्टः पुरुषप्रतिबिम्बो-जलादिष्विव च सूर्यादीनाम् । अचिन्त्यानन्तशक्तिमत्या देवताया बुद्ध्या-दिसंबन्धश्चैतन्याभासो देवतास्वरूपविवेकाग्रहणनिमित्तः सुखी दुःखी मूढ इत्याद्यनेकविकल्पप्रत्ययहेतुः । छायामात्रेण जीवरूपेणानुप्रविष्टत्वाद्देवता न दैहिकैः स्वतः सुखदुःखादिभिः संबध्यते । यथा पुरुषादित्यादय आदर्शो-दकादिषु च्छायामात्रेणानुप्रविष्टा आदर्शोदकादिदोषैर्न संबध्यन्ते तद्वद्दे-वतापि ।

" सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥
आकाशवत्सर्वगतश्च नित्यः " इति हि काठके ।
" ध्यायतीव लेलायतीव " इति च वाजसनेयके ॥

देवताया: सर्वज्ञत्वादसंसारित्वात्स्वातन्त्र्याच्च संकल्पप्रवेशावयुक्ताविति शङ्कते—नन्विति । किं साक्षादनुपवेशादि विरुध्यते किंवा जीवद्वाराऽपीति विकल्प्याऽऽद्य-मङ्गी करोति—सत्यमिति । साक्षादनुप्रवेशादि नास्ति चेत्तर्हि कथं तदित्याकाङ्-क्षापूर्वकं द्वितीयं दूषयति—कथमिति । देवताया जीवद्वारेण नुप्रवेशाद्यविरुद्धमिति शेषः । अविरोधमेव साधयितुं जीवस्वरूपमाह—जीवो हीति । आभिमुख्येनाह-मित्यापरोक्ष्येण भासत इत्याभासः स्वतोऽपरोक्षश्चित्प्रतिबिम्बस्तन्मात्रं जीवो नामे-त्यर्थः । तस्य स्वरूपेणानादित्वेऽपि विशिष्टरूपेण सादित्वं दर्शयति—बुद्ध्यादीति । बुद्ध्यादिभिर्भूतमात्रादिभिश्चिदात्मनः संसर्गस्तेन जनितस्तत्तन्त्र इति यावत् । ननु चिदात्मा कूटस्थोऽसङ्गोऽद्वितीयश्चेष्यते स कथं बुद्ध्यादिभिर्भूतमात्राभिश्च संसृज्यते तत्राऽऽह—अचिन्त्येति । सत्त्वादिप्रकारैरशक्यचिन्तनीयाऽनादिरनिर्वाच्या सम्य-ग्ज्ञानमन्तरेण नाशशून्या दण्डायमाना यां मायाशक्तिस्तस्या विषयत्वेनाऽऽश्रयत्वेन च परा देवताऽवतिष्ठते । तस्याश्च स्वनिष्ठमायाशक्तिवशाद्बुद्ध्यादिभिरात्मनः संबन्धः सिध्यतीत्यर्थः । बुद्ध्यादिसंबन्धफलमाह—चैतन्येति । तदाभासो जीवशब्दवाच्यः सिध्यतीति शेषः । बुद्ध्यादिभिरात्मनः संबन्धे मायाशक्तिरुपादानमित्युक्तं तत्रैव निमि-त्तकारणमाह—देवतेति । आवरणविक्षेपशक्तिसंपन्ना हि मायाशक्तिस्ततोऽविद्योत्पदे-

---

१ ख. घ. ङ. च. ञ. ठ. ड. ढ. ण. °ति सं° । २ ब. ङ. च. ञ. ठ. ण. °ति चन्द्रसू° । ३ क. ङ. °न्यावभा° । ४ ग. च. ट. ठ. ड. ढ. °वस्तरू° । ५ ञ. °मित्यपरोक्षेण । ६ ञ. ञ. या श° ।

शकालाद्यनवच्छिन्नदेवतास्वरूपोऽहमितिविशेषाग्रहणमावरणं निमित्तं कृत्वा बुद्ध्याद्यध्यासः सिध्यतीत्यर्थः । बुद्ध्याद्यध्यासस्य कार्यान्तरं दर्शयति—सुखीति । परैव तर्हि देवता संसारिणी स्यादिति चेत्सत्यमज्ञानद्वारा बुद्ध्यादिसंबन्धमनुभूय जीवत्वं प्राप्य सैव संसरतीत्याह—छायामात्रेणेति । परस्या देवतायाः स्वतः संसाराभावं दृष्टान्तेन स्पष्टयति—यथेत्यादिना । तस्याः स्वतो दुःखाद्यसंबन्धे श्रुतिं प्रमाणयति—सूर्य इति । उपाधिद्वारा तस्याः संसारित्वे च श्रुतिरस्तीत्याह—ध्यायतीति ।

ननु छायामात्रश्चेज्जीवो मृषैव प्राप्तस्तथा परलोकेहलोकादि च तस्य । नैष दोषः । सदात्मना सत्यत्वाभ्युपगमात् । सर्वं च नामरूपादि सदात्मनैवं सत्यं विकारजातं स्वतस्त्वनृतमेव । वाचाऽऽरम्भणं विकारो नामधेयमित्युक्तत्वात् । तथा जीवोऽपीति । यक्षानुरूपो हि बलिरिति न्यायप्रसिद्धिः । अतः सदात्मना सर्वव्यवहाराणां सर्वविकाराणां च सत्यत्वं सतोऽन्यत्वे चानृतत्वमिति न कश्चिदोषस्तार्किकैरिहालुंवक्तुं शक्यः । यथेतरेतरविरुद्धैतवादाः स्वबुद्धिविकल्पमात्रा अतत्त्वनिष्ठा इति शक्यं वक्तुम् ॥ २ ॥

प्रतिबिम्बे छायाशब्दप्रयोगान्मिथ्यात्वमिष्टमिति मन्वानः शङ्कते—नन्विति । तन्मृषात्वमिष्टमेवेत्याशङ्क्याऽऽह—तथेति । जीवस्य मृषात्वे स्वीकृते सति तस्येहलोकपरलोकौ तद्धेतुर्मोक्षस्तद्धेतुश्चेति सर्वं मृषा स्यादित्यर्थः । विशिष्टरूपेण मिथ्यात्वेऽपि स्वरूपेण सत्यत्वाज्जीवस्य ब्रह्मास्मीतिज्ञानान्मुक्तिः संभवतीति समाधत्ते—नैष दोष इति । यत्तु परलोकेहलोकादि मृषा स्यादिति तत्राऽऽह—सर्वं चेति । कथं तर्हि तस्य मिथ्यात्वोक्तिरित्याशङ्क्याऽऽह—स्वत इति । यथा प्रपञ्चो ब्रह्मात्मना सत्योऽपि स्वरूपेण मिथ्येत्युक्तं तथा जीवशब्दवाच्योऽपि ब्रह्मात्मना सत्यः स्वरूपेण मिथ्येति स्वीकर्तव्यमित्याह—तथेति । अथ भोक्ता स्वरूपेणापि सत्योऽस्तु भोग्यप्रपञ्चस्यैव मिथ्यात्वमिष्यतामित्याशङ्क्याऽऽह—यक्षानुरूपो हीति । लौकिकन्यायानुसारेण भोग्यप्रपञ्चस्य मिथ्यात्वे भोक्तुरपि विभक्तस्वरूपेण तत्प्रसिद्धिरतो जीवशब्दवाच्यस्य मिथ्यात्वेऽपि तल्लक्ष्यस्य सन्मात्रस्य सत्यत्वमिति व्यवस्थेत्यर्थः । यच्च तार्किकैरुच्यते प्रपञ्चस्य मिथ्यात्वे सौगतमतानुमतिः सत्यत्वे चाद्वैतव्याहतिरिति तदप्युक्तन्यायेन निरस्तमित्याह—अत इति । अद्वैतवादे दोषाभावं वैधर्म्यदृष्टान्तेन स्पष्टयति—यथेति ॥ २ ॥

---

१ ग. ट. °दि त° । च. °दिकं च। २ क. ङ. ढ. °व स्वभावो यस्य चैतन्यं तस्याऽऽभासोऽपि तादृश इति वचनात्सत्यं । ३ ग. घ. च. ट. ठ. ड. ढ. °नुषङ्क्तुं । क. °नुशङ्कितुं श° । ४ ख. घ. ङ. च. ञ. ठ. ड. ढ. ण. °रुद्धा द्वै° । ५ क. °रूपनामा° । ६ ख. छ. ञ. ण. °स्वेत° । ७ ख. क. ञ. ण. सत्त्वमि° । ८ ख. छ. ञ. °त्वे वाऽद्वै° ।

तासा त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवते-
मास्तिस्रो देवता अनेनैव जीवेनाऽऽत्मनाऽनुप्रविश्य
नामरूपे व्याकरोत् ॥ ३ ॥

सैवं तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे बीजभूते अव्याकृते नामरूपे व्याकरवाणीतीक्षित्वा तासां च तिसृणां देवतानामेकैकां त्रिवृतं त्रिवृतं करवाणि । एकैकस्यास्त्रिवृत्करण एकैकस्याः प्राधान्यं द्वयोर्द्वयोर्गुणभावोऽन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात् । न तु तिसृणां पृथक्पृथक्त्रिवृत्करणमिति । एवं हि तेजोबन्नानां पृथङ्नामप्रत्ययलाभः स्यात्तेज इदमिमा आपोऽन्नमिदमिति च । सति च पृथङ्नामप्रत्ययलाभे देवतानां सम्यग्व्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात् । एवमीक्षित्वा सेयं देवतेमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन सूर्यबिम्बवदन्तः प्रविश्य वैराजं पिण्डं प्रथमं देवादीनां च पिण्डाननुप्रविश्य यथासंकल्पमेव नामरूपे व्याकरोदसौनामाऽयमिदंरूप इति ॥ ३ ॥

व्याकरवाणीत्येतदन्तं वाक्यं व्याख्याय तदनूद्य तासामित्यादि व्याचष्टे—सैवमित्यादिना । व्याकरवाणीत्यैक्षतेति संबन्धः । कथं पुनरिदं त्रिवृत्करणमित्याशङ्क्य प्रथममेकैकां देवतां द्विधा द्विधा विभज्य पुनरेकैकं भागं द्विधा द्विधा कृत्वा तदितरभागयोर्निक्षिप्य त्रिवृत्करणं विवक्षितमित्याह—एकैकस्या इति । गुणप्रधानभावानङ्गीकारे समानपरिमाणसूत्रत्रयनिर्मितरज्जुवत्त्रिवृत्करणमेकमेव स्यादित्याह—अन्यथेति । एवकारार्थं दर्शयति—न त्विति । गुणप्रधानभावेन त्रिवृत्करणमुपसंहर्तुमितिशब्दः । इतश्च गुणप्रधानभावेन त्रिवृत्करणमेष्टव्यमित्याह—एवं हीति । पृथङ्नामप्रत्ययलाभेनापि किं स्यादित्याशङ्क्याऽऽह—पृथगिति । सेयमित्यादि व्याचष्टे—एवमित्यादिना ॥ ३ ॥

तासां विवृतं त्रिवृतमेकैकामकरोद्यथा तु खलु
सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति
तन्मे विजानीहीति ॥ ४ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

---

१ क. ङ. च पृ° । २ ङ. ढ. °नां संव्यव° । ३ ग. घ. ङ. च. ट. ठ. ड. °रप्र° । ४ ग. च. देवतादी° । ५ क. क. ख. ञ. ठ. तु । ६ ख. ञ. °लु सौम्ये° ।

तासां च देवतानां गुणप्रधानभावेन त्रिवृत्त्वं त्रिवृतमेकैकामकरोत्कृतवती देवता । तिष्ठतु तावद्देवतादिपिण्डानां नामरूपाभ्यां व्याकृतानां तेजोबन्नमयत्वेन त्रिधात्वं यथा तु बहिरिमाः पिण्डेभ्यस्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे मम निगदतो विजानीहि विस्पष्टमवधारयोदाहरणतः ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य तृतीयः खण्डः ॥३॥

संक्षेपेण त्रिवृत्करणं प्रतिज्ञायोदाहरणतः स्फुटीकर्तुमारभमाणो देहे त्रिवृत्करणस्याग्रे स्फुटीकर्तव्यत्वाद्देहातिरिक्तेषु प्रथमं तदुदाहर्तुमुपक्रमते—तिष्ठतु तावदिति ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

(अथ षष्ठाध्यायस्य चतुर्थः खण्डः) ।

यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचाऽऽरम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ १ ॥

यत्तद्देवतानां त्रिवृत्करणमुक्तं [3]तस्यैवोदाहरणमुच्यते । उदाहरणं नामैकदेशप्रसिद्ध्याऽशेषप्रसिद्ध्यर्थमुदाह्रियत इति । तदेतदाह—यदग्नेस्त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके तदत्रिवृत्कृतस्य तेजसो रूपमिति विद्धि । तथा यच्छुक्लं रूपमग्नेरेव तदपामत्रिवृत्कृतानां यत्कृष्णं तस्यैवाग्ने रूपं तदन्नस्य पृथिव्या अत्रिवृत्कृताया इति विद्धि । तत्रैवं सति रूपत्रयव्यतिरेकेणाग्निरिति यन्मन्यसे त्वं तस्याग्नेरग्नित्वमिदानीमपागादपगतम् । प्राग्रूपत्रयविवेकविज्ञानाद्याऽग्निबुद्धिरासीत्तेऽग्नौ सा साऽग्निबुद्धिरपगताऽग्निशब्दश्चेत्यर्थः । यथा दृश्यमानरक्तोपधानसंयुक्तः स्फटिको गृह्यमाणः पद्मरागोऽयमितिशब्दबुद्ध्योः प्रयोजको भवति प्रागुपधानस्फटिकयोर्विवेकविज्ञानात्तद्विवेकविज्ञाने तु पद्मरागशब्दबुद्धी निवर्तेते तद्विवेकविज्ञातुस्तद्वत् । ननु किमत्र बुद्धिशब्दकल्पनया क्रियते प्राग्रूपत्रयविवेककरणादग्नेरवाऽऽसीत्तेऽग्नेरग्नित्वं रोहितादिरूपविवेक-

---

१ क. तु खलु ब° । २ क. ख. छ. ञ. ण. °माणादे° । ३ घ. च. ठ. ढ. तस्येहोदा° । क. तस्यैवेहोद्दा° । ४ ख. ण. ट. °क्तोपाधिसं° । ५ घ. च. °कम्रहणा° ।

करणादपागादिति युक्तं यथा तत्त्वपकर्षणे पटाभावः । नैवं बुद्धिशब्दमात्रमेव ह्यग्निर्यत आह वाचाऽऽरम्भणमग्निर्नाम विकारो नामधेयं नाममात्रमित्यर्थः । अतोऽग्निबुद्धिरपि मृषैव । किं तर्हि तत्र सत्यं त्रीणि रूपाणीत्येव सत्यं नाणुमात्रमपि रूपत्रयव्यतिरेकेण सत्यमस्तीत्यवधारणार्थः ॥ १ ॥

कथमुदाहरणतोऽवधारणमित्याशङ्क्यानन्तरवाक्यमवतारयति—यत्तदिति । उदाहरणशब्दं व्युत्पादयति—उदाहरणं नामेति । तत्रैव श्रुतिमवतार्य व्याचष्टे—तदेतदित्यादिना । अग्निवृत्कृतानां रूपमिति विद्धीति संबन्धः । तत्राग्नौ रूपत्रये पूर्वोक्तरीत्या पृथक्कृते सतीति यावत् । इदानीं विवेकदशायामित्यर्थः । अक्षरार्थमुक्त्वा वाक्यतात्पर्यार्थमाह—प्रागिति । रूपत्रयविवेकात्प्रागवस्थायामग्निशब्दबुद्धी तद्विवेकादूर्ध्वं तन्निवृत्तिरित्येतमर्थं दृष्टान्तेन समर्थयते—यथेत्यादिना । अग्निविषये श्रुतं हित्वाऽधिककल्पनायां नास्ति निबन्धनमिति शङ्कते—नन्विति । रोहितादिरूपत्रयविवेके सत्यग्नेरग्नित्वमपगच्छतीत्यत्र दृष्टान्तमाह—यथेति । शब्दबुद्धिप्रक्षेपेऽपि न श्रुतत्यागोऽस्तीति परिहरति—नैवमिति । तत्र प्रमाणत्वेनानन्तरवाक्यमादाय व्याचष्टे—यत इति । अग्नेर्नाममात्रत्वमतःशब्दार्थः ॥ १ ॥

यदादित्यस्य रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादित्यत्वं वाचाऽऽरम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ २ ॥

यच्चन्द्रमसो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचाऽऽरम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ३ ॥

यद्विद्युतो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचाऽऽरम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ४ ॥

---

१ क. °ना वा ना° ।

तथा यदादित्यस्य यच्चन्द्रमसो यद्विद्युत इत्यादि समानम् । ननु यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीत्युक्त्वा तेजस एव चतुर्भिरप्युदाहरणैरन्नाद्यादिभिस्त्रिवृत्करणं दर्शितं नाबन्नयोरुदाहरणं दर्शितं त्रिवृत्करणे । नैष दोषः । अबन्नविषयत्वेऽप्युदाहरणान्येवमेव च द्रष्टव्यानीति मन्यते श्रुतिः । तेजस उदाहरणमुपलक्षणार्थम् । रूपवत्त्वात्स्पष्टार्थत्वोपपत्तेश्च । गन्धरसयोरनुदाहरणं त्रयाणामसंभवात् । न हि गन्धरसौ तेजसि स्तः । स्पर्शशब्दयोरनुदाहरणं विभागेन दर्शयितुमशक्यत्वात् ।

प्रक्रमपर्यालोचनायामुदाहरणे न्यूनत्वमस्तीति शङ्कते—नन्विति । यद्वापीकूपादेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य यच्च व्रीहियवादेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येत्युदाहरणसंभवान्न न्यूनतेति परिहरति—नैष दोष इति । तर्हि तेजोविषयमप्युदाहरणमूहनीयं किमित्युदाहृतमित्याशङ्क्याऽऽह—तेजस इति । यदि क्वचिदपि नोदाहरणमुच्यते नोपलक्षणमेव सिध्येदतस्त्रयाणां रूपवत्त्वेन यथोक्तरूपविभागस्य तेषु स्फुटत्वसंभवात्तेजसो दृष्टान्तैःप्रदर्शनमन्नादिविषयोदाहरणोपलक्षणार्थं तेन नोपेक्षितमित्यर्थः । अबन्नयोरपि त्रिवृत्करणमुपलक्षितं चेत्तर्हि तत्र रसगन्धयोरसाधारण्यात्तयोस्त्रिवृत्करणमुदाहर्तव्यमित्याशङ्क्याऽऽह—गन्धरसयोरिति । यथा यदबन्नयोर्भास्वरं लोहितं रूपं तेज[स]स्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति शक्यते रूपं विवेक्तुं न तथाऽमुको रसो गन्धो वा तेजसोऽपामन्नेश्चास्तीति ज्ञातुं शक्यमित्यनुदाहरणं तयोरित्यर्थः । ननु त्रिवृत्करणे त्रिष्वपि रूपवद्गन्धरसौ संभावितौ तत्कथं तयोस्त्रयाणामसंभवोक्तिस्तत्राऽऽह—न हीति । संभावितावपि तौ त्रिषु विवेक्तुमशक्यावित्यनुदाहरणीयाविल्यर्थः । तर्हि सर्वेषु भूतेषु संभावितयोः स्पर्शशब्दयोरुदाहरणं किं न स्यादित्याशङ्क्याऽऽह—स्पर्शशब्दयोरिति । यथा लोहितादिरूपत्रयं त्रयाणां विभागेन दर्शयितुं शक्यं न तथा शब्दत्रयं स्पर्शत्रयं च त्रयाणां विभागेन दर्शयितुं शक्यम् । नो खल्वेकत्रोष्णशीतानुष्णाशीतस्पर्शत्रयं दृश्यते । नापि खरमधुरमध्यमशब्दत्रयमेकत्रोपलब्धमित्यर्थः ।

यदि सर्वं जगत्त्रिवृत्कृतमित्यग्न्यादिवत्त्रीणि रूपाणीत्येव सत्यमग्नेरग्नित्ववदपामाज्जगतो जलत्वम् । तथाऽन्नस्याप्यशुङ्गत्वादाप इत्येव सत्यं वाचाऽऽरम्भणमात्रमन्नम् । तथाऽपामपि तेजःशुङ्गत्वाद्वाचाऽऽरम्भणत्वं तेज

१ क. ख. घ. ञ. ण. नु । २ ख. ङ. ञ. 'लु सौम्ये' । ३ ङ. ढ. 'त्त्वाद्विस्पष्टा' । ४ ख. ञ, ण. 'न्तद्' । ५ ख. तेनापे' । ६ क. ख. छ, ञ. ण. 'रणयोस्त्रिष्व' ।

इत्येव सत्यम् । तेजसोऽपि सच्छब्दत्वाद्वाचाऽऽरम्भणत्वं सदित्येव सत्यमित्येषोऽर्थो विवक्षितः । ननु वाय्वन्तरिक्षे त्रिवृत्कृते तेजःप्रभृतिष्वनन्तर्भूतत्वादवशिष्येते । एवं गन्धरसशब्दस्पर्शावशिष्टा इति कथं सता विज्ञातेन सर्वमन्यद्विज्ञातं भवेत्तद्विज्ञाने वा प्रकारान्तरं वाच्यम् । नैष दोषः । रूपवद्द्रव्ये सर्वस्य दर्शनात् । कथम् । तेजसि तावद्रूपवति शब्दस्पर्शयोरभ्युपलम्भाद्वायवन्तरिक्षयोस्तत्र स्पर्शशब्दगुणवतोः सद्भावोऽनुमीयते । तथाऽब्भयो रूपवतो रसगन्धान्तर्भाव इति । रूपवतां त्रयाणां तेजोबन्नानां त्रिवृत्करणप्रदर्शनेन सर्वं तदन्तर्भूतं सद्विकारत्वाच्चक्षुष्येव रूपाणि विज्ञातं मन्यते श्रुतिः । न हि मूर्तं रूपवद्द्रव्यं प्रत्याख्याय वाय्वाकाशयोस्तद्गुणयोर्गन्धरसयोर्वा ग्रहणमस्ति । अथवा रूपवतामपि त्रिवृत्करणं प्रदर्शनार्थमेव मन्यते श्रुतिः । यथा तु त्रिवृत्कृते त्रीणि रूपाणीत्येव सत्यं तथा पञ्चीकरणेऽपि समानो न्याय इत्यतः सर्वस्य सद्विकारत्वात्सता विज्ञातेन[1] सर्वमिदं विज्ञातं स्यात्सदेकमेवाद्वितीयं सत्यमिति सिद्धमेव भवति । तदेकस्मिन्नति[2] विज्ञाते सर्वमिदं विज्ञातं भवतीति सूक्तम् ॥ २ ॥ ३ ॥ ४ ॥

सर्वस्य त्रिवृत्कृतत्वे फलितमाह—यदीति । यथाऽग्न्यादि त्रिवृत्कृतं तथा सर्वमेव जगद्यदि त्रिवृत्कृतमित्यङ्गीकृतं तदाऽग्नेरग्नित्ववज्जगतो जगत्त्वमपगतं त्रीणि रूपाणीत्येव सत्यमिति योजना । तथाऽपि कथं सन्मात्रपरिशेषः स्यादित्याशङ्क्याऽऽह—तथेति । रूपत्रयव्यतिरेकेण जगतोऽभावात्कृष्णस्यापि रूपस्य पृथिवीशब्दितस्य शुक्लरूपमात्रजलकार्यत्वात्तदतिरेकेणासत्त्वं पृथिव्यादपामपि शुक्लरूपमात्राणां लोहितरूपमात्रतेजोविकारत्वात्तद्व्यतिरेकेणाभावस्तस्यापि सत्कार्यत्वात्ततो भेदेनासत्त्वं सन्मात्रमेव पारिशिष्टमित्येतत्त्रिवृत्करणप्रकरणे विवक्षितमित्यर्थः । त्रिवृत्करणपक्षे नैकविज्ञानेन सर्वविज्ञानं सिध्यति पारिशेष्यविज्ञेयसद्भावादिति शङ्कते—नन्विति । इतिपदं कथमित्यादिना संबध्यते । गन्धादयश्च शब्दान्ता गुणा गुणिष्वनन्तर्भूताः सन्तीति न सद्विज्ञानेन तद्विज्ञानोपपत्तिरित्याह—गन्धेति । तद्विज्ञाने सद्विज्ञानेन वाय्वादिविज्ञानं तत्र प्रकारान्तरं तत्कार्यत्वादतिरिक्तमिति यावत् । आकाशादेस्त्रिष्वेवान्तर्भावसंभवान्न पारिशिष्टविज्ञेयमस्तीति परिहरति—नैष दोष इति । कथं तेजोबन्नेषु सर्वस्याऽऽकाशादेर्दर्शनमित्याह—कथमिति । तत्र शब्दस्पर्शयोराकाशवाय्वोश्च भूतत्रये प्रत्यक्षानुमानाभ्यामुपलब्धिं दर्शयति—तेजसीति । तेजोग्रहणमब्बन्नयोरुपलक्षणं तत्रापि स्पर्शानुपलब्धेरविशेषाद्यत्तु गन्धादि ज्ञेयान्तरमिति तत्राऽऽह—तथेति । भूतत्रये

---

१ क. ङ. च. सतो विज्ञानेन । २ क. °त्सतो विज्ञानेन । ३ ख. घ. ज. ठ. ड. °देतदेक° ।

स्पर्शाद्यन्तर्भाववदिति यावत् । त्रिष्वेवान्तर्भावे फलितमाह—रूपवतामिति । भूतत्रये रूपवत्त्याकाशादेरन्तर्भावं व्यतिरेकद्वारा समर्थयते—न हीति । अन्तर्भावोक्ति-प्रयासं परिहर्तुं पक्षान्तरमाह—अथवेति । प्रदर्शनार्थं पञ्चीकरणस्येति शेषः । कथं पञ्चीकरणे सन्मात्रपरिशेषः सिध्यतीत्याशङ्क्याऽऽह—यथेति । यदा पञ्चापि भूतानि प्रत्येकं द्वेधा विभज्य पुनरेकैकं भागं चतुर्धा कृत्वा स्वभागातिरिक्तेषु पूर्वेषु भागेष्वे-कैकशो निक्षिप्यंते तदा पञ्चीकरणं श्रुत्युपलक्षितं लभ्यते तत्रापि । पञ्चानां भागानां पृथक्करणे पञ्चैव तन्मात्राण्यवशिष्यन्ते । तान्यपि वृथिव्यादीन्यवयवादिकार्यत्वात्तत्तत्कारण-व्यतिरेकेण न सिध्यन्तीति त्रिवृत्करणवत्पञ्चीकरणेऽपि न्यायसाम्यात्सर्वस्य सद्विका-रत्वात्तद्व्यतिरेकेणाभावात्तेन विज्ञातेन तदपि विज्ञातमेव स्यात्सन्मात्रं तु परमार्थसत्यं परिशिष्टं भवतीत्यर्थः । उक्तन्यायेनैकविज्ञानेन सर्वविज्ञानश्रुतिरविरुद्धेत्युपसंहरति—तदेकस्मिन्निति ॥ २ ॥ ३ ॥ ४ ॥

एतद्ध स्म वै तद्विद्वांस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञात-मुदाहरिष्यतीति ह्येभ्यो विदांचक्रुः ॥ ५ ॥

एतद्विद्वांसो विदितवन्तः पूर्वेऽतिक्रान्ता महाशाला महाश्रोत्रिया आहुर्ह स्म वै किल । किमुक्तवन्त इत्याह—न नोऽस्माकं कुलेऽद्येदानीं यथोक्तविज्ञान-वतां कश्चन कश्चिदप्यश्रुतममतमविज्ञातमुदाहरिष्यति[1] नोदाहरिष्यति सर्वं विज्ञातमेवास्मत्कुलीनानां सद्विज्ञानवत्त्वादित्यभिप्रायः । ते पुनः कथं सर्वं विज्ञातवन्त इत्याह—एभ्यस्त्रिभ्यो रोहितादिरूपेभ्यस्त्रिवृत्कृतेभ्यो विज्ञातेभ्यः सर्वमप्यन्यच्छिष्टमेवमेवेति विदांचक्रुर्विज्ञातवन्तो यस्मात्तस्मात्सर्वज्ञा एव सद्विज्ञानात्त आसुरित्यर्थः । अथवैभ्यो विदांचक्रुरित्यग्न्यादिभ्यो दृष्टान्तेभ्यो विज्ञातेभ्यः सर्वमन्यद्विदांचक्रुरित्येतत् ॥ ५ ॥

त्रिवृत्करणपक्षेऽप्येकविज्ञानेन सर्वविज्ञानश्रुतिरविरुद्धेत्युपपाद्य त्रिवृत्करणमुदाहर-णान्तरेण दर्शयितुमारभते—एतदिति । त्रिवृत्करणमिति यावत् । ते पुनरिति त्रिवृत्करणविज्ञानवन्तो निर्दिश्यन्ते ॥ ५ ॥

यद्रु रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदांच-क्रुर्यद्रु शुक्लमिवाभूदित्यपाꣳ रूपमिति तद्विदांचक्रुर्यद्रु

---

१ ख. अ. ण. सर्वेषु । २ क. ग. ट. °प्यन्ते त° । ३ ख. अ. °देतदेक° । ४ ङ. च. ठ. ड. ढ. °ति सं° । ५ क. ग. ट. °नत्वादि° । ६ क. घ. ण. आहुरि° ।

कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदांचक्रुः ॥६॥
यद्वेविज्ञातमिवाभूदित्येतासामेव देवतानाꣳ समास
इति तद्विदांचक्रुर्यथा खलु नु सोम्येमास्तिस्रो
देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे
विजानीहीति ॥ ७ ॥
इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य चतुर्थः खण्डः ॥४॥

कथम् । यदन्यद्रूपेण संदिह्यमाने कपोतादिरूपे रोहितमिव यद्गृह्यमाणमभूत्तेषां पूर्वेषां ब्रह्मविदां तत्तेजसो रूपमिति विदांचक्रुः । तथा यच्छुक्लमिवाभूद्गृह्यमाणं तदपां रूपं तत्कृष्णमिव गृह्यमाणं तदन्नस्येति विदांचक्रुरेवमेवात्यन्तदुर्लक्ष्यं यदु अप्यविज्ञातमिव विशेषतोऽगृह्यमाणमभूत्तदप्येतासामेव तिसृणां देवतानां समासः समुदाय इति विदांचक्रुः । एवं तावद्ब्रह्म वस्त्वन्यादिवद्विज्ञातं तथेदानीं यथा नु खलु हे सोम्येमा यथोक्तास्तिस्रो देवताः पुरुषं शिरःपाण्यादिलक्षणं कार्यकारणसंघातं प्राप्य पुरुषेणोपयुज्यमानास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि निगदत इत्युक्त्वाऽह ॥ ६ ॥ ७ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

वेदनप्रकारमेवाऽऽकाङ्क्षापूर्वकं प्रकटयति—कथमित्यादिना । अन्यदन्यादिभ्यः सकाशादिति शेषः । यदनेकरूपत्वात्कपोतादिरूपेण संदिह्यमानमेतद्दृश्यते तस्मिन्कपोतादित्वरूपे यत्किंचिद्रोहितमिव रूपं गृह्यमाणं पूर्वेषामासीत्तत्तेजसो रूपमिति ते विदितवन्त इति योजना । अत्यन्तदुर्लक्ष्यं नामरूपाभ्यां दुर्ज्ञानं द्वीपान्तरादागतं पक्ष्यादीत्यर्थः । अगृह्यमाणमिति च्छेदः । यथा नु खल्वित्यादिवाक्यं वृत्तानुवादपूर्वकमवतारयति—एवं तावदिति । यथा खल्वेकैका देवता पुरुषं प्राप्य त्रिवृत्त्रिवृद्भवति तथेदानीं तदाध्यात्मिकं त्रिवृत्करणमेवमेवेति जानीहीति संबन्धः । आध्यात्मिकं त्रिवृत्करणमिति शेषः ॥ ६ ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां-
षष्ठाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

---

१ ख. ञ. °द्वज्ञा° । २ ख. ञ. °ल्लु सौम्ये° । ३ ख. घ. च. ण. °ने मेचकक° । ४ ङ. च. ट. सर्वेषां । ५ घ. च. ठ. ड. °तानामेव स° । ६ क. ध. च. ड. ढ. °ल्लु सो° । ७ ख. ङ. ञ. ढ. हे सौम्ये° । ८ ग. घ. च. ट. ठ. °र्यकर° ।

(अथ षष्ठाध्यायस्य पञ्चमः खण्डः)।

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्माꣳसं योऽणिष्ठस्तन्मनः ॥ १ ॥

अन्नमशितं भुक्तं त्रेधा विधीयते जाठरेणाग्निना पच्यमानं त्रिधा विभज्यते। कथं, तस्यान्नस्य त्रेधा विधीयमानस्य यः स्थविष्ठः स्थूलतमो धातुः स्थूलतमं वस्तु विभक्तस्य स्थूलोंऽशस्तत्पुरीषं भवति । यो मध्यमोंऽशो धातुरन्नस्य तद्रसादिक्रमेण परिणम्य मांसं भवति। योऽणिष्ठोऽणुतमो धातुः स ऊर्ध्वं हृदयं प्राप्य सूक्ष्मासु हिताख्यासु नाडीष्वनुप्रविश्य वागादिकरणसंघातस्य स्थितिमुत्पादयन्मनो भवति मनोरूपेण विपरिणमन्मनस उपचयं करोति । ततश्चान्नोपचितत्वान्मनसो भौतिकत्वमेव न वैशेषिकतन्त्रोक्तलक्षणं नित्यं निरवयवं चेति गृह्यते । यदपि मनोऽस्य दैवं चक्षुरिति वक्ष्यति तदपि न नित्यत्वापेक्षया किं तर्हि सूक्ष्मव्यवहितविप्रकृष्टादिसर्वेन्द्रियविषयव्यापकत्वापेक्षया । यच्चान्येन्द्रियविषयापेक्षया नित्यत्वं तदप्यापेक्षिकमेवेति वक्ष्यामः । सदेकमेवाद्वितीयमिति श्रुतेः ॥ १ ॥

कथं त्रिधा विभज्यमानत्वं कथं वा तस्य विनियोग इति प्रश्नपूर्वकं विवृणोति—कथमित्यादिना । रसादीत्यादिशब्देन रुधिरादि गृह्यते । तस्य कर्मफलस्य नाडीचरो भोक्तेति हिताख्या नाड्यस्तास्विति यावत् । कथमन्नोपयोगात्प्रागेव मनसः सिद्धत्वात्तन्मनो भवतीत्युच्यते तत्राऽऽह—मनोरूपेणेति । मनसोऽन्नोपचितत्ववचनाद्वैशेषिकपरिभाषाऽपि दूषिता वेदितव्येत्याह—ततश्चेति । मनसो दैवत्वविशेषणान्नित्यत्वसिद्धिरित्याशङ्क्याऽऽह—यदपीति । केनाभिप्रायेण तर्हि विशेषणमित्याशङ्क्याऽऽह—किं तर्हीति । तर्हि चक्षुरादिभ्यो वैलक्षण्यादस्ति तदपेक्षया नित्यत्वमित्याशङ्क्याऽऽह—यच्चेति । यद्वा चक्षुरादिष्वसत्स्वपि मनसः सत्त्वोपलम्भात्तदपेक्षया तस्य नित्यत्वमेष्टव्यमित्याशङ्क्याऽऽह—यच्चेति । आत्मवन्मनसो नित्यत्वं किं न स्यादित्याशङ्क्याऽऽह—सादिति ॥ १ ॥

आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः ॥ २ ॥

तथाऽऽपः पीतास्त्रेधा विधीयन्ते । तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति ।

यो मध्यमस्तल्लोहितं भवति । योऽणिष्ठः स प्राणो भवति । वक्ष्यति ह्यापोमयः प्राणो नापिबतो विच्छेत्स्यत इति ॥ २ ॥

भुक्तस्यान्नस्य त्रैविध्यमुक्त्वा पीतानामपामपि त्रैविध्यमाह— तथेति ॥ २ ॥

तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् ॥ ३ ॥

तथा तेजोऽशितं तैलघृतादि भक्षितं त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुस्तदस्थि भवति । यो मध्यमः स मज्जाऽस्थ्यन्तर्गतः स्नेहः । योऽणिष्ठः सा वाक् । तैलघृतादिभक्षणाद्धि वाग्विशदा भाषणे समर्था भवतीति प्रसिद्धं लोके ॥ ३ ॥

कथं तेजसोऽन्यादित्यादेरशनमित्याशङ्क्य विशिनष्टि--तैलेति । मज्जाशब्दार्थमाह--अस्थीति । योऽणिष्ठः सा वागित्युक्तं व्यक्ती करोति— तैलघृतादीति ॥ ३ ॥

अन्नमयꣳ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ४ ॥

इति छान्दोग्योपनिषदि षष्ठाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

यत एवमन्नमयं हि सौम्य मन आपोमयः प्राणस्तेजोमयी वाक् । ननु केवलान्नभक्षिणः अखुप्रभृतयो वाग्मिनः प्राणवन्तश्च तथाऽल्पमात्रभक्ष्याः सामुद्रा मीनमकरप्रभृतयो मनस्विनो वाग्मिनश्च तथाऽस्नेहपानामपि प्राणवत्त्वं मनस्वित्वं चानुमेयं यदि सन्ति तत्र कथमन्नमयं हि सौम्य मन इत्युच्यते । नैष दोषः । सर्वस्य त्रिवृत्कृतत्वात्सर्वत्र सर्वोपपत्तेः । न ह्यत्रिवृत्कृतमन्नमश्नाति कश्चिदापो वाऽत्रिवृत्कृताः पीयन्ते तेजो वाऽत्रिवृत्कृतमश्नाति कश्चिदित्यन्नादानामाखुप्रभृतीनां वाग्मित्वं प्राणवत्त्वं चेत्याद्यविरुद्धम् । इत्येवं प्रत्यायितः श्वेतकेतुराह--भूय एव पुनरेव मा मां भगवानन्नमयं हि सौम्य मन इत्यादि विज्ञापयतु दृष्टान्तेनावगमयतु नाद्यापि

---

१ घ. च. ठ. ढ. ण. °क्षणे हि वा° । २ ख. घ. च. ञ. ठ. ड. ण. °षणस° । ३ ख. ज. सौम्य । ४ ख. ञ. सौम्येति । ५ ख. ङ. ञ. सौम्य. । ६ ख. ङ. ञ. °भक्षण । घ. भक्ष्या आ° । ७ ख. ङ. ण. सौम्य । ८ ख. ञ. सौम्य ।

ममास्मिन्नर्थे सम्यङ्निश्चयो जातः । यस्मात्तेजोबन्नमयत्वेनाविशिष्टे देह एकस्मिन्नुपयुज्यमानान्यन्नाप्स्नेहजातान्यणिष्ठधातुरूपेण मनःप्राणवाच उपचिन्वन्ति स्वजात्यनतिक्रमेणेति दुर्विज्ञेयमित्याभिप्रायोऽनो भूय एवेत्याह । तमेवमुक्तवन्तं तथाऽस्तु सौम्येति होवाच पिता शृण्वत्र दृष्टान्तं यथैतदुपपद्यते यत्पृच्छसि ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

भुक्तस्यान्नस्य पीतानामप्यपामश्नितस्य तैलादेश्च येऽणिष्ठा धातवस्ते मनोवाक्प्राणा इत्येवं यतः सिद्धमतस्तेषामन्नादिमयत्वं युक्तमित्याह—यत इति । तेषामन्नादिमयत्वं व्यतिरेकसिद्धिमाश्रित्याऽऽक्षिपति—नन्विति । आखुप्रमुखानां(णां) स्फुटोदपानाद्यनुपलम्भेऽपि यत्तेषां भक्ष्यं तत्रैवोदकाद्यन्तर्भावसंभवात्प्राणादेरम्मयत्वाद्युपपन्नमित्युत्तरमाह—नैष दोष इति । सर्वस्यान्नादेस्त्रिवृत्कृतत्वस्योक्तत्वात्तस्य सर्वस्यैव भक्ष्यस्य भूतत्रयात्मत्वसंभवादेकैकं भक्षयतोऽपि सर्वभक्षकत्वोपपत्तेर्मनआदेरन्नादिमयत्वमविरुद्धमित्यर्थः । उक्तमेव व्यक्ती करोति—न हीत्यादिना । उक्तरीत्या मनआदेरन्नादिमयत्वप्रत्यायनद्वारा प्रैनाङ्या सन्मात्रपरिशेषे प्रत्यायिते सति श्वेनकेतुश्चोदयतीत्याह—इत्येवमिति । सर्वेषां संनिधानाविशेषेऽन्नस्य सूक्ष्मांशो मन एवोपचिनोति न प्राणमिति निश्चयासिद्धिरित्याह—नाद्यापीति । पार्थिवमेवोपचिनोतीति विशेषमाशङ्क्याऽऽह—यस्मादिति । एकस्मिन्नुदरे प्रविष्टानामन्नादीनां मिथीभूतत्वान्मनसश्च सर्वभूतगुणव्यञ्जकत्वेन सर्वभूतारब्धत्वात्पार्थिवत्वासिद्धेर्नोक्तो विशेषः संभवतीत्यर्थः । यस्मादेवमभिप्रायः श्वेतकेतोरत इति योजना । मनआदेरन्नादिमयत्वमुपपादयितुमुत्तरग्रथमवतारयति—तमेवमिति । यत्त्वं मनआदेरन्नादिमयत्वं कथमिति पृच्छसि तदिदं यथोपपद्यते तथाऽन्नान्नादिमयत्वे तस्य दृष्टान्तमुच्यमानं शृण्विति योजना ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

(अथ षष्ठाध्यायस्य षष्ठः खण्डः) ।

दध्नः सौम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति ॥ १ ॥

दध्नः सौम्य मथ्यमानस्य योऽणिमाऽणुभावः स ऊर्ध्वः समुदीषति संभूयोर्ध्वं नवनीतभावेन गच्छति तत्सर्पिर्भवति ॥ १ ॥

---

१ क. ख. ञ. °न्यबन्नस्नेह° । २ ख. ञ. ण. °मेणातिदु° । ३ ख. ङ. ञ. सौम्येति । ४ क. ग, ट. °द्धत्करणस्यो° । ५ ख. छ. ण. प्रणाड्या । ६ ख. ञ. सौम्य । ७ ख. ङ. ञ. सौम्य ।

मिश्रीभावेऽपि सूक्ष्मभागस्य पृथगेव कार्यकारणत्वे दृष्टान्तमाह—दध्न इति ॥१॥

एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स
ऊर्ध्वः समुदीषति तन्मनो भवति ॥ २ ॥

यथाऽयं दृष्टान्त एवमेव खलु सोम्यान्नस्यौदनादेरश्यमानस्य भुज्यमानस्योदर्येणाग्निना वायुसहितेन खजेनेव मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति मनोवयवैः सह संभूय मन उपचिनोतीत्येतत् ॥२॥

दृष्टान्तमनूद्य दार्ष्टान्तिकमाह—यथेति । खजो मन्थास्तेन मथ्यमानस्य दध्नो यथाऽणिमा तथा यथोक्तस्यान्नस्य योऽणिमेति योज्यम् । कथं तन्मनो भवतीत्युच्यते प्रागपि मनसः सिद्धत्वादित्याशङ्क्याऽऽह—मनोवयवैरिति ॥ २ ॥

अपाः सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः
समुदीषति स प्राणो भवति ॥ ३ ॥

तथाऽपां सौम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवतीति ॥ ३ ॥

॥ ३ ॥

तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समु-
दीषति सा वाग्भवति ॥ ४ ॥

एवमेव खलु सौम्य तेजसोऽश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति ॥ ४ ॥

॥ ४ ॥

अन्नमयꣳ हि सोम्य मन आपोमयः प्राणस्तेजो-
मयी वागिति भूय एव मा भगवान्विज्ञापयत्विति
तथा सोम्येति होवाच ॥ ५ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

===

अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति युक्तमेव

---

१ ख. अ. °लु सौम्या° । २ ख. अ. °लु सौम्या° । ३ क. ख. ग. घ. ङ. ट. ठ. ड. ण. °नस्यौद° । ४ ख. अ. सौम्य । ५ ख. ङ. अ. सौम्य । ६ ख. अ. थ. °सः सौम्या° । ७ ख. घ, अ, सौम्य । ८ ख. घ. अ. सौम्य । ९ ख, अ, सौम्येति । १० ख. अ. सौम्य ।

मयो कमित्यभिप्रायोऽतोऽन्नमेवेदं सोरस्त्वेतत्सर्वमेव । मनस्त्वन्नमयमित्यत्र नैकान्तेन मम निश्चयो जातोऽतो भूय एव मा भगवान्मनसोऽन्नमयत्वं दृष्टान्तेन विज्ञापयत्विति । तथा सोम्येति होवाच पिता ॥ ५ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

मनआदेरन्नादिमयत्वमुपसंहरति—अन्नमयं हीति । अतो मवदभिप्रायादिति यावत् । एतत्सर्वमिति प्राणस्याप्मयत्वं वाचस्तेजोमयत्वं चोच्यते । हृदयप्रदेशे प्राणादिसंनिधानाविशेषे कथं मनस एवान्नरसेनोपचय इत्येतन्नाद्यापि समाहितमिति मत्वाऽऽह—मनस्त्विति । मनसो विशेषतोऽन्नमयत्वमुपपादयितुमुत्तरग्रन्थमुत्थापयति—तथेति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

(अथ षष्ठाध्यायस्य सप्तमः खण्डः) ।

षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माऽशीः काममपः पिबाऽऽपोमयः प्राणो नपिबतो विच्छेत्स्यत इति ॥ १ ॥

अन्नस्य भुक्तस्य योऽणिष्ठो धातुः स मनसि शक्तिमधात्साऽन्नोपचिता मनसः शक्तिः षोडशधा प्रविभज्य पुरुषस्य कलात्वेन निर्दिदिक्षिता । तया मनस्यन्नोपचितया शक्त्या षोडशधा प्रविभक्तया संयुक्तस्तद्वान्कार्यकारणसंघातलक्षणो जीवविशिष्टः पुरुषः षोडशकल उच्यते यस्यां सत्यां द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञाता सर्वक्रियासमर्थः पुरुषो भवति हीयमानायां च यस्यां सामर्थ्यहानिः । वक्ष्यति चाथान्नस्याऽऽदै(यी) द्रष्टेत्यादि । सर्वस्य कार्यकारणस्य सामर्थ्यं मनःकृतमेव । मानसेन हि बलेन संपन्ना बलिनो दृश्यन्ते लोके ध्यानाहाराश्च केचिदन्नस्य सर्वात्मकत्वात् । अतोऽन्नकृतं मानसं वीर्यं षोडश कला यस्य पुरुषस्य सोऽयं षोडशकलः पुरुष एतच्चेत्प्रत्यक्षीकर्तुमिच्छसि पञ्चदशसंख्याकान्यहानि माऽशीरशनं मा कार्षीः काममिच्छातोऽपः पिब यस्मा*न्नपिबतोऽपस्ते प्राणो विच्छेत्स्यते विच्छेद-

---

* उदकपानमकुर्वतः ।

---

१ ख. ङ. ञ. सौम्येति । २ ख. ञ. सौम्य । ३ ग. घ. च. ट. ठ. ड. °थैकर° । ४ ग. घ. ङ. च. ट. ठ. ड. ढ. °थैकर । ५ क. °णसंघातस्य ।

मापत्स्यते यस्मादापोमयोऽब्विकारः प्राण इत्यवोचाम । न हि कार्यं स्वकारणोपष्टम्भमन्तरेणाविश्रंशमानं स्थातुमुत्सहते ॥ १ ॥

अन्वयव्यतिरेकाभ्यां मनसोऽन्नरसोपचितत्वं दर्शयितुमन्नरसजनितां शक्तिं कलात्वेन कल्पयति—अन्नस्येत्यादिना । षोडशदिनावच्छेदेन षोडशधा कल्पनं द्रष्टव्यम् । तथाऽपि पुरुषस्य कथं षोडशकलत्वमत आह—तथेति । तामेव प्रकृतामन्नरसकृतां शक्तिं विशिनष्टि-यस्यामिति । तया संयुक्तः पुरुषः षोडशकल इति पूर्वेण संबन्धः । अन्नरसजनितं मानसशक्तिप्रयुक्तं संघातस्य सामर्थ्यमित्यत्र वाक्यं प्रमाणयति—वक्ष्यति चेति । आयो लाभोऽस्यास्तीत्यायी यावदन्नं प्राप्यात्ता भवति तावदेवास्य द्रष्टेत्यादिव्यवहारः संभवतीत्यर्थः । उक्तेऽर्थे लोकानुभवमनुकूलयति—सर्वस्येति । तदेव स्पष्टयति—मानसेनेति । किंच केचिन्मानसेनैव बलेन ध्यानाहारा दृश्यन्ते तच्च ध्यानमन्नपरम्परापरिनिष्पन्नमन्नस्यैव देहादिरूपेण परिणतत्वादित्याह—ध्यानेति । एवं पातनिकां कृत्वा षोडशकलशब्दार्थमाह—अत इति । यतोऽन्नकृतं मानसं वीर्यमतस्तदेव षोडशधा विभज्य कला यस्येति योजना । एतच्छब्देनान्नकृतं मानसं वीर्यं परामृश्यते । विच्छेत्स्यते विच्छेदमापत्स्यते यस्मात्तस्मादपः पिबेति पूर्वेण संबन्धः । अपां पानपरित्यागे प्राणविच्छेदे कारणमाह—यस्मादिति । प्राणस्याप्मयत्वेऽपि किमित्यपां परित्यागे तस्योच्छेदस्तत्राऽऽह—न हीति ॥ १ ॥

स ह पञ्चदशाहानि नाऽऽशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूꣳषि सामानीति स होवाच न वै मा प्रतिभान्ति भो इति ॥ २ ॥

स हैवं श्रुत्वा मनसोऽन्नमयत्वं प्रत्यक्षीकर्तुमिच्छन्पञ्चदशाहानि नाऽऽशानं न कृतवान् । अथ षोडशेऽहनि हैनं पितरमुपससादोपगतवानुपगम्य चोवाच—किं ब्रवीमि भो इति । इतर आह ऋचः सोम्य यजूंषि सामान्यधीष्वेति । एवमुक्तः पित्राऽऽह—न वै मा मामृगादीनि प्रतिभान्ति मम मनसि न दृश्यन्त इत्यर्थो हे भो भगवन्निति ॥ २ ॥

॥ २ ॥

---

१ ख. घ. ङ. ञ. ठ. ड. ढ. ण. 'विभ्रश्यमा° । २ ग. छ. ट. कलय° । ३ क. ग. ट. °लक्त्वम° । ४ क. ग. ट. वाक्यशेष । ५ ञ. ञ. सौम्य । ६ घ. ङ. ठ. त. °ति न । ७ ख. ञ. सौम्य ।

तꣳ होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेदेवꣳ सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति ॥ ३ ॥

एवमुक्तवन्तं पिताऽऽह शृणु तत्र कारणं येन ते तान्यृगादीनि न प्रतिभान्तीति तं होवाच यथा लोके हे सोम्य महतो महत्परिमाणस्याभ्याहितस्योपचितस्येन्धनैरग्नेरेकोऽङ्गारः खद्योतमात्रः खद्योतपरिमाणः शान्तस्य परिशिष्टोऽवशिष्टः स्याद्भवेत्तेनाङ्गारेण ततोऽपि तत्परिमाणादीषदपि न बहु दहेदेवमेव खलु सोम्य ते तवान्नोपचितानां षोडशानां कलानामेका कलाऽवयवोऽतिशिष्टाऽवशिष्टा स्यात्तया त्वं खद्योतमात्राङ्गारतुल्ययैतर्हीदानीं वेदानानुभवपि न प्रतिपद्यसे श्रुत्वा च मे मम वाचमथाग्रेषं विज्ञास्यस्यशान भुङ्क्ष्व तावत् ॥ ३ ॥

ऋगाद्यप्रतिभानं तत्रेत्युच्यते । ईषदपि न दहेत्कुनो बहु दहेदिति योजना ॥ ३ ॥

स हाऽऽशाथ हैनमुपससाद तꣳ ह यत्किंच पप्रच्छ सर्वꣳ ह प्रतिपेदे ॥ ४ ॥

स ह तथैवाऽऽश भुक्तवानथानन्तरं हैनं पितरं शुश्रूषुरुपससाद । होपगतं पुत्रं यत्किंचर्गादिषु पप्रच्छ ग्रन्थरूपमर्थजातं वा पिता स श्वेतकेतुः सर्वं ह तत्प्रतिपेद ऋगाद्यर्थतो ग्रन्थतश्च ॥ ४ ॥

॥ ४ ॥

तꣳ होवाच यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधायं प्राज्वलयेत्ततोऽपि बहु दहेत् ॥ ५ ॥

तं होवाच पुनः पिता यथा सोम्य महतोऽभ्याहितस्येत्यादि समानमेकम-

---

१ ख. घ. ञ. सौम्य । २ ख. घ. ञ. सौम्य । ३ ख. च. ञ. ठ. ड. ण. °न त ऋगा° । ४ ख. च. ञ. ड. ण. °भान्ति तं । ५ ख. ड. ञ. ड. सौम्य । ६ ख. ड. ञ. सौम्य । ७ क. ख. ग. ञ. ट. ड. ण. होपाग° । ८ क. ग. घ. च. ट. ठ. ड. °वै हैत° । ९ ख. ञ. सौम्य । १० ग. °य प्रज्व° । ११ ख. ड. ञ. सौम्य ।

ङ्गारं शान्तस्याग्नेः खद्योतमात्रं परिशिष्टं तं तृणैश्चूर्णैश्चोपसमाधाय प्राज्वलयेद्धर्धयेत्। तेनेद्धेनाङ्गारेण ततोऽपि पूर्वपरिमाणाद्बहु दहेत् ॥ ५ ॥

॥ ९ ॥

एवꣳ सोम्य ते षोडशानां कलानामेका कलाऽतिशिष्टाऽभूत्साऽन्नेनोपसमाहिता प्राज्वालीं तयैतर्हि वेदाननुभवस्यन्नमयꣳ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ६ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

एवं सोम्य ते षोडशानामन्नकलानां सामर्थ्यरूपाणामेका कलाऽतिशिष्टाऽभूदतिशिष्टाऽऽसीत्पश्चदशाहान्यभुक्तवत एकैकेनाह्नैकैका कला चन्द्रमस इवापरपक्षे क्षीणा सा तिशिष्टा कला तवान्नेन भुक्तेनोपसमाहिता वर्धितोपचिता प्राज्वालि दैर्घ्यं छान्दसं प्रज्वलिता वर्धितेत्यर्थः। प्राज्वालीदिति पाठान्तरं तदाँ तेनोपसमाहिता स्वयं प्रज्वलितवतीत्यर्थः। तया वर्धितयैतर्हीदानीं वेदाननुभवस्युपलभसे। एवं व्यावृत्त्यनुवृत्तिभ्यामन्नमयत्वं मनसः सिद्धमित्युपसंहरत्यन्नमयं हि सोम्य मन इत्यादि। यथैतन्मनसोऽन्नमयत्वं तव सिद्धं तथाऽऽपोमयः प्राणस्तेजोमयी वागित्येतदपि सिद्धमेवेत्यभिप्रायः। तदेतद्धास्य पितुरुक्तं मनआदीनामन्नादिमयत्वं विजज्ञौ विज्ञातवाञ्श्वेतकेतुः। द्विरभ्यासस्त्रिवृत्करणप्रकरणसमाप्त्यर्थः ॥ ६ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

व्यावृत्तिर्व्यतिरेकोऽन्नोपयोगाभावे मनसः सामर्थ्याभावः। अनुवृत्तिरन्वयोऽन्नोपयोगे मनसः सामर्थ्यमिति भेदः। मनसोऽन्नमयत्वमुपपादयितुमुक्तमापोमयः प्राण इत्यादि कथमिहोच्यते तत्राऽऽह—यथैतदिति। विद्यासमाप्तिमन्तरेण कथं द्विर्वचनमित्याशङ्क्याऽऽह—द्विरभ्यास इति। ६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

---

१ ख. ञ. सौम्य। २ क. ग. घ. ङ. ज. झ. ठ. त. थ. °लीत्तयै°। ३ ख. ञ. सौम्य। ४ ख. ङ. ञ. सौम्य। ५ घ. ङ. ड. ढ. °र्थः, तया। ६ ख. ग. ञ. ट. ण. °ति वा प°। ७ ग. ढ. ठ. °दाऽन्नो°। ८ क. ख. ङ. ञ. सौम्य। ९ ठ. ढ. °ण स°। १० क. °णपरिस°।

(अथ षष्ठाध्यायस्याष्टमः खण्डः) ।

उद्दालको हाऽऽरुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनꣳ स्वपितीत्याचक्षते स्वꣳ ह्यपीतो भवति ॥ १ ॥

यस्मिन्मनसि जीवेनाऽऽत्मनाऽनुप्रविष्टा परा देवताऽऽदर्श इव पुरुषः प्रतिबिम्बेन जलादिष्विव च सूर्यादयः प्रतिबिम्बैः । तन्मनोऽन्नमयं तेजोमयाभ्यां वाक्प्राणाभ्यां संगतमधिगतम् । यन्मयो यत्स्थश्च जीवो मननदर्शनश्रवणादिव्यवहाराय कल्पते तदुपरमे च स्वं देवतारूपमेव प्रतिपद्यते । तदुक्तं श्रुत्यन्तरे—ध्यायतीव लेलायतीव सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय इत्यादि, स्वप्नेन शारीरमित्यादि, प्राणस्येव प्राणो नाम भवतीत्यादि च । तस्यास्य मनस्थस्य मनआख्यां गतस्य मनउपशमद्वारेणेन्द्रियाविषयेभ्यो निवृत्तस्य यस्यां परस्यां देवतायां स्वात्मभूतायां यदवस्थानं तत्पुत्रायाँयाऽऽचिख्यासुरुद्दालको ह किलाऽऽरुणिः श्वेतकेतुं पुत्रमुवाचोक्तवान् ।

त्रिवृत्करणनिर्णयविषयमवान्तरप्रकरणं परिसमाप्य महाप्रकरणं सद्विषयमेवानुवर्तयन्मनसो लये सुषुप्तौ जीवस्य सत्संपत्तिं वक्तुं मनउपाधिकत्वमुक्तमनुवदति—यस्मिन्निति । उपाधेः स्वरूपमुक्तं संचारयति—तन्मन इति । उपाध्युपहिते कार्यकरत्वं दर्शयति—यन्मय इति । मनसो भावे जाग्रत्स्वप्नव्यवहारसिद्धिरित्युक्त्वा तदभावे सुषुप्तिमवतारयति—तदुपरमे चेति । आत्मनि मनोवशादेव दर्शनादिव्यवहारो न स्वारस्येनेत्यत्र बृहदारण्यकश्रुतिं प्रमाणयति—तदुक्तमिति । द्वितीये वाक्ये सधीरित्येतदुपयुज्यते । तृतीये तु विज्ञानमयो मनोमय इति च पदद्वयमुपजीव्यते । एवं भूमिकां कृत्वा समनन्तरवाक्यमादत्ते—तस्येति । तत्पुत्रायेत्यत्र तस्यां देवतायां तदवस्थानमिति तच्छब्दार्थः ।

---

१ ख. ञ. सौम्य । २ ख. ञ. सौम्य । ३ क. घ. ङ. °व सू° । ढ. °व वा सू° । ४ ख. घ. ञ. ण. °बिम्बेन । त° । ५ ग. घ. च. ट. ठ. ड. ढ. °णो भ° । ६ ठ. °यां स्वरूपभू° । ७ घ. ठ. ण. °श्राय व्याधि° ।

स्वप्नान्तं स्वप्नमध्यं स्वप्न इति दर्शन*वृत्तेः स्वप्नस्थाऽऽख्या तस्य मध्यं स्वप्नान्तं सुषुप्तमित्येतत् । अथवा स्वप्नान्तं स्वप्नसतत्त्वमित्यर्थः । तत्राप्यर्थात्सुषुप्तमेव भवति । स्वमपीतो भवतीति वचनात् । न ह्यन्यत्र सुषुप्तात्स्वमपीतिं जीवस्येच्छन्ति ब्रह्मविदः । तत्र ह्यादर्शोपनयने पुरुषप्रतिबिम्ब आदर्शगतो यथा स्वमेव पुरुषमपीतो भवत्येवं मनआद्युपरमे चैतन्यप्रतिबिम्बरूपेण जीवेनाऽऽत्मना मनसि प्रविष्टा नामरूपव्याकरणाय परा देवता सा स्वमेवाऽऽत्मानं प्रतिपद्यते जीवरूपतां मनआख्यां हित्वा । अतः सुषुप्त एव स्वप्नान्तशब्दवाच्य इत्यवगम्यते । यत्र तु सुप्तः स्वप्नान्पश्यति तत्स्वाप्नं दर्शनं सुखदुःखसंयुक्तमिति पुण्यापुण्यकार्यम् । पुण्यापुण्ययोर्हि सुखदुःखारम्भकत्वं प्रसिद्धम् । पुण्यापुण्ययोश्चाविद्याकामोपष्टम्भेनैव सुखदुःखतद्दर्शनकार्यारम्भकत्वमुपपद्यते नान्यथेत्यविद्याकामकर्मभिः संसारहेतुभिः संयुक्त एव स्वप्न इति न स्वमपीतो भवति । अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति तद्वा अस्यैतदतिच्छन्दा एषं परमं आनन्द इत्यादिश्रुतिभ्यः । सुषुप्त एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामीत्याह । स्वप्नान्तं मे मम निगदतो हे सौम्य विजानीहि विस्पष्टमवधारयेत्यर्थः ।

तत्रेति द्वितीयपक्षोक्तिः । अर्थादिति । स्वप्नस्य हि कार्यस्य सतत्त्वं कारणं तच्च सुषुप्तमेव । सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोरित्युभयापगमनात् × । द्वितीयव्याख्याने सुषुप्तमेवार्थवशात्फलतीत्यर्थः । इतश्च स्वप्नान्तशब्देन साक्षादर्थाद्वा सुषुप्तमेवोक्तमित्याह-स्वमिति । नन्ववस्थान्तरेऽपि स्वमपीतो भवतीति वचनमविरुद्धमिति चेन्नेत्याह—नहीति । तत्रापि कथं स्वापः स्यादित्याशङ्क्याऽऽह—तत्रेति । स्वपितिनामनिर्वचनसामर्थ्यसिद्धमर्थं निगमयति—अत इति । ननु स्वप्नान्तशब्दो बुद्धान्तशब्दवद्यदा स्वप्नमेवान्वाचष्टे तदाऽपि स्वमपीतो भवतीत्यविरुद्धं सर्वदा जीवस्य सद्रूपब्रह्मप्राप्तेस्तुल्यत्वादत आह—यत्र त्विति । स्वप्नदर्शनस्य पुण्यापुण्यकाप्रकटयति—पुण्यापुण्ययोर्हीति । न केवलं पुण्यापुण्याभ्यामेव स्वप्ने संयुज्यते किन्त्वविद्यादिभिश्चेति न तत्र स्वाप्ययः संभवतीत्याह-पुण्यापुण्ययोश्चेति ।

---

* स्वप्नशब्दस्य स्वप्नसुषुप्तयोः साधारणत्वात्सुषुप्ते व्यावृत्त्यर्थं दर्शनवृत्तेरिति विशेषणं सुषुप्तेरदर्शनवृत्तित्वाततः । × तत्रोभयोर्लयात् ।

---

१ ख. घ. च. ञ. ठ. ण. °नये पु° । २ ख. घ. च. ञ. ण. °ष एव परमान° । ङ. °ष एव °। ३ ङ. °रमान° । ४ ख. ङ. ञ. सौम्य

तर्हि स्वप्नवन्न सुषुप्तेऽपि स्वाप्ययः स्यात्तत्रापि कामकर्मादिसंबन्धसंभवादित्याशङ्क्याऽऽह—अनन्वागतामिति ।

कदा स्वप्नान्तो भवतीत्युच्यते । यत्र यस्मिन्काल एतन्नाम भवति पुरुषस्य स्वप्स्यतः । प्रसिद्धं हि लोके स्वपितीति । गौणं चेदं नामेत्याह । यदा स्वपितीत्युच्यते पुरुषस्तदा तस्मिन्काले सता सच्छब्दवाच्यया प्रकृतया देवतया संपन्नो भवति संगत एकीभूतो भवति । मयपि प्रविष्टं मनआदिसंसर्गकृतं जीवरूपं परित्यज्य स्वं सद्रूपं यत्परमार्थसत्यमपीतोऽपिगतो भवति । अतस्तस्मात्स्वपितीत्येनमाचक्षते लौकिकाः । स्वमात्मानं हि यस्मादपीतो भवति । गुणनामप्रसिद्धितोऽपि स्वात्मप्राप्तिर्गम्यत इत्यभिप्रायः । कथं पुनर्लौकिकानां प्रसिद्धा स्वात्मसंपत्तिर्जाग्रच्छ्रमनिमित्तोद्भवत्वात्स्वाप्यस्येत्याहुः । जागरिते हि पुण्यापुण्यनिमित्तसुखदुःखाद्यनेकायासानुभवाच्छ्रान्तो भवति ततश्चाऽऽयस्तानां करणानामनेकव्यापारनिमित्तग्लानानां स्वव्यापारेभ्य उपरमो भवति । श्रुतेश्च श्राम्यंत्येव वाक्श्राम्यति चक्षुरित्येवमादि । तथा च गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मन इत्येवमादीनि करणानि प्राणग्रस्तानि प्राण एकोऽश्रान्तो देहे कुलाये यो जागर्ति तदा जीवः श्रमापनुत्तये स्वं देवतारूपमात्मानं प्रतिपद्यते । नान्यत्र स्वरूपावस्थानाच्छ्रमापनोदः स्यादिति युक्ता प्रसिद्धिर्लौकिकानां स्वं ह्यपीतो भवतीति । दृश्यते हि लोके ज्वरादिरोगग्रस्तानां तद्विनिर्मोके स्वात्मस्थानां विश्रमणं तद्वदिहापि स्यादिति युक्तम् । तद्यथा श्येनो वा सुपर्णो वा विपरिपत्य श्रान्त इत्यादिश्रुतेश्च ॥ १ ॥

सति जीवरूपे कथं देवताभावः संभवतीत्याशङ्क्याऽऽह—मनसीति । तस्मादित्यस्यातःशब्दो व्याख्यानस्तेन परामृष्टं हेतुमेव स्पष्टयति—स्वमात्मानमिति । स्वपितिनामनिर्वचनफलं दर्शयति—गुणेति । सुषुप्ते स्वरूपावस्थानस्य मुख्यस्यासंभवान्मुक्तत्वेनानुत्थानप्रसङ्गात्स्वरूपावस्थानप्रसिद्धेर्निमित्तं वक्तव्यमिति पृच्छति—कथं पुनरिति । ज्वरादिरोगग्रस्तस्य स्वभावस्थितौ प्रसिद्धः श्रमाभावः सुषुप्तं च श्रमापनोदावस्थानं तथा च तत्र स्वरूपस्थितिप्रसिद्धिरविरुद्धेत्याह—जाग्रदिति । संगृहीतं समाधानं विवृणोति—जागरिते हीति । करणानामनेकव्यापारनिमित्ता ग्लानिर्भवती-

---

१ ङ. °सिद्धेरपि । २ ख. घ. ङ. च. ञ. ण. °म्यति वा° । ३ ख. घ. ञ. ट. ण. चक्षुः श्राम्यति श्रोत्रमित्ये° ।

स्यत्र मानमाह-श्रुतेश्चेति। अनुभवसमुच्चयार्थश्चकारः। सुषुप्त्यवस्थायां करणानामुपरतौ प्रमाणमाह-तथा चेति। सुषुप्तौ प्राणस्यापि वागादिवदुपसंहृतत्वमाशङ्क्याऽऽह-करणानीति। अन्यथा मृतिभ्रान्तिः स्यादिति भावः। जीवस्यापि बाह्यैर्व्यापारः स्यादिति चेन्नैवं करणाभावादित्याह-तदेति। ननु सुषुप्ते श्रमापनोदमात्रं न स्वरूपावस्थानं तत्कुतो लौकिकी प्रसिद्धिरित्याशङ्क्याऽऽह-नान्यत्रेति। उक्तमर्थं लौकिकदृष्टान्तेन स्पष्टयति-दृश्यते हीति। बृहदारण्यकश्रुत्यालोचनायामपि सुषुप्त्यवस्थायामवस्थाद्वयजनितश्रमापोहार्थं ब्रह्मनीडप्राप्तिर्गम्यत इत्याह-तद्यथेति ॥ १ ॥

स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वाऽन्यत्राऽऽयतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सौम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्राऽऽयतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनꣳ हि सोम्य मन इति ॥ २ ॥

तत्रायं दृष्टान्तो ययोक्तेऽर्थे स यथा शकुनिः पक्षी शकुनिघातकस्य हस्तगतेन सूत्रेण प्रबद्धः पाशितो दिशं दिशं बन्धनमोक्षार्थी सन्गतिदिशं पतित्वाऽन्यत्र बन्धनादायतनमाश्रयं विश्रमणायालब्ध्वाऽप्राप्य बन्धनमेवोपश्रयते। एवमेव यथाऽयं दृष्टान्तः खलु हे सौम्य तन्मनस्तत्प्रकृतं षोडशकलमन्नोपचितं मनो निर्धारितं तत्प्रविष्टस्तत्स्थस्तदुपलक्षितो जीवस्तन्मन इति निर्दिश्यते मञ्चाक्रोशनवत्। स मनआख्योपाधिर्जीवोऽविद्याकामकर्मोपदिष्टां दिशं दिशं सुखदुःखादिलक्षणां जाग्रत्स्वप्नयोः पतित्वा गत्वाऽनुभूयेत्यर्थः। अन्यत्र सदाख्यात्स्वात्मन आयतनं विश्रमणस्थानमलब्ध्वा प्राणमेव प्राणेन सर्वकार्यकरणाश्रयेणोपलक्षिता प्राण इत्युच्यते सदाख्या परा देवता। प्राणस्य प्राणं प्राणशरीरो भारूप इत्यादिश्रुतेः। अतस्तां देवतां प्राणं प्राणाख्यामेवोपश्रयते। प्राणो बन्धनं यस्य मनसस्तत्प्राणबन्धनं हि

---

१ ग. ट. °पि तर्हि स्वव्याप°। २ ञ. थ. °वोपाश्र°। ३ ख. झ. ञ. सौम्य। ४ ञ. ढ. °वोपाश्र°। ५ ख. ङ. ञ. सौम्य। ६ ञ. ड. °वोपाश्र°। ७ ख. ङ. ञ. ठ. सौम्य। ८ ग. घ. ङ. ट. ड. ढ. °प्रतिष्ठस्त°। ९ घ. ङ. °क्षितः प्रा°। ठ. °क्षित इति प्रा°। १० क. ढ. प्राणः। ११ ञ. ठ. °वोपाश्र°।

यस्मात्सोम्य मनः प्राणोपलक्षितदेवताश्रयं मन इति तदुपलक्षितो जीव इति ॥ २ ॥

तत्रेति सुषुप्त्यवस्थोच्यते । यथोक्तोऽर्थो हि जीवस्य ब्रह्मण्यवस्थानं तस्मिन्निति यावत् । सशब्दो दृष्टान्तविषयः शकुनिविषयो वा । अप्राप्येति च्छेदः । यथा मञ्चाक्रोशनेन मञ्चस्थो देवदत्तो लक्ष्यते तथा तन्मन इति मनसि स्थितो जीवो लक्ष्यो भवतीत्याह—मञ्चाक्रोशनवदिति । न केवलं प्रकरणात्प्राणशब्देन परा देवता लक्ष्यतेऽन्यत्र प्रयोगदर्शनाच्चेत्याह—प्राणस्येति । प्राणशब्देन परदेवतालक्षणायां फलितमाह—अत इति । प्राणमेवोपश्रयते विज्ञानात्मेत्यत्र हेतुमाह—प्राणबन्धनमिति ॥ २ ॥

अशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाऽऽप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतितꣳ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ३ ॥

एवं स्वपितिनामप्रसिद्धिद्वारेण यज्जीवस्य सत्यस्वरूपं जगतो मूलं तत्पुत्रस्य दर्शयित्वाऽऽहान्नादिकार्यकारणपरम्परयाऽपि जगतो मूलं सदिदर्शयिषुः । अशनापिपासे अशितुमिच्छाऽशना पातुमिच्छा पिपासा ते अशनापिपासे अशनापिपासयोः सतत्त्वं विजानीहीत्येतत् । यत्र यस्मिन्काल एतन्नाम पुरुषो भवति । किं तदशिशिषत्यशितुमिच्छतीति । तदा तस्य पुरुषस्य किंनिमित्तं नाम भवतीत्याह । यत्तत्पुरुषेणाशितमन्नं कठिनं पीता आपो नयन्ते द्रवीकृत्य रसादिभावेन विपरिणमयन्ते तदा भुक्तमन्नं जीर्यति । अर्थ च भवत्यस्य नामाशिशिषतीति गौणम् । जीर्णे ह्यन्नेऽशितुमिच्छति सर्वो हि जन्तुः ।

वृत्तमनूद्यान्तरवाक्यमुत्थापयति—एवमिति । आहाशनापिपासे सोम्येत्यादीति शेषः । किमभिप्रायः सन्पिता पुत्रं प्रत्येवमाहेत्याकाङ्क्षायामाह—अन्नादीति । अन्नादीनि कार्याणि कारणान्यवादीनि तेषां या परम्परा तयाऽपि जगतो यत्सल्लक्षणं मूलं

---

१ ख. ङ. ञ. °स्मात्सौम्य । २ ञ. °वोपाश्र° । ३ ञ. सौम्य । ४ ख. ञ. सौम्य । ५ ज. झ. °नीहीति ने° । ६ क. ग. ङ. ट. ठ. ड. ढ. सत्यं स्व° । ७ ख. ञ. ण. °ना सञ्ज्ञोपे° । ८ घ. ङ. च. ट. ड. ढ. °थ भ° । ९ ख. घ. ङ. च. ञ. ठ. ड. ण. °वौ ज° । १० ख. ञ. ण. °स्तुः । तत्रा° । ११ ग. °से सौम्ये° । १२ ख. छ. ज. ण. °र्णं त° ।

तद्दर्शयितुमिच्छन्पिता पुत्रं प्रत्यशनेत्यादिकं वाक्यमाहेत्यर्थः । अशनेत्यस्य सन्नन्तत्वाभावेऽपि कथं तदर्थो व्याख्यायते—तत्राऽऽह—अशनेति । यकारस्य लोपेनास्मिन्प्रयोगे सन्प्रत्ययः प्रयुक्तस्तथा च तदर्थोक्तिरविरुद्धेत्यर्थः । तत्राशनायापिपासयोः सतत्त्वं विज्ञापयति—यत्रेति । सामान्येनोक्तं नाम विशेषतो ज्ञातुं पृच्छति—किं तदिति । यत्कठिनमन्नं पुरुषेणाशितं तत्पीत्वा आपो नयन्त इति संबन्धः । तदेति परिणामावस्थोक्तिः । अथेत्यन्नस्य भुक्तस्य जीर्णत्वानन्तर्यमुच्यते । कथं तदा नाम्नो गौणत्वं तदाह—जीर्णे हीति ।

तत्रापामशितनेतृत्वादशनाया इति नाम प्रसिद्धमित्येतस्मिन्नर्थे । यथा गोनायो गां नयतीति गोनाय इत्युच्यते गोपालः । तथाऽश्वान्नयतीत्यश्वनायोऽश्वपाल इत्युच्यते । पुरुषनायः पुरुषान्नयतीति राजा सेनापतिर्वा । एवं तत्तदाऽप आचक्षते लौकिका अशनायेति विसर्जनीयलोपेन । तत्रैवं सत्यद्भी रसादिभावेन नीतेनाशितेनान्नेन निष्पादितमिदं शरीरं वटकणिकायामिव शुङ्गोऽङ्कुर उत्पतित उद्गतस्तमिमं शुङ्गं कार्यं शरीराख्यं वटादिशुङ्गवदुत्पतितं हे सौम्य विजानीहि । किं तत्र विज्ञेयमित्युच्यते । शृणुयदं शुङ्गवत्कार्यत्वाच्छरीरं नामूलं मूलरहितं भविष्यतीत्युक्त आह श्वेतकेतुः ॥ ३ ॥

तद्यथेत्यत्र तच्छब्दार्थमाह—तत्रेति । एतस्मिन्नर्थे दृष्टान्त उच्यत इति शेषः । अशनायेति कथमपामाख्यानमशनाया इति हि वक्तव्यं तत्राऽऽह—विसर्जनीयेति । तत्रेत्यस्य व्याख्यानमेवं सतीत्यपामशितनेतृत्वे सतीत्यर्थः । अद्भिः पीताभिरिति शेषः । तत्रेति शरीरनिर्देशः ॥ ३ ॥

तस्य क्व मूलꣳ स्यादन्यत्रान्नादेवमेव खलु सौम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सौम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥ ४ ॥

यद्येवं समूलमिदं शरीरं वटादिशुङ्गवत्तस्यास्य शरीरस्य क्व मूलं स्याद्-

---

१ ख. छ. ञ. ण. असन्निति । २ क. प्रत्युक्त° । ३ ख. घ. च. ञ. ड. ढ. ण. °थाऽश्वनायोऽश्वा° । ४ ख. घ. ञ. सौम्य । ५ ख. छ. ञ. ण. तत्तत्रे° । ६ ङ. ञ. °लु सौम्या° । ७ ख. ञ. सौम्या° । ८ ख. घ. सौम्य । ९ ख. घ. ङ. सौम्येमाः ।

वेदित्येवं पृष्ट आह पिता । तस्य क्व मूलं स्यादन्यत्रान्नादन्नं मूलमित्यभिप्रायः । कथम् । अशितं ह्यन्नमद्भिर्द्रवीकृतं जाठरेणाग्निना पच्यमानं रसभावेन परिणमते । रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसोऽस्थीन्यस्थिभ्यो मज्जा मज्जायाः शुक्रम्। तथा योऽश्नीयुक्तं चान्नं रसादिक्रमेणैवं परिणतं लोहितं भवति । ताभ्यां शुक्रशोणिताभ्यामन्नकार्याभ्यां संयुक्ताभ्यामन्नेनैवं प्रत्यहं भुज्यमानेनाऽऽपूर्यमाणाभ्यां कुड्यमिव मृत्पिण्डैः प्रत्यहमुपचीयमानोऽन्नमूलो देहशुङ्गः परिनिष्पन्न इत्यर्थः । यत्तु देहशुङ्गस्य मूलमन्नं निर्दिष्टं तदपि देहवद्विनाशोत्पत्तिमत्त्वात्कस्माच्चिन्मूलादुत्पातितं शुङ्ग एवेति कृत्वाऽऽह । यथा देहशुङ्गोऽन्नमूल एवमेव खलु सोम्यान्नेन शुङ्गेन कार्यभूतेनाऽऽपो मूलमन्नस्य शुङ्गस्यान्विच्छ प्रतिपद्यस्व । अपामपि विनाशोत्पत्तिमत्त्वाच्छुङ्गत्वमेवेति अद्भिः सोम्य शुङ्गेन कार्येण कारणं तेजो मूलमन्विच्छ । तेजसोऽपि विनाशोत्पत्तिमत्त्वाच्छुङ्गत्वमिति तेजसा सोम्य शुङ्गेन सन्मूलमेकमेवाद्वितीयं परमार्थसत्यम् । यस्मिन्सर्वमिदं वाचाऽऽरम्भणं विकारो नामधेयमनृतं रज्ज्वामिव सर्पादिविकल्पजातमध्यस्तमविद्यया तदस्य जगतो मूलमतः सन्मूलाः सत्कारणा हे सोम्येमाः स्थावरजंगमलक्षणाः सर्वाः प्रजा न केवलं सन्मूला एवेदानीमपि स्थितिकाले सदायतनाः सदाश्रया एव । नहि मृदमनाश्रित्य घटादेः सत्त्वं स्थितिर्वाऽस्ति । अतो मृद्वत्सन्मूलत्वात्प्रजानां सदायतनं यासां ताः सदायतनाः प्रजाः । अन्ते च सत्प्रतिष्ठाः सदेव प्रतिष्ठा लयः समाप्तिरवसानं परिशेषो यासां ताः सत्प्रतिष्ठाः ॥ ४ ॥

अन्नस्य देहमूलत्वमाकाङ्क्षापूर्वकं व्युत्पादयति—कथमित्यादिना । तथा पुरुषभुक्तान्नवदिति यावत् । तथाऽपि कथं सतो मूलस्य सिद्धिरत आह—यत्त्विति । सतो मूलस्य वास्तवं रूपं दर्शयति—एकमिति । तस्य सर्वकल्पनाधिष्ठानत्वेन परिणामवादं व्युदस्यति—यस्मिन्निति । अध्यासे मूलकारणमाह—अविद्ययेति । प्रजाः सर्वाः सन्मूलाः सदायतनाश्चेत्युक्तमर्थं दृष्टान्तेन समर्थयते—न हीति । सत्प्रतिष्ठाः सदायतनाश्चेत्यनयोरर्थभेदाभावमाशङ्क्याऽऽह—अन्ते चेति । प्रतिष्ठाशब्दस्य लयवाचित्वादायतनशब्दस्य चाऽऽश्रयविषयत्वान्न पौनरुक्त्यमित्यर्थः । लयशब्दस्य सुषुप्त्यादिविषयत्वं वारयति—समाप्तिरिति । सम्यगाप्तिः समाप्तिरिति प्राप्तिरत्र विवक्षि-

---

१ के. मज्जातः । ८. मज्जाभ्यः । २ ठ. शोणितं । ३ ख. ङ. °लुं सौम्या° । ४ ख. ग. ञ. ट. ड. ण. °न तत्कार्यं° । ५ ख. ङ. ञ. सौम्य । ६ ख. ञ. सौम्य । ७ ख. ङ. ञ., सौम्येमाः ।

तेति शङ्कां वारयति—अवसानमिति । तस्याभावत्वेन तुच्छरूपत्वं निरस्यति—परिशेष इति ॥ ४ ॥

अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितꣳ सौम्य विजानीहि नेदममूलं भविष्यतीति ॥ ५ ॥

अथेदानीमप्शुङ्गद्वारेण सतो मूलस्यानुगमः कार्य इत्याह । यत्र यस्मिन्काल एतन्नाम पिपासति पातुमिच्छतीति पुरुषो भवति । अशिशिषतीतिवदिदमपि गौणमेव नाम भवति । द्रवीकृतस्याशितस्यान्नस्य नेडय आपोऽभ्युङ्गं देहं क्लेदयन्त्यः शिथिलं कुर्युरब्बाहुल्याद्यदि तेजसा न शोष्यन्ते । नितरां च तेजसा शोष्यमाणास्वप्सु देहभावेन परिणममानासु पातुमिच्छा पुरुषस्य जायते तदा पुरुषः पिपासति नाम तदेतदाह । तेज एव तत्तदा पीतमवादि शोषयद्देहगतलोहितप्राणभावेन नयते परिणमयति । तद्यथा गोनाय इत्यादि समानमेवं तत्तेज आचष्टे लोक उदन्येत्युदकं नयतीत्युदन्यम् । उदन्येतीति च्छान्दसं तत्रापि पूर्ववत् । अपामप्येतदेव शरीराख्यं शुङ्गं नान्यदित्येवमादि समानमन्यत् ॥ ५ ॥

अन्नाख्यशुङ्गद्वारा सतो मूलस्याधिगतेरनन्तरमित्यथशब्दार्थः । पिपासतीत्येतन्नाम पुरुषो यस्मिन्काले भवतीति योजना । कथं पिपासतीत्येतन्नाम पुरुषस्य गौणमित्याशङ्क्याऽऽह—द्रवीकृतस्येति । भवन्त्वपां तेजसा शोष्यमाणत्वं किं तावतेत्याशङ्क्याऽऽह—नितरां चेति । तदा पानेच्छावस्थायामित्यर्थः । तेजसो यदुदकनेतृत्वमुक्तं तत्र श्रुतिमवतार्य व्याचष्टे—तदेतदाहेति । उदन्यमिति वक्तव्ये कथमुदन्येत्युक्तं तत्राऽऽह—उदन्येतीति । तत्रापि तेजस्यपीत्येतत् । यथाऽशनायेति च्छान्दसं तथा तेजस्युदन्येत्यपि च्छान्दसमेवेत्याह—पूर्ववदिति । अन्नद्वारा सतो मूलस्याधिगमवदम्बुद्वाराऽपि तस्याधिगतिरस्तीत्याह—अपामपीति ॥ ९ ॥

तस्य क्व मूलꣳ स्यादन्यत्राद्भ्योऽद्भिः सौम्य

---

१ ख. ञ. सौम्य । २ ज. झ. °नीहीति ने° । ३ ख. घ. च. ञ. ठ. ड. ण. °कर्तव्य° । ४ ख. ञ. ण. °ध्यत इति । नि° । ५ क. ख. ग. ङ. ट. ण. °ज्ञामा पु° । ६ क. छान्दसामिति । ७ ख. ञ. सौम्य° ।

शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥ ६ ॥

सामर्थ्यात्तेजसोऽप्येतदेव शरीराख्यं शुङ्गम् । अतोऽप्शुङ्गेन देहेनाऽऽपो मूलं गम्यते । अद्भिः शुङ्गेन तेजो मूलं गम्यते । तेजसा शुङ्गेन सन्मूलं गम्यते पूर्ववत् । एवं हि तेजोबन्नमयस्य देहशुङ्गस्य वाचाऽऽरम्भणमात्रस्यान्नादिपरम्परया परमार्थसत्यं सन्मूलमभयमसंत्रासं निरायासं सन्मूलान्विच्छेति पुत्रं गमयित्वाऽशिशिषति पिपासतीति नामप्रसिद्धिद्वारेण यदन्यदिहास्मिन्प्रकरणे तेजोबन्नानां पुरुषेणोपयुज्यमानानां कार्यकरणसंघातस्य देहशुङ्गस्य स्वजात्यसांकर्येणोपचयकरत्वं वक्तव्यं प्राप्तं तदिहोक्तमेव द्रष्टव्यमिति पूर्वोक्तं व्यपदिशति । यथा नु खलु येन प्रकारेणेमास्तेजोबन्नाख्यास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यन्नमशितं त्रेधा विधीयत इत्यादि । तत्रोक्तमन्नादीनामशितानां ये मध्यमा धातवस्ते सप्तधातुकं शरीरमुपचिन्वन्तीत्युक्तम् । मांसं भवति लोहितं भवति मज्जा भवत्यस्थि भवति ये त्वणिष्ठा धातवो मनः प्राणं वाचं देहस्यान्तःकरणसंघातमुपचिन्वन्तीति चोक्तं तन्मनो भवति स प्राणो भवति सा वाग्भवतीति ।

तेजःशुङ्गद्वाराऽपि सतो मूलस्य प्रतिपत्तिरस्तीत्याह— सामर्थ्यादिति । त्रिवृत्करणवशादिति यावत् । शरीरस्य भूतत्रयकार्यत्वमतःशब्दार्थं । यथा पूर्वमन्नशुङ्गेन देहेनान्नाख्यं मूलं गम्यत इत्यादि व्याख्यातं तथा तेजःशुङ्गेन देहेन तेजो मूलं गम्यत इत्यादि व्याख्येयमित्याह—पूर्ववदिति । वृत्तानुवादपूर्वकं यथेत्यादिवाक्यमादत्ते—एवं हीति । उक्तया रीत्या नामद्वयप्रसिद्धिद्वारेण यथोक्तदेहाख्यशुङ्गस्यान्नादिकारणपरम्प-

---

१ ख. घ.ञ. सौम्य । २ ख. ञ. सौम्ये° । ३ क. ग. ज. ट. थ. तु। ४ ख. ञ. °लु सौम्ये° । ५ क. ञ. सौम्य । ६ घ. ङ. च. ठ. ढ. ण. °पभुज्य° । ७ ग. घ. ठ. ड. कार्यकार° । ८ क. ग. च. ट. ठ. ड. तु ।

रया सदाख्यं मूलमुक्तविशेषणं सन्मूलमन्विच्छेत्युपदेशेन श्वेतकेतुं ज्ञापयित्वा व्यवस्थया शरीरमेकैकभूतारब्धमित्याक्षेपे प्राप्ते यदस्मिन्प्रकरणे तेजःप्रभृतीनामुपयुज्यमानानां स्वस्वभावानुसारेण संघातस्योपचयकरत्वं वक्तव्यं प्राप्तं तदिह सर्वशरीरेषु सर्वभूतकार्योपलम्भाद्व्यवस्थायां प्रमाणाभावाद्दृश्यमाने संघाते कस्य भूतस्य कियत्कार्यमित्यपेक्षायामन्नमशितमित्यादावुक्तमेव द्रष्टव्यमिति पूर्वोक्तं व्यपदिशतीति योजना। सतो मूलस्य व्यवहारसत्यत्वं वारयति—**परमार्थेति** । वस्तुतो नाविद्यासंबन्धस्तस्यास्तीत्याह-**अभयमिति** । अविद्याकार्यसंबन्धोऽपि परमार्थतो न तस्यास्तीत्याह-**असंत्रासमिति**—उभयसंबन्धाभावे समुत्खातनिखिलदुःखत्वेन परमानन्दत्वं तस्य सिध्यतीत्याह—**निरायासमिति** । पूर्वोक्तमेव व्यक्तीकरोति-**तत्रैवेति** । किं तदन्नमशितमित्यादावुक्तं तत्राऽऽह—**अन्नादीनामिति** । सप्तधातुकं त्वगसृङ्मांसमेदोमज्जास्थिशुक्राख्याः सप्त धातवस्तेषां संहतिरूपमित्यर्थः ।

सोऽयं प्राणकरणसंघातो देहे विशीर्णे देहान्तरं जीवाधिष्ठितो येन क्रमेण पूर्वदेहात्प्रच्युतो गच्छति तदाहास्य हे सौम्य पुरुषस्य प्रयतो म्रियमाणस्य वाङ् मनसि संपद्यते मनस्युपसंहियते । अथ तदाऽऽहुर्ज्ञातयो न वदतीति । मनःपूर्वको हि वाग्व्यापारः । "यद्वै मनसा ध्यायति तद्वाचा वदति" इति श्रुतेः । वाच्युपसंहृतायां मनसि मनो मननव्यापारेण केवलमे[2] वर्तते । मनोऽपि यदोपसंहियते तदा मनः प्राणे संपन्नं भवति सुषुप्तकाल इव तदा पार्श्वस्था ज्ञातयो न विजानातीत्याहुः । प्राणश्च तदोर्ध्वोच्छ्वासी स्वात्मन्युपसंहृतबाह्यकरणः संवर्गविद्यायां दर्शनाद्धस्तपादादीन्विक्षिपन्मर्मस्थानानि निकृन्त[3]न्निर्वोत्सर्जनक्रमेणोपसंहृतस्तेजसि संपद्यते । तदाऽऽहुर्ज्ञातयो न चलतीति मृतो नेति वा विचिकित्सन्तो देहमालभमाना उष्णं चोपलभमाना देह उष्णो जीवतीति यदा तदप्यौष्ण्यलिङ्गं तेज उपसंहियते । तदा तत्तेजः परस्यां देवतायां प्रशाम्यति ।

तेजोबन्नकार्यभूतदेहशुङ्मुखद्वारा सतत्त्वं निरूपितमिदानीं मरणद्वारेणापि तन्निरूपयितुमारभते—**सोऽयमिति** । तदाहात्यत्र क्रमवद्गमनं तादित्युक्तम् । वाग्व्यापारस्य मनसि लये हेतुमाह—**मनःपूर्वको हीति** । प्राणसंपत्तिर्मनसस्तदधीनत्वम् । मनोव्यापारनिवृत्त्यवस्था तदेत्युच्यते । प्राणश्च तदेत्यविज्ञानावस्था कथ्यते । कथं प्राण-

---

१ ख. ङ. ञ. सौम्य । २ ख. घ. ञ. ण. °न प्रवे° । ३ ग. घ. ठ. ढ. °न्तन इवो° । ४ क. °वोत्सृजन्क्रमे° । ख. ग. घ. ट. ङ. ढ. ण. °त्सर्जन्क्रमे° ।

स्य स्वात्मन्युपसंहृतबाह्यकरणत्वं तदाह—संवर्गविद्यायामिति । तत्र हि प्राणः संवृङ्क्ते वागादीनीति दृष्टमतो युक्तं तस्य स्वात्मन्युपसंहृतकरणत्वमित्यर्थः । तेजसीति भौतिकमाध्यात्मिकं तेजो गृह्यते । जीवतीत्याहुरिति संबन्धः ।

तदेवं क्रमेणोपसंहृते स्वमूलं प्राप्ते च मनसि तत्स्थो जीवोऽपि सुषुप्तकालवन्निमित्तोपसंहारादुपसंहियमाणः सन्सत्याभिसंधिपूर्वकं चेदुपसंहियते सदेव संपद्यते न पुनर्देहान्तराय सुषुप्तादिवोत्तिष्ठति। यथा लोके सभये देशे वर्तमानः कथंचिदेवाभयं देशं प्राप्तस्तद्वत् । इतरस्त्वनात्मज्ञस्तस्मादेव मूलात्सुषुप्तादिवोत्थाय मृत्वा पुनर्देहजालमाविशति यस्मान्मूलादुत्थाय देहमाविशति जीवः ॥ ६ ॥

सकरणस्य सप्राणस्य च भूतसर्गस्य परस्यां देवतायामुक्तक्रमेणोपसंहारेऽपि जीवस्य किमायातमित्याशङ्क्याऽऽह—तदेवमिति । तस्यां परस्यां देवतायामुक्तेन क्रमेण तेजस्युपसंहृते सतीति यावत् । स्वमूलं मनसो मूलं भूतपञ्चकम् । निमित्तोपसंहारादित्यत्र निमित्तं मनो विवक्षितम् । तत्संपन्नस्य सत्याभिसंधेर्न पुनरुत्थानमित्येतद्दृष्टान्तेन स्पष्टयति—यथेति । अभयं देशं प्राप्तो न पुनः सभयं देशं गन्तुमिच्छतीति शेषः । यस्त्वनृताभिसंधो यथोक्तया रीत्या न तत्संपन्नस्तं प्रत्याह—इतरस्त्विति । ॥ ६ ॥

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स
आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा
भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ७ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्याष्टमः खण्डः ॥ ८ ॥

===

स यः सदाख्य एष उक्तोऽणिमाऽणुभावो जगतो मूलमैतदात्म्यमेतत्सदात्मा यस्य सर्वस्य तदेतदात्म तस्य भाव ऐतदात्म्यम् । एतेन सदाख्येनाऽऽत्मनाऽऽत्मवत्सर्वमिदं जगत् । नान्योऽस्त्यस्याऽऽत्मा संसारी । "नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ" इत्यादिश्रुत्यन्तरात् । येन चाऽऽत्मनाऽऽत्मवत्सर्वमिदं जगत्तदेव सदाख्यं कारणं सत्यं परमार्थसत् । अतः स एवाऽऽत्मा जगतः प्रत्यक्स्वरूपं सतत्त्वं याथात्म्यम् । आत्मशब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादिशब्दवन्निरूढत्वात् । अतस्तत्सत्त्वमसीति हे श्वेतकेतो इत्येवं

---

१ ख. ङ च. ण. °ते तदा स° । २ क. °चिदेवा° । ३ छ. नीत्या । ४ ख. ङ. ञ. सोम्येति । ५ क. ख. ग. घ. च. ञ. ट. ठ. ड. ण. °त्सर्वं तदे° ६ च. ठ. °मसि भवसि हे ।

प्रत्याय्यितः पुत्र आह भूय एव मा भगवान्विज्ञापयतु यद्भवदुक्तं तत्संदिग्धं ममाहन्यहनि सर्वाः प्रजाः सुषुप्ते सत्संपद्यन्त इत्येतद्येन तत्संपद्य न विदुः सत्संपन्ना वयमिति । अतो दृष्टान्तेन मां प्रत्याययास्वित्यर्थः । एवमुक्तस्तथाऽस्तु सौम्येति होवाच पिता ॥ ७ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्याष्टमः खण्डः ॥ ८ ॥

अस्येति षष्ठ्या सर्वं जगदुक्तम् । असंसारी संसारी वेति च्छेदः । मूलादेर्विशेषं दर्शयति—परमार्थेति । कल्पितस्य जगतः स्वरूपं प्रत्यग्भूतमतात्त्विकमिति शङ्कां वारयति—सदात्त्वमिति । तत्त्वेन सहितमपि सतत्त्वमित्याशङ्क्याऽऽह—याथात्म्यमिति । कथमेवमर्थत्वमात्मशब्दस्य लभ्यते तत्राऽऽह—आत्मशब्दस्येति । सतो मदात्मत्वं मम तु किं स्यादित्याशङ्क्याऽऽह—अत इति । संदेहास्पदमेव विशिनष्टि—अहन्यहनीति । संदेहे हेतुमाह—येनेति । तेन संदिग्धमेतदिति पूर्वेण सम्बन्धः । संदेहव्यावृत्तिस्तर्हि कथमित्यत आह—अत इति । पुत्रस्य प्राप्तसंदेहापोहार्थमुत्तरग्रन्थमुत्थापयति—एवमिति ॥ ७ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
षष्ठाध्यायस्याष्टमः खण्डः ॥ ८ ॥

(अथ षष्ठाध्यायस्य नवमः खण्डः)।

यथा सौम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाꣳ रसान्त्समवहारमेकताꣳ रसं गमयन्ति ॥ १ ॥

यत्पृच्छस्यहन्यहनि सत्संपद्य न विदुः सत्संपन्नाः स्म इति तत्कस्मादित्यत्र शृणु दृष्टान्तम् । यथा लोके हे सौम्य मधुकृतो मधु कुर्वन्तीति मधुकृतो मधुकरमक्षिका मधु निस्तिष्ठन्ति मधु निष्पादयन्ति तत्पराः सन्तः । कथम् । नानात्ययानां नानागतीनां नानादिक्कानां वृक्षाणां रसान्समवहारं समाहृत्यैकतामेकभावं मधुत्वेन रसान्गमयन्ति मधुत्वमापादयन्ति ॥ १ ॥

यथेत्यादिदृष्टान्तमवतारयति—यत्पृच्छसीति । प्रत्यहं सुषुप्ते सर्वाः प्रजाः सत्संपद्य सत्संपन्नाः स्मो वयमिति यन्न विदुस्तदज्ञानं कस्मात्कारणादिति यन्मां पृच्छसि तत्र सुषुप्तादावज्ञाने कारणभूतं दृष्टान्तमुच्यमानं शृणु त्वमिति योजना । यथा स दृष्टान्तः स्पष्टो भवति तथोच्यत इत्याह—यथेति । पुनर्मधुपदं क्रियापदेन संबन्धप्र-

---

१ क. ङ. ढ. सुषुप्तौ । २ ख. ङ. ञ. सौम्येति । ३ ख. ञ. सोम्य । ४ ख. ङ. ञ. सोम्य । ५ ख. ग. च. ठ. ड. ण. 'हृत्य समाहृत्ये' । ६ ख. घ. ङ. ञ. ण. °ष्टान्तं शृ° ।

दर्शनार्थम् । मधुकृतां मधुनिष्पादकत्वमाकाङ्क्षापूर्वकं दर्शयति—कथमित्यादिना । नानागतीनां नानाफलानामित्येतत् । बहूनां रसानां कथमेकतेत्याशङ्क्याऽऽह—मधुत्वेनेति । तदेव स्पष्टयति—मधुत्वमिति ॥ १ ॥

ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति ॥ २ ॥

ते रसा यथा मधुत्वेनैकतां गतास्तत्र मधुनि विवेकं न लभन्ते । कथम् । अमुष्याहमाम्रस्य पनसस्य वा वृक्षस्य रसोऽस्मीति । यथा हि लोके बहूनां चेतनावतां समेतानां प्राणिनां विवेकेलाभो भवत्यमुष्याहं पुत्रोऽमुष्याहं नप्ताऽस्मीति । ते च लब्धविवेकाः सन्तो न संकीर्यन्ते न तथेहानेकप्रकारवृक्षरसानामपि मधुराम्लतिक्तकटुकादीनां मधुत्वेनैकतां गतानां मधुरादिभावेन विवेको गृह्यत इत्यभिप्रायः । यथाऽयं दृष्टान्त इत्येवमेव खलु सोम्येमाः सर्वाः प्रजा अहन्यहनि सति संपद्य सुषुप्तकाले मरणप्रलययोश्च न विदुर्न विजानीयुः सति संपद्यामह इति संपन्ना इति वा ॥ २ ॥

ते यथेत्यादि व्याचष्टे—ते रसा इति । उक्तमर्थं वैधर्म्यदृष्टान्तेन स्पष्टयति—यथा हीत्यादिना । इहेति प्रकृतदृष्टान्तोक्तिः । दृष्टान्तमनूद्य दार्ष्टान्तिकमाह—यथेति ॥ २ ॥

त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति ॥ ३ ॥

यस्माच्चैवमात्मनः सद्रूपतामज्ञात्वैव सत्संपद्यन्ते । अतस्त इह लोके यत्कर्मनिमित्तां यां यां जातिं प्रतिपन्ना आसुर्व्याघ्रादीनां व्याघ्रोऽहं सिंहोऽहमित्येवं ते तत्कर्मज्ञानवासनाङ्किताः सन्तः संप्रविष्टा अपि तद्भावेनैव पुन-

---

१ ख. ञ. सोम्येमाः । २ ङ. ढ. °स्य जम्ब्वा देर्वा वृ° । ३ ठ. °ति चामुष्याहमर्जुनस्य नवस्य वा वृक्षस्य रसोऽस्मीति । य° । क. ग. ङ. ढ. °ति च । य° । ४ च. ठ. °तनव° । ५ ग. घ. च. ट. ड. ढ. °कषोधो भ° । ६ क. ग. ठ. °त्रो न° । ७ ख. ङ. ञ. सोम्येमाः । ८ ङ. च. °प्तिका° । ९ ख. ग. घ. ङ. ण. सत्प्रतिष्ठा ।

राभवन्ति पुनः सत आगत्य व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यत्पूर्वमिह लोके भवन्ति बभूवु-रित्यर्थः। तदेव पुनरागत्य भवन्ति युगसहस्रकोटयन्तरिताऽपि संसारिणो जन्तोर्या पुरा भाविता वासना सा न नश्यतीत्यर्थः। "यथाभङ्गं हि संभवाः" इति श्रुत्यन्तरात् ॥ ३ ॥

रसानामचेतनत्वेन विवेकानर्हत्वात्कथं चेतनावतामेवं दृष्टान्तः स्यादित्याशङ्क्याऽऽह—यस्माच्चेति। एवं यथोक्तरसदृष्टान्तवशेनेति यावत्। चेतनानामपि सुषुप्त्यादौ जाड्यात्कन्दिततया रसतुल्यत्वात्तेषां विवेकानर्हावस्थापत्तिमात्रे प्रकृतमुदाहरणमविरु-द्धमिति भावः। सता संपन्नानामपि तत्स्यादित्याशङ्क्याऽऽह—संसारिण इति ॥३॥

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स
आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भग-
वान्विज्ञापयत्विति तथा सौम्येति होवाच ॥ ४ ॥
इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य नवमः खण्डः ॥ ९ ॥

ताः प्रजा यस्मिन्प्रविश्य पुनराविर्भवन्ति। ये त्वितोऽन्ये सन्सत्यात्मा-भिसंधा यमणुभावं सदात्मानं प्रविश्य नाऽऽवर्तन्ते स य एषोऽणिमेत्यादि व्याख्यातम्। यथा लोके स्वकीये गृहे सुप्त उत्थाय ग्रामान्तरं गतो जानाति स्वगृहादागतोऽस्मीत्येवं सत आगतोऽस्मीति च जन्तूनां कस्माद्विज्ञानं न भवतीति भूय एव मा भगवान्विज्ञापयत्वित्युक्तस्तथा सौम्येति होवाच पिता ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य नवमः खण्डः ॥ ९ ॥

स य एषोऽणिमेत्याद्यवतारयति—ताः प्रजा इति। इतः सद्विज्ञानरहितेभ्यः सकाशादिति यावत्। यमणुभावमिति। तच्छब्दोऽध्याहर्तव्यः। प्रश्नान्तरं दृष्टान्तब-लादुत्थापयति—यथेति। सतोऽहमागतोऽस्मीत्युत्थितस्य ज्ञानाभावं दृष्टान्तेनोपपा-दयितुमुत्तरग्रन्थमुत्थापयति—इत्युक्त इति ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
षष्ठाध्यायस्य नवमः खण्डः ॥ ९ ॥

---

१ ङ. ङ. °र्थः। ताः। २ ख. घ. ञ. °भव इ°। ३ ख. छ. ञ. ण. °तनव°। ४ ख. ङ. ञ. सोम्येति। ५ ख. ञ. सोम्येति।

(अथ षष्ठाध्यायस्य दशमः खण्डः) ।

इमाः सौम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति ॥ १ ॥

शृणु तत्र दृष्टान्तं यथा सौम्येमा नद्यो गङ्गाद्याः पुरस्तात्पूर्वां दिशं प्रति प्राच्यः प्रागञ्चनाः स्यन्दन्ते स्रवन्ति । पश्चात्प्रतीचीं दिशं प्रति सिन्ध्वाद्याः प्रतीचीयञ्चन्ति गच्छन्तीति प्रतीच्यस्ताः समुद्रादम्भोनिधेर्जलघरैराक्षिप्ताः पुनर्वृष्टिरूपेण पतिता गङ्गादिनदीरूपिण्यः पुनः समुद्रमम्भोनिधिमेवापियन्ति स समुद्र एव भवति ता नद्यो यथा तत्र समुद्रे समुद्रात्मनैकतां गता न विदुर्मे जानन्तीयं गङ्गाऽहमस्मीयं यमुनाऽहमस्मीतीयं मद्रहमस्मीति च ॥ १ ॥

आगमनावश्यपरिज्ञानं तत्रेत्युक्तम् ॥ १ ॥

एवमेव खलु सौम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति॥२॥ स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सौम्येति होवाच ॥ ३ ॥

इति छान्दोग्योपनिषदि षष्ठाध्यायस्य दशमः खण्डः ॥ १० ॥

---

१ ख. ङ. ञ. सौम्य । २ क. ख. ग. ट. °वन्ति ता । ३ ख. ङ. च. सौम्येमा । ४ घ. ट. ठ. °न्ति समु° । ५ क. °मुद्रा ए° । ६ क. ख. ग. ट. ण. भवन्ति । ७ ख. ञ. ण. °स्मीति । ८ ख. ग. सौम्येमा° । ९ ख. ञ. सौम्येति ।

एवमेव खलु सौम्येमाः सर्वाः प्रजा यस्मात्सति संपद्य न विदुस्तस्मात्सत आगम्य न विदुः सत आगच्छामह आगता इति वा। त इह व्याघ्र इत्यादि समानमन्यत्। दृष्टं लोके जले वीचीतरङ्गफेनबुद्बुदादय उत्थिताः पुनस्तत्रैवं गता विनष्टा इति। जीवास्तु तत्कारणभावं प्रत्यहं गच्छन्तोऽपि सुषुप्ते मरणप्रलययोश्च न विनश्यन्तीत्येतत्। भूय एव मा भगवान्विज्ञापयतु दृष्टान्तेन। सौम्येति होवाच पिता ॥ २ ॥ ३ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य दशमः खण्डः ॥ १० ॥

प्रश्नान्तरं व्याचष्टे—दृष्टमिति। विनष्टा इति लोके दृष्टमिति संबन्धः। जीवास्तु प्रत्यहं सुषुप्त्यवस्थायां मरणप्रलययोश्च कारणभावं गच्छन्तोऽपि न विनश्यन्तीति यदेतत्तदिति योजना। जीवविनाशं शङ्कमानस्य प्रतिबोधनार्थमुत्तरं वाक्यमुत्थापयति—तथेति ॥ २ ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य दशमः खण्डः ॥ १० ॥

(अथ षष्ठाध्यायस्यैकादशः खण्डः)।

अस्य सौम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनाऽऽत्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥ १ ॥

शृणु दृष्टान्तमस्य हे सौम्य महतोऽनेकशाखादियुक्तस्य वृक्षस्यास्येत्यग्रतः स्थितं वृक्षं दर्शयन्नाह। यदि यः कश्चिदस्य मूलेऽभ्याहन्यात्परश्वादिना सकृदाघातमात्रेण न शुष्यतीति जीवन्नेव भवति तदा तस्य रसः स्रवेत्। तथा यो मध्येऽभ्याहन्याज्जीवन्स्रवेत्तथा योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष वृक्ष इदानीं जीवेनाऽऽत्मनाऽनुप्रभूतोऽनुव्याप्तः पेपीयमानोऽत्यर्थं पिबन्नुदकं भौमांश्च रसान्मूलैर्गृह्णन्मोदमानो हर्षं प्राप्तुवंस्तिष्ठति ॥ १ ॥

जीवस्य नाशाभावं वक्तुमादौ दृष्टान्तमाह—शृणुवेति ॥ १ ॥

---

१ ख. ङ. ञ. सौम्येमाः। २ ख. छ. ञ. सौम्येति। ३ ख. ञ. सौम्य। ४ ख. ञ. सौम्य। ५ घ. झ. च. ठ. °ष्यति। ६ ग. घ. च. ठ. ड. ढ. °लैर्मोद°।

अस्य यदेकाꣳ शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ सा शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्वं जहाति सर्वः शुष्यति ॥ २ ॥

तस्यास्य यदेकां शाखां रोगग्रस्तामाहतां वा जीवो जहात्युपसंहरति शाखाया विप्रसृतमात्मांशम् । अथ सा शुष्यति । वाङ्मनःप्राणकरणग्रामानुप्रविष्टो हि जीव इति तदुपसंहार उपसंहियते । जीवेन च प्राणयुक्तेनाशितं पीतं च रसतां गतं जीवच्छरीरं वृक्षं वर्धयद्रसरूपेण जीवस्य सद्भावे लिङ्गं भवति । आशितपीताभ्यां हि देहे जीवस्तिष्ठति ते चाशितपीते जीवकर्मानुसारिणी इति । तस्यैकाङ्गवैकल्यनिमित्तं कर्म यदोपस्थितं भवति तदा जीव एकां शाखां जहाति शाखाया आत्मानमुपसंहरति । अथ तदा सा शाखा शुष्यति । जीवस्थितिनिमित्तो रसो जीवकर्माक्षिप्तो जीवोपसंहारे न तिष्ठति । रसापगमे च शाखा शोषमुपैति । तथा सर्वं वृक्षमेव यदाऽयं जहाति तदा सर्वोऽपि वृक्षः शुष्यति । वृक्षस्य रससवणशोषणादिलिङ्गाज्जीववत्त्वं दृष्टान्तश्रुतेश्च चेतनावन्तः स्थावरा इति बौद्धकाणादमतमचेतनाः स्थावरा इत्येतदसारमिति दर्शितं भवति ॥ २ ॥

ननु रोगग्रस्तायां वातोपहतायां वा शाखायां प्राणोपसंहारेऽपि कुतो जीवोपसंहारः संभवति तत्राऽऽह—वागिति । ननु वृक्षे जीवस्य सद्भावे तत्रोपसंहारानुपसंहारौ वक्तव्यौ तत्र तस्य सत्त्वं तु कुतस्त्यमत आह—जीवेन चेति । रसरूपेण वर्धयदिति संबन्धः । वृक्षशरीरे जीवस्य सत्त्वेऽपि किमित्यसौ कदाचित्तदीयामेकां शाखां जहातीत्याशङ्क्याऽऽह— आशितेति । जीवोपसंहारेऽपि किमिति शाखा शुष्यति तत्राऽऽह—जीवस्थितीति । जीवस्य स्थितिर्निमित्तं यस्येति विग्रहः । तथा शाखायामुक्तप्रकारेणेति यावत् । यत्तु वैशेषिकबौद्धाभ्यां स्थावराणां निर्जीवत्वेनाचेतनत्वमुक्तं तदेतन्निरस्तमित्याह— वृक्षस्येति । आदिशब्दो वृद्धिमोदादिसंग्रहार्थः । स एष वृक्षो जीवेनाऽऽत्मनानुप्रभूत इति दृष्टान्तश्रुतिः ॥ २ ॥

एवमेव खलु सौम्य विद्धीति होवाच जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स

---

१ घ. च. ठ. ड. ढ. खां रुग्ग्रस्ता° । २ क. ड. ढ. °ववच्छ° । ३ क. ग. ठ, °क्षं च व° । ठ, °णादादिम° । ५ क. ग. ट. °हारे कि° । ६ ख, ञ. सौम्य ।

य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा
तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञा-
पयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्यैकादशः खण्डः ॥ ११ ॥

यथाऽस्मिन्वृक्षदृष्टान्ते दर्शितं जीवेन युक्तो वृक्षोऽशुष्को रसपानादियुक्तो जीवतीत्युच्यते तदपेतश्च म्रियत इत्युच्यते । एवमेव खलु सौम्य विद्धीति होवाच—जीवापेतं जीवविमुक्तं वाव किलेदं शरीरं म्रियते न जीवो म्रियत इति । कार्यशेषे च सुप्तोत्थितस्य ममेदं कार्यशेषमपरिसमाप्तमिति स्मृत्वा समापनदर्शनात् । जातमात्राणां च जन्तूनां स्तन्याभिलाषभयादिदर्शनाच्चातीतजन्मान्तरानुभूतस्तन(न्य)पानदुःखानुभवस्मृतिर्गम्यते । अग्निहोत्रादीनां च वैदिकानां कर्मणामर्थवत्त्वान्न जीवो म्रियत इति स य एषोऽणिमेत्यादि समानम् । कथं पुनरिदमत्यन्तस्थूलं पृथिव्यादि नामरूपवज्जगदत्यन्तसूक्ष्मात्सद्रूपान्नामरूपरहितात्सतो जायत इत्येतद्दृष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति । तथा सौम्येति होवाच पिता ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्यैकादशः खण्डः ॥ ११ ॥

श्रुतिदृष्टान्ते विवक्षितमंशमनूद्य दार्ष्टान्तिकमाह—यथेत्यादिना । जीवस्य सुषुप्ते नाशाभावे हेत्वन्तरमाह—कार्यशेषे चेति । तस्मिन्सति सुषुप्ते भूत्वा पुनरुत्थितस्य कार्यस्य शेषोऽस्ति यस्मिन्कर्मणि तदिदं ममासमाप्तमिति स्मृत्वा तस्य समापनदर्शनाच्च स्वापे जीवो नश्यतीत्यर्थः । मरणकाले तन्नाशाभावे हेत्वन्तरमाह—जातमात्राणामिति । आद्यश्चकारः समुच्चये द्वितीयोऽवधारणे । जीवस्य प्रलयादावविनाशे कारणान्तरमाह—अग्निहोत्रादीनामिति । इतिशब्दो जीवस्य नित्यत्वोपसंहारार्थः । यदुक्तं सन्मूलाः सोम्येत्यादि तत्र चोदयति—कथं पुनरिति । विलक्षणयोर्न कार्यकारणत्वमिति शङ्कमानं प्रति बोधयितुमुत्तरं वाक्यमुपादत्ते—तथेति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
षष्ठाध्यायस्यैकादशः खण्डः ॥ ११ ॥

---

१ ख. ग. सौम्येति । २ ख. ङ. सौम्य । ३ ख. ग. ङ. सौम्येति । ४ ग. 'त्राः सौम्ये' । ५ क. ग. ट. 'तस्वा' ।

(अथ षष्ठाध्यायस्य द्वादशः खण्डः) ।

न्यग्रोधफलमत आहरेतीदं भगव इति भिन्द्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्क्तिकां भिन्द्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति ॥ १ ॥

यद्येतत्प्रत्यक्षीकर्तुमिच्छस्यतोऽस्मान्महतो न्यग्रोधात्फलमेकमाहरेत्युक्तस्तथा चकार स इदं भगव उपहृतं फलमिति दर्शितवन्तं प्रत्याह-फलं भिन्द्धीति । भिन्नमित्याहेतरः । तमाह पिता किमत्र पश्यसीत्युक्त आहाण्व्योऽणुतरा इवेमा धाना बीजानि पश्यामि भगव इति । आसां धानानामेकां धानामङ्क्ते हे वत्स भिन्द्धीत्युक्त आह-भिन्ना भगव इति । यदि भिन्ना धाना तस्यां भिन्नायां किं पश्यसीत्युक्त आह-न किंचन पश्यामि भगव इति ॥ १ ॥

स्थूलस्य कार्यस्य सूक्ष्ममुरुयकारणत्वमेतदित्युच्यते । अस्य सौम्य महतो वृक्षस्येति प्रकृतं वृक्षं परामृशति—अत इति ॥ १ ॥

तꣳ होवाच यं वै सोम्यैतमणिमान न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति श्रद्धत्स्व सौम्येति ॥ २ ॥

तं पुत्रं होवाच वटधानायां भिन्नायां यं वटबीजाणिमानं हे सोम्यैतं न निभालयसे न पश्यसि । तथाऽप्येतस्य वै किलं सोम्यैष महान्न्यग्रोधो बीजस्याणिम्नः सूक्ष्मस्यादृश्यमानस्य कार्यभूतः स्थूलशाखास्कन्धफलपल्लवान्वांस्तिष्ठत्युत्पन्नः सन्तिष्ठतीति वोच्छद्योऽद्याहार्योऽतः श्रद्धत्स्व सोम्य सत एवाणिम्नः स्थूलं नामरूपादिमत्कार्यं जगदुत्पन्नमिति । यद्यपि न्यायागमाभ्यां

---

१ क. उपाहृतं । २ क. ग. ट. सूक्ष्मं मु° । ३ ञ. सौम्य । ४ ख. घ. ङ. ञ. वै सौम्यै° । ५ ख. व. ञ. वै सौम्ये° । ६ ख. झ. ठ °हान्न्यग्रो° । ७ ख. ञ. सौम्येति । ८ ख. ङ. ञ. हे सौम्ये° । ९ ख. ङ. य. °ल सौम्ये° । १० ङ. ठ. ण. °हान्न्यग्रो° । ११ ख. ग. घ. च. ञ. ठ. ढ. स्थूलः शा° । १२ ट. °स्कन्धाङ्कुरकुसुमफ° । १३ ख. ङ. ढ. ण. °ति चोच्छ° । १४ ख. ङ. ञ. सौम्य ।

निर्धारितोऽर्थस्तथैवेत्यवगम्यते तथाऽत्यत्यन्तसूक्ष्मेष्वर्थेषु बाह्यविषयासक्त-मनसः स्वभावप्रवृत्तस्यासत्यां गुरुतरायां श्रद्धायां दुरवगमत्वं स्यादित्याह श्रद्धत्स्वेति । श्रद्धायां तु सत्यां मनसः समाधानं बुभुत्सितेऽर्थे भवेत्ततश्च तदर्थावगतिः । " अन्यत्रमना अभूवम् " इत्यादिश्रुतेः ॥ २ ॥

यमेतमणिमानं न पश्यस्येतस्याणिम्नो बीजस्येति संबन्धः । तथाऽपीत्यत्यन्ताणुत्वादर्शनेऽपीत्यर्थः । अत्यन्तसूक्ष्माद्बीजादत्यन्तस्थूलस्य वृक्षस्योत्पत्त्युपलम्भोऽतः-शब्दार्थः । सन्मूलाः सोम्येत्यादिश्रुत्या दृश्यते त्विति न्यायेन च जगतः सत्कार्यत्वे सिद्धे श्रद्धामन्तरेणापि तन्निर्णयसंभवात्किमिति श्वेतकेतुः श्रद्धत्स्वेति पित्रा नियुज्यते तत्राऽऽह —यद्यपीति । सत्यामपि श्रद्धायां कथं बाह्यविषयासक्तमनसोऽत्यन्तसूक्ष्मेष्वर्थेष्ववगमः स्यादित्याशङ्क्याऽऽह—श्रद्धायां त्विति । मनःसमाधानवशाद्बुभुत्सितस्यार्थस्यावगतिरित्यत्र बृहदारण्यकश्रुतिं संवादयति—अन्यत्रेति ॥ २ ॥

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स
आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भग-
वान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥
इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

===

स य इत्याद्युक्तार्थम् । यदि तत्सज्जगतो मूलं कस्मान्नोपलभ्यत इत्येतद्दृष्टान्तेन मा भगवान्भूय एव विज्ञापयत्विति । तथा सोम्येति होवाच पिता ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

—:⊙:—

प्रत्यक्षतोऽनुपलभ्यमानत्वान्नास्तीति मन्वानः शङ्कते—यदीति । अनुपलभ्यमानस्यापि सत्त्वमाशङ्क्याऽऽह—इत्येतदिति । अप्रत्यक्षस्यापि जगन्मूलस्यास्तित्वं प्रतिपादयितुमुत्तरग्रन्थमवतारयति—तथेति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
षष्ठाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

—:⊙-⊙-⊙-⊙:—

(अथ षष्ठाध्यायस्य त्रयोदशः खण्डः ।

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति

१ ग. °ल्लाः सौम्ये° । २ ख. ङ. ञ. सौम्येति । ३ ख. ङ. ञ. सौम्येति ।

स तथा चकार तꣳ होवाच यद्दोषा लवणमुदकेऽ-
वाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद ॥ १ ॥

विद्यमानमपि वस्तु नोपलभ्यते प्रकारान्तरेण तूपलभ्यत इति शृण्वन्न दृष्टान्तम् । यदि चेममर्थं प्रत्यक्षीकर्तुमिच्छसि पिण्डरूपं लवणमेतद्घटादावुदकेऽवधाय प्रक्षिप्याथ मा मां श्वः प्रातरुपसीदथा उपगच्छेथा इति । स ह पित्रोक्तमर्थं प्रत्यक्षीकर्तुमिच्छंस्तथा चकार । तं होवाच परेद्युः प्रातर्यल्लवणं दोषा रात्रावुदकेऽवाधा निक्षिप्तवानस्यङ्ग हे वत्स तदाहरेत्युक्तस्तल्लवणमाजिहीर्षुर्हि किलावमृश्योदके न विवेद न विज्ञातवान्यथा तल्लवणं विद्यमानमेव सदप्सु लीनं संश्लिष्टमभूत् ॥ १ ॥

नोपलभ्यते स्वेन प्रकारेणेति शेषः । इतीममर्थं प्रत्यक्षीकर्तुं यदीच्छसि तर्हि दृष्टान्तमत्र शृणुहीति योजना । रात्रेरत्ययानन्तर्यमर्थशब्दार्थः । जगन्मूलं स्वतोऽप्रत्यक्षमपि प्रत्यक्षमुपायान्तरेणेति पित्रोक्तोऽर्थस्तं प्रत्यक्षीचिकीर्षुर्घटादावुदके पिण्डरूपं लवणं रात्रौ प्रक्षिप्य तदत्ययानन्तरं प्रातःकाले पितृसमीपं श्वेतकेतुर्गतवानित्याह—स होवेति । यथा तत्पिण्डरूपं लवणं प्रक्षेपात्प्रागभूत्तथा न विज्ञातवानिति संबन्धः । उदके प्रक्षिप्तं लवणं विमृश्यापि न विज्ञायते चेद्दृष्टमेव तर्हि तदित्याशङ्क्याऽऽह—विद्यमानमेवेति । किमिति तर्हि चक्षुषा स्पर्शेन वा नोपलभ्यते तत्राऽऽह—अप्स्विति ॥ १ ॥

यथा विलीनमेवाङ्गास्यान्तादाचामेति कथमिति
लवणमिति मध्यादाचामेति कथमिति लवणमित्य-
न्तादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ
मोपसीदथा इति तद्ध तथा चकार तच्छशत्संवर्तते
तꣳ होवाचात्र वाव किल सत्सोम्य न निभालय-
सेऽत्रैव किलेति ॥ २ ॥

यथा विलीनं लवणं न वेत्थ तथाऽपि तच्चक्षुषा स्पर्शनेन च पिण्डरूपं लवणमगृह्यमाणं विद्यत एवाप्सूपलभ्यते चोपायान्तरेणेत्येतत्पुत्रं प्रत्याय-

---

१ ठ. °वाचाप° । २ ङ. घ. च. ञ. ड. ढ. ण. °ङ्ग त° । ३ क. ख. ग. ङ. ञ. ट. ढ. ण. °नमपि स° । ४ क. ग. ट. न ज्ञा° । ५ ख. ञ. ण. °नमिति । ६ क. ज. प्राश्येनद° । ख. °प्राश्येत° । ग. ङ. झ. ट. ठ. त. थ. °प्राप्स्येनद° । ७ ख. ञ. सत्सौम्य ।

यितुमिच्छन्नाहाङ्गास्योदकस्यान्तादुपरि गृहीत्वाऽऽचामेत्युक्त्वा पुत्रं तथाकृतवन्तमुवाच कथमितीतर आह लवणं स्वादुत इति । तथा मध्यादुदकस्य गृहीत्वाऽऽचामेति कथमिति लवणमिति । तथाऽन्तादधोदेशाद्गृहीत्वाऽऽचामेति कथमिति लवणमिति । यद्येवमभिप्रायस्य परित्यज्यैतदुदकमाचम्याथ मोपसीदथा इति तद्ध तथा चकार लवणं परित्यज्य पितुसमीपमाजगामेत्यर्थः इदं वचनं ब्रुवंस्तल्लक्षणं तस्मिन्नेवोदके यन्मया रात्रौ क्षिप्तं शश्वन्नित्यं संवर्तते विद्यमानमेव सत्सम्यग्वर्तते । इत्येवमुक्तवन्तं तं होवाच पिता । यथेदं लवणं दर्शनस्पर्शनाभ्यां पूर्वं गृहीतं पुनरुदके विलीनं ताभ्यामगृह्यमाणमपि विद्यत एवोपायान्तरेण जिह्वयोपलभ्यमानत्वात् । एवमेवात्रैवास्मिन्नेव तेजोबन्नादिकार्ये शुङ्गे देहे । वाव किलेत्याचार्योपदेशस्मरणप्रदर्शनार्थौ । सत्येजोबन्नादिशुङ्गकारणं वटबीजादिवद्विद्यमानमेवेन्द्रियैर्नोपलभसे न निभालयसे । यथाऽत्रैवोदके दर्शनस्पर्शनाभ्यामनुपलभ्यमानं लवणं विद्यमानमेव जिह्वयोपलब्धवानसि, एवमेवात्रैव किल विद्यमानं सज्जगन्मूलमुपायान्तरेण लवणादिवदुपलप्स्यस इति वाक्यशेषः ॥ २ ॥

कथं तर्हि तस्य विद्यमानत्वमवगतं तत्राऽऽह—यथेति । यद्यपि पिण्डरूपं लवणमुदके क्षिप्तमदृश्यापि चक्षुस्पर्शनाभ्यां न त्वं वेत्थ तथाऽपि तत्तत्र विद्यत एव यतस्ताभ्यामगृह्यमाणमपि तत्रोपायान्तरेणोपलभ्यत इत्येतमर्थं पुत्रं प्रत्याययितुमुत्तरं वाक्यमित्यर्थः । यथाशब्दो यद्यपीत्यर्थे । तद्धेत्यादि व्याचष्टे-लवणमिति । संवर्तत इतीदं वचनं ब्रुवन्नाजगामेति संबन्धः । दृष्टान्तमनूद्य दार्ष्टान्तिकमाह—इत्येवमुक्तवन्तमित्यादिना । सतो जगन्मूलस्यास्मिन्देहे सत्त्वं त्वया कथमवगतमत आह—वावेति । अत्र वावेत्यादिनाऽत्रैव किलेत्यस्य पौनरुक्त्यमाशङ्क्याचार्यविशेषं दर्शयति—यथाऽत्रेत्यादिना ॥ २ ॥

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

---

१ ख. ङ. अ. ण. °प्राश्य प° । २ ख. अ. ण. °व तस्स° । ३ ग. घ. ङ. च. ठ. ठ. ड. °कार्यशु° । ४ ख. छ. य. ण. °यदपि° । ५ ख. ग. °सौम्येति ।

स य इत्यादि समानम् । यद्येवं लक्षणान्नेमवदिन्द्रियैरनुपलभ्यमानमपि जगन्मूलं सदुपायान्तरेणोपलब्धुं शक्यते यदुपलम्भात्कृतार्थः स्यामनुपलम्भाच्चातार्थः स्यामहं तस्यैवोपलब्धौ क उपाय इत्येतद्ध्रुव एव मा भगवान्विज्ञापयतु दृष्टान्तेन तथा सोम्येति होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य त्रयोदशः खण्डः ॥१३॥

उपायान्तरजिज्ञासया पृच्छति—यद्येवमिति । तर्हि तदेत्यध्याहृतस्य तस्येत्यादिना संबन्धः । सतो मूलस्योपलम्भेऽनुपलम्भे वा किं स्यादित्याशङ्क्याऽऽह—यदुपलम्भादिति । बुभुत्सितमुपायमुपदर्शयितुमुत्तरग्रन्थमुपादत्ते—तथेति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

(अथ षष्ठाध्यायस्य चतुर्दशः खण्डः) ।

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत् यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥ १ ॥

यथा लोके हे सोम्य पुरुषं यं कंचिद्गन्धारेभ्यो जनपदेभ्योऽभिनद्धाक्षं बद्धचक्षुषमानीय द्रव्यहर्ता तस्करस्तमभिनद्धाक्षमेव बद्धहस्तमरण्ये ततोऽत्यतिजनेऽतिगतजनेऽत्यन्तविगतजने देशे विसृजेत्स तत्र दिग्भ्रमोपेतो यथा प्राङ्वा प्रागञ्चनः प्राङ्मुखो वेत्यर्थः । तथोदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीत शब्दं कुर्याद्विक्रोशेत् । अभिनद्धाक्षोऽहं गन्धारेभ्यस्तस्करेणाऽऽनीतोऽभिनद्धाक्ष एव विसृष्ट इति ॥ १ ॥

यथाऽयमुपायः शक्यो ज्ञातुं तथा लोके प्रदृश्यते दृष्टान्त इत्याह—यथेति । तमेव दृष्टान्तं व्याचष्टे—हे सोम्येति । यथा दिग्भ्रमोपेतो यत्किंचिद्दिगभिमुखो विक्रोशति तथा स तत्र विजने देशे शब्दं कुर्यादिति संबन्धः । प्राङित्यस्यार्थमाह—प्रागञ्चन इति । तस्यैव विवक्षितमर्थं कथयति—प्राङ्मुख इति । वक्ष्यमाणप्रकारैर्विकल्पार्थो वाशब्दः ॥ १ ॥

---

१ ख. घ. च. ञ. ठ. ङ. ढ. °लम्भे चाकु° । २ ङ. तदुप° । क. ठ. तस्योप° । ३ ख. ञ. सौम्येति । ४ ख. ञ. सौम्य । ५ ञ. °ङ्वा प्रध्मा° । ६ क. ख. ग. घ. ङ. ञ. ढ. ठ. त. थ. °ङ्वा प्रध्मा° । ७ ख. ङ. ञ. °सौम्य । ८ ञ. सौम्येति । ९ ख. छ. ञ. ण यौ ।

तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाऽऽचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति ॥ २ ॥

एवं विक्रोशतस्तस्य यथाभिनहनं यथाबन्धनं प्रमुच्य मुक्त्वा कारुणिकः कश्चिदेतां दिशमुत्तरतो गन्धारा एतां दिशं व्रजेति प्रब्रूयात्स एवं कारुणिकेन बन्धनान्मोक्षितो ग्रामाद्ग्रामान्तरं पृच्छन्पण्डित उपदेशवान्मेधावी परोपदिष्ट-ग्रामप्रवेशमार्गविधारणसमर्थः सन्गन्धारानेवोपसंपद्येत नेतरो मूढमतिर्देशा-न्तरदर्शनतृड्वा । यथाऽयं दृष्टान्तो वर्णितः स्वविषयेभ्यो गन्धारेभ्यः पुरुषस्तस्करैरभिनद्धाक्षोऽविवेको दिङ्मूढोऽशनायापिपासादिमान्व्याघ्र-स्कराद्यनेकभयानर्थव्रातयुतमरण्यं प्रवेशितो दुःखार्तो विक्रोशन्बन्धनेभ्यो मुमुक्षुस्तिष्ठति स कथंचिदेव कारुणिकेन केनचिन्मोक्षितः स्वदेशान्गन्धा-रानेवाऽऽप्नो निर्वृतः सुखीभूत् । एवमेव सतो जगदात्मस्वरूपात्तेजो-बन्नादिमयं देहारण्यं वातपित्तकफरुधिरमेदोमांसास्थिमज्जाशुक्रकृमिमूत्रपुरी-षवच्छीतोष्णाद्यनेकद्वंद्वदुःखवच्चेदं मोहपटाभिनद्धाक्षो भार्यापुत्रमित्रपशु-बन्ध्वादिदृष्टादृष्टानेकविषयतृष्णापाशितः पुण्यापुण्यादितस्करैः प्रवेशितोऽ-हममुष्य पुत्रो ममैते बान्धवाः सुखयहं दुःखी मूढः पण्डितो धार्मिको बन्धुमाञ्ज्ञातो मृतो जीर्णः पापी पुत्रो मे मृतो धनं मे नष्टं हा हतोऽस्मि कथं जीविष्यामि का मे गतिः किं मे त्राणमित्येवमनेकशतसहस्रानर्थ-जालवान्विक्रोशन्कथंचिदेव पुण्यातिशयात्परमकारुणिकं कंचित्सद्ब्रह्मात्म-विदं विमुक्तबन्धनं ब्रह्मिष्ठं यदाऽऽसादयति तेन च ब्रह्मविदा कारुण्याद-र्शितसंसारविषयदोषदर्शनमार्गो विरक्तः संसारविषयेभ्यो नासि त्वं संसा-र्यमुष्य पुत्रत्वादिधर्मवान्किं तर्हि सद्यत्तत्त्वमसीत्यविद्यामोहपटाभिनहनान्मो-क्षितो गन्धारपुरुषवच्च स्वं सदात्मानमुपसंपद्य सुखी निर्वृतः स्यादित्येतमेवा-र्थमाहाऽऽचार्यवान्पुरुषो वेदेति । तस्यास्यैवमाचार्यवतो मुक्तविद्याभिनहनस्य तावदेव तावानेव कालश्चिरं क्षेपः सदात्मस्वरूपसंपत्तेरिति वाक्यशेषः ।

---

१ क. ख. ग. घ. च. ज. ट. ठ. ड. ढ. °चिदिव । २ क. ख. ग. घ. ङ. ञ. ट. ड. °त्मनः स्व° । ३ ख. ञ. ण. °हृप्रदाविद्याप° । ४ क. ख. ञ. ढ. ण. °त्रयं° । ५ क. ग. घ. ङ. ट. ठ. ड. ढ. °चिदिव । ६ ठ. °शयवशात्प° । ७ ख. घ. ज. ण. °द्याविमो° ।

कियान्कालश्चिरमित्युच्यते यावन्न विमोक्ष्ये न विमोक्ष्यत इत्येतत्पुरुषव्यत्ययेन। सामर्थ्यात्। येन कर्मणा शरीरमारब्धं तस्योपभोगेन क्षयाद्देहपातो यावादित्यर्थः। अथ तदेव सत्संपत्स्ये संपत्स्यत इति पूर्ववत्। न हि देहमोक्षस्य सत्संपत्तेश्च कालभेदोऽस्ति येनाथशब्द आनन्तर्यार्थः स्यात्।

यथाबन्धनं बन्धनमनुसृत्येति यावत्। पण्डितो मेधावीतिविशेषणद्वयस्य व्यवच्छेद्यं दर्शयति—नेतर इति। व्याख्यातं दृष्टान्तं सोपस्करमनुवदति—यथेत्यादिना। दार्ष्टान्तिकं व्याचष्टे—एवमिति। आदिशब्देन वाय्वाकाशौ गृह्येते। मयड्विकारार्थः। देहारण्यस्यानेकानर्थसंकटत्वं कथयति—वातेति। शीतोष्णादीत्यादिपदेन रागद्वेषादि द्वंद्वं गृहीतं तेनानेकेन द्वंद्वेन जातं सुखं दुःखं च तदुपेतमिदं देहारण्यमित्येतत्। बन्ध्वादीत्यादिशब्दो मित्रक्षेत्रादिविषयः। पुण्यापुण्यादीत्यादिपदमविद्याकामवासनासंग्रहार्थम्। देहारण्यं प्रविष्टस्य जन्तोर्विक्रोशनप्रकारं सकारणं सूचयति—अहमित्यादिना। तस्य सदा दुःखित्वशङ्कां वारयति—कथंचिदेवेति। आपाततो ब्रह्मवित्त्वमात्रेण मुक्तबन्धनत्वासिद्धेर्विशिनष्टि—ब्रह्मिष्ठमिति। यदाऽऽसादयति तदा सुखी स्यादित्युत्तरत्र सबन्धः। संसारविषयं दोषदर्शनं तस्य क्षयिष्णुत्वादिज्ञानं तस्य मार्गो विवेकः स यस्याऽऽचार्येण दर्शितो विद्यातः[3] स दर्शितसंसारविषयदोषदर्शनमार्गः। आचार्येण साधनचतुष्टयसंपन्नस्याधिकारिणः संसारान्मोक्षितत्वप्रकारं दर्शयति—नासीति। यद्यपि वाक्यार्थज्ञाने वाक्यमेवोपायस्तथाऽप्याचार्योपदेशजनितातिशयदर्शनात्तदुपदेशोऽवगत्यन्तवाक्यार्थज्ञाने प्रथमो हेतुरुपदेशमात्राद्यस्य नावगत्यन्तवाक्यार्थधीस्तस्य प्रमाणाद्यसंभावनानिरसनसमर्थो विचारो मेधाविशब्देन विहितस्तस्य प्रज्ञातिशयवति प्रयोगादिति भावः। पुरुषव्यत्यये हेतुमाह—सामर्थ्यादिति। अस्मद्युपपदेऽसत्युत्तमपुरुषप्रयोगानुपपत्तेर्देहादिस्थित्यनुपपत्तेर्वेत्यर्थः। यावदित्यादिवाक्यार्थं स्पष्टयति—येनेति। पूर्ववदिति सामर्थ्यात्पुरुषव्यत्ययं लक्षयति। अथशब्दस्य सत्संपत्तेर्देहमोक्षादानन्तर्यमर्थो भविष्यतीत्याशङ्क्याऽऽह—न हीति।

ननु यथा सद्विज्ञानानन्तरमेव देहपातः सत्संपत्तिश्च न भवति कर्मशेषवशात्तथाऽप्रवृत्तफलानि प्राग्ज्ञानोत्पत्तेर्जन्मान्तरसंचितान्यपि कर्माणि सन्तीति तत्फलोपभोगार्थं पतितेऽस्मिञ्शरीरान्तरमारब्धव्यम्। उत्पन्ने च ज्ञाने यावज्जीवं विहितानि प्रतिषिद्धानि वा कर्माणि करोत्येवेति तत्फलोपभोगार्थं चावश्यं शरी-

---

१ ख. ञ. ण. °यट् विका°। २ क. ग. ट. °विदिवे°। ३ ख. ब. वियते। ४ ख. ङ. ञ. ण. °प्रयोगस्यानु°।

रान्तरमारब्धव्यं ततश्च कर्माणि ततः शरीरान्तरमिति ज्ञानानर्थक्यं कर्मणां फलवत्त्वात्[1]। अथ ज्ञानवतः क्षीयन्ते कर्माणि तदा ज्ञानप्राप्तिसमकालमेव ज्ञानस्य सत्संपत्तिहेतुत्वान्मोक्षः स्यादिति शरीरपातः स्यात्। तथा चाऽऽचार्याभाव इत्याचार्यवान्पुरुषो वेदेत्यनुपपत्तिर्ज्ञानान्मोक्षाभावप्रसङ्गश्च। देशान्तरप्राप्त्युपायज्ञानवदनैकान्तिकफलत्वं वा ज्ञानस्य। न। कर्मणां प्रवृत्ताप्रवृत्तफलत्वविशेषोपपत्तेः। यदुक्तमप्रवृत्तफलानां कर्मणां ध्रुवफलत्वाद्ब्रह्मविदः शरीरे पतिते शरीरान्तरमारब्धव्यमप्रवृत्तकर्मफलोपभोगार्थमित्येतदसत्। विदुषस्तस्य तावदेव चिरमिति श्रुतेः प्रामाण्यात्।

अथ संपत्स्य इति विदेहमुक्तिमुक्तामाक्षिपति—नन्विति। अप्रवृत्तफलानीति च्छेदः। उत्पन्ने चेति चकारोऽप्यर्थः। विमतानि कर्माणि ब्रह्मज्ञानेन न क्षीयन्ते कर्मत्वात्प्रवृत्तफलकर्मवदित्यर्थः। क्षीयन्ते चास्य कर्माणि, ज्ञानाग्निः सर्वकर्माणीत्यादिश्रुतिस्मृतिविरोधात्कालात्ययापदिष्टतेति शङ्कते—अथेति। अतिप्रसङ्गान्न श्रुतिस्मृत्योर्यथाश्रुतार्थतेति परिहरति—तदेति। ज्ञानस्याऽऽनर्थक्यमुक्त्वा पक्षान्तरमाह—देशान्तरेति। यथा ग्रामप्राप्त्युपायोऽश्वो रथो वेति ज्ञाने सत्यसत्यन्तराये कस्यचिदेव ग्रामप्राप्तिर्भवति न त्वन्तरायवतस्तज्ज्ञानेऽपि तत्प्राप्तिर्यथा तथा समुत्पन्नज्ञानस्यापि कस्यचिदेव भोगेन क्षीणकर्माशयस्य मोक्षो न ज्ञानमात्रादित्यनियतफलत्वमित्यर्थः। कर्मत्वहेतोरप्रयोजकत्वं वदन्नुत्तरमाह—न कर्मणामिति। संग्रहवाक्यमेव प्रपञ्चयन्नादौ नञर्थं स्फुटयति—यदुक्तमिति। तत्र हेतुमाह—विदुष इति। प्रामाण्याद्देहान्तरारम्भे तद्विरोधप्रसङ्गादिति शेषः।

ननु "पुण्यो वै पुण्येन कर्मणा भवति" इत्यादिश्रुतेरपि प्रामाण्यमेव। सत्यमेवम्। तथाऽपि प्रवृत्तफलानामप्रवृत्तफलानां च कर्मणां विशेषोऽस्ति। कथम्। यानि प्रवृत्तफलानि कर्माणि यैर्विद्वच्छरीरमारब्धं तेषामुपभोगेनैव क्षयः। यथाऽऽरब्धवेगस्य लक्ष्यमुक्तेष्वादेर्वेगक्षयादेव स्थितिर्न तु लक्ष्यवेधसमकालमेव प्रयोजनं नास्तीति तद्वत्। अन्यानि त्वप्रवृत्तफलानीह प्राग्ज्ञानोत्पत्तेरूर्ध्वं च कृतानि वा क्रियमाणानि वाऽतीतजन्मान्तरकृतानि वाऽप्रवृत्तफलानि ज्ञानेन दह्यन्ते प्रायश्चित्तेनेव। "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा" इति स्मृतेश्च। "क्षीयन्ते चास्य कर्माणि" इति चाऽऽथर्वणे।

---

१ क. ग. ट. °त्। अप्रवृत्तफलानि कर्माणि न ब्रह्मज्ञानेन क्षीयन्ते कर्मत्वात्प्रवृत्तफलकर्मवदित्युक्तम्। तत्र ज्ञानाग्निः सर्वकर्माणीतिस्मृतिविरोधः। अथ। २ ख. घ. ञ. ठ. ण. °न्ते चास्य क°। ३ घ. ङ. च. ठ. ड. °लत्वावि°। ४ घ. ङ. च. ठ. ढ. ण. °लत्वाद्ब्र°।

अतो ब्रह्मविदो जीवनादिप्रयोजनभावेऽपि प्रवृत्तफलानां कर्मणामवश्यमेव फलोपभोगः स्यादिति मुक्तेषुवत्तस्य तावदेव चिरमिति युक्तमेवोक्तमिति यथोक्तदोषचोदनानुपपत्तिः । ज्ञानोत्पत्तेरूर्ध्वं च ब्रह्मविदः कर्माभावमवोचाम ब्रह्मसंस्थोऽमृत त्वमेतीत्यत्र तच्च स्मर्तुमर्हसि ॥ २ ॥

श्रुत्यन्तरमाश्रित्य शङ्कते—नन्विति । तथा चानारब्धकर्मवशाद्विदुषोऽपि देहान्तरमारब्धव्यमिति शेषः । तन्प्रामाण्यमङ्गी करोति—सत्यमेवमिति । तर्हि विदुषोऽपि देहान्तरमनारब्धकर्मवशादारब्धव्यं नेत्याह—तथाऽपीति । विशेषमेवाऽऽकाङ्क्षाद्वारा विशदयति—कथमित्यादिना । प्रवृत्तफलत्वमेव स्फुटयति—यैरिति । उक्तमर्थं दृष्टान्तेन स्पष्टयति—यथेति । लक्ष्यस्य वेधो भेदनं तत्समकालमेवेष्वादेरूर्ध्वं गतिप्रयोजनं नास्तीति न स्थितिर्लक्ष्यमुद्दिश्य मुक्तस्य तस्याऽऽरब्धवेगस्याप्रतिबन्धेन तदासादितस्य वेगक्षयादेव स्थितिर्दृष्टान्तवद्विद्यार्थे देहे विद्यालाभानन्तरं फलं नास्तीति न कर्माणि निवर्तन्ते किंतु भोगक्षयादेव तस्य लब्धवृत्तित्वादित्यर्थः । प्रवृत्तफलेभ्योऽप्रवृत्तफलानां कर्मणां विशेषमाह—अन्यानि त्विति । न चाप्रवृत्तफलानां कर्मणां क्षयोऽप्रसिद्धस्तथाविधस्यैव पापस्य प्रायश्चित्तेन प्रक्षयोपयोगादित्याह—प्रायश्चित्तेनेवेति । आरब्धफलातिरिक्तानां कर्मणां ज्ञानान्निवृत्तौ श्रुतिस्मृती दर्शयति—ज्ञानाग्निरित्यादिना । प्रवृत्ताप्रवृत्तफलेषु कर्मसु सिद्धे विशेषे फलितमाह—अत इति । जीवनादीत्यादिशब्देन पुत्रकलत्रादि गृह्यते । मुक्तस्याप्रतिबद्धेष्वादेर्यावद्वेगक्षयं गतिप्रौव्यव्यवहारवदारब्धकर्मणां फलभोगोऽवश्यमेव स्यादिति संबन्धः । यतश्चाऽऽरब्धकर्मणां भोगादेव क्षयस्ततस्तस्येत्यादिना यच्चिरत्वं सत्संपत्तेरुक्तं तद्युक्तमेवेति कृत्वा यथोक्तस्य दोषस्य सद्यःशरीरपातादिलक्षणस्याऽऽशङ्कानुपपत्तिरित्युपसंहरति—इतीति । आद्यस्येतिशब्दस्य तस्येत्यनेन संबन्धः । यत्तूत्पन्नेऽपि ज्ञाने यावज्जीवं विहितानि करोत्येवेति तत्राऽऽह—ज्ञानोत्पत्तेरिति ॥ २ ॥

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सौम्येति होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

---

१ क. °णां प्रक्ष° । २ ख. छ. ज °लत्रद्रष्टव्यक्षेत्रा° । ३ क. ग. ट. °बन्धेष्वा° । ४ क. ख. छ. झ. ण. °यस्तस्ये° । ५ ख. ङ. सौम्येति ।

स य इत्याद्युक्तार्थम् । आचार्यवान्विद्वान्येन क्रमेण सत्संपद्यते तं क्रमं दृष्टान्तेन भूय एव मा भगवान्विज्ञापयत्विति । तथा सौम्येति होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

ज्ञानस्य नाऽऽनर्थक्यमविद्यातत्कार्यनिवर्तनेन सत्संपत्तिहेतुत्वान्नाप्यनैकान्तिकफलत्वमन्तरायाभावादित्युक्तमिदानीमर्चिरादिमार्गप्राप्त्या वाऽत्रैवाविद्यानिवृत्तिमात्रेण वा सत्संपत्तिरिति संदिहानः शङ्कते—आचार्यवानिति । संशयानस्य संबोधनार्थमुत्तरं वाक्यमवतारयति—तथेति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

(अथ षष्ठाध्यायस्य पञ्चदशः खण्डः) ।

पुरुषꣳसोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥ १ ॥

पुरुषं[1] हे सोम्योतोपतापिनं ज्वराद्युपतापवन्तं ज्ञातयो[2] बान्धवाः परिवार्योपासते मुमूर्षुं जानासि मां तव पितरं पुत्रं भ्रातरं वेति पृच्छन्तस्तस्य मुमूर्षोर्यावन्न वाङ् मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामित्येतदुक्तार्थम् ॥ १ ॥

॥ १ ॥

अथ यदाऽस्य वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति ॥ २ ॥

संसारिणो यो मरणक्रमः स एवायं विदुषोऽपि सत्संपत्तिक्रम इत्येतदाह परस्यां देवतायां तेजसि संपन्नेऽथ न जानाति । अविद्वांस्तु[3] सत उत्थाय प्राग्भावितं व्याघ्रादिभावं देवमनुष्यादिभावं वा विशति ।

---

१ ख. ङ. सौम्येति । २ ख. ञ. °षꣳ सौम्यो° । ३ ख. ङ. ञ. हे सौम्यो° । ४ क. ग. घ. ङ. ढ. °रं चेति । ५ क घ. च. ठ. ढ. °स्तु तत ।

विद्वांस्तु शास्त्राचार्योपदेशजनितज्ञानदीपप्रकाशितं सद्ब्रह्मात्मानं प्रविश्य नाऽऽवर्तत इत्येष सत्संपत्तिक्रमः । अन्ये तु मूर्धन्यया नाड्योत्क्रम्याऽऽदित्यादिद्वारेण सद्गच्छन्तीत्याहुस्तदसत् । देशकालनिमित्तफलाभिसंधानेन गमनदर्शनात् । न हि सदात्मैकत्वदर्शिनः सत्याभिसंधस्य देशकालनिमित्तफलाद्यनृताभिसंधिरुपपद्यते । विरोधात् । अविद्याकामकर्मणां च गमननिमित्तानां सद्विज्ञानहुताशनविप्लुष्टत्वाद्गमनानुपपत्तिरेव । " पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ति कामाः " इत्याथर्वणे । नदीसमुद्रदृष्टान्तश्रुतेश्च ॥ २ ॥

नन्वेष संसारिणो मरणक्रमो नतु विदुषः सत्संपत्तिक्रमस्तयोर्विशेषस्य वक्तव्यत्वादत आह—संसारिण इति । करणोपरमे तेजःसहचरितभूतसूक्ष्मोपसंहारे च विशेषविज्ञानाभावः समान एव विद्वद्विदुषोरित्यर्थः । कस्तर्हि तयोर्विशेषस्तत्राऽऽह—अविद्वानिति । सतस्तस्माद्ज्ञानात्सदात्मनः सकाशादिति यावत् । एकदेशिमतमुत्थाप्य प्रत्याचष्टे—अन्ये त्विति । भवतु विदुषोऽपि तदभिसंधिपूर्वकं गमनमित्याशङ्क्याऽऽह—नहीति । आदिशब्देन गत्यागती गृह्यते । सद्विज्ञानवतो गमनायोगे हेत्वन्तरमाह—अविद्येति । विदुषोऽविद्याकामकर्मणाममावे प्रमाणमाह—पर्याप्तकामस्येति । ननु कामप्रविलय एवात्र श्रूयते नाविद्याकामकर्मनिर्मोक्स्तत्राऽऽह—नदीति । यथा नद्यो गङ्गाद्या नामरूपे विहाय समुद्रं प्रविशन्ति तथा विद्वान्नामरूपे हित्वा परं पुरुषमुपैतीतिदृष्टान्तपूर्विकायाः श्रुतेर्नामरूपबीजावस्थाविद्याया लयो गम्यते न चाविद्याकामयोरभावे कर्मोपपत्तिस्तस्मान्न विदुषो गतिपूर्विका सत्संपत्तिरित्यर्थः ॥ २ ॥

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सौम्येति होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषदि षष्ठाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

स य इत्यादि समानम् । यदि मरिष्यतो मुमुक्षतश्च तुल्या सत्संपत्तिस्तत्र विद्वान्सत्संपन्नो नाऽऽवर्तत आवर्तते त्वविद्वानित्यत्र कारणं दृष्टान्तेन

१ घ. ठ. ड. 'दित्यद्वा° । २ क. ग. छ. ट. °ति । तत° । ३ ख. ङ. सौम्येति । ४ क. ग. ङ. ड. °तैऽवि° । ङ. ढ. °ते चावि° ।

भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

विमतः सत्संपन्नः पुनरावृत्तिमर्हति सत्संपन्नत्वान्मरणकाले सत्संपन्नत्वाद्विमतो वा विशेषविज्ञानाभावो नाऽऽत्यन्तिको विशेषविज्ञानाभावत्वान्मरणकालीनविशेषविज्ञानाभाववदित्यनुमानाद्विद्वदविदुषोरविशेषं मन्वानः शङ्कते—यदीति। तत्रानृताभिसंधत्वं तादृगभिसंधिमन्निष्ठत्वं वोपाधिरित्यनुमानद्वयं दूषयितुमुत्तरं ग्रन्थमुत्थापयति—तथेति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

(अथ षष्ठाध्यायस्य षोडशः खण्डः) ।

पुरुषꣳ सौम्योत हस्तगृहीतमानयन्त्यपहा*र्षीत्स्ते-
यमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता
भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसंधोऽ-
नृतेनाऽऽत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स
दह्यतेऽथ हन्यते ॥ १ ॥

शृणु यथा सौम्य पुरुषं चौर्यकर्मणि संदिह्यमानं निग्रहाय परीक्षणाय वोतापि हस्तगृहीतं बद्धहस्तमानयन्ति राजपुरुषाः । किं कृतवानयमिति पृष्टाश्चाऽऽहुरपहार्षीद्धनमस्यायम् । ते चाऽऽहुः किमपहरणमात्रेण बन्धनमर्हति । अन्यथा दत्तेऽपि धने बन्धनप्रसङ्गादित्युक्ताः पुनराहुः स्तेयमकार्षीच्चौर्येण धनमपहार्षीदिति । तेष्वेवं वदत्स्वितरोऽपह्नुते नाहं तत्कर्तेति । ते चाऽऽहुः संदिह्यमानं स्तेयमकार्षीस्त्वमस्य धनस्येति। तस्मिंश्चापह्नुवान आहुः परशुमस्मै तपतेति शोधयत्वात्मानमिति । स यदि तस्य स्तैन्यस्य कर्ता भवति बहिश्चापह्नुते स एवंभूतस्तत एवानृतमन्यथाभूतं सन्तमन्यथाऽऽत्मानं कुरुते स तथाऽनृताभिसंधोऽनृतेनाऽऽत्मानमन्तर्धाय व्यवहितं कृत्वा परशुं तप्तं

---

* बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः ।

---

१ ख. ङ. ञ. सोम्येति । २ ख. ङ. सोम्येति । ३ ख. घ. ङ. च. सौम्य । ४ ख. ञ. ङ, ञ, ण. °ने ग्रहणसंभवादि° । ५ क. ख. ग. घ. च. ज. ट. ण. °मानः स्ते° ।

मोहात्प्रतिगृह्णाति स दह्यतेऽथ हन्यते[1] राजपुरुषैः स्वकृतेनानृताभिसंधि-दोषेण ॥ १ ॥

परीक्षणाय परीक्षाद्वारेण रक्षणार्थमिति यावत् । परस्वग्रहणमात्रेण बन्धने प्रतिग्रहीतुरपि बन्धप्रसङ्गान्न तन्मात्रं बन्धनकारणमित्याह—अन्यथेति । तत एवानृताभिसंधत्वादेवेत्यर्थः ॥ १ ॥

अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसंधः सत्येनाऽऽत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते ॥ २ ॥

अथ यदि तस्य कर्मणोऽकर्ता भवति तत एव सत्यमात्मानं कुरुते सः सत्येन तया स्तैन्याकर्तृतयाऽऽत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स सत्याभिसंधः सन्न दह्यते सत्यव्यवधानादथ मुच्यते च मृषाभियोक्तृभ्यः । तप्तपरशुहस्ततलसंयोगस्य तुल्यत्वेऽपि स्तेयकर्त्रकर्त्रोरनृताभिसंधो दह्यते न तु सत्याभिसंधः ॥ २ ॥

तत एवेति । स्तैन्यस्य कर्मणोऽकर्तृत्वादेवेत्यर्थः । दृष्टान्ते विवक्षितमंशमनुवदति—तप्तेति ॥ २ ॥

स यथा तत्र नादाह्येतैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ३ ॥

इति छान्दोग्योपनिषदि षष्ठाध्यायस्य षोडशः खण्डः ॥ १६ ॥

इति छान्दोग्योपनिषद्ब्राह्मणे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

स यथा सत्याभिसंधस्तप्तपरशुग्रहणकर्मणि सत्यव्यवहितहस्ततलत्वान्नादाहेत न दह्येतेत्येतदेवं सद्ब्रह्मसत्यौभिसंधीतरयोः शरीरपातकाले च तुल्यायां सत्संपत्तौ विद्वान्सत्संपद्य न पुनर्व्याघ्रदेवादिदेहग्रहणायाऽऽवर्तते । अविद्वांस्तु विकारानृताभिसंधः पुनर्व्याघ्रादिभावं देवतादिभावं वा यथाकर्म यथाश्रुतं प्रतिपद्यते । यदस्मात्सत्याभिसंध्यनभिसंधिकृते मोक्षबन्धने यच्च मूलं जगतो यदा-

१ ख. घ. ङ. च. ठ. ण. °ते च रा° । २ क. ग. घ. ङ. च. ट. ड. ढ. प. स त° । ३ ण. °त्वान्न दा° । ४ ठ. °त्यात्माभि° । ५ क. °संध्येत° । ६ ख. ङ. च. ञ. ट. ड. ण. °द्धान्तंप° ।

यतना यत्प्रतिष्ठाश्च सर्वाः प्रजा यदात्मकं च सर्वं यच्चाजमृतममृतमयं शिवमद्वितीयं तत्सत्यं स आत्मा, तत्त्वमसि हे श्वेतकेतो इत्युक्तार्थमसकृद्वाक्यम्। कः पुनरसौ श्वेतकेतुस्त्वंशब्दार्थः। योऽहं श्वेतकेतुरुद्दालकस्य पुत्र इति वेदाऽऽत्मानमादेशं श्रुत्वा मत्वा विज्ञाय चाश्रुतममतमविज्ञातं विज्ञातुं पितरं पप्रच्छ कथं नु भगवः स आदेशो भवतीति। स एषोऽधिकृतः श्रोता मन्ता विज्ञाता तेजोबन्नमयं कार्यकरणसंघातं प्रविष्टा परैव देवता नामरूपव्याकरणायाऽऽदर्श इव पुरुषः सूर्यादिरिव जलादौ प्रतिबिम्बरूपेण स आत्मानं कार्यकरणेभ्यः प्रविभक्तं सद्रूपं सर्वात्मानं प्राक् पितुः श्रवणान्न विजज्ञौ। अथेदानीं पित्रा प्रतिबोधितस्तत्त्वमसीतिदृष्टान्तैर्हेतुभिश्च तत्पितुरस्य ह किलोक्तं सदेवाहमस्मीति विजज्ञौ विज्ञातवान्। द्विर्वचनमध्यायपरिसमाप्त्यर्थम्।

तदनुवादपूर्वकं दार्ष्टान्तिकमाह—स यथेति। स य एषोऽणिमेत्यादि व्याचष्टे—यदात्मेति। त्वं तदसीति त्वमर्थोद्देशेन तदर्थमात्रो विधीयते तत्रोद्देश्यस्य शरीरद्वयविशिष्टस्य विरोधादशरीरब्रह्मात्मत्वं विधातुमशक्यमिति मन्वानश्चोदयति—कः पुनरिति। त्वंपदेन वाच्यस्य लक्ष्यस्य वा ब्रह्मत्वायोगस्त्वयोच्यते नाऽऽद्योऽङ्गीकाराद्द्वितीयः शरीरद्वयवैशिष्ट्योपलक्षितस्य श्रोतृत्वाद्यध्यासास्पदस्य त्वंपदलक्ष्यस्य ब्रह्मत्वविधाने विरोधास्फुरणादिति परिहरति—योऽहमिति। विज्ञाय च वेदेति पूर्वेण सह संबन्धः। तस्य सतः सकाशादौपाधिको भेदो वस्तुतस्त्वैक्यमिति मत्वाऽऽह—तेजोबन्नमयमिति। त्वंपदार्थं श्वेतकेतुं निर्धार्य तद्धास्येत्यादि व्याचष्टे—आत्मानमिति।

किं पुनरत्र षष्ठे वाक्यप्रमाणेन जनितं फलमात्मनि, कर्तृत्वभोक्तृत्वयोरधिकृतत्वविज्ञाननिवृत्तिस्तस्य फलं वयमवोचाम। त्वंशब्दवाच्यमर्थं श्रोतुं मन्तुं चाधिकृतत्वमविज्ञातविज्ञानफलार्थम्। प्राक्चैतस्माद्विज्ञानादहमेवं करिष्यामीहोत्रादीनि कर्माण्यहमत्राधिकृतः। एषां च कर्मणां फलमिहामुत्र च भोक्ष्ये कृतेषु वा कर्मसु कृतकर्तव्यः स्यामित्येवं कर्तृत्वभोक्तृत्वयोरधिकृतोऽस्मीत्यात्मनि यद्विज्ञानमभूत्तस्य यत्सज्जगतो मूलमेकमेवाद्वितीयं तत्त्वमसीत्यनेन वाक्येन प्रतिबुद्धस्य निवर्तते। विरोधात्। न ह्येकस्मिन्नद्वितीय आत्मन्येव

---

१ ख. घ. ण. °जरम°। २ ढ. इत्याद्युक्ता°। ३ ख. ग. छ. ञ. ण. °श्यश°। ४ ञ. °त्तस्य। ५ ञ. ठ. ड. ण. °न्यह°।

महमस्मीति विज्ञाते ममेदमन्यदनेन कर्तव्यमिदं कृत्वाऽस्य फलं भोक्ष्य इति वा भेदविज्ञानमुपपद्यते । तस्मात्सत्सत्यादिद्वितीयात्मविज्ञाने विकारानृतजीवात्मविज्ञानं निवर्तत इति युक्तम् । ननु तत्त्वमसीत्यत्र त्वंशब्दवाच्येऽर्थे सद्बुद्धिरादिश्यते यथाऽऽदित्यमनआदिषु ब्रह्मादिबुद्धिः । यथा च लोके प्रतिमादिषु विष्ण्वादिबुद्धिस्तद्वन्नतु सदेव त्वमिति । यदि सदेव श्वेतकेतुः स्यात्कथमात्मानं न विजानीयाद्येन तस्मै तत्त्वमसीत्युपदिश्यते । न । आदित्यादिवाक्यवैलक्षण्यात् । आदित्यो ब्रह्मेत्यादाविति[1]शब्दव्यवधानान्न साक्षाद्ब्रह्मत्वं गम्यते । रूपादिमत्त्वाच्चाऽऽदित्यादीनामाकाशमनसोश्चेतिशब्दव्यवधानादेवाब्रह्मत्वमिह तु सत एँवेह प्रवेशं दर्शयित्वा तत्त्वमसीति निरङ्कुशं सदात्मभावमुपदिशति ।

अज्ञतार्थप्रकाशनं मानफलं तस्य स्वप्रकाशे ब्रह्मणि नोपपत्तिरिति मन्वानश्चोदयति—किं पुनरिति । अत्राऽऽत्मनीति संबन्धः । स्वप्रकाशे प्रकाशातिशयस्य मानफलस्यासंभवेऽप्यध्यस्तव्यावृत्तिस्तत्फलं भविष्यतीत्युत्तरमाह—कर्तृत्वेति । अश्रुतस्य श्रवणायामतस्य मननायाविज्ञातस्य विज्ञानफलसिद्धये चाधिकृतं यमर्थं त्वंपदवाच्यमवोचाम तस्य स्वात्मनि क्रियाकर्तृत्वे फलभोक्तृत्वे च यन्मिथ्यैवाधिकृतत्वविज्ञानं तन्निवृत्तिर्मानफलमिति योजना । यथोक्तं मानफलमेव प्रपञ्चयति—प्राक्चेति । अहमेवात्राधिकृतश्चेति चकारस्य संबन्धः । तस्येत्यज्ञस्येत्यर्थः । विरोधमेव स्फोरयति—न हीति । प्रमाणफलमुपसंहरति—तस्मादिति । तत्त्वमसीति वाक्यं मुख्यैकत्वपरमिति स्वपक्षमुक्त्वा परपक्षं शङ्कते—नन्विति । आध्यासिकमेकत्वं सामानाधिकरण्यालम्बनमिति स्वपक्षं दृष्टान्तेनोक्त्वा सिद्धान्तं दूषयति—नत्विति । श्वेतकेतोः सन्मात्रत्वे तदज्ञानायोगादसकृदुपदेशासिद्धिरित्यर्थः । किमध्यासवाक्यसामान्यादाध्यासिकमेकत्वं सामानाधिकरण्यालम्बनं किंवा मुख्यैकत्वे बाधकसद्भावादिति विकल्प्याऽऽद्यं दूषयति—नेत्यादिना[2] । यथा लोके शुक्तिकां रजतमिति प्रत्येतीत्यादाविति[3]शब्दपरं सामानाधिकरण्यं न वस्तुनिष्ठं दृष्टं तथाऽध्यासवाक्यानामप्यादित्यो ब्रह्मेत्यादेश इत्यादीनामितिशब्दपरसामानाधिकरण्यवशादवस्तुनिष्ठत्वं गम्यते न तथा तत्त्वमसिवाक्यस्यावस्तुनिष्ठत्वमितिशब्दपरत्वाभावेन सामानाधिकरण्यस्य स्वरूपपर्यवसायित्वनिश्चयादित्यर्थः । इह त्विति प्रकरणोक्तिः । इह प्रवेशं दर्शयित्वेत्यत्र तेजोबन्नमयं संघातमिहेति व्यपदिशति ।

---

१ ख. घ. ञ. ण. °नेन वि° । २ ट. ब्रह्मबु° । ३ ठ. °दिश्येत । न । ४ क. ग. घ. च. ट. ठ. ड. ढ. ण. एव देह° । ५ ख. छ. ञ. ण. °रसं° । ६ ख. छ. ञ. ण. °कर्तृ° । ७ ख. छ. ञ. ण. °ना । लो° । ८ ख. छ. ञ. ण. °छं त° ।

ननु पराक्रमादिगुणः सिंहोऽसि त्वमितिवत्तत्त्वमसीति स्यात् । न । मृदादिवत्सदेकमेवाद्वितीयं सत्यमित्युपदेशात् । न चोपचारविज्ञानात्तस्य तावदेव चिरमिति सत्संपत्तिरुपादिश्येत । मृषात्वादुपचारविज्ञानस्य । त्वमिन्द्रो यम इतिवत् । नापि स्तुतिरनुपास्यत्वाच्छ्वेतकेतोः । नापि सच्छ्वेतकेतुस्त्वोपदेशेन स्तूयेत । न हि राजा दासस्त्वमिति स्तुत्यः स्यात् । नापि सतः सर्वात्मन एकदेशनिरोधो युक्तस्तत्त्वमसीति देशाधिपतेरिव ग्रामाध्यक्षस्त्वमिति । न चान्या गतिरिह सदात्मत्वोपदेशादर्थान्तरभूता संभवति । ननु सदस्मीति बुद्धिमात्रमिह कर्तव्यतया चोद्यते न त्वज्ञातं सदस्मीति ज्ञाप्यत इति चेत् । नन्वस्मिन्पक्षेऽप्यश्रुतं श्रुतं भवतीत्याद्यनुपपन्नम् । न । सदस्मीतिबुद्धिविधेः स्तुत्यर्थत्वात् । नाऽऽचार्यवान्पुरुषो वेद । तस्य तावदेव चिरमित्युपदेशात् । यदि हि सदस्मीति बुद्धिमात्रं कर्तव्यतया विधीयते न तु त्वंशब्दवाच्यस्य सद्रूपत्वमेव तदा नाऽऽचार्यवान्वेदेति ज्ञानोपायोपदेशो वाच्यः स्यात् । यथाऽग्निहोत्रं जुहुयादित्येवमादिष्वर्थमात्रमेवाऽऽचार्यवत्त्वमिति तद्वत् । तस्य तावदेव चिरमिति च क्षेपकरणं न युक्तं स्यात् । सदात्मतत्त्वेऽविज्ञातेऽपि सकृद्बुद्धिमात्रकरणे मोक्षप्रसङ्गात् । न च तत्त्वमसीत्युक्ते नाहं सदितिप्रमाणवाक्यजनिता बुद्धिर्निवर्तयितुं शक्या नोत्पन्नेति वा शक्यं वक्तुम् । सर्वोपनिषद्वाक्यानां तत्परतयैवोपक्षयात् । यथाऽग्निहोत्रादिविधिजनिताग्निहोत्रादिकर्तव्यताबुद्धीनामतथार्थत्वमनुत्पन्नत्वं वा न शक्यते वक्तुं तद्वत् ।

जीवब्रह्मणोर्भेदग्राहिप्रमाणविरोधान्न मुख्यमेकत्वं किं तु चैतन्यगुणयोगाद्गौणमिति द्वितीयं शङ्कते—नन्विति । यथा मृदादि कारणमेव घटादि कार्यं न पृथगस्ति तथा सर्वमिदमाकाशादि कार्यं सन्मात्रं तत्र सर्वप्रकारभेदरहितमेकरसमबाधितमित्युपदेशदर्शनान्न गौणमेकत्वमित्युत्तरमाह—नेत्यादिना । इतश्च नोपचरितमेकत्वमित्याह—न चेति । औपचारिकविज्ञानस्य मृषात्वे दृष्टान्तमाह—त्वमिति । किंच गौणमेकत्वं वदता स्तुत्यर्थत्वं विधिपरत्वं वा वाक्यस्य वक्तव्यमाद्येऽपि श्वेतकेतोः सतो वा वस्तुनः स्तुतिरिति विकल्प्याऽऽद्यं दूषयति—नापीति । उपास्यत्वात्सतोऽस्तुतिरिति द्वितीयमाशङ्क्य दूषयति—नापि सदिति । इतश्च श्वेतकेतुत्वोपदेशेन सतो न स्तुतिरित्याह—नापि सत इति । श्वेतकेतोरनुपास्यत्वेन स्तुत्यसंभवेऽपि कर्तृत्वात्कर्मसु तत्स्तावकत्वं वाक्यस्यायुक्तमित्याशङ्क्य कर्मविध्यसंनिधानात्सदात्मत्वमात्रप्रतीतेश्च नैवमित्याह—न चेति । विकल्पान्तरमुद्भावयति—ननु सदस्मीतीति ।

---

१ क. ग. ट. ङ. ढ. °दिश्यते । मृ° । २ क. ङ. ढ. स्तूयते । ३ क. ग. ट. ठ. ढ. °दस्मीति । ४ ख. ङ. च. ङ. ठ. ण. °वान्वेद । ५ ख. ङ. ण. °यर्थत्वात् । ६ क. °मत्व°।

एकविज्ञानेन सर्वविज्ञानवचनविरोधान्न दृष्टिविधिपरत्वमित्युत्तरमाह—नान्विति । गौणपक्षेऽपि तुल्याऽनुपपत्तिरित्यपेरर्थः । एकविज्ञानेन सर्वविज्ञानश्रुतेर्न विरोधोऽस्तीति पूर्ववाद्याह—नेति । नेदमेकविज्ञानेन सर्वविज्ञानं दृष्टिविधिस्तुतिः कार्यकरणव्यतिरिक्तत्वादियुक्तिभिरुपपादितत्वाद्विधिपक्षे चासंभावनादिनिराससमर्थाचार्यवत्त्वोपदेशानर्थक्यादौपदेशिकज्ञानमात्रेण विध्यनुष्ठानसिद्धेर्विध्यपेक्षितस्य च तेनैवाऽऽक्षेपादित्युत्तरमाह—नाऽऽचार्यवानिति । तदेव विवृणोति—यदि हीति । आचार्यवत्त्वमिति नोपदिश्यत इति शेषः । इतश्च नेदं वाक्यं दृष्टिविधिपरमेष्टव्यमित्यह—तस्येति । सदात्मत्वसाक्षात्काराद्दृतेऽपि सकृदनुष्ठितपरोक्षबुद्धिमात्रान्मोक्षसंभवाद्विलम्बाभिधानमनर्थकमापद्येत यथा सकृदनुष्ठितादपि यागाद्भवति स्वर्गस्तद्वदिह च चिरमिति क्षेपकरणं मोक्षस्येति तस्मान्नेदं दृष्टिविधिपरमित्यर्थः । किंच विधिवादिना प्रतीयमानेऽर्थे वाक्यस्याप्रामाण्यं विपर्यासलक्षणमनुत्पत्तिलक्षणं वा वाच्यं तदुभयं दुर्वचमित्याह—न चेति । तत्त्वमसीत्यधिकारिणं प्रत्युक्ते सति प्रमाणभूतेन तेन वाक्येन जानता सद्ब्रह्माहमिति या तस्य बुद्धिस्तां निवर्तयितुं नाहं सदिति बलवती बुद्धिरुत्पन्नेति न शक्यते वक्तुं विवेकवतः श्रुतवाक्यस्य तथाविधबुद्ध्यनुत्पादान्न चाधिकारिणः श्रुतवाक्यस्य सद्ब्रह्माहमिति बुद्धिर्नोत्पन्नेति वक्तुं शक्यमधिकारिणः प्रमितिजनको वेद इति न्यायात् । न च भेदप्रत्ययो यथोक्तायां बुद्धेर्बाधकस्तस्य स्वाभ्रमेदप्रत्ययवन्मिथ्यात्वानुमानादित्यर्थः । इतश्च तत्त्वमसिवाक्यं वस्तुपरमेवेत्याह—सर्वोपनिषदिति । तत्त्वमसिवाक्यान्नायथार्थी बुद्धिर्नापि न भवत्येव बुद्धिरित्येतमर्थं दृष्टान्तेनाऽऽह—यथेति ।

यत्तूक्तं सदात्मा सन्नात्मानं कथं न जानीयादिति । नासौ दोषः । कार्यकरणसंघातव्यतिरिक्तोऽहं जीवः कर्ता भोक्तेत्यपि स्वभावतः प्राणिनां विज्ञानादर्शनात्किमु तस्य सदात्मविज्ञानम् । कथमेवं व्यतिरिक्तविज्ञाने सति तेषां कर्तृत्वादिविज्ञानं संभवति दृश्यते च । तद्वत्तस्यापि देहादिष्वात्मबुद्धित्वान्न स्यात्सदात्मविज्ञानम् । तस्माद्विकारानृताधिकृतजीवात्मविज्ञाननिवर्तकमेवेदं वाक्यं तत्त्वमसीति सिद्धमिति ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये षष्ठाध्यायस्य षोडशः खण्डः ॥ १६ ॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ छान्दोग्योपनिषद्विवरणे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

---

१ ग. ट. नेयमे । २ क. ख. छ. ञ. °क्षणं । ३ क. ग. ट. °न वाऽग्नि° । ४ क. यदुक्तं । ५ ञ. ठ. ड. °यैकार° । ६ च. °दात्मवि° । ७ ख. ञ. °त्मनो वि° । ८ क. घ. च. ठ. ड. ढ. °त्मत्वावि° ।

जीवे भासमानेऽप्यनवभासमानत्वान्न स्वभावो ब्रह्मेत्युक्तमनूद्य दूषयति—यत्तूक्तमिति । लोकायतातिरिक्तानां देहादतिरेको जीवस्य स्वाभाविकोऽपि नावभासते तथा ब्रह्मभावोऽपि तस्यानाद्यनिर्वाच्याज्ञानसामर्थ्यादेव नावभासिष्यते । तथा च तस्मिन्भासमानेऽप्यनवभासमानत्वान्न स्वभावो ब्रह्मेत्ययुक्तं व्याप्त्यभावादित्याह—कार्येति । ननु देहव्यतिरिक्तात्मवादिनामात्मनि भाति देहव्यतिरिक्तोऽपि भात्येवेति व्याप्तिसिद्धिरित्याशङ्क्याऽऽह— कथमिति । देहादिसंघातादतिरिक्तोऽहमित्येवं व्यतिरिक्तविज्ञाने सति कथं तेषां कर्तृत्वादिविज्ञानं संभवति । न हि संघातात्मिमानविगमे तद्युज्यते । न च तन्नास्त्येव दृश्यमानत्वादित्यर्थः । सिद्धे दृष्टान्ते दार्ष्टान्तिकमाह— तद्वदिति । देहादव्यतिरिक्तस्य सतोऽप्यप्रतिभानवत्सदात्मकस्यापि श्वेतकेतोर्देहादिव्यात्माभिमानित्वात्सदात्मनि ब्रह्मणि विज्ञानं न स्यादतस्तत्स्वभावस्यापि ब्रह्मभावस्याप्रतिभानमज्ञानकृतमित्यर्थः । वाक्यस्यार्थान्तरपरत्वासंभवे फलितमुपसंहरति—तस्मादिति । महावाक्यस्योक्तया विधयाऽर्थान्तरपरत्वासंभवाद्विकारेऽनृताभिसंधिकृतोऽयं जीवात्मेत्येवंरूपं यन्मिथ्याज्ञानं तस्य सनिदानस्य निवर्तकमेवेदं तत्त्वमसिवाक्यं न त्वभूतप्रादुर्भावफलमित्येवं जीवब्रह्मणोरैक्यं सर्वोपनिषत्सारभूतं स्थितमित्यर्थः ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
षष्ठाध्यायस्य षोडशः खण्डः ॥ १६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादाशिष्यभगवदानन्दज्ञानकृतायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

(अथ सप्तमाध्यायस्य प्रथमः खण्डः)।

ॐ ।

अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तꣳ होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति स होवाच ॥ १ ॥

परमार्थतत्त्वोपदेशप्रधानपरः षष्ठोऽध्यायः सदात्मैकत्वनिर्णयपरतयैवोपयुक्तः । न सतोऽर्वाग्विकारलक्षणानि तत्त्वानि निर्दिष्टानीत्यतस्तानि नामादीनि प्राणान्तानि क्रमेण निर्दिश्य तद्द्वारेणापि भूमाख्यं निरतिशयं

---

१ क. यदुक्त°। २ क. ख. घ. ङ. ट. ड. ण. °सिरि°। ३ क. ख. ग. छ. ट. ण. °मनातिग°। ४ ख. छ. ञ. ण. °तो देहा°। ५ ख. घ. ङ. ज. त. थ. सनात्कु°। ६ ठ. पूर्व पर°। ७ ठ. °ख्यं यमिद°।

तत्त्वं निर्देक्ष्यामीति शाखाचन्द्रदर्शनवदितीमं सप्तमं प्रपाठकमारभते । अनिर्दिष्टेषु हि सतोऽर्वाक्तत्त्वेषु सन्मात्रे च निर्दिष्टेऽन्यदप्यविज्ञातं स्यादित्याशङ्क्य कस्यचित्स्यात्सा मा भूदिति वा तानि निर्दिदिक्षति । अथवा सोपानारोहणवत्स्थूलादारभ्य सूक्ष्मं सूक्ष्मतरं च बुद्धिविषयं ज्ञापयित्वा तदतिरिक्ते स्वाराज्येऽभिषेक्ष्यामीति नामादीनि निर्दिदिक्षति । अथवा नामाद्युत्तरोत्तरविशिष्टानि तत्त्वान्यनितरां च तेषामुत्कृष्टतमं भूमाख्यं तत्त्वमिति तत्स्तुत्यर्थं नामादीनां क्रमेणोपन्यासः । आख्यायिका तु परविद्यास्तुत्यर्था । कथम् । नारदो देवर्षिः कृतकर्तव्यः सर्वविद्योऽपि सन्ननात्मज्ञत्वाच्छुशोचैव किमु वक्तव्यमन्योऽल्पविज्जन्तुरकृतपुण्यातिशयोऽकृतार्थ इति । अथवा नान्यदात्मज्ञानान्निरतिशयश्रेयःसाधनमस्तीत्येतत्प्रदर्शनार्थं सनत्कुमारनारदाख्यायिकाऽऽरभ्यते । येन सर्वविज्ञानसाधनशक्तिसंपन्नस्यापि नारदस्य देवर्षेः श्रेयो न बभूव येनोत्तमाभिजनविद्यावृत्तसाधनशक्तिसंपत्तिनिमित्ताभिमानं हित्वा प्राकृतपुरुषवत्सनत्कुमारमुपससाद श्रेयःसाधनमाप्तवेऽतः प्रख्यापितं भवति निरतिशयप्राप्तिसाधनत्वमात्मविद्याया इति । अधीह्यधीष्व भगवो भगवन्निति किलोपससाद । अधीहि भगव इति मन्त्रः । सनत्कुमारं योगीश्वरं ब्रह्मिष्ठं नारद उपसन्नवान् । तं न्यायत उपसन्नं होवाच यदात्मविषये किंचिद्वेत्थ तेन तत्प्रख्यापनेन मामुपसीदेदमहं जाँन इति ततोऽहं भवतो विज्ञानात्ते तुभ्यमूर्ध्वं वक्ष्यामीत्युक्तवति स होवाच नारदः ॥ १ ॥

षष्ठसप्तमयोरध्याययोः संबन्धं वक्तुकामः षष्ठे वृत्तं कीर्तयति—परमार्थेति । उत्तराधिकारिणं प्रत्यबाधिततत्त्वबोधनं प्रधानं तत्परोऽतीतोऽध्यायः स सतो ब्रह्मणः प्रत्यङ्निश्चयपरत्वेनैव व्याख्यात इत्यर्थः । अध्यायान्तरभूमिकामारचयति—न सत इति । मध्यममधिकारिणं प्रति परम्परया ब्रह्मात्मत्वमुपदेष्टुं सप्तमप्रपाठकप्रवृत्तिरित्यर्थः । नन्वत्रापि ब्रह्मात्मत्वमेवोपदेष्टुमिष्टं चेत्किमिति तर्हि नामादीनि तत्त्वानि निर्दिश्यन्ते तत्राऽऽह—अनिर्दिष्टेष्विति । वाशब्दः शङ्कानिरासार्थः । यद्वा द्वयोरध्याययोरद्वितीयब्रह्मात्मविषयत्वाविशेषेऽपि साक्षात्पारम्पर्याभ्यामपौनरुक्त्यमुक्तं संप्रति नामादीनामुत्तरोत्तरभूयस्त्वविशिष्टानां सन्मात्रविज्ञानेनाविज्ञानादेकविज्ञानेन सर्वविज्ञानमयुक्तमि-

---

१ ङ. °त्वं तन्निर्दे° । २ ङ. °न्द्रनिद° । ३ ख. ग. घ. ञ. ट. ङ. ण. °मादि निर्दि° । ४ क. ग. ट. °वैज्ञा° । ५ क. ब्रह्मनिष्ठं ६ क. ण. ङ. च. ठ. ण. न्यायेनोप° । ७ ख. ग. घ. ङ. च. ट. ड. ण. जानें त° ।

त्यारङ्क्य ब्रह्मविदः सर्वज्ञत्वं स्पष्टीकर्तुमुत्तरग्रन्थोन्तरारम्भ इत्याह—अनिर्दिष्टेष्विति । नामादिसंकीर्तनस्य तात्पर्यान्तरमाह—अथवेति । अधमोऽधिकारी नामादीनि ब्रह्मत्वेनोपास्य तत्फलं च भुक्त्वा क्रमेण साक्षाद्ब्रह्मभावं प्राप्नोतीति प्रदर्शयितुमुत्तरो ग्रन्थ इत्यर्थः । शाखाचन्द्रनिदर्शनन्यायेन मध्यमस्याधिकारिणो ब्रह्मसिद्धिस्वीकारार्थं मध्यमस्याधिकारिणो ध्यानार्थं वा नामादिसंकीर्तनमित्युक्तमिदानीमुत्तममेवाधिकारिणमधिकृत्य भूमस्तुत्यर्थं नामादिवचनमिति मतान्तरमाह—अथवा नामादीति । अध्यायसंबन्धमुक्त्वाऽऽख्यायिकासंबन्धमाह—आख्यायिका त्विति । स्तुत्यर्थत्वमेव प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । तथा च परविद्यया कृतार्थत्वात्तस्याः स्तुतिरत्र विवक्षितेति शेषः । अतीताध्यायादिष्टसदात्मत्वविज्ञानादन्यदेव देवतोपासनं मोक्षसाधनमित्याशङ्क्य तन्निषेधेन सदात्मविज्ञानस्यैव मोक्षसाधनत्वं दृढीकर्तुमाख्यायिका प्रवृत्तेति पक्षान्तरमाह—अथवेति । द्वितीयमाख्यायिकातात्पर्यं प्रपञ्चयति—येनेत्यादिना । सर्वस्यापि ज्ञेयस्य यद्विज्ञानं तस्य साधनमुत्पादनं तत्र शक्त्या संपन्ने वेदवेदाङ्गाभिज्ञत्वं तस्यापीति यावत् । अस्ति हि नारदस्योत्तमाभिजने जन्म । ब्रह्मणो मानसपुत्रत्वादस्ति चोत्तमकर्मविद्याऽस्ति च वृत्तं सदाचरणमस्ति च श्रवणध्यानादि साधनशक्तीनां धर्माधर्मसाधनस्य वा शरीरस्य शक्तेः संपत्तिश्च जन्मादयो निमित्तमस्याभिमानस्य तं त्यक्त्वेति यावत् । इतिशब्दोऽध्यायाख्यायिकयोः संबन्धोक्तिसमाप्त्यर्थः । अध्ययनेन ज्ञानं लक्ष्यते । तथा चाधीष्व ज्ञापयेत्यर्थः । मन्त्र उपसदनस्येति शेषः । न्यायतः समित्पाणिरित्यादिशास्त्रोक्तविधिवशादिति यावत् ॥ १ ॥

ऋग्वेदं भगवोऽध्येमि यजुर्वेदꣳ सामवेदमाथर्वणं
चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ
राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां
ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्प-
देवजनविद्यामेतद्भगवोऽध्येति ॥२॥

ऋग्वेदं भगवोऽध्येमि स्मरामि । यद्वेत्येति विज्ञानस्य पृष्टत्वात् । तथा यजुर्वेदं सामवेदमाथर्वणं चतुर्थं वेदं वेदशब्दस्य प्रकृतत्वादितिहासपुराणं पञ्चमं वेदं वेदानां भारतपञ्चमानां वेदं व्याकरणमित्यर्थः । व्याकरणेन हि

---

१ ग. ङ. ट. °न्थार° । २ अ. ण. °कार्थं म° । ३ ग. ङ. च । ४ क. ग. ङ. °पत्तौ वे° । ५ ख. ङ. ण. °वणाध्या° ।

पदादिविभागश ऋग्वेदादयो ज्ञायन्ते । पित्र्यं श्राद्धकल्पम् । राशिं गणितम् । दैवमुत्पातज्ञानम् । निधिं महाकालादिनिधिशास्त्रम् । वाको वाक्यं तर्कशास्त्रम् । एकायनं नीतिशास्त्रम् । देवविद्यां निरुक्तम् । ब्रह्मण ऋग्यजुःसामाख्यस्य विद्यां ब्रह्मविद्यां शिक्षाकल्पच्छन्दश्चितयः । भूतविद्यां भूततन्त्रम् । क्षत्रविद्यां धनुर्वेदम् । नक्षत्रविद्यां ज्यौतिषम् । सर्पदेवजनविद्यां सर्पविद्यां गारुडं देवजनविद्यां गन्धयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि । एतत्सर्वं हे भगवोऽध्येमि ॥ २ ॥

अध्ययनवाचि पदं स्मरणपरतया कथं व्याख्यातमित्याशङ्क्याऽऽह—यद्वेत्येति । गन्धयुक्तिः कुङ्कुमादिसंपादनम् ॥ २ ॥

सोऽहं भगवो मन्त्रविदेवास्मि नाऽऽत्मविच्छु-
तꣳ ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति
सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं
तारयत्विति तꣳ होवाच यद्वै किंचैतदध्यगीष्ठा
नामैवैतत् ॥ ३ ॥

सोऽहं भगव एतत्सर्वं जानन्नपि मन्त्रविदेवास्मि शब्दार्थमात्रविज्ञानवानेवास्मीत्यर्थः । सर्वो हि शब्दोऽभिधानमात्रमभिधानं च सर्वं मन्त्रेष्वन्तर्भवति । मन्त्रविदेवास्मि मन्त्रविरकर्मविदित्यर्थः । मन्त्रेषु कर्माणीति हि वक्ष्यति । नाऽऽत्मविन्नाऽऽत्मानं वेद्मि । नन्वात्माऽपि मन्त्रैः प्रकाश्यत एवेति कथं मन्त्रविद्भिन्नाऽऽत्मवित् । न । अभिधानाभिधेयभेदस्य विकारत्वात् । न च विकार आत्मेष्यते । नन्वात्माऽप्यात्मशब्देनाभिधीयते । न । "यतो वाचो निवर्तन्ते" "यत्र नान्यत्पश्यति" इत्यादिश्रुतेः । कथं तर्ह्यात्मैवाधस्तात्स आत्मेत्यादिशब्दा आत्मानं प्रत्याययन्ति । नैष दोषः । देहवति प्रत्यगात्मनि भेदविषये प्रयुज्यमानः शब्दो देहादीनामात्मत्वे प्रत्याख्यायमाने यत्परिशिष्टं सदवाच्यमपि प्रत्याययति । यथा सराजिकायां सेनायां छत्रध्वजपताकादिव्यवहितेऽदृश्यमानेऽपि राजन्येष राजा दृश्यत इति भवति शब्दप्रयोगस्तत्र कोऽसौ राजेति राजविशेषनिरूपणायां दृश्यमानेतरप्रत्याख्यानेऽ-

---

१ क. °तयुस्ता । भू° । २ क. ख. ग. घ. ञ. ठ. ड. ढ. ण. °द्यां ज्योति° । ३ क. ग. ङ. च. ट. ड. °त्माऽऽत्म° ।

न्यस्मिन्नदृश्यमानेऽपि राजनि राजधानीतिर्भवेत्तद्वत्। तस्मात्सोऽहं मन्त्रवित्कर्मविदेवास्मि कर्मकार्यं च सर्वं विकार इति विकारज्ञ एवास्मि नाऽऽत्मविन्नाऽऽत्ममकृतिस्वरूपज्ञ इत्यर्थः। अत एवोक्तमाचार्यवान्पुरुषो वेदेति। "यतो वाचो निवर्तन्ते" इत्यादिश्रुतिभ्यश्च। श्रुतमागमज्ञानमस्त्येव हि यस्मान्मे मम भगवद्दृशेभ्यो युष्मत्सदृशेभ्यस्तरत्यतिक्रामति शोकं मनस्तापमकृतार्थबुद्धिनामात्मविदित्यतः। सोऽहमनात्मवित्त्वाद्धे भगवः शोचाम्यकृतार्थबुद्धया संतप्ये सर्वदा तं मा मां शोकस्य शोकसागरस्य पारमन्तं भगवांस्तारयत्वात्मज्ञानोडुपेन कृतार्थबुद्धिमापादयत्वभयं गमयत्वित्यर्थः। तमेवमुक्तवन्तं होवाच यद्वै किंचैतदध्यगीष्ठा अधीतवानसि। अध्ययनेन तदर्थज्ञानमुपलक्ष्यते ज्ञातवानसीत्येतन्नामैवैतत्। "वाचाऽऽरम्भणं विकारो नामधेयम्" इति श्रुतेः॥ २॥

तर्हि सर्वज्ञः स्वतन्त्रस्त्वं कृतकृत्योऽसीत्याशङ्क्याऽऽह—सोऽहमिति। कथं मन्त्रविदित्यस्य कर्मविदिति व्याख्यानमित्याशङ्क्याऽऽह—मन्त्रेष्विति। मन्त्रविदेव नाऽऽत्मविदित्यत्र विरोधं चोदयति—नन्विति। मन्त्रवित्त्वे तत्प्रकाश्यात्मवित्त्वमपि स्यात्तदभावे मन्त्रवित्त्वमपि न युक्तमित्यर्थः। अभिधानमभिधेयमित्येवंरूपस्य भेदस्य विकारत्वेन मिथ्यात्वादात्मनश्च विकारत्वानङ्गीकारान्मन्त्रप्रकाश्यत्वभावान्न विरोध इति परिहरति—नाभिधानेति। आत्मनो विकारत्वाभावेऽप्यभिधेयत्वमेष्टव्यमिति शङ्कते—नन्विति। श्रुत्यन्तरावष्टम्भेन निराचष्टे—नेत्यादिना। आत्मशब्देनाऽऽत्मनोऽभिधेयत्वाभावे वाक्यशेषादिविरोधः स्यादित्याशङ्क्ते—कथं तर्हीति। आत्मशब्देनावाच्यस्याऽऽत्मनस्तेन लक्षणया प्रतिपत्तिसंभवान्नोक्तदोषावकाश इत्युत्तरमाह—नैष दोष इति। विशिष्टे गृहीतशब्दो विशेषणे प्रत्युक्ते यत्तन्मात्रं परिशिष्टं तदवाच्यमपि लक्षणया बोधयतीत्यर्थः। केवलात्मविषयस्याऽऽत्मशब्दस्य तद्दर्शनमन्तरेण विशिष्टात्मदृष्टिमात्रेण कथं प्रयोगः कथं वा तत्प्रयोगेऽपि ततो विवक्षितात्मधीरित्याशङ्क्य दृष्टान्तेन परिहरति—यथेत्यादिना। आत्मनो मुख्यवृत्त्या मन्त्रप्रकाश्यत्वाभावे फलितमाह—तस्मादिति। शब्दार्थज्ञानमात्रेणाऽऽत्मवित्त्वं न भवतीत्यनेनाऽऽचार्योपदेशजनितज्ञानवत एवाऽऽत्मवित्त्वमित्युक्तं तत्र प्रमाणमाह—अत एवेति। औपदेशिकज्ञानविषयत्वं तर्हि स्वीकृतमित्याशङ्क्याऽऽह—यत इति। मा तर्हि तवाऽऽत्मविद्या भूदित्याशङ्क्य शोकनिवृत्त्युपायत्वेन तदपेक्षां सूचयति—श्रुतमिति। आत्म-

---

१ ख. घ. ञ. ङ. ढ. ण. °नेरा°। २ ग. ट. ड. ढ. °वेत्। ३ ख. ग. घ. ङ. च. ञ. ठ. ढ. ङ. ण. सर्वो ४ ख. ञ. °तिभ्यः। ५ घ. ठ. °विद्धे। ६ ख. ञ. ण. °दाङ्गं तं।

ज्ञानोऽपेनाऽऽत्मज्ञानारूपेण प्लवेनेति यावत् । कथं मदीयमर्थज्ञानं सर्वं नाममात्रमिति स्याशङ्क्याऽऽह—वाचाऽऽरम्भणमिति ॥ ३ ॥

नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नामैवैतन्नामोपास्स्वेति ॥ ४ ॥

नाम वा ऋग्वेदो यजुर्वेद इत्यादि नामैवैतत् । नामोपास्स्व ब्रह्मेति ब्रह्मबुद्ध्या । यथा प्रतिमां विष्णुबुद्ध्योपास्ते तद्वत् ॥ ४ ॥

उक्तमुपपादयति—नाम वा इति । तदुपसंहरति—नामैवेति । केन रूपेणेदं नामाऽऽदर्तव्यमित्याशङ्क्याऽऽह—नामेति । उपास्तिप्रकारं दृष्टान्तेन स्फुटयति—यथेति ॥ ४ ॥

स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ५ ॥

इति छान्दोग्योपनिषदि सप्तमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

स यस्तु नाम ब्रह्मेत्युपास्ते तस्य यत्फलं भवति तच्छृणु यावन्नाम्नो गतं नाम्नो गोचरं तत्र तस्मिन्नामविषयेऽस्य यथाकामचारः कामचरणं राज्ञ इव स्वविषये भवति । यो नाम ब्रह्मेत्युपास्त इत्युपसंहारः । किमस्ति भगवो नाम्नो भूयोऽधिकतरं यद्ब्रह्मदृष्टयर्हमन्यदित्यभिप्रायः । सनत्कुमार आह नाम्नो वाव भूयोऽस्त्येवेत्युक्त आह यद्यस्ति तन्मे भगवान्ब्रवीत्विति॥५॥

इति छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

नाम्नि ब्रह्मदृष्ट्योपास्यमाने किं स्यादित्याह—स यस्त्विति । यो नामेत्यादिवाक्यस्य पौनरुक्त्यामित्याशङ्क्याऽऽह—यो नामेति ॥ ९ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

(अथ सप्तमाध्यायस्य द्वितीयः खण्डः) ।

वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाको-वाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्र-विद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाऽऽकाशं चापश्च तेजश्च देवाꣳश्च मनु-ष्याꣳश्च पशूꣳश्च वयाꣳसि च तृणवनस्पतीꣳश्वापदा-न्याकीटपतङ्गपिपीलकं[1] धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति ॥ १ ॥

वाग्वाव । वागितीन्द्रियं जिह्वामूलादिष्वष्टसु स्थानेषु स्थितं वर्णानाम-भिव्यञ्जकम् । वर्णाश्च[2] नामेति नाम्नो वाग्भूयसीत्युच्यते । कार्याद्धि कारणं भूयो दृष्टं लोके यथा पुत्रात्पिता तद्वत् । कथं च वाङ्नाम्नो भूयसीत्याह—वाग्वा ऋग्वेदं विज्ञापयत्ययमृग्वेद इति । तथा यजुर्वेदमित्यादि समानम् । हृदयज्ञं हृदयप्रियम् । तद्विपरीतमहृदयज्ञम् । यद्यदि वाङ्नाभविष्यद्[3]धर्मादि

---

१ ख. ङ. ञ. ट. थ. °पीलिकं । २ क. ख. ढ. वर्णश्च । ३ क. ख. ग. घ. ङ. च. छ. ढ. ड. ण. °व्यद्वा° ।

न व्यज्ञापयिष्यद्यागभावेऽध्ययनाभावोऽध्ययनाभावे तदर्थश्रवणाभावस्तच्छ्रवणाभावे धर्मादि न व्यज्ञापयिष्यन्न विज्ञातमभविष्यदित्यर्थः । तस्माद्यागवेतच्छब्दोच्चारणेन सर्वं विज्ञापयत्यतो भूयसी वाङ् नाम्नस्तस्माद्वाचं ब्रह्मेत्युपास्व ॥ १ ॥

वाग्वाव नाम्नो भूयसीत्युक्तं वाङ्नाम्नोरेकत्वाद्व्याप्यव्यापकत्वानुपपत्तिरित्याशङ्क्य व्याचष्टे—वागितीन्द्रियमिति । जिह्वामूलादिष्वित्यादिशब्देनोरःकण्ठशिरोदन्तौष्ठनासिकातालूनि गृह्यन्ते । वागिन्द्रियस्य वर्णेभ्योऽभिव्यङ्ग्येभ्यो भूयस्त्वेऽपि नाम्नस्तु भूयस्त्वं कुतस्त्यमित्याशङ्क्याऽऽह—वर्णाश्चेति । तयोर्व्यङ्ग्यव्यञ्जकभावेऽपि कथं व्याप्यव्यापकत्वमित्याशङ्क्याऽऽह—कार्याद्धीति । वाचो नाम्नो भूयस्त्वं प्रश्नपूर्वकं प्रपञ्चयति—कथं चेत्यादिना । इतश्च वाचो भूयस्त्वमेष्टव्यमित्याह—यद्यदीति । अन्वयव्यतिरेकाभ्यां तस्या भूयस्त्वे सिद्धे फलितमाह—तस्मादिति ॥ १ ॥

स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्तेऽस्ति भगवो वाचो भूय इति वाचो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य द्वितीयः खण्डः ॥२॥

समानमन्यत् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

स यो वाचमित्याद्यन्यदित्युच्यते ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

(अथ सप्तमाध्यायस्य तृतीयः खण्डः)।

मनो वाव वाचो भूयो यथा वै द्वे वाऽऽमलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवत्येवं वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयीयेत्यथाधीते कर्माणि कुर्वीयेत्यथ कुरुते

१ क. ग. ट. °चारेण स° । २ क. ख. ण. वर्णश्चेति ।

पुत्राश्च पशूंश्चेच्छेयेत्यथेच्छत इमं च लोकममुं
चेच्छेयेत्यथेच्छते मनो ह्यात्मा मनो हि लोको
मनो हि ब्रह्म मन उपास्स्वेति ॥ १ ॥

मनो मनस्यनविशिष्टमन्तःकरणं वाचो भूयः । तद्धि मनस्यमव्यापारवद्वाचं वक्तव्ये प्रेरयति । तेन वाङ् मनस्यन्तर्भवति । यच्च यस्मिन्नन्तर्भवति तत्तस्य व्यापकत्वात्ततो भूयो भवति । यथा वै लोके द्वे वाऽऽमलके फले द्वे वा कोले बदरफले द्वौ वाऽक्षौ विभीतकफले मुष्टिरनुभवति मुष्टिस्त्वे फले व्याप्नोति मुष्टौ हि ते अन्तर्भवतः । एवं वाचं च नाम चाऽऽमलकादिवन्मनोऽनुभवति स यदा पुरुषो यस्मिन्काले मनसाऽन्तःकरणेन मनस्यति मनस्यनं विवक्षाबुद्धिः कथं मन्त्रानधीयीयोच्चारयेयमित्येवं विवक्षां कृत्वाऽधीते तथा कर्माणि कुर्वीयेति चिकीर्षाबुद्धिं कृत्वाऽथ कुरुते पुत्रांश्च पशूंश्चेच्छेयेति प्राप्तीच्छां कृत्वा तत्प्राप्त्युपायानुष्ठानेनाथेच्छते पुत्रादीन्प्राप्नोतीत्यर्थः । तथेमं च लोकममुं चोपायेने*च्छेयेति तत्प्राप्त्युपायानुष्ठानेनाथेच्छते प्राप्नोति । मनो ह्यात्माऽऽत्मनः कर्तृत्वं भोक्तृत्वं च सति मनसि नान्यथेति मनो ह्यात्मेत्युच्यते । मनो हि लोकः सत्येव हि मनसि लोको भवति तत्प्राप्त्युपायानुष्ठानं चेति मनो हि लोको यस्मात्तस्मान्मनो हि ब्रह्म । यत एवं तस्मान्मन उपास्स्वेति ॥ १ ॥

मनःशब्दस्य वृत्तिमात्रविषयत्वं व्यावर्तयति—मन इति । कथं तस्य वाचो भूयस्त्वं तदाह—तद्धीति । वाचो मनस्यन्तर्भावेऽपि कुतो मनसस्तस्या भूयस्त्वं तत्राऽऽह—यच्चेति । मनसो वागादेर्व्याप्तिं दृष्टान्तेन स्पष्टयति—यथेत्यादिना । इतश्च मनसोऽस्ति भूयस्त्वमित्याह—यदेति । विवक्षाबुद्धिस्तां करोतीति शेषः । इच्छेयेतीच्छां कृत्वेति शेषः । तस्याऽऽत्मत्वमुपपादयति—आत्मन इति । तस्य लोकत्वं साधयति—सत्येवेति ॥ १ ॥

स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य
यथाकामचारो भवति यो मनो ब्रह्मेत्युपास्तेऽस्ति
भगवो मनसो भूय इति मनसो वाव भूयोऽस्तीति

---

* अत्र यद्यपि सर्वेषूपलब्धपुस्तकेष्विच्छेयमिति दृश्यते तथाऽपि तल्लेखकप्रमादात् ।

तन्मे भगवान्ब्रवीत्विति ॥ २ ॥
इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

स यो मन इत्यादि समानम् ॥ २ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

॥ २ ॥
इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

(अथ सप्तमाध्यायस्य चतुर्थः खण्डः)।

संकल्पो वाव मनसो भूयान्यदा वै संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि ॥ १ ॥

संकल्पो वाव मनसो भूयान् । संकल्पोऽपि मनस्यनवदन्तःकरणवृत्तिः कर्तव्याकर्तव्यविषयविभागेन सदर्थवत् । विभागेन हि सभर्थिते विषये चिकीर्षाबुद्धिर्वचनस्यैवानन्तरं भवति । कथम् । यदा वै संकल्पयते कर्तव्यादिविषयान्विभजते इदं कर्तुं युक्तमिति, अथ मनस्यति मन्त्रानधीयीयेत्यादि । अथानन्तरं वाचमीरयति मन्त्राद्युच्चारणे । तां च वाचमु नाम्नि नाम्नोच्चारणनिमित्तं विवक्षां कुरुतेरयति नाम्नि नामसामान्ये मन्त्राः शब्दविशेषाः सन्त एकं भवन्त्येकीभवन्तीत्यर्थः । सामान्ये हि विशेषोऽन्तर्भवति । मन्त्रेषु कर्माण्येकं भवन्ति । मन्त्रप्रकाशितानि कर्माणि क्रियन्ते नामन्त्रकमस्ति कर्म । यद्धि मन्त्रप्रकाशनेन लब्धसत्ताकं सत्कर्मब्राह्मणेनेदं कर्तव्यमस्मै फलायेति विधीयते । याऽप्युत्पत्तिर्ब्राह्मणेषु कर्मणां दृश्यते साऽपि मन्त्रेषु लब्धसत्ताकानामेव कर्मणां स्मारणीकरणम् । न हि मन्त्रप्रकाशितं कर्म किंचिद्ब्राह्मणेन उत्पाद्यं दृश्यते । त्रयीविहितं कर्मेति प्रसिद्धं लोके । त्रयीशब्दश्च ऋग्यजुःसामसमाख्या । मन्त्रेषु कर्माणि कवयो वान्यपदन्निति चाऽऽथर्वणे । तस्माद्युक्तं मन्त्रेषु कर्माण्येकं भवन्तीति ॥ १ ॥

---

१ घ. ठ. ड. °स्यनं भ° । २ ख. घ. ञ. ङ. ढ. ण. °रं च वा° । ३ च. ठ. नामोच्चा° । ४ क. ख. ग. घ. ङ. च. ञ. ट. ढ. ण. कर्मणो । ५ ङ. °ह्मणेषूप° । ६ ख. घ. ञ. ङ. ङ. ढ. ण. सामाख्या ।

संकल्पशब्दार्थमाह—संकल्पोऽपीति । का साऽन्तःकरणवृत्तिर्या संकल्पशब्दितेत्याशङ्क्याऽऽह—कर्तव्येति । द्विविधे विषये विभागेन समर्थितेऽपि कथं यथोक्तस्य संकल्पस्य मनसो भूयस्त्वमित्याशङ्क्याऽऽह—विभागेन हीति । संकल्पस्य कारणत्वान्मनसश्च कार्यत्वादतो भूयस्त्वमित्यर्थः । कार्यकारणभावं तयोराकाङ्क्षापूर्वकं व्यक्ती करोति—कथमित्यादिना । मनसः सकाशाद्वाचोऽनन्तरभावित्वे विशेषं दर्शयति—तां चेति । नास्ति मन्त्राणामन्तर्भावं समर्थयति—सामान्ये हीति । कथं मन्त्रेष्वनुपलब्धकर्मणामन्तर्भावस्तत्राऽऽह—मन्त्रेति । कथं कर्म नामन्त्रकमस्तीत्युच्यते ब्राह्मणविहितस्यापि कर्मणो दर्शनादित्याशङ्क्याऽऽह—यद्धीति । ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वादतिस्पष्टमन्त्रानुपलम्भेऽपि कल्प्यते मन्त्रोक्तत्वमित्यर्थः । एतदेव प्रपञ्चयति—याऽपीत्यादिना । एकस्यां शाखायां यत्कर्म मन्त्रेष्वनुपलब्धं तच्छाखान्तरीयमन्त्रप्रकाशितं भविष्यतीत्यत्र हेत्वन्तरमाह—त्रयीति । तथाऽपि कथं मन्त्रप्रकाशितत्वं तत्राऽऽह—त्रयीशब्दश्चेति । मन्त्रेषु कर्माण्यन्तर्भवन्तीत्यत्र श्रुत्यन्तरानुमतिं कथयति—मन्त्रेष्विति ॥ १ ॥

तानि ह वा एतानि संकल्पैकायनानि संकल्पा॑त्मकानि संकल्पे प्रतिष्ठितानि समकल्पतां द्यावापृथिवी समकल्पेतां वायुश्चाऽऽकाशं च समकल्प*न्ताऽऽपश्च तेजश्च तेषा॒ संक्लृप्त्यै वर्ष॒ संकल्पते वर्षस्य संक्लृप्त्या अन्न॒ संकल्पतेऽन्नस्य संक्लृप्त्यै प्राणाः संकल्पन्ते प्राणाना॒ संक्लृप्त्यै मन्त्राः संकल्पन्ते मन्त्राणा॒ संक्लृप्त्यै कर्माणि संकल्पन्ते कर्मणा॒ संक्लृप्त्यै लोकः संकल्पते लोकस्य संक्लृप्त्यै सर्व॒ संकल्पते स एष संकल्पः संकल्पमुपास्स्वेति ॥ २ ॥

तानि ह वा एतानि मनआदीनि संकल्पैकायनानि संकल्प एकोऽ-

* यद्यपि सर्वेषु पुस्तकेषु समकल्पन्तामापश्चेति दृष्टं तथाऽपि तल्लेखकप्रमादादिति प्रतिभाति ।

१ क. ख. छ. ण. °रीयं म° । २ ग. घ. ज. झ. ट. ठ. थ. °ल्पात्मनि ।

यनं गमनं प्रलयो येषां तानि संकल्पैकायनानि संकल्पात्मकान्युत्पत्तौ संकल्पे प्रतिष्ठितानि स्थितौ समकल्पतां संकल्पं कृतवत्यावित्र हि द्यौश्च पृथिवी च द्यावापृथिवी द्यावापृथिव्यौ निश्चले लक्ष्येते[1] । तथा समकल्पेतां वायुश्चाऽऽकाशं चैतावपि संकल्पं कृतवन्तावित्र तथा * समकल्पेतामाऽऽपश्च तेजश्च स्वेन रूपेण निश्चलानि लक्ष्यन्ते । यतस्तेषां द्यावापृथिव्यादीनां संकल्पनिमित्तं वर्षं संकल्पते । समर्थं भवति । तथा वर्षस्य संकल्पनिमित्तमन्नं संकल्पते । वृष्टेर्ह्यन्नं भवत्यन्नस्य संकल्पनिमित्तं प्राणाः संकल्पन्ते । अन्नमया हि प्राणा अन्नोपष्टम्भकाः । " अन्नं दाम " इति हि श्रुतिः । तेषां संकल्पनिमित्तं मन्त्राः संकल्पन्ते । प्राणवान्हि मन्त्रानधीते । बाबलः । मन्त्राणां हि संकल्पनिमित्तं कर्माण्यग्निहोत्रादीनि संकल्प्यन्तेऽनुष्ठीयमानानि मन्त्रप्रकाशितानि समर्थानि भवन्ति फलाय । ततो लोकः फलं संकल्पते[2] कर्मकर्तृसमवायितया समर्थं भवतीत्यर्थः । लोकस्य संकल्पनिमित्तं सर्वं जगत्संकल्पते स्वरूपावैकल्याय । एतद्धीदं सर्वं जगद्यत्फलावसानं तत्सर्वं संकल्पमूलम् । अतो विशिष्टः स एष संकल्पः । अतः संकल्पमुपास्स्वेत्युक्त्वा फलमाह तदुपासकस्य ॥ २ ॥

तथाऽपि कथं संकल्पस्य भूयस्त्वमित्याशङ्क्याऽऽह—तानीति । अयनपर्यायेणोक्तगमनस्य क्रियात्वं व्यावर्तयति—प्रलय इति । इतश्च संकल्पस्याप्यस्ति महत्त्वमित्याह—समकल्पतामिति । यतो द्यावापृथिव्यादिषु महत्त्वेऽपि संकल्पानुवृत्तिर्दृश्यतेऽतोऽपि तस्य महत्त्वं गम्यते न केवलं कारणत्वादेवेत्यर्थः । इतश्च तस्य महत्त्वमेष्टव्यमित्याह—तेषामिति । वृष्टेर्द्युलोकादिकार्यत्वात्तदीयसंकल्पस्य तन्निमित्तत्वोपचारात्तस्य भूयस्त्वसिद्धिरित्यर्थः । वृष्टिवशादन्नं समर्थं भवतीत्यत्र प्रसिद्धिं प्रमाणयति—वृष्टेर्ह्यन्नमिति । अन्नाधीनं प्राणसामर्थ्यमित्यत्र हेतुमाह—अन्नमया हीति । आपोमयः प्राण इत्युक्त्वात्कथमन्नमयत्वमित्याशङ्क्याऽऽह—अन्नोपष्टम्भका इति । तत्र वाजसनेयकश्रुतिं प्रमाणयति—अन्नमिति । प्राणानां मन्त्राध्ययनकारणत्वं व्युत्पादयति—प्राणवानिति । ततो मन्त्रप्रकाशितकर्मवशादिति यावत् । कर्मफलवशा-

* क. पुस्तके कल्पतामाप इति वर्तते । अयमपपाठ इति प्रतिभाति ।

१ घ., ठ. °ल्पात्मान्यु° । २ ठ. ड. °ते ईश्वरेण वा संकल्प्यते इवेति सर्वथा संकल्पः स्तूयते सं° । ग. घ. ङ. च. ट. ठ °ते सं° । ३ घ. ठ. °वती इव । ४ ख. ग. घ. ङ. च. ञ. ट. ठ.ड. ढ ण. °ल्पन्तामाप° । ५ ख. घ. ङ. च. ञ. ङ. ढ. ण. °प्त्यै संकल्प्यते सं° । ६ ञ. ठ अन्नमदा° । ७ ञ. °मर्थानि भ° । ८ ग. घ. ङ. च. ट. ठ. ड. ढ. °ते कर्तृ° ।

ज्जगतः सर्वस्यावैकल्येऽपि कथं संकल्पस्य महत्त्वमित्याशङ्क्याऽऽह—एतद्धीति । तन्महत्त्वे फलितमाह—अत इति ॥ २ ॥

स यः संकल्पं ब्रह्मेत्युपास्ते क्लृप्तान्वै स लोकान्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावत्संकल्पस्य गतं तत्रास्य यथाकामचारो भवति यः संकल्पं ब्रह्मेत्युपास्तेऽस्ति भगवः संकल्पाद्भूय इति संकल्पाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ३ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

स यः संकल्पं ब्रह्मेति ब्रह्मबुद्ध्योपास्ते क्लृप्तान्वै धात्राऽस्येमे लोकाः फलमिति क्लृप्तान्समर्थितान्संकल्पितान्स विद्वान्ध्रुवान्नित्यानत्यन्ताध्रुवापेक्षया ध्रुवश्च स्वयम् । लोकिनो ह्यध्रुवत्वे लोके ध्रुवत्वकल्पनव्यर्थेति ध्रुवः सन्प्रतिष्ठितानुपकरणसंपन्नानित्यर्थः । पशुपुत्रादिभिः प्रतिष्ठितीति दर्शनात्स्वयं च प्रतिष्ठित आत्मीयोपकरणसंपन्नोऽव्यथमानानमित्रादित्रासरहितानव्यथमानश्च स्वयमभिसिध्यत्यभिप्राप्नोतीत्यर्थः । यावत्संकल्पस्य गतं संकल्पगोचरस्तत्रास्य यथाकामचारो भवति, आत्मनः संकल्पस्य न तु सर्वेषां संकल्पस्येति। उत्तरफलविरोधात् । यः संकल्पं ब्रह्मेत्युपास्त इत्यादि पूर्ववत् ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

आत्मातिरिक्तानां लोकानां कथं नित्यत्वमत आह—अत्यन्तेति । लोकानामेवं ध्रुवत्वमुच्यतां किमिति लोकिनस्तदुच्यते तत्राऽऽह—लोकिनो हीति । कथमुपकरणसंपन्नेषु प्रतिष्ठितशब्दो भवतीत्याशङ्क्याऽऽह—पशुपुत्रादिभिरिति । यावत्संकल्पस्येत्यादिश्रुतेर्विषयसंकोचं दर्शयति—आत्मन इति । संकल्पस्य यावद्गोचरस्तत्रास्य कामचारो भवतीति संबन्धः । निष्कृष्टे संकल्पशब्दे का हानिरित्याशङ्क्याऽऽह—उत्तरेति । यदि संकल्पमात्रस्य गोचरे संकल्पोपासकस्य कामचारो भवति तर्हि सर्वसंकल्पस्य विचित्रतया सर्वगोचरत्वसंभवाद्य द्विचित्तस्य गतमित्यादिना वक्ष्यमाणफलं विरुध्येत । न हि संकल्पोपासनादेव सर्वस्मिन्फले सिद्धे चित्ताद्यु-

---

१ क. घ. संक्लृप्तान् । २ ङ. °त्वे व्यर्था लोकानां ध्रुवतेति ।

सनं तत्फलं वा पृथक्कथयितुमुचितमतो यावत्संकल्पस्येत्यादिश्रुतेरुक्तः संकोचो युक्त इत्यर्थः ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

(अथ सप्तमाध्यायस्य पञ्चमः खण्डः) ।

चित्तं वाव संकल्पाद्भूयो यदा वै चेतयतेऽथ संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि ॥ १ ॥

चित्तं वाव संकल्पाद्भूयः । चित्तं चेतयितृत्वं प्राप्तकालानुरूपबोधवत्त्वमतीतानागतविषयप्रयोजननिरूपणसामर्थ्यं च तत्संकल्पादपि भूयः । कथम् । यदा वै प्राप्तं वस्त्विदमेवं प्राप्तमिति चेतयते तदा दानाय वाऽपोहाय वाऽथ संकल्पयतेऽथ मनस्यतीत्यादि पूर्ववत् ॥ १ ॥

चित्तशब्दस्य मनःशब्देन पुनरुक्तिं परिहरति—चित्तं चेतयितृत्वमिति । तस्याऽऽत्मत्वं व्यावर्तयति—प्राप्तेति । इदं वस्त्वेवं प्राप्तमिति प्राप्तकालवस्तुनो वस्त्वनुरोधी चेतनाख्यो वृत्तिविशेषस्तद्वत्त्वं चित्तत्वमित्यर्थः । अतीतं भोजनं तृप्तिसाधनं दृष्टं भोजनत्वादागामिनोऽपि तस्य तदेव प्रयोजनमिति निरूपणसामर्थ्यं चित्तमिति प्रसिद्धमित्याह—अतीतेति । यथोक्तस्य चित्तस्य संकल्पाद्भूयस्त्वं प्राप्तपूर्वत्वं व्युत्पादयति—कथमित्यादिना । संकल्पप्रकरणं परामृशति—पूर्ववदिति ॥ १ ॥

तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविदचित्तो भवति नायमतीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान्नेत्थमचित्तः स्यादित्यथ यद्यल्पविच्चित्तवान्भवति तस्मा एवोत शुश्रू-

---

१ क. ख. छ. ञ. ण. °चितं यतो । २ क. ख. ग. ङ. च. ञ. ठ. ण. °द्भूयोऽस्ति । चि° । ३ ट. वा हानाय । ४ ज्ञ. °पोहनाय । ५ छ. ण. °त्तिशे° । ६ क. ख. छ. ञ. °त्तमि° ।

षन्ते चित्तꣳ ह्येवैषामेकायनं चित्तमात्मा चित्तं
प्रतिष्ठा चित्तमुपास्स्वेति ॥ २ ॥

तानि संकल्पादीनि कर्मफलान्तानि चित्तैकायनानि चित्तात्मानि चित्तोत्पत्तीनि चित्ते प्रतिष्ठितानि चित्तस्थितानीत्यपि पूर्ववत् । किंच चित्तस्य माहात्म्यम् । यस्माच्चित्तं संकल्पादिमूलं तस्माद्यद्यपि बहुविद्बहुशास्त्रादिपरिज्ञानवान्सञ्चितो भवति प्राप्तादिचेतयितृत्वसामर्थ्यविरहितो भवति तं निपुणा लौकिका नाथमस्ति विद्यमानोऽप्यसत्सम एवेत्येनमाहुः । यच्चायं किंविच्छास्त्रादि वेद श्रुतवांस्तदप्यस्य वृथैवेति कथयन्ति । कस्मात् । यद्यपं विद्वान्स्यादित्थमेवमचित्तो न स्यात्तस्मादस्य श्रुतमप्यश्रुतमेवेत्याहुरित्यर्थः । अथाल्पविदपि यदि चित्तवान्भवति तस्मा एतस्मै तदुक्तार्थग्रहणायैवोतापि शुश्रूषन्ते श्रोतुमिच्छन्ति । तस्माच्च चित्तं ह्येवैषां संकल्पादीनामेकायनमित्यादि पूर्ववत् ॥ २ ॥

यथा संकल्पस्य निमित्तत्वे सति स्तुत्यर्थमधिकरणत्वं युक्तं तथा चित्तस्य विभक्तस्य संकल्पादिषु निमित्तत्वेऽपि स्तुत्यर्थमेव तदधिकरणत्वमाह—तानीति । इतश्च चित्तस्यास्ति वैशिष्ट्यमाह—किंचेति । यद्यपि बहुशास्त्रार्थपरिज्ञानवान्संस्तथाऽपि यद्यचित्तो भवतीति योजना । अचित्तस्यासत्समत्वं श्रुतवैयर्थ्यं चेत्युक्तं प्रश्नद्वारा विवृणोति—कस्मादित्यादिना । श्रुतमपीत्यपिशब्देन सत्त्वं गृह्यते । चित्ताभावे श्रुतादेर्वैयर्थ्योक्त्या तद्वैशिष्ट्यमादिष्टमिदानीं तद्वैशिष्ट्ये हेत्वन्तरमाह—अथेति । चित्तवतेऽर्थग्रहणार्थं श्रोतुमिच्छा लोकस्य भवतीत्यत्र हेतुमाह—तस्मादिति ॥२॥

स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान्वै स लोका-
न्ध्रुवान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानान-
व्यथमानोऽभिसिध्यति यावच्चि स्य गतं तत्रा-
स्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपा-
स्तेऽस्ति भगवश्चित्ताद्भूय इति चित्ताद्वाव भू-
योऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ ३ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य पञ्चमः खण्डः ॥५॥

===

१ क. ख. च. ज. ण. °त्पन्नानि । २ ग. ट. ड. °स्थितान्यपि । ३ क. घ. च. ट. °तान्यपि ४ ग. ङ. च. छ. ड. ढ. °वानवि° । ५ ठ. ढ. एव त्व°।

निबन्धनोपचितान्बुद्धिमद्गुणैः स चित्तोपासको ध्रुवानित्यादि चोक्तार्थम् ॥ ३ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

(अथ सप्तमाध्यायस्य षष्ठः खण्डः)।

ध्यानं वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्ती-वाऽऽपो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्यास्तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादाश्शा इवैव ते भवन्त्यथ येऽल्पाः कलहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्यानापादाश्शा इवैव ते भवन्ति ध्यानमुपास्स्वेति ॥ १ ॥ स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽस्ति भगवो ध्यानाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

ध्यानं वाव चित्ताद्भूयः। ध्यानं नाम शास्त्रोक्तदेवताद्यालम्बनेष्वचलो भिन्नजातीयैरनन्तरितः प्रत्ययसंतानः। एकाग्रतेति यमाहुः। दृश्यते च ध्यानस्य माहात्म्यं फलतः। कथम्। यथा योगी ध्याननिश्चलो भवति ध्यानफललाभे, एवं ध्यायतीव निश्चला दृश्यते पृथिवी। ध्यायतीवान्तरिक्षमित्यादि समानमन्यत्। देवाश्च मनुष्याश्च देवमनुष्या मनुष्या एव सन्तो देव-

१ क. "ति च य"।

समा देवमनुष्याः शमादिगुणसंपन्ना मनुष्या देवस्वरूपं न जहतीत्यर्थः। यस्मादेवं विशिष्टं ध्यानं तस्माद्य इह लोके मनुष्याणामेव धनैर्विद्यया गुणैर्वा महतां महत्त्वं प्राप्नुवन्ति धनादिमहत्त्वहेतुं लभन्त इत्यर्थः । ध्यानापादांशा इव ध्यानस्याऽऽपादनमापादो ध्यानफललाभ इत्येतत्तस्यांशोऽवयवः कला कांचिद्ध्यानफललाभकलावन्त इवेवेत्यर्थः। ते भवन्ति निश्चला इव लक्ष्यन्ते न क्षुद्रा इव। अथ ये पुनरल्पाः क्षुद्राः किंचिदपि धनादिमहत्त्वैकदेशमप्राप्तास्ते पूर्वोक्तविपरीताः कलहिनः कलहशीलाः पिशुनाः परदोषोद्भासका उपवादिनः परदोषं सामीप्ययुक्तमेव वदितुं शीलं येषां त उपवादिनश्च भवन्ति। अथ ये महत्त्वं प्राप्ता धनादिनिमित्तं तेऽन्यान्याति प्रभवन्तीति प्रभवो विद्याचार्यराजेश्वरादयो ध्यानापादांशा इवेत्याद्युक्तार्थम् । अतो दृश्यते ध्यानस्य महत्त्वं फलतोऽतो भूयश्चित्तादतस्तदुपास्स्वेत्याद्युक्तार्थम् ॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य षष्ठः खण्डः । ६ ॥

किं तद्ध्यानमित्यपेक्षायामाह—ध्यानं नामेति । अचलत्वं साधयति—भिन्नजातीयैरिति । कथं तस्य चित्ताद्भूयस्त्वमित्याशङ्क्याऽनेकाग्रतादोषोपहतस्यातीतादिफलनिरूपणेन सामर्थ्यादर्शनादेकाग्रतारूपो ध्यानपदार्थश्चेतयितृत्वात्तस्य कारणत्वात्ततो भूयानेवेत्यभिप्रेत्याऽऽह— एकाग्रतेति । इतश्चास्ति तस्य भूयस्त्वमित्याह—दृश्यते चेति । फलद्वारा तन्माहात्म्यं प्रश्नपूर्वकं दृष्टान्तेन स्पष्टयति—कथमित्यादिना । गौरवपरिहारार्थं पक्षान्तरमाह—मनुष्या एवेति । मनुष्याणामेव सतां कुतो देवत्वमित्याशङ्क्याऽऽह—शमादीति । ध्यानफलं नैश्चल्यं तन्महत्सु पृथिव्यादिषु दृष्टं तथा च तद्वैशिष्ट्यमित्यर्थः । तत्रैव हेत्वन्तरमाह—यस्मादिति । धनादिभिर्महत्त्वे हेतुमुत्कृष्टं कर्मेति यावत् । ध्यानस्याऽऽपादनमनुष्ठानं तेन तत्फललाभो लक्ष्यते तस्यांशो येषामस्ति ते तथा । ध्यानफललाभकलावत्त्वमेव स्फुटयति—निश्चला इति । एवकारार्थमाह—नेति । महत्सु पुरुषेषु ध्यानफलानुवृत्तिर्दृष्टेत्यन्वयमुक्त्वा व्यतिरेकमाह—अथेति । व्यतिरेकं दर्शयित्वाऽन्वयमुपसंहरति—अथ ये महत्त्वमिति । महत्सु नैश्चल्यदर्शनमतःशब्दार्थः । महत्त्वफलमाह—अत इति ॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

---

१ ख. ङ. ञ. ड. ण. इत्य°। क. ग. घ. च. ट. ढ. इवे°। २ ग. ङ. च. ट. ठ. °दोषसा°।
३ क. ग. °मीप्ये यु°।

(अथ सप्तमाध्यायस्य सप्तमः खण्डः) ।

विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाऽऽकाशं चापश्च तेजश्च देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयाꣳसि च तृणवनस्पतीञ्छापदान्याकीटपतङ्गपिपीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति ॥ १ ॥

विज्ञानं वाव ध्यानाद्भूयः । विज्ञानं शास्त्रार्थविषयं ज्ञानं तस्य ध्यानकारणत्वाद्ध्यानाद्भूयस्त्वम् । कथं च तस्य भूयस्त्वमित्याह—विज्ञानेन वा ऋग्वेदं विजानात्ययमृग्वेद इति प्रमाणतया यस्यार्थज्ञानं ध्यानकारणम् । तथा यजुर्वेदमित्यादि । किंच पश्वादींश्च धर्माधर्मौ शास्त्रसिद्धौ । साध्वसाधुनी लोकतः स्मार्ते वाऽदृष्टविषयं च सर्वं विज्ञानेनैव विजानातीत्यर्थः । तस्माद्युक्तं ध्यानाद्विज्ञानस्य भूयस्त्वम् । अतो विज्ञानमुपास्स्वेति ॥ १ ॥

विज्ञानस्योक्तभूयस्त्वं प्रश्नपूर्वकं दर्शयति—कथमित्यादिना । यद्यपि प्रमाणतया तज्ज्ञानं शास्त्रार्थज्ञानपूर्वकं तथाऽपि कथं तस्य ततो भूयस्त्वं तत्राऽऽह—यस्येति । इतश्च तस्य ध्यानाद्भूयस्त्वमित्याह—किंचेति । भूयस्त्वफलमाह—अत इति ॥ १ ॥

स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकाञ्ज्ञानवतोऽभिसिध्यति यावद्विज्ञानस्य गतं

---

१ ख. ङ. ञ. ट. ठ. थ. °पौलिकं । २ ख. ग. घ. ङ. च. ञ. ट. ड. ण. °थं त° । ३ ख. घ. च. ञ. ठ. ण. °दि समानम् । किं । ४ ग. ङ. ठ. ण. कथं चेत्या° ।

तत्रास्य यथाकामचारो भवति यो विज्ञानं ब्रह्मेत्युपास्तेऽस्ति भगवो विज्ञानाद्भूय इति विज्ञानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥
इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

===

शृण्वतोऽसनकलं विज्ञानवतो विज्ञानं येषु लोकेषु तान्विज्ञानवतो लोकान्ज्ञानवत्त्वाभिसिध्यत्यभिप्राप्नोति । विज्ञानं शास्त्रार्थविषयं ज्ञानमन्यविषयं नैपुण्यं तद्बुद्धिर्युक्ता[1]ल्लोकान्प्राप्नोतीत्यर्थः । यावद्विज्ञानस्येत्यादि पूर्ववत् ॥२॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

—:⊙:—

ज्ञानविज्ञानशब्दयोरर्थभेदं कथयति—विज्ञानमिति । तथाऽपि लोकानामचेतनानां कुतस्तदुपयोगाश्रयत्वमित्याशङ्क्याऽऽह—तद्बुद्धिरिति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

—:⊙-⊙-⊙-⊙:—

(अथ सप्तमाध्यायस्याष्टमः खण्डः) ।

बलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बली भवत्यथोत्थाता भवत्युत्तिष्ठन्परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन्द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बलेन द्यौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयाꣳसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलकं[3] बलेन[4] लोकस्तिष्ठति बलमुपास्स्वेति ॥ १ ॥

---

१ ख. घ. च. ञ. ठ. ण. °भिव्याप्नो° । २ थ. °लेनाऽऽपोबलेन प° । ३ ख. घ. ज. त. थ. °पीलिकं । ४ ग. लोकास्तिष्ठन्ति ।

स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति यो बलं ब्रह्मेत्युपास्तेऽस्ति भगवो बलाद्भूय इति बलाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

बलं वाव विज्ञानाद्भूयः । बलमित्यन्नोपयोगजनितं मनसो विज्ञेये प्रतिभानसामर्थ्यम् । अनशनाहगादीनि न वै मा प्रतिमान्ति भो इति श्रुतेः । शरीरेऽपि तदेवोत्थानादिसामर्थ्यं यस्माद्विज्ञानवतां शतमप्येकः प्राणी बलवान्कम्पयते यथा हस्ती मत्तो मनुष्याणां शतं समुदितमपि । यस्मादेवमन्नाद्युपयोगनिमित्तं बलं तस्मात्स पुरुषो यदा बली बलेन तद्वान्भवत्यथोत्थातोत्थानस्य कर्तोत्तिष्ठंश्च गुरूणामाचार्यस्य च परिचरिता परिचरणस्य शुश्रूषायाः कर्ता भवति परिचरन्नासन्ना तेषां समीपगोऽन्तरङ्गः प्रियो भवतीत्यर्थः । उपसीदंश्च सामीप्यं गच्छन्नेकाग्रतयाऽऽचार्यस्यान्यस्य चोपदेष्टुर्गुरोर्द्रष्टा भवति । ततस्तदुक्तस्य श्रोता भवति । तत इदमेभिरुक्तमेवमुपपद्यत इत्युपपत्तितो मन्ता भवति । मन्वानश्च बोद्धा भवत्येवमेवेदमिति । तत एवं निश्चित्य तदुक्तार्थस्य कर्ताऽनुष्ठाता भवति । विज्ञाताऽनुष्ठानफलस्यानुभविता भवतीत्यर्थः । किंच बलस्य माहात्म्यं बलेन वै पृथिवी तिष्ठतीत्यादिभूयस्त्वार्थम् ॥ १ ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

यथोक्ते बलशब्दार्थे श्वेतकेतुवाक्यं प्रमाणयति—अनशनादिति । कथं तर्हि शरीरसामर्थ्ये बलशब्दप्रयोगस्तत्राऽऽह—शरीरेऽपीति । तदेवेत्यन्नोपयोगजनितमेवेत्यर्थः । न केवलं कारणत्वादेव बलं विज्ञानाद्भूयः किंतु प्रत्यक्षं च तस्य ततो भूयस्त्वमित्याह—विज्ञानवतामिति । तस्माद्बलस्य विज्ञानाद्भूयस्त्वमिति शेषः । समुदितमपि कम्पयते तथाऽन्यत्रापि द्रष्टव्यमिति संबन्धः । यस्मादेवं बलस्य कारणत्वं विज्ञानस्य च कार्यत्वं तस्मात्ततस्तद्भूयस्त्वमित्येतस्मिन्नर्थे कार्यकारणभावमेतयोरुपपादयति—यस्मादित्यादिना । इतश्च बलस्य भूयस्त्वमेष्टव्यमित्याह—किंचेति ॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

---

१ ख. ञ. ण. विज्ञाते । २ घ. ङ. च. ट. °ज्ञेयप्र° । ३ ठ. °त्याशुक्तार्थ° । ४ ग. ट. °मेव त° ।

(अथ सप्तमाध्यायस्य नवमः खण्डः) ।

अन्नं वाव बलाद्भूयस्तस्माद्यद्यपि दश रात्रीर्नाश्नी-
याद्यद्यु ह जीवेदथवाऽद्रष्टाऽश्रोताऽमन्ताऽबोद्धाऽ-
कर्ताऽविज्ञाता भवत्यथान्नस्याऽऽयै द्रष्टा भवति
श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता
भवति विज्ञाता भवत्यन्नमुपास्स्वेति ॥ १ ॥

अन्नं वाव बलाद्भूयः । बलहेतुत्वात् । कथमन्नस्य बलहेतुत्वमित्युच्यते । यस्माद्बलकारणमन्नं तस्माद्यद्यपि कश्चिद्दश रात्रीर्नाश्नीयात्सोऽन्नोपयोगानिमित्तस्य बलस्य हान्या म्रियते न चेन्म्रियते यद्यु ह जीवेत् । दृश्यन्ते हि मासमप्यनश्नन्तो जीवन्तः । अथवा स जीवन्नप्यद्रष्टा भवति गुरोरपि तत एवाश्रोतेत्यादि पूर्वविपरीतं सर्वं भवति । अथ यदा बहून्यहान्यनशितो दर्शनादिक्रियास्वसमर्थः सन्नन्नस्याऽऽयी । आगमनमायोऽन्नस्य प्राप्तिरित्यर्थः । सोऽस्य विद्यते सोऽन्नस्याऽऽयी । औय इत्येतद्वर्णव्यत्ययेन । अथान्नस्याऽऽया इत्यपि पाठ एवमेवार्थः । द्रष्टेत्यादिकार्यश्रवणात् । दृश्यते ह्यन्नोपयोगे दर्शनादिसामर्थ्यं न तदभावतोऽन्नमुपास्स्वेति ॥ १ ॥

अथवा यदि सोऽमुह्यन्नोऽपि कथंचिज्जीवेत्तदा जीवन्नपि सोऽद्रष्टेति संबन्धः । कथमशनशून्यस्य जीवनमित्याशङ्क्याऽऽह—दृश्यन्त इति । अन्नोपयोगाभावे बलहानिरिति व्यतिरेकमुक्त्वा तदुपयोगे बलं भवतीत्यन्वयं व्याचष्टे—अथेति । अथान्नस्याऽऽय इत्यपि पाठेऽस्ति तत्रान्नस्याऽऽय इत्येतदेव पदमन्नप्राप्तिपरतया व्याख्येयमेकारभकारवेन विपरिणमय्य वर्णव्यत्ययाङ्गीकारादित्याह—औय इत्येतदिति । द्रष्टा श्रोतेत्याद्यन्नकार्यस्य श्रवणादपि पाठान्तरमन्नप्राप्तिपरतया व्याख्येयमित्याह—द्रष्टेत्यादीति । कथं तदन्नकार्यमित्याशङ्क्यान्वयव्यतिरेकौ दर्शयति—दृश्यते हीति ॥ १ ॥

स योऽन्नं ब्रह्मेत्युपास्तेऽन्नवतो वै स लोकान्पा-

---

१ क. °स्याऽऽयै द्र° । २ ग. ङ. च. ट. ठ. ड ढ. कथं ब° । ३ ग. ङ. ट. ड. ढ. °रात्रं नाश्नी° । ४ ख. ग. घ. ञ. ट. ठ. °थ च स । ५ ङ. ड. स । ६ ख. ञ. ण. °तेऽसावन्न° । ७ च. ढ. आया इ° । ८ च. °स्याऽऽय इ° । ९ ग. ट. °न्वयमन्वाच° । १० ग. ट °स्याऽऽया इ° । ११ ग ट. आया इ° ।

नवतोऽभिसिध्यति यावदन्नस्य गतं तत्रास्य यथा-
कामचारो भवति योऽन्नं ब्रह्मेत्युपास्तेऽस्ति भगवोऽ-
न्नाद्भूय इत्यन्नाद्धाव भूयोऽस्तीति तन्मे भगवा-
न्ब्रवीत्विति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य नवमः खण्डः ॥ ९ ॥

फलं चान्नवतः प्रभूतान्नान्वे स लोकान्पानवतः प्रभूतोदकांश्चान्नपानयो-
र्नित्यसंबन्धाल्लोकानभिसिध्यति । समानमन्यत् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य नवमः खण्डः ॥ ९ ॥

॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्य नवमः खण्डः ॥ ९ ॥

(अथ सप्तमाध्यायस्य दशमः खण्डः) ।

आपो वावान्नाद्भूयस्यस्तस्माद्यदा सुवृष्टिर्न भवति
व्याधीयन्ते प्राणा अन्नं कनीयो भविष्यतीत्यथ
यदा सुवृष्टिर्भवत्यानन्दिनः प्राणा भवन्त्यन्नं बहु
भविष्यतीत्याप एवेमा मूर्ता येयं पृथिवी यदन्तरिक्षं
यद्द्यौर्यत्पर्वता यद्देवमनुष्या यत्पशवश्च वयाꣳसि
च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलकमाप
एवेमा मूर्ता अप उपास्स्वेति ॥ १ ॥

आपो वावान्नाद्भूयस्योऽन्नकारणत्वात् । यस्मादेवं तस्माद्यदा यस्मिन्काले
सुवृष्टिः सस्यहिता शोभना वृष्टिर्न भवति तदा व्याधीयन्ते प्राणा दुःखिनो
भवन्ति । किंनिमित्तमित्याहान्नमस्मिन्संवत्सरे नः कनीयोऽल्पतरं भविष्य-
तीति । अथ पुनर्यदा सुवृष्टिर्भवति तदाऽऽनन्दिनः सुखिनो हृष्टाः प्राणाः
प्रमुदिता भवन्त्यन्नं बहु प्रभूतं भविष्यतीति । अल्पं भवत्वान्मूर्तस्यास्यऽऽप

१ क. ख. ग. ङ. ज. ञ. ट. त. थ. वा अन्ना° । २ ख. ञ ठ. त. थ. °पीलिक° । ३ ख.
ग. ञ. ट. ड. ण. वा अन्ना° ।

एवेमा मूर्तामूर्तभेदाकारपरिणता इति मूर्ता येयं पृथिवी यदन्तरिक्षमित्यादि। आप एवेमा मूर्ता अतोऽप उपास्स्वेति ॥ १ ॥

अपां कारणत्वेनाल्पाद्भूयस्त्वमन्वयव्यतिरेकाभ्यां साधयति—यस्मादित्यादिना। अपां सर्वजगदात्मकत्वाच्चाल्पाद्भूयस्त्वमुचितमित्याह—अप्संभवत्वादिति। दधिपयःप्रभृत्याहुतिपरिणामत्वादन्तरिक्षादेरप्संभवत्वमवसेयम्। अपां सर्वमूर्तात्मकत्वमुपसंहरति—इत्यादीति। १ ॥

स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामाꣳस्तृप्तिमान्भवति यावदपां गतं तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य दशमः खण्डः ॥ १० ॥

फलं—स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान्कामान्काम्यान्मूर्तिमतो विषयानित्यर्थः। अप्संभवत्वाच्च तृप्तेरम्बूपासनात्तृप्तिमांश्च भवति। समानमन्यत् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य दशमः खण्डः ॥ १० ॥

॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य दशमः खण्डः ॥ १० ॥

(अथ सप्तमाध्यायस्यैकादशः खण्डः)।

तेजो वाव[1] भूयस्तद्वा एतद्वायुमागृह्याऽऽकाशमभितपति तदाऽऽहुर्निशोचाति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाऽथापः सृजते तदेतदूर्ध्वाभिश्च तिरश्ची-

---

१ घ. च. ठ. ड. ढ. मूर्तिभे°। २ क. ख. छ. ञ. ण. °रम्मयत्व°। ३ ग. छ. ट. °त्याद्या इति। ४ क. ख. घ. ञ. ण. °ति। स. स°। ५ ख. ङ. ञ. ढ. ण. °रब्बपां°। ६ क. ख. ग. ङ. ज. ञ. ट. त. थ. वा अद्भ्यो।

भिश्च विद्युद्भिराह्लादाश्चरन्ति तस्मादाहुर्विद्योतते स्त-
नयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शायि-
त्वाऽथापः सृजते तेज उपास्स्वेति ॥ १ ॥

तेजो वाव[1] द्भ्यो भूयः । तेजसोऽप्कारणत्वात् । कथमप्कारणत्वमित्याह । यस्मादब्योनिस्तेजस्तस्मात्तद्वा एतत्तेजो वायुमागृह्यावष्टभ्य स्वात्मना निश्चलीकृत्य वायुमाकाशमभितपत्याकाशमभिव्याप्नुवत्तपति यदा तदाऽऽहुर्लौकिका निशोचति संतपति सामान्येन जगन्निनपति देहानतो वर्षिष्यति वा इति । प्रसिद्धं हि लोके कारणमभ्युद्यतं दृष्टवतः कार्यं भविष्यतीति विज्ञानम् । तेज एव तत्पूर्वमात्मानमुद्भूतं दर्शयित्वाऽथानन्तरमपः सृजतेऽतोऽप्सृष्ट्वाद्भ्योऽद्भ्यस्तेजः । किंचान्यत्तदेतत्तेज एव स्तनयित्नुरूपेण वर्षहेतुर्भवति । कथम् । ऊर्ध्वाभिश्चोर्ध्वगाभि[2]र्विद्युद्भिस्तिरश्चीभिश्च तिर्यग्गताभिश्च सहाऽऽह्लादाः स्तननशब्दाश्चरन्ति । तस्मात्तद्दर्शनादाहुर्लौकिका विद्योतते स्तनयति वर्षिष्यति वा इत्याद्युक्तार्थम् । अतस्तेज उपास्स्वेति ॥ १ ॥

इतिशब्दस्तदाहुरित्यनेन संबध्यते । वैशब्दार्थं दर्शयति—प्रसिद्धमिति । अग्नेजसोरुक्तं कार्यकारणत्वमुपजीव्य फलितमाह—तेज एवेति । अग्नेजसोर्विधान्तरेण कार्यकारणभावं दर्शयति—किंचान्यदिति । तदेवोपपादयति—ऊर्ध्वाभिरिति । तेजसो भूयस्त्वफलमाह—तेज इति ॥ १ ॥

स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो
लोकान्भास्वतोऽपहततमस्कानभिसिध्यति यावत्ते-
जसो गतं तत्रास्य यथाकामचारो भवति यस्तेजो
ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो
वाव भूयोऽतीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

तस्य तेजस उपासनफलं—तेजस्वी वै भवति । तेजस्वत एव च लोका-

---

१ ख. घ. ङ. च. ञ. ङ. ण. वा अद्भ्यो । २ क. ख. घ. ञ. ण. °भिव्या° । ३ ख. ञ, ट, ण, °गामिनीभि° ।

भ्यास्यतः प्रकाशवतोऽपहततमस्कान्बाह्याध्यात्मिकाज्ञानाद्यपनीततमस्का-
नभिसिध्यति । ऋज्वर्थमटवत् ॥ २ ॥
इति श्रीछान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्यैकादशः खण्डः ॥११॥

तमःशब्दार्थमाह—बाह्येति । बाह्यं तमः शार्वरं प्रसिद्धमाध्यात्मिकमज्ञानरा-
गादि, तदुभयमपहततमस्कानित्यत्र तमःशब्दितमित्यर्थः । अपहतशब्दार्थमाह—अप-
नीतेति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

(अथ सप्तमाध्यायस्य द्वादशः खण्डः) ।

आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचन्द्र-
मसावुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाऽऽह्वयत्याका-
शेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत
आकाशे न रमत आकाशे जायत आकाशमभि-
जायत आकाशमुपास्स्वेति ॥ १ ॥

आकाशो वाव तेजसो भूयान् । वायुसहितस्य तेजसः कारणत्वाद्व्योम्नो
वायुप्रागृक्षेति तेजसा सहोक्तो वायुरिति पृथगिह नोक्तस्तेजसः । कारणं हि
लोके कार्याद्भूयो दृष्टम् । यथा घटादिभ्यो मृत्तथाऽऽकाशो वायुसहितस्य
तेजसः कारणमिति ततो भूयान् । कथम् । आकाशे वै सूर्याचन्द्रमसावुभौ
तेजोरूपौ विद्युन्नक्षत्राण्यग्निश्च तेजोरूपाण्याकाशेऽन्तः । यच्च यस्यान्तर्वर्ति
तदल्पं भूय इतरत् । किंचाऽऽकाशेनाऽऽह्वयति चान्यमन्य आहूतश्चेतर आका-
शेन शृणोत्यन्योक्तं च शब्दमन्यः प्रतिशृणोत्याकाशे रमते क्रीडत्यन्योन्यं
सर्वस्तथा न रमते चाऽऽकाशे वध्वादिवियोग आकाशे जायते न मूर्तेनाव-
रुद्धे । तथाऽऽकाशमभिलक्ष्याङ्कुरादि जायते न प्रतिलोमम् । अत आका-
शमुपास्स्व ॥ १ ॥

नायोः सकाशादाकाशो भूयानिति वक्तव्ये कथं तेजसो भूयानित्युक्तमत आह—
वायुरिति । कारणत्वेऽपि कथमाकाशस्य वायुसहितात्तेजसो भूयस्त्वमित्याशङ्क्याऽऽ-
ह—कारणं हीति । तेजसो वायुसहितादाकाशस्य भूयस्त्वं प्रश्नपूर्वकं प्रकारान्तरेण
दर्शयति—कथमित्यादिना । इतश्चाऽऽकाशस्यास्ति भूयस्त्वमित्याह—किंचेति ।
तद्भूयस्त्वफलमाह—अत इति ॥ १ ॥

१ ठ. 'दिर्ज्याय' । २ ग. छ. ठ. 'युमिति' ।

स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स
लोकान्प्रकाशवतोऽसंबाधानुरुगायवतोऽभिसिध्यति
यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति
य आकाशं ब्रह्मेत्युपास्तेऽस्ति भगव आकाशादूभूय
इत्याकाशाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवी-
त्विति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

फलं शृण्वाकाशवतो वै विस्तारयुक्तान्स विद्वाल्लोकान्प्रकाशवतः। प्रकाशाकाशयोर्नित्यसंबन्धात्प्रकाशवतश्च लोकानसंबाधान्संबाधनं संबाधः संबाधोऽन्योन्यपीडा तद्रहितानसंबाधानुरुगायवतो विस्तीर्णगतीन्विस्तीर्ण-प्रचाराल्लोकानभिसिध्यति । यावदाकाशस्येत्यादयुक्तार्थम् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

कथमाकाशोपासकस्य प्रकाशव्याप्तलोकप्राप्तिरित्याशङ्क्याऽऽह—प्रकाशाकाश-योरिति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

(अथ सप्तमाध्यायस्य त्रयोदशः खण्डः)।

स्मरो वावाऽऽकाशाद्भूयस्तस्माद्यदपि बहव आसी-
रन्न स्मरन्तो नैव ते कंचन शृणुयुर्न मन्वीरन्न
विजानीरन्यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वी-
रन्नथ विजानीरन्स्मरेण वै पुत्रान्विजानाति स्मरेण
पशून्स्मरमुपास्स्वेति ॥ १ ॥

स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य
यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽस्ति

---

१ क विस्तीर्ण° । २ क. ग. ङ. ज. ट. थ. वा आका° ।

भगवः स्मरादूभूय इति स्मराद्वाव भूयोऽस्तीति
तन्मे भगवान्ब्रवीत्विति ॥ २ ॥
इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

स्मरो वाँवाऽऽकाशाद्भूयः । स्मरणं स्मरोऽन्तःकरणधर्मः । स आकाशाद्भूयानिति द्रष्टव्यं लिङ्गव्यत्ययेन । स्मर्तुः स्मरणे हि सत्याकाशादि सर्वमर्थवत्स्मरणवतो भोग्यत्वात् । असति तु स्मरणे सदप्यसदेव । सत्त्वकार्याभावात् । नापि सत्त्वं स्मृत्यभावे शक्यमाकाशादीनामवगन्तुमित्यतः स्मरणस्याऽऽकाशाद्भूयस्त्वम् । दृश्यते हि लोके स्मरणस्य भूयस्त्वं यस्मात्तस्माद्यद्यपि समुदिता बहव एकस्मिन्नासीरन्नु विशेयुस्ते तत्राऽऽसीना अन्योन्यभाषितमपि न स्मरन्तश्चेत्स्युर्नैव ते कंचन शब्दं शृणुयुस्तथा न मन्वीरन्मन्तव्यं चेत्स्मरेयुस्तदा मन्वीरन्स्मृत्यभावान्न मन्वीरंस्तथा न विजानीरन् । यदा वाव ते स्मरेयुर्मन्तव्यं विज्ञातव्यं श्रोतव्यं चाथ शृणुयुरथ मन्वीरन्नथ विजानीरन् । तथा स्मरेण वै मम पुत्रा एत इति पुत्रान्विजानाति स्मरेण पशून् । अतो भूयस्त्वात्स्मरमुपास्स्वेति । उक्तार्थमन्यत् ॥ १ ॥ २ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

—:⊙-⊙-⊙-⊙:—

नपुंसकलिङ्गं श्रुतं पुंल्लिङ्गत्वेन कथं व्याख्यातमित्याशङ्क्य पुंल्लिङ्गोपक्रममाश्रित्याऽऽह—लिङ्गव्यत्ययेनेति । कथं पुनः स्मरणस्याऽऽकाशाद्भूयस्त्वमित्याशङ्क्याह—स्मरणे हीति । अन्वयमुक्त्वा व्यतिरेकं दर्शयति—असतीति । आकाशादेः स्मरणाभावेऽपि सत्त्वमङ्गीकृत्य भोग्यत्वाभावादानर्थक्यमुक्तं संप्रत्यस्मरणे सत्त्वमेव नास्तीत्याह—नापीति । स्मरणस्य भूयस्त्वमनुभवानुसारेण साधयति—दृश्यते हीति । हिशब्दार्थो यस्मादित्युक्तः । स्मरणाभावे श्रवणाद्यभावं व्यतिरेकमुक्त्वा तद्भावे तद्भावमन्वयमाह—यदेति । इतश्चास्ति स्मरणस्य भूयस्त्वमित्याह—तथेति । तद्भूयस्त्वे फलितमाह—अत इति ॥ १ ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

(अथ सप्तमाध्यायस्य चतुर्दशः खण्डः)।

—:⊙:—

आशा वाव स्मराद्भूयस्याशो वै स्मरो मन्त्रा-
नधीते कर्माणि कुरुते पुत्राश्च पशूंश्चेच्छते

१ क. ग. ङ. च. ङ. वा आका° । २ ठ. °रस्या° । ३ ठ. रस्य । ४ क. ग. ठ. °भावत्वान्न ।

इमं च लोकममुं चेच्छत आशामुपास्स्वेति ॥ १ ॥

आशा वाव स्मराद्भूयसी । आशाऽप्राप्तवस्त्वाकङ्क्षाऽऽशा तृष्णा काम इति यामाहुः पर्यायैः सा च स्मराद्भूयसी । कथम् । आशया ह्यन्तःकरणस्थया स्मरति स्मर्तव्यम् । आशाविषयरूपं स्मरन्नसौ स्मरो भवत्यत आशेद्ध आशयाऽभिवर्धितः स्मरभूतः स्मरन्नृगादीन्मन्त्रानधीतेऽधीत्य च तदर्थं ब्राह्मणेभ्यो विधींश्च श्रुत्वा कर्माणि कुरुते तत्फलाशयैव पुत्रांश्च पशूंश्च कर्मफलभूतानिच्छतेऽभिवाञ्छत्याशयैव तत्साधनान्यनुतिष्ठति । इमं च लोकमाशेद्ध एव स्मरँल्लोकसंग्रहहेतुभिरिच्छँते । अमुं च लोकमाशेद्धैः स्मरंस्तत्साधनानुष्ठानेनेच्छँतेऽत आशारँशनावबद्धं स्मराकाशादिनामपर्यन्तं जगच्चक्रीभूतं प्रतिमाणि । अत आशायाः स्मरादपि भूयस्त्वमित्यत आशामुपास्स्व ॥ १ ॥

आशाया भूयस्त्वमाकाङ्क्षाद्वारा व्युत्पादयति—कथमित्यादिना ॥ १ ॥

स य आशां ब्रह्मेत्युपास्त आशयाऽस्य सर्वे कामाः समृध्यन्त्यमोघा हास्याऽऽशिषो भवन्ति यावदाशाया गतं तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्तेऽस्ति भगव आशाया भूय इत्याशाया वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

यस्त्वाशां ब्रह्मेत्युपास्ते शृणु तस्य फलम् । आशया सदोपासितयाऽस्योपासकस्य सर्वे कामाः समृध्यन्ति समृद्धिं गच्छन्ति । अमोघा ह्यस्याऽऽशिषः प्रार्थनाः सर्वा भवन्ति यत्प्रार्थितं सर्वं तदवश्यं भवतीत्यर्थः । यावदाशाया गतमित्यादि पूर्ववत् ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

---

१ क. ख. ग. घ. ङ. च. ञ. ट. ड. ढ. ण. °सी । अप्रा° । २ घ. च. ट. ठ. ब्राह्मणे । ढ. ब्राह्मणं । ३ क. ख. ङ. ञ. ङ. ढ. ण. °ष्टन्निमं । ४ क. ख. ग. ङ. ञ. ट. ठ. ण. °च्छन्नमुं । ५ घ. च. ठ. ङ. °द्धः संस्त° । ६ क. ख. ग. ङ. ञ. ट. °च्छत आ° । ७ क. ख. घ. ढ. °रसना° । ८ क. ग. ङ. ट. ड. ढ. °नाव° ।

(अथ सप्तमाध्यायस्य पञ्चदशः खण्डः)।

प्राणो वा आशाया भूयान्यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वꣳ समर्पितं प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय दादाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः ॥१॥

नामोपक्रममाम्नान्तं कार्यकारणत्वेन निमित्तनैमित्तिकत्वेन चोत्तरोत्तरभूयस्तयाऽवस्थितं स्मृतिनिमित्तसद्भावमाशारशनापाशैर्विपाशितं सर्वं सर्वतो विसमिव तन्तुभिर्यस्मिन्प्राणे समर्पितम् । येन च सर्वतो व्यापिनाऽन्तर्बहिर्गतेन सूत्रे मणिगणा इव सूत्रेण ग्रथितं विधृतं च । स एष प्राणो वा आशाया भूयान् । कथमस्य भूयस्त्वमित्याह दृष्टान्तेन समर्थयंस्तद्भूयस्त्वम् । यथा वै लोके रथचक्रस्यारा रथनाभौ समर्पिता संगोताः संप्रवेशिता इत्येतत् । एवमस्मिञ्छिङ्गसंघातरूपे प्राणे प्रज्ञात्मनि दैहिके मुख्ये यस्मिन्परा देवता नामरूपव्याकरणायाऽऽदर्शादौ प्रतिबिम्बवज्जीवेनाऽऽत्मनाऽनुप्रविष्टा । यश्च महाराजस्येव सर्वाधिकारीश्वरस्य । " कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत " इति श्रुतेः । यस्तु च्छायेवानुगत ईश्वरम् । तद्यथा रथस्यारेषु नेमिरर्पितो नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः । " स एष प्राण एव प्रज्ञात्मा " इति कौषीतकिनाम् । अत एवमस्मिन्प्राणे सर्वं यथोक्तं समर्पितम् । अतः स एष प्राणोऽपरतन्त्रः प्राणेन स्वशक्त्यैव याति नान्यकृतं गमनादिक्रियास्वस्य सामर्थ्यमित्यर्थः । सर्वं क्रियाकारकफलभेदजातं प्राण एव न त्राणाद्बहिर्भूतमस्तीति प्रकरणार्थः । प्राणः प्राणं ददाति । यद्ददाति तत्स्वात्मभूतमेव । यस्मै ददाति तदपि प्राणायैव । अतः पित्राद्यारूयोऽपि प्राण एव ॥ १ ॥

---

१ घ. ञ. वावाऽऽशा°। २ ठ. निबद्धं। ३ ख. घ. ङ. च. झ. ड. ढ. ण. प्रोताः। ४ घ. ङ. च. ठ. ढ. यस्तु। ५ ख. झ. ण. °पिता ना°।

प्राणस्य सर्वास्पदत्वेन भूयस्त्वं कथयति—नामोपक्रममिति । प्रकृतश्रुतिवशात्तदुपक्रमे यस्य जगतोऽस्ति तत्तथा पाठक्रममेवाऽऽश्रित्याऽऽशा चान्ते यस्यास्ति तज्जगत्तथेति विग्रहः । कार्यकारणत्वं क्वाचित्कमुपादानोपादेयत्वं निमित्तनैमित्तिकत्वमपि क्वाचित्कमेव । उत्तरोत्तरभूयस्तया पूर्वस्मान्पूर्वस्मान्नामादेरुत्तरोत्तरवागादिभूयस्त्वेनेति यावत् । स्मृतिनिमित्तः सद्भावो यस्य तत्तथा । आशारूपै रशनापाशैः सर्वतो विगाशितमित्यत्र दृष्टान्तमाह—बिसमिवेति । बिसशब्दो मृणालविषयः । यथोक्तं जगद्यस्मिन्नर्पितं स एष भूयानिति संबन्धः । सर्वस्य जगतस्तस्मिन्नर्पितत्वमेव दृष्टान्तद्वारा स्पष्टयति—येन चेति । सर्वतो व्यापिनेत्यस्यैव स्फुटीकरणमन्तर्बहिर्गतेनेति । प्राणस्याऽऽशायाः सकाशाद्भूयस्त्वमाकाङ्क्षापूर्वकं समर्थयते—कथमित्यादिना । लिङ्गानां व्यष्टीनां संघातः समुदायस्तद्रूपे समष्ट्यात्मनीति यावत् । उपाधितद्वतोरैक्यमभिप्रेत्य विशिनष्टि—प्रज्ञात्मनीति । तस्यैवाध्यात्ममधिभूतमग्निर्देवं चावस्थानं सूचयति—दैहिक इति । प्राणान्तरं व्यावर्तयति—मुख्य इति । यथोक्तेऽस्मिन्प्राणे सर्वं समर्पितमित्युत्तरत्र संबन्धः । प्रज्ञात्मनीति परमात्मोपाधित्वं प्राणस्योक्तं तदुपपादयति—यस्मिन्निति । तस्मिन्सर्वं समर्पितमिति पूर्ववत्संबन्धः । किमिति चक्षुरादिषु विद्यमानेषु मुख्यस्यैव प्राणस्य परमात्मोपाधिकत्वमुपगतमित्याशङ्क्याऽऽह—यश्चेति । प्राणस्येश्वरं प्रति सर्वाधिकारित्वे श्रुत्यन्तरं प्रमाणयति—कस्मिन्निति । ईश्वरं प्रति प्राणस्यैवोपाधिकत्वे हेत्वन्तरमाह—यस्त्विति । अत्रापि पूर्ववदन्वयः । प्राणश्छायावदीश्वरमनुगच्छतीत्यत्र श्रुत्यन्तरं प्रमाणयति—तद्यथेति । भूतमात्राः शब्दादयः पृथिव्यादयश्च विषयाः प्रज्ञामात्रासु शब्दादिबुद्धिषु तज्जनकेन्द्रियेषु वेत्यर्थः । भवतु तासां प्राणेऽर्पितत्वं तथाऽपि कथं प्राणस्य छायावदीश्वरं प्रत्यनुगतिस्तत्राऽऽह—स एष इति । कौषीतकिनां श्रुतिरिति शेषः । प्राणस्य यथोक्तविशेषणवैशिष्ट्यमतःशब्दार्थः । व्याख्यातं भागमनूद्यावशिष्टमंशं व्याकरोति—एवमिति । प्राणः प्राणेन यातीत्यस्यार्थमाह—अत इति । सर्वास्पदत्वादिति यावत् । प्राणः प्राणेन यातीत्यादेः प्राणो ह्येवैतानि सर्वाणि भूतानीत्यन्तस्य तात्पर्यार्थं संक्षिप्य कथयति—सर्वमिति । दातुर्देयस्य संप्रदानस्य च प्राणाभिन्नत्वं प्रकटयति—प्राण इति । तदपीति दीयमानमुच्यते । स्वस्य संप्रदानस्य च प्राणाभिन्नत्वात्प्राणायैवेत्युक्तम् । प्राणस्य सर्वात्मत्वमतःशब्दार्थः ॥ १ ॥

स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाऽऽचार्यं वा ब्राह्मणं वा किंचिद्भृशमिव प्रत्याह

---

१ ग. ट. °शान्नामोप° । २ क. ख. छ. ञ. ण. °धिदै° ।

धिक्त्वाऽस्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति ॥ २ ॥

कथं पित्रादिशब्दानां प्रसिद्धार्थोत्सर्गेण प्राणविषयत्वमिति । उच्यते—सति प्राणे पित्रादिषु पित्रादिशब्दप्रयोगात्तदुत्क्रान्तौ च प्रयोगाभावात् । कथं तदित्याह । स यः कश्चित्पित्रादीनामन्यतमं यदि तं भृशमिव तदननुरूपामिव किंचिद्वचनं त्वंकारादियुक्तं प्रत्याह तदेनं पार्श्वस्था आहुर्विवेकिनो धिक्त्वाऽस्तु धिगस्तु त्वामित्येवम् । पितृहा वै त्वं पितुर्हन्तेत्यादि ॥ २ ॥

प्रसिद्धिरनतिक्रमणीयेति शङ्कते—कथमिति । अन्वयव्यतिरेकाभ्यां पित्रादिशब्दानां प्राणविषयत्वान्न प्रसिद्धेरुल्लङ्घनमित्याह—उच्यत इति । अन्वयव्यतिरेकावेव प्रश्नपूर्वकं प्रकटयति—कथमित्यादिना । पित्रादिषु प्राणे सति पित्रादिशब्दानां प्रयुज्यमानत्वमन्यथा चाप्रयुज्यमानत्वं तदित्युच्यते । त्वंकारादियुक्तमित्यादिपदेन तिरस्कारप्रभेदो गृह्यते । पित्रादिष्वप्रियवादिनं प्रति विवेकिनां धिक्कारवचने हेतुमाह—पितृहेति ॥ २ ॥

अथ यद्यप्येनानुत्क्रान्तप्राणाञ्छूलेन समानं व्यतिषंदहेन्नैवैनं ब्रूयुः पितृहाऽसीति न मातृहाऽसीति न भ्रातृहाऽसीति न स्वसृहाऽसीति नाऽऽचार्यहाऽसीति न ब्राह्मणहाऽसीति ॥ ३ ॥

अथैनानेवोत्क्रान्तप्राणांस्त्यक्तदेहनाथान्यद्यपि शूलेन समासं समस्य व्यतिषंदहेद्व्यत्यस्य संदहेदेवमप्यतिक्रूरं कर्म समासव्यत्यासादिप्रकारेण दहनलक्षणं तद्देहसंबद्धमेव कुर्वाणं नैवैनं ब्रूयुः पितृहेत्यादि । तस्मादन्वयव्यतिरेकाभ्यामवगम्यत एतत्पित्राद्याख्योऽपि प्राण एवेति ॥ ३ ॥

सति प्राणे पित्रादिषु पित्रादिशब्दानां प्रयुज्यमानत्वमित्यन्वयमुक्त्वा व्यतिरेकमाह—अथैनानेवेति । समस्य पुञ्जीकृत्य व्यत्यस्याक्यवान्विभज्येत्यर्थः । यद्यपीत्युपक्रमादेवमपीत्येतत्तथाऽपीत्यस्मिन्नर्थे द्रष्टव्यम् । तदेवातिक्रूरं कर्म विशिनष्टि—समासेति ।

---

१ क. थ. °मसि ॥ २ ॥ २ ख. ग. ङ. ञ. ठ. ण. °था वाऽप्र° । ३ क. °तिसंद° । ४ क. °तिसंद° । ५ ख. ग. घ. ङ. च. ञ. ट. ठ. ड. ण. °सव्यासा° ।

अवयवविभजनमादिशब्दार्थः । तद्देहसंबद्धमित्यत्र तच्छब्दः क्रूरपित्रादिविषयः । यद्यपि त्यक्तप्राणेष्वपि देहेषु पित्रादिशब्दो दृष्टस्तथाऽपि नासौ मुख्यः । तद्विषये क्रूरकर्मानुष्ठानेऽपि शिष्टगर्हादृष्टेरिति भावः । उक्तान्वयव्यतिरेकफलमुपसंहरति—तस्मादिति ॥ ३ ॥

प्राणो ह्येवैतानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्ना-पह्नुवीत ॥ ४ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य पञ्चदशः खण्डः ॥१५॥

तस्मात्प्राणो ह्येवैतानि पित्रादीनि सर्वाणि भवति चलानि स्थिराणि च । स वा एष प्राणविदेवं यथोक्तप्रकारेण पश्यन्फलतोऽनुभवन्नेवं मन्वान उपपत्तिभिश्चिन्तयन्नेवं विजानन्नुपपत्तिभिः संयोज्यैवमेवेति निश्चयं कुर्वन्नित्यर्थः । मननविज्ञानाभ्यां हि संभूतः शास्त्रार्थो निश्चितो दृष्टो भवेत् । अत एवं पश्यन्नतिवादी भवति नामाद्याशान्तमतीत्य वदनशीलो भवतीत्यर्थः । तं चेदब्रूयुस्तं यद्येवमतिवादिनं सर्वदा सर्वैः शब्दैर्नामाद्याशान्तमतीत्य वर्तमानं प्राणमेव वदन्त्येवं पश्यन्तमतिवदनशीलमतिवादिनं ब्रह्मादिस्तम्बपर्यन्तस्य हि जगतः प्राण आत्माऽहमिति ब्रुवाणं यदि ब्रूयुरतिवाद्यसीति । बाढमतिवाद्यस्मीति ब्रूयान्नापह्नुवीत । कस्माद्धयसावपह्नुवीत । यत्प्राणं सर्वेश्वरमयमहमस्मीत्यात्मत्वेनोपगतः ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य पञ्चदशः खण्डः ॥१५॥

प्राणस्यैव पित्रादिसंज्ञकत्वे किं स्यादित्याशङ्क्याऽऽह—तस्मात्प्राणो ह्येवेति । प्राणस्य भूयस्त्वमित्थं व्युत्पाद्य तद्विज्ञानफलमाह—स वा इति । प्राणविदतिवादी भवतीति संबन्धः । कथं प्राणवित्त्वमित्यपेक्षायामाह—एवमिति । सर्वात्मत्वं यथोक्तप्रकारः फलतोऽनुभवः स्वरूपत्वेन साक्षात्कारः । तदनुदर्शनेनैव प्राणवित्त्वे सिध्यति सति किमिति मननविज्ञाने पृथगुपन्यस्येते तत्राऽऽह—मननविज्ञानाभ्यां हीति । उक्तान्वयव्यतिरेकाख्योपपत्तिसहकृताद्वाक्याद्यत्प्राणविषयं ज्ञानं जायते तदत्र विज्ञानं विवक्ष्यते । तत्फलसाक्षात्करणं दर्शनमिति भेदः । मननविज्ञाने विना दर्शनासंभवोऽत्र शब्दार्थः । एवं मननादिद्वारेणेति यावत् । अतिवादित्वं व्युत्पादयति—नामादीति । नापह्नुवी

१ ङ. °णं ब्रु° ।

तेत्युक्तं व्यक्ती करोति—कस्मादिति । यद्यस्मादयं विद्वानात्मत्वेन सर्वेश्वरं प्राणोऽस्मीत्युपगतवांस्तस्मादपह्नवे हेत्वभावादात्मनोऽतिवादित्वं नापह्नुवीतेति(त्यर्थः) ॥४॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

(अथ सप्तमाध्यायस्य षोडशः खण्डः) ।

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति ॥ १ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य षोडशः खण्डः ॥१६॥

स एष नारदः सर्वातिशयं प्राणं स्वमात्मानं सर्वात्मानं श्रुत्वा नातः-परमस्तीत्युपरराम । न पूर्ववत्किमस्ति भगवः प्राणाद्भूय इति पप्रच्छ । यतस्तमेवं विकारानृतब्रह्मविज्ञानेन परितुष्टमकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं शिष्यं मिथ्याग्रहविशेषाद्विपच्यावयन्नाह भगवान्सनत्कुमारः । एष तु वा अतिवदति यमहं वक्ष्यामि न प्राणविदतिवादी परमार्थतः । नामाद्यपेक्षं तु तस्यातिवादित्वम् । यस्तु भूमाख्यं सर्वातिक्रान्तं तत्त्वं परमार्थसत्यं वेद सोऽतिवादीत्यत आह-एष तु वा अतिवदति यः सत्येन परमार्थसत्यविज्ञानवत्तयाऽतिवदति । सोऽहं त्वां प्रपन्नो भगवन्सत्येनातिवदानि । तथा मां नियुनक्तु भगवान्यथाऽहं सत्येनातिवदानीत्यभिप्रायः । यद्येवं सत्येनातिवदितुमिच्छसि सत्यमेव तु तावद्विजिज्ञासितव्यमित्युक्त आह नारदः । तथाऽस्तु तर्हि सत्वं भगवो विजिज्ञासे विशेषेण ज्ञातुमिच्छेयं त्वत्तोऽहमिति ॥ १ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य षोडशः खण्डः ॥१६॥

अत्र प्राणान्तमुपदेशं श्रुत्वा नारदस्य तूष्णींभावे किं कारणमित्याशङ्कायामाह—स एष इति । कथं तस्योपरतिरवगतेत्याशङ्क्याऽऽह—न पूर्ववदिति । किमिति

१ ग. घ. ङ. च. ठ. ड. ढ. ण. °ज्ञा° । २ ख. घ ञ. ठ. ण. °र्थवादी । ना° । ३ क. ङ, ड. °सत्सत्य° । घ. च. ढ. °सत्यत्मावि° ।

तर्हि प्राप्तायामुपेक्षायां स्वयमेवाऽऽचार्यो व्युत्पादयतीत्याशङ्क्याऽऽह—तमेवमिति । एतस्माज्जायते प्राण इति श्रुत्यन्तरात्प्राणस्य विकारत्वेनानृतत्वं वाचाऽऽरम्भणं विकारो नामधेयमित्युक्तम् । तस्मिन्ननृते प्राणे ब्रह्मणि विज्ञानं तेनेति यावत् । परितुष्टत्वे कथमकृतार्थत्वमित्याशङ्क्य मिथ्याज्ञानशालित्वादित्याह—परमार्थेति । न च तस्योपेक्षार्हत्वमित्याह—योग्यमिति । मिथ्याग्रहविशेषो नास्ति प्राणात्परमित्यभिमानः । कथं तर्हि प्राणविदोऽतिवादित्वमुक्तं तत्राऽऽह—नामादीति । कस्तर्हि परमार्थतोऽतिवादीत्याशङ्क्याऽऽह—यस्त्विति । सोऽतिवादीति यतः सनत्कुमारस्याभिप्रायोऽत एवाऽऽहेति योजना । ननु नारदस्य नाद्यापि सत्यविज्ञानमुत्पन्नं कथं सत्येनातिवदानीति पृच्छति तत्राऽऽह—तथेति ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य षोडशः खण्डः ॥ १६ ॥

अथ सप्तमाध्यायस्य सप्तदशः खण्डः) ।

यदा वै विजानात्यथ सत्यं वदति नाविजानन्सत्यं वदति विजानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति ॥ १ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

यदा वै सत्यं परमार्थतो विजानातीदं परमार्थतः सत्यमिति, ततोऽनृतं विकारजातं वाचाऽऽरम्भणं हित्वा सर्वविकारावस्थं सदेवैकं सत्यमिति तदेवाथ वदति यद्वदति । ननु विकारोऽपि सत्यमेव । नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः । " प्राणा वै सत्यं तेषामेष सत्यम् " इति श्रुत्यन्तरात् । सत्यमुक्तं सत्यत्वं श्रुत्यन्तरे विकारस्य न तु परमार्थापेक्षमुक्तं किं तर्हीन्द्रियविषयत्वापेक्षं सच्च त्यच्चेति सत्यमित्युक्तं तद्द्वारेण च परमार्थसत्यस्योपलब्धिर्विवक्षितेति । प्राणा वै सत्यं तेषामेष सत्यमिति चोक्तम् । इहापि तदिष्टमेव । इह तु प्राणविषयात्परमार्थसत्यविज्ञानाभिमानाद्व्युत्थाप्य नारदं यत्सदेव सत्यं परमार्थतो भूमाख्यं तद्विज्ञापयिष्यामीत्येष विशेषतो विव-

---

१ ग. ठ. °मिति युक्तं ।

क्षितोऽर्थः । नाविजानः सत्यं वदति यस्त्वविजानन्वदति सोऽग्न्यादिशब्दे-नाग्न्यादीन्परमार्थसद्रूपान्मन्यमानो वदति न तु ते रूपत्रयव्यतिरेकेण पर-मार्थतः सन्ति । तथा तान्यपि रूपाणि सदपेक्षया नैव सन्तीत्यतो नावि-जानन्सत्यं वदति । विजानन्नेव सत्यं वदति । न च तत्सत्यविज्ञानमविजि-ज्ञासितममार्थितं ज्ञायत इत्याह—विज्ञानं त्वेव विजिज्ञासितव्यमिति । यद्येवं विज्ञानं भगवो विजिज्ञास इति । एवं सत्यादीनां चोत्तरोत्तराणां करोत्य-न्तानां पूर्वपूर्वहेतुत्वं व्याख्येयम् ॥ १ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य सप्तदशः खण्डः ॥१७॥

यदा वै विजानातीत्यादिवाक्यं व्याकुर्वन्नुत्तरमाह—यदेति । यदि विश्वं सद्रूपा-दनुगताद्भिन्नमसदेव स्याद्यदि त्वभिन्नं सन्मात्रमेव परमार्थसत्यं सिध्येदिति परमार्थतः सत्यं यदेव विजानातीत्यर्थः । विज्ञानप्रकारमभिनयति—इदमिति । ततस्तदाऽनृतं विकारजातं हित्वा सदेव सत्यमिति कृत्वा यद्वदति तत्तदेव वदतीति योजना । सत्य-विज्ञानस्य तद्वदनं प्रति हेतुत्वद्योतनार्थोऽथशब्दः । श्रुत्यन्तरावष्टम्भेन भेदाभेदवादी शङ्कते—नन्विति । किं बृहदारण्यकश्रुत्या विकारस्य सत्यत्वमुक्तमित्येतावन्मात्रमु-च्यते किंवा परमार्थसत्यत्वमिति विकल्प्याऽऽद्यमङ्गी करोति—सत्यमिति । द्वितीयं दूषयति—न त्विति । भेदाभेदयोर्विरोधादेकोपाधावयोगाद्विकारस्य च रज्जुसर्पवन्मि-थ्यात्वानुमानादत्यन्तबाध्यत्वाभिप्रायेण सत्यत्वं श्रुत्यन्तरेणैवोक्तमित्यर्थः । कथं तर्हि प्राणादिषु सत्यत्वमुक्तमित्याशङ्क्याङ्गीकारं स्फोरयति—किं तर्हीति । इन्द्रिय-जनितसद्बुद्धिविषयत्वापेक्षं भूतत्रयं सदित्युच्यते । तद्विषयत्वापेक्षं भूतद्वयं त्यदिति व्यवह्रियते । तथा च भूतपञ्चकं सच्च त्यच्चेति व्युत्पाद्य सत्यमिति यथोक्तं तथा तद्बीजभूतयोर्नामरूपयोस्तदात्मकत्वाच्च प्राणानां सत्यत्वं व्यावहारिकमिष्टमित्यर्थः । इतश्च प्राणादिषु मिथ्याभूतेष्वपि सत्यश्रुतिविरुद्धेत्याह—तद्द्वारेणेति । प्राणादीनां व्यावहारिकसत्यत्वानुवादद्वारेणाध्यारोपापवादन्यायेन परमार्थसत्यस्य ब्रह्मणोऽवगति-र्विवक्षितेति कृत्वा तेष्वपि सत्यत्वश्रुतिरविरुद्धेत्यर्थः । यथोक्तोऽर्थो विवक्षितो बृहदार-ण्यकश्रुतावित्यत्र गमकमाह—प्राणा वा इति । ननु श्रुत्यन्तरे विकारस्यापि व्याव-हारिकं सत्यत्वमिष्टं प्रकृते तु न तदिष्यते भूम्न एव सत्यत्वाङ्गीकारात्तथा च विरो-धतादवस्थ्यमत आह—इहापीति । यदि प्राणस्यापि व्यवहारतः सत्यत्वमुपगतं किं तर्हि सनत्कुमारस्य विवक्षितमित्याशङ्क्याऽऽह—इह त्विति । यदा वै विजानात्यथ सत्यं वदतीति यदुच्यारूयातं तदन्वयव्यतिरेकाभ्यां स्फुटयन्नादौ व्यतिरेकमाह—नावि-जानन्निति । परमार्थसत्यमविजानन्नपि वदत्यग्न्यादीनित्याशङ्क्याऽऽह—यस्त्विति ।

---

१ क. ख. छ. ञ. ण. °मुच्येत किं ।

तर्हि कथं सदेव परमार्थसत्यमिति वदतोऽभीष्टसिद्धिरित्याशङ्क्याऽऽह—न त्विति । तान्येव तर्हि रूपाणि पृथग्विधन्ते नेत्याह—तथेति । अतोऽस्य नास्ति सत्यवादित्वं किंत्वसत्यवादित्वमेवेत्युपसंहरति—इत्यत इति । व्यतिरेकं दर्शयित्वाऽन्वयमन्वाचष्टे—विजानन्नेवेति । अस्तु तर्हि सत्यविज्ञानपूर्वकमतिवादित्वमित्याशङ्क्याऽऽह—न चेति । यद्येवं जिज्ञासाद्वारा सत्यविज्ञानं ज्ञेयमित्येवमिष्टं चेदित्यर्थः । सत्यवदनं प्रति सत्यविज्ञानस्य यथा कारणत्वमुक्तं तथा पूर्वस्य पूर्वस्योत्तरमुत्तरं कारणत्वेन द्रष्टव्यमित्यतिदिशति—एवमिति ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य सप्तदशः खण्डः ॥ १७ ॥

(अथ सप्तमाध्यायस्याष्टादशः खण्डः)।

यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्त्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति ॥ १ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

यदा वै मनुत इति । मतिर्मननं तर्को मन्तव्यविषय आदरः ॥ १ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

विज्ञानकारणीभूतां मतिं व्याचष्टे—मतिरिति ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्याष्टादशः खण्डः ॥ १८ ॥

अथ सप्तमाध्यायस्यैकोनविंशः खण्डः)।

यदा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति ॥ १ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्यैकोनविंशः खण्डः ॥ १९ ॥

आस्तिक्यबुद्धिः श्रद्धा ॥ १ ॥

इति छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्यैकोनविंशः खण्डः ॥ १९ ॥

१ ख. °मयाच°।

मननहेतुभूतां श्रद्धां व्याकरोति—श्रद्धासि कर्मेति ॥ १ ॥
इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्यैकोनविंशः खण्डः ॥ १९ ॥

(अथ सप्तमाध्यायस्य विंशः खण्डः) ।

यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्-
धाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञा-
सितव्येति निष्ठां भगवो विजिज्ञास इति ॥ १ ॥
इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य विंशः खण्डः ॥ २० ॥

निष्ठा गुरुशुश्रूषादिस्तत्परत्वं ब्रह्मविज्ञानाय ॥ १ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य विंशखण्डः ॥ २० ॥

श्रद्धाहेतुं निष्ठां व्याचष्टे— निष्ठेति ॥ १ ॥
इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्य विंशः खण्डः ॥२०॥

(अथ सप्तमाध्यायस्यैकविंशः खण्डः) ।

यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति
कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति
कृतिं भगवो विजिज्ञास इति ॥ १ ॥
इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्यैकविंशः खण्डः ॥२१॥

यदा वै करोति कृतिरिन्द्रियसंयमश्चित्तैकाग्र्यंकरणं च । सत्यां हि तस्यां
निष्ठादीनि यथोक्तानि भवन्ति विज्ञानावसानानि ॥ १ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्यैकविंशः खण्डः ॥ २१ ॥

निष्ठानिदानं कृतिं विभजते—कृतिरिति । कथं पुनरेतेषामुत्तरमुत्तरं पूर्वस्य पूर्वस्य
कारणं भवति तत्राऽऽह—सत्यां हीति ॥ १ ॥
इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्यैकविंशः खण्डः ॥ २१ ॥

---

१ ग. ङ. ट. आदरेति । २ क. घ. ङ. °ताकार° । ३ क. ख. ज. ण. °नि संग° । ४ ख. छ. झ. ण. °त्तरं । ५ ख. छ. झ. ण. °वैस्य का° ।

(अथ सप्तमाध्यायस्य द्वाविंशः खण्डः) ।

यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति ॥ १ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य द्वाविंशः खण्डः ॥ २२ ॥

साऽपि कृतिर्यदा सुखं लभते सुखं निरतिशयं वक्ष्यमाणं लब्धव्यं मयेति मन्यते तदा भवतीत्यर्थः । यथा दृष्टफलसुखा कृतिस्तथेहापि नासुखं लब्ध्वा करोति । भविष्यदपि फलं लब्धेत्युच्यते । तदुद्दिश्य प्रवृत्त्युपपत्तेः । अथेदानीं कृत्यादिषूत्तरोत्तरेषु सत्सु सत्यं स्वयमेव प्रतिभासत इति न तद्विज्ञानाय पृथग्यत्नः कार्य इति प्राप्त तत इदमुच्यते । सुखं त्वेव विजिज्ञासितव्यमित्यादि । सुखं भगवो विजिज्ञास इत्यभिमुखीभूतायाऽऽह ॥ १ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य द्वाविंशः खण्डः ॥ २२ ॥

कृतिस्तर्हि कुतो भवतीति तत्राऽऽह—साऽपीति । यदा सुखं लभते तदा भवतीति संबन्धः । ननु सुखलाभस्येन्द्रियसंयमादिव्यतिरेकेणाभावात्कथं सुखलाभाधीना कृतिरित्याशङ्क्याऽऽह—सुखमिति । वक्ष्यमाणसुखलब्धव्यत्वाभिमानादेव यथोक्ता कृतिः सिध्यतीत्यर्थः । सुखं लब्ध्वा करोतीत्येतद्दृष्टान्तेन साधयति—यथेति । दृष्टं फलं पुत्रपश्वादि तज्जन्यसुखोद्देशपूर्विका लोके कृतिर्दृष्टा तथाऽऽत्मन्यपि सुखं लब्धै[ब्धै]व करोति न तु विना तदुद्देशमित्यर्थः । नन्विन्द्रियाणां मनसश्च संयमपूर्वकं सुखं भवति तथा च कथं तल्लब्ध्वा करोतीत्युच्यते तत्राऽऽह—भविष्यदपीति । उत्तरग्रन्थमाकाङ्क्षापूर्वकमुत्थापयति—अथेत्यादिना ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य द्वाविंशः खण्डः ॥ २२ ॥

(अथ सप्तमाध्यायस्य त्रयोविंशः खण्डः) ।

यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति ॥ १ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य त्रयोविंशः खण्डः ॥ २३ ॥

१ क. तत्तद्वै ।

यो वै भूमा महन्निरतिशयं बाहुलिति पर्यायास्तत्सुखम् । ततोर्वाक्सातिशयत्वादल्पम् । अतस्तस्मिन्नल्पे सुखं नास्ति । अल्पस्याधिकतृष्णाहेतुत्वात् । तृष्णा च दुःखबीजम् । न हि दुःखबीजं सुखं दृष्टं ज्वरादि लोके । तस्माद्युक्तं नाल्पे सुखमस्तीति । अतो भूमैव सुखम् । तृष्णादिदुःखबीजत्वासंभवाद्भूम्नः ॥ १ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य त्रयोविंशः खण्डः ॥२३॥

भूम्नोऽर्वागपि वैषयिकं सुखमस्तीत्याशङ्क्याऽऽह—ततोऽर्वागिति । कथमल्पत्वेऽपि सुखत्वं वार्यते तत्राऽऽह—अल्पस्येति । दुःखरूपां तृष्णां प्रत्यल्पस्य सुखस्य हेतुत्वेऽपि कथं स्वयं सुखं न भवतीत्याशङ्क्याऽऽह—न हीति । अल्पस्य सुखस्य दुःखान्तर्भावे सिद्धे फलितमाह—अत इति ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य त्रयोविंशः खण्डः ॥ २३ ॥

(अथ सप्तमाध्यायस्य चतुर्विंशः खण्डः)।

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यꣳ स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति ॥ १ ॥

किंलक्षणोऽसौ भूमेत्याह—यत्र यस्मिन्भूम्नि तत्त्वे नान्यद्द्रष्टव्यमन्येन करणेन द्रष्टाऽन्यो विभक्तो दृश्यात्पश्यति तथा नान्यच्छृणोति । नामरूपयोरेवान्तर्भावाद्विषयभेदस्य तद्ग्राहकयोरेवेह दर्शनश्रवणयोर्ग्रहणमन्येषां चोपलक्षणार्थत्वेन । मननं त्वत्रोक्तं द्रष्टव्यं नान्यन्मनुत इति । प्रायशो मननपूर्वकत्वाद्विज्ञानस्य । तथा नान्यद्विजानाति । एवंलक्षणो यः स भूमा । किमत्र प्रसिद्धान्यदर्शनाभावो भूम्न्युच्यते नान्यत्पश्यतीत्यादिना । अथान्यत्र पश्यत्यात्मानं पश्यतीत्येतत् । किंचातः । यद्यन्यदर्शनाद्यभावमात्रमित्युच्यते तदा द्वैतसंव्यवहारविलक्षणो भूमेत्युक्तं भवति । अथान्यदर्शनादि-

शेषप्रतिषेधेनाऽऽत्मानं पश्यतीत्युच्यते तदैकस्मिन्नेव क्रियाकारकफलभेदोऽभ्युपगतो भवेत् । यद्येवं को दोषः स्यात् । नन्वयमेव दोषः संसारानिवृत्तिः । क्रियाकारकफलभेदो हि संसार इति । आत्मैकत्व एव क्रियाकारकफलभेदः संसारविलक्षण इति चेत् । न । आत्मनो निर्विशेषैकत्वाभ्युपगमे दर्शनादिक्रियाकारकफलभेदाभ्युपगमस्य शब्दमात्रत्वात् । अन्यदर्शनाद्यभावोक्तिपक्षेऽपि यत्रेत्यन्यन्न पश्यतीति च विशेषणे अनर्थके स्यातामिति चेत् । दृश्यते हि लोके यत्र शून्ये गृहेऽन्यन्न पश्यतीत्युक्ते स्तम्भादीनात्मानं चैनं न पश्यतीति गम्यते । एवमिहापीति चेत् । न । तत्त्वमसीत्येकत्वोपदेशादधिकरणाधिकर्तव्यभेदानुपपत्तेः । तथा सदेकमेवाद्वितीयं सत्यमिति षष्ठे निर्धारितत्वात् । " अदृश्येऽनात्म्ये " " न संदृशे तिष्ठति रूपमस्य " " विज्ञातारमरे केन विजानीयात् " इत्यादिश्रुतिभ्यः स्वात्मनि दर्शनाद्यनुपपत्तिः । यत्रेति विशेषणमनर्थकं प्राप्तमिति चेत् । न । अविद्याकृतभेदापेक्षत्वात् । यथा सत्यैकत्वाद्वितीयत्वबुद्धिं प्रकृतामपेक्ष्य सदेकमेवाद्वितीयमिति संख्याद्यनर्हमप्युच्यते । एवं भूम्न्येकस्मिन्नेव यत्रेति विशेषणम् । अविद्यावस्थायामन्यदर्शनानुवादेन च भूम्नस्तद्भावैत्वलक्षणस्य विवक्षितत्वान्नान्यत्पश्यतीति विशेषणम् । तस्मात्संसारव्यवहारो भूम्नि नास्तीति समुदायार्थः । अथ यत्राविद्याविषयेऽन्योऽन्येनान्यत्पश्यतीति तदल्पमविद्याकालभावीत्यर्थः । यथा स्वप्नदृश्यं वस्तु प्राक् प्रबोधात्तत्कालभावीति तद्वत् । तत एव तन्मर्त्यं विनाशि स्वप्नवस्तुवदेव तद्विपरीतो भूमा यस्तदमृतम् । तच्छब्दोऽमृतत्वपरः । स तर्ह्येवंलक्षणो भूमा हे भगवन्कस्मिन्प्रतिष्ठित इत्युक्तवन्तं नारदं प्रत्याह सनत्कुमारः । स्वे महिम्नीति स्व आत्मीये महिम्नि माहात्म्ये विभूतौ प्रतिष्ठितो भूमा । यदि प्रतिष्ठामिच्छसि क्वचिद्यदि वा परमार्थमेव पृच्छसि न महिम्न्यपि प्रतिष्ठित इति ब्रूमः । अप्रतिष्ठितोऽनाश्रितो भूमा क्वचिदपीत्यर्थः ॥ १ ॥

भूम्नः सविशेषत्वं निर्विशेषत्वं वेति प्रश्नपूर्वकं निर्विशेषत्वं निर्धारयति—किमित्यादिना । नान्यच्छृणोतीति स भूमेति संबन्धः । किमिति स्पर्शनादिष्वपि सत्सु दर्शनश्रवणयोरेव निषेध्यत्वेनात्र ग्रहणमित्याशङ्क्याऽऽह—नामेति । अनुक्तानां स्पर्शादीनामुपलक्षणार्थत्वेनात्र द्वयोर्ग्रहणं स्पर्शनाद्यविषयत्वस्यापि भूम्नि भावादित्याह—

---

१ ख. ग. ङ. ट. ड. ण. च प° । २ ङ. ढ. °नन्वप° । ३ ख. घ. ञ. ण. °त्म्येऽनिरुक्तेऽनिलयने न । ४ च. ठ. ड. सत्येक° । ५ च, ठ. °वल° । ६ क. ग, ठ. प्रतिवो° । ७ क. इत्यवोचाम । अ° ।

अन्वेषामिति । अत्रेति लक्षणवाक्योक्तिः । तत्र हेतुमाह—प्रायश इति । यस्मिन्नधिकरणे तत्त्वविचारणायामन्योऽन्यं न पश्यति न शृणोति न मनुते न विजानाति स भूमेति द्रष्टृदृश्यादिविकल्पनिषेधेनाध्यासाधिकरणत्वोपलक्षितस्य विकल्पाविषयत्वमेव भूम्नो लक्षणमित्युपसंहरति—एवमिति । उक्तमेव लक्षणं स्फुटयितुं विमृशति—किमत्रेति । लोकप्रसिद्धदर्शनादिविषयत्वाभावमात्रं भूम्नो लक्षणं तन्निषेधेन ज्ञेयत्वं वेति विमर्शार्थः । कामिन्पक्षे को लाभः को वा दोष इति शिष्यः पृच्छति—किंचात इति । आद्यमनूद्य तत्र लाभं दर्शयति—यदीति । अन्यस्य प्रसिद्धस्य दर्शनादेर्विषयत्वं भूम्नि नास्तीत्येतावन्मात्रं तस्य लक्षणमित्युच्यते चेत्सर्वविकल्पातीतः प्रत्यगात्मा भूमेत्यस्मत्पक्षसिद्धिरित्यर्थः । द्वितीयं पक्षमनूद्य तस्मिन्दोषं सूचयति—अथेत्यादिना । तमेव दोषं प्रश्नपूर्वकं स्फुटयति—यद्येवमित्यादिना । सति क्रियाकारकफलभेदे कथं संसारानिवृत्तिस्तत्राऽऽह—क्रियेति । सति भेदे क्रियादेः संसारत्वं लोके दृष्टं तद्वैलक्षण्यादेकस्मिन्नेव क्रियाकारकभावस्य न संसारतेति चोदयति—आत्मैकत्व इति । एकस्मिन्क्रियादिभेदस्यासंभवं दर्शयन्नुत्तरमाह—नाऽऽत्मन इति । द्वितीयपक्षस्य दुष्टत्वे स्पष्टीकृते प्रथमपक्षस्यापि समानं दुष्टत्वमिति शिष्यः शङ्कते—अन्येति । आद्यपक्षेऽपि न पश्यतीत्येतावतैव दर्शनाद्यभावलाभाद्यत्रेत्यन्यदिति च विशेषणे व्यर्थे स्यातामित्यर्थः । व्यर्थमेवेदृशं वचनमित्याशङ्क्य शिष्यः स्वयमेव ब्रूते—दृश्यते हीति । लोके हि यत्र शून्ये गृहे नान्यत्पश्यति तद्देवदत्तीयमिति प्रयोगो दृश्यते न च तस्य नैरर्थक्यमिष्टं व्यवहाराङ्गत्वात् । यथा च तस्मिन्नयुक्ते धनधान्याद्यदर्शनेऽपि स्तम्भादीन्गृहं च न न पश्यतीति श्रुतस्य नैरर्थक्यं न गम्यते । किंतु तत्र स्तम्भादीनां तस्य च दर्शनमिष्टं तथा यत्र नान्यत्पश्यतीत्यत्रापि विशेषणवैयर्थ्ये समाधानं वक्तव्यमित्यर्थः । किं विशेषणार्थवत्त्वानुपपत्त्या भूम्न्यधिकरणाधिकर्तव्यभावः स्वात्मदर्शनं च वाच्यमित्युच्यते किंवा श्रुतस्य गतिर्वक्तव्येति पृच्छ्यते तत्राऽऽद्यं दूषयति—नेत्यादिना । तथा तत्त्वमसीतिवदित्यर्थः । निर्धारितत्वादधिकरणाधिकर्तव्यभेदानुपपत्तिरिति शेषः । यच्चान्यन्न पश्यतीति विशेषणादात्मनः स्वदर्शनं वाच्यमिति तत्राऽऽह—अदृश्य इति । द्वितीयमनूद्य गतिमाह—यत्रेत्यादिना । परिहारमार्गं दृष्टान्तेन स्पष्टयति—यथेति । एकस्मिन्नेव भूम्नि यत्रेति विशेषणमनर्हमपि प्रयुज्यते प्रसिद्धानुवादेनाधिकरणादिविकल्पाविकल्पत्वलक्षणस्य भूम्नो लक्षणस्य विवक्षितत्वादित्याह—एवमिति । यदविद्यावस्थमन्यदर्शनादि तदनुवादेन नान्यत्पश्यतीति विशेषणं च भूम्नि न विरुध्यते

---

१ क. °थला° । २ क. ख. छ. झ. ण. °तू यथो° । ३ क. ख. छ. झ. ण. °ते चेत्तत्राऽऽ° । ४ ग. ट. यत्त्वन्य° ।

दर्शनाद्यविषयत्वलक्षणस्य भूम्नो लक्षणस्य विवक्षितत्वादित्याह—अविद्येति । लक्षणवाक्यार्थमुपसंहरति—तस्मादिति । दर्शनादिसकलसांसारिकव्यवहाराभावोपलक्षितं तत्त्वं भूमेत्यर्थः । अथ यत्रेत्यादिवाक्यं व्याकरोति—अथेति । परिच्छिन्नस्याविद्याकालभावित्वं दृष्टान्तेन विवृणोति—यथेति । तत एव परिच्छिन्नत्वादिति यावत् । कथं तदमृतमिति भूम्नि तच्छब्दप्रयोगस्तत्राऽऽह—तच्छब्द इति । भूम्नः सुखत्ववचनात्तस्य चाऽऽश्रयं पृच्छति—स तर्हीति । व्यवहारदृष्ट्या प्रश्नो वस्तुदृष्ट्या वेति विकल्प्याऽऽद्यं प्रत्याह—इत्युक्तवन्तमिति । द्वितीयमनूद्य निराकरोति—यदीति ॥ १ ॥

गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं
क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति
होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य चतुर्विंशः खण्डः ॥२४॥

यदि स्वमहिम्नि[3] प्रतिष्ठितो भूमा[4] कथं तर्ह्यप्रतिष्ठ[5] उच्यते । शृणु । गोअश्वादीह[6] महिमेत्याचक्षते । गावश्चाश्वाश्च गोअश्वं द्वंद्वैकवद्भावः । सर्वत्र गवाश्वादि महिमेति प्रसिद्धम् । तदाश्रितस्तत्प्रतिष्ठश्चैत्रो भवति यथा नाहमेवं स्वतोऽन्यं महिमानमाश्रितो भूमा चैत्रवदिति ब्रवीम्यत्र हेतुत्वेनान्यो ह्यन्यस्मिन्प्रतिष्ठित इति व्यवहितेन संबन्धः । किंत्वेवं ब्रवीमीति होवाच स एवेत्यादि ॥ २ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य चतुर्विंशः खण्डः ॥२४॥

पूर्वापरविरोधमाशङ्क्य परिहरति—यदीत्यादिना । भूम्नः स्वतोऽन्यस्मिन्प्रतिष्ठितस्वाभावोऽत्रेत्युच्यते तत्रान्यो ह्यित्यादिवाक्यस्य हेतुत्वेन हेतुना तेन व्यवहितेन नाहमेवं ब्रवीमीत्यस्य संबन्ध इति योजना । कथं तर्हि ब्रवीति भवानित्याशङ्क्याऽऽह—किंत्विति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य चतुर्विंशः खण्डः ॥ २४ ॥

---

१ ख. ञ. °रण्यदा° । २ क. ख. ग. घ. ज. ट. ठ. त. °ति ह ह हो° । ३ ग. घ. ङ. च. छ. ट. ठ. ड. ढ. °हिमप्र° । ४ क. ग. ट. ठ. ड. ढ. °तिष्ठो भू° । ५ ठ. °तिष्ठित इत्युच्य° । ६ ख. ग. ङ. च. ट. ठ. ड. ढ. ण. °दिर्महि° ।

(अथ सप्तमाध्यायस्य पञ्चविंशः खण्डः) ।

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षि-
णतः स उत्तरतः स एवेदꣳ सर्वमित्यथातोऽहंकारा-
देश एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्ता-
दहं दक्षिणतोऽहमुत्तरतोऽहमेवेदꣳ सर्वमिति ॥ १ ॥

कस्मात्पुनः क्वचिन्न प्रतिष्ठित इत्युच्यते । यस्मात्स एव भूमाऽधस्तान्न तद्व्यतिरेकेणान्यद्विद्यते यस्मिन्प्रतिष्ठितः स्यात् । तथोपरिष्टादित्यादि समानम् । सति भूम्नोऽन्यस्मिन्भूमा हि प्रतिष्ठितः स्यान्न तु तदस्ति । स एव तु सर्वम् । अतस्तस्मादसौ न क्वचित्प्रतिष्ठितः । यत्र नान्यत्पश्यतीत्यधिकरणाधिकर्तव्यतानिर्देशात्स एवाधस्तादिति च परोक्षनिर्देशाद्द्रष्टुर्जीवादन्यो भूमा स्यादित्याशङ्क्य कस्यचिन्मा भूदित्ययातोऽनन्तरमहंकारादेशोऽहंकारेणाऽऽदिश्यत इत्यहंकारादेशः । द्रष्टुरनन्यत्वदर्शनार्थं भूमैव निर्दिश्यतेऽहंकारेणाहमेवाधस्तादित्यादिना ॥ १ ॥

अवतारितमेव वाक्यं प्रश्नपूर्वकमवतार्य व्याचष्टे—कस्मादित्यादिना । उक्तमेवार्थं व्यतिरेकद्वारा विवृणोति—सतीति । अहंकारात्मत्वोपदेशस्याभिप्रायमाह—यत्रेति । कोऽसावहंकारेणाऽऽदिश्यत इत्याशङ्क्य प्रयोजनानुवादपूर्वकमाह—द्रष्टुरिति ॥१॥

अथात आत्मादेश एवाऽऽत्मैवाधस्तादात्मोपरिष्टा-
दात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मो-
त्तरत आत्मैवेदꣳ सर्वमिति स वा एष एवं पश्यन्नेवं
मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममि-
थुन आत्मानन्दः स स्वराड्भवति तस्य सर्वेषु
लोकेषु कामचारो भवति । अथ येऽन्यथाऽतो

---

१ क °ति ङि ग्रं° ।

विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषा[२] सर्वेषु लोकेष्वकामचारो भवति ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य पञ्चविंशः खण्डः॥२५॥

अहंकारेण देहादिसंघातोऽप्यादिश्यतेऽविवेकिभिरित्यतस्तदाशङ्क्य मा भूदित्यथानन्तरमात्मादेश आत्मनैव केवलेन सत्स्वरूपेण शुद्धेनाऽऽदिश्यते । आत्मैव सर्वतः सर्वमित्येवमेकमजं सर्वतो व्योमवत्पूर्णमन्यशून्यं पश्यन्स वा एष विद्वान्मननविज्ञानाभ्यामात्मरतिरात्मन्येव रती रमणं यस्य सोऽयमात्मरतिः । तथाऽऽत्मक्रीडः । देहमात्रसाधना रतिर्बाह्यसाधना क्रीडा । लोके स्त्रीभिः सखिभिश्च क्रीडतीति दर्शनात् । न तथा विदुषः, किं तर्ह्यात्मविज्ञाननिमित्तमेवोभयं भवतीत्यर्थः । मिथुनं द्वंद्वजनितं सुखं तदपि द्वंद्वनिरपेक्षं यस्य विदुषः । तथाऽऽत्मानन्दः शब्दादिनिमित्त आनन्दोऽविदुषां न तथाऽस्य विदुषः किं तर्ह्यात्मनिमित्तमेव सर्वं सर्वदा सर्वप्रकारेण च देहजीवितभोगादिनिमित्तबाह्यवस्तुनिरपेक्ष इत्यर्थः । स एवंलक्षणो विद्वाञ्जीवन्नेव स्वाराज्येऽभिषिक्तः पतितेऽपि देहे स्वराडेव भवति । यत एवं भवति तत एव तस्य सर्वेषु लोकेषु कामचारो भवति । प्राणादिषु सर्वभूमिषु तत्रास्येति तावन्मात्रपरिच्छिन्नकामचारत्वमुक्तमन्यराजत्वं चार्थप्राप्तं सातिशयत्वाद्यथाप्राप्तस्वाराज्यकामचारत्वानुवादेन तत्त्वनिवृत्तिरिहोच्यते स स्वराडित्यादिना । अथ पुनर्वेऽन्यथाऽत उत्कर्षदर्शनादन्यथा वैपरीत्येन यथोक्तमेव वा सम्यङ्न विदुस्तेऽन्यराजानो भवन्ति, अन्यः परो राजा स्वामी येषां तेऽन्यराजानस्ते । किंच क्षय्यलोकाः क्षय्यो लोको येषां ते क्षय्यलोकाः । भेददर्शनस्याल्पविषयत्वादल्पं च तन्मर्त्यमित्यवोचाम । तस्माद्ये ह्येतदभिनस्ते क्षय्यलोकाः स्प(द)र्शनानुरूप्येणैव भवन्त्यत एव तेषां सर्वेषु लोकेष्वकामचारो भवति ॥ २ ॥

इति छान्दोग्योपनिषच्छाङ्करभाष्ये सप्तमाध्यायस्य पञ्चविंशः खण्डः॥२५॥

—:⊙-⊙-⊙-⊙:—

अहंकारादेशात्पृथगात्मादेशस्य तात्पर्यमाह—अहंकारेणेति । उक्तात्मविज्ञानवतः कृतकृत्यतामाह—आत्मैवेति । एकमिति सजातीयभेदराहित्यस्योक्तिः । अन्यशून्य-

१ ग. घ. ङ. च. ट. ठ. ड. ढ. °धं तस्य । २ ख. ज. ण. °न्मात्रं प° । ३ घ. च. ठ. °च्छिन्नं का° । ४ क. ग. घ. च. ढ. ठ. °चारित्वं° । ५ ज. घ. ण. °स्वराट्° । ६ ख. घ. क. च. ज. झ. ङ. ढ. ण. °लोकै° ।

मिति विज्ञानीयभेदशून्यत्वमुच्यते . रतिक्रीडयोरवान्तरभेदं दर्शयति—देहमात्रेति । क्रीडा बाह्यसाधनेत्यत्र लोकसंमतिमाह—लोक इति । देहस्य जीविते च भोगत्यागयोश्च निमित्तं बाह्यवस्तु तत्र सर्वत्र निरपेक्षो यदृच्छालाभेष्वासङ्गवर्जितो विद्वानित्याह—देहेति । जीवन्मुक्तिमुक्त्वा विदेहमुक्तिं दर्शयति—स इति । स्वाराज्यं निमित्तीकृत्य फलान्तरमाह— यत एवमिति । स्वाराज्यसर्वलोककामचारयोस्तात्पर्यमाह—प्राणादिष्विति । यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवतीत्यादिना परिच्छिन्नं परतन्त्रं च पूर्वभूमिषु फलमुक्तमत्र तु परमानन्दप्राप्तौ तद्व्यावृत्तिरुच्यते न तु सोपाधिकं रूपमित्यर्थः । फलप्रदर्शनद्वारेण स्तुत्वा विद्याविद्वन्निन्दाद्वारापि तां स्तौति—अथेत्यादिना । ते क्षयलोका भवन्तीति संबन्धः । भेददृष्टीनां विनाशिफलत्वे हेतुमाह—भेददर्शनस्येति । परिच्छिन्नस्य विनाशित्ववचनं तस्मादिति परामृशति ॥ २ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमाध्यायस्य पञ्चविंशः खण्डः ॥ २५ ॥

(अथ सप्तमाध्यायस्य षड्विंशः खण्डः) ।

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशाऽऽत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मतश्चित्तमात्मतः संकल्प आत्मतो मन आत्मतो वागात्मतो नामाऽऽत्मतो मन्त्रा आत्मतः कर्माण्यात्मत एवेदꣳ सर्वमिति ॥ १ ॥

तस्य ह वा एतस्येत्यादि स्वाराज्यं प्राप्तस्य प्रकृतस्य विदुष इत्यर्थः । यावत्सदात्मविज्ञानात्स्वात्मनोऽन्यस्मात्ततः प्राणादेर्नामान्तस्योत्पत्तिप्रलयावभूतां सदात्मविज्ञाने तु सतीदानीं स्वात्मत एव संवृत्तौ तथा सर्वोऽप्यन्यो व्यवहार आत्मत एव विदुषः ॥ १ ।

उक्तविद्यास्तुत्यर्थमेव विदुषः स्रष्टृत्वमाह—तस्येति । तथा विदुषः स्रष्टृत्वव्यवहारेवदित्यर्थः । क्रीड विरन्यो व्यवहारः ॥ १ ॥

तदेष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताꣳ सर्वꣳ ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति स एकधा(धैव) भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः शतं च दश चैकश्च सहस्राणि च विꣳशतिराहार-शुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृति-लम्भे सर्वग्रन्थीनां विमोक्षस्तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान्सनत्कुमारस्तꣳ स्कन्द इत्याचक्षते तꣳ स्कन्द इत्याचक्षते ॥ २ ॥

इति च्छान्दोग्योपनिषदि सप्तमाध्यायस्य षड्विंशः खण्डः॥२६॥

इति च्छान्दोग्योपनिषद्ब्राह्मणे सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

किंच तदेतस्मिन्नर्थ एष श्लोको मन्त्रोऽपि भवति । न पश्यः पश्यतीति पश्यो यथोक्तदर्शी विद्वानित्यर्थः । मृत्युं मरणं रोगं ज्वरादि दुःखतां दुःख-भावं चापि न पश्यति । सर्वं ह सर्वमेव स पश्यः पश्यत्यात्मानमेव सर्वं ततः सर्वमाप्नोति सर्वशः सर्वप्रकारैरिति । किंच स विद्वान्प्राक्सृष्टिप्रभेदादेकधैव भवत्येकधैव च संख्यिधादिभेदैरनन्तभेदप्रकारो भवति सृष्टिकाले । पुनः संहा-रकाले मूलमेव स्वं पारमार्थिकमेकधाभावं प्रतिपद्यते स्वतन्त्र एवेति विद्या फलेन प्रशंसयन्स्तौति । अथेदानीं यथोक्तायाः विद्यायाः सम्यगवभासका-रणं मुखावभासकारणस्येवाऽऽदर्शस्य विशुद्धिकारणं साधनमुपदिश्यते— आहारशुद्धौ । आहियत इत्याहारः शब्दादिविषयविज्ञानं भोक्तुर्भोगायाऽऽ-हियते तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धिः रागद्वेषमो-हदोषैरसंसृष्टं विषयविज्ञानमित्यर्थः । तस्यामाहारशुद्धौ सत्यां तद्भोऽन्तः-करणस्य सत्त्वस्य शुद्धिर्नैर्मल्यं भवति । सत्त्वशुद्धौ च सत्यां यथाभूते

---

१ ठ. तदप्येष । २ क. घ. झ. ञ. थ. °मसः पारं । ३ ङ. ज. ञ. ठ. °स्मनत्कु° । ४ ङ. °व प° । ५ ख. घ. च. ङ. ण. °संस्पृष्टं । ६ ग ङ. ट. ड. ड. °द्धिर्नैर्मल्यं ।

भूमात्मनि ध्रुवाऽविच्छिन्ना स्मृतिरविस्मरणं भवति। तस्यां च लब्धायां स्मृतिलम्भे सति सर्वेषामविद्याकृतानर्थपाशरूपाणामनेकजन्मान्तरानुभवभावनाकठिनीकृतानां हृदयाश्रयाणां ग्रन्थीनां विप्रमोक्षो विशेषेण प्रमोक्षणं विनाशो भवतीति। यत एतदुत्तरोत्तरं यथोक्तमाहारशुद्धिमूलं तस्मात्सा कार्येत्यर्थः। सर्वं शास्त्रार्थप्रशेषत उक्त्वाऽऽख्यायिकामुपसंहरति श्रुतिः—तस्मै मृदितकषायाय वाक्षादिव कषायो रागद्वेषादिदोषः सत्त्वस्य रञ्जनारूपत्वात्स ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितो मृदितो विनाशितो यस्य नारदस्य तस्मै योग्याय मृदितकषायाय तमसोऽविद्यालक्षणात्पारं परमार्थतत्त्वं दर्शयति दर्शितवानित्यर्थः। कोऽसौ। भगवान्—

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥

एवंधर्मा सनत्कुमारः। तमेव सनत्कुमारं देवं स्कन्द इत्याचक्षते कथयन्ति तद्विदः। द्विर्वचनमध्यायपरिसमाप्त्यर्थम्॥ २॥

इति च्छान्दोग्योपनिषच्छांकरभाष्ये सप्तमाध्यायस्य षड्विंशः खण्डः॥ २६॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ छान्दोग्योपनिषद्विवरणे सप्तमोऽध्यायः समाप्तः॥ ७॥

—:⊙:—

न केवलं ब्राह्मणोक्तमिह विद्याफलं किंतु मन्त्रोक्तं चेत्याह—किंचेति। तच्छब्दार्थः सप्तम्या निर्दिश्यते। स च विद्याफलरूपः। न पश्य इति मन्त्रमादाय व्याचष्टे—पश्यतीत्यादिना। सर्वमाप्नोतीति पूर्णता परिच्छेदभ्रमव्यावर्तनेन विवक्षिता न तु क्रिमिकीटकादिभावोऽपुरुषार्थत्वप्रसङ्गादिति द्रष्टव्यम्। विद्यास्तुतिपौष्कल्यार्थं सगुणविद्याफलमपि निर्गुणब्रह्मविदाप्नोतीत्याह—किंचेति। त्रिधा तेजोबन्नरूपेण। शब्दस्पर्शादिरादिशब्दार्थः। विद्यां तत्फलं तदपेक्षितां स्तुतिं चाभिधायाऽऽहारशुद्धावित्यादेस्तात्पर्यमाह—अथेति। रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्नित्यादिस्मृतिमाश्रित्याऽऽहारशब्दं व्याकरोति—आहियत इतीति। कथं तस्याऽऽह्रियमाणत्वं तत्राऽऽह—भोक्तुरिति। कीदृशी तस्य शुद्धिरित्याशङ्क्याऽऽह—रागेति। आहारशुद्धिफलमाह—तस्यामिति। अन्तःकरणशुद्धिफलं कथयति—सत्त्वेति। स्मृतिलाभफलं दर्शयति—तस्यां चेति। भवतीत्याहारशुद्धिरपेक्षितेति शेषः। प्रकृतवाक्य-

---

१ ख. घं. च. ञ, ठ. ण. °रनुस्म°। २ ङ. ङ. ढ. °नर्थायास°। ३ ठ. °याश्रितानां प्र°। ४ क. ख. ङ. ञ. ठ. ड, ढ. ण. सनत्कु°। ५ ख, ग, सनात्कु°। ६ ग. ट. °मिदं वि°। ७ ग, ञ. तु कृमि°।

तात्पर्यमुपसंहरति—यत इति । तस्मै मृदितकषायायेत्यादिवाक्यमवतार्य व्याचष्टे-सर्वमिति । आगतिं गतिपायव्ययौ । तस्यै वैशिष्ट्यान्तरमाह—तमेवेति ॥२॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्य षड्विंशः खण्डः ॥ २६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्द-
ज्ञानकृतायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां सप्तमोऽ-
ध्यायः समाप्तः ॥ ७ ॥

(अथाष्टमाध्यायस्य प्रथमः खण्डः) ।

यद्यपि दिग्देशकालादिभेदशून्यं ब्रह्म सदेकमेवाद्वितीयमात्मैवेदं सर्वमिति षष्ठसप्तमयोरधिगतं तथाऽपीह मन्दबुद्धीनां दिग्देशादिभेदवद्वस्त्वित्येवं भावितां बुद्धिर्न शक्यते सहसा परमार्थविषयां कर्तुमित्यनधिगम्य च ब्रह्म न पुरुषार्थसिद्धिरिति तदधिगमाय हृदयपुण्डरीकदेश उपदेष्टव्यः । यद्यपि सत्सम्यक्प्रत्ययैकविषयं निर्गुणं चाऽऽत्मतत्त्वं तथाऽपि मन्दबुद्धीनां गुणवत्त्वस्येष्टत्वात्सत्यकामादिगुणवत्त्वं च वक्तव्यम् । तथा यद्यपि ब्रह्मविदां स्त्र्यादिविषयेभ्यः स्वयमेवोपरमो भवति तथाऽप्यनेकजन्मविषयसेवाभ्यासजनिता विषयविषया तृष्णा न सहसा निवर्तयितुं शक्यत इति ब्रह्मचर्यादिसाधनविशेषो विधातव्यः । तथा यद्यप्यात्मैकत्वविदां गन्तृगमनगन्तव्याभावादविद्याविशेषस्थितिनिमित्तक्षये गगन इव विद्युदुद्भूत इव वायुर्दग्धेन्धन इवाग्निः स्वात्मन्येव निवृत्तिस्तथाऽपि गन्तृगमनादिवासितबुद्धीनां हृदयदेशगुणविशिष्टब्रह्मोपासकानां मूर्धन्यया नाड्या गतिर्वक्तव्येत्यष्टमः प्रपाठक आरभ्यते । दिग्देशगुणगतिफलभेदशून्यं हि परमार्थसदद्वयं ब्रह्म मन्दबुद्धीनामसदिव प्रतिभाति । सन्मार्गस्थास्तावद्भवन्तु ततः शनैः परमार्थसदपि ग्राहयिष्यामीति मन्यते श्रुतिः ।

हरिः ॐ ।

अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म

---

१ क. °स्य च वै° । २ ख. घ. ञ. °देशकालादि° । ३ क. ग. ङ. च. ट. ड. ढ. ण. °यमुप° ।

दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं त-
द्वाव विजिज्ञासितव्यमिति ॥ १ ॥

अथानन्तरं यदिदं वक्ष्यमाणं दहरमल्पं पुण्डरीकं पुण्डरीकसदृशं वेश्मेव वेश्म द्वारपालादिमत्त्वात्। अस्मिन्ब्रह्मपुरे ब्रह्मण: परस्य पुरं राज्ञोऽनेकप्रकृति-मद्यथा पुरं तथेदमनेकेन्द्रियमनोबुद्धिभिः स्वाम्यर्थकारिभिर्युक्तमिति ब्रह्मपु-रम्। पुरे च वेश्म राज्ञो यथा तथा तस्मिन्ब्रह्मपुरे शरीरे दहरं वेश्म ब्रह्मण उपलब्ध्यधिष्ठानमित्यर्थः। यथा विष्णोः शालग्रामः। अस्मिन्हि स्वविकार-शुद्धे देहे नामरूपव्याकरणाय प्रविष्टं सदाख्यं ब्रह्म जीवेनाऽऽत्मनेत्युक्तम्। तस्मादस्मिन्हृदयपुण्डरीके वेश्मन्युपसंहृतकरणैर्बाह्यविषयविरक्तैर्विशेषतो ब्रह्म-चर्यसत्यसाधनाभ्यां युक्तैर्वक्ष्यमाणैर्गुणवद्ध्यायमानैर्ब्रह्मोपलभ्यत इति प्रक-रणार्थः। दहरोऽल्पतरोऽस्मिन्दहरे वेश्मनि वेश्मनोऽल्पत्वात्तदन्तर्वर्तिनोऽल्प-तरत्वं वेश्मनः। अन्तराकाश आकाशाख्यं ब्रह्म। आकाशो वै नामेति हि वक्ष्यति। आकाश इवाशरीरत्वात्सूक्ष्मत्वात्सर्वगतत्वसामान्याच्च। तस्मिन्ना-काशाख्ये यदन्तर्मध्ये तदन्वेष्टव्यम्। तद्वाव तदेव च विशेषेण जिज्ञासि-तव्यं गुर्वाश्रयश्रवणाद्युपायैरन्विष्य च साक्षात्करणीयमित्यर्थः ॥ १ ॥

पूर्वस्मिन्नध्यायद्वये निर्विशेषमात्मतत्त्वमनवच्छिन्नं सदानन्दैकतानमावेदितं तथा चोपनिषदारम्भे चरितार्थं किमवशिष्यते यदर्थमध्यायान्तरमित्याशङ्क्याऽऽह—यद्य-पीति। कर्तुमिति तदधिगमाय विशिष्टो देश उपदेष्टव्य इति संबन्धः। मन्दबुद्धीनां तर्हि परमार्थवस्तुनो ब्रह्मणोऽधिगतिरपेक्षितेत्यर्थः। न केवलं मन्दाधिकारिणां ब्रह्मा-धिगमशेषत्वेन हृदयदेशोपदेश एवात्र कर्तव्यः किं तु पूर्वत्रानुक्तगुणाद्यर्थान्तरोपदे-शश्च कार्य इत्याह—यद्यपीति। अवशिष्टमर्थान्तरमुपदेष्टव्यमन्वाचष्टे—तथेति। मन्दधियां ब्रह्मधीशेषत्वेन देशविशेषवद्गुणविशेषवच्च ब्रह्मचर्यादिसाधनविशेषो विधा-तव्य इति संबन्धः। शब्दोत्थब्रह्मज्ञानवतां विधिं विनाऽपि विषयवैमुख्यसंभवात्किं विधिनेत्याशङ्क्याऽऽह—यद्यपि ब्रह्मविदामिति। यथा साधनविशेषो वक्तव्योऽव-शिष्यते तथोपासकानां गतिश्च वक्तव्येत्यवशिष्टमर्थान्तरमाह—तथेति। एकत्वद-र्शिनां गत्यादिसर्वभेदप्रत्यस्तमयादविद्याविशेषस्य देहस्थितिनिमित्तस्य क्षये सति

---

१ क. °था हि वि°। २ ख. ञ. ण. °णबुद्धया ध्याय°। ३ ठ. °क्ष्मत्वात्सर्व°। ४ ठ. तत्वा-दिसा°। ५ ख. छ. ञ. ण. तु सर्व°। ६ क. ग. ट. °दोक्तत्र°। ७ ख. ग. छ. ञ. ट. ण. °त्यस्त°।

निवृत्तिसंभवात्कुतो गतिर्वक्तव्येत्याशङ्क्याऽऽह—यद्यप्यात्मैकत्वविदामिति । अविद्यादिशेषस्थितिनिमित्तक्षये स्वात्मन्येव निवृत्तिरित्युत्तरेण संबन्धः । स्वात्मनिर्वाणेऽपि कृतकरूत्यागेन स्वाभाविकस्वरूपावस्थानमित्यत्र दृष्टान्तानाह—गगन इवेति । अनेकोदहरणोपादानं बुद्धिसौकर्यार्थम् । उक्तमेवाध्यायतात्पर्यं संक्षिप्य दर्शयति—दिग्देशेति । दिशा देशेन गुणैर्गत्या फलभेदेन च शून्यं तदनवच्छिन्नमिति यावत् । तस्य दिगाद्यनवच्छिन्नत्वे हेतुमाह—अद्वयमिति । तर्हि तेषां भ्रमापोहार्थं परमार्थसदद्वयं ब्रह्म ग्राहयितव्यं किमित्यन्यथोपदिश्यते तत्राऽऽह—सन्मार्गस्था इति । अध्यायतात्पर्यं संक्षेपविस्तराभ्यां दर्शयित्वा श्रुत्यक्षराणि व्याकरोति—अथेत्यादिना । उत्तमबुद्धीन्प्रति निर्विशेषब्रह्मोपदेशानन्तरं मन्दबुद्धीन्प्रति सविशेषमुपदिश्यते ब्रह्मेत्यर्थः । तत्र तावदुपास्यायतनं निर्दिशति—यदिदमिति । हृदयपुण्डरीकस्य वेश्मसाहश्ये हेतुमाह—द्वारपालादीति । तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषय इत्यादिश्रुतेरुक्तहेतुसिद्धिः । तस्याऽऽश्रयं दर्शयति—अस्मिन्निति । शरीरस्य ब्रह्मपुरत्वं दृष्टान्तेन साधयति—राज्ञ इति । तत्रोक्तं वेश्म दृष्टान्तेन स्पष्टयति—पुरे चेति । कथं पुनः सर्वगतस्य निरवयवस्य ब्रह्मणो यथोक्तवेश्मनिष्ठत्वमित्याशङ्क्याऽऽह—ब्रह्मण इति । ननु संसारिणो ब्रह्मातिरिक्तस्य स्वकर्मोपार्जितेन शरीरेण स्वामित्वसंबन्धो न ब्रह्मणस्तदसंबन्धिनः कथं तत्रोपलब्धिरत आह—अस्मिन्हीति । ब्रह्मणो जीवात्मना सृष्टे कार्ये जलार्कवत्प्रवेशे हृदयपुण्डरीकस्य ब्रह्मोपलब्ध्याधिष्ठानत्वं पूर्वोक्तमाविरुद्धमित्याह—तस्मादिति । अन्तराकाशस्यात्यल्पतरत्वे हेतुमाह—वेश्मन इति । आकाशशब्दस्य भूताकाशविषयत्वं व्यावर्तयति—आकाशाख्यमिति । कथं वाक्यशेषेऽप्याकाशशब्दो ब्रह्मणि वर्तते तत्राऽऽह—आकाश इवेति । तस्मिन्यदन्तस्तदाश्रयेण सहान्वेष्टव्यं तस्मिन्वा स्वे महिम्नि यदन्तस्तदाकाशाख्यं ब्रह्म तदन्वेष्टव्यं तस्मिन्वा हृदयपुण्डरीकावच्छिन्ने नभसि यदन्तराकाशाख्यं ब्रह्म तदन्वेष्टव्यमिति योजना ॥ १ ॥

तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति स ब्रूयात् ॥ २ ॥

तं चेदेवमुक्तवन्तमाचार्यं यदि ब्रूयुरन्तेवासिनश्चोदयेयुः, कथं, यदिदमस्मिन्ब्रह्मपुरे परिच्छिन्नेऽन्तर्दहरं पुण्डरीकं वेश्म तदोऽप्यन्तरल्पतर एवाऽऽ-

---

१ ख. ङ. ञ. ण. °र्थं स° । २ क. ग. ट. °न्निवृत्वात्कथं । ३ ख. °न्तराऽऽख्य° ।

काशः । पुण्डरीक एव वेश्मनि तावत्किं स्यात् । किं ततोऽल्पतरे खे यद्ब्रवेदित्याहुः । दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते न किंचन विद्यत इत्यभिप्रायः । यदि नाम बदरमात्रं किमपि विद्यते किं तस्यान्वेषणेन विजिज्ञासनेन वा फलं विजिज्ञासितुः स्यात् । अतो यत्तत्रान्वेष्टव्यं विजिज्ञासितव्यं वा न तेन प्रयोजनमित्युक्तवतः स आचार्यो ब्रूयादिति श्रुतेर्वचनम् ॥ २ ॥

दहरोऽस्मिन्नित्यादिवाक्यस्य यथाश्रुतमर्थं गृहीत्वा चोद्यमुत्थापयति—नन्विति । तदेव चोद्यमाकाङ्क्षाद्वारा विवृणोति—कथमित्यादिना । भवतु परिच्छिन्ने शरीरे पुण्डरीकाकारस्य हृदयस्याल्पत्वं तदन्तर्वर्तिनश्चाऽऽकाशस्य ततोऽप्यल्पतरत्वं तथाऽपि प्रकृते किं स्यादित्याशङ्क्याऽऽह—पुण्डरीक एवेति । किंशब्दस्य प्रश्नविषयत्वं व्यावर्तयति—न किंचनेति । हृदयपुण्डरीकान्तर्वर्तिनमाकाशमुपेत्याऽऽद्यं दूषयति—यदि नामेति । फलानुपलम्भोऽतःशब्दः । तत्रेत्यन्तर्वर्त्याकाशोक्तिः । शिष्याचार्यव्यतिरिक्तस्यात्राप्रस्तुतत्वात्कस्येदं नियोगवचनमित्याशङ्क्याऽऽह—इति श्रुतेरिति ॥ २ ॥

यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितमिति ॥ ३ ॥

शृणुत । तत्र यदब्रूथ पुण्डरीकान्तःखस्याल्पत्वात्तत्स्थमल्पतरं स्यादिति । तदसत् । न हि खं पुण्डरीकवेश्मगतं पुण्डरीकादल्पतरं मत्वाऽऽचार्यो दहरोऽस्मिन्नन्तराकाश इति । किं तर्हि पुण्डरीकमल्पं तदनुविधायि तत्स्थमन्तःकरणं पुण्डरीकाकाशपरिच्छिन्नं तस्मिन्विशुद्धे संहृतकरणानां योगिनां स्वच्छ इवोदके प्रतिबिम्बरूपादर्श इव च शुद्धे स्वच्छं विज्ञानज्योतिःस्वरूपावभासं तावन्मात्रं ब्रह्मोपलभ्यत इति दहरोऽस्मिन्नन्तराकाश इत्यवोचामान्तःकरणोपाधिनिमित्तम् । स्वतस्तु यावान्वै प्रसिद्धः परिमाणतोऽयमाकाशो भौतिकस्तावानेषोऽन्तर्हृदय आकाशो यस्मिन्नन्वेष्टव्यं विजिज्ञासितव्यं चावोचाम ।

---

१ क. ग. ट. °काश प° ।

नाप्याकाशतुल्यपरिमाणत्वमभिप्रेत्य तावानित्युच्यते । किं तर्हि ब्रह्मणोऽनुरूपस्य दृष्टान्तान्तरस्याभावात् । कथं पुनर्नाऽऽकाशसमत्वेन ब्रह्मेत्यवगम्यते । " येनाऽऽकृतं खं च दिवं महीं च " " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " " एतस्मिन्नु खल्वक्षरे गार्ग्याकाशः " इत्यादिश्रुतिभ्यः । किंचोभे अस्मिन्द्यावापृथिवी ब्रह्माकाशे बुद्ध्युपाधिविशिष्टेऽन्तरेव समाहिते सम्यगाहिते स्थिते । यथा वा अरा नाभावित्युक्तं हि । तस्मिंश्च वायुश्चेत्यादि समानम् । यच्चास्याऽऽत्मन आत्मीयत्वेन देहवतोऽस्ति विद्यत इह लोके । तथा तच्चाऽऽत्मीयत्वेन न विद्यते । नष्टं भविष्यच्च नास्तीत्युच्यते । न त्वत्यन्तमेवासत् । तस्य ह्याकाशे समाधानानुपपत्तेः ॥ २ ॥

किमाचार्यो ब्रूयादित्यपेक्षायां वक्ष्यमाणेऽर्थे शिष्याणां मनःसमाधानमादौ प्रार्थयत इत्याह—शृणुतेति । श्रोतव्यमेव दर्शयितुं शिष्येरुक्तमनुवदति—तत्रेति । किमाकाशस्य स्वाभाविकं दहरत्वमुपेत्य चोद्यते किंवा परोपाधिनिमित्तमिति विकल्प्याऽऽद्यं दूषयति—तदसदिति । ततश्च तस्य स्वाभाविकं दहरत्वमाश्रित्य चोद्यं निरवकाशमिति शेषः । कथं तर्हि दहरत्वोक्तिराकाशस्येत्याशङ्क्याऽऽह—किं तर्हीति । तस्मिन्विशुद्धे तावन्मात्रं ब्रह्म यथोक्तविशेषणं योगिनां विषयेभ्यो विमुखीकृतान्तःकरणानामुपलभ्यत इति संबन्धः । अन्तःकरणस्य शुद्धत्वे दृष्टान्तमाह—स्वच्छ इवेति । ब्रह्मणस्तस्मिन्नुपलभ्यमानत्वे प्रतिबिम्बरूपमिवेत्युदाहरणम् । प्रतिपत्तिसौकर्यार्थमुदाहरणान्तरम् । ब्रह्मणो नैसर्गिकमागन्तुकं च व्यवधानं नास्तीत्युपलब्धिसिद्ध्यर्थं विशिनष्टि—स्वच्छमिति । तादृगेव दहरत्वमादाय चोद्यते चेदनौपाधिकं महत्त्वमुपेत्य समाधिः संभवतीति कल्पान्तरं निरस्यति—स्वतस्त्विति । यस्मिन्नन्वेष्टव्यमाश्रयेण सहेति शेषः । यावांस्तावानिति वचनादाकाशेन तुल्यपरिमाणत्वं ब्रह्मणोऽभिप्रेतं तथा च ज्यायानाकाशादित्यादि विरुद्धमित्याशङ्क्याऽऽह—नापीति । केनाभिप्रायेण तर्हि तावानित्युक्तमत आह—किं तर्हीति । न तस्य प्रतिमाऽस्तीत्याकाशादियेन व्याप्तं लोकोऽनुभवति तस्मिन्नन्तरे सर्वमृगादि समाहितमित्यर्थः । कार्यकारणयोरतुल्यपरिमाणत्वप्रसिद्धेश्च नाऽऽकाशसमता ब्रह्मणोऽस्तीत्याह—तस्मादिति । आधाराधेययोरतुल्यपरिमाणत्वाच्चेत्याह—एतस्मिन्निति । इतश्चाऽऽकाशस्य न स्वाभाविकं दहरत्वमित्याह—किंचेति । कार्यं हि द्यावापृथिव्यादि कारणे समाहितं तच्च हृदये ध्येयमित्यभिप्रेत्य बुद्ध्युपाधिविशिष्ट इत्युक्तम् । आकाशे द्यावापृथिव्यादेः

---

१ ख. छ. ञ. ण. °माणाभै । २ ख. ञ. ण. हृदहरे ।

समाहितत्वे भूमविद्यासंवादं दर्शयति— यथा वेति । न विद्यते सर्वं तदस्मिन्समाहितमिति संबन्धः । नास्तिशब्दस्यात्यन्तासद्विषयत्वं व्यावर्तयति—नष्टमिति ॥ ३ ॥

तं चेद्ब्रूयुरस्मिꣳश्चेदिदं ब्रह्मपुरे सर्वꣳ समाहितꣳ सर्वाणि च भूतानि सर्वे च कामा यदैतज्जरा वाऽऽमोति प्रध्वꣳसते वा किं ततोऽतिशिष्यत इति ॥४॥

तं चेदेवमुक्तवन्तं ब्रूयुः पुनरन्तेवासिनोऽस्मिंश्चेद्यथोक्ते चेद्यदि ब्रह्मपुरे ब्रह्मपुरोपलक्षितान्तराकाश इत्यर्थः । इदं सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः । कथमाचार्येणानुक्ताः कामा अन्तेवासिभिरुच्यन्ते । नैष दोषः । यच्चास्येहास्ति यच्च नास्तीत्युक्ता एव ह्याचार्येण कामाः । अपि च सर्वशब्देन चोक्ता एव कामाः । यदा यस्मिन्काल एतच्छरीरं ब्रह्मपुराख्यं जरा वलीपलितादिलक्षणा वयोहानिर्वाऽऽमोति शस्त्रादिना वा वृक्णं प्रध्वंसते विस्रंसते विनश्यति किं ततोऽन्यदतिशिष्यते । घटाश्रितक्षीरदधिस्नेहादिवद्घटनाशे देहनाशेऽपि देहाश्रयमुत्तरोत्तरं पूर्वपूर्वनाशान्नश्यतीत्यभिप्रायः । एवं प्राप्ते नाशे किं ततोऽन्यद्यथोक्तादतिशिष्यतेऽवतिष्ठते न किंचनावतिष्ठत इत्यभिप्रायः ॥ ४ ॥

आश्रयनाशादाश्रितनाशः स्यादिति न्यायमाश्रित्य शङ्कते—तं चेदेवेति । यद्यस्मिन्सर्वं समाहितं ततो देहनाशे किमवशिष्यत इति संबन्धः । शिष्याणामधिकारापं दोषमाशङ्कते—कथमिति । शङ्कितं दोषं परिहरति—नैष दोष इति । सर्वं तदस्मिन्समाहितमित्यत्रोक्तेन सर्वशब्देनेति । शेषः । शिष्याणामधिकारापं दोषं परिहृत्य प्रकृतं चोद्यं विवृणोति—यदेत्यादिना । आकाशस्य शिष्यमाणत्वमाशङ्क्याऽऽह—घटेति । ततो यथोक्तान्नाशादिति संबन्धः ॥ ४ ॥

स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामाः समाहिता एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजि-

---

१ क. ङ. ज. त. थ. °दैज्ज°। २ ख. घ. च. ञ. ढ. ण. °क्ते हृदि। ३ ठ. ण. °क्षितेऽन्त°। ४ क. ङ. वलिप°। ५ क. ख. ग. ङ. ञ. ठ. ड. ण. °वां प्राप्नो°। ६ घ. ङ. च. ठ. ड. °तोऽति°। ७ ग. घ. ङ. च. ढ. ठ. ड. ढ. ण. °ढादिश्रि°। ८ ग. °स्यत्रस्येन। ९ ग. °क्षादि°।

घत्सोऽपिपासः सत्यकामः सत्यसंकल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति ॥ ५ ॥

एवमन्तेवासिभिश्चोदितः स आचार्यो ब्रूयात्तन्मतिमपनयन् । कथम् । अस्य देहस्य जरयैतद्यथोक्तमन्तराकाशाख्यं ब्रह्म यस्मिन्सर्वं समाहितं न जीर्यति देहवन्न विक्रियत इत्यर्थः । न चास्य वधेन शस्त्रादिघातेनैतद्धन्यते यथाऽऽकाशं किमु ततोऽपि सूक्ष्मतरमशब्दमस्पर्शं ब्रह्म देहेन्द्रियादिदोषैर्न स्पृश्यत इत्यर्थः । कथं देहेन्द्रियादिदोषैर्न स्पृश्यत इत्येतस्मिन्नवसरे वक्तव्यं प्राप्तं तत्प्रकृतव्याभङ्गो मा भूदिति नोच्यते । इन्द्रविरोचनरूपायिकायामुपरिष्टाद्वक्ष्यामो युक्तितः । एतत्सत्यमवितथं ब्रह्मपुरं ब्रह्मैव पुरं ब्रह्मपुरं शरीराख्यं तु ब्रह्मपुरं ब्रह्मोपलक्षणार्थत्वात् । तत्त्वनृतमेव । " वाचाऽऽरम्भणं विकारो नामधेयम् " इति श्रुतेः । तद्विकारेऽनृतेऽपि देहशुक्ले ब्रह्मोपलभ्यत इति ब्रह्मपुरमित्युक्तं व्यावहारिकम् । सत्यं तु ब्रह्मपुरमेव ब्रह्म । सर्वव्यवहारास्पदत्वात् । अतोऽस्मिन्पुण्डरीकोपलक्षिते ब्रह्मपुरे सर्वे कामा ये बाह्यैर्भवद्भिः प्रार्थ्यन्ते तेऽस्मिन्नेव स्वात्मनि समाहिताः । अतस्तत्प्राप्त्युपायमेवानुतिष्ठत बाह्यविषयतृष्णां त्यजतेत्यभिप्रायः । एष आत्मा भवतां स्वरूपम् ।

कया पुना रीत्या शून्यविषया शिष्यमतिरपनेतव्येति प्रश्नपूर्वकं विवृणोति—कथमित्यादिना । देहादिविक्रियया ब्रह्मणो न विक्रियाऽस्तीत्येतत्कैमुतिकन्यायेन साधयति—न चेति । देहादिषु तादात्म्येन स्थितं चेद्ब्रह्म दोषैरसंस्पृष्टमित्ययुक्तमित्याशङ्क्याऽऽह—कथमिति । प्रकृतं दहरोपासना तत्र व्यासङ्गो विक्षेपः । यदि देहादिदोषैरसंस्पृष्टत्वं ब्रह्मणो नोच्यते चेदेतं च क्वचिदुपपद्यन्ते तर्हि तदविवक्षितमेव स्यादित्याशङ्क्याऽऽह—इन्द्रेति । नास्येत्यादिनोऽक्तेऽर्थे हेतुमाह—एतदिति । कथं यथोक्तं ब्रह्मणः पुरमवितथं स्यादित्याशङ्क्याऽऽह—ब्रह्मैवेति । सत्यशब्दसामानाधिकरण्यादुक्तसमाससिद्धिरित्यर्थः । कथं तर्हि शरीरं ब्रह्मपुरमित्युक्तमत आह—शरीराख्यं त्विति । तदेव स्फुटयितुं शरीरस्य मिथ्यात्वं सप्रमाणं दर्शयति—तच्चेति । अथ मिथ्याभूतस्यं तस्य कथं ब्रह्मपुरत्वमत आह—

१ ग. °तदस्मि° । २ क ढ. °ह्यकामवि° । ३ ग. ट. °स्थितत्वात्तद्दोषै° । ४ ख. घ. छ. ञ. ट. ण. °संसृष्ट° । ५ ख. छ. ञ. ण. °कृता द° । ६ ख. ञ. ण. °संसृष्ट° । ७ ग. °ते न क° । ८ ख. छ. ञ. ट. ण. °स्य क° ।

तद्विकार इति । किंच व्यावहारिकं सत्यमिदं शरीरं तद्युक्तं तस्यानृतस्यापि ब्रह्मोपलब्ध्यधिष्ठानस्य ब्रह्मपुरमित्याह—व्यावहारिकमिति । ब्रह्म तु परमार्थसत्यमतश्चैतदेव सत्यमित्युक्तं ब्रह्मपुरमित्याह—सत्यं त्विति । ब्रह्मणः सत्यत्वेऽपि पुरत्वायोगात्कुतो ब्रह्मपुरत्वमित्याशङ्क्याऽऽह—सर्वव्यवहारेति । दहराकाशस्याल्पत्वं विनाशित्वमित्याशङ्कितं दोषं परिहृत्योपास्यत्वसिद्ध्यर्थं पातनिकां करोति—अत इति । अस्मिन्सर्वकामसमाधाने फलितमुपासनमुपदिशति—अतस्तादिति । यथोक्ते दहराकाशे कीदृगुपासनं कर्तव्यमित्यपेक्षायामहंग्रहेणेत्याह—एष इति ।

शृणुत तस्य लक्षणम् । अपहतपाप्मा । अपहतः पाप्मा धर्माधर्माख्यो यस्य सोऽयमपहतपाप्मा । तथा विजरो विगतजरो विमृत्युश्च । तदुक्तं पूर्वमेव न वधेनास्य हन्यते इति । किमर्थं पुनरुच्यते । यद्यपि देहसंबन्धिभ्यां जरामृत्युभ्यां न संबध्यते । अन्यथाऽपि संबन्धस्ताभ्यां स्यादित्याशङ्क्यानिवृत्त्यर्थम् । विशोको विगतशोकः । शोको नामेष्टादिवियोगनिमित्तो मानसः संतापः । विजिघत्सो विगताशनेच्छः । अपिपासोऽपानेच्छः । नन्वपहतपाप्मत्वेन जरादयः शोकान्ताः प्रतिषिद्धा एव भवन्ति । कारणप्रतिषेधात् । धर्माधर्मकार्या हि त इति । जरादिप्रतिषेधेन वा धर्माधर्मयोः कार्याभावे विद्यमानयोरप्यसत्त्वमिति पृथक्प्रतिषेधोऽनर्थकः स्यात् । सत्यमेवं तथाऽपि धर्मकार्यानन्दव्यतिरेकेण स्वाभाविकानन्दो यथेश्वरे विज्ञानमानन्दं ब्रह्मेति श्रुतेः । तथाऽधर्मकार्यजरादिव्यतिरेकेणापि जरादिदुःखस्वरूपं स्वाभाविकं स्यादित्याशङ्क्येत । अतो युक्तस्तन्निवृत्तये जरादीनां धर्माधर्माभ्यां पृथक्प्रतिषेधः । जरादिग्रहणं सर्वदुःखोपलक्षणार्थम् । पापनिमित्तानां तु दुःखानामानन्त्यात्प्रत्येकं च तत्प्रतिषेधस्याशक्यत्वात्सर्वदुःखप्रतिषेधार्थं युक्तमेवापहतपाप्मत्ववचनम् । सत्या अवितथाः कामा यस्य सोऽयं सत्यकामः । वितथा हि संसारिणां कामाः । ईश्वरस्य तद्विपरीताः । तथा कामहेतवः संकल्पा अपि सत्या यस्य स सत्यसंकल्पः । संकल्पाः कामाश्च शुद्धसत्त्वोपाधिनिमित्ता ईश्वरस्य । चित्रगुवत् । न स्वतो नेति नेतीत्युक्तत्वात् । यथोक्तलक्षण एवाऽऽत्मा विज्ञेयो गुरुभ्यः शास्त्रतश्चाऽऽत्मसंवेद्यतया च स्वाराज्यकामैः । न चेद्विज्ञायते कौ दोषः स्यादिति । शृणुतात्र दोषं दृष्टान्तेन । यथा ह्येवेह

---

१ क. ग. ट. °त्युक्तं । २ क. ख. ग. घ. ङ. च. झ. ट. ड. ढ. °न्यते कि° । ३ ठ. °गोपादिनि° । ४ क. ग. च. ट. ठ. ड. ढ. ण. °नन्दमिति । ५ क. ग. घ. ङ. च. ट. ठ. ड. ढ. ण. °रस्तु त° । ६ क. ग. घ. ङ. च. ट. ठ. ड. ढ. ण. °रीतः । त° । ७ ख. ञ. ण. कोऽत्र । ८ ख. घ. घ. ङ. च. ञ. ट. ठ. ड. ढ. ण. शृण्वन्तु ।

लोके प्रजा अन्वाविशन्त्यनुवर्तन्ते । यथानुशासनं यथेह प्रजा अन्यं स्वामिनं मन्यमानाः स्वस्य स्वामिनो यथा यथाऽनुशासनं तथा तथाऽन्वाविशन्ति । किम् । यं यमन्तं प्रत्यन्तं जनपदं क्षेत्रभागं वाभिकामा अर्थिन्यो भवन्त्यात्मबुद्ध्यनुरूपं तं तमेव च प्रत्यन्तादिमुपजीवन्तीति । एष दृष्टान्तोऽस्वातन्त्र्यदोषं प्रति पुण्यफलोपभोगे ॥ ५ ॥

पुनरुक्तिं शङ्कते—तदुक्तामिति । तां परिहरति—यद्यपीति । अन्यथा देहसंबन्धं विना स्वभावतोऽपीत्यर्थः । निवृत्त्यर्थं पुनरुच्यत इति पूर्वेण संबन्धः । प्रकारान्तरेण पुनरुक्तिं चोदयति—नन्विति । शोकस्यान्ता किंचिद्व्यवधाय पिपासा येष्वस्ति ते शोकान्तास्तेषां जरादीनामपहतपाप्मत्वेन प्रतिषिद्धत्वे हेतुमाह—कारणेति । कथं धर्माधर्मप्रतिषेधे जरादिविकारप्रतिषेधस्तत्राऽऽह—धर्मेति इति पृथक्प्रतिषेधोऽनर्थकः स्यादिति संबन्धः । जरादिप्रतिषेधस्यार्थवत्त्वमङ्गीकृत्य पाप्मप्रतिषेधस्य वैरर्थक्यमिति पक्षान्तरमाह—जरादीति । धर्मादेर्जरादेर्वा निषेधादितरनिषेधः सिध्यतीत्यङ्गी करोति—सत्यमेवमिति । तर्हि किमित्यपहतपाप्मेत्युक्त्वा विजरो विमृत्युरित्याद्युच्यते तत्राऽऽह—तथाऽपीति । तथाऽपि दुःखे प्रतिसिद्धे किमिति जरादि प्रतिषिध्यते तत्राऽऽह—जरादीति । यत्तु कार्याभावे सतोरपि धर्माधर्मयोरुत्खातदन्तोरगवदकिंचित्करत्वादपहतपाप्मेति न पुनरुक्तव्यमिति तत्राऽऽह—पापनिमित्तानामिति । ईश्वरस्य सत्यकामत्वं साधयति—वितथा हीति । यथेश्वरस्यावितथाः कामास्तथा संकल्पाश्चेत्याह—तथेति । अभावरूपाणां धर्माणामद्वैताविद्यात्मकत्वेन संभावितत्वेऽपि कथं भावरूपा धर्माः संभवेयुरित्याशङ्क्याऽऽह—संकल्पा इति । शुद्धसत्त्वं रजस्तमोभ्यामस्पृष्टं त्रिगुणाया मायाया अंशभूतं तदेवोपाधिस्तन्निमित्तं येषां ते तथा । अस्वाभाविकानां संकल्पादीनामीश्वरविशेषणत्वे दृष्टान्तमाह—चित्रगुवदिति । यथा चित्रा गावोऽस्वाभाविकाश्चित्रगोर्देवदत्तस्य विशेषणं तथा ब्रह्मणोऽपि कामादय इत्यर्थः । किमिति कामादयो ब्रह्मणि स्वाभाविका न भवन्ति धर्मधर्मिणोरेवोपचारादद्वैतश्रुतेरुपपत्तेरित्याशङ्क्याऽऽह—न स्वत इति । वाक्यान्तरमवतारयितुं पातनिकां करोति—यथोक्तेति । ज्ञानप्रकारं निमित्ताविकारिभेदप्रदर्शनपूर्वकं दर्शयति—गुरुभ्य इति । प्रश्नपूर्वकं यथा हीत्यादिवाक्यमाह—न चेदिति । यथाकाशात्मापरिज्ञानमत्रेति परामृष्टम् । अक्षरोत्तमर्षं यथा ह्येवेत्यनेन दृष्टान्तेन दर्शयित्वा वाक्यार्थं कथयति—

---

१ क. ग. ङ. ढ. °मानास्तस्य । २ ख. घ. च. ज. ङ. ण. °वन्ति । एवं । ३ ग. ट. °स्यान्ते किं° । ४ ख. ण. °याक° । ५ ग. ङ. °ति । उक्त्वा° । ६ क. ग. °प्रवर्तनं तदर्थं° ।

यथा क्षेत्रेति । अमुमर्थं प्रश्नपूर्वकमन्वाचष्टे--किमित्यादिना । उक्तदृष्टान्तेन विवक्षितमंशमनूद्य दृष्टान्तान्तरस्य तात्पर्यमाह--एष इति ॥ ६ ॥

तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्य-
जितो लोकः क्षीयते तद्य इहाऽऽत्मानमननुविद्य
व्रजन्त्येताꣳश्च सत्यान्कामाꣳस्तेषाꣳ सर्वेषु लोकेष्व-
कामचारो भवत्यथ य इहाऽऽत्मानमनुविद्य व्रजन्त्ये-
ताꣳश्च सत्यान्कामाꣳस्तेषाꣳ सर्वेषु लोकेषु काम-
चारो भवति ॥ ६ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथान्यो दृष्टान्तस्तत्क्षयं प्रति तद्यथेत्यादिः । तत्तत्र यथेह लोके तासामेव स्वाम्यनुशासनानुवर्तिनीनां प्रजानां सेवादिजितो लोकः पराधीनोपभोगः क्षीयतेऽन्तवान्भवति । अथेदानीं दार्ष्टान्तिकमुपसंहरति—एवमेवामुत्राग्निहोत्रादिपुण्यजितो लोकः पराधीनोपभोगः क्षीयत एवेति । उक्तो दोष एषामिति विषयं दर्शयति—तद्य इत्यादिना । तत्तत्रेहास्मिँल्लोके ज्ञानकर्मणोरधिकृता योग्याः सन्त आत्मानं यथोक्तलक्षणं शास्त्राचार्योपदिष्टमननुविद्य यथोपदेशमनुं स्वसंवेद्यतामकृत्वा व्रजन्ति देहादन्मात्प्रयन्ति । य एनांश्च यथोक्तान्सत्यान्सत्यसंकल्पकार्यांश्च स्वात्मस्थान्कामाननुविद्य व्रजन्ति तेषां सर्वेषु लोकेष्वकामचारोऽस्वतन्त्रता भवति । यथा राजानुशासनानुवर्तिनीनां प्रजानामित्यर्थः । अथ येऽन्य इह लोक आत्मानं शास्त्राचार्योपदेशमनुविद्य स्वात्मसंवेद्यतामापाद्य व्रजन्ति यथोक्तांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति राज्ञ इव सार्वभौमस्येह लोके ॥ ६ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

केषामेष दोषो भवतीत्याकाङ्क्षायामाह--उक्त इति । कर्मसाध्यस्य पारतन्त्र्यं क्षयिष्णुत्वं च ज्ञानहीनकर्मसाध्यविषयब्रह्मोपासकानामेष दोषो भवतीति दर्शयन्युत्तरं वाक्यमित्यर्थः । अविदुषामेवास्वातन्त्र्यदोषमुक्त्वा विदुषां स्वातन्त्र्यफलं कथयति—अथेत्यादिना ॥ ६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
अष्टमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

१ थ. °मंचितो । २ थ. °ण्यचितो । ३ क. ङ. °नु स्वात्मतं° । ४ ङ. ट. °त्प्रयान्ति । ५ ख. छ. ञ. ण. °तन्त्र्यं दो° ।

(अथाष्टमाध्यायस्य द्वितीयः खण्डः) ।

स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते ॥ १ ॥

कथं सर्वेषु लोकेषु कामचारो भवतीति, उच्यते—य आत्मानं यथोक्तलक्षणं हृदि साक्षात्कृतवान्वक्ष्यमाणब्रह्मचर्यादिसाधनसंपन्नः संस्तत्स्थांश्च सत्यान्कामान्स त्यक्तदेहो यदि पितृलोककामः पितरो जनयितारस्त एव सुखहेतुत्वेन भोग्यत्वाल्लोका उच्यन्ते तेषु कामो यस्य तैः पितृभिः संबन्धेच्छा यस्य भवति तस्य संकल्पमात्रादेव पितरः समुत्तिष्ठन्त्यात्मसंबन्धितामापद्यन्ते । विशुद्धसत्त्वतया सत्यसंकल्पत्वादीश्वरस्येव तेन पितृलोकेन भोगेन संपन्नः संपत्तिरिष्टप्राप्तिस्तया समृद्धो महीयते पूज्यते वर्धते वा महिमानमनुभवति ॥ १ ॥

उक्तमेवार्थमाकाङ्क्षापूर्वकमुपपादयति—कथमित्यादिना ॥ १ ॥

अथ यदि मातृलोककामो भवति संकल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन संपन्नो महीयते ॥ २ ॥

अथ यदि भ्रातृलोककामो भवति संकल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति तेन भ्रातृलोकेन संपन्नो महीयते ॥ ३ ॥

अथ यदि स्वसृलोककामो भवति संकल्पादेवास्य स्वसारः समुत्तिष्ठन्ति तेन स्वसृलोकेन संपन्नो महीयते ॥ ४ ॥

अथ यदि सखिलोककामो भवति संकल्पादेवास्य सखायः समुत्तिष्ठन्ति तेन सखिलोकेन संपन्नो महीयते ॥ ५ ॥

---

१ ठ °लोकगतेन भो° ।

अथ यदि गन्धमाल्यलोककामो भवति संकल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतस्तेन गन्धमाल्यलोकेन संपन्नो महीयते ॥ ६ ॥

अथ यद्यन्नपानलोककामो भवति संकल्पादेवास्यान्नपाने समुत्तिष्ठतस्तेनान्नपानलोकेन संपन्नो महीयते ॥ ७ ॥

अथ यदि गीतवादितलोककामो भवति संकल्पादेवास्य गीतवादिते[1] समुत्तिष्ठतस्तेन गीतवादितलोकेन[2] संपन्नो महीयते ॥ ८ ॥

अथ यदि स्त्रीलोककामो भवति संकल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन स्त्रीलोकेन संपन्नो महीयते ॥ ९ ॥

समानमन्यत् । मातरो जनयित्र्योऽतीताः सुखहेतुभूताः सामर्थ्यात् । न हि दुःखहेतुभूतासु ग्राम्यसूकरादिजन्मनिमित्तासु मातृषु विशुद्धसत्त्वस्य योगिन इच्छा तत्संबन्धो वा युक्तः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ॥ ८ ॥ ९ ॥

सुखहेतुभूता इति कुतो विशेषणमित्याशङ्क्याऽऽह—सामर्थ्यादिति । तदेव स्फुटयति—नहीति ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते ॥ १० ॥

इति च्छान्दोग्योपनिषद्भाष्यस्य द्वितीयः खण्डः ॥ २ ॥

---

१ क. ख. घ. ङ. ञ. ठ. थ. 'दित्रलो' । २ क. ख. घ. ङ. ञ. ठ. थ. 'दित्रे स' । ३ क. ख. घ. ङ. ञ. ठ. थ. 'दित्रलो' । ४ क. 'मशूक' ।

यं यमन्तं प्रदेशमभिकामो भवति । यं च कामं कामयते यथोक्तव्यतिरेकेणापि सोऽस्यान्तः प्राप्तुमिष्टः कामश्च संकल्पादेव समुत्तिष्ठत्यस्य । तेनेच्छाविघाततयाऽभिप्रेतार्थप्राप्त्या च संपन्नो महीयत इत्युक्तार्थम् ॥ १० ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्यं द्वितीयः खण्डः ॥ २ ॥

तेन ज्ञानमाहात्म्येनेति यावत् ॥ १० ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य द्वितीयः खण्डः ॥ २ ॥

(अथाष्टमाध्यायस्य तृतीयः खण्डः)।

त इमे सत्याः कामा अनृतापिधानास्तेषाꣳ सत्यानाꣳ सतामनृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ॥ १ ॥

यथोक्तात्मध्यानसाधनानुष्ठानं प्रति साधकानामुत्साहजननार्थमनुक्रोशन्त्याह—कष्टमिदं खलु वर्तते यत्स्वात्मस्थाः शक्यप्राप्या अपि त इमे सत्याः कामा अनृतापिधानास्तेषामात्मस्थानां स्वाश्रयाणामेव सतामनृतं बाह्यविषयेषु रूपन्नभोजनाच्छादनादिषु तृष्णा तन्निमित्तं च स्वेच्छाप्रचारत्वं मिथ्याज्ञाननिमित्तत्वादनृतमित्युच्यते । तन्निमित्तं सत्यानां कामानामप्राप्तिरित्यपिधानमिवापिधानम् । कथमनृतापिधाननिमित्तं तेषामलाभ इति, उच्यते—यो यो हि यस्मादस्य जन्तोः पुत्रो भ्राता वेष्टः इतोऽस्माल्लोकात्प्रैति प्रगच्छति म्रियते तमिष्टं पुत्रं भ्रातरं वा स्वहृदयाकाशे विद्यमानमपीह पुनर्दर्शनायेच्छन्नपि न लभते ॥ १ ॥

त इमे सत्याः कामा इत्यादेस्तात्पर्यमाह—यथोक्तेति । आह समनन्तरा श्रुतिरिति शेषः । तमेवानुक्रोशं दर्शयति—कष्टमिति । अनृतमपिधानमिवापिधानं तेषामिति संबन्धः । किं तदनृतं तदाह—बाह्येति । कथं तदपिधानमात्मस्थानां कामानामित्याशङ्क्याऽऽह—तन्निमित्तमिति । उक्तमर्थमाकाङ्क्षापूर्वकमुत्तरं वाक्यमवतार्योपपादयति—कथमित्यादिना । तं हृदयाकाशे स्वात्मनि सन्तमपि द्रष्टुमिच्छन्नपि यस्मान्न लभते तस्मादनृतापिधानं निमित्तं कृत्वा तदलाभो भवतीति योजना ॥ १ ॥

---

१ ख. ञ. ण. यं यं च का°। २ ज. °तिरिक्तेनापि । ३ क. ख. ग. ङ. ञ. ट ठ. ण. ह्यायुक्ता° । ४ क. घ. ठ. ड. °प्राप्ता अ° । ५ क. ग. ट. °स्मात्तद° ।

अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथाऽपि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः ॥ २ ॥

अथ पुनर्यं चास्य विदुषो जन्तोर्जीवा जीवन्तीह पुत्रा भ्रात्रादयो वा ये च प्रेता मृता इष्टाः संबन्धिनो यच्चान्यदिह लोके वस्त्रान्नपानादि रत्नादि वा वस्त्विच्छन्न लभते तत्सर्वमत्र हृदयाकाशाख्ये ब्रह्मणि गत्वा यथोक्तेन विधिना विन्दते लभते । अत्रास्मिन्हार्दाकाशे हि यस्मादस्यैते यथोक्ताः सत्याः कामा वर्तन्तेऽनृतापिधानाः । कथमित्र तदन्याख्यमित्युच्यते—तत्तत्र यथा हिरण्यनिधिं हिरण्यमेव पुनर्ग्रहणाय निधातृभिर्निधीयत इति निधिस्तं हिरण्यनिधिं निहितं भूमेरधस्तान्निक्षिप्तमक्षेत्रज्ञा निधिशास्त्रैर्निधिक्षेत्रमजानन्तस्ते निधेरुपर्युपरि संचरन्तोऽपि निधिं न विन्देयुः शक्यत्वेदनमपि । एवमेवेमा अविद्यावत्यः सर्वा इमाः प्रजा यथोक्तं हृदयाकाशाख्यं ब्रह्मलोकं ब्रह्मैव लोको ब्रह्मलोकस्तमहरहः प्रत्यहं गच्छन्त्योऽपि सुषुप्तकाले न विन्दन्ति न लभन्त एषोऽहं ब्रह्मलोकभावमापन्नोऽस्मद्येति । अनृतेन हि यथोक्तेन हि यस्मात्प्रत्यूढा हृताः स्वरूपादविद्यादिदोषैर्ब्रह्मकृष्टा इत्यर्थः । अतः कष्टमिदं वर्तते जन्तूनां यत्स्वायत्तमपि ब्रह्म न लभ्यत इत्यभिप्रायः ॥ २ ॥

इतश्च तेषामलाभे निमित्तमनृतापिधानमेवेत्याह—अथ पुनरिति । यथोक्तेन विधिनेत्युपासिप्रकरणोक्तिः । आत्मस्थानां कामानामनृतापिधानत्वमुक्तं निगमयति—अत्रेति । यस्मादविद्वद्भिरलब्धा विद्वद्भिश्च लब्धाः सत्याः कामाः सर्वाधारे जगन्मूलकारणे ब्रह्मणि स्वात्मभूते वर्तन्ते तस्मात्ते भवन्त्यनृतापिधानाः । तत्रामविद्यायामनुपलम्भाद्विद्यया तत्प्रशमने चोपलम्भादित्यर्थः । यदुक्तं ब्रह्मणि स्वात्मनि कामाः सन्तोऽपि नोपलभ्यन्त इत्यन्याख्यमिति तत्र दृष्टान्तं प्रश्नपूर्वकमुत्थाप्य व्याचष्टे—

---

१ ग. ङ. ज. झ. ट ठ. त. °मास्त° । २ ठ. °थाऽपि हि° । ३ क. ख. ग. घ. ङ. च. ञ. ठ. ड. लोकस्त° । ४ ठ. °न य° । ५ क. ग. °ताः स्वात्मस्व° ।

कथमित्येवमादिना । तत्र स्वायत्तस्याप्यप्राप्तौ दृष्टान्तो निर्दिदृश्यत इति शेषः । दार्ष्टान्तिकं व्याकरोति—एवमेवेति । अलाभप्रकारमभिनयति—एषोऽहमिति । तत्र हेतुमाह—अनृतेनेति । यथोक्तेन मिथ्याज्ञानशब्दितानाद्यनिर्वाच्याज्ञानकृतेन तृष्णाप्रभेदेन तन्निमित्तेनेच्छाप्रपञ्चरूपेणेत्यर्थः । तस्मात्प्रज्ञानां स्वात्मभूतब्रह्मलोकालाभ इति शेषः । स्वरूपादनृतेन ह्यनृत्वमेव स्फोरयति—आवेष्टादीति । प्रकृतमाक्रोशमुपसंहरति—अत इति ॥ २ ॥

स वा एष आत्मा हृदि तस्यैतदेव निरुक्तꣳ हृदयमिति तस्माद्धृदयमहरहर्वा एवंवित्स्वर्गं लोकमेति ॥ ३ ॥

स वेय आत्माऽपहतपाप्मेति प्रकृतो वैशब्देन तं स्मारयत्येष विवक्षित आत्मा हृदि हृदयपुण्डरीक आकाशशब्देनाभिहितः । तस्यैतस्य हृदयस्यैतदेव निरुक्तं निर्वचनं नान्यत् । हृदयमात्मा वर्तत इति यस्मात्तस्माद्धृदयं हृदयनामनिर्वचनप्रसिद्ध्याऽपि स्वहृदय आत्मेत्यवगन्तव्यमित्यभिप्रायः । अहरहर्वै प्रत्यहमेवंविद्धृदयमात्मेति जानन्स्वर्गं लोकं हार्दं ब्रह्मैति प्रतिपद्यते । नन्वनेवंविदपि सुषुप्तकाले हार्दं ब्रह्म प्रतिपद्यत एव सुषुप्तकाले सता सौम्य तदा संपन्न इत्युक्तत्वात् । बाढमेवं तथाऽप्यस्ति विशेषः । यथा जानन्नजानंश्च सर्वो जन्तुः सद्ब्रह्मैव तथाऽपि तत्त्वमसीति प्रतिबोधितो विद्वान्सदेव नान्योऽस्मीति जानन्सदेव भवति । एवमेव विद्वानविद्वांश्च सुषुप्ते यद्यपि सत्संपद्यते तथाऽप्येवंविदेव स्वर्गं लोकमेतीत्युच्यते । देहपातेऽपि विद्याफलस्यावश्यंभावित्वादित्येष विशेषः ॥ ३ ॥

अनुक्रोशद्वारा यथोक्तब्रह्मध्यानानुष्ठाने प्रयत्नस्य कर्तव्यतोक्ता, संप्रति नामादाविव हृदये ब्रह्मदृष्ट्यारोपमात्रमिति शङ्कां वारयितुमनन्तरवाक्यमवतार्य व्याकरोति—स वा इत्यादिना । कथमात्मा यथोक्तो हृदयेऽस्तीति गम्यते तत्राऽऽह—तस्येति । यथोक्तावगतिफलमाह—अहरहरिति । एवंविदिति विशेषणममृष्यमाणः शङ्कते—नन्विति । अनेवंविदोऽपि सुषुप्तिकाले ब्रह्मप्राप्तिमङ्गीकरोति—बाढमेवमिति । तर्हि किमित्येवंविदिति विशेषणमित्याशङ्क्याऽऽह—तथाऽपीति । विद्वद्विदुषोर्विशेषमेव दृष्टान्तेन स्पष्टयति—यथेति । त्वं तदसीत्याचार्येण प्रतिबोधितो विद्वान्स-

---

१ ग. छ. ट. °प्रकारे° । २ ख. छ. ञ. °जानामात्म° । ३ ख. छ. ञ. ण. °तेनाऽऽह° । ४ क. ख. ञ. ण. स वा एष आ° । ५ ङ. °षुप्तिका° । ६ क. ङ. ठ. ढ. °षुप्तिका । ७ ख. ङ. ञ. सौम्य । ८ क. सुषुप्तौ । ९ ख. छ. ज. ण. °ने य° । १० ख. ग. छ. ञ. ट. ण. °त्तक° ।

देव भवत्यन्यस्त्वविद्वानस्मीति देहादिकमेव जानन्न सदेव भवतीति योजना । देहपातेऽपीत्यपिशब्देन जीवदवस्था दृष्टान्तिता ॥ ३ ॥

अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति ॥ ४ ॥

सुषुप्तकाले स्वेनाऽऽत्मना सता संपन्नः सन्सम्यक्प्रसीदतीति जाग्रत्स्वप्नयोर्विषयेन्द्रियसंयोगजातं कालुष्यं जहातीति संप्रसादशब्दो यद्यपि सर्वजन्तूनां साधारणस्तथाऽप्येवंवित्स्वर्गं लोकमेतीति प्रकृतत्वादेष संप्रसाद इति संनिहितत्वच्चयत्नविशेषात्सोऽयेदं शरीरं हित्वाऽस्माच्छरीरात्समुत्थाय शरीरात्मभावनां परित्यज्येत्यर्थः । न त्वासनादिव समुत्थायेतीह युक्तम् । स्वेन रूपेणेति विशेषणात् । न ह्यन्यत उत्थाय स्वरूपं संपत्तव्यम् । स्वरूपमेव हि तन्न भवति प्रतिपत्तव्यं चेत्स्यात् । परं परमात्मलक्षणं विज्ञप्तिस्वभावं ज्योतिरुपसंपद्य स्वास्थ्यमुपगम्येत्येतत् । स्वेनाऽऽत्मीयेन रूपेणाभिनिष्पद्यते प्रागेतस्याः स्वरूपसंपत्तेरविद्यया देहमेवापरं रूपमात्मत्वेनोपगत इति तदपेक्षयेदमुच्यते स्वेन रूपेणेति । अशरीरता ह्यात्मनः स्वरूपं यत्स्वं परं ज्योतिः स्वरूपमापद्यते संप्रसाद एष आत्मेति होवाच । स ब्रूयादिति यः श्रुत्या नियुक्तोऽन्तेवासिभ्यः । किंचैतदमृतमविनाशि भूमा यो वै भूमा तदमृतमित्युक्तम् । अत एवाभयं भूम्नो द्वितीयाभावादत एतद्ब्रह्मेति । तस्य ह वा एतस्य ब्रह्मणो नामाभिधानम् । किं तत्सत्यमिति । सत्यं ह्यवितथं ब्रह्म । तत्सत्यं स आत्मेति ह्युक्तम् । अथ किमर्थमिदं नाम पुनरुच्यते । तदुपासनविधिस्तुत्यर्थम् ॥ ४ ॥

संप्रसादस्य विदुषो यन्मुक्त्यालम्बनं शुद्धं ब्रह्म तत्तादात्म्योपदेशेनोपास्यं स्तोतुं संप्रसादशब्दार्थं कथयति—सुषुप्तेति । सम्यक्प्रसीदतीति संप्रसादो विद्वानिति शेषः । स्वाभाविकमेवाऽऽत्मनः स्वास्थ्यं कथं सुषुप्ते प्रसीदतीति विशेष्यते तत्राऽऽह—जाग्रदिति । जहातीति सुषुप्तः पुरुषः संप्रसाद इति विशेषव्युत्पत्तिबलेन संप्रसादशब्दः सौषुप्तसर्वजीवसाधारणस्तत्कथमेष संप्रसाद इति संनिहितविद्वत्परामर्शस्तत्राऽऽह—संप-

१ ग. ठ. °षुप्तिका° । २ क. ग. ङ. ट. °दि त्वसु° । ३ क. ख. घ. ङ. च. ञ. ठ. ड, ढ, ण. °ति । तत्सत्यं । ४ ग. ठ. °सुप्तति । ५ ञ. °प्ते संप्र° । ६ क. ख. °शेषः व्यु° ।

सादशब्द इति । तस्य सौषुप्तमवर्जनविसाधारणत्वेऽपि प्रक्रमवशाद्विद्वानेवैष संप्रसाद इति व्यपदिश्यते । यथा संनिहितोऽर्थो यत्नविशेषादेष इतिशब्दशक्तिवशादुच्यते तथेहापीत्यर्थः । एष एवंवित्प्रकृतः संप्रसादः स विद्वानिति यावत् । विवेकानन्तर्यमथशब्दार्थः । समुत्थानशब्दस्य मुख्यार्थत्वं वारयति—न त्विति । देहाद्युत्थितस्यापि स्वेन रूपेणाभिनिष्पतिर्भविष्यतीत्याशङ्क्याऽऽह-न हीति । कुतोऽयं स्वरूपेऽभिनिष्पत्तिप्रयोगस्तत्राऽऽह-प्रागिति । एतच्छब्दः सम्यग्ज्ञानविषयः । अनात्मस्वरूपप्रतिपत्तिभ्रान्तिनिवृत्त्यपेक्षया स्वरूपसंपत्तिरुपचरितेत्यर्थः । किं तत्स्वरूपमिति तदाह—अशरीरता हीति । यथा मिथ्यारूप्यतादात्म्यनिवृत्तौ स्वाभाविकेनारूप्यात्मना शुक्तिरवतिष्ठते तथा शरीरतादात्म्यभ्रान्तिनिवृत्तौ तदभावोपलक्षितं स्वच्छं स्वरूपमेवावस्थितं भवतीत्यर्थः । एष आत्मेति होवाचेत्यत्रैषशब्दार्थमाह—यत्स्वमिति । कोऽसावुक्तिकर्तेत्याकाङ्क्षायामाह—स ब्रूयादिति । न केवलमात्मत्वमेव प्रकृतस्य ज्योतिषः किं तु रूपान्तरत्वमस्तीत्याह—किंचेति । अविनाशित्वे हेतुमाह—भूमेति । तथाऽपि कथमविनाशित्वं तत्राऽऽह—यो वा इति । इतिशब्दो हेत्वर्थः । यस्माद्यथोक्तलक्षणं ब्रह्म तस्मात्तदुपासनामर्हतीत्यर्थः । उपास्यस्य ब्रह्मणो नाम निर्दिशति—तस्येति । उक्तस्य पुनरुक्तिरनर्थिकेत्याशङ्क्य परिहरति—किमर्थमित्यादिना ॥ ४ ॥

तानि ह वा एतानि त्रीण्यक्षराणि सँतीयमिति तद्यत्सत्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति यस्माद्यमहरहर्वा एवंवित्स्वर्गं लोकमेति ॥ ५ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

===

तानि ह वा एतानि ब्रह्मणो नामाक्षराणि त्रीण्येतानि सँतीयमिति सकारस्तकारो यमिति चँ । ईकारस्तकार उच्चारणार्थोऽनुबन्धः । ह्रस्वेनैवाक्षरेण पुनः प्रतिनिर्देशात्तेषाम् । तत्तत्र यत्सत्सकारस्तदमृतं सद्ब्रह्मामृतवाचकत्वादमृत एव सकारस्तकारान्तो निर्दिष्टः । अथ यत्ति तकारस्तन्मर्त्यम् । अथ यद्यमक्षरं तेनाक्षरेणामृतमर्त्याख्ये पूर्वे उभे अक्षरे यच्छति यमयति नियमयति वशी करोत्यात्मनेत्यर्थः । यद्यस्मादनेन यमित्येतेनोभे यच्छति तस्माद्यँम् ।

---

१ क. °हितार्थो । २ क. ग. ट. °र्थः । य ए° । ३ क. ग. ट. °हादुत्थि° । ४ ग. घ. ङ. ज. त. थ. सतिय° । ५ ङ. ढ. सतिय° । ६ क. ग घ. च. ट. ठ. ड. ढ. च । इका° । ७ क. ग. घ. ठ. ड. °यम् । आदौ सं° ।

संयते इव ह्येतेन यमा लक्ष्येते । ब्रह्मनामाक्षरस्यापीदममृतत्वादिधर्मवत्त्वं महाभाग्यं किमुत नामवत इत्युपास्यत्वाय स्तूयते । ब्रह्मनामनिर्वचनेनैव नामवतो वेत्तैवंवित् । अहरहर्वा एवंवित्स्वर्गं लोकमेतीत्युक्तार्थम् ॥ ५ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

उपास्यस्तुत्यर्थं नामोक्त्वा तादर्थ्येनैव नामाक्षराणि प्रस्तौति—तानीति । तानि कानीत्यपेक्षायामाह— एतानीति । कथं तकार इत्युच्यते ईकारस्यापि तत्र भावादित्याशङ्क्याऽऽह—ईकार इति । तत्र हेतुमाह—ह्रस्वेनेति । दीर्घपीकारमुद्दिश्य ह्रस्वं पुनरनुवदन्नविवक्षितत्वमेव नामाक्षरेषु तस्य सूचयतीत्यर्थः । त्रयाणामक्षराणामवान्तरभेदं दर्शयति—तेषामिति । निर्धारणे षष्ठी । वर्णविभागानन्तर्यमथशब्दार्थः । तकारस्याक्षरसामान्यान्मर्त्यत्वम् । कथमक्षरे पूर्वं यमित्यनेन प्रयोक्ता नियमयतीत्याकाङ्क्षायां नियमनस्वभाव्येनेत्याह—आत्मेति । यमित्यक्षरस्य नियमनस्वाभाव्यमेव साधयति—यद्यस्मादिति । तस्य तत्स्वभावत्वेऽनुभवमनुकूलयति—संयते इवेति । यमा यमित्यक्षरेणेत्यर्थः । तस्य पूर्वभागपरिष्टाद्भावित्वं तन्नियामकत्वे हेतुरिति मत्वाऽऽह—एतेनेति । लक्ष्येते पूर्वे अक्षरे इति शेषः । ब्रह्मणः सत्यमिति नाम तस्य यन्निर्वचनं कृतं तस्य प्रयोजनमाह—ब्रह्मेति । फलवाक्यस्थमेवंवित्पदं व्याकरोति—एवमिति । वाक्यं तु न व्याख्येयं प्रागेव व्याख्यातत्वादित्याह—अहरिति ॥ ५ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां अष्टमाध्यायस्य तृतीयः खण्डः ॥ ३ ॥

(अथाष्टमाध्यायस्य चतुर्थः खण्डः) ।

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय नैतꣳ सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतꣳ सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः ॥ १ ॥

अथ य आत्मेति । उक्तलक्षणो यः संप्रसादस्तस्य स्वरूपं वक्ष्यमाणैरुक्तैरनुक्तैश्च गुणैः पुनः स्तूयते ब्रह्मचर्यसाधनसंबन्धार्थम् । य एष

---

१ ख. अ. ह्यनेन । २ क. ठ. °नैवं ना° । ३ क. ग. छ. ठ. ण. °त इका° । ४ क. ग. ट. °ह इका° । ५ ख. छ. अ. °ह । अनेनें° । ६ ख. घ. इ. च. ज. ठ. ड. ढ. ण. आत्मोक्त° । ७ घ. एवं ।

यथोक्तलक्षण आत्मा स सेतुरिव सेतुः । विधृतेर्विधरणः । अनेन हि सर्वं जगद्वर्णाश्रमादिक्रियाकारकफलादिभेदनियमैः कर्तुरनुरूपं विदधता विधृतम् । अभ्रियमाणं ह्यीश्वरेणेदं विश्वं विनश्येद्यतस्तस्मात्स सेतुर्विधृतिः । किमर्थं स सेतुरित्याह—एषां भूरादीनां लोकानां कर्तृकर्मफलाश्रयाणामसंभेदायाविदारणायाविनाशायेत्येतत् । किंविशिष्टश्चासौ सेतुरित्याह—नैतम् । सेतुमस्मानमहोरात्रे सर्वस्य जनिमतः परिच्छेदके सती नैतं तरतः । यथाऽन्ये संसारिणः कालेनाहोरात्रादिलक्षणेन परिच्छेद्या न तथाऽयं कालपरिच्छेद्य इत्यभिप्रायः । यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तत इति श्रुत्यन्तरात् । अत एवैनं न जरा तरति न पाप्मोति । तथा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सुकृतदुष्कृते धर्माधर्मौ । प्राप्तिरत्र तरणशब्देनाभिप्रेता नातिक्रमणम् । कारणं ह्यात्मा । न शक्यं हि कारणातिक्रमणं कर्तुं कार्येण । अहोरात्रादि च सर्वं सतः कार्यम् । अन्येन ह्यन्यस्य प्राप्तिरतिक्रमणं वा क्रियेत । नतु तेनैव तस्य । न हि घटेन मृत्प्राप्यतेऽतिक्रम्यते वा यद्यपि पूर्वं य आत्माऽपहतपाप्मेत्यादिना पाप्मादिप्रतिषेध उक्त एव तथाऽपीहायं विशेषो न तरतीति प्राप्तिविषयत्वं प्रतिषिध्यते । तत्राविशेषेण जराद्यभावमात्रमुक्तम् । अहोरात्राद्या उक्ता अनुक्ताश्चान्ये सर्वे पाप्मान उच्यन्तेऽतोऽस्मादात्मनः सेतोर्निवर्तन्तेऽपाप्मैवेत्यर्थः । अपहतपाप्मा ह्येष ब्रह्मैव लोको ब्रह्मलोक उक्तः ॥ १ ॥

वाक्यान्तरमादत्ते—अथेति । तस्य तात्पर्यमाह—उक्तलक्षण इति । प्रकारान्तरेण स्तुतिप्रारम्भार्थो वाक्यस्थोऽथशब्दः । किमिति स्तुतिरित्यपेक्षायां स्तुत्ये ब्रह्मण्याधारे ब्रह्मचर्याख्यस्य साधनस्य संबन्धविधानार्थमित्याह—ब्रह्मचर्येति । यथा मृदादिमयः सेतुर्व्यवस्थाहेतुरस्येदं क्षेत्रमिति तथाऽयमपि व्यवस्थाहेतुरित्याह—सेतुरिवेति । सेतुत्वं साधयति—विधृतिरिति । विधारकत्वमुपपादयति—अनेनेति । वर्णाश्रमादीत्यादिशब्दो वयोवस्थाविषयः । फलादीत्यादिशब्दस्तु तद्वदान्तरजातीयविषयः । कर्त्रनुरूपक्रियाभेदविषयनियमैः सह वर्णादि व्यवस्थापयता परमेश्वरेण सर्वं जगद्विधृतमिति संबन्धः । अन्वयमुखेनोक्तमेव व्यतिरेकमुखेनाऽऽ(णाऽऽ)ह—अभ्रियमाणं हीति । उक्तमेवार्थं प्रश्नपूर्वकं विशदयति—किमर्थमित्यादिना । नैतमिति प्रतीकग्रहणं यत्तद्वचाचष्टे—सेतुमित्यादिना । तदेव वैधर्म्यदृष्टान्तेन स्पष्ट-

---

१ घ. ङ. च. ठ. ड. ढ. तेन । २ ठ. ङ. कर्त्रनु° । ३ ठ. अविभ्रि° । ४ घ. च. °रादिला° । ५ ख. ञ. ड. ढ. ण. नैनं । ६ क. ग. च. ढ. ठ. ड. °र्न तु शो° । ७ ख. ञ. ण. °मित्यथेति । ८ ग. घ. °णं तद्वचा° ।

यति—पर्वेत्यादिना । परमात्मनो न कालपरिच्छेद्यतेत्यत्राऽऽथर्वणश्रुतिं प्रमाणयति-यस्मादिति । तरतीति तरतेरतिक्रमणार्थो नाऽऽत्मनि संभवतीत्यत्र हेतुमाह—कारणं हीति । कार्यस्य कारणातिक्रमणं मा भूदहोरात्रादेरत्वात्मातिक्रमणं किं न स्यादित्याशङ्क्याऽऽह—अहोरात्रादि चेति । तरतेरतिक्रमणार्थत्वमङ्गीकृत्यापि निषेधे हेतुमाह—अन्येनेति । तरतिर्नास्यस्यापहतपाप्मादिवाक्येन पौनरुक्त्यमाशङ्क्य परिहरति—यद्यपीति । विशेषणानामानन्त्यात्प्रत्येकं प्रतिषेधवचनासंभवमभिप्रेत्याऽऽह—अहोरात्राद्या हीति । पाप्मकार्याणामात्मानमप्राप्यैव निवृत्तौ हेतुमाह—अपहतेति ॥ १ ॥

तस्माद्वा एतꣳ सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तस्माद्वा एतꣳ सेतुं तीर्त्वाऽपि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोकः ॥ २ ॥

यस्माच्च पाप्मकार्यमान्ध्यादि शरीरवतः स्यान्न त्वशरीरस्य तस्माद्वा एतमात्मानं सेतुं तीर्त्वा प्राप्यानन्धो भवति देहवत्त्वे पूर्वमन्धोऽपि सन् । तथा विद्धः सन्देहवत्त्वे स देहवियोगे सेतुं प्राप्याविद्धो भवति । तथोपतापी रोगाद्युपतापवान्सन्ननुपतापी भवति । किंच यस्मादहोरात्रे न स्तः सेतौ तस्माद्वा एतं सेतुं तीर्त्वा प्राप्य नक्तमपि तमोरूपं रात्रिरपि सर्वमहरेवाभिनिष्पद्यते । विज्ञप्त्यात्मज्योतिःस्वरूपमहरिवाहः सदैकरूपं विदुषः संपद्यत इत्यर्थः । सकृद्विभातः सदा विभातः सदैकरूपः स्वेन रूपेणैष ब्रह्मलोकः ॥ २ ॥

यथोक्तसेतुप्राप्तौ फलितमाह—यस्मादिति । स्वाभाविकमस्यानर्थत्वमित्याशङ्क्याऽऽह—देहवत्त्व इति । विद्धो दुःखादिसंबन्धी । इतश्चाऽऽत्मसेतोरस्ति महाभागधेयत्वमित्याह—किंचेति । कथं सर्वमपि तमोरूपमहरेव विदुषः स्यान्हि विद्ययाऽपि विरुद्धोऽर्थः सिध्यतीत्याशङ्क्याऽऽह—विज्ञप्तीति । तत्र हेतुमाह—सकृदिति । ब्रह्मलक्षणोऽवेद्यो लोकः स्वप्रकाशचिदेकतानो यतोऽवतिष्ठतेऽतस्तद्रूपत्वाद्विदुषो यथोक्तरूपत्वमविरुद्धमित्यर्थः ॥ २ ॥

तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति

---

१ ख. छ. ञ. ण. °थेति । प°। २ ग. ट. °रस्याऽऽत्म°। ३ ट. तरते° । ४ क. ण. °त्वे दे°।

तेषामेवैष ब्रह्मलोकस्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ ३ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

तत्रैवं सत्येतं यथोक्तं ब्रह्मलोकं ब्रह्मचर्येण स्त्रीविषयतृष्णात्यागेन शास्त्राचार्योपदेशमनुविन्दन्ति स्वात्मसंवेद्यतामापादयन्ति ये तेषामेव ब्रह्मचर्यसाधनवतां ब्रह्मविदामेष ब्रह्मलोकः, नान्येषां स्त्रीविषयसंपर्कजाततृष्णानां ब्रह्मविदामपीत्यर्थः । तेषां सर्वेषु लोकेषु कामचारो भवतीत्युक्तार्थम् । तस्मात्परमेतत्साधनं ब्रह्मचर्यं ब्रह्मविदामित्यभिप्रायः ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

—:⊙-⊙-⊙-⊙:—

विद्याफले यथोक्तरीत्या व्यवस्थिते सत्येतत्फलं विद्यावत्त्वेन केषां सिध्यतीत्याशङ्क्याऽऽह—तत्रेति । ब्रह्मचर्यवतां विद्याद्वारा ब्रह्मारूयो लोकः फलतीत्यर्थः । तेषामेवेत्येवकारद्योतितमर्थमाह—नान्येषामिति । ब्रह्मविदामपीति वाङ्मात्रब्रह्मवित्त्वमुच्यते । तेषां ब्रह्मचर्यवतां ब्रह्मविदामिति यावत् । ब्रह्मचर्यसाधनवतामेव ब्रह्मवित्त्वेन ब्रह्मारूयो लोको भवतीति स्थिते फलितमाह—तस्मादिति । साधनं ब्रह्मविद्यायामिति शेषः । ब्रह्मविदामिति भाविनीं वृत्तिमाश्रित्योक्तम् ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

(अथाष्टमाध्यायस्य पञ्चमः खण्डः) ।

य आत्मा सेतुत्वादिगुणैः स्तुतस्तत्प्राप्तये ज्ञानसहकारिसाधनानन्तरं ब्रह्मचर्याख्यं विधातव्यमित्याह । यज्ञादिभिश्च तत्स्तौति कर्तव्यार्थम्—

अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवेष्ट्वाऽऽत्मानमनुविन्दते ॥ १ ॥

अथ यद्यज्ञ इत्याचक्षते लोके परमपुरुषार्थसाधनं कथयन्ति शिष्टास्तद्ब्रह्मचर्यमेव । यज्ञस्यापि यत्फलं तद्ब्रह्मचर्यवाञ्छँभतेऽतो यज्ञोऽपि ब्रह्मचर्यं भवति

१ क. ग. ङ. ट. ठ. ढ. तत्रैवं । २ ख. घ. ङ. च. ञ. ट. ण. °रमे° । ३ क. ग. ढ. °त्मा इ से° । ४ ख. ङ. ञ. ड. ढ °ते ततो ।

मतिपत्तव्यम्। कथं ब्रह्मचर्यं यज्ञ इत्याह —ब्रह्मचर्येणेव हि[1] यस्माद्योज्ञाता स तं ब्रह्मलोकं यज्ञस्यापि पारम्पर्येण फलभूतं विन्दते लभते ततो यज्ञोऽपि ब्रह्मचर्यमेवेति। यो ज्ञातेत्यक्षरानुवृत्तेर्यज्ञो ब्रह्मचर्यमेव। अथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तत्। कथम्। ब्रह्मचर्येणैव साधनेन तमीश्वरमिष्ट्वा पूजयित्वाऽथैषणामात्मविषयां कृत्वा तमात्मानमनुविन्दते। एषणादिष्टमपि ब्रह्मचर्यमेव ॥ १ ॥

अथ यथोक्तपरमात्मप्राप्तिसाधने ज्ञाने सहकारिब्रह्मचर्यं प्रागेवोक्तं तथा च कृतं ब्रह्मचर्यविषयेणोत्तरग्रन्थेनेत्याशङ्क्याऽऽह —य आत्मेति। शमाद्यपेक्षयाऽनन्तरशब्दः। उक्तमपि ब्रह्मचर्यं विधातुमनन्तरग्रन्थप्रवृत्तिरित्यर्थः। किमिति तर्हि तस्य स्तुतिरित्याशङ्क्य तस्या विधिशेषत्वं दर्शयति—यज्ञादिभिश्चेति। श्रुतिराहोत्तरं वाक्यमित्युक्तं तदादाय व्याकरोति—अथेत्यादिना। ब्रह्मचर्यस्योक्तरीत्या विधितिसतत्वे तदीयस्तुतिप्रारम्भार्थोऽथशब्दः। यज्ञस्य ब्रह्मचर्येऽन्तर्भावं साधयति—यज्ञस्यापीति। उक्तमेवार्थमाकाङ्क्षाद्वारा समर्थयते—कथमित्यादिना। पारम्पर्येण चित्तशुद्धिद्वारेणेत्यर्थः। न केवलं फलद्वारा यज्ञो ब्रह्मचर्येऽन्तर्भवति किंतु यकारज्ञकारसंस्पर्शादपीत्याह—यो ज्ञातेति। इष्टस्य ब्रह्मचर्यान्तर्भावमाकाङ्क्षाद्वारा स्फोरयति—कथमित्यादिना। पूजयित्वा तमात्मानमनुविन्दत इति संबन्धः। ब्रह्मचर्येणाऽऽत्मविषयैषणं निष्पाद्यत इष्टेनापि तदेव संपाद्यते तस्मादेषणादुभयसाहित्यादिष्टमपि यज्ञवद्ब्रह्मचर्यमेवेत्याह—एषणादिति ॥ १ ॥

> अथ यत्सञ्ज्ञायणमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येण ह्येवाऽऽत्मानमनुविद्य मनुते ॥ २ ॥

अथ यत्सञ्ज्ञायणमित्याचक्षते ब्रह्मचर्यमेव तत्तथा सतः परस्मादा*त्मन आत्म×नस्त्राणं रक्षणं ब्रह्मचर्यसाधनेन विन्दते। अतः सञ्ज्ञायणशब्दमपि ब्रह्मचर्यमेव तत्। अथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तद्ब्रह्मचर्येणैव साधनेन

---

* अत्र सकाशादिति शेषः। × जीवस्येत्यर्थः।

---

१ ङ. ढ. हि साधनेन यं°। २ घ. ङ. च. ट. ड. °ते। यो। ३ ग. ट. °षयेण यन्निष्पा° ४ क. ग. ट. °इदयङादि°। ५ घ. च. ठ. ड. ण. °ते तत्सत्रा°। ६ ठ. ण. °र्येण हि सा°

पुरुषः सन्नात्मानं शास्त्राचार्याभ्यामनुविद्य पश्चान्मनुते ध्यायति। अतो मौनशब्दमपि ब्रह्मचर्यमेव ॥ २ ॥

बहुयजमानकं वैदिकं कर्म सन्नायणम्। तथा यज्ञवदिष्टवच्चेत्यर्थः। कथं सन्नायणं ब्रह्मचर्येऽन्तर्भवतीत्याशङ्क्याऽऽह—सत इति ॥ २ ॥

अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानविन्दतेऽथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत्तदरश्च ह वै प्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरंमदीयꣳ सरस्तदश्वत्थः सोमसवनस्तदपराजिता पूर्वब्रह्मणः प्रभुविमितꣳ हिरण्मयम् ॥ ३ ॥

अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तत्। यमात्मानं ब्रह्मचर्येणानुविन्दते स एष ह्यात्मा ब्रह्मचर्यसाधनवतो न नश्यतीति तस्मादनाशकायनमपि ब्रह्मचर्यमेव। अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत्। अरण्यशब्दयोरर्णवयोर्ब्रह्मचर्यवतोऽयनादरण्यायनं ब्रह्मचर्यम्। यो ज्ञानाद्यङ्ग एषणादिष्टं सतस्त्राणात्सन्नायणं मननान्मौनमनशनादनाशकायनमरण्ययोर्गमनादरण्यायनमित्यादिभिर्महद्भिः पुरुषार्थसाधनैः स्तुतत्वाद्ब्रह्मचर्यं परमं ज्ञानस्य सहकारिकारणं साधनमित्यतो ब्रह्मविदा यत्नतो रक्षणीयमित्यर्थः। तत्तत्र हि ब्रह्मलोकेऽरश्च ह वै प्रसिद्धो प्यश्चार्णवौ समुद्रौ समुद्रोपमे वा सरसी तृतीयस्यां भुवमन्तरिक्षं चापेक्ष्य तृतीया द्यौस्तस्यां तृतीयस्यामितोऽस्माल्लोकादारभ्य गण्यमानायां दिवि। तत्तत्रैव चैरमिराज्यं तन्मय ऐरो मण्डस्तेन पूर्णमैरं मदीयं तदुपयोगिनां मदकरं हर्षोत्पादकं सरः। तत्रैव चाश्वत्थो वृक्षः सोमसवनो नामतः सोमोऽमृतं तान्निःस्रवोऽमृतस्रव इति वा। तत्रैव च ब्रह्मलोके ब्रह्मचर्यसाधनरहितैर्ब्रह्मचर्यसाधनवद्भयोऽन्यैर्न जीयत इत्यपरा जिता नाम पूः पुरी ब्रह्मणो हिरण्यगर्भस्य। ब्रह्मणा च प्रभुणा

---

१ क. ग. घ. ङ. झ. ट. ठ. त. थ. 'तद्'। २ ङ. ट. 'श्यत्यनशनादनाशकमेवायनं त'। ठ. 'श्यत्यतोऽनशनाद्'। ३ ठ. ढ. 'नशब्दम्'। ४ ग. ङ. ठ. ढ. 'र्यं ह्या'। ५ क. ग. घ. च. ट. ठ. ड. ढ. ण. 'नस'। ६ ण. 'रिता'। ७ ञ. ठ 'रणसा'। ८ ङ. ठ. ड. तत्र'। ९ ङ. 'प्रभोगि'।

विश्वेषेण मितं निर्मितं तच्च हिरण्मयं सौवर्णं प्रभुविमितं मण्डपमिति वाक्यशेषः ॥ ३ ॥

उपवासपरायणत्वमनाशकायनं तत्कथं ब्रह्मचर्येऽन्तर्भवतीत्याशङ्क्याऽऽह-यमात्मानमिति । अरण्यायनमरण्यवासस्तत्कथं ब्रह्मचर्यान्तर्भूतमित्याशङ्क्याऽऽह—अरण्यशब्दयोरिति । विस्तरेणोक्तमर्थं संक्षिप्याऽऽह—यो ज्ञानादित्यादिना । यो ब्रह्मचर्येणाऽऽत्मनो ज्ञानादात्मानं विन्दते स ब्रह्मलोकं लभते तस्माद्यज्ञो ब्रह्मचर्यमिति योजना । आदिशब्देन स्वस्य परमपुरुषार्थसाधनत्वं गृह्यते ॥ ३ ॥

तद्य एवैतावरं च एयं चार्णौ ब्रह्मलोके ब्रह्मचर्येणा-
नुविन्दन्ति तेषामेवैष ब्रह्मलोकस्तेषा॰ सर्वेषु लोकेषु
कामचारो भवति ॥ ४ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

===

तत्तत्र ब्रह्मलोक एतावर्णवौ यावरण्याख्यावुक्तौ ब्रह्मचर्येण साधनेनानुविन्दन्ति ये तेषामेवैष यो व्याख्यातो ब्रह्मलोकस्तेषां च ब्रह्मचर्यसाधनवतां ब्रह्मविदां सर्वेषु लोकेषु कामचारो भवति । नान्येषामब्रह्मचर्यपराणां बाह्यविषयासक्तबुद्धीनां कदाचिदपीत्यर्थः । नन्वत्र त्वमिन्द्रस्त्वं यमस्त्वं वरुण इत्यादिभिर्यथा कश्चित्स्तूयते महाई एवमिष्टादिभिः शब्दैर्न स्त्र्यादिविषयतृष्णानिवृत्तिमात्रं स्तुत्यर्हं किं तर्हि ज्ञानस्य मोक्षसाधनत्वात्तद्वेष्टादिभिः स्तूयत इति केचित् । न । स्त्र्यादिबाह्यविषयतृष्णापहृतचित्तानां प्रत्यगात्मविवेकविज्ञानानुपपत्तेः । " पराञ्चि खानि व्यतृणत् । स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन् " इत्यादिश्रुतिस्मृतिशतेभ्यः । ज्ञानसहकारिकारणं स्त्र्यादिविषयतृष्णानिवृत्तिसाधनं विधातव्यमेवेति युक्तैव तत्स्तुतिः । ननु च यज्ञादिभिः स्तुतं ब्रह्मचर्यमिति यज्ञादीनां पुरुषार्थसाधनत्वं गम्यते । सत्यं गम्यते । न त्विह ब्रह्मलोकं प्रति यज्ञादीनां साधनत्वमभिप्रेत्य यज्ञादिभिर्ब्रह्मचर्यं स्तूयते किं तर्हि तेषां प्रसिद्धं पुरुषार्थसाधनत्वमपेक्ष्य । यथेन्द्रादिभी राजा न तु यज्ञेन्द्रादीनां व्यापारस्तत्रैवं राज्ञ इति तद्वत् ।

ब्रह्मचर्यस्य स्तुतत्वात्तद्विषयं विधिमुक्त्वा तत्सहकृतविद्यासाध्यफलं कथयति—

---

१ क. ग. ङ. ट. ड. ढ. °नै स्त्रीभि° । २ घ. ङ. च. °दिवि° । ३ ख. ग. घ. ङ. च. ज. ट. ठ. ड ढ. ण °पहृत° । ४ ग. ट. ठ. °नु य° । ५ क. °सिद्धपु° । ६ ग. ढ. °व च रा° ।

तेन हीति । ब्रह्मचर्यस्यात्यल्पसाधनत्वान्महती स्तुतिर्युक्ता तद्ब्रह्मचर्येण ज्ञानमुपलक्ष्य तदेवलक्ष्य स्तूयत इति मतमुत्थापयति—नन्वत्रेति । तस्य क्षुद्रसाधनत्वमसिद्धं दुरनुष्ठेयत्वात्तद्व्यतिरेकेण ज्ञानासंभवाच्चेत्युत्तरमाह—नेत्यादिना । विषयापहृतविवेकानां नराणां विवेकासंभवे प्रमाणमाह—पराञ्चीति । ध्यायतो विषयानित्याद्या स्मृतिरत्र विवक्षिता । ब्रह्मचर्यस्योत्तमसाधनत्वे सिद्धे फलितमाह—ज्ञानेति । ब्रह्मलोकप्राप्तिसाधनस्य ब्रह्मचर्यस्य यज्ञादिभिः स्तुतत्वात्तेषामपि तत्प्राप्तिसाधनत्वं श्रुत्याऽभिप्रेतमिति शङ्कते—नन्विति । किं तेषां पुरुषार्थसाधनत्वं प्रस्तुतश्रुत्या प्रतीतं किंवा ब्रह्मलोकसाधनत्वमिति विकल्प्याऽऽद्यमङ्गीकरोति—सत्यमिति । न द्वितीयो वाक्यभेदप्रसङ्गादित्याह—न त्विति । कथं तर्हि यज्ञादिभिर्ब्रह्मचर्यस्तुतिस्तत्राऽऽह—किं तर्हीति । उक्तमर्थं दृष्टान्तेन स्पष्टयति—यथेति । त्वमिन्द्रस्त्वं विष्णुरित्यादिना विप्रादिभी राजा स्तुयते तथाऽपि न तस्येन्द्रादिव्यापारे निरङ्कुशं कर्तृत्वमस्तीति यथेष्यते तथा यज्ञादिभिर्ब्रह्मचर्यस्य स्तुतस्यापि नास्ति तुल्यफलत्वमित्यर्थः ।

य इमेऽर्णवादयो ब्राह्मलौकिकाः संकल्पजाश्च पित्रादयो भोगास्ते किं पार्थिवा आप्याश्च यथेह लोके दृश्यन्ते तद्वदर्णववृक्षपूःस्वर्णमण्डपान्याहोस्विन्मानसप्रत्ययमात्राणीति । किंचातः, यदि पार्थिवा आप्याश्च स्थूलाः स्युर्ह्याकाशे समाधानानुपपत्तिः । पुराणे च मनोमयानि ब्रह्मलोके शरीरादीनीति वाक्यं विरुध्येत । " अशोकमहिमम् " इत्याद्याश्च श्रुतयः । ननु समुद्राः सरितः सरांसि वाप्यः कूपा यज्ञा वेदा मन्त्रादयश्च मूर्तिमन्तो ब्रह्माणमुपतिष्ठन्त इति मानसत्वे विरुध्येत पुराणस्मृतिः । न । मूर्तिमत्त्वे प्रसिद्धरूपाणामेव तत्र गमनानुपपत्तेः । तस्मात्प्रसिद्धमूर्तिव्यतिरेकेण सागरादीनां मूर्त्यन्तरं सागरादिभिरुपात्तं ब्रह्मलोकगन्तृ कल्पनीयम् । तुल्यायां च कल्पनायां यथाप्रसिद्धा एव मानस्य आकारवत्यः पुंस्त्र्याद्या मूर्तयो युक्ताः कल्पयितुं मानसदेहानुरूप्यसंबन्धोपपत्तेः । दृष्टा हि मानस्य एवाऽऽकारवत्यः पुंस्त्र्याद्या मूर्तयः स्वप्ने ।

ब्रह्मलोकस्थान्पदार्थान्निर्णेतुं विचारमवतारयन्नादौ तद्विषयमाह—य इम इति । तत्रैकं पक्षमुत्थाप्य दृष्टान्तेन तदुत्थितप्रकारमाह—ते किमिति । पक्षान्तरं स्वप्नदृष्टान्तवशाद्दर्शयति—आहोस्विदिति । कस्मिन्पक्षे को लाभः को वा दोषः, दोषदर्शनान्मानसत्वेन सौक्ष्म्ये च पुराणानुग्रहसंभवात्ते मानसा एवेत्याह—यदीति । न केवलं तेषां स्थौल्ये सत्युभे अस्मिन्नित्यादिश्रुत्या पुराणस्मृत्या च विरोधः किं त्वशोकं संतापवर्जितमहिमं शीतस्पर्शशून्यं ब्रह्मलोकमुपयन्तीत्याद्याश्च श्रुतयो ब्रह्मलोकं निरूपयन्त्यस्तत्रत्यानाम

१ ग तत्र । २ क. ग. घ. ङ च. ट. ठ. ड. ढ. °वलो मू° । ३ ग. °स्थितिप्र° ।

सर्वेषां स्थौल्ये विरुध्येरन् । स्थूलानां पदार्थानां तत्र सत्त्वे शीतस्पर्शादेरवर्जनीयत्वादित्याह—अशोकमिति । ब्राह्मलौकिकपदार्थानां मानसत्वे पुराणस्मृत्यन्तरविरोधं शङ्कते—नन्विति । किं दृश्यमानरूपेण समुद्रादीनां ब्रह्मलोकगमनं स्मृत्यर्थः किंवा स्वरूपान्तरेणेति विकल्प्याऽऽद्यं दूषयति—न मूर्तिमत्त्व इति । उभयत्रानुपलम्भप्रसङ्गादित्यर्थः । प्रथमपक्षायोगे द्वितीयं पक्षं परिशिष्टमाचष्टे—तस्मादिति । अस्तु द्वितीयो विकल्पः का नो हानिरित्याशङ्क्य ब्रह्मलोके मानसेन देहेन मानसानामेव सागरादीनां मानसरूपेण सह संबन्धोपपत्तेर्मानस्य एव मूर्तयस्तेषां ब्रह्मलोकस्थाः कल्पयितुं युक्ता इत्याह—तुल्यायां चेति । तर्हि मनोरथकल्पितवदतिचञ्चलत्वाद्भोगयोग्याकारत्वं सागरादीनां न स्यादित्याशङ्क्याऽऽह—दृष्टा हीति ।

ननु ता अनृता एव । त इमे सत्याः कामा इति श्रुतिस्तथा सति विरुध्येत । नैं । मानसप्रत्ययस्य सत्त्वोपपत्तेः । मानसा हि प्रत्ययाः स्त्रीपुरुषाद्याकाराः स्वप्ने दृश्यन्ते । ननु जाग्रद्वासनारूपाः स्वप्नदृश्या न तु तत्र रूपादेयः स्वप्ने विद्यन्ते । अत्यल्पमिदमुच्यते । जाग्रद्विषया अपि मानसप्रत्ययाभिनिर्वृत्ता एव सदीक्षाभिनिर्वृत्ततेजोबन्नमयत्वाज्जाग्रद्विषयाणाम् । संकल्पमूला हि लोका इति चोक्तम् " समकल्पयतां द्यावापृथिवी " इत्यत्र । सर्वश्रुतिषु च प्रत्यगात्मन उत्पत्तिः प्रलयश्च तत्रैव स्थितिश्च " यथा वा अरा नाभौ " इत्यादिनोच्यते । तस्मान्मानसानां बाह्यानां च विषयाणामितरेतरकार्यकारणत्वमिष्यत एव बीजाङ्कुरवत् । यद्यपि बाह्या एव मानसा मानसा एव च बाह्या नानृतत्वं तेषां कदाचिदपि स्वात्मानं भजति ।

स्वप्नतुल्यत्वे मिथ्यात्वप्रसक्तिरिति शङ्कते—नन्विति । प्रसङ्गस्येष्टत्वमाशङ्क्य श्रुतिविरोधमाह—त इम इति । ये स्वप्ने दृष्टास्ते न सन्ति न तु दृष्टा इति दर्शनं बाध्यते तथा च स्वाप्नसंवेदनस्य सत्यत्वमिष्टं तथैव ब्रह्मलौकिकानां पदार्थानाम् । मानस्य इति दृष्टान्तं विवृणोति—मानसा हीति । जागरिते संविदतिरिक्ताः सन्ति पदार्थास्तद्वासनारूपास्ते स्वप्ने भान्ति न तु संविदात्मैकत्वं तेषामिति शङ्कते—नन्विति । जागरितस्यापि संविद्विवर्तत्वान्न पृथगस्ति सत्त्वमित्युत्तरमाह—अत्यल्पमिति । भूमविद्यालोचनायामपि जाग्रद्विषयाणां संविद्विवर्तत्वं सेत्स्यतीत्याह—संकल्पमूला हीति । इतश्च जाग्रद्विषयाणां संविद्विवर्तत्वमित्याह—सर्वश्रुतिषु चेति । ननु कुलालो घटं चिकीर्षुर्मनसि संकल्पितमाकारं बहिर्निर्मिमीते तत्र संकल्पो बाह्याकारस्य

---

१ ङ. ढ. न मनसः स° । २ ठ. °सत्यप्र° । ३ ख. घ. च. ज. °सत्यत्वोप° । ४ घ. च. ट. ड. °दयो वि° । ५ ख. छ. झ. ण. °त्वत्वं ।

निमित्तं संकल्पश्च पूर्वानुभूतसजातीयगोचरः पूर्वानुभूतोऽपि पूर्वतरसंकल्पनिमित्त इति निमित्तनैमित्तिकभावः सर्वस्य संविद्विवर्तत्वे कथमुपपद्यते तत्राऽऽह—तस्मादिति । यस्मात्सतः सर्वस्येक्षणं पूर्वकल्पीयतदृशगोचरं पूर्वकल्पीयोऽतः पूर्वतरेक्षणनिमित्त इति संविदेवेत्थं स्वाविद्यया विवर्तते निरवयवस्य सन्मात्रस्य स्वारस्येनेक्षणाद्यनुपपत्तेस्तस्मात्सर्वस्य संविद्विवर्तत्वेऽपि निमित्तनैमित्तिकभावोऽयमनिर्वाच्यो न विरुध्यत इत्यर्थः । अथ सच्छब्दवाच्यायाः संविदोऽनिर्वाच्यस्वन्दनकाले ये विषया बाह्यतया भासन्ते तेषां कदाचिदपि संविदतिरेकेण सत्त्वानङ्गीकारादाद्यन्तासत्त्वलक्षणमनृतत्वमापद्येत तथा च व्यवहारभङ्गप्रसङ्गस्तत्राऽऽह—यद्यपीति । तथाऽपि नानृतत्वमित्यध्याहारः । अध्यस्तस्याधिष्ठानमेव स्वात्मा तस्मिन्न कदाचिदप्यत्यन्तासत्त्वं तादात्म्येनैव स्फुरणादतो न व्यवहारभङ्गप्रसङ्ग इति भावः ।

ननु स्वप्ने दृष्टाः प्रतिबुद्धस्यानृता भवन्ति विषयाः । सत्यमेव । जाग्रद्बोधापेक्षं तु तदनृतत्वं न स्वतः । तथा स्वप्नबोधापेक्षं च जाग्रद्दृष्टविषयानृतत्वं न स्वतः । विशेषाकारमात्रं तु सर्वेषां मिथ्याप्रत्ययनिमित्तमिति वाचाऽऽरम्भणं विकारो नामधेयमनृतं त्रीणि रूपाणीत्येव सत्यम् । तान्यप्याकारविशेषतोऽनृतं स्वतःसन्मात्ररूपतया सत्यम् । प्राक्तदात्मप्रतिबोधात्स्वविषयेऽपि सर्वं सत्यमेव स्वप्नदृश्या इवेति न कश्चिद्विरोधः । तस्मान्मानसा एव ब्राह्मलौकिका अरण्यादयः संकल्पजाश्च पित्रादयः कामाः । बाह्यविषयभोगवदशुद्धिरहितत्वाच्छुद्धसत्त्वसंकल्पजन्या इति निरतिशयसुखाः सत्याश्चेश्वराणां भवन्तीत्यर्थः । सत्सत्यात्मप्रतिबोधेऽपि रज्ज्वामिव कल्पिताः सर्पादयः सदात्मस्वरूपतामेव प्रतिपद्यन्त इति सदात्मना सत्या एव भवन्ति ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

कदाचिदपि नानृतत्वमिति वदता प्रतीतिकालात्कालान्तरेऽपि विषयाणां नासत्त्वमित्युक्तं तत्रानुभवविरोधं शङ्कते—नन्विति । स्वप्नदृष्टानां समीहितमेव कालान्तरे मिथ्यात्वमित्यङ्गी करोति—सत्यमिति । तर्हि तेषामसत्त्वमेव स्वीकृतमित्याशङ्क्याऽऽह—जाग्रदिति । तथाऽपि जाग्रद्बोधेनाविषयीकरणादसत्त्वं स्वप्नदृष्टानामेष्टव्यमित्याशङ्क्याऽऽह—तथेति । यदि जाग्रद्बोधेनाविषयीकरणमात्रेणासत्त्वं स्वप्नदृष्टानां पदार्थानामिष्टं तर्हि जाग्रद्विषयाणामपि स्वप्नबोधेनाविषयीकरणादसत्त्वप्रसङ्गस्तत्र कदाचि-

---

१ ग. ट. °या अपि ततः । २ क. ख. छ. ञ. ण. °न्तेऽतश्च क° । ग. ट. °न्ते ततश्च क° । ३ ख. छ. ञ. ड. ण मेवम् । जा° । ४ ठ. °पेक्षया जा° ।

दपि संविदि विषयाणामत्यन्तासत्त्वमित्यर्थः । कथं तर्हि वाचाऽऽरम्भणश्रुतिरित्याशङ्क्याऽऽह—विशेषेति । त्रयाणां रूपाणां सत्यत्वे विशेषाकारमात्रं मिथ्येत्युक्तमयुक्तं तेष्वपि विशेषाकारस्य सत्त्वादित्याशङ्क्याऽऽह—तान्यपीति । कथं तर्हि तेषु सत्यपदं प्रयुक्तमित्याशङ्क्याऽऽह—स्वत इति । तर्हि तत्सत्यमित्येतावत्प्रयोक्तव्यं किमिति त्रीणि रूपाणीत्येव सत्यमित्युक्तं तत्राऽऽह—प्रागिति । प्रकृतमुपसंहरति—तस्मादिति । प्रथमपक्षवद्द्वितीयपक्षे दोषाभावादिति यावत् । यद्यैहिकविषयाद्ब्राह्मलौकिका अपि विषया विचार्यमाणाः सत्यास्तर्हि कस्तत्र विशेषो येनैतत्परित्यागेन तत्कामिनां विद्याविधानं तत्राऽऽह—बाह्येति । जन्या ब्रह्मलोके विषया इति शेषः । प्रकृतायाः फलश्रुतेरित्यध्याहारः । ननु तेषामविद्यादशायामर्थक्रियाकारित्वरूपसत्यत्वसंपत्तेऽपि कुतो विद्यावस्थायां सत्यत्वमित्याशङ्क्याऽऽह—सत्सत्येति । यथा रज्ज्वां कल्पितसर्पादयो रज्जुतत्त्वबोधे तदात्मतामेवाऽऽपद्यन्ते विवेचनात्तथा सर्वेऽपि विषया विद्यावस्थायामन्वयव्यतिरेकाभ्यां परिहारायासन्मात्रत्वमेव प्राप्नुवन्तीति तत्सत्यत्वमविरुद्धमित्यर्थः ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य पञ्चमः खण्डः ॥ ५ ॥

(अथाष्टमाध्यायस्य षष्ठः खण्डः) ।

यस्तु हृदयपुण्डरीकगतं यथोक्तगुणविशिष्टं ब्रह्म ब्रह्मचर्यादिसाधनसंपन्नस्त्यक्तबाह्यविषयानृततृष्णः सन्नुपास्ते तस्येयं मूर्धन्यया नाड्या गतिर्वक्तव्येति नाडीखण्ड आरभ्यते—

> अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नास्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः ॥ १ ॥

अथ या एता वक्ष्यमाणा हृदयस्य पुण्डरीकाकारस्य ब्रह्मोपासनस्थानस्य संबन्धिन्यो नाड्यो हृदयमांसपिण्डात्सर्वतो विनिःसृता आदित्यमण्डलादिव रश्मयस्ताश्चैताः पिङ्गलस्य वर्णविशेषविशिष्टस्याणिम्नः सूक्ष्मरसस्य रसेन पूर्णास्तदाकारा एव तिष्ठन्ति वर्तन्त इत्यर्थः । तथा शुक्लस्य नीलस्य पीतस्य

---

१ ग. °न्ते तथा । २ ग. ट. °काभावप° । ३ ग. घ. ङ. च. ट. ठ. ड. ढ. °ति ख° ।

लोहितस्य च रसस्य पूर्ण इति सर्वत्राध्याहार्यम् । सौरेण तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनान्नेन संपर्कात्पिङ्गलं भवति सौरं तेजः पित्ताख्यम् । तदेव च वातभूयस्त्वान्नीलं भवति । तदेव च कफभूयस्त्वाच्छुक्लम् । कफेन समतायां पीतम् । शोणितबाहुल्येन लोहितम् । वैद्यकाद्वा वर्णविशेषा अन्वेष्टव्याः कथं भवन्तीति श्रुतिस्त्वाहाऽऽदित्यसंबन्धादेव तत्तेजसो नाडीष्वनुगतस्यैते वर्णविशेषा इति । कथम् । असौ वा आदित्यः पिङ्गलो वर्णत एष आदित्यः शुक्लोऽप्येष नील एष पीत एष लोहित आदित्य एव ॥ १ ॥

सगुणविद्याफलस्वरूपमित्थमुपपाद्य तत्प्राप्तये गतिर्वक्तव्येति नाडीखण्डमवतारयति—यस्त्विति । यथोक्तो गुणः सत्यकामत्वादिः । ब्रह्मचर्यादित्यादिशब्दः शमदमादिसंग्रहार्थः । तमेवाऽऽदिशब्दार्थं स्पष्टयति—त्यक्तेति । अधिकारिणः सफलोपास्तिविध्यानन्तर्यमथशब्दार्थः । रसेनान्नस्येति शेषः । तदाकारा इति तच्छब्दोऽन्नरसविषयः । शुक्लस्येत्यादिषष्ठी पूर्ववत् । श्रुतावितिशब्दोऽध्याहारद्योतनार्थः । कथं पुनरन्नरसाय पिङ्गलादिविचित्रो वर्णविशेषः सिध्यतीत्याशङ्क्याऽऽह—सौरेणेति । यत्पित्ताख्यं सौरं तेजस्तेन पाकोऽशितस्य पीतस्य च जायते तेनाभिनिर्वृत्तेनान्नेन कफेन संपर्कात्तदेव पित्ताख्यं सौरं तेजो भवति पिङ्गलं तेन संपर्कादन्नरसस्य नाडीनां च जायते[2] पिङ्गलत्वमित्यर्थः । तदेव च पित्ताख्यं सौरं तेजो यथोक्तपाकाभिनिर्वृत्तेन प्रभूतेन वातेन संबन्धात्तद्भूयस्त्वाद्भवति नीलं तेन च संपर्कादन्नरसस्य नाडीनां च जायते नैल्यमित्याह—तदेवेति । प्रकृतमेव पित्ताख्यं सौरं तेजो यथोक्तपाकवशादभिनिर्वृत्तकफस्य स्वसंबन्धिनो भूयस्त्वाद्भवति शुक्लं तेन च संपर्कादन्नरसस्य नाडीनां च शौक्ल्यं भवतीत्याह—तदेव चेति । उक्ताकाभिनिर्वृत्तेन कफेन तदभिनिर्वृत्तस्यैव वातस्य समतायां तदेव तेजस्ततसंबन्धि पीतं जायते तत्संबन्धाच्चान्नरसस्य च नाडीनां च पीतत्वं भवतीत्याह—कफेनेति । यदा तु यथोक्ताकाभिनिष्पन्नं शोणितं बहुलं भवति तदा तस्य नाडीनां च लौहित्यं भवतीत्याह—शोणितेति । पक्षान्तरमाह—वैद्यकाद्वेति । अन्वेषणप्रकारमाह—कथमिति । नाभेरूर्ध्वं हृदयादधस्तादामाशयमाचक्षते । तद्धृतं तेजः सौरं पित्तमित्युच्यते । तच्चान्नरसस्य धात्वन्तरसहकारिवशाद्वर्णविशेषे कारणम् । "आमाशयगतं पित्तं रञ्जकं रसरञ्जनात्" इत्यादिवचनादित्यर्थः । कथं तर्हि पिङ्गलस्येत्याद्या श्रुतिरित्याशङ्क्याऽऽह—श्रुतिस्त्विति । उक्तमर्थमाकाङ्क्षाद्वारा स्फोरयति—कथमित्यादिना । आदित्यस्य पैङ्गल्यादयो वर्णविशेषाः शास्त्रप्रामाण्यादेव प्रत्येतव्याः ॥ १ ॥

---

१ घ. ङ. ढ. ढ. 'वतीति' ; २ ग. ठ. 'ते पैङ्गल्यमि' ।

तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं
चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ
गच्छन्तीमं चामुं चामुष्मादादित्यात्प्रतायन्ते ता
आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते
तेऽमुष्मिन्नादित्ये सृप्ताः ॥ २ ॥

तस्याध्वात्मं नाडीभिः कथं संबन्ध इत्यत्र दृष्टान्तमाह—तत्तत्र यथा लोके महान्विस्तीर्णः पन्था महापथ आततो व्याप्त उभौ ग्रामौ गच्छतीमं च संनिहितमामुं च विप्रकृष्टं दूरस्थमेवं यथा दृष्टान्तो महापथ उभौ ग्रामौ प्रविष्ट एवमेवैता आदित्यस्य रश्मय उभौ लोकावमुं चाऽऽदित्यमण्डलमिमं च पुरुषं गच्छन्त्युभयत्र प्रविष्टाः । यथा महापथः । कथम् । अमुष्मादादित्यमण्डलात्प्रतायन्ते संतता भवन्ति । ता अध्यात्ममासु पिङ्गलादिवर्णासु यथोक्तासु नाडीषु सृप्ता गताः प्रविष्टा इत्यर्थः । आभ्यो नाडीभ्यः प्रतायन्ते प्रवृत्ताः संतानभूताः सत्यस्तेऽमुष्मिन् । रश्मीनामुभयलिङ्गत्वाच्च इत्युच्यते ॥ २ ॥

आदित्यस्य तेजसो नाडीष्वनुगतस्य पैङ्गल्यादयो वर्णविशेषा भवन्तीत्युक्तं तदेव प्रश्नद्वारा दृष्टान्तावष्टम्भेन स्पष्टयति—तस्येत्यादिना । उभयत्राऽऽदित्यमण्डले पुरुषे चेत्यर्थः । तत्र पूर्वोक्तमेव दृष्टान्तमनुवदति—यथेति । उभौ ग्रामौ महापथो यथा गच्छति तथोभयत्राऽऽदित्यस्य रश्मयः प्रविष्टा इत्यर्थः । तमेव प्रवेशं प्रश्नद्वारा प्रकटयति—कथमित्यादिना । कथं नाडीनां पिङ्गलादिवर्णत्वमित्याशङ्क्य सौरेण तेजसेत्यादिनोक्तं स्मारयति—यथोक्तास्त्विति । अमुष्मिन्नादित्ये सृप्ता इति संबन्धः । कथं स्त्रीलिङ्गेन निर्दिष्टानां रश्मीनां पुंलिङ्गेन निर्देशस्तत्राऽऽह—रश्मीनामिति ॥ २ ॥

तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजा-
नात्यासु तदा नाडीषु सृप्तो भवति तं न कश्चन
पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवति ॥ ३ ॥

---

१ ख. ञ. °त्यर° । २ क. ख. ञ. ठ. ण. °ध्यात्मना° । ३ क. °था लोके दृ° । ख. घ. ञ. ण. °धाऽयं दृ° । ४ ख. ग. घ. च. ञ. ट. ड. ढ. ण. °त्यर° । ५ ख. ग. घ. ङ. च. ञ. ट. ड. ढ. ण. °कावादि° । ६ ग. संपन्नः ।

तत्तत्रैवं सति यत्र यस्मिन्काले एतत्स्वपनमयं जीवः सुप्तो भवति । स्वापस्य द्विप्रकारत्वाद्विशेषणं समस्त इति । उपसंहृतसर्वकरणवृत्तिरित्येतत् । अतो बाह्यविषयसंपर्कजनितकालुष्याभावात्सम्यक् प्रसन्नः संप्रसन्नो भवति । अत एव स्वप्नं विषयाकाराभासं मानसं स्वप्नप्रत्ययं न विजानाति नानुभवतीत्यर्थः । यदैवं सुप्तो भवत्यासु सौरतेजःपूर्णासु यथोक्तासु नाडीषु तदा सृप्तः प्रविष्टो नाडीभिर्द्वारभूताभिर्हृदयाकाशं गतो भवतीत्यर्थः । न ह्यन्यत्र सत्संपत्तेः स्वप्नादर्शनमस्तीति सामर्थ्यान्नाडीष्विति सप्तमी तृतीयया परिणम्यते । तं सन्तं संपन्नं न कश्चन न कश्चिदपि धर्माधर्मरूपः पाप्मा स्पृशतीति स्वरूपावस्थितत्वात्तदाऽऽत्मनः । देहेन्द्रियविशिष्टं हि सुखदुःखकार्यप्रदानेन पाप्मा स्पृशतीति नतु सत्संपन्नं स्वरूपावस्थं कश्चिदपि पाप्मा स्पष्टुमुत्सहते । अविषयत्वात् । अन्यो ह्यन्यस्य विषयो भवति न त्वन्यत्वं केनचित्कुतश्चिदपि सत्संपन्नस्य । स्वरूपपरित्यजनं त्वात्मनो जाग्रत्स्वप्नावस्थां प्रति गमनं बाह्यविषयप्रतिबोधोऽविद्याकामकर्मबीजस्य ब्रह्मविद्याहुताशदाहनिमित्तमित्यवोचाम षष्ठ एव तदिहापि प्रत्येतव्यम् । यदैवं सुप्तः सौरेण तेजसा हि नाडयन्तर्गतेन सर्वतः संपन्नो व्याप्तो भवति । अतो विशेषेण चक्षुरादिनाडीद्वारैर्बाह्यविषयभोगायाप्रसृतानि करणान्यस्य तदा भवन्ति । तस्मादयं करणानां निरोधात्स्वात्मन्येवावस्थितः स्वप्नं न विजानातीति युक्तम् ॥ ३ ॥

नाडीस्वरूपमुक्त्वा विज्ञानात्मस्वापाधिकरणत्वेन ताः स्तोतुमादौ स्वापं प्रस्तौति—तत्तत्रेति । सप्तम्यर्थमेव स्फुटयति—एवं सतीति । नाडीस्वरूपे पूर्वोक्तरीत्या निरूपिते सतीत्यर्थः । एतत्स्वपनमिति क्रियाविशेषणम् । समस्तविशेषणस्यार्थवत्त्वमाह—स्वापस्येति । दर्शनवृत्तिवददर्शनवृत्तिश्चेति द्विप्रकारत्वं स्वापस्येष्टम् । तत्र दर्शनवृत्तेः स्वापस्य व्यावृत्त्यर्थं समस्त इति विशेषणम् । तस्य संपिण्डितमर्थमाह—उपसंहृतेति । विशेषणान्तरमुत्थाप्य व्याकरोति—अत इति । उपसंहृतसर्वकरणत्वादिति यावत् । उक्तं विशेषणद्वयमुपजीव्य स्वप्नमित्यादि व्याचष्टे—अत एवेति । नाडीषु प्रविष्टो भवतीति यदुक्तं तदयुक्तं य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेत इत्यङ्गीकारादित्याशङ्क्याऽऽह—नाडीभिरिति । नाडीष्विति श्रुता सप्तमी कथं नाडीभिरिति तृती-

---

१ ग. घ. ङ. च. ठ. ढ. ण. °न्क लेऽयं । २ ग. °म्यक्संपन्नो । ३ घ. च. ट. ढ.°सन्नो । ४ ङ. च. ट. °या विप° । ५ ख. ङ. च. ठ. ण. °न क° । ६ घ. च. ट. ण. °शति । ७ घ. ङ. च. ट. ग. ठ. ड. ढ. °रूपात्प्रच्य° । ८ ख. ग. ङ. च. ञ. ट. ढ. ण. °सा ना° । ९ च. ट. °स्य पुरुषस्य त° । १० ग. ट. °तीत्ययुक्तं ।

यया व्याख्यायते तत्राऽऽह—न हीति । तदेति सुषुप्त्यवस्थोच्यते । तस्यामवस्थायां कर्माभावे कथं पुनरुत्थानमित्याशङ्क्याऽऽह—देहेति । सुखदुःखानुभवाभावात्पाप्मासंस्पर्शोऽत्र विवक्षितो न तु कर्माभावादित्यर्थः । अविषयत्वं साधयति—अन्यो हीति । सुषुप्ते स्वरूपावस्थस्य कथं प्रच्यवनमित्याशङ्क्याऽऽह—स्वरूपेति । अविद्याकामकर्मणां बीजमनाद्यज्ञानं तस्य ब्रह्मविद्याख्येनाग्निना न स्वापे दाहस्तन्निमित्तं सुषुप्तस्य पुनः स्वरूपप्रच्यवनमिति संबन्धः । तदेव व्याचष्टे—जाग्रदिति । कीदृक्प्रच्यवनमित्यपेक्षायामाह—बाह्येति । एतच्च सति संपद्य न विदुरित्यादावुदितमित्याह—इत्युवोचामेति । तेजसा हीति पाप्मास्पर्शे श्रौतो हेतुस्तं हेतुं व्याचष्टे—यदेति । तद्व्याप्तिकार्यमाह—अत इति । कार्यकरणसंस्पर्शाभावफलं दर्शयति—तस्मादिति ॥ ३ ॥

अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति ॥ ४ ॥

तत्रैवं सत्यथ यत्र यस्मिन्काले ऽबलिमानमबलभावं देहस्य रोगादिनिमित्तं जरादिनिमित्तं वा कृशीभावमेतन्नयनं नीतः प्रापितो देवदत्तो भवति मुमूर्षुर्यदा भवतीत्यर्थः । तमभितः सर्वतो वेष्टयित्वाऽऽसीना ज्ञातय आहुर्जानासि मां तव पुत्रं जानासि मां पितरं चेत्यादि । स मुमूर्षुर्यावदस्माच्छरीरादनुत्क्रान्तोऽनिर्गतो भवति तावत्पुत्रादीञ्जानाति ॥ ४ ॥

नाडीरेवं स्तुत्वा ताभिरूर्ध्वगमनं प्रदर्शयितुं मरणकालं प्रसञ्जयति—तत्रेति । तस्यैवार्थमाह—एवं सतीति । नाडीनामुत्क्रान्त्या प्राशस्त्ये सतीत्यर्थः । ताभिरूर्ध्वगमनप्रदर्शनप्रारम्भार्थोऽथशब्दः । रोगादीत्यादिपदमागन्तुकपर्वनिमित्तसंग्रहार्थम् । जरादीत्यादिपदं तु नैसर्गिकपर्वनिमित्तद्योतनार्थमिति भेदः । एतन्नयनमिति क्रियाविशेषणम् ॥ ४ ॥

अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स ओमिति वा होद्वा मीयते

---

१ ग. ट. °दृग्गन° । २ क. ग. घ ङ, ट ठ. ण. वर्त्यादि । ३ ग. घ. ङ. ज. झ. ट. ठ. त. थ. °र्ध्व आक्र ।

स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम् ॥५॥

अथ यत्र यदैतत्क्रियाविशेषणमित्यस्माच्छरीरादुत्क्रामति । अथ तदैतैरेव यथोक्ताभी रश्मिभिरूर्ध्वमाक्रमते यथाकर्मार्जितं(त)लोकं प्रत्यविद्वान् । इतरस्तु विद्वान्यथोक्तसाधनसंपन्नः स ओमित्योंकारेणाऽऽत्मानं ध्यायन्यथापूर्वं वा हैव, उद्गोर्ध्वं वा विद्वांश्चेदितरस्तिर्यङ्वेत्यभिप्रायः । मीयते प्रमीयते गच्छतीत्यर्थः । स विद्वानुत्क्रमिष्यन्यावत्क्षिप्येन्मनो यावता कालेन मनसः क्षेपः स्यात्तावता कालेनाऽऽदित्यं गच्छति प्राप्नोति क्षिप्रं गच्छतीत्यर्थो नैं तु तावतैव कालेनेति विवक्षितम् । किमर्थमादित्यं गच्छतीत्युच्यते—एतद्वै खलु प्रसिद्धं ब्रह्मलोकस्य द्वारं य आदित्यस्तेनं द्वारभूतेन ब्रह्मलोकं गच्छति विद्वान् । अतो विदुषां प्रपदनं प्रपद्यते ब्रह्मलोकपनेन द्वारेणेति प्रपदनम् । निरोधनं निरोधोऽस्मादादित्यादविदुषां भवतीति निरोधः । सौरेण तेजसा देह एव निरुद्धाः सन्तो मूर्धन्यया नाड्या नोत्क्रमन्त एवेत्यर्थः । विष्वङ्ङन्या इति श्लोकात् ॥ ५ ॥

प्रारब्धकर्मावसानार्थोऽथशब्दः । एतदिति क्रियाविशेषणमेतदुत्क्रमणं यथा स्यात्तथेत्यर्थः । यथोक्ताभिर्नाडीषु प्रसृताभिरादित्यमण्डलादागताभिरिति यावत् । कर्मणा जितं वशीकृतं स्वात्मसंबन्धितामापादितं लोकमनतिक्रम्य तं प्रत्यविद्वान्केवलकर्मवान्गच्छतीत्यर्थः । दहरविद्यावतो गतिं दर्शयति—इतरस्त्विति । यथोक्तसाधनं दहरविज्ञानं तेन संपन्नो विशिष्ट इत्यर्थः । स ध्यायन्गच्छतीत्युत्तरत्र संबन्धः । यथापूर्वं स्वाश्रावस्थायामिव मरणावस्थायामपीत्यर्थः । वा हेतिनिपातद्वयस्यावधारणरूपमर्थं कथयति—एवेति । उच्चैरुदार्थमाह—ऊर्ध्वमिति । वाशब्देन द्योतितं विकल्पं दर्शयति विद्वांश्चेदिति । यदि विद्वान्प्रमीयते तदोर्ध्वमेव गच्छति । यदि त्वविद्वान्प्रमीयते तदा तिर्यगेव गच्छतीति विभागः । विदुषस्त्यक्तदेहस्याऽऽदित्यप्राप्तावत्यन्तशैघ्र्यं दर्शयितुमनन्तरवाक्यमादत्ते—स विद्वानिति । तद्व्याचष्टे—यावतेति । आदित्यप्राप्तौ किं स्यादित्यत आह—अत इति । अविदुषामपि तर्हि प्राप्तानामादित्यं ततो निरुद्धानां पुनर्ब्रह्मलोकाप्राप्तिरित्याशङ्क्याऽऽह—सौरेणेति । देहे निरुद्धानां मूर्धन्यया नाड्या नोत्क्रमणमविदुषामित्यत्र लिङ्गं दर्शयति—विष्वङ्ङिति ॥ ५ ॥

---

१ ग. ट. °रूर्ध्वं आक्र° । २ ङ ढ. कर्मार्जितं । ३ ख. घ. ङ. ञ. ठ. ढ. ननु ता° । ४ क. °श्नुते ब्र°।

तदेष श्लोकः । शतं चैका च हृदयस्य नाड्यस्तासां
मूर्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्ङन्या उत्क्रमणे भवन्त्युत्क्रमणे भवन्ति ॥६॥
इति च्छान्दोग्योपनिषद्भाष्ये अष्टमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

तदेतस्मिन्नथोक्तेऽर्थे एष श्लोको मन्त्रो भवति । शतं चैका चैकोत्तरशतं नाड्यो हृदयस्य मांसपिण्डभूतस्य संबन्धिन्यः प्रधानतो भवन्ति । आनन्त्याद्देहनाडीनाम् । तासामेका मूर्धानमभिनिःसृता[1] विनिर्गता तयोर्ध्वमायन्नगच्छन्नमृतत्वममृतभावमेति विष्वङ्नानागतयस्तिर्यग्विसर्पिण[2] ऊर्ध्वगाश्चान्या नाड्यो भवन्ति संसारगमनद्वारभूता[3] न त्वमृतत्वाय किं तर्ह्युत्क्रमण एवोत्क्रान्त्यर्थमेव भवन्तीत्यर्थः । द्विरभ्यासः प्रकरणसमाप्त्यर्थः ॥ ६ ॥

इति छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

—:⊙-⊙-⊙-⊙:—

यथोक्तोऽर्थोऽनाड्यविमार्गलक्षणः । प्रधानत इति विशेषणतात्पर्यमाह—आनन्त्यादिति । प्रकरणं नाड्यविषयं दहरविद्याविषयं वा ॥ ६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य षष्ठः खण्डः ॥ ६ ॥

(अथाष्टमाध्यायस्य सप्तमः खण्डः) ।

"अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्म" इत्युक्तम् । तत्र कोऽसौ संप्रसादः, कथं वा तस्याधिगमो यथा सोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । येन स्वरूपेणाभिनिष्पद्यते स किंलक्षण आत्मा । संप्रसादस्य च देहसंबन्धीनि[3] पररूपाणि ततो यदन्यत्कथं स्वरूपमित्येतेऽर्था वक्तव्या इत्युत्तरो ग्रन्थ आरभ्यते । आख्यायिका तु विद्याग्रहणसंप्रदानविधिप्रदर्शनार्था विद्यास्तुत्यर्था च राजसेवितं पानीयमितिवत् ।

---

१ घ. ङ. च. छ. ञ. ण. °ता नि° । २ ख. ङ. ञ. ठ. ढ. ण. °ता नाम्° । ३ क. ग. ट. ढ. °नि रू° । ४ ग. घ. च. ट. °दायवि° । ५ ख. ञ. ण. वा । ६ ख. छ. ञ. ण. °यासु° । ७ ख. छ. ञ. ण. °मुक्ताम° ।

दहरविद्यायामुपास्यस्तुत्यर्थमुक्तमनुवदति—अथेति । विवेकानन्तर्यमथशब्दार्थो व्याख्यातः । शरीरात्समुत्थानं तस्मिन्नहंममाभिमानत्यागः । स्वरूपं विशिनष्टि—एष इति । उक्तिकर्तृत्वमाचार्यस्य दर्शितमेव । प्राणो वा संप्रसादो विज्ञानात्मा वेति संशयान्पृच्छति—तत्रेति । प्रकृतं वाक्यं सप्तम्यर्थः । तस्य च संप्रसादस्य परमात्मविषयं ज्ञानं केनोपायेन भवतीति प्रश्नान्तरमाह—कथं वेति । किं तस्य परमात्माधिगमेनेत्याशङ्क्याऽऽह—यथेति । तथा तस्याधिगमः कथमिति संबन्धः । अभिनिष्पद्यमानरूपश्चाऽऽत्मा सविशेषो निर्विशेषो वेति प्रश्नान्तरं करोति—येनेति । आत्मनो हि सच्चिदानन्दैकतानादर्थान्तराणि रूपाणि दृश्यमानानि शरीरसंबन्धप्रयुक्तानि । तथा च ततः शरीरादुपाधेर्यदन्यत्तस्य स्वरूपं तत्कथं सर्वप्रमाणाप्रतिपन्नमस्तीति प्रश्नान्तरमाह—संप्रसादस्य चेति । एतेषां प्रश्नानामुत्तरस्त्वेनोत्तरग्रन्थमवतारयति—इत्येत इति । प्रजापतेरिन्द्रविरोचनयोश्च संवादरूपा याऽत्राऽऽख्यायिका दृश्यते सा किमर्थेत्याशङ्क्याऽऽह—आख्यायिका त्विति । शिष्यस्य विद्याया ग्रहणे गुरोस्तस्याः सम्यक्प्रदाने च यो विधिः श्रद्धालुत्वादिप्रकारस्तत्प्रदर्शनार्थेति यावत् । यद्वा विद्याया ग्रहणं स्वीकरणं यत्र संप्रदाने तद्दानपात्रे शिष्ये दृश्यते तस्य विधिर्ब्रह्मचर्यादिस्तत्प्रदर्शनार्थेत्यर्थः । आख्यायिकायास्तात्पर्यान्तरमाह—विद्येति । प्रजापतिना प्रोक्ता देवैरसुरैश्च प्रार्थितेन्द्रविरोचनाभ्यां देवासुराधिपतिभ्यामायासेन महता प्रेषितता देवराजेन च कथंचित्प्राप्ता तस्मान्महार्हेयं विद्येति तस्याः स्तुत्यर्थाऽऽख्यायिकेत्यर्थः । महद्भिरुपासितस्य महार्हत्वे दृष्टान्तमाह—राजसेवितमिति ।

य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥ १ ॥

य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः । यस्योपासनायोपलब्ध्यर्थं हृदयपुण्डरीकमभिहितं यस्मिन्कामाः समाहिताः सत्या अनृतापिधाना यदुपासनसहभावि ब्रह्मचर्यं साधनमुक्तमुपासनफलभूतकामप्रतिपत्तये च मूर्धन्यया नाड्या गतिरभिहिता सोऽन्वेष्टव्यः शास्त्राचार्योपदेशैर्ज्ञातव्यः स विशेषेण ज्ञातुमेष्टव्यो विजिज्ञासि-

व्यः स्वसंवेद्यतामापादयितव्यः। किं तस्यान्वेषणादिजिज्ञासनाच्च स्यादित्युच्यते—स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानं यथोक्तेन प्रकारेण शास्त्राचार्योपदेशेनान्विष्य + विजानाति स्वसंवेद्यतामापादयति तस्यैतत्सर्वलोककामावाप्तिः सर्वात्मता फलं भवतीति ह किल प्रजापतिरुवाच। अन्वेष्टव्यो विजिज्ञासितव्य इति चैष नियमविधिरेव नापूर्वविधिः। एवमन्वेष्टव्यो विजिज्ञासितव्य इत्यर्थः। दृष्टार्थत्वादन्वेषणविजिज्ञासनयोः। दृष्टार्थत्वं च दर्शयिष्यति नाहमत्र भोग्यं पश्यामीत्यनेनासकृत्। परूपेण च देहादिधर्मैरवगम्यमानस्याऽऽत्मनः स्वरूपाधिगमे विपरीताधिगमनिवृत्तिर्दृष्टं फलमिति नियमार्थत्वैवास्य विधेर्युक्ता न त्वग्निहोत्रादीनामिवापूर्वविधित्वमिह संभवति ॥ १ ॥

यन्मायोपाधि सविशेषं चैतन्यं तदेव निरुपाधि निर्विशेषमिति सविशेषनिर्विशेषयोरभेदाभिप्रायेण प्रजापतिवाक्यं व्याकर्तुमादत्ते—य आत्मेति। तत्र सेऽन्वेष्टव्य इति वाक्ये सशब्दार्थमाह—यस्येति। उपासनमपि किमर्थमित्यपेक्षायामाह—उपलब्ध्यर्थमिति। तस्यैतत्फलमिति संबन्धः। कथं निर्गुणविद्यायाः सर्वलोककामावाप्तिः फलमित्याशङ्क्याऽऽह—सर्वात्मेति। परिच्छेदभ्रमनिवृत्त्या पूर्णस्वरूपेणावस्थितिरित्यर्थः। प्रजापतिवाक्यात्प्रतीयमानविधिस्वरूपमाह—अन्वेष्टव्य इति। एवकारव्यावर्त्यं दर्शयति—नापूर्वविधिरिति। शब्दादेव विधेरुदये तदुत्पत्त्यर्थोऽपूर्वविधिरग्निहोत्रादिविधिवन्न संभवतीत्यर्थः। कथमिह नियमविधिरपि स्यादवघातविधिवदित्याशङ्क्याऽऽह—एवमिति। मिथ्याज्ञानसंस्कारप्राबल्यादनात्मन्यात्मनिवेशस्य पक्षे प्राप्ते शास्त्राचार्याभ्यामात्मान्वेषणमेव कार्यमिति नियम इत्यर्थः। इतश्च नियमविधिरेव नापूर्वविधिरित्याह—दृष्टार्थत्वादिति। अन्वेषणविजिज्ञासनयोः ज्ञानसाधनमुक्तं तस्य च विद्याद्वाराऽविद्यानिवृत्तिर्दृष्टमेव फलमन्वयव्यतिरेकाभ्यां तद्धेतुत्वावगमात्तया च तत्र नापूर्वविधेरवकाशोऽस्तीत्यर्थः। तयोर्दृष्टफलत्वे वाक्यशेषमनुकूलयति—दृष्टार्थत्वं चेति। कथमसकृत्प्रयुक्तेन न पश्यामीति वर्तमानोपदेशेनान्वेषणादेर्दृष्टफलत्वे याशङ्क्य च देहातिरिक्तात्मत्वादिनां वाक्येत्थज्ञानादनुमानाच्च मनुष्यत्वादिभ्रमनिवृत्तिप्रसिद्धेर्नैवमित्यभिप्रेत्याऽऽह—परूपेणेति। अन्वेषणादेर्दृष्टफलत्वे फलितमाह—इति नियमार्थतेति। अपूर्वविधित्वं तद्विषयत्वमिति यावत्। इहेत्यन्वेषणादेरुक्तिरग्निहोत्रादिवदन्वेषणादेरत्यन्ताप्राप्त्यभावस्योक्तत्वादित्यर्थः ॥ १ ॥

+ अत्रान्विष्येति भाष्यान्मूलेऽप्यन्विष्येति पाठोऽनुमेयः।

१ घ. ङ. च. °थोक्तप्र°। २ घ. ङ. च. ठ. ड. ढ. °धिर्नापु°। ३ क. ख. छ. ञ. ण. °न्न°। ४ ख. ञ. ण. °त्वे च फ°।

तद्धोभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमा-
त्मानमन्विच्छामो यमात्मानमन्विष्य सर्वाँश्च लो-
कानाप्नोति सर्वाँश्च कामानितीन्द्रो हैव देवानाम-
भिप्रवव्राज विरोचनोऽसुराणां तौ ह संविदानावेव
समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥ २ ॥

तद्धोभय इत्याद्याख्यायिकाप्रयोजनमुक्तम्। तद्ध किल प्रजापतेर्वचनमु-
भये देवासुरा देवाश्चासुराश्च देवासुरा अनु परम्परागतं स्वकर्णगोचरापन्न-
मनुबुबुधिरेऽनुबुद्धवन्तः। ते चैतत्प्रजापतिवचो बुद्ध्वा किमकुर्वन्नित्युच्यते—
ते होचुरुक्तवन्तोऽन्योन्यं देवाः स्वँपरिवर्ग्यसुराश्च हन्त यद्यनुमतिर्भवतां
प्रजापतिनोक्तं तमात्मानमन्विच्छामोऽन्वेषणं कुर्मो यमात्मानमन्विष्य सर्वाँश्च
लोकानाप्नोति सर्वाँश्च कामानित्युक्तत्वेन्द्रो हैव राजैव स्वयं देवानामितरा-
न्देवाँश्च भोगपरिच्छदं च सर्वं स्थापयित्वा शरीरमात्रेणैव प्रजापतिं प्रत्यभि-
प्रवव्राज प्रगतवांस्तथा विरोचनोऽसुराणाम्। विनयेन गुरवोऽभिगन्तव्या
इत्येतद्दर्शयति। त्रैलोक्यराज्याच्च गुरुतरा विद्येति। यतो देवासुरराजौ
महाँहभोगाहौं सन्तौ तथा गुरुमभ्युपगतवन्तौ। तौ ह किलासंविदावेवा-
न्योन्यं संविदमकुर्वाणौ विद्याफलं प्रत्यन्योन्यमीर्ष्यां दर्शयन्तौ समित्पाणी
समिद्भारहस्तौ प्रजापतिसकाशमाजग्मतुरागतवन्तौ ॥ २ ॥

इदानीमाख्यायिकाव्याख्यानुमाख्यायिकां तु विद्याग्रहणसंप्रदानविधिप्रदर्शनार्थेत्यादि-
नोक्तं स्मारयति—तद्धेति। अवतारिताख्यायिकान्तराणि व्याचष्टे—तद्धेत्यादिना।
किमसौ इन्द्रविरोचनौ विद्यार्थिनावपि परिकरं परित्यज्य शरीरमात्रेण प्रजापतिं प्रगत-
वन्तौ तत्राऽऽह—विनयेनेति। तयोरुक्तरूपगतिवशादेव दर्शितमर्थान्तरं कथयति—
त्रैलोक्येति। विद्येति दर्श्यतीति पूर्वेण संबन्धः। तस्या गुरुतरत्वे हेतुमाह—
यत इति। संविदं मैत्रीम् ॥ २ ॥

तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुस्तौ ह प्रजा-

---

१ घ. ङ. ठ. ह वै। २ ख. ज. ण. °प्परयाऽऽग°। ३ ग. घ. ङ. च. ट. ड. ते त°। ४ घ. ङ. च. ड. देवाश्च प°। ५ ग. ठ. स्वस्वप°। ६ घ. च. °न्द्रो ह रा°। ७ घ. च. ठ. °ह्मभो°। ८ क. ग. °न्तौ तौ त°। ९ ख. ग. छ. झ. ण. °विधेः प्र°।

पतिरुवाच किमिच्छन्तावत्रास्तमिति तौ होचतुर्य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति[1] भगवतो वचो वेदयन्ते तमिच्छन्तावत्रास्तमिति॥३॥

तौ ह गत्वा द्वात्रिंशतं वर्षाणि शुश्रूषापरौ भूत्वा ब्रह्मचर्यमूषतुरुषितवन्तौ। अभिप्रायज्ञः प्रजापतिस्तावुवाच किमिच्छन्तौ किं प्रयोजनमभिप्रेत्येच्छन्तावत्रास्तमुषितवन्तौ युवामितीत्युक्तौ तौ होचतुः। य आत्मेत्यादि भगवतो वचो वेदयन्ते शिष्टा अतस्तमात्मानं ज्ञातुमिच्छन्तावत्रास्तमिति। यद्यपि प्राक्प्रजापतेः समीपागमनादन्योन्यमीर्ष्यायुक्तावभूतां तथाऽपि विद्याप्राप्तिप्रयोजनगौरवात्त्यक्तरागद्वेषमोहेर्ष्यादिदोषावेव भूत्वोषतुर्ब्रह्मचर्यं प्रजापतौ। तेनेदं प्रख्यापितमात्मविद्यागौरवम्॥ ३॥

तमात्मानं ज्ञातुमिच्छन्तावत्रास्त्वेति वक्तव्येऽप्यवास्तामिति प्रजापतिवचोनुकर्षणमात्रमिति द्रष्टव्यम्। अथेन्द्रविरोचनयोर्मिथो वैरिणोः कथमेकत्रावस्थानं चिरमासीदित्याशङ्क्याऽऽह—यद्यपीति। देवासुरराजयोः स्वभावतो वैरिणोरपि विद्यार्थित्वेन चिरमेकत्र ब्रह्मचर्यवासेन सूचितमर्थं दर्शयति—तेनेति॥ ३॥

तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेत्यथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वन्तेषु परिख्यायत इति होवाच॥ ४॥

इति छान्दोग्योपनिषदष्टमाध्यायस्य सप्तमः खण्डः॥ ७॥

---

१ क्ष. °विद्य वि°। २ क्ष. थ. °ति ह भ°। ३ ख. ग. ञ. ड. ढ. ढ. ण. °मित्यवास्त्वेति। ४ ख. ञ. ण. 'वेवं भू°।

तावेवं तपस्विनौ शुद्धकल्मषौ योग्यावुपलभ्य प्रजापतिरुवाच ह—य एषोऽक्षिणि पुरुषो निवृत्तचक्षुर्भिर्मृदितकषायैरदृश्यते योगिभिर्द्रष्टा, एष आत्माऽपहतपाप्मादिगुणो यमवोचं पुराऽहं यद्विज्ञानात्सर्वलोककामावाप्तिरेतदमृतं भूमाख्यमत एवाभयमत एव ब्रह्म बृहत्तमामिति। अथैतत्प्रजापतिनोक्तमक्षिणि पुरुषो दृश्यत इति वचः श्रुत्वा छायारूपं पुरुषं जगृहतुः। गृहीत्वा च दृढीकरणाय प्रजापतिं पृष्टवन्तौ । अथ योऽयं हे भगवोऽप्सु परिख्यायते परि समन्ताज्ज्ञायते यश्चायमादर्श आत्मनः प्रतिबिम्बाकारः परिख्यायते खड्गादौ च कतम एष एषां भगवद्भिरुक्तः किंनेक एव सर्वेष्विति । एवं पृष्टः प्रजापतिरुवाच—एष उ एव यश्चक्षुषि द्रष्टा मयोक्त इति । एतन्मनसि कृत्वैषु सर्वेष्वन्तेषु मध्येषु परिख्यायत इति होवाच ।

शुद्धकल्मषौ प्रक्षालितदोषाविति यावत् । पुरुषो द्रष्टेति संबन्धः । अस्मदादिभिस्तत्र द्रष्टा दृष्टो नास्तीत्याशङ्क्याऽऽह—निवृत्तेति । इन्द्रियाणां विषयेभ्यो वैमुख्ये हेतुमाह—मृदितेति । योगिभिः समाधिनिष्ठैरन्तर्दृष्टिभिरिति यावत् । य आत्मेत्यादिवाक्येनास्यैकवाक्यतां दर्शयति—एष इति । भूमविद्यया चास्यैकवाक्यत्वं सूचयति—भूमाख्यमिति । इतिशब्दो वाक्यसमाप्त्यर्थः । उक्तेऽर्थे वाक्यं पातयति—अथ योऽयमिति । प्रश्नार्थोऽथशब्दः । इतिशब्दः समाप्त्यर्थः । यश्चक्षुरुपलक्षितो द्रष्टैष एव मयोक्तोऽपहतपाप्मादिधर्मवानात्मा युवाभ्यां पुनरन्यथा गृहीतमिति निपातेन सूचयन्नुक्तवान्प्रजापतिरित्याह—एवमिति । प्रजापतिश्चेदेवमुक्तवान्कथं तर्हि तयोर्वैमुख्यं न निवृत्तमित्याशङ्क्याऽऽह—एतादिति । यथोक्तवचोरूपं वस्त्विति यावत् ।

ननु कथं युक्तं शिष्ययोर्विपरीतग्रहणमनुज्ञातुं प्रजापतेर्विगतदोषस्याऽऽचार्यस्य सतः । सत्यमेवं, नानुज्ञातम्[1] । कथं । आत्मन्यध्यारोपितपाण्डित्यमहत्त्वबोद्धृत्वौ हीन्द्रविरोचनौ तथैव च पथितौ लोके । तौ यदि प्रजापतिना मूढौ युवां विपरीतग्राहिणौ विनियुक्तौ स्यातां ततस्तयोश्चित्ते दुःखं स्यात्तज्जनिताच्च चित्तावसादान्पुनःप्रश्नश्रवणग्रहणावधारणं प्रत्युत्साहविघातः स्यादतो रक्षणीयौ शिष्याविति मन्यते प्रजापतिः । गृहीतां तावत्तदु-

---

१ ख. ञ. ठ. ण. °मित्येत°। २ ख. घ. ङ. च. ज. ठ. ड. ढ. ण. भव°। ३ ख. °पाप्मत्वादि°। ४ घ. ङ. ठ. ड. ढ सतो ना°। ५ च. ठ. °वं तथाऽप्यात्म° । ६ क. °म् । तथाऽप्यात्म° । ७ ख. ञ. °हृत्वादुद्धृतत्वादुद्धतौ ही° । ण. °हृत्वादुद्वृत्तादुद्धतौ ही°। ङ. °हृत्वावबो° । ८ क. ग. घ. ञ. च ट ठ ड ढ. °श्चित्तदु° ।

दशरावदृष्टान्तेनापनेष्यामीति च । ननु न युक्तमेव उ एवेत्यनृतं वक्तुम् । न चानृतमुक्तम् । कथम् । आत्मनोक्तोऽक्षिपुरुषो मनसि संनिहिततरः शिष्यगृहीताच्छायात्मनः । "सर्वेषां चाभ्यन्तरः सर्वान्तरः" इति श्रुतेः । तमेवावोचदेष उ एवेत्यतो नानृतमुक्तं प्रजापतिना । तथा च तयोर्विपरीतग्रहणनिवृत्त्यर्थं ह्याह ॥ ४ ॥

इति छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

यत्प्रजापतिना मनसि निहितं तत्प्रकटीकर्तुं चोदयति—नन्विति । शिष्टाक्षिशिष्यगतं विपरीतग्रहणमाचार्येणानुज्ञातुमयुक्तमित्यङ्गीकृत्य प्रजापतेरभिप्रायमाह—सत्यमेवमिति । कथं तर्हि तयोर्विपरीतग्रहणमपनेतव्यमित्याशङ्क्याऽऽह—गृहीतां तावदिति । तावद्विपरीतमिति शेषः । चकारेण क्रियापदमनुकृष्यते । यद्यदाचरति श्रेष्ठ इति न्यायेन सर्वेषां मृषावादित्वं स्यादिति शङ्कते—नन्विति । प्राजापत्यमभिप्रायमेव प्रकटयन्नतिप्रसङ्गं परिहर्तुं तदीयमनृतवादित्वं दूषयति—न चेति । तदेवाऽऽकाङ्क्षापूर्वकं स्फुटयति—कथमित्यादिना । शिष्याभ्यां गृहीतो योऽयमात्मा ततः सकाशादात्मना स्वेनैव प्रजापतिनोक्तो योऽस्त्यक्ष्युपलक्षितो द्रष्टा स मनसि प्रजापतेः संनिहिततरोऽतः स एव तेनोक्त इत्यर्थः । इतश्च द्रष्टा प्रजापतेर्मनसि संनिहिततर इत्याह—सर्वेषां चेति । प्रजापतेर्मनसि द्रष्टुः संनिहितत्वेऽपि कथं तस्य न मृषावादित्वमत आह—तमेवेति । इतश्च प्रजापतेर्न मृषावादित्वमित्याह—तथा चेति ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य सप्तमः खण्डः ॥ ७ ॥

(अथाष्टमाध्यायस्याष्टमः खण्डः) ।

उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे ब्रूतमिति तौ होदशरावेऽवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव आ लोमभ्य आ नखेभ्यः प्रतिरूपमिति ॥ १ ॥

ज. ञ °क्षिणि पु° । २ घ. ङ. च. °हीतच्छा° । ३ ग. ढ. शिष्य° ।

उदशराव उदकपूर्णे शरावादावात्मानमवेक्ष्य[1] अनन्तरं यत्तत्रात्मानं पश्यन्तौ न विजानीथस्तन्मे मम ब्रूतमाचक्षीयाथामित्युक्तौ तौ ह तथैवोदशरावेऽवेक्षांचक्राते अवेक्षणं चक्रतुः । तथा कृतवन्तौ तौ ह प्रजापतिरुवाच किं पश्यथ इति । ननु तन्मे ब्रूतमित्युक्ताभ्यामुदशरावेऽवेक्षणं कृत्वा प्रजापतये न निवेदितमिदमावाभ्यां न विदितमित्यनिवेदिते चाज्ञानहेतौ ह प्रजापतिरुवाच किं पश्यथ इति तत्र कोऽभिप्राय इति । उच्यते —नैव तयोरिदमावयोरविदितमित्याशङ्काऽभूच्छायात्मन्यात्मप्रत्ययो निश्चित एवाऽऽसीत् । येन वक्ष्यति तौ ह शान्तहृदयौ प्रवव्रजतुरिति । न ह्यनिश्चितेऽभिप्रेतार्थे प्रशान्तहृदयत्वमुपपद्यते । तेन नोचतुरिदमावाभ्यामविदितमिति । विपरीतग्राहिणौ च शिष्यावनुपेक्षणीयाविति स्वयमेव पप्रच्छ[2] किं पश्यथ इति । विपरीतनिश्चयापनयाय च वक्ष्यति साध्वलंकृतावित्येवमादि । तौ होचतुः—सर्वमेवेदमावां भगव आत्मानं पश्याव आ लोमभ्य आ नखेभ्यः प्रतिरूपमिति, यथैवाऽऽवां हे भगवो लोमनखादिमन्तौ स्व एवमेवेदं लोमनखादिसहितमावयोः प्रतिरूपमुदशरावे पश्याव इति ॥ १ ॥

आत्मानमुदशरावेऽवेक्ष्य तं तत्राऽऽत्मानं पश्यन्तौ तावनन्तरं यदात्मनो न विजानीथो युवां तन्मे ब्रूतमिति संबन्धः । प्रजापतिवचनमुपक्रमानुकूलं न भवतीति शङ्कते—नन्विति । उपक्रममतिक्रम्य ब्रुवाणस्य प्रजापतेरभिप्रायमाह—उच्यत इति । तत्र प्रथममिन्द्रविरोचनाभ्यामावाभ्यामिदमविदितमिति प्रजापतिं प्रत्यवचने कारणमाह—नैवेति । छायात्मनि च्छायायां तद्धेतौ शरीरे चेन्द्रविरोचनयोर्यथाक्रममात्मधीरियं निश्चिता प्रवृत्तेत्यर्थः । तयोस्तत्राऽऽत्मप्रत्ययस्य निश्चितत्वे गमकमाह—येनेति । प्रव्रजनेऽपि शान्तहृदययोस्तयोः सत्यात्मप्रत्ययस्य कथं निश्चितत्वानित्याशङ्क्याऽऽह—न हीति । तेन विपरीतग्राहित्वेनेति यावत् । उक्तमगृहीत्वा विपरीतं गृहीतवन्तौ तर्हि प्रजापतिनोपेक्षणीयौ कुबुद्धित्वादित्याशङ्क्य प्राजापत्यमभिप्रायमाह—विपरीतग्राहिणौ चेति । कथमिदं प्रजापतेरभिमतमित्यविगतमत आह—विपरीतेति । प्राजापत्ये प्रश्ने देवासुरराजयोर्विपरीतग्रहणमनुवदति—तौ होति ॥ १ ॥

तौ ह प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथामिति तौ ह साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षांचक्राते

---

१ घ. च. °न्तौ च । तौ । २ ख. ञ. °त्यविनि । ३ घ. च. ङ. ण. °वित्यादि । ४ क. ग. घ. ङ. च. ट. ठ. ड. ढ. ण. °तुः । यथै° ।

तौ ह प्रजापतिरुवाच किं पश्यथ इति ॥ २ ॥

तौ ह पुनः प्रजापतिरुवाच च्छायात्मनिश्चयापनयाय, साध्वलंकृतौ यथा स्वगृहे सुवसनौ महार्हवस्त्रपरिधानौ परिष्कृतौ छिन्नलोमनखौ च भूत्वोदशरावे पुनरीक्षेथामिति । इह च नाऽऽदिदेश यदज्ञातं तन्मे प्रब्रूतमिति । कथं पुनरनेन साध्वलंकारादि कृत्वोदशरावेऽवेक्षणेन तयोश्छायात्मग्रहोऽपनीतः स्यात् । साध्वलंकारसुवसनादीनामागन्तुकानां छायाकरत्वमुदशरावे यथा शरीरसंबद्धानामेवं शरीरस्यापि च्छायाकरत्वं पूर्वं बभूवेति गम्यते । शरीरैकदेशानां च लोमनखादीनां नित्यत्वेनाभिप्रेतानामखण्डितानां छायाकरत्वं पूर्वमासीत् । छिन्नेषु च नैव लोमनखादिच्छाया दृश्यतेऽतो लोमनखादिवच्छरीरस्याप्यागमापायित्वं सिद्धमित्युदशरावादौ दृश्यमानस्य तन्निमित्तस्य च देहस्यानात्मत्वं सिद्धम् । उदशरावादौ छायाकरत्वाद्देहसंबद्धालंकारादिवत् । न केवलमेतावदेतेन यावत्किंचिदात्मीयत्वाभिमतं सुखदुःखरागद्वेषमोहादि च कादाचित्कत्वाच्छ्मश्रुलोमादिवदनात्मेति प्रत्येतव्यम् । एवमशेषमिथ्याग्रहापनयनिमित्ते साध्वलंकारादिदृष्टान्ते प्रजापतिनोक्ते श्रुत्वा तथा कृतवतोरपि च्छायात्मविपरीतग्रहो नापजगाम यस्मात्तस्मात्स्वदोषेणैव केनचित्प्रतिबद्धविवेकविज्ञानाविन्द्रविरोचनावभूतामिति गम्यते । तौ पूर्ववदेव दृढनिश्चयौ पप्रच्छ किं पश्यथ इति ॥ २ ॥

तदपनयनप्रकारं सूचयति—तौ ह पुनरिति । छायायां तद्धेतौ च देहे तयोरात्मनिश्चयो यस्तस्य निरासायेति यावत् । इह चेति पर्यायोक्तिः । नाऽऽदिदेश तत्प्रयोजनाभावादित्यर्थः । उक्तोदाहरणेन च्छायायां देहे चेन्द्रविरोचनयोरात्मत्वयो नापनीतो भवतीति शङ्कते—कथमिति । छायायास्तत्कारणस्य च ऽऽगन्तुकत्वादनात्मत्वमत्र विवक्षितमित्युत्तरमाह—साध्वलंकारेति । पूर्वमुदकादिसंबन्धावस्थायामिति यावत् । व्यभिचारित्वाच्च च्छायातत्कारणयोरनात्मत्वमित्याह—शरीरैकदेशानामिति । उपपत्तिभ्यां सिद्धमर्थं निगमयति—इत्युदशरावादाविति । न केवलं छायातत्कारणयोरेवानात्मत्वं किं तूक्तन्यायेनाहंकारादीनां तद्धर्माणां चाऽऽत्मीयत्वं

---

१ क. ग. घ. च. ट. ठ. ड. ढ. ण. °रायावे° । २ ख. ग. घ. च. ठ. ड. ढ. ण. °गतुनां° । ३ क. ग. ड. ट. ड. °बन्धाना° । ४ च. ड. °ति निग° । ५ ग. च. तेषु नै° । ६ घ. ड. ठ. ड. ढ. °त् । एते° । ७ ख. ग. ञ. ट. ठ. ड. ण. °दि का° । ८ क. °योरेवमा° । ९ ल. ण. °त्मतामाह° ।

प्रत्युक्तमिति प्रसङ्गादतिदिशति—न केवलमिति । आत्मत्वाभिमतमहंकारादीति शेषः । मोहादावात्मीयत्वाभिमतमित्यध्याहार्यम् । एतेनेति सूचितमेव हेतुं दर्शयति—कादाचित्कत्वादिति । अनात्मेत्यनात्मत्वमनात्मीयत्वोपलक्षणार्थम् । तर्हि तयोर्यथोक्तरीत्या विपरीतग्रहणस्यापगतत्वात्किमुत्तरेण प्रजापतिवाक्येनेत्याशङ्क्याऽऽह—एवमिति ॥ २ ॥

तौ होचतुर्यथैवेदमावां भगवः साध्वलंकृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलंकृतौ सुवसनौ परिष्कृतावित्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तौ ह शान्तहृदयौ प्रव्रजतुः ॥ ३ ॥

तौ तथेव प्रतिपन्नौ यथेवेदमिति पूर्ववद्यथा साध्वलंकारादिविशिष्टावावां स्व एवमेवेमौ छायात्मानाविति सुतरां विपरीतनिश्चयौ बभूवतुः । यस्याऽऽत्मनो लक्षणं य आत्माऽपहतपाप्मेत्युक्त्वा पुनस्तद्विशेषमन्विष्यमाणयोर्य एषोऽक्षिणि पुरुषो दृश्यत इति साक्षादात्मनि निर्दिष्टे तद्विपरीतग्रहापनयायोदशरावसाध्वलंकारदृष्टान्तेऽप्यभिहित आत्मस्वरूपबोधाद्विपरीतग्रहो नापगतः । अतः स्वदोषेण केनचित्प्रतिबद्धविवेकविज्ञानसामर्थ्यावितिं मत्वा यथाभिप्रेतमेवाऽऽत्मानं मनसि निधायैष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति प्रजापतिः पूर्ववत् । न तु तदभिप्रेतमात्मानम् । य आत्मेत्याद्यात्मलक्षणश्रवणेनाक्षिपुरुषश्रुत्या च दरावाद्युपपत्त्या च संस्कृतौ तावत् । मद्वचनं सर्वं पुनः पुनः स्मरतोः प्रतिबन्धक्षयाच्च स्वयमेवाऽऽत्मविषये विवेको भविष्यतीति मन्वानः पुनर्ब्रह्मवर्यादेशे च तयोश्चतदुत्खोत्पत्तिं परिजिहीर्षन्कृतार्थबुद्धितया गच्छतावप्युपेक्षितवान्प्रजापतिः । तौ हेन्द्रविरोचनौ शान्तहृदयौ तुष्टहृदयौ कृतार्थबुद्धी इत्यर्थः । न तु श्रम एव, श्रमश्चेत्योर्जातो विपरीतग्रहो विगतोऽभविष्यत्तत्प्रव्रजतुर्गतवन्तौ ॥ ३ ॥

तथेवेत्यस्य व्याख्यानं पूर्ववदिति । यथेवेदमिति प्रतीकग्रहणं तद्व्याचष्टे—यथेति । आवां स्व इतीदमुदाहरणं यथेवेति संबन्धः । अक्षिवाक्यादुदरावावाक्यात्साध्वलंकार-

---

१ ख. ङ. ण. °भताहं° । २ ग. ढ. °हृत्या° । ३ क. ग. घ. ङ. च. ट. ठ. ण. °रावे सा° । ४ ङ. ङ. °षयवि° । ५ ट. °हीक्षुः कृता° । ६ घ. च. ट. ण. °होपग° । ७ ग. ट. व्याख्या ।

वावयच्च च्छायातद्धेत्वोरन्यतरस्यैवाऽऽत्मत्वमभ्यासादिति भ्रमातिशयः सुतरामित्युक्तः। प्रजापतिवाक्यमुत्थापयति-यस्येत्यादिना। वाक्यव्याख्यानमतिदिशति-पूर्ववादिति। एषशब्देन तयोरभिप्रेतमेवाऽऽत्मानं छायारूपं देहारूपं च परामृश्य प्रजापतिरनुमोदितवानित्याशङ्क्याऽऽह-न त्विति। तौ ह शान्तहृदयावित्यादिवाक्यस्य तात्पर्यमाह-य आत्मेत्यादीति। संस्कृतौ तावद्भवतामिति शेषः। संस्कृतयोरपि तयोरात्मविषये कथं विवेको भविष्यतीत्याशङ्क्याऽऽह—मद्वचनमिति। उपेक्षायां कारणान्तरमाह-पुनरिति। किमिति शान्तहृदयत्वं तुष्टहृदयत्वेन व्याख्यायते हृदयगतः शम एव किं न विवक्ष्यते तत्राऽऽह—न त्विति ॥ ३ ॥

तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्याऽऽत्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति स ह शान्तहृदय एव विरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचाऽऽत्मैवेह महय आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकावाप्नोतीमं चामुं चेति ॥ ४ ॥

एवं तयोर्गतयोरिन्द्रविरोचनयो राज्ञोर्भोगासक्तयोर्यथोक्तविस्मरणं स्यादित्याशङ्क्याप्रत्यक्षं प्रत्यक्षवचनेन च चित्तदुःखं परिजिहीर्षुरौ दूरं गच्छन्तावन्वीक्ष्य य आत्माऽपहतपाप्मेत्यादिवचनवदेतद्वचनयोः श्रवणगोचरत्वमेष्यतीति मत्वोवाच प्रजापतिः। अनुपलभ्य। यथोक्तलक्षणमात्मानमननुविद्य स्वात्मनस्तत्पक्षं चाक्षुषा विपरीतविषयौ च भूत्वेन्द्रविरोचनावेतौ व्रजतो गच्छेतामू। अतो यतरे देवा वाऽसुरा वा किंविशेषितत्वेनेतदुपनिषद आम्याय गृहीताऽऽत्मविद्या सेयमुपनिषद्येषां देवानामसुराणां वा ते एतदुपनिषद एवंविज्ञाना एतन्निश्चया भविष्यन्तीत्यर्थः। ते किं, पराभविष्यन्ति श्रेयोमार्गात्पराभूता बहिर्भूता विनष्टा भविष्यन्तीत्यर्थः। स्वगृहं गच्छतोः सुरासुरराजयोर्योऽसुरराजः स ह शान्तहृदय एव सन्विरोचनोऽसुराञ्जगाम। गत्वा च तेभ्योऽसुरेभ्यः शरीरात्मबुद्धिर्योनिरित्येतामेतामुपनिषदं प्रोवाचोक्तवान्।

---

१ ख. ज. ण. °ख्यातं ह°। २ ख. ञ. ठ. ण. °शङ्क्य प्रत्यक्षं°। ३ ठ. ढ. °नै च। ४ क. °न तयोश्चित्त°। ५ ख. ज. °यौ सु°।

देहमात्रमेवाऽऽत्मा पित्रोक्त इति । तस्मादात्मैव देह इह लोके महय्यः पूजनीयस्तथा परिचर्यः परिचरणीयस्तथाऽऽत्मानमेवेह लोके देहं महयन्परिचरंश्चोभौ लोकावाप्नोतीमं चामुं च । इहलोकपरलोकयोरेव सर्वे लोकाः कामाश्चान्तर्भवन्तीति राज्ञोऽभिप्रायः ॥ ४ ॥

यदि प्रजापतिस्तावुपेक्षितवान्किमिति तर्हि तौ ह्यन्वीक्ष्येत्यादिवाक्यमित्याशङ्क्याऽऽह—एवं तयोरिति । प्रजापतिरुवाचेति संबन्धः । तर्हि किमिति तावाहूय नोक्तवानित्याशङ्क्याऽऽह—प्रत्यक्षवचनेनेति । कर्तृत्वेन संबन्धार्थमुक्तमेव पुनरनुवदति—प्रजापतिरिति । किमभावूचिवानित्यपेक्षायामाह—अनुपलभ्येति । यथोक्तं प्रजापतिवाक्यं श्रुत्वाऽपि गच्छतोरिन्द्रविरोचनयोर्विरोचनगतमवान्तरविशेषमाह—स्वगृहमिति । पित्रा तथोक्तत्वेऽपि किमस्माभिस्तत्र कर्तव्यमित्याशङ्क्याऽऽह—तस्मादिति । तथा पूजनीयत्ववदिति यावत् । तथेत्युक्तप्रकारोक्तिः । तथापि प्रार्थिता सर्वलोककामावाप्तिरसिद्धेत्याशङ्क्याऽऽह—इह लोकेति ॥ ४ ॥

तस्मा॑दप्ययेहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेत्यसुराणा॒ ह्येषोपनिष॒त्प्रेतस्य शरीरं भिक्षया वसनेनालंकारेणेति स॒ꣳस्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥ ५ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

तस्मात्तत्संप्रदायोऽद्यापि॑ अनुवर्तत इतीह लोकेऽददानं दानमकुर्वाणमविभागशीलमश्रद्दधानं सत्कार्येषु श्रद्धारहितं यथाशक्त्ययजमानमयजनस्वभावमाहुरासुरः खल्वयं यत एवं स्वभावो बतेति विद्यमाना आहुः शिष्टाः । असुराणां हि यस्मादश्रद्दधानत्वादिलक्षणैषोपनिषत् । तयोपनिषदा संस्कृताः सन्तः प्रेतस्य शरीरं कुणपं भिक्षया गन्धमाल्याद्यादिलक्षणया वसनेन वस्त्रादिनाऽऽच्छादनादिप्रकारेणालंकारेण ध्वजपताकादिकरणेनेत्येवं संस्कुर्वन्त्येतेन कुणपसंस्कारेणामुं प्रेत्य प्रतिपत्तव्यं लोकं जेष्यन्तो मन्यन्ते ॥ ५ ॥

इति छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

---

१ क. ख. छ. ञ. ण. °ह राज्ञोरि° । २ ख. छ. ञ. ण. वाचाऽऽहूय । ३ ख. ञ. ण. °दयाप्येहा° । ४ ख. ञ. °तेनामुं । ५ ख. ञ. इह । ६ ख. घ. ञ. ठ. ड. ढ. ण. °दानमवि° । ७ ख. घ. ञ. ठ. °सुर आसुरः । ८ ख. ग. घ. ङ. च. ज. ट. ढ. ण. °ताल° । ९ क. ग. घ. ङ. च. ट. ढ. ड. ढ. °कारादिकरणेन ध्व° ।

विरोचनसंप्रदायस्याविच्छिन्नत्वं दर्शयति—तस्मादिति । देहात्मवादस्याऽऽसुरत्वादिति यावत् । तत्संप्रदायस्तेषां विरोचनप्रभृतीनामसुराणां संप्रदायो देहात्मत्वोपदेशः । किमित्यात्मत्वादिरहितमासुरमाहुरित्यपेक्षायामाह—असुराणां हीति । प्रकृतोपनिषत्कार्यं कथयति—अथेति ॥ ९ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
अष्टमाध्यायस्याष्टमः खण्डः ॥ ८ ॥

—○*○—

(अथाष्टमाध्यायस्य नवमः खण्डः) ।

अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श यथैव खल्वयमस्मिञ्शरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति ॥ १ ॥

अथ ह किलेन्द्रोऽप्राप्यैव देवान्दैन्याऽक्रौर्यादिसंपदा युक्तत्वाद्दुरीर्ष्वचनं पुनः पुनः स्मरन्नेव गच्छन्नेतद्दृश्यमाणं भयं स्वात्मग्रहणनिमित्तं ददर्श दृष्टवान् । उदशरावदृष्टान्तेन प्रजापतिना यदर्थो न्याय उक्तस्तदेकदेशो मघवतः प्रत्यभादबुद्धौ । येन च्छायात्मग्रहणे दोषं ददर्श । कथम् । यथैव खल्वयमस्मिञ्छरीरे साध्वलंकृते छायात्माऽपि साध्वलंकृतो भवति सुवसने च सुवसनः परिष्कृते परिष्कृतो यथा नखलोमादिदेहावयवापगमे छायात्माऽपि परिष्कृतो भवति नखलोमादिरहितो भवति । एवमेवायं छायात्माऽप्यस्मिञ्छरीरे नखलोमादिभिर्देहावयवत्वस्य तुल्यत्वादन्धे चक्षुषोऽपगमेऽन्धो भवति स्रामे स्रामः । स्रामः किलैकनेत्रस्तस्यान्यत्वेन गतत्वात् । चक्षुर्नासिका वा यस्य सदा स्रवति स स्रामः । परिवृक्णाश्छिन्नहस्ताश्छिन्नपादो वा । स्रामे परिवृक्णे वा देहे छायात्माऽपि तथा भवति । तथाऽस्य देहस्य नाशमन्वेष नश्यति ॥ १ ॥

एवं विरोचनगतं विशेषं दर्शयित्वा देवराजगामिनं विशेषमाह—अथेत्यादिना । द्वयोस्तुल्येऽपि प्राजापत्यवाक्यश्रवणे देवराजस्यैव कथं पथि तदनुसंधानं वृत्तमित्याश-

---

१ ग ट. °मे तु° । २ क. ग. ट. ठ. °खस्रेमा° । ३ क. ग. ठ. °खरोमा° ।

क्रूचाऽऽह—देख्येति । स्मरणफलमाह—स्मरन्नेवेति । प्रजापतिवचनं स्मरतोऽपि कथमिन्द्रस्य च्छायात्मग्रहणे दोषदर्शनमित्याशङ्क्याऽऽह—उदशरावेति । यदर्थो देहादेरनात्मत्वज्ञापनायेति यावत् । कादाचित्कत्वव्यभिचारित्वादिन्यायः । तदेकदेशो व्यभिचारिणोऽनात्मत्वम् । न्यायैकदेशदृष्टिफलमाचष्टे—येनेति । दोषदर्शनमेवाऽऽकाङ्क्षाद्वारा स्फोरयति—कथमित्यादिना । उदाहृते वाक्ये विवक्षितमर्थं कथयति—यथेति । परिष्कृतो भवतीत्येतद्व्याचष्टे—नखेति । एवमेव देहस्य नखाद्यपगमे छायात्मनोऽपि तदपगमवदित्यर्थः । शरीरेऽस्मिन्नन्धे सति च्छायात्माऽप्यन्धो भवतीति संबन्धः । किमिति देहस्याऽऽन्ध्ये छायात्मनस्तदिष्टमित्याशङ्क्याऽऽह—नखलोमादिभिरिति । तैः सह चक्षुरादीनां तुल्यत्वं देहावयवत्वस्य देहे नखाद्यभावे छायायामपि तदभावाभ्युपगमे देहे चक्षुराद्यभावेऽपि च्छायायां तदभावो युक्त इत्यर्थः । स्रामशब्दस्यापुनरुक्तमर्थं कथयति—स्रामः किलेति । पदार्थमुक्त्वा वाक्यार्थमाह—स्राम इति । पारतन्त्र्यादनात्मत्वं छायाया दर्शयित्वा तत्रैव हेत्वन्तरमाह—तथेति ॥ १ ॥

नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय तꣳ ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः सार्धं विरोचनेन किमिच्छन्पुनरागम इति स होवाच यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥२॥

अतो नाहमत्रास्मिञ्छायात्मदर्शने देहात्मदर्शने वा भोग्यं फलं पश्यामीत्येवं दोषं देहच्छायात्मदर्शनेऽध्यवस्य स समित्पाणिर्ब्रह्मचर्यं वस्तुं पुनरेयाय । तं ह प्रजापतिरुवाच—मघवन्यच्छान्तहृदयः प्राव्राजीः प्रगतवानसि विरोचनेन सार्धं किमिच्छन्पुनरागम इति । विजानन्नपि पुनः पप्रच्छेन्द्राभिप्रायाभिव्यक्तये । यद्वेत्थ तेन मोपसीदेति यद्वत् । तथा च स्वाभिप्रायं प्रकटयकरोद्यथैव खल्वयमित्यादि, एवमेवेति चान्वमोदत प्रजापतिः ।

विज्ञाशित्वादियुक्तिदर्शनफलमुपसंहरति—अत इति । दोषं दृष्ट्वा यथोक्तरीत्या किं कृतवानित्यपेक्षायामाह—इत्येवमिति । सर्वज्ञो हि प्रजापतिरिन्द्राभिप्रायं जानन्नेव किमर्थं प्राकृतवत्पृच्छतीत्याशङ्क्याऽऽह—विजानन्नपीति । आचार्यस्य ज्ञानवतेऽपि शिष्यं प्रत्यभिप्रायविशेषेण ज्ञातुं प्रश्नोपपत्तौ दृष्टान्तमाह—यद्वत्थेति । तथा च प्रजापतिप्रश्नानुरोधेनेति यावत् । इन्द्रविषयः स्वशब्दः ।

ननु तुल्येऽक्षिपुरुषश्रवणे देहच्छायामिन्द्रोऽग्रहीदात्मेति देहमेव तु विरोचनस्तत्किंनिमित्तम् । तत्र मन्यते । यथेन्द्रस्योदशरावादिप्रजापतिवचनं स्मरतो देवानप्राप्तस्यैवाऽऽचार्योक्तबुद्ध्या छायात्मग्रहणं तत्र दोषदर्शनं चाभूत् । न तथा विरोचनस्य । किं तर्हि देह एवाऽऽत्मदर्शनं नापि तत्र दोषदर्शनं बभूव । तद्वदेव विद्याग्रहणसामर्थ्यप्रतिबन्धदोषाल्पत्वबहुत्वापेक्षमिन्द्रविरोचनयोश्छायात्मदेहयोर्ग्रहणम् । इन्द्रोऽल्पदोषत्वाद्दृश्यत इतिश्रुत्यर्थमेव श्रद्दधानतया जग्राहेतरश्छायानिमित्तं देहं हित्वा श्रुत्यर्थं लक्षणया जग्राह प्रजापतिनोक्तोऽयमिति । दोषभूयस्त्वात् । यथा किल नीलानीलयोरादर्शे दृश्यमानयोर्वाससोर्यन्नीलं तन्महाईमिति च्छायानिमित्तं वास एवोच्यते न च्छाया तद्वदिति विरोचनाभिप्रायः । स्वचित्तगुणदोषवशादेव हि शब्दार्थावधारणं तुल्येऽपि श्रवणे ख्यापितं दाम्यत दत्त दयध्वमिति दकारमात्रश्रवणाच्छ्रुत्यन्तरे । निमित्तान्यपि तदनुगुणान्येव सहकारीणि भवन्ति ॥२॥

शिष्ययोः श्रवणसाम्येऽपि प्रतिपत्तिवैषम्ये निमित्तं पृच्छति—नन्विति । आचार्यमतोपन्यासद्वारा परिहरति—तत्रेति । तत्र प्रतिपत्तिविशेषे दृष्टान्तेन निमित्तविशेषं दर्शयति—यथेति । आचार्योक्तबुद्ध्या तात्पर्येण प्रजापतिना छायात्मैवोक्त इति भ्रान्त्येत्यर्थः । विरोचनस्येन्द्रवच्छायात्मग्रहणमाचार्योक्तबुद्ध्या नाभूदित्याह—न तथेति । कथं तर्हि तस्याऽऽत्मदर्शनमित्याशङ्क्याऽऽह—देह एवेति । आचार्येणाऽऽत्मा देह एवोक्त इति बुद्ध्या तत्रैव विरोचनस्याऽऽत्मज्ञानमासीदित्यर्थः । इन्द्रस्य च्छायात्मग्रहणे देवानप्राप्तस्यैव मार्गमध्ये दोषदर्शनवद्विरोचनस्यासुरानप्राप्तस्याध्वनि देहात्मदर्शने दोषदर्शनं च न प्रवृत्तमित्याह—नापीति । दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह—तद्वदेवेति । विद्याग्रहणौपयिकस्य सामर्थ्यस्य प्रतिबन्धभूतो यो रागादिदोषस्तदल्पत्वापेक्षमिन्द्रस्य च्छायायामात्मग्रहणमित्युक्तं व्यक्तीकरोति—इन्द्र इति । यथोक्तदोषभूयस्त्वापेक्षं गृह्णतो विरोचनस्या-

---

१ ङ. च. ठ. ङ. ढ. मन्यन्ते । २ क. ठ. ड. एव त्वात्म° । ३ क. ग. ट. °यात्मनि° । ४ ख. छ. ञ. ण. °बुद्धिता° । ५ क. छ. ट. °त्मत्वज्ञा° । ६ ग. ट. °त्मत्वम्र° ।

मिप्रायं दृष्टान्तेन दर्शयति—यथेत्यादिना । उक्तमर्थं बृहदारण्यकश्रुत्यवष्टम्भेन स्पष्टयति—स्वचित्तेति । देवान्मनुष्यानसुरांश्च प्रजापतिना दकारोपदेशे साधारण्येन कृते तेषां तदीयश्रवणे तुल्येऽपि तदर्थविशेषावधारणं स्वचित्तगुणदोषवशादेव बृहदारण्यके ख्यापितं तथेहापीत्यर्थः । तत्र वा कथं तुल्येऽपि श्रवणेऽर्थविशेषबुद्धिस्तत्राऽऽह—दाम्यतेति । अदान्ता हि वयं स्वभावतस्तेन दाम्यतेत्यस्मान्प्रति पितोक्तवानिति देवानां मतिराविरासीत् । स्वभावतो लुब्धा वयं तेन दत्तेत्यस्मान्प्रत्युक्तवान्पितेति मनुष्याणां बुद्धिरासीत् । सुक्रूरा हि वयं स्वभावतस्तेन दयध्वमित्यस्मान्प्रति प्रजापतिरूचिवानित्यसुराणां प्रतिपत्तिर्बभूव । तदेवं दकारमात्रश्रवणादात्मचित्तानुरोधेन विचित्रा तेषां मतीषा प्रवृत्ता तथेन्द्रविरोचनयोरपि भविष्यतीत्यर्थः । अथेन्द्रविरोचनयोर्युक्तिदर्शनाविशेषादर्थप्रतिपत्तेरप्याविशेषः स्यादिति चेन्नेत्याह—निमित्तान्यपीति । युक्तिदर्शनान्यपि स्वचित्तगुणदोषाल्पत्वबहुत्वापेक्षाण्यतस्तयोस्तदपेक्षं प्रतिपत्तिवैषम्यमविरुद्धमित्यर्थः ॥ २ ॥

एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंश्शतं वर्षाणीति स हापराणि द्वात्रिंश्शतं वर्षाण्युवास तस्मै होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य नवमः खण्डः ॥ ९ ॥

एवमेवैष मघवन्सम्यक्त्वयाऽवगतं न च्छायात्मेत्युवाच प्रजापतिर्यो मयोक्त आत्मा प्रकृत एतमेवाऽऽत्मानं तु ते भूयः पूर्वं व्याख्यातमप्यनुव्याख्यास्यामि । यस्मात्सकृद्व्याख्यातं दोषरहितानामवधारणाविषयं प्राप्तमपि नाग्रहीरतः केनचिद्दोषेण प्रतिबद्धग्रहणसामर्थ्यस्त्वमतस्तत्क्षपणाय वसापराणि द्वात्रिंशतं वर्षाणीत्युक्त्वा तथोषितवते क्षपितदोषाय तस्मै होवाच ॥ ३ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य नवमः खण्डः ॥ ९ ॥

—:⊙-⊙-⊙-⊙:—

इन्द्राभिप्रायं बुद्ध्वा प्रजापतिरनुमोदितवानित्युक्तमिदानीमनुमोदनवाक्यं व्याकरोति—एवमेवेति । इन्द्राभिप्रायविषय एषशब्दः । अनुव्याख्यास्यामीत्युक्तं श्रुत्वा श्रोतुकाममुपगतमिन्द्रं प्रत्याह—यस्मादिति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य नवमः खण्डः ॥ ९ ॥

---

१ क. ट. क्रूरा . ग. ङ. शूरा । २ क. ख. ङ. ञ. ण. °पतिः सूचितवा° । ३ ख. ञ. ण. आत्मैत° । ४ क. ग. ङ. ट. ठ. ड. °षयप्रा° ।

(अथाष्टमाध्यायस्य दशमः खण्डः)।

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचै-
तदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रव्रव्राज
स हाप्राप्यैव देवानेतद्भयं ददर्श तद्यद्यपीदꣳ शरीर-
मन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवै-
षोऽस्य दोषेण दुष्यति ॥ १ ॥

य आत्माऽपहतपाप्मादिलक्षणो य एषोऽक्षिणीत्यादिना व्याख्यात एष सः । कोऽसौ । यः स्वप्ने महीयमानः रूयादिभिः पूज्यमानश्चरत्यनेकवि-धान्स्वप्नभोगाननुभवतीत्यर्थः । एष आत्मेति होवाचेत्यादि समानम् । स हैवमुक्त इन्द्रः शान्तहृदयः प्रव्रव्राज । स हाप्राप्यैव देवान्पूर्ववदस्मिन्नप्या-त्मनि भयं ददर्श । कथम् । तदिदं शरीरं यद्यप्यन्धं भवति स्वप्नात्मा योऽ-नन्धः स भवति यदि स्राममिदं शरीरमस्रामश्च स भवति नैवैष स्वप्ना-त्माऽस्य देहस्य दोषेण दुष्यति ॥ १ ॥

पूर्ववच्छायात्मदर्शनवदित्यर्थः । अस्मिन्नप्यात्मनीति स्वप्नदृशीत्यर्थः । छायात्मनः शरीरानुविधायित्ववन्न स्वप्नदृश्यस्तदनुविधायित्वं तथा च कथं पूर्ववद्दोषदर्शनमित्या-शङ्क्य परिहरति—कथमित्यादिना ॥ १ ॥

न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति
त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदि-
तीव नाहमत्र भोग्यं पश्यामीति ॥ २ ॥

स समित्पाणिः पनरेयाय तꣳ ह प्रजापतिरुवाच
मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम
इति स होवाच तद्यद्यपीद भगवः शरीरमन्धं भव-
त्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य
दोषेण दुष्यति ॥ ३ ॥

न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति

त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥ ४ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य दशमः खण्डः ॥ १० ॥

===

नाप्यस्य वधेन स हन्यते छायात्मवन्न चास्य स्वाम्येनः स्वामः स्वप्नात्मा भवति । यदध्यायादावागममात्रेणोपन्यस्तं नास्य जरयैतज्जीर्यतीत्यादि तदिह न्यायेनोपपादयितुमुपन्यस्तम् । न तावदयं छायात्मवद्देहदोषयुक्तः किंतु घ्नन्ति त्वेवैनम् । एवशब्द इवार्थे । घ्नन्तीवैनं केचनेति द्रष्टव्यम् । न तु घ्नन्त्येवेति । उत्तरेषु सर्वेष्विवशब्ददर्शनात् । नास्य वधेन हन्यत इति विशेषणाद्घ्नन्ति त्वेवेति चेन्नैवम् । प्रजापतिं प्रमाणीकुर्वतोऽनृतवादित्वापादनानुपपत्तेः । एतदमृतमित्येतत्प्रजापतिवचनं कथं मृषा कुर्यादिन्द्रस्तं प्रमाणीकुर्वन् ।

स्वाम्येन चक्षुरादिगतानवस्तुसलिलगलनविषयत्वेनेति यावत् । देहदोषेणाऽऽत्मनो न दोषो भवतीति प्रागेवोक्तं तत्किमर्थमिह पुनरुच्यतेऽत आह—यदध्यायादावितिं । न्यायोऽन्वयव्यतिरेकरूपः । एतद्देहाभिमाने हि सत्येव देहधर्मेण संयुज्यत इव द्रष्टा स्वप्ने त्वेतद्देहाभिमानाभावान्न तेन संसृज्यत इत्याह—उदिहेति । स्वप्नद्रष्टा चेद्देहदोषेण न युज्यते कथं तर्हि तस्मिन्दोषदर्शनमित्याशङ्क्याऽऽह—न तावदिति । किमित्येवकारो यथाश्रुतो न व्याख्यायते तत्राऽऽह—न त्विति । इतिशब्दो द्रष्टव्यमित्यनेन संबध्यते । देहस्य वधेन नायं हन्यत इति विशेषणात्स्वतो वधः स्वप्नदृशो नियमतो विवक्षितः कस्मादेवशब्दो न यथाश्रुत एवेति शङ्कते—नास्येति । किमयं प्रजापतिमाप्तमनाप्तं वा मन्यते । यद्यनाप्तं बुध्यते न तर्हि तं प्रत्युपगतिरिन्द्रस्य विद्याग्रहणार्थं संभवतीति मत्वाऽऽह—नैवमिति । विकल्पान्तरं प्रत्याह—प्रजापतिमिति । न स्वतो हननं स्वप्नदृशो विवक्षितमिन्द्रस्येति शेषः । उक्तमेव स्फोरयति—एतदिति ।

ननु च्छायापुरुषे प्रजापतिनोक्तेऽस्य शरीरस्य नाशमन्वेष नश्यतीति

---

१ घ. च. ठ, ण. °पतेर्वच° ।

दोषमभ्येदधात्तथेहापि स्यात् । नैवम् । कस्मात् । य एषोऽक्षिणि पुरुषो दृश्यत इति न च्छायात्मा प्रजापतिनोक्त इति मन्यते मघवान् । कथम् । अपहतपाप्मादिलक्षणे पृष्टे यदि च्छायात्मा प्रजापतिनोक्त इति मन्यते तदा कथं प्रजापतिं प्रमाणीकृत्य पुनः श्रवणाय समित्पाणिर्गच्छेत् । जगाम च । तस्मान्न च्छायात्मा प्रजापतिनोक्त इति मन्यते । तथा च व्याख्यातं द्रष्टाऽक्षिणि दृश्यत इति । तथा विच्छादयन्तीव विद्रावयन्तीव तथा च पुत्रादिमरणनिमित्तमप्रियवेत्तेव भवति । अपि च स्वयमपि रोदितीव । नन्वप्रियं वेत्त्येव कथं वेत्तेवेति । उच्यते—नामृताभयत्वव्यपचनानुपपत्तेः । ध्यायतीवेति च श्रुत्यन्तरात् । ननु प्रत्यक्षविरोध इति चेत् । न । शरीरात्मत्वप्रत्यक्षत्वभ्रान्तिसंभवात् । तिष्ठतु तावदप्रियवेत्तेव न वेति । नाहमत्र भोग्यं पश्यामि । स्वप्नात्मज्ञानेऽपीष्टं फलं नोपलभ इत्यभिप्रायः । एवमेवैष तवाभिप्रायेणेति वाक्यशेषः । आत्मनोऽमृताभयगुणवत्त्वस्याभिप्रेतत्वात् । द्विरुक्तमपि न्यायतो मया यथावन्नावधारयति । तस्मात्पूर्ववदस्याद्यापि प्रतिबन्धकारणमस्तीति मन्वानस्तत्क्षपणाय वसापराणि द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमित्यादिदेश प्रजापतिः । तथोषितवते क्षपितकल्मषायाऽऽह ॥ २ ॥ ३ ॥ ४ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य दशमः खण्डः ॥ १० ॥

दृष्टान्तेन शङ्कते—नन्विति । दृष्टान्तं विघटयति—नैवमिति । तद्विघटनप्रकारं प्रश्नपूर्वकं प्रकटयति—कस्मादित्यादिना । एतदेवाऽऽकाङ्क्षापूर्वकं प्रपञ्चयति—कथमित्यादिना । अथेन्द्रो दृश्यत इति श्रुत्यर्थं गृहीत्वा छायात्मानमेव गृहीतवानित्युक्तं कथमिदानीमन्यथोच्यते तत्राऽऽह—तथेति । यथेदं वाक्यमक्ष्युपलक्षितद्रष्टृपरं तथा प्रागेव व्याख्यातं न तु स्वप्नद्रष्टरि च्छायात्मनीव स्पष्टा विनाशदृष्टिरित्यर्थः । यथा तदुपगम्य स्वप्नद्रष्टारं ब्रूतीव तथेति यावत् । इवशब्दमाक्षिपति—नन्विति । वेत्तृत्वं विकारश्चेदमृतत्वं न स्यान्मृदादिवद्विनाशित्वप्रसङ्गात्तस्मादिवशब्दो युक्त इत्युत्तरमाह—उच्यत इति । अहं वेद्मीतिविक्रियाश्रयत्वप्रत्यक्षविरोधादिवशब्दो न युक्त इति शङ्कते—नन्विति । अध्यासादपि प्रत्यक्षोपपत्तेर्न विकारित्वं सिध्यतीति परिहरति—नेत्यादिना । नाहमित्यादि वाक्यमवतारयति—तिष्ठत्विति । न वेत्यप्रियवेत्तैव भवतीत्यर्थः । इष्टं सर्वलोककामावाप्तिलक्षणं विधेये ब्रह्मभावेनाऽऽधानिकमप्यप्रियवेत्तृत्वादिकमस्ति तत्पुनर्ह्यदेशेऽप्यागतमस्त्वदभिप्रायेणाप्रियवेत्तेव स्वप्नद्रष्टा न तु मदभिप्रायेणेति विशिनष्टि—तवेति । तत्र हेतुमाह—आत्मन इति ।

---

१ क. ग. ट. ड. ढ. °मद° । २ घ. च. ठ. °भ्यधा° । ३ ङ. °तेऽमृ° । ४ ख. घ. ञ. तीव लेलायतीवे° । ५ ग. ङ. ठ. ड, ढ. °स्माद° । ६ ख. ञ. °स्तत्क्षेप° । ७ ञ. °ध्यात्मिक° ।

वसापराणीत्यादिवाक्यतात्पर्यमाह—द्विरुक्तमपीति । तथा प्रजापतिवाक्यानुसारेणेति यावत् ॥ २ ॥ ३ ॥ ४ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य दशमः खण्डः ॥ १० ॥

(अथाष्टमाध्यायस्यैकादशः खण्डः) ।

यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रव्रव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाह खल्वयमेवꣳ संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥ १ ॥ स समित्पाणिः पुनरेयाय तꣳ ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच नाह खल्वयं भगव एवꣳ संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥ २ ॥

पूर्ववदेतं त्वेव त इत्याद्युक्त्वा तद्यत्रैतत्सुप्त इत्यादि व्याख्यातं वाक्यम् । अक्षिणि यो द्रष्टा स्वप्ने च महीयमानश्चरति स एष सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स्वाभिप्रेतमेव । मघवांस्तत्रापि दोषं ददर्श । कथम् । नाह नैव सुषुप्तस्थोऽप्यात्मा खल्वयं संप्रति सम्प्रतिदानीं चाऽऽत्मानं जानाति नैवं जानाति । कथम् । अयमहमस्मीति नो एवेमानि भूतानि चेति । यथा जायति स्वप्ने वा । अतो विनाशमेव विनाशमिवेति पूर्ववद्द्रष्टव्यम् । अपीतोऽपि गतो भवति, विनष्ट

---

१ ख. ग. घ. ङ. ज. ञ. ट. ठ त. किमेवेच्छ° । २ क. थ. °मिवेच्छ° ।

इव भवतीत्यभिप्रायः । ज्ञाने हि सति ज्ञातुः सद्भावोऽवगम्यते नासति ज्ञाने । न च सुषुप्तस्य ज्ञानं दृश्यतेऽतो विनष्ट इवेत्यभिप्रायः । न तु विनाशमेवाऽऽत्मनो मन्यतेऽमृतमयवचनस्य प्रामाण्यमिच्छन् ॥ १ ॥ २ ॥

यथा पूर्वमेतं त्वेव त इत्याद्युक्त्वा य एष स्वप्ने महीयमान इत्याद्युक्तं तथेहाप्येतं त्वेवेत्युक्त्वा तद्यत्रैतदित्यादेह विशिष्टाधिकारिणे प्रजापतिरिति योजना । व्याख्यातस्यैव वाक्यस्यार्थं संक्षिप्य दर्शयति—अक्षिणीति । तत्रापि सुषुप्तदर्शनेऽपीत्यर्थः । तदेव क्वेषदर्शनं प्रश्नद्वारा स्फोरयति—कथमित्यादिना । स्वात्मानं न जानातीत्युक्तमेवाऽऽकाङ्क्षाद्वारेणाभिनयति—कथमिति । तत्र वैधर्म्यदृष्टान्तमाह—यथेति । स्वपरविवेकाभावे दोषमाह—अत इति । भ्रान्ति त्वेवेत्यत्रोक्तं लक्षयति—पूर्ववदिति । कुतो ज्ञानाभावमात्रेण विनष्टत्वमित्याशङ्क्योक्तमभिप्रायं स्पष्टयति—ज्ञाने हीति । एवकारो यथ श्रुत एव किं न स्यादित्याशङ्क्याऽऽह—न त्विति ॥ १ ॥ २ ॥

एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्बसापराणि पञ्च वर्षाणीति स्म हापराणि पञ्च वर्षाण्युवास तान्येकशतꣳ संपेदुरेतत्तद्यदाहुरेकशतꣳ ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ॥ ३ ॥

इति छान्दोग्योपनिषद्भाष्येऽष्टमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

पूर्ववदेवमेवेत्युक्त्वा यो मयोक्तस्त्रिभिः पर्यायैस्तमेवैतं नो एवान्यत्रैतस्मादात्मनोऽन्यं कंचन किं तर्ह्येनमेव व्याख्यास्यामि । स्वल्पस्तु दोषस्तवावशिष्टस्तत्क्षपणाय बसापराण्यन्यानि पञ्च वर्षाणीत्युक्तः स तथा चकार । तस्मै मृदितकषायादिदोषाय स्वानन्यदोषसंबन्धरहितमात्मनः स्वरूपमपहतपाप्मत्वादिलक्षणं मघवते तस्मै होवाच । तान्येकशतं वर्षाणि संपेदुः संपन्नानि बभूवुः । यदाहुर्लोके शिष्टा एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवासेति । तदेवदृष्टान्वितामित्यादिना दर्शितामित्याख्यायिकाव्याख्यानोपसंहारस्य श्रुत्योच्यते । एवं किलैतदिन्द्रस्यादृष्टमपि गुरुवरमिन्द्रेणापि

---

१ क. ग. ङ. ट. ड. ढ. °वो ग°। २ क. ग. ट. °स्तस्थस्य । ३ ख. ञ. °मृतमभयमिति व°। ४ ख. छ. ञ. ण. °त्याद्याह । ५ क. ग. ठ. °वं तु कि° ।

महता यत्नेनैकोत्तरवर्षशतकृतायासेन प्राप्तमात्मज्ञानमतो नातः परं पुरुषार्थान्तरमस्तीत्यात्मज्ञानं स्तौति ॥ ३ ॥

इति श्रीछान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

पूर्ववद्ब्रह्मचर्यादेशाभावे हेतुमाह—स्वल्पास्त्विति । आरुण्यायिकस्तोऽपसृत्य श्रुतिरस्मभ्यं किमर्थमित्थमुपदिशतीत्याशङ्क्याऽऽह—एवमिति ॥ ३ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्यैकादशः खण्डः ॥ ११ ॥

(अथाष्टमाध्यायस्य द्वादशः खण्डः)।

मघवन्मर्त्यं वा इदꣳ शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्याऽऽत्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ॥ १ ॥

मघवन्मर्त्यं वै मरणधर्मीदं शरीरम् । यन्मन्यसेऽक्ष्याधारादिलक्षणः संप्रसादलक्षण आत्मा मयोक्तो विनाशमेवापीतो भवतीति। शृणु तत्र कारणम्। यदिदं शरीरं वै यत्पश्यसि तदेतन्मर्त्यं विनाशि । तच्चाऽऽत्तं मृत्युना ग्रस्तं सततमेव । कदाचिदेव म्रियत इति मर्त्यमित्युक्ते न तथा संत्रासो भवति यथा ग्रस्तमेव सदा व्याप्तमेव मृत्युनेत्युक्त इति वैराग्यार्थं विशेष इत्युच्यत आत्तं मृत्युनेति । कथं नाम देहाभिमानतो विरक्तः सान्निवर्तत इति । शरीरमित्यत्र सहेन्द्रियमनोभिरुच्यते। तच्छरीरमस्य संप्रसादस्य त्रिस्थानतया गम्यमानस्यामृतस्य मरणादिदेहेन्द्रियमनोधर्मवर्जितस्येत्येतत् । अमृतस्येत्यनेनैवाशरीरत्वे सिद्धे पुनरशरीरस्येति वचनं वाय्वादिवत्सावयवत्वमूर्तिमत्त्वे मा भूतामित्यात्मनः। आत्मनो भोगाधिष्ठानम् । आत्मनो वा सत ईश्वरतेजोबन्नादिक्रमेणोत्पन्नमधिष्ठानम् । जीवरूपेण प्रविश्य सदेवाधितिष्ठत्यस्मिन्निति वाऽधिष्ठानम् ।

---

१ क. ग. ट: एवं त्विति । २ ख. घ. ज. थ. न ह वै । ३ क. °स्तं सत । ४ ख. घ. च. ज्ञ. ठ. °ह्यात्माभि° । ५ ग. ङ. ट ठ ड ढ ण °रमप्यत्र° ।

कार्यकारणपरिवेष्टितौ विश्वतैजसावुक्तौ कारणमात्रबद्धश्च प्राज्ञो व्याख्यातः संप्रत्य-शरीरं तुरीयमुपदेष्टुं सशरीरतां निन्दति—मघवन्निति । शरीरवदात्मनोऽपि विनाशि-त्वमवस्थाविशेषे दर्शितमित्याशङ्क्याऽऽह—यन्मन्यस इति । सशरीरो विशेषविज्ञान-वान्भवत्यशरीरस्य तु विशेषविज्ञानाभावाद्विनाशभ्रमो न पुनरसौ वस्तुतो विनश्यति स्वेन रूपेणाभिनिष्पद्यत इति संप्रसादस्याविनाशित्ववचनादित्यभिप्रेत्य कारणमेव स्पष्टयन्नक्षराणि व्याचष्टे—यदिदापीत्यादिना । ननु मर्त्यमित्येतावतैव मृत्युव्याप्तत्वे शरीरस्य सिद्धे किमित्यात्तं मृत्युनेति पुनरुच्यते तत्राऽऽह—कदाचिदेवेति । वैरा-ग्यार्थं विशेषवचनमित्युक्तं यत्तदेव वैराग्यं किमर्थमित्याशङ्क्याऽऽह—कथामिति । निवर्तने विशेषवचनं फलवदिति शेषः । तदस्येत्यत्र तच्छब्दार्थमाह—शरीरमि-त्यत्रेति । मघवन्नित्यादिवाक्यं सप्तम्यर्थः त्रिस्थानतया जाग्रत्स्वप्नसुषुप्ताख्यस्था-नत्रयसंबन्धित्वेनेति यावत् । अमृतत्वं षड्ऊर्मिवर्जितत्वम् । अशरीरत्वं स्वाभाविकसा-वयवत्वादिराहित्यम् । आत्मनोऽधिष्ठानमित्यत्र भोगेत्यपेक्षितपूरणं कृतम् । भोक्तृ-भोगायतनं शरीरमिति विशेषणार्थमुक्त्वा तस्यैवार्थान्तरमाह—आत्मनो वेति । अधिष्ठानं जनयितुस्तस्योपलब्धेरधिकरणमिति यावत् । अधिष्ठानशब्दस्यार्थान्तर-माह—जीवरूपेणेति ।

यस्येदमीदृशं नित्यमेव मृत्युग्रस्तं धर्माधर्मजनितत्वात्प्रियाप्रियवदधिष्ठानं तदधिष्ठितस्तद्वान्सशरीरो भवति । अशरीरस्वभावस्याऽऽत्मनस्तदेवाहं शरीरं शरीरमेवं चाहमित्यविवेकात्मभावः सशरीरत्वमत एव सशरीरः सन्नात्तो ग्रस्तः प्रियाप्रियाभ्याम् । प्रसिद्धमेतत् । तस्य च वै सशरी-रस्य सतः प्रियाप्रिययोर्बाह्यविषयसंयोगवियोगनिमित्तयोर्बाह्यविषयसंयोग-वियोगौ ममेति मन्यमानस्यापहातिर्विनाश उच्छेदः संतत्तिरूपयोर्नास्तीति । तं पुनर्देहाभिमानादशरीरस्वरूपाविज्ञानेन निवर्तिताविवेकज्ञानमशरीरं सन्तं प्रियाप्रिये न स्पृशतः । स्पृशिः प्रत्येकं संबध्यत इति प्रियं न स्पृशत्यप्रियं न स्पृशतीति वाक्यद्वयं भवति । न म्लेच्छाद्युच्चयधार्मिकैः सह संभाषेतेति षट्वत् । धर्माधर्मकार्ये हि ते अशरीरता तु स्वरूपमिति तत्र धर्माधर्मयोरसं-भवात्तत्कार्यभावो दूरत एवेत्यतो न प्रियाप्रिये स्पृशतः ।

उत्तरवाक्यस्थं सशरीरशब्दं व्याचष्टे—यस्येति । मर्त्यत्वादिविशेषणवदित्यर्थः । तद्यथोक्तं शरीरमधिष्ठितमनेनेति व्युत्पत्त्या तदधिष्ठितः स तद्रूपः पुरुष इत्यर्थः ।

---

१ ख. छ. ञ. ण. °रीरत्वमु° । २ ग. छ. °रणम् । भो° । ३ क. ख. ञ ण. °म् । भो° । ४ ग. ट. °वाऽह° । ५ क. °कादात्म° । ६ ख. घ. ञ. ढ. ण. न ह वै । ७ क. ठ. °विज्ञा° । ८ क. हि गहिते यतोऽश° । घ. ण. हिताहिते अ° । ९ क. ञ. छ. ञ. °ष्ठितसादृश्यः पु° ।

तस्यैव संपिण्डितमर्थमाह—तद्वानिति । उक्तेऽर्थे विशेषणं पातयति—सशरीर इति । अशरीरस्य कथं सशरीरत्वमित्याशङ्क्याऽऽह—अशरीरेति । अविवेकतः सशरीरो भवतीति पूर्वेण संबन्धः । यतः सशरीरोऽत एव प्रिय[1]प्रियाभ्यामातो वै पुरुष इति योजना । वैशब्दार्थमाह—प्रसिद्धमिति । एतच्छब्दार्थमेवोत्तरवाक्य-व्याख्यानेन स्फोरयति—सशरीरस्येति । तौ ममेति मन्यमानस्य सतः स्वस्य तयोः संततिरूपयोरपहतिर्नास्तीति संबन्धः । प्रियाप्रिययोः स्वारस्येन विनाशोऽस्ति क्षणिकत्वादित्याशङ्क्य संततिरूपयोरित्युक्तम् । इतिशब्दो वाक्यसमाप्त्यर्थः । अजस्य देहसंबन्धद्वारा संसारित्वमुक्त्वा तस्यैव विद्यावतो देहनिवृत्तिद्वारेण मुक्तिं दर्शयति—तं पुनरिति । मुक्ते पुंसि प्रियाप्रिययोर्मिलितयोरस्पर्शोऽप्येकैकस्य स्पर्शः स्यादित्याशङ्क्याऽऽह—स्पृशतिरिति । प्रत्येकं संबन्धमभिनयति—प्रियमिति । समस्ततया श्रुतस्यानेकस्य प्रत्येकं क्रियासंबन्धे दृष्टान्तमाह—नेति । प्रियाप्रिययो-र्मुक्तात्मन्यसंस्पर्शं पातनिकापूर्वकं कैमुतिकन्यायेन दर्शयति—धर्माधर्मेति । तत्रेत्य-शरीरताख्यं स्वरूपमुच्यते ।

ननु यदि प्रियमप्यशरीरं न स्पृशन्तीति यन्मघवतोक्तं सुषुप्तस्थो विना-शमेवापीतो भवतीति तदेवेहाप्यापन्नम् । नैष दोषः । धर्माधर्मकार्ययोः शरीरसंबन्धिनोः प्रियाप्रिययोः प्रतिषेधस्य विवक्षितत्वात् । अशरीरं न प्रियाप्रिये स्पृशत इति । आगमापायिनो हि स्पर्शशब्दो दृष्टो यथा शीतस्पर्श उष्णस्पर्श इति न त्वग्नेरुष्णप्रकाशयोः स्वभावभूतयोरग्निना स्पर्श इति भवति तथाऽग्नेः सवितुर्वोष्णप्रकाशवत्स्वरूपभूतस्याऽऽनन्दस्य प्रियस्यापि नेह प्रति-षेधः "विज्ञानमानन्दं ब्रह्म" "आनन्दो ब्रह्म" इत्यादिश्रुतिभ्यः । इहापि भूमैव सुखमित्युक्तत्वात् ।

प्रियास्पर्शाभावं श्रुत्वा मोक्षस्यापुरुषार्थत्वं शङ्कते—नन्विति । इहापीति मुक्तो गृह्यते । स्वाभाविकप्रियाप्रतिषेधान्नापुरुषार्थत्वं मुक्तेरित्युत्तरमाह—नैष दोष इति । प्रतिषेधमेवाभिनयति—अशरीरमिति । कादाचित्कयोरेव प्रियाप्रिययोरेष निषेध इत्यत्र नियामकमाह—आगमापायिनोरिति । कादाचित्के स्पर्शशब्दवन्न स्वात्मन्येतच्छब्दोऽस्तीत्याह—न त्विति । आत्मनि तर्हि कादाचित्कमेव प्रियमिति तन्मात्रप्रतिषेधात्तदवस्थमपुरुषार्थत्वमित्याशङ्क्याऽऽह—सवितुरिति । भूमविद्यालोचना-यामपि सुखमात्रस्याऽऽत्मनि न प्रतिषेधोऽस्तीत्याह—इहापीति ।

---

१ ख. ग. ट. अशस्य । २ क. ख. छ. ञ. ण. °रीराख्यं । ३ ट. ण. °शति । ४ क. इत्यादिश्रुतिः । आ° । ग. घ. ङ. च. ट. ढ. इत्यादिश्रुत्या । आ° । ५ क. ग. च. ट. ठ. ड. °नन्द-मान° । ६ ग. नियममा° ।

ननु भूम्नः पियस्यैकत्वेऽसंवेद्यत्वात्स्वरूपेण वा नित्यसंवेद्यत्वान्निर्विशेषत्वेति नेन्द्रस्य तदिष्टम् । " नाह खल्वयं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि " इत्युक्तत्वात् । तद्धीन्द्रस्येष्टं यद्भूतानि चाऽऽत्मानं च जानाति न चामियं किंचिद्वेत्ति स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्येन ज्ञानेन । सत्यमेतदिष्टमिन्द्रस्येमानि भूतानि मत्तोऽन्यानि लोकाः कामाश्च सर्वे मत्तोऽन्येऽहमेषां स्वामीति । न त्वेतदिन्द्रस्य हितम् । हितं चेन्द्रस्य प्रजापतिना वक्तव्यम् । व्योमवदशरीरात्मतया सर्वभूतलोककामात्मत्वोपगमेन यो प्राप्तिस्तद्धितमिन्द्राय वक्तव्यमिति प्रजापतिनाऽभिप्रेतम् । न तु राज्ञो राज्यप्राप्तिवदन्यत्वेन । तत्रैवं सति कं केन विजानीयादात्मैकत्व इमानि भूतान्यथमहमस्मीति ।

तथाऽपि विषयविषयिभावेन भेदाभावात्तद्वस्यमपुरुषार्थत्वमिति शङ्कते—नन्विति । भेदो न पुमर्थत्वोपयोगी ÷ केवलव्यतिरेकाभावात्सुखसाक्षात्कारस्तु पुरुषार्थः स चाभेदेऽपि विद्यत इत्याशङ्क्याऽऽह—स्वरूपेणेति । आत्मनि विशेषज्ञानराहित्यमिन्द्रस्य नेष्टमित्यत्र हेतुमाह—नाहेति । किं तर्हीन्द्रस्येष्टमित्याशङ्क्याऽऽह—तद्धीति । येन ज्ञानेनाऽऽप्नोति तदिष्टमिन्द्रस्येति पूर्वेण संबन्धः । किमिदं विशेषविज्ञानमिन्द्रस्येष्टमित्युच्यते किंवा हितमिति विवक्ष्यते तत्राऽऽद्यमङ्गी करोति—सत्यमिति । द्वितीयं दूषयति—न त्विति । द्वितीयाद्धि भयं भवतीत्यादिश्रुतेरित्यर्थः । तथाऽपीष्टमेवेन्द्राय प्रजापतिनोपदेष्टव्यमित्याशङ्क्याऽऽह—हितं चेति । किं तर्हि तस्य हितमिति चेत्तदाह—व्योमवदिति । हितं वक्तव्यमिति संबन्धः । हितमेव न त्विष्टमिति स्थिते फलितमाह—तत्रेति ।

नन्वस्मिन्पक्षे " स्त्रीभिर्वा यानैर्वा " " स यदि पितृलोककामः " " स एकधा भवति " इत्याद्यैश्वर्यश्रुतयोऽनुपपन्नाः । न । सर्वात्मनः सर्वफलसंबन्धोपपत्तेरविरोधात् । मृद इव सर्वघटकरककुण्डाद्याप्तिः । ननु सर्वात्मत्वे दुःखसंबन्धोऽपि स्यादिति चेन्न । दुःखस्याप्यात्मत्वोपगमादविरोधः । आत्मन्यविद्याकल्पनानिमित्तानि दुःखानि रज्ज्वामिव सर्पादिकल्पनानिमित्तानि । सा चाविद्या शरीरात्मैकत्वस्वरूपदर्शनेन दुःखनिमित्तोच्छित्तेति

÷ यत्र भेदो नास्ति तत्र पुमर्थत्वमपि नास्तीति केवलव्यतिरेकाभावादित्यर्थः ।

१ ख. ङ. ञ. ड. ढ. ण. लोकाश्च । २ ङ. ढ. याऽऽप्तिः । ठ. ड. याऽवाप्तिः । ३ क. ख. छ. ञ. ण. °षयीमा° । ४ क. ख. छ. ञ. ण. °ति व° । ५ घ. °र्पादीनि क° । ६ ग. ङ. °ना । सा° ।

दुःखसंबन्धाशङ्का न संभवति । शुद्धसत्त्वसंकल्पनिमित्तानां तु कामानामीश्वरदेहसंबन्धः सर्वभूतेषु मानसानां पर एव सर्वसत्त्वोपाधिद्वारेण भोक्तेति सर्वाविद्याकृतसंव्यवहाराणां पर एवाऽऽत्माऽऽस्पदं नान्योऽस्तीति वेदान्तसिद्धान्तः ।

सर्वेषां भूतानां लोकानां कामानां चाऽऽत्मा सच्चिदानन्दमात्रं तद्रूपत्वं चेन्मुक्तस्येष्यते कथं तर्हि तस्यैश्वर्यश्रुतयो निर्वहन्तीति चोदयति—नन्विति । सगुणविद्यावतां यदैश्वर्यं तन्निर्गुणविद्यास्तुत्यर्थं संकीर्त्यते । ब्रह्मीभूतस्य मुक्तस्य सगुणविद्याया अपि प्रत्यगभूतत्वात्फलस्य तत्रोपचरितुं युक्तत्वादिति परिहरति—नेत्यादिना । सर्वात्मत्वे निन्दाऽपि प्राप्नोतीति शङ्कते—नन्विति । दुःखस्य दुःखत्वाभावत्वस्याऽऽत्मा विद्वानपि न दुःखी भविष्यतीति समाधत्ते—न दुःखस्येति । तर्हि दुःखिनामात्मा मुक्त इति दुःखी स्यात्तत्राऽऽह—आत्मनीति । न तावदात्मनः स्वभावतो दुःखित्वं किंत्वाविद्यकं सा च मुक्तस्य दग्धेति दुःखित्वाप्रसक्तिरित्यर्थः । तर्हि विद्यया दग्धायामविद्यायां तदध्यारोपितमैश्वर्यमपीश्वरस्य सगुणविद्याफलभूतं दग्धमेवेति कथं स्तुत्यर्थमिह तदुपदेशसिद्धिरित्याशङ्क्याऽऽह—शुद्धेति । शुद्धं सत्त्वं रजस्तमोभ्यामपृक्तं तस्मान्मायैकदेशाज्जाताः संकल्पा निमित्तानि येषां कामानामैश्वर्यभेदानां ते तथोक्तास्तेषां सर्वेषु भूतेषु विषयेषु मनोमात्रेणेश्वराभिध्यानरूपेण सिद्धानामीश्वररूपेण(ण) स्वभावेनाभिसंबन्धो मायावस्थायां विध्यतीत्यर्थः । ननु जीवानामेवाविद्यातत्कार्यसंबन्धो नेश्वरस्येति चेन्नेत्याह—पर एवेति ।

य एषोऽक्षिणि पुरुषो दृश्यत इति च्छायापुरुष एव प्रजापतिनोक्तः । स्वप्नसुषुप्तयोश्चान्य एव । न-परोऽपहतपाप्मत्वादिलक्षणो विरोधादिति केचिन्मन्यन्ते । छायाऽऽत्मनां चोपदेशे प्रयोजनमाचक्षते । आदावेवोच्यमाने किल दुर्विज्ञेयत्वात्परस्याऽऽत्मनोऽत्यन्तबाह्यविषयासक्तचेतसोऽत्यन्तसूक्ष्मवस्तुश्रवणे व्यामोहो मा भूदिति । यथा किल द्वितीयायां सूक्ष्मं चन्द्रं दिदर्शयिषुर्दक्षं कंचित्प्रत्यक्षमादौ दर्शयति पश्यामुमेष चन्द्र इति, ततोऽन्यं ततोऽप्यन्यं गिरिमूर्धानं च चन्द्रसमीपस्थमेष चन्द्र इति, ततोऽसौ चन्द्रं पश्यति, एवमेतद्य एषोऽक्षिणीत्युक्तं प्रजापतिना त्रिभिः पर्यायैर्न पर इति । चतुर्थे तु पर्याये देहान्मर्त्यात्समुत्थायाशरीरतामापन्नो ज्योतिःस्वरूपम् । यस्मिन्नुत्तमपुरुषे स्त्रीवादिभिर्भक्षक्रीडनरममाणो भवति स उत्तमः पुरुषः पर उक्त इति चाऽऽहुः ।

---

१ घ. च. ठ. ण. °नां का° । २ ग. ट. °विद्यं सा° । ३ ख. छ. झ. ण. °ति दग्धत्वादप्र° । ४ ग. ट. °मनभिभू तं° । ५ ख. छ. झ. ण. °स्य वै° । ६ ख. ङ. च. झ. ठ. ड. ढ. ण. °पाप्मादि° । ७ ख. ञ. °त्मना त्वो° । ८ ख. घ. च. ज. ड. ण. चन्द्रमसं । ९ क. ग. ट. °त्तमपु° ।

चतुर्ष्वपि पर्यायेषु स्वमर्थानुवादेन तस्य तदर्थत्वं विधेयमिति स्वाभिप्रायेण प्रजापतिवाक्यं व्याख्यातं संप्रति स्वयूथ्यमतमुत्थापयति—य एष इति । प्रथमपर्यायस्य च्छायात्मविषयत्ववद्द्वितीयतृतीयपर्याययोरपि विज्ञानात्मविषयत्वमित्याह—स्वप्नेति । अन्य एव परस्मादुक्त इति संबन्धः । चतुर्थपर्यायवत्पर्यायत्रयेऽपि परमात्मैव कस्मान्नोच्यते तत्राऽऽह—न पर इति । अपहतपाप्मत्वादेरवस्थावत्त्वस्य च मिथो विरोधो हेत्वर्थः । नन्वन्तिमे पर्याये परस्योपदेशो युज्यते तज्ज्ञानस्य मुक्तिफलत्वात्किमिति पूर्वेषु पर्यायेषु च्छायादयो निर्दिश्यन्ते तत्फलभावादत आह—छायाद्यात्मनां चेति। तत्र प्रथमं छायात्मोपदेशस्य प्रयोजनमह—आदावेवेति । परस्यातिसूक्ष्मत्वेन दुर्विज्ञेयत्वात्तस्मिन्नेवाऽऽदावुच्यमाने सति तस्यापि सूक्ष्मस्य श्रवणेऽपि श्रोतुरनात्मनिष्ठस्य किल व्यामोहः स्यात्स मा भूदिति पृथक्छायात्मोपदेशः कृत इति संबन्धः । स्वप्नसुषुप्तयोर्विज्ञानात्मोपदेशस्य प्रयोजनं दर्शयन्नुक्तमर्थं दृष्टान्तेन स्पष्टयति—यथेत्यादिना । इतिशब्दस्तिङा संबध्यते । पर्यायान्तरस्य तात्पर्यमाह—चतुर्थं त्विति । मरणजन्मकाद्देहात्पृथगभूत्वा ज्योतिःस्वरूपमशरीरत्वं प्राप्तो यद्यपि चतुर्थे पर्याये कथ्यते तथाऽपि कथमसौ परमात्मा स्यादित्याशङ्क्याऽऽह—यस्मिन्निति । स संप्रसादो यो विद्वान्कर्तृत्वेन विवक्षितः ।

सत्यं, रमणीया तावदियं व्याख्या श्रोतुः । नत्वर्थोऽस्य ग्रन्थस्यैवं संभवति । कथम् । अक्षिणि पुरुषो दृश्यत इत्युपन्यस्य शिष्याभ्यां छायात्मनि गृहीते तयोस्तद्विपरीतग्रहणं मत्वा तदपनयायोदशरावोपन्यासः किं पश्यथ इति च प्रश्नः साध्वलंकारोपदेशश्चानर्थकः स्यात् । यदि च्छायात्मैव प्रजापतिनाऽक्षिणि दृश्यत इत्युपदिष्टः । किंच यदि स्वयमुपदिष्टे इति ग्रहणस्यापनयैकारणं वक्तव्यं स्यात् । स्वप्नसुषुप्तात्मग्रहणयोरपि तदपनयैकारणं च स्वयं ब्रूयात् । न चोक्तं [तेन] तेन मन्यामहे नाक्षिणि च्छायात्मा प्रजापतिनोपदिष्टः । किंचान्यदक्षिणि द्रष्टा चेद्दृश्यत इत्युपदिष्टः स्यात्तत इदं युक्तम् । एतं त्वेव त इत्युक्त्वा स्वप्नेऽपि द्रष्टुरेवोपदेशः ।

किमिदं व्याख्यानं शब्दानुसारि किंवाऽर्थानुसारीति विकल्प्याऽऽद्यमङ्गी करोति—सत्यमिति । द्वितीयं दूषयति—न त्विति । अनंभवमेवाऽऽकाङ्क्षाद्वारा स्फुटयति—कथमित्यादिना । यद्यद्यं पर्याये छायात्मोपदिश्येत तर्हीन्द्रविरोचनयोः सम्यग्दर्शि-

---

१ ख. छ. ञ. °त्मना चे° । २ क. ग. ट. °यात्मनोप° । ३ घ. ङ. ठ. ण. श्रोतुः । ४ क. °दि वा तेन स्व° । ५ घ ठ. °ष्टम्र° । ६ ग. ट. °दृस्या° । ७ क. °यनका° । ८ क. °यनका° । ९ क. ङ. ड. °णं ब्रू° । १० घ. ङ. ण. °प्रे द्र° । ११ क. ख. छ. ञ. ण. °दिश्यते तर्हीं° ।

स्वाद्विपरीतग्रहापोहार्थं प्रजापतेरायासो वृथा स्यात् । तेन नेदं व्याख्यानमर्थानुसारीत्यर्थः । इतश्च नाऽऽद्ये पर्याये छायात्मोपदेशोऽस्तीत्याह—किंचेति । प्रजापतिनोपदिष्टस्यापि च्छायात्मनो ग्रहणं न मृष्यतीत्याशङ्क्य हेत्वन्तरं स्पष्टयति—यदीति । तेन च्छायात्मग्रहणापनयकारणावचनेनेति यावत् । तेन प्रजापतिनेत्येकस्तच्छब्दो योज्यः । इतश्च प्रथमे पर्याये द्रष्टुरेवोपदेशो न च्छायापुरुषस्येत्याह—किंचान्यदिति । एतच्छब्देन संविहितावलम्बिना छायात्मानमनुकृष्य स्वप्ने द्रष्टुरुपदेशः(शे) प्रजापतेर्मृषावादित्वं प्रसज्येत । तथा च प्रथमेऽपि पर्याये द्रष्टैवोपदिष्ट इत्यर्थः ।

स्वप्ने न द्रष्टोपदिष्ट इति चेन्न । अपि रोदितीवाप्रियवेसेवेत्युपदेशात् । न च द्रष्टुरन्यः कश्चित्स्वप्ने महीयमानश्चरति । अतायं पुरुषः स्वयंज्योतिरिति न्यायतः श्रुत्यन्तरे सिद्धत्वात् । यद्यपि स्वप्ने सधीर्भवति तथाऽपि न धीः स्वप्नभोगोपलब्धिं प्रति करणत्वं भजते । किं तर्हि पटचित्रवज्जाग्रद्वासनाश्रया दृश्यैव धीर्भवतीति न द्रष्टुः स्वयंज्योतिष्ट्वबाधः स्यात् । किंचान्यत् । जाग्रत्स्वप्नयोर्भूतानि चाऽऽत्मानं च जानातीमानि भूतान्ययमहमस्मीति । प्राप्तौ सत्यां प्रतिषेधो युक्तः स्यान्नाह खल्वयमित्यादि । तथा चेतनस्यैवाविद्यानिमित्तयोः सशरीरत्वे सति प्रियाप्रिययोरपहतिर्नास्तीत्युक्त्वा तस्यैवाशरीरस्य सतो विद्यायां सत्यां सशरीरत्वे प्राप्तयोः प्रतिषेधो युक्तोऽशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति । एकश्चाऽऽत्मा स्वप्नबुद्धान्तयोर्महामत्स्यवदसङ्गः संचरतीति श्रुत्यन्तरे सिद्धम् ।

स्वप्नावस्थाविशिष्टस्य स्थानान्तरे बाध्यत्वान्न तत्र द्रष्टुरुपदेशोऽस्तीति शङ्कते—स्वप्न इति । अनुभवानुसारेणोत्तरमाह—नेत्यादिना । किंच प्रकाशकारणानामुपरमे यः प्रकाशः स नैसर्गिक इति न्यायेन प्रतीचः स्वयंज्योतिष्ट्वं बृहदारण्यके स्वप्नावस्थामाश्रित्योक्तं ततश्च तत्र द्रष्टुरुपदेशः सिध्यतीत्याह—न चेति । सूर्यादीनामुपरमे यः प्रकाशो दृश्यमानः स नैसर्गिक इत्ययुक्तं स्वप्नेऽप्यन्तःकरणस्य सत्त्वादित्याशङ्क्याऽऽह—यद्यपीति । करणत्वाभावे हेतुं पृच्छति—किं तर्हीति । लोहितादिजाग्रद्वासनाभिर्विवर्तमाना साक्षिणो वेद्यतामापद्यते । तथा च पटचित्रवद्विचित्रवासनामयचेतसः साक्षिगम्यत्वान्न स्वप्नोपलब्धौ करणं भवतीति तद्द्रष्टुः स्वयंज्योतिष्ट्वं न्यायसिद्धमित्याह—पटेति । प्रासङ्गिकं हित्वा द्रष्टैवोपदिष्टः स्वप्नावस्थायामित्यत्र हेत्वन्तरमाह—किंचेति । तथा च जाग्रदवस्थायामिव स्वप्नेऽपि द्रष्टैवोपदिष्ट इति शेषः । इतश्च द्रष्टुरेवोपदेशः स्वप्नदशायामित्याह—प्राप्ताविति ।

१ ग. घ. ङ. 'भापाद्य' । २ क. ख. छ. ज. ण. पदे चि' ।

न केवलमुक्तसौषुप्तो निषेधो निषेध्यप्राप्तिसापेक्षत्वाद्वस्थाद्वये द्रष्टुरुपदेशमाकाङ्क्षति किंतु तुरीयगतो निषेधोऽपि निषेध्यमाकाङ्क्षन्नवस्थाद्वये द्रष्टुरुपदेशमाकाङ्क्षतीत्याह—तथेति। निषेधस्य प्राप्तिसापेक्षत्वात्प्रकृतस्यैव द्रष्टुरविद्यानिदाने सशरीरत्वे तन्निमित्तयोः स्थानद्वयगतयोर्न प्रियाप्रिययोरहतिरस्तीति न ह वै सशरीरस्येत्यादिनोक्ते सशरीरत्वे प्राप्तयोः प्रियाप्रिययोस्तस्यैवावस्थात्रयातीतस्य सत्यां विद्यायामशरीरमित्यादिना प्रतिषेधो युक्त इति योजना। स्वप्ने द्रष्टुरुपदेशे हेत्वन्तरमाह—एकश्चेति।

यच्चोक्तं संप्रसादः शरीरात्समुत्थाय यस्मिन्रूपादिभी रममाणो भवति सोऽन्यः संप्रसादादधिकरणनिर्दिष्ट उत्तमः पुरुष इति। तदप्यसत्। चतुर्थेऽपि पर्याय एतं त्वेव त इति वचनात्। यदि ततोऽन्योऽभिप्रेतः स्यात्पूर्ववदेतं त्वेव त इति न ब्रूयान्मृषा प्रजापतिः। किंचान्यत्तेजोबन्नादीनां स्रष्टुः सतः स्वविकारदेहशुक्रे प्रवेशं दर्शयित्वा प्रविष्टाय पुनस्तत्रममसीत्युपदेशो मृषा प्रसज्येत। तस्मिंस्त्वं रूपादिभी रन्ता भविष्यसीति युक्त उपदेशोऽभविष्यदि संप्रसादादन्य उत्तमः पुरुषो भवेत्। तथा भूम्न्यहमेवेत्यादिश्याऽऽत्मैवेदं सर्वमिति नोपसमहरिष्यद्यदि भूमा जीवादन्योऽभविष्यत्। "नान्योऽतोऽस्ति द्रष्टृ" इत्यादिश्रुत्यन्तरेभ्यश्च। सर्वश्रुतिषु च परस्मिन्नात्मशब्दप्रयोगो नाभविष्यत्सत्यगात्मा चेत्तर्वजन्तूनां परं आत्मा न भवेत्तस्मादेक एवाऽऽत्मा प्रकरणेन सिद्धः।

चतुर्थपर्यायस्य सौषुप्तादर्थान्तरविषयत्वमुक्तमनुभाष्य दूषयति—यच्चोक्तमित्यादिना। तदेव व्यतिरेकद्वारा स्फोरयति—यदीति। अधिकरणाविषयभावेन भेदः सत्यो नास्तीत्यत्र हेत्वन्तरमाह—किंचान्यदिति। जीवपरयोर्भेदस्य षष्ठपाठकविरोधवत्सप्तमपाठकविरोधोऽपि स्यादित्याह—तथेति। बृहदारण्यकश्रुत्यालोचनायामपि जीवेश्वरभेदो न संभवतीत्याह—नान्य इति। इतश्च जीवपरयोर्भेदो नास्तीत्याह—सर्वश्रुतिष्विति। श्रौतमर्थमुपसंहरति—तस्मादिति।

न चाऽऽत्मनः संसारित्वम्। अविद्याध्यस्तत्वादात्मनि संसारस्य। न हि रज्जुशुक्तिकागगनादिषु सर्परजतमलादीनि मिथ्याज्ञानाध्यस्तानि तेषां भवन्तीति। एतेन सशरीरस्य प्रियाप्रिययोरपहतिर्नास्तीति व्याख्यातम्।

---

१ घ. च. ठ. ड. ढ. °स्तिश्च स्रष्टा°। २ ख. ङ. ञ. ढ. ण. नान्यदतो। ३ ख. ञ. ठ. ढ. ण. द्रष्ट्रित्या° ४ ख. ञ. °रमात्मा। ५ ङ. ढ.°रणति°। ६ ण. नान्यदेति। ७ घ. च. ठ. ढ. ण. °स्तीत्येतद्व्याख्या°।

यच्च स्थितमप्रियवेत्तेवेति नाप्रियवेत्तैवेति सिद्धम् । एवं च सति सर्वेषर्यायेष्वेतदमृतमभयमेतद्ब्रह्मेति प्रजापतेर्वचनम् । यदि वा प्रजापतिच्छद्मरूपायाः श्रुतेर्वचनं सत्यमेव भवेत् । न च तत्कुतर्कबुद्ध्या मृषा कर्तुं युक्तम् । ततो गुरुतरस्य प्रमाणान्तरस्यानुपपत्तेः । ननु प्रत्यक्षं दुःखाद्यप्रियवेत्तृत्वमव्यभिचार्यनुभूयत इति चेन्न । जरादिरहितो जीर्णोऽहं जातोऽहमायुष्मान्गौरः कृष्णो मृत इत्यादिप्रत्यक्षानुभववत्तदुपपत्तेः ।

आत्मैक्ये परस्यैव संसारित्वं सर्वदेहेषु स्यादिति चेन्नेत्याह-न चेति । आरोपितसंसारित्वं वस्तुतो नाऽऽत्मन्यस्तीत्येतद्दृष्टान्तेन स्पष्टयति—न हीति । मिथ्या च तद्ज्ञानं चेति मिथ्याज्ञानं तेनाध्यस्तान्यविद्यमानान्येव विद्यमानवत्प्रतीतिमापादितानीति यावत् । न ह वै सशरीरस्येत्यादि वदता वास्तवत्वं शरीरसंबन्धस्य विवक्षितमिति शङ्कामुक्तन्यायातिदेशेन निरस्यति—एतेनेति । आत्मनि संसारस्य प्रसक्तिर्नेति यावत् । यावदध्यासभावित्वं प्रियाप्रिययोरपहत्यभावो न वास्तवत्वं शरीरसंबन्धस्यैव प्रियाप्रियमूलस्य दुर्निरूपत्वादित्यर्थः । स्वप्नद्रष्टा खल्वप्रियवेत्तेव भवति न त्वप्रियवेत्तैवेति यत्पूर्वत्र स्थितं तत्सिद्धम् । लक्ष्यान्तरमाह—एवं चेति । प्रजापते सत्यं भवेदिति संबन्धः । अपौरुषेय्यां श्रुतौ कुतः प्रजापतेर्वचनं सावकाशमित्याशङ्क्याऽऽह—यदि वेति । सुखादयः साश्रया गुणत्वाद्रूपादिवदित्यनुमानात्तदाश्रयः परिशेषादात्मा भविष्यतीति वैशेषिकादितर्कविरोधादसत्यं श्रुतेर्वचनमित्याशङ्क्याऽऽह—न चेति । सुखादीनामुपाधिधर्मत्वेन सिद्धसाध्यत्वान्नास्ति श्रौतवचसो बाधकमित्यर्थः । प्रत्यक्षमिति शङ्कते—नन्विति । तस्याऽऽभासत्वान्न बाधकत्वमिति परिहरति— नेत्यादिना ।

सर्वमप्येतत्सत्यमिति चेदस्त्येवैतदेवं दुरवगमं येन देवराजोऽप्युदशरावादिदर्शितावैनाशयुक्तिरपि मुमोहैवात्र विनाशमेवापीतो भवतीति । तथा विरोचनो महाप्राज्ञः प्राजापत्योऽपि देहमात्रात्मदर्शनो बभूव । तथेन्द्रस्याऽऽत्मविनाशभयसागर एव वैनाशिका न्यमज्जन् । तथा सांख्या द्रष्टारं देहादिव्यतिरिक्तमवगम्यापि त्यक्तागमप्रमाणत्वान्मृत्युविषय एवान्यत्वदर्शने तस्थुः । तथाऽन्ये काणादादिदर्शनाः कषायरक्तमिव क्षारादिभिर्वस्त्रं नवभिरात्मगुणैर्युक्तमात्मद्रव्यं विशोधयितुं प्रवृत्ताः । तथाऽन्ये कर्मिणो बाह्यविषयापहृतचेतसो वेदप्रमाणा अपि परमार्थसत्यमात्मैकत्वं विनाशमिवेन्द्रवन्मन्यमाना घटी-

---

१ क. ग. ट. कृशो । २ ग ट तत्तु सिद्ध° । छ. तच सिद्ध° । ३ ठ °क्तमात्मानम° । ४ ङ. ढ. ततोऽन्ये । ५ ङ. च. ठ. ड. ढ. °था क° । ६ क. ग. ट. ड. °पहृत° ।

यन्त्रवदारोहावरोहप्रकारैरनिशं बम्भ्रमति । किमन्ये क्षुद्रजन्तवो विवेकहीनाः स्वभावत एव बहिर्विषयापहृतचेतसः । तस्मादिदं त्यक्तसर्वबाह्यैषणैरनन्यशरणैः परमहंसपरिव्राजकैरित्याश्रमिभिर्वेदान्तविज्ञानपरैरेव वेदनीयं पूज्यतमैः प्राजापत्यं चेमं संप्रदायमनुसरद्भिरुपनिबद्धं प्रकरणचतुष्टयेन । तथाऽनुशासत्यप्यपि त एव नान्य इति ॥ १ ॥

दृष्टान्तोऽपि संप्रतिपन्नो न भवतीति शङ्कते-सर्वमिति । जरादेः सत्यवचनं त्वदीयमेवमस्त्येवेत्यङ्गी करोति—अस्त्येवमवेति । अङ्गीकारे हेतुमाह-दुरवगममिति । अधिकारिणः प्रमितिजनको वेद इति न्यायोत्तादृशानामनधिकारिणां दुर्ज्ञानमात्मतत्त्वम् । अतोऽस्त्येव जरादिसत्यत्ववचनं न तावता वस्तुक्षतिरित्यर्थः । दुरवगमत्वे लिङ्गमाह—येनेति । अत्रेत्यात्मतत्त्वोक्तिः । तत्र दुर्ज्ञानत्वे लिङ्गान्तरमाह—तथेति । वैनाशिकभ्रान्तिरप्यात्मनो दुर्ज्ञानत्वं गमयतीत्याह—तथेन्द्रस्येति । सांख्यभ्रान्तिरपि दुर्ज्ञानत्वमात्मनो ज्ञापयतीत्याह-तथा सांख्या इति । तार्किकभ्रान्तिरपि तस्य दुर्ग्रहत्वे गमिकेत्याह—तथाऽन्य इति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना नवाऽऽत्मगुणाः । मीमांसकभ्रान्तिस्तस्य दुर्ग्रहत्वे गमिकेत्याह—तथाऽन्य इति । यदा परीक्षकाणामपीदृशी भ्रान्तिरात्मनो दुरवगमत्वं गमयति तदा विचारविधुराणां लौकिकानां भ्रान्तिस्तत्र प्रमाणयितव्येत्याह—किमन्य इति । अन्ये बम्भ्रमतीति किं वक्तव्यमिति संबन्धः । यदि लौकिकानां परीक्षकाणां चेदमात्मतत्त्वं दुर्ज्ञानं प्रतिज्ञायते केषां तर्हीदं सुज्ञानमित्याशङ्क्याऽऽह—यस्मादिति । एषणास्विवाऽऽत्मतत्त्वेऽपि तेषामौदासीन्यं वारयति-अनन्यशरणैरिति । तेषां कुटीचरादिभावं व्यासेधति- परमहंसेति । कर्मनिष्ठानामाश्रमानतीत्य नैष्कर्म्यप्राधान्येन वर्तमानत्वं दर्शयति—अत्याश्रमिभिरिति । अनन्यशरणैरित्युक्तं व्यनक्ति—वेदान्तेति । पूज्यतमैरिति नित्यानुवादः । तेषामात्मवेदनोपायं प्राक्तनमुपदिशति—प्राजापत्यं चेति । स्थानत्रयं तुरीयं चेत्येतद्विषयं प्रकरणचतुष्टयम् । यथोक्ताधिकारिणामेवाऽऽत्मवेदनमित्यत्र लिङ्गान्तरमाह—तथेति । अशरीरमित्यादिवाक्यव्याख्यानोपसंहारार्थमितिपदम् ॥ १ ॥

अशरीरो वायुरभ्र विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यन्ते ॥ २ ॥

---

१ ठ. 'शं संसारचक्रे ब' । २ क. ग. ट. 'पहृत' । ३ ब. ठ. 'रन्याश्र' । ४ क. ग. ट. 'न्तज्ञा' । ५ ख. ब. 'यात्पाद' । ६ क. ख. ङ. ञ. गमकमित्या' । ७ क. ब. गमकमित्या' । ८ ग. ञ. ट. चक्रादि' ।

तत्राशरीरस्य संप्रसादस्याविद्यया शरीरेणाविशेषतां सशरीरतामेव संप्रसादस्य शरीरात्समुत्थाय स्वेन रूपेण यथाऽभिनिष्पत्तिस्तथा वक्तव्येति दृष्टान्त उच्यते—अशरीरो वायुरविद्यमानं शिराःपाण्यादिमच्छरीरमस्येत्यशरीरः । किंचाभ्रं विद्युत्स्तनयित्नुरित्येतानि चाशरीराणि । तत्तत्रैवं सति वर्षादिप्रयोजनावसाने यथा । अमुष्मादिति भूमिष्ठा श्रुतिर्द्युलोकसंबन्धिनमाकाशदेशं व्यपदिशति । एतानि यथोक्तान्याकाशसमानरूपतामापन्नानि स्वेन वाय्वादिरूपेणागृह्यमाणान्याकाशाख्यतां गतानि यथा संप्रसादोऽविद्यावस्थायां शरीरात्मभावमेवापन्नः, तानि च तथाभूतान्यमुष्माद्द्युलोकसंबन्धिन आकाशदेशात्समुत्तिष्ठन्ति वर्षणादिप्रयोजनाभिनिर्वृत्तये । कथम् । शिशिरापाये सावित्रं परं ज्योतिः प्रकृष्टं ग्रैष्मकमुपसंपद्य सावित्रमभितापं प्राप्येत्यर्थः आदित्याभितापेन पृथग्भावमापादिताः सन्तः स्वेन स्वेन रूपेण पुरोवातादिवायुरूपेण स्तिमितभावं हित्वाऽभ्रमपि भूमिपर्वतहस्त्यादिरूपेण विद्युदपि स्वेन ज्योतिर्लतादिचपलरूपेण स्तनयित्नुरपि स्वेन गर्जितादिरूपेणेत्येवं प्रावृडागमे स्वेन स्वेन रूपेणाभिनिष्पद्यन्ते ॥ २ ॥

सशरीरस्य बन्धो मुक्तिरशरीरस्येति स्थिते किमर्थमशरीरो वायुरित्यादिवाक्यमित्याशङ्क्याऽऽह—तत्रेत्यादिना । कथं वायोरशरीरत्वं तदाह—अविद्यमानमिति । एवं सति वाय्वादीनामशरीरत्वे सतीति यावत् । आकाशस्य सर्वत्रैकरूपत्वादमुष्मादिति कुतो व्यपदेशसिद्धिरित्याशङ्क्याऽऽह—अमुष्मादितीति । यथोक्तान्यशरीराणि वाय्वादीनि तेषामाकाशत्वापत्तौ दृष्टान्तमाह—यथेति । तथा वाय्वादीनि स्वेन रूपेणागृह्यमाणत्वदशायामाकाशाख्यतां गतानीति संबन्धः । तानि च वाय्वादीनि तथाभूतान्याकाशात्मत्वं प्राप्तानीत्येतत् । वर्षादिफलनिष्पत्त्यर्थं वाय्वादीनामाकाशदेशात्समुत्थानमुक्तमाकाङ्क्षाद्वारेण स्फुटयति—कथमित्यादिना । स्वेन स्वेन रूपेणाभिनिष्पद्यन्त इति संबन्धः । तत्र वायोरभ्रस्य विद्युतः स्तनयित्नोश्च स्वेन रूपेणाभिनिष्पत्तिप्रकारं विवृणोति—पुरोवातादीति । स्तिमितभावं हित्वा वायुरिति शेषः ॥ २ ॥

एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योति

---

१ ट. ड. वर्षादि° । २ क. °दिना वा° । ३ क. घ. ठ. °पि प° । ४ ग. घ. ङ. च. ट. ठ. ड. °ताच° । ५ ग. ट. °तादिनेति ।

रुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनꣳ स्मरन्निदꣳ शरीरꣳ स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः ॥ ३ ॥

यथाऽयं दृष्टान्तो वाय्वादीनामाकाशादिसाम्यगमनवदविद्यया संसारावस्थायां शरीरसाम्यमापन्नोऽहममुष्य पुत्रो जातो जीर्णो मरिष्य इत्येवंप्रकारं प्रजापतिनेव मघवान्यथोक्तेन क्रमेण नासि त्वं देहेन्द्रियादिधर्मा तत्त्वमसीति प्रतिबोधितः सन्स एष संप्रसादो जीवोऽस्माच्छरीरादाकाशादिव वाय्वादयः समुत्थाय देहादिवैलक्षण्यपरात्मनो रूपमवगम्य देहात्मभावनां हित्वेत्येतत्। स्वेन रूपेण सदात्मनैवाभिनिष्पद्यत इति व्याख्यातं पुरस्तात्।

दृष्टान्तमनूद्य दार्ष्टान्तिकमाह —यथेति। वाय्वादीनामित्यस्य पुरस्तात्तथेत्यध्याहर्तव्यम्। तत्राऽऽदिशब्देनाभ्रविद्युत्स्तनयित्नवो गृह्यन्ते। आकाशादीत्यादिपदमभ्रादिकारणसंग्रहार्थम्। शरीरसाम्यमेव विशिनष्टि—अहमिति। प्रतिबोधने दृष्टान्तमाह—प्रजापतिनेति। यथोक्तेन क्रमेण पर्यायचतुष्टयोपदिष्टप्रकारेणेति यावत्। मघवान्प्रतिबोधित इति संबन्धः। दार्ष्टान्तिके प्रतिबोधनप्रकारं दर्शयति—नासीति। शरीराद्विदुषः समुत्थाने दृष्टान्तमाह—आकाशादिवेति। समुत्थानं विवृणोति—देहादीति। पुनरुक्तिं परिहरति—इति व्याख्यातमिति।

स येन स्वेन रूपेण संप्रसादोऽभिनिष्पद्यते प्राक्प्रतिबोधात्तद्भ्रान्तिनिमित्तात्सर्पो भवति यथा रज्जुः पश्चात्कृतप्रकाशा रज्ज्वात्मना स्वेन रूपेणाभिनिष्पद्यते। एवं च स उत्तमः[1]पुरुष उत्तमश्चासौ पुरुषश्चेत्युत्तमः[2]पुरुषः स एवोत्तमः[3]पुरुषोऽक्षिस्वप्नपुरुषौ व्यक्ताव्यक्तौ[4] सुषुप्तः समस्तः संप्रसन्नोऽशरीरश्च स्वेन रूपेणेति। एषोऽयमेष स्वेन रूपेणावस्थितः क्षराक्षरौ व्याकृताव्याकृतावपेक्ष्योत्तमः[5]पुरुषः कृतनिर्वचनो ह्ययं गीतासु स संप्रसादः स्वेन

---

१ क. °त्तमः पूरु°। त. °त्तमपु°। घ. ङ. ज. ञ. °त्तमः पु°। २ क. ग. ङ ड. ढ. °यां स श°। ३ ख. ञ. ण. °वं प्रजा°। ४ ख. ग. घ. च. ञ. ट. ड. °तिनैव। ५ क. ग. घ. ङ. च. ट. ठ. ड. ढ. °ते। अत ए°। ६ क. °मपुरु°। ७ क. °सौ पुरु°। ८ क. °मपूरु°। ९ ठ. °रुषउत्तमः पुरुषाद्वोत्त°। १० क. °मपुरु°। ११ क. ञ. ढ. °क्ताव्य°। १२ क. ग. ट. °मेव स्वे°। १३ ट. °। व्यक्ताव्यक्तौ व्या°। १४ क. ढ. °मपुरु°।

रूपेण तत्र स्वात्मनि स्वस्थतया सर्वात्मभूतः पर्येति क्वचिदिन्द्राद्यात्मना जक्षद्भक्षयन्वा मक्ष्यन्नुच्चावचानीप्सितान्क्वचिन्मनोमात्रैः संकल्पादेव समुत्थितैर्ब्रह्मलौकिकैर्वा क्रीडन्रुरुयादिभी रममाणश्च मनसैव नोपजनं स्त्रीपुंसयोरन्योन्योपगमेन जायत इत्युपजननमात्मभावेन वाऽऽत्मसामीप्येन जायत इत्युपजननमिदं शरीरं तन्न स्मरन् । तत्स्मरणे हि दुःखमेव स्यात् । दुःखात्मकत्वात्तस्य ।

उत्तरवाक्यस्थं सशब्दं व्याचष्टे—स येनेति । स उत्तमपुरुष इति संबन्धः । संप्रसादस्य स्वेन रूपेणाभिनिष्पत्तिं दृष्टान्तेन स्पष्टयति—प्राणित्यादिना । उक्तदृष्टान्तानुसारेणाविद्यादशायां शरीरात्मत्वमापन्नो जीवो विद्यया प्रकाशितब्रह्मसतत्त्वः स्वेन रूपेणाभिनिष्पन्नो भवतीति दार्ष्टान्तिकमाह—एवं चेति । पुरुषस्योत्तमत्वविशेषणं पुरुषान्तरव्यवच्छेदार्थमित्यभिप्रेत्य पुरुषभेदं दर्शयति—अक्षीति । इति चत्वारः पुरुषा इति शेषः । तत्र पूर्वेषां त्रयाणां व्यवच्छेद्यत्वं तुरीयस्य तूत्तमपुरुषत्वमित्याह—एषामिति । यथोक्तोत्तमपुरुषे भगवत्संमतिं संगिरते—द्वाविति ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

इति हि स भगवानूचिवान् । स तत्रेत्यादि व्याचष्टे—स संप्रसाद इति । क्वचिदिति स्वर्गलोकोक्तिः । क्वचिन्मनोमात्रैरित्यत्र क्वचिदिति ब्रह्मलोको गृह्यते । नोपजनमिति प्रतीकं गृहीत्वा व्याकरोति—स्त्रीपुंसयोरिति । तन्न स्मरन्पर्येतीति संबन्धः । यथोक्तदेहस्मृतौ काऽनुपपत्तिरित्याशङ्क्याऽऽह—तत्स्मरणे हीति ।

नन्वनुभूतं चेन्न स्मरेत्सर्वज्ञत्वं मुक्तस्य । नैष दोषः । येन मिथ्याज्ञानादिना जानितं तच्च मिथ्याज्ञानादि विद्ययोच्छेदितमतस्तन्नानुभूतमेवेति न तदस्मरणे सर्वज्ञत्वहानिः । न ह्युन्मत्तेन ग्रहगृहीतेन वा यदनुभूतं तदुन्मादाद्यपगमेऽपि स्मर्तव्यं स्यात्तथेहापि संसारिभिरविद्यादोषवद्भिर्यदनुभूयते

---

१ ठ. ङ. ण °या सर्वात्मतया स° । २ ग. घ. ङ. च. ट. ठ. ड. ण. °मात्रेण सं° । ३ क. ट °न स्मरन्नो° । ४ क. °मत्वि° । ५ क. ख. ञ. क्षरोति । ६ ख. छ. ञ. ण. °ति स । ७ ण. मात्रेणेत्य° । ८ ङ. ग. ञ. ढ. तन्मिथ्या° ।

तत्सर्वात्मानमशरीरं न स्पृशति । अविद्यानिमित्ताभावात् । ये तू च्छिन्नदोषै-र्मृदितकषायैर्मानसाः सत्याः कामा अनृतापिधाना अनुभूयन्ते विद्याभिव्य-क्त्यत्वात्त एव मुक्तेन सर्वात्मभूतेन संबध्यन्त इत्यात्मज्ञानस्तुतये निर्दि-श्यन्तेऽतः साध्वेतद्विशिनष्टि—य एते ब्रह्मलोक इति । यत्र क्वचन भव-न्तोऽपि ब्रह्मण्येव हि ते लोके भवन्तीति सर्वात्मत्वाद्ब्रह्मण उच्यन्ते ।

विदुषो मुक्तस्यानुभूतदेहःस्मरणे दूषणमाशङ्कते—नन्विति । असर्वज्ञत्वदोषं निरा-करोति—नैष दोष इति । अनुभूतार्थस्मृतौ हि सर्वज्ञ इति । न च शरीराद्यनुभूतं तस्याविद्याकामकर्ममूलस्याज्ञानमात्रत्वात्तस्य च सकार्यस्य ज्ञानोदयमात्रेण नष्टत्वात्मा-गपि शरीरादेरनुभवविपरीतवर्तित्वानुपपत्तेरित्यर्थः । शरीरादि पूर्वं सम्यग्ज्ञानेनाविषयी-कृतमपि रुक्मान्त्याऽनुभूतमेवेति विदुषामपि स्मर्तव्यमिति चेन्नेत्याह—न हीति । मुक्ते पुरुषे शरीरादयो न संबध्यन्ते चेत्कथं तर्हि तत्र कामाः संबध्येरन्नित्याशङ्क्याऽऽ-ह—ये त्विति । किमिति सर्वेऽते कामा नानुभूयेरन्नित्याशङ्क्याऽऽह—अनृतापिधाना इति । इतश्च विदुषामेव तदभिव्यक्तिरित्याह—विद्येति । किमिति निर्गुणविद्याप्रक-रणे विदुषि सत्यकामसंबन्धवचनं तत्राऽऽह—इत्यात्मज्ञानेति । आत्मविद्यास्तुत्यर्थं विदुषि कामसंबन्धवचनम् । मनसैतान्कामान्पश्यन्नित्यत्र विशेषश्रवणमपि युक्तमि-त्याह—अत इति । इन्द्रियादिषु सतां कामानां कुतो ब्रह्मलोकभावित्वमित्याश-ङ्क्याऽऽह—यत्रेति ।

ननु कथमेकः सन्नानि यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा कामांश्च ब्राह्मलौकिकान्पश्यन्रमत इति च विरुद्धम् । यथैको यस्मिन्नेव क्षणे पश्यति स तस्मिन्नेव क्षणे न पश्यति चेति । नैष दोषः । श्रुत्यन्तरे परि-हृतत्वात् । द्रष्टुर्दृष्टेरविपरिलोपात्पश्यन्नेव भवति । द्रष्टुरन्यत्वेन कामानाम-भावान्न पश्यति चेति । यद्यपि सुषुप्ते तदुक्तं मुक्तस्यापि सर्वैकत्वात्समानो द्वितीयाभावः । केन कं पश्येदिति चोक्तमेव ।

मनसैतान्कामानित्यादिवाक्यं स्तुत्यर्थमपि प्रधानवाक्यविरुद्धत्वात्त्याज्यमिति शङ्क-ते—नन्विति । वाक्ययोर्मिथो विरोधे दृष्टान्तमाह—यथेति । यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीय-मस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति बृहदारण्यकश्रुतिमाश्रित्य विरोधं धुनीते—नैष दोष इति । अथ यथोक्तं वाक्यं सुषुप्तमधिकृत्य प्रवृत्तं कथं मुक्तविषयतयोदा-

१ ख. ग. घ. च. ज. ट. ठ. ढ. ण. ये तु छिन्न° । २ घ. ठ. ड. उच्यते । ३ ग. ट. °मेम लत्या° । ४ ग. ट. °ण ध्वस्तत्वा° । ५ ग. °परित° । ६ ख. छ. झ. ण. °कृतं स° । ७ ख. ग. घ. ङ. च. ज. ट. ठ. ण. °नासीति । ८ ग. ङ. च. ड. ढ. °ति भूम्नः का° । ९ घ. ड. °ति वि°

हृतमत आह—यद्यपीति । सुप्तस्य मोक्षदृष्टान्तत्वात्तद्वतस्य च दार्ष्टान्तिकेऽनुगमाद्यदुक्तं सुषुप्ते तत्संबन्धो मुक्ते सिध्यतीत्यर्थः । किंच मुक्तमेवाधिकृत्य यत्र त्वस्य सर्वमात्मैवाभूदित्यादि तत्रैवोक्तमित्याह—कथेति ।

अशरीरस्वरूपोऽपहतपाप्मादिलक्षणः सन्कथमेष पुरुषोऽक्षिणि दृश्यत इत्युक्तः प्रजापतिना । तत्र तथाऽसावक्षिणि साक्षाद्दृश्यते तद्वक्तव्यमितीदमारभ्यते । तत्र को हेतुरक्षिणि दर्शन इत्याह—स दृष्टान्तो यथा प्रयोग्यः प्रयोग्यपरो वा सशब्दः । प्रयुज्यत इति प्रयोग्योऽश्वो बलीवर्दो वा । यथा लोक आचरत्यनेनेत्याचरणो रथोऽनो वा तस्मिन्नाचरणे युक्तस्तदाकर्षणाय, एवमस्मिञ्छरीरे रथस्थानीये प्राणः पञ्चवृत्तिरिन्द्रियमनोबुद्धिसंयुक्तः प्रज्ञात्मा विज्ञानक्रियाशक्तिद्वयसंमूर्च्छितात्मा युक्तः स्वकर्मफलोपभोगनिमित्तं नियुक्तः । कस्मिन्नहम्[त्क्रान्त उ]त्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति । ईश्वरेण राज्ञेव सर्वाधिकारी दर्शनश्रवणचेष्टाव्यापारेऽधिकृतः । तस्यैव तु मात्रैकदेशश्चक्षुरिन्द्रियं रूपोपलब्धिद्वारभूतम् ॥ ३ ॥

फलार्थवादस्याक्षिवाक्यस्य च मिथो विरोधं शङ्कते—अशरीरेति । दृश्यत इत्यस्य पदस्य चाक्षुषदर्शने रूढत्वादशरीरस्य तद्योग्यत्वादशरीरात्मोक्तिर्दृश्यत इतिश्रुतिर्विरुद्धेत्यर्थः । आत्मत्वामृतत्वादिब्रह्मविषयानेकश्रुतिलिङ्गविरोधाद्दृश्यत इत्येकस्याः श्रुतेर्ज्ञानमात्रविषयनिरोधोऽस्तीत्यभिप्रेत्यानन्तरवाक्यमुत्थापयति—तत्रेति । चाक्षुषदर्शनाविषयत्वे सति चक्षुषो दर्शने को हेतुरित्यपेक्षायां लिङ्गहेतुकं तावद्दर्शनं संभवतीति मत्वा दृष्टान्तमाह श्रुतिः । स दृष्टान्तो यथा भवति तथोच्यत इत्याह—तत्रेति । तमेव दृष्टान्तमनूद्य व्याचष्टे—यथेत्यादिना । अध्याहाररहित्यासिद्ध्यर्थं पक्षान्तरमाह—प्रयोग्येति । एवमित्यनेन द्वितीयो यथाशब्दः संबध्यते । शरीरस्य रथस्थानीयत्वं शरीरं रथमेव त्विति श्रुत्यन्तरान्नेतव्यम् । अस्मिन्युक्तः स रथस्थानीय ईश्वरेण स्वकर्मफलोपभोगनिमित्तं प्राणो रथित्वेन नियुक्त इति संबन्धः । प्राणप्राणं व्यावर्तयति—पञ्चवृत्तिरिति । " बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इन्द्रियाणि हयानाहुः " इतिश्रुत्यन्तरमाश्रित्याऽऽह—इन्द्रियेति । आत्मानं रथिनं विद्धीतिश्रुतिविरुद्धं प्राणस्य रथित्वमित्याशङ्क्य तस्योपाधिर्यस्तद्भेदाङ्गीकारान्नैवमित्याह—यज्ञात्मेति ।

---

१ क. सुप्त° । २ क. घ. ङ. च. ञ. ङ. ढ. स कर्म° । ३ क. ख. छ. ञ. ण. 'षयावान्तर° विरो° । ४ क. °न्तरं वा° । ५ क. ख. ञ. °म् । तस्मिन्युक्तशरीर इ° । ६ ख. ङ. ञ. ट. ण. °ति वि° । ७ क. ख. ञ. ण. तस्य तदुपा° ।

तस्याश्चात्मसंतानेशरीरद्वयविशिष्टत्वेन स्फुरितं स्वरूपं दर्शयति—विज्ञानेति । ईश्वरस्य यथोक्तप्राणोपाधिद्वारा भोक्तृत्वादिसंसारित्वमित्यत्र श्रुत्यन्तरं प्रमाणयति—कस्मिन्निति । प्रतिष्ठास्यामीतीक्षित्वा स प्राणमसृजतेत्यादिश्रुतिरिति शेषः । तथा च यथा राज्ञा सर्वाधिकारित्वेन सेनाध्यक्षः संधिविग्रहादौ नियुज्यते तथेश्वरेण सर्वचेष्टान्तर्याम्यधिकृतः स्वकीयदर्शनादिव्यापारनिमित्तं नियुक्तो भवतीत्याह—राज्ञेति । प्राणः स्वविज्ञप्तेन चेतनेन नियुज्यते प्रयोज्यत्वादश्वादिवदित्यनुमानं देहसंहतात्प्राणादतिरिक्तोऽसंहतश्चेतनः सिध्यतीति समुदायार्थः । चक्षुरादिचेष्टा चेतननिमित्ता चेष्टात्वाद्रथादिचेष्टावदित्यनुमानान्तरं सूचयति—तस्यैवेति । प्रकृतप्राणविषयस्तच्छब्दः । मात्रेत्येतस्य व्याख्यानमेकदेश इति । प्राणपंवादे चक्षुरादीनां प्राणपरतन्त्रप्रतीतेस्तदेकदेशत्वं तेषामिति द्रष्टव्यम् ॥ ३ ॥

अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माऽभिव्याहाराय वागथ यो वेदेदꣳ शृ॒ण्वा॒नीति स आत्मा श्रवणाय श्रोत्रम् ॥ ४ ॥

अथ यत्र कृष्णतारोपलक्षितमाकाशं देहच्छिद्रमनुविषण्णमनुषक्तमनुगतं तत्र स प्रकृतोऽशरीर आत्मा चाक्षुषश्चक्षुषि भव इति चाक्षुषस्तस्य दर्शनाय रूपोपलब्धये चक्षुः करणं यस्य तद्देहादिभिः संहतत्वात्परस्य द्रष्टुरर्थे योऽत्र चक्षुषि दर्शनेन लिङ्गेन दृश्यते परोऽशरीरोऽसंहतः । अक्षिणि दृश्यत इति मन्त्रपातिनोक्तं सर्वेन्द्रियद्वारोपलक्षणार्थम् । सर्वविषयोपलब्धा हि स एवेति । स्फुटोपलब्धिहेतुत्वाच्चक्षुषीति विशेषवचनं सर्वश्रुतिषु । अहमदर्शमिति तत्सत्यं भवतीति च श्रुतेः । अथापि योऽस्मिन्देहे वेद कथमिदं सुगन्धि दुर्गन्धि वा जिघ्राणीत्यस्य गन्धं विजानीयमिति स आत्मा तस्य गन्धाय गन्धविज्ञानाय घ्राणम् । अथ यो वेदेदं वचनमभिव्याहराणीति वक्ष्यामीति

---

१ क. ख. छ. ञ. ण. °नद्वं° । २ ग ठ. 'कारी से° । ३ क. ग. घ. ङ. झ. ञ. ट. ठ. त. थ. शृण्वानी° । ४ ढ. ण. °नुविष्ट । ५ क. ग. ट. ठ. °त्मा चक्षुषि भवतीति वा° । घ. च. ङ. ढ. °त्मा चक्षुषि भवति वा° । ६ क. ख. ग. ङ. च. ञ. ट. ड. ण. °र्थं सो° । ठ. °र्थः सो° । ७ ख. त्र. ढ ण. °त्वाच्चाक्षि° । ठ. °त्वादक्षि° । ८ ख. ञ. ठ. °ति श्रु° । ९ घ. ङ. ड. श्रुतिः ।

स आत्माऽभिव्यवहरणक्रियासिद्धये करणं वागिन्द्रियम् । अथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥ ४ ॥

शरीरादव्यतिरिक्तमात्मानं संभाव्य तस्यौपाधिकं द्रष्टृत्वमाचष्टे—अथेति । अतिरिक्तात्मसंभावनानन्तर्यमथशब्दार्थः । यत्र तत्रेतिसप्तम्यां संसारदशोच्यते । अनुगतं चक्षुरिति संबन्धः । दर्शनाय चक्षुरित्यस्यार्थं समर्थयते—यस्येति । यस्य परस्य द्रष्टुरर्थे करणं चक्षुरिष्टं स परश्चक्षुषि लिङ्गेन दृश्यत इति संबन्धः । पारार्थ्ये चक्षुषो हेतुमाह— देहादिभिरिति । यत्संहतं तत्स्वविलक्षणशेषं दृष्टं यथा शयनासनादि तथा तदपि चक्षुर्देहादिभिः संहतत्वाद्यस्य विलक्षणस्य शेषभूतं सोऽत्र दर्शनेन लिङ्गेन दृश्यते । विमतं साश्रयं धर्मत्वाद्रूपादिवदित्यनुमानादित्यर्थः । दृश्यत इत्यस्याविरुद्धार्थमुक्त्वाऽक्षिणीत्यस्य विवक्षितमर्थमाह—अक्षिणीति । यथाऽक्षिद्वारा रूपोपलब्ध्वा परस्तथा तत्तदिन्द्रियद्वारा तत्तद्विषयोपलब्धा पर एवेति कृत्वा युक्तमिदमुपलक्षणमिति साधयति—सर्वविषयेति । सर्वेन्द्रियैरुपलब्धृत्वमविशिष्टं चेत्कथं तर्हि सर्वास्वपि श्रुतिषु चक्षुष्येवास्योपदिश्यते तत्राऽऽह—स्फुटेति । चक्षुषः स्फुटोपलब्धौ हेतुत्वे श्रुतिं संवादयति—अहमिति । यत्रादर्शमिति चक्षुषः प्रत्ययस्तद्वस्तु सत्यं स्फुटोपलम्भादिति द्वयोर्विद्यमानयोर्दृष्टमित्यर्थः । य एषोऽक्षिणीत्यत्र सर्वेन्द्रियद्वारोपलब्धा विवक्षित इत्युक्तं व्यक्तीकरोति—अथापीति । चक्षुषि स्फुटोपलम्भेऽपीति यावत् । योऽस्मिन्देहे येन केनापीन्द्रियेण यं कंचिद्विषयं वेद स आत्मेति संबन्धः । उक्तमेवार्थमाकाङ्क्षाद्वारा स्फोरयति—कथमित्यादिना । जिघ्रणीति यो वेदेत्युक्तमेव संक्षिपति—अस्येति ॥ ४ ॥

अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके ॥ ५ ॥

अथ यो वेदेदं मन्वानीति मननव्यापारमिन्द्रियासंस्पृष्टं केवलं मन्वानीति वेद स आत्मा मनसाय मनः । यो वेद स आत्मेत्येवं सर्वत्र प्रयोगाद्वेदनमस्य स्वरूपमित्यवगम्यते । यथा यः पुरस्तात्प्रकाशयति स आदित्यो यो दक्षिणतो यः पश्चाद्य उत्तरतो य ऊर्ध्वं प्रकाशयति स आदित्य इत्युक्ते

---

१ क. ट. ठ. ड. ण. शृण्वानी' । २ क ख. छ. झ. ण. 'र्थक' । ३ क. ख. छ. ण. स यश्च' । ४ क ख. छ. ण. 'क्षुषा लि' । ५ ख. झ. घ. 'ष्येवोपास्यो' । ६ ट. 'वाऽऽत्मोप' । ७ क. ग. ट. ड. 'संप्रयुक्तं के' । घ. च. ठ. ण. 'संपृक्तं के' । ङ ढ. 'संयुक्तं के' । ८ क ग घ. ङ. च. ठ ङ. ढ. 'त्मा । यो ।

प्रकाशस्वरूपः स इति गम्यते। दर्शनादिक्रियानिर्वृत्त्यर्थानि तु चक्षुरादिकरणानि। इदं चास्याऽऽत्मनः सामर्थ्यादवगम्यते। आत्मनः सत्तामात्र एव ज्ञानकर्तृत्वं न तु व्यापृततया। यथा सवितुः सत्तामात्र एव प्रकाशनकर्तृत्वं न तु व्यापृततयेति तद्वत्। मनोऽस्याऽऽत्मनो दैवमप्राकृतमितरेन्द्रियैरसाधारणं चक्षुश्चष्टे पश्यत्यनेनेति चक्षुः। वर्तमानकालविषयाणि चेन्द्रियाण्यतोऽदैवानि तानि। मनस्तु त्रिकालविषयोपलब्धिकरणं मृदितदोषं च सूक्ष्मव्यवहितादिसर्वोपलब्धिकरणं चेति दैवं चक्षुरुच्यते। स वै मुक्तः स्वरूपापन्नोऽविद्याकृतदेहेन्द्रियमनोवियुक्तः सर्वात्मभावमापन्नः सन्नेष व्योमवद्विशुद्धः सर्वेश्वरो मनउपाधिः सन्नेतेनैवेश्वरेण मनसैतान्कामान्सवितृप्रकाशवन्नित्यप्रततेन दर्शनेन पश्यन्रमते। कान्कामानिति विशिनष्टि—य एते ब्रह्मणि लोके हिरण्मयीधिवद्ब्राह्मविषयासङ्गानृतेनापिहिताः संकल्पमात्रलभ्यास्तानित्यर्थः॥ ५॥

इद्रियैर्घ्राणादिभिरसंस्पृष्टं तत्तद्द्वारेणानिष्पन्नमिति यावत्। केवलं मनोमात्रजनितमित्येतन्मन्वानि संपादयानीत्यर्थः। यो वेदेत्यत्र प्रत्ययार्थभूतं कर्तृत्वं सापेक्षत्वान्मिथ्या प्रकृत्यर्थ(र्थ)रूपं तु संविन्मात्रमनपेक्षतया सत्यमात्मस्वरूपमित्याह—यो वेदेति। आत्मा संवेदनस्वभावश्चेत्तत्संसर्गादेव विषयसिद्धिसंभवाच्चक्षुरादिवैयर्थ्यादित्याशङ्क्याऽऽह—दर्शनादीति। अन्तःकरणवृत्तिर्दर्शनादिक्रिया। सा चाऽऽत्मनः संविदेकरसस्यासङ्गोदासीनस्य विषयसंसर्गभ्रमहेतुस्तन्निष्पत्त्यर्थानि चक्षुरादीनि भवन्ति सार्थकानीत्यर्थः। तेषामुक्तरीत्या सार्थकत्वे गमकमाह—इदं चेति। करणानामुक्तं सार्थकत्वं प्रकृतस्य संविन्मात्रस्याङ्गत्वादेव स्वतो विषयसंबन्धानुपपत्त्या तत्संबन्धभ्रान्तिकारणान्तः करणवृत्तिविशेषापेक्षया निर्धारितमित्यर्थः। आत्मनः संविन्मात्रस्वभावत्वे कथं कर्तृत्वव्यपदेश इत्याशङ्क्याऽऽह—आत्मन इति। य एषोऽक्षिणीत्यादि वाक्यं प्रपञ्चितं संप्रति स तत्रेत्यादि फलवाक्यं प्रपञ्चयितुमिन्द्रियान्तरेभ्यो मनसो वैलक्षण्यं दर्शयति—मनोऽस्येति। तस्य चक्षुष्ट्वेऽपि कुतो दैवत्वमित्याशङ्क्याऽऽह—वर्तमानेति। आगन्तुकदोषराहित्यं मृदितदोषत्वम्। सर्वेश्वरो व्यज्यते यस्मिन्विशुद्धे मनसि तन्मनः सर्वेश्वरं तदुपाधिरस्येति तथोक्तः। ईश्वरेण तदभिव्यञ्जकेनेत्येतत्। अविद्यादिप्रतिबन्धकस्याभावान्मनसा नित्यं प्रततं दर्शनं नित्याभिव्यक्तस्वरूपं चैतन्यं तेन पश्यन्निति योजना॥ ५॥

तं वा एतं देवा आत्मानमुपासते तस्मात्तेषां२

---

१ ख. ग. घ ङ. च. ञ. ट. ड. ढ. °ति। च°। २ घ. च. ट. °याण्येवेन्द्रि°। ३ ग. ट. °संपृक्तं त°। ४ ख. ग. छ. ञ. ट. ण. °र्थः। वे°। ५ ख. ञ. ण. °नः सच्चिदे°। ६ ग. °स्यासंयोगोदा°। ७ ग. छ. °सीने वि°। ८ खं. ञ. °र्थानि। ९ क. ग. ट. °तव्य°।

सर्वे च लोका आप्ताः सर्वे च कामाः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥ ६ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

यस्मादेष इन्द्राय प्रजापतिनोक्त आत्मा तस्मात्ततः श्रुत्वा तमात्मानमेवत्वेऽपि देवा उपासते । तदुपासनाच्च तेषां सर्वे च लोका आप्ताः सर्वे च कामाः । यदर्थं हीन्द्र एकशतं वर्षाणि प्रजापतौ ब्रह्मचर्यमुवास तत्फलं प्राप्तं देवैरित्यभिप्रायः । तद्युक्तं देवानां महाभाग्यत्वान्न त्विदानीं मनुष्याणामल्पजीवितत्वान्मन्दतरप्रज्ञत्वाच्च संभवतीति प्राप्ते इदमुच्यते—स सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिदानींतनोऽपि । कोऽसौ । इन्द्रादिवद्यस्तमात्मानमनुविद्य विजानातीति ह सामान्येन किल प्रजापतिरुवाच । अतः सर्वेषामात्मज्ञानं तत्फलप्राप्तिश्च तुल्यैव भवतीत्यर्थः । द्विर्वचनं प्रकरणसमाप्त्यर्थम् ॥ ६ ॥

इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥

तं वा एतमित्यादि व्याचष्टे—यस्मादिति । पदार्थमुक्त्वा वाक्यार्थमाह—यदर्थं हीति । स सर्वांश्चेत्यादिवाक्यमाशङ्क्योत्तरत्वेनोत्थाप्य व्याचष्टे—तद्युक्तमित्यादिना । यथोक्तं फलं तच्छब्दार्थः । प्रकरणं निर्विशेषब्रह्मात्मैकत्वज्ञानविषयम् ॥ ६ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य द्वादशः खण्डः ॥ १२ ॥



(अथाष्टमाध्यायस्य त्रयोदशः खण्डः) ।

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीत्यभिसंभवामीति ॥ १ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

---

१ ख. ञ. ण. °मद्यापि । २ ख. ङ. न. °भाग्यान्न । ठ. °भाग्यानां नत्वि° । ३ क. °मत्यल्प° ।

श्यामाच्छबलं प्रपद्य इत्यादिमन्त्राम्नायः पावनो जपार्थश्च ध्यानार्थो वा। श्यामो गम्भीरो वर्णः श्याम इव श्यामो हार्दं ब्रह्मात्यन्तदुरवगाह्यत्वात्तद्धार्दं ब्रह्म ज्ञात्वा ध्यानेन तस्माच्छ्यामाच्छबलं शबल इव शबलोऽरण्यानेककामभिश्चित्वाद्ब्रह्मलोकस्य शाबल्यं तं ब्रह्मलोकं शबलं प्रपद्ये मनसा शरीरपाताद्ऊर्ध्वं गच्छेयम्। यस्मादहं शबलाद्ब्रह्मलोकान्नामरूपव्याकरणाय श्यामं प्रपद्ये हार्दभावं प्रपन्नोऽस्मीत्यभिप्रायः। अतस्तमेव प्रकृतिस्वरूपमात्मानं शबलं प्रपद्य इत्यर्थः। कथं शबलं ब्रह्मलोकं प्रपद्य इत्युच्यते—अश्व इव स्वानि लोमानि विधूय कम्पनेन श्रमं पाप्मादि च रोमतोऽपनीय यथा निर्मलो भवत्येवं हार्दब्रह्मज्ञानेन विधूय पापं धर्माधर्मरूपं चन्द्र इव च राहुग्रस्तस्तस्मादाहोर्मुखात्प्रमुच्य भास्वरो भवति यथैवं धूत्वा त्यक्त्वा शरीरं सर्वानर्थाश्रयमिहैव ध्यानेन कृतात्मा कृतकृत्यः सन्नकृतं नित्यं ब्रह्मलोकमभिसंभवामीति। द्विर्वचनं मन्त्रसमाप्त्यर्थम् ॥ १ ॥

इति छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

—:⊙-⊙-⊙-⊙:—

दहरप्रकरणं विद्याप्रकरण उपास्यस्तुत्यर्थं प्रसङ्गादुक्तं तत्प्रकरणपरिसमाप्त्यर्थं प्रकृताया दहरविद्यायाः शेषभूतं जपविधानार्थमारभते—श्यामादिति। अत्यन्तदुरवगाह्यत्वाद्बुद्ध्यानहीनानामिति शेषः। कथं जीवतो ब्रह्मलोकप्राप्तिरित्याशङ्क्याऽऽह—मनसेति। न तर्हि मुख्या तत्प्राप्तिरित्याशङ्क्याऽऽह—शरीरेति। विपरीतपाठं हेतुत्वेनेति व्याचष्टे—यस्मादिति। हेतुः प्रतिज्ञया योज्यते—अत इति। दृष्टान्तमाकाङ्क्षापूर्वकमवतार्य व्याचष्टे—कथमित्यादिना। शरीरस्य त्याज्यत्वे हेतुमाह—सर्वानर्थेति। इतिशब्दो ध्यानसमाप्त्यर्थो दहरोऽस्मिन्नन्तराकाश इति ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य त्रयोदशः खण्डः ॥ १३ ॥

(अथाष्टमाध्यायस्य चतुर्दशः खण्डः)

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतꣳ स आत्मा प्रजापतेः सभां वेश्म

---

१ ख. घ. ञ. ड. ढ. ण. °श्चाऽऽख्या°। २ ठ. ण. जित्वा। ३ क. हार्दं ब्रह्मभा°। घ. च. हार्दं भा°। ४ क. ण. पाप्मादि। ५ क. ग. घ. ङ. च. ञ. ट. ड. ढ. °वतीत्ये। ६ ट. °ह्याजपेम। ७ ग. ङ. ट. ठ. ड. ढ. °व रा। ८ ठ. °स्वरंतरो। ९ ड. °ति तथै°। १० क. ट. °न्त्रपरिस°। ११ ग. ट. °रवि°। १२ ग. ट. तत्परि°। १३ क. ग. छ. ट. ण. °खन्तं दु°। १४ क. °त्वाज्ञान°। १५ ग. ट. °यातुर्ध्यान°।

प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्येतमदत्कमदत्कꣳ श्येतं लिन्दु माऽभिगां लिन्दु माऽभिगाम् ॥ १ ॥

इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

आकाशो वा इत्यादि ब्रह्मणो लक्षणनिर्देशार्थमाध्यानाय । आकाशो वै नाम श्रुतिषु प्रसिद्ध आत्मा । आकाश इवाशरीरत्वात्सूक्ष्मत्वाच्च । स चाऽऽकाशो नामरूपयोः स्वात्मस्थयोर्जगद्बीजभूतयोः सलिलस्येव फेनस्थानीययोर्निर्वहिता निर्वोढा व्याकर्ता । ते नामरूपे यदन्तरा यस्य ब्रह्मणोऽन्तरा मध्ये वर्तेते, तयोर्वा नामरूपयोरन्तरा मध्ये यन्नामरूपाभ्यामस्पृष्टं यदित्येतत्तद्ब्रह्म नामरूपविलक्षणं नामरूपाभ्यामस्पृष्टं तथाऽपि तयोर्निर्वोढृत्वलक्षणं ब्रह्मेत्यर्थः । इदमेवं मैत्रेयीब्राह्मणेनोक्तं चिन्मात्रानुगमात्सर्वत्र चित्स्वरूपतैवेति गम्यत एकवाक्यतां । कथं तदवगम्यत इत्याह—स आत्मा हि नाम सर्वेषामात्मा जन्तूनां प्रत्यक्चेतनः स्वसंवेद्यः प्रसिद्धस्तेनैव स्वरूपेणोक्तोऽशरीरो व्योमवत्सर्वगत आत्मा ब्रह्मेत्यवगन्तव्यम् । तच्चाऽऽत्मा ब्रह्मामृतममरणधर्मा । अत ऊर्ध्वं मन्त्रः । प्रजापतिश्चतुर्मुखस्तस्य सभां वेश्म प्रभुविहितं वेश्म प्रपद्ये गच्छेयम् । किंच यशोऽहं यशो नामाऽऽत्माऽहं भवामि ब्राह्मणानाम् । ब्राह्मणा एव हि विशेषतस्तमुपासते ततस्तेषां यशो भवामि । तथा राज्ञां विशां च । तेऽप्यधिकृता एवेति तेषामप्यात्मा भवामि । तद्यशोऽहमनुप्रापत्स्यनुप्राप्तुमिच्छामि । स हाहं यशसामात्मनां देहेन्द्रियमनोबुद्धिलक्षणानामात्मा । किमर्थमहमेवं प्रपद्य इति, उच्यते—श्येतं वर्णतः पक्वबदरसमं रोहितम् । तथाऽदत्कं

---

१ क. °शः श्वेत° । २ क. °त्कꣳ श्वेतं । ३ ख. ग. ञ. ट. ड. ढ. °जयोः । ४ क. ग. घ. ङ° ब. ट. ठ. ड. ढ. ण. °नस्था° । ५ क. °दि तद्ब्र° । ६ ग. ङ. ट. ठ. ड. °तद्ब्र° । ७ ङ. ड. ढ. °व कथं । ८ क. °ह्मणोक्तं । ९ ण. °णे वर्णितं चि° । १० ण. °तैव ग° । ११ ठ. °म्यते तदेकवाक्यत्व दिहापि कथं । १२ क. °क्यतयाऽऽत्मा । क° । १३ क. °ते अत° । १४ ङ. ड. ढ. भवति । १५ ट. ण °ज्ञां यशो वि° । १६ ठ. ण. च. यशस्तेऽप्य° । १७ क. ण. °णानां यशसामा° । १८ क. ग. ङ. च. श्वेतं । १९ ण. °समरो° । २० ख. ग. च. ञ. लोहितं । २१ ग. ट. °हितं ज्ञांचिह्न योनिशब्दितं किंलक्षणं तथा° ।

दन्तरहितमप्यदत्तं भक्षयितृ स्त्रीव्यञ्जनं तत्सेविनां तेजोबलवीर्यविज्ञानधर्मा-
णामपहन्तृ विनाशयितृत्येतत् । यदेवंलक्षणं ह्येतं लिन्दु पिच्छलं तन्माऽ-
भिगां माऽभिगच्छेयम् । द्विर्वचनमत्यन्तानर्थहेतुत्वप्रदर्शनार्थम् ॥ १ ॥
इति च्छान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

लक्षणनिर्देशस्य प्रकृतोपयोगं दर्शयति-आध्यानायेति । सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ति । आकाशो ह्येवैभ्यो ज्यायानित्याद्याः श्रुतयः । आकाशशब्देनाऽऽत्मनः श्रुतिषु प्रसिद्धत्वे हेतुमाह- आकाश इवेति । ते यदन्तरेत्यत्र ते इति पदं प्रथमाद्विवचनान्तं गृहीत्वा व्याख्याय द्वितीयाद्विवचनान्तं षष्ठ्यर्थमादाय व्याचष्टे—तयोर्वेति । यदन्तरेति समस्तं पदं पूर्वत्र व्याख्यातमधुना तु व्यस्तं व्याकृतं तदेव व्याकरणं संक्षिपति—नामरूपाभ्यामिति । ताभ्यामस्पृष्टं चेत्कथं तन्निर्वाहकमित्याशङ्क्याऽऽह—नामरूपाभ्यामस्पृष्टमिति । मायावशादिति शेषः । आत्मत्वेऽपि कथं करतलामलकवद्ब्रह्मणोऽपरोक्षत्वमत आह- आत्मा हीति । तेन स्वसंवेद्यत्वेनेति यावत् । कुतो देहद्वयोपहितस्याऽऽत्मनः स्वसंवेद्यत्वं तत्राऽऽह—अशरीर इति । परिच्छिन्नस्याशरीरत्वमयुक्तमित्याशङ्क्याऽऽह-व्योमवदिति । ब्रह्मैव प्रत्यक्षभूतमिति कथमवगतमित्याशङ्क्याऽऽह—आत्मेति । अनात्मत्वं चेद्ब्रह्मत्वमसङ्गतमतः प्रत्यगभूतं ब्रह्म वक्तव्यमित्यर्थः । उपास्यस्वरूपं दर्शयित्वा तदुपासकस्य प्रार्थनामन्त्रमुत्थाप्य व्याकरोति—अथ ऊर्ध्वमिति । प्रथमतो ब्राह्मणग्रहणे हेतुमाह—ब्राह्मणा एवेति । विशेष्यं निर्दिशति—स्त्रीव्यञ्जनमिति । योनिशब्दितं प्रजननेन्द्रियमित्यर्थः । कथं तद्भक्षयितृ भवेत्तदाह—तत्सेविनामिति । तदभिगमनं नाम गर्भवासस्तस्यातिशयेनानर्थहेतुत्वं ज्ञापयितुं द्विर्वचनमित्यर्थः ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायामष्टमाध्यायस्य चतुर्दशः खण्डः ॥ १४ ॥

(अथाष्टमाध्यायस्य पञ्चदशः खण्डः)।

तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रि-

१ ग. ङ. च. श्वेतं । २ ख. घ. ङ. च. ट. ण. पिच्छिलं । ३ क. ख. छ. झ. ण. वेदनत्वे' । क. ख. ग. ञ. ट. ण. विशेषं ।

याणि संप्रतिष्ठाप्याहि॑सन्सर्वभूतान्यन्यत्र तीर्थेभ्यः
स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न
च पुनरावर्तते न च पुनरावर्तते ॥ १ ॥
इति च्छान्दोग्योपनिषद्यष्टमाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

===

इति च्छान्दोग्योपनिषद्ब्राह्मणेऽष्टमोऽध्यायः समाप्तः ॥ ८ ॥

ॐ * आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्र-
मथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं
माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनि-
राकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य
उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ।
ॐ शान्तिः शान्तिः शान्तिः ॥

तद्धैतदात्मज्ञानं सोपकरणमोमित्येतदक्षरमित्याद्यैः सहोपासनैस्तद्वाचकेन ग्रन्थेनाष्टाध्यायीलक्षणेन सह ब्रह्मा हिरण्यगर्भः परमेश्वरो वा तद्द्वारेण प्रजापतये कश्यपायोवाच । असावपि मनवे स्वपुत्राय । मनुः प्रजाभ्य इत्येवं श्रुत्यर्थसंप्रदायपरम्परयाऽऽगतमुपनिषद्विज्ञानमद्यापि विदुस्त्ववगम्यते । यथेह षष्ठाद्यध्यायत्रये प्रकाशितात्मविद्या सफलाऽवगम्यते तथा कर्मणां न कश्चनार्थ इति प्राप्ते तदानर्थक्यप्राप्तिपरिजिहीर्षयेदं कर्मणो विद्वद्भिरनुष्ठीय-मानस्य विशिष्टफलवत्त्वेनार्थवत्त्वमुच्यते—आचार्यकुलाद्वेदमधीत्य सहार्थ-तोऽध्ययनं कृत्वा यथाविधानं यथाऽऽस्मृत्युक्तैर्नियमैर्युक्तः सन्नित्यर्थः । सर्व-स्यापि विधेः स्मृत्युक्तस्योपकुर्वाणकं प्रति कर्तव्यत्वे गुरुशुश्रूषायाः प्राधा-न्यप्रदर्शनार्थमाह—गुरोः कर्म यत्कर्तव्यं तत्कृत्वा कर्मशून्यो योऽविशिष्टः

* इयं शान्तिरुपनिषदारम्भेऽपि ज्ञेया ।

१ थ. °सर्वा भू° । २ क. ग. घ. ङ. च ट. ठ. ड. ण °ध्यायल° । ३ ख. घ. ङ. च ञ. संब्रू° । ४ ख. च. ञ. ठ. ण. सोऽपि । ५ क. ग. घ. ङ. ट. ठ. ड. ढ. कर्मणा । ६ ग. ङ. ढ. °मेविद्वि° । च. ट. °मे वि° । ७ क. °श्रुत्यमु° ।

कालस्तेन कालेन वेदमधीत्येत्यर्थः । एवं हि नियमवताऽधीतो वेदः कर्मज्ञानफलप्राप्तये भवति नान्यथेत्यभिप्रायः । अभिसमावृत्य धर्मजिज्ञासां समापयित्वा गुरुकुलान्निवृत्य न्यायतो दारानाहृत्य कुटुम्बे स्थित्वा गार्हस्थ्ये विहिते कर्मणि तिष्ठन्नित्यर्थः । तत्रापि गार्हस्थ्यविहितानां कर्मणां स्वाध्यायस्य प्राधान्यप्रदर्शनार्थमुच्यते—शुचौ विविक्तेऽमेध्यादिरहिते देशे यथावदासीनः स्वाध्यायमधीयानो नैत्यकमधिकं च यथाशक्ति ऋगाद्यभ्यासं च कुर्वन्धार्मिकान्पुत्रान्शिष्यांश्च धर्मयुक्तान्विदधद्धार्मिकत्वेन तान्नियमयन्नात्मनि स्वहृदये हार्दे ब्रह्मणि सर्वेन्द्रियाणि संप्रतिष्ठाप्योपसंहृत्येन्द्रियग्रहणात्कर्माणि च सन्यस्याहिंसन्हिंसां परपीडामकुर्वन्सर्वभूतानि स्थावरजंगमानि भूतान्यपीडयन्नित्यर्थः । भिक्षानिमित्तग्रामादित्यतमटनादिनाऽपि परपीडा आह—अन्यत्र तीर्थेभ्यः । तीर्थं नाम शास्त्रानुज्ञाविषयस्ततोऽन्यत्रेत्यर्थः । सर्वाश्रमिणां चैतत्समानम् । तीर्थेभ्योऽन्यत्राहिंसैवेत्यन्ये वर्णयन्ति । कुटुम्ब एवैतत्सर्वं कुर्वन्स खल्वधिकृतो यावदायुषं यावज्जीवमेवं यथोक्तेन प्रकारेणैव वर्तयन्ब्रह्मलोकमभिसंपद्यते देहान्ते । न च पुनरावर्तते शरीरग्रहणाय । पुनरावृत्तेः प्राप्तायाः प्रतिषेधात् । अर्चिरादिना मार्गेण कार्यब्रह्मलोकमभिसंपद्य यावद्ब्रह्मलोकस्थितिस्तावत्तत्रैव तिष्ठति प्राक्तनो नाऽऽवर्तत इत्यर्थः । द्विरभ्यास उपनिषद्विद्यापरिसमाप्त्यर्थः ॥ १ ॥

इति श्रीछान्दोग्योपनिषच्छांकरभाष्येऽष्टमाध्यायस्य पञ्चदशः खण्डः ॥१५॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ छान्दोग्योपनिषद्भाष्येऽष्टमोऽध्यायः समाप्तः ॥ ८ ॥

उक्तविज्ञानस्यौत्प्रेक्षिकत्वशङ्कां व्युदस्यन्नमानादिपारम्पर्यागतत्वं दर्शयति—तद्धैतदिति । सोपकरणमुपकरणैः शमादिभिः सहितमिति यावत् । तद्द्वारेण हिरण्यगर्भ-

---

१ ग. ट. ण. °तो यो वे° । २ ख. ज. °धेत्याभिस° । ३ क. °नो नित्यनैमित्तिकं कर्माधि° । ४ ग. ङ. ठ ड. ढ. °शक्तित° । ख. घ. च. झ. ण. यथाशक्ति° । ५ क. ठ. ण. °हृत्य सर्वेन्द्रि° । ६ ख. झ. °न्सन्सर्वं° । ७ ठ. °तपर्यट° । ८ ग. ङ. ट. ढ. °ना प° । ९ ख. घ. झ. ठ. ढ. ण. °पि पी° । १० च. °न्यत्र हिं° । ११ ख. झ. ढ. °क्तेनैव प्र° । १२ क. ख. ग. ङ. झ. ट. ठ. ड. ढ. ण. °तैवं । १३ ग. ट. °धाद्धार्मिकान् । अ° । १४ ठ. °तो मुच्यते नाऽऽवर्तते पुनस्तस्मा- घाऽऽगमनमाशङ्क्यते गमनादतो नाऽऽवर्तत इत्युच्यते । द्विर° ।

द्वारेणेत्यर्थः । विद्याप्रकरणं समाप्याविद्वदनुष्ठितस्य कर्मणः साफल्यमविद्वत्संतोषार्थं कथयति—यथेत्यादिना । इहेति प्रकृतोपनिषदुक्तिः । प्राङ्मुखत्वपवित्रपाणित्वादयो नियमाः । भिक्षाशनस्नानाचमनादिविधिः । किमित्येष नियमोऽध्ययने कथ्यते तत्राऽऽह—एवं हीति । तत्रापीति सप्तम्या यथोक्तोऽधिकारी गृहीतः । एतत्सर्वं स्वयं कुर्वन्ब्रह्मलोकमभिसंपद्यत इति संबन्धः । एवं वर्तयन्नित्यस्य व्याख्यानमेवं यथोक्तेन प्रकारेण कुर्वन्निति । अप्राप्तप्रतिषेधाशङ्कां वारयति—पुनरावृत्तेरिति । चन्द्रलोकादिवद्ब्रह्मलोकादपि प्राप्ता पुनरावृत्तिस्तस्या न चेत्यादिना प्रतिषेधान्नाप्राप्तप्रतिषेधप्रसक्तिरित्यर्थः । अपुनरावृत्तिवाक्यस्थान्यक्षराणि व्याकरोति—अर्चिरादिनेति । प्रागिति महाप्रलयात्पूर्वकालोक्तिः । ततो ब्रह्मलोकादित्यर्थः ॥ १ ॥

इति श्रीमदानन्दगिरिविरचितायां छान्दोग्योपनिषच्छांकरभाष्यटीकायां
सप्तमाध्यायस्य पञ्चदशः खण्डः ॥ १५ ॥

यियदासीज्जगज्जातं जातमज्ञानतो यतः ।
तदस्मि नामरूपादिविरहि ब्रह्म निर्भयम् ॥
नमस्कुर्व्यन्तसंदोहसरसीरुहभानवे ।
गुरवे परमक्षीणध्वान्तध्वंसपटीयसे ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्य-
श्रीभगवदानन्दज्ञानकृतायां छान्दोग्यभाष्यटीकायां
सप्तमोऽध्यायः ॥ ८ ॥

---

१ ग. ट. 'माप्य वि' । २ ग. ट. 'वं कु' ।

समाप्तेयमानन्दगिरिकृतटीकासंवलितशांकरभाष्य-
समेता छान्दोग्योपनिषत् ।

अथ च्छान्दोग्योपनिषद्भागानां वर्णानुक्रमणिका प्रारभ्यते ।

—:⊙:—

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
अ.			
अग्निर्हिंकारो वायुः	....	२	२० १
अग्निष्टे पादं वक्तेति	....	४	६ १
अजा हिंकारोऽवयः	....२१	८	१
अतो यान्यन्यानि	...	१	३ ९
अत्र यजमान० तस्मै रुद्राः	२	२४	१०
अत्र यजमानः० तस्मै वसवः	२	२४	६
अत्स्यन्नं पश्यसि प्रियं० वैश्वानरमुपास्ते पादौ	....	५	१७ २
अत्स्यन्नं पश्यसि० वैश्वानरमुपास्ते प्राणस्त्वेष	...	५	१४ २
अत्स्यन्नं पश्यसि० वैश्वानरमुपास्ते बस्तिस्त्वेष	....	५	११ २
अत्स्यन्नं० मूर्धा त्वेष	....	५	१२ २
अत्स्यन्नं० वैश्वानरमुपास्ते संदेहस्त्वेष	... ...	५	१५ २
अथ खलु य उद्गीथः स प्रणवो० स उद्गीथ इति होतृषदनात्	... .	१	१ १
अथ खलु य उद्गीथ इत्यसौ वा आदित्यः	...	१	१ १
अथ खलु व्यानः...	...	१	३ ३
अथ खलूद्गीथाक्षराणि	....	१	३ ६
अथ खरुत्रमुमादित्यं	....	२	९ १
अथ खरुत्रात्मसंमितं	....	२	१० १

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
अथ खल्वाशीः०	...	१	३ ८
अथ स्वल्वेतयर्चा	...	५	२ ७
अथ जुहोति नम आदित्याय	२	२४	१४
अथ जुहोति नमोऽग्नये	...	२	२४ ९
अथ जुहोति नमो वायवे	...	२	२४ ९
अथ तत ऊर्ध्वः	...	३	११ १
अथ प्रतिसृप्याञ्जलौ	....	५	२ ६
अथ य आत्मा स सेतुः	...	८	४ १
अथ य इमे ग्रामे	...	५	१० ३
अथ य एतदेवं विद्वानग्निहोत्रं	५	२४	२
अथ य एतदेवं विद्वान्साम	१	७	७
अथ एषोऽन्तरक्षिणि	....	१	७ ९
अथ य एष संप्रसादः	....	८	३ ४
अथ यच्चतुर्थममृतं	....	३	९ १
अथ यत्तदजायत	....	३	१९ ३
अथ यत्तपो दानं	...	३	१७ ४
अथ यत्तृतीयममृतं	....	३	८ १
अथ यत्पञ्चमं	....	३	१० १
अथ यत्प्रथमास्तमिते	...	२	९ ८
अथ यत्प्रथमोदिते	...	२	९ ३
अथ यत्रैतत्पुरुषो	....	६	८ ९
अथ यत्रैतदबलिमानं	....	८	६ ४
अथ यत्रैतदस्माच्छरीरात्		८	६ ९
अथ यत्रैतदाकाशमनुविषण्णं		८	१२ ४
अथ यत्रोपाकृते	....	४	१६ ४

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
अथ यत्संप्रति मध्यंदिने...	२	९	१
अथ यत्सन्नायणमित्याचक्षते	८	५	३
अथ यदतः परो ...	३	१३	७
अथ यदनाशकायनमित्याचक्षते	८	५	२
अथ यदवोचं भुवः प्रपद्ये	३	१९	६
अथ यदवोचं भूः प्रपद्ये	३	१९	५
अथ यदवोचं स्वः प्रपद्ये	३	१९	७
अथ यदश्नाति ...	३	१७	२
अथ यदाऽस्य वाङ्मनसी	६	१९	२
अथ यदि गन्धमाल्यलोककामः	८	२	६
अथ यदि गीतवादितलोककामः	८	२	८
अथ यदि तस्याकर्ता ...	६	१६	२
अथ यदिदमस्मिन्ब्रह्मपुरे...	८	१	१
अथ यदि भ्रातृलोककामः	८	२	३
अथ यदि महज्जिगमिषेत्	५	२	४
अथ यदि मातृलोककामः	८	२	२
अथ यदि यजुष्टः	४	१७	५
अथ यदि सखिलोककामः	८	२	५
अथ यदि सामतः	४	१७	६
अथ यदि स्त्रीलोककामः....	८	२	९
अथ यदि स्वसृलोककामः	८	२	४
अथ यदि चैवास्मिन्	४	१५	५
अथ यदूर्ध्वमपराह्णात्	२	९	७
अथ यदूर्ध्वं मध्यंदिनात्...	२	९	६
अथ यदेतदक्षगः ...	१	७	४
अथ यदेतदादित्यस्य	१	६	५
अथ यदेवैतदादित्यस्य ...	१	६	६
अथ यद्यन्नपानलोककामः	८	२	७
अथ यद्यप्येनानुत्क्रान्तप्राणान्	७	१५	३
अथ यद्यज्ञ इत्याचक्षते ...	८	५	१

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
अथ यद्येनमूष्मसूपालभेत....	२	२२	४
अथ यद्द्वितीयममृतं ...	३	७	१
अथ यद्धसति	३	१७	३
अथ या एता हृदयस्य नाड्यः	८	६	१
अथ यानि चतुश्चत्वारिंशद्व- र्षाणि	३	१६	३
अथ यान्यष्टाचत्वारिंशद्व- र्षाणि	३	१६	५
अथ यां चतुर्थीं जुहुयात्...	५	२२	१
अथ यां तृतीयां जुहुयात्तां	५	२१	१
अथ यां द्वितीयां जुहुयात्तां	५	२०	१
अथ यां पञ्चमीं....	५	२३	१
अथ ये चास्येह जीवाः....	८	३	२
अथ येऽस्य दक्षिणाः ...	३	२	१
अथ येऽस्य प्रत्यञ्चः	३	३	१
अथ येऽस्योदञ्चः	३	४	१
अथ येऽस्योर्ध्वाः	३	५	१
अथ यो वेदेदं मन्वानीति	८	१२	५
अथ योऽस्य दक्षिणः	३	१३	२
अथ योऽस्य प्रत्यङ् ...	३	१३	३
अथ योऽस्योदङ् ...	३	१३	४
अथ योऽस्योर्ध्वः सुषिः...	३	१३	५
अथ सप्तविधस्य... ...	२	८	१
अथ संगववेलायां	२	९	४
अथ ह चक्षुः	१	२	४
अथ ह प्राण उच्चिक्रमिषन्	५	११	२
अथ ह प्राणा अहꣳ श्रेयसि	५	१	६
अथ ह मनः	१	२	६
अथ ह य एतानेवं ...	५	१०-१०	
अथ ह एवायं	१	२	५

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
अथ ह वाचं	१	२	३
अथ ह शौनकं च कापेयं	४	३	५
अथ ह श्रोत्रं	१	२	५
अथ ह हंसा	४	१	२
अथ ह्याग्नयः	४	१०	४
अथ हैन्द्रेऽप्राप्यैव ...	८	९	१
अथ हैनमन्वाहार्य०	४	१२	१
अथ हैनमाहवनीयः ...	४	१३	१
अथ हैनमुद्गाता...	१	११	६
अथ हैनमृषभः	४	९	१
अथ हैनं गार्हपत्यः	४	११	१
अथ हैनं प्रतिहर्ता ...	१	११	८
अथ हैनं प्रस्तोतोपससाद...	१	११	४
अथ हैनं यजमानः ...	१	११	१
अथ हैनं वागुवाच ...	५	१	१३
अथ हैनꣳ श्रोत्रमुवाच ...	५	१	१४
अथ होवाच जनं ...	५	९	१
अथ होवाच बुडिलं	५	१६	१
अथ होवाच सत्ययज्ञं	५	१३	१
अथ होवाचेन्द्रद्युम्नं ...	५	१४	१
अथ होवाचोद्दालकं	५	१७	१
अथात आत्मादेश एव	७	२५	२
अथातः शौवः	१	१२	१
अथाधिदैवतं	१	३	१
अथाध्यात्मं प्राणो वाव	४	३	३
अथाध्यात्मं य एवायं	१	५	३
अथाध्यात्मं वागेव	१	७	१
अथानु किमनुशिष्टः	५	३	४
अथानेनैव	१	७	८
अथाऽऽवृत्तेषु द्यौर्हिंकारः	२	२	२

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
अथैतयोः पथोः	५	१०	८
अथोताप्याहुः	२	१	३
अधीहि भगव इति होप-			
ससाद	७	१	१
अनिरुक्तस्त्रयोदशः	१	१३	३
अन्तरिक्षमेव	१	६	२
अन्तरिक्षोदरः कोशः ...	३	१५	१
अन्नमयꣳ हि सोम्य मनः	६	५	४
,, ,, ...	६	६	५
अन्नमशितं त्रेधा विधीयते	६	५	१
अन्नमिति होवाच ...	१	११	९
अन्नं वाव बलाद्भूयः	७	९	१
अन्यतरामेव वर्तनीं	४	१६	३
अपाने तृप्यति	५	२१	२
अपां का गतिः...	१	८	५
अपां सोम्य पीयमानानां....	६	६	३
अभिमन्थति स हिंकारः....	२	१२	१
अभ्राणि संभवन्ते ...	२	१५	१
अभ्रं भूत्वा मेघो भवति....	५	१०	६
अमृतत्वं देवेभ्यः	२	२२	२
अयं वाव लोको हाउकारः	१	१३	१
अयं वाव स योऽयमन्तः			
पुरुष आकाशो ...	३	१२	८
अयं वाव स योऽयमन्तर्हृ-			
दय आकाशः ...	३	१	९
अरिष्टं कोशं प्रपद्ये ...	३	१	३
अशनापिपासे मे सोम्य ...	६	८	३
अशरीरो वायुरभ्रं	४	१	२
असौ वा आदित्यः ...	३	१	१
असौ वाव लोको गौतमाग्निः	५	४	१

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
अस्य यदेकां शाखां ...	५	११	२
अस्य लोकस्य का गतिः	१	९	१
अस्य सोम्य महतः ...	६	११	१
आ.			
आकाशो वाव तेजसः ...	७	१२	१
आकाशो वै नाम ...	८	१४	१
आगाता ह वै	१	२	१४
आत्मानमन्त	१	३	१२
आपयिता	१	१	७
आदित्यस्तस्य रेतसः ...	३	१७	७
आदित्य इति होवाच	१	११	७
आदित्य ऊकारः ...	१	१३	२
आदित्यमथ वैश्वदेवं ...	२	२४	१३
आदित्यो ब्रह्म	३	१९	१
आदिरिति द्व्यक्षरं	२	१०	२
आपः पीत्वेधा ...	६	५	२
आपो वावान्नाद्भूय०	७	१०	१
आप्नोति हाऽऽदित्यस्य...	२	१०	६
आशा वाव स्मरद्भूय०	७	१४	१
इ.			
इति तु पञ्चम्या० ...	५	९	१
इदमिति ह प्रतिजज्ञे ...	४	१४	३
इदं वाव तज्ज्येष्ठाय	३	११	५
इमाः सोम्य नद्यः ...	६	१०	१
इयमेवर्गग्निः साम ...	१	६	१
उ.			
उदशरावे आत्मानमवेक्ष्य	८	८	१
उदाने तृप्यति	५	२१	२
उद्गीथ इति ह्यक्षरं	२	१०	३
उद्यन्ह्येवैतन्निधनं	२	३	२

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
उद्दालको हाऽऽरुणिः	६	८	१
उद्यन्नेवाहकार उदितः	२	१४	१
उपकोसलो ह वै ...	४	१०	१
उपमन्त्रयते स	२	१३	१
ऋ.			
ऋग्वेदं भगवोऽध्येमि	७	१	२
ऋतुषु पञ्चविधं.... ...	२	९	१
ए.			
एकविंशत्याऽऽदित्यं	२	१०	९
एतद्ध स्म वै तद्विदानाह	३	१६	७
एतद्ध स्म वै तद्विद्वाꣳस...	६	४	९
एतमु एवाह० पुत्रमुवाच प्राणाꣳस्त्वं	१	९	४
एतमु एवाह० पुत्रमुवाच रश्मीꣳस्त्वं	१	९	२
एतमृग्वेदमभ्यतपꣳस्तस्य ...	३	१	३
एतेषां मे देहीति ...	१	१०	३
एतꣳ संयद्वाम	४	१९	२
एवमेव खलु सोम्य ...	६	११	३
एवमेव खलु सोम्यान्नस्य....	६	६	२
एवमेव खलु सोम्येमाः ...	६	१०	२
एवमेव प्रतिहर्ता	१	१०११	
एवमेवैष मघवन्निति भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि	८	११	१
एवमेवैष मघ० भूयोऽनुव्याख्यास्यामि वसापराणि	८	९	१
एवमेवैष संप्रसादः ...	८	१२	३
एवमेवोद्गातारं....	१	१०	१०
एवमेषां लोकानां	४	१७	४

खण्डविभागाद्यपदानि।	अध्यायादीनि।		
एवं यथाऽग्नमानं....	...	१	२ ८
एवं सोम्य ते	...	६	७ ६
एष उ एव भामनीरेष....	४	१५	४
एष उ एव वामनीरेष...	४	१९	३
एष तु वा अतिवदति यः	७	१६	१
एष म आत्मा	३	१४	३
एष वै यजमानस्य ...	२	२४	१५
एष ह वा उदकमयनः...	४	१७	९
एष ह वै यज्ञो योऽयं....	४	१६	१
एषां भूतानां	१	१	२
ओ.			
ओमित्येतदक्षरमुद्गीथमुपासीत	१	१	१
ओमित्येतदक्ष०	१	४	१
ओं३ मदा३ मों३	१	१२	९
ओं समस्तस्य खलु	२	१	१
औ.			
औपमन्यव कं	९	१२	१
क.			
कतमा कतमर्क्	१	१	४
कल्पन्ते हास्मा ऋतवः.	२	९	२
कल्पन्ते हास्मै लोकाः...	२	२	३
का साम्नो गतिरिति ...	१	८	४
कुतस्तु खलु सोम्यैवꣳ...	६	२	२
कं ते काममागायानीति	१	७	९
क्व तर्हि यजमानस्य लोक इ०	२	२४	२
ग.			
गायत्री वा इदꣳ सर्वं भूतं	३	१२	१
गोअश्वमिह महिमा	७	२४	२
च.			
चक्षुरेव ब्रह्मणः...	३	१८	५
चक्षुरेवर्गात्मा	१	७	२

खण्डविभागाद्यपदानि।	अध्यायादीनि।		
चक्षुर्होच्चक्राम	५	१	९
चित्तं वाव संकल्पाद्भूयः	७	५	१
ज.			
जानश्रुतिर्ह पौत्रायणः....	४	१	१
त.			
त इमे सत्याः काम्या ...	८	३	३
त इह व्याघ्रो वा सिंहो वा	६	९	३
त एतदेव रूपमभि०	३	६	२
,, ,, ...	३	७	२
,, ,, ...	३	८	२
,, ,, ...	३	९	२
,, ,, ...	३	१०	२
तत्रोद्गातृन्	१	१०	८
तथाऽमुष्मिँल्लोके ...	१	९	४
तथेति ह समुपाविविशुः....	१	८	२
तदुताप्याहुः	२	१	२
तदु ह जानश्रुतिः पौत्रायणः	४	१	५
तदु ह० षट् शतानि	४	२	१
तदु ह शौनकः कापेयः	४	३	७
तदेतच्चतुष्पाद्ब्रह्म...	३	१८	२
तदेतन्मिथुनम्	१	१	६
तदेष श्लोकः। शतं चैका च हृदयस्य.... ...	८	६	६
तदेष श्लोको न पश्यो...	७	२६	२
तदेष श्लोको यदा ...	५	२	८
तदेष श्लोको यानि	२	२१	३
तदैक्षत बहु स्यां	६	२	३
तद्धैतत्सत्यकामो	५	२	३
तद्धैनद्ब्रह्मा प्रजापतय आ०	८	१५	१
,, ,, तद्धैत	३	११	४

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
तद्धैतद्घोर	३	१७	६
तद्धोभये देवसुरा	८	७	२
तद्य इत्थं विदुः	५	१०	१
तद्य इह रमणीयचरणाः	५	१०	७
तद्य एवैतं ब्रह्म	८	४	३
तद्य एवैतावरं च परं	८	५	४
तद्यत्प्रथममभृतं ...	३	६	१
तद्यत्रैतत्सुप्तः समस्तः० विजानात्यासु ...	८	६	३
तद्यत्रैतत्सुप्तः समस्तः० विजानात्येष	८	११	१
तद्यथा महापथ आततः	८	६	२
तद्यथा लवणेन	४	१७	७
तद्यथेषीका	५	२४	३
तद्यथेह कर्मचितो लोकः	८	१	६
तद्यद्भक्तं प्रथम०	५	१९	१
तद्यद्युक्तो रिष्येद्भूः ...	४	१७	४
तद्यदजतं	३	१९	२
तद्वा एतदनुज्ञाक्षरं ...	१	१	८
तदुक्षरं तदादि० कृष्णं	३	३	३
तदूक्षः० परं कृष्णं	३	४	३
तदूक्षः० मध्ये क्षोभत	३	५	३
तदूक्ष० रोहितं	३	१	४
तदूक्ष० शुक्लं	३	२	३
तमग्निरभ्युवाद	४	६	२
तमु ह परः प्रत्युवाच कम्बरे	४	१	३
तमु ह परः प्रत्युवाचाह हारेत्वा	४	२	३
तयोरन्यतरां मनसा	४	१६	२
तस्मा आदित्याश्च	२	२४	१६
तस्मा उ ह तदुस्तें	४	३	८

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
तस्मादप्येहादृदान०	८	८	१
तस्माद्वाहु सोष्यत्यसोष्टेति	३	१७	१
तस्मादु ह्वैवंविद्यद्यपि	५	२४	४
तस्माद्वा एतं सेतुं तीर्त्वा	८	४	२
तस्मिन्निमानि	२	९	१
तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं	५	७	२
तस्मि० रेतो	५	८	२०
तस्मि० श्रद्धां ...	५	४	२
तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं	५	६	२
तस्मि० सोमं.... ...	५	५	२
तस्मिन्यावत्संपातमुषित्वा	५	१०	६
तस्मै श्वा श्वेतः	१	१२	२
तस्य क मूलꣳ स्यादन्यत्रान्नादेवमेव...	६	८	४
तस्य० ह्रदयेऽग्नेः ..	६	८	६
तस्य प्राची दिग्जुहूर्नाम	३	१५	२
तस्य यथा कप्यासं ...	१	६	७
तस्य यथाभिनहनं प्रमुच्य	६	१४	२
तस्य ये प्राञ्चो रश्मयस्ता	३	१	२
तस्यर्क्च साम च	१	६	८
तस्य ह वा एतस्य हृदयस्य	३	१३	१
तस्य ह वा एतस्याऽऽत्मनो	५	१८	२
तस्य ह वा एतस्यैव	७	२६	१
तस्या ह मुखमुद्गृह्लुराच	४	२	५
तं चेदेतस्मिन्वयसि० प्राणा आदित्याः....	३	१६	१
तं० प्राणा रुद्राः	३	१६	४
तं० प्राणा वसवः	३	१६	२
तं चेदूचुरस्मिंश्चेदिदं....	८	१	४
तं चेदूचुर्यदिदमस्मिन्ब्रह्मपुरे	८	१	३

खण्डविभागाद्यपदानि।	अध्यायादीनि।		
तं जायोवाच	१	१०	७
तं मद्गुरुपनिपत्याभ्युवाद	४	८	२
तं वा एतं देवा ...	८	१२	६
तꣳह ऽसमुपनिपत्याभ्युवाद	४	७	२
तꣳह चिरं वसेत्या० ...	५	३	७
तꣳह प्रवाहणो ...	१	८	८
तꣳह म्युवाद रैक्वेदं	४	२	४
तꣳह शिलकः	१	८	६
तꣳह हाङ्गिरा	१	२	१०
तꣳह हैतमतिधन्वा	१	९	३
तꣳह होवाच किंगोत्रो नु	४	४	४
तꣳह होवाच नैतदब्राह्म०	४	४	५
तꣳह होवाच यथा सोम्यस्यै०	६	७	५
तꣳह होवाच यथा सोम्यस्य०	६	७	३
तꣳह होवाच यं वै सोम्यैतम-णिमानं	६	१२	२
ता आप ऐक्षन्त	६	२	४
तानि वा एतानि यजूꣳष्येतं	३	२	२
तानि० सामान्येतं	३	३	२
तानि ह वा एतानि त्रिण्य-क्षराणि	८	३	२
तानि० चित्तैकायनानि	७	५	२
तानि० संकल्पैकायनानि	७	४	२
तानु तत्र मृत्युर्यथा ...	१	४	३
तान्यभ्येतपत्तेभ्यो	२	२३	३
तान्होवाच प्रातर्वः	५	१२	७
तान्होवाचाश्वपतिर्वै ...	५	११	४
तान्होवाचैहैव.... ...	१	१२	३
तान्होवाचैते	५	१४	१
तावानस्य महिमा ...	३	१२	६

खण्डविभागाद्यपदानि।	अध्यायादीनि।		
तासां त्रिवृतं	६	३	४
तेजसः सोम्याश्यपानस्य	६	४	४
तेजो वावाद्भ्यो भूयस्तद्वा	७	११	१
तेजोऽशितं त्रेधा	६	५	३
तेन तꣳह बको ...	१	२	१३
तेन तꣳह बृह० ...	१	२	११
तेन तꣳह हाऽऽयास्य ...	१	२	१२
तेनेयं त्रयी	१	१	९
तेनोभौ कुरुतः ...	१	१	१०
तेभ्यो ह प्राप्तेभ्यः	५	११	५
ते यथा तत्र न विवेकं...	६	९	२
ते वा एते गुह्या आदेशा	३	९	२
ते वा एतेऽथर्वाङ्गिरसः	३	४	२
ते वा एते ब्रह्मपुरुषाः	३	१३	१
ते वा एते रसानाꣳ रसा वेदा	३	९	४
तेषां खल्वेषां	६	६	२
ते ह नासिक्यं ...	१	२	२
ते ह प्राणाः प्रजापतिं	५	१	७
ते ह यथैवेदं	१	१५	४
ते ह संपाद्यांचक्रुरुद्गकः	५	११	२
ते होचुरुषस्तेषा	४	१४	२
ते होचुर्येन	५	११	६
तौ वा एतौ द्वौ संवर्गौ	४	३	४
तौ ह द्वात्रिꣳशतं वर्षाण्यि	८	७	३
तौ ह प्रजापतिरुवाच य एषो	८	७	४
तौ ह प्रजापतिरुवाच सा-ध्वलंकृतौ	८	८	२
तौ हान्वीक्ष्य प्रजापतिरुवाच	८	८	४
तौ होचतुर्यथैवेदमावां भगवः	८	८	३
त्रयी विद्या हिंकारस्त्रय०	२	२१	१

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
त्रयो धर्मस्कन्धाः	२	२३	१
त्रयो ह वै द्वीथे	१	८	१
द.			
दध्नः सोम्य मथ्यमानस्य	६	६	१
दुग्धेऽस्मै वाग्दोहं० भवति य एतदेवं	२	८	३
दुग्धेऽस्मै० भवति य एता मेवꣳ	१	१३	४
देवा वै मृत्यो ...	१	४	२
देवासुरा ह	१	२	१
द्यौरेवर्गादित्यः	१	६	३
द्यौरेवोदन्त०	१	३	७
ध.			
ध्यानं वाव चित्ताद्भूयो	७	६	१
न.			
नक्षत्राण्येव	१	६	४
न वधेनास्य० मोग्यं पश्यामीति	८	१०	२
न वधेनास्य० मोग्यं पश्यामीत्येवमेवैष	८	१०	४
न वै तत्र न निम्लोच....	३	११	२
न वै नूनं भगवन्तः	६	१	७
न वै वाचो न चक्षूꣳषि	५	१	१५
न स्विदेतेऽप्युच्छिष्टा	१	१०	४
न ह वा अस्मै	३	११	३
न ह्याप्सु प्रैत्यप्सु०	२	४	२
नान्यस्मै कस्मैचन	३	११	६
नाम वा ऋग्वेदो यजुर्वेदः	७	१	४
नाहमत्र मोग्यं पश्यामीति	८	९	२
निधनमिति त्र्यक्षरं ...	२	१०	४

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
नैवैतेन सुरभि	१	२	९
न्यग्रोधफलमत आहरेतीदं	१	१२	१
प.			
पञ्च मा राजन्यबन्धुः...	५	३	५
परोवरीयो ह्यस्य	२	७	२
पर्जन्यो वाव गौतमाग्निः	५	५	१
पशुषु पञ्चविधं	२	६	१
पुरा तृतीयसवनस्य ...	२	२४	११
पुरा प्रातरनुवाकस्य ...	२	२४	१
पुरा माध्यंदिनस्य	२	२४	७
पुरुषꣳ सोम्येतिहस्तगृहीतं	६	१६	१
पुरुषꣳ सोम्योतोपतापिनं....	६	१५	१
पुरुषो वाव गौतमाग्निः...	५	७	१
पुरुषो वाव यज्ञः ...	३	१६	१
पृथिवी वाव गौतमाग्निः	५	६	१
पृथिवी हिंकारोऽन्तरिक्षं...२		१७	१
प्रजापतिर्लोकानभ्यतपत्तेभ्यो	२	२३	२
प्रजापतिर्लोकानभ्यतपत्तेषां तप्यमानानां ...	४	१७	१
प्रवृत्तोऽश्वतरीरथो	५	१३	२
प्रस्तोतर्यो	१	१०	९
प्राचीनशाल औपमन्यवः	५	११	१
प्राण इति होवाच	१	११	५
प्राण एव ब्रह्मणः	३	१८	४
प्राणे तृप्यति ...	५	१९	२
प्राणेषु पञ्चविधं	२	७	२
प्राणो वा आशाया भूयान्यथा७		१५	१
प्राणो ह्येवैतानि सर्वाणि	७	१५	४
प्राप हाऽऽचार्यकुलं	४	९	१

खण्डविभागाद्यपदानि।	अध्यायादीनि।		
ब.			
बलं वाव विज्ञानाद्भूयो	७	८	१
ब्रह्मणश्च ते पादं ...	४	९	२
ब्रह्मणः सोम्य ते पादं० तस्मै होवाच पूर्णिमी ब्रह्म कला ...	४	६	३
ब्रह्मणः सोम्य ते पादं ब्र० तस्मै होवाच प्राण० कला ...	४	८	३
ब्रह्मणः सोम्य ते० तस्मै होवाचाग्निः ...	४	७	३
ब्रह्मवादिनो वदन्ति ...	२	२४	१
ब्रह्मविदिव वै सोम्य ...	४	९	२
भ.			
भगव इति ह प्रतिशुश्राव	४	१३	२
भवन्ति हास्य पशवः	२	६	२
भगवाँस्त्वेव	१	११	३
म.			
मघवन्मर्त्यं वा इदं शरीरं	८	१५	२
मटचीहतेषु	१	१०	१
मद्गुष्टे पादं	४	८	२
मनो ब्रह्मेत्युपासीत ...	३	१८	२
मनोमयः प्राणशरीरो	३	१४	२
मनो वाव वाचो भूयो	७	३	१
मनो ह्येवकाम ...	५	३	११
मनो हिंकारो...	२	११	१
मानवो ब्रह्मैवैकः ...	४	७	१
मासेभ्यः पितृलोकं ...	५	१०	४
मासेभ्यः संवत्सरं ...	५	१०	२

खण्डविभागाद्यपदानि।	अध्यायादीनि।		
य.			
य आत्माऽपहतपाप्मा....	८	७	१
य एष स्वप्ने महीयमानः	८	२०	१
य एषोऽक्षिणि पुरुषो दृश्यते	४	१५	३
यच्चन्द्रमसो रोहितं	६	४	३
यत्र नान्यत्पश्यति	७	२४	१
यथा कृताय ...	४	१	६
यथा कृताय विजिताय	५	१	४
यथा विलीनमेवाङ्गास्या- न्तात्	६	१३	२
यथा सौम्य पुरुष	६	१४	१
यथा सोम्य मधु मधुकृतो	६	९	१
यथा सोम्यैकेन नखनि- कृन्तनेन ...	६	१	६
यथा सोम्यैकेन मृत्पिण्डेन	६	१	४
यथा सोम्यैकेन लोहम- णिना	६	१	५
यथेह क्षुधिता बाला	५	२४	५
यदग्ने रोहितं रूपं	६	४	३
यदादित्यस्य रोहितं रूपं	६	४	२
यदाप उच्चुष्यन्ति	४	३	२
यदा वा ऋचः	१	३	४
यदा वै करोत्यथ निस्ति- ष्ठति	७	२१	१
यदा वै निस्तिष्ठत्यथ	७	२०	१
यदा वै मनुतेऽथ विजा- नाति	७	१८	१
यदा वै विजानात्यथ सत्यं वदति	७	१७	१
यदा वै श्रद्दधात्यथ मनुते	७	१९	१

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
यदा वै सुखं लभतेऽथ करोति	७	२२	१
यदुदिति स उद्गीथ	२	८	२
यदु रोहितमिवाभूदिति....	६	४	६
यद्विज्ञातमिवाभूदित्ये तासामेव	६	४	७
यद्विद्युतो रूपं रोहितं	६	४	४
यद्वै तत्पुरुषे शरीरं ...	३	१२	४
यद्वै तद्ब्रह्मेतीदं	३	१२	७
यस्तद्वेद स वेद	२	२१	४
यस्यामृचि तामृचं	१	३	९
यं यमन्तमभिकामो भवति	८	२	१०
या वाक्सर्क्तस्मात्	१	३	४
यावान्वा अयमाकाशः....	८	१	३
या वै सा गायत्रीयं	३	१२	२
या वै सा पृथ्वीयं ...	३	१२	३
यां दिशमभिशोष्यन्	१	३	११
येन च्छन्दसा ...	१	३	१०
येनाश्रुतꣳ श्रुतं	६	१	३
यो वै भूमा तत्सुखं ...	७	२३	१
योषा वाव गौतमाग्निः ...	५	८	१
यो ह वा आयतनं	५	१	५
यो ह वै ज्येष्ठं च ...	५	१	३
यो ह वै प्रतिष्ठां	५	१	३
यो ह वै वसिष्ठं ...	५	१	२
यो ह वै संपदं वेद	५	१	४
र.			
रैक्वेमानि षट् शतानि ...	४	२	२
ल.			
लवणमेतदुदके ...	६	१३	१

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
लोकेषु पञ्चविधं साम	२	२	१
लो३कद्वारम० त्वा .... वयꣳस्रा०.... ...	२	२४	४
लो३कद्वारम० त्वा वयं वैरा०	२	२४	८
लो३कद्वारमपावृणु त्वा वयꣳ स्वारा०	२	२४	१२
लोम हिंकाररस्त्वक्प्रस्तावः	२	१९	१
व.			
वसन्तो हिंकारः ...	२	१९	१
वसिष्ठाय स्वाहा ...	५	२	९
वागेव ब्रह्मणः	२	१८	३
वागेवर्क्साणः	१	१	९
वाग्वाव नाम्नो भूयसी....	७	२	१
वायुर्वाव संवर्गः	४	३	१
विनर्दं साम्नः....	२	२२	१
विज्ञानं वाव ध्यानाद्भूयः	७	७	१
वृष्टौ पञ्चविधं समोपा सीत	२	३	१
वेत्थ यथाऽमुं लोकं न	५	३	३
वेत्थ यदितः	१	३	२
व्याने तृप्यति... ...	५	२०	२
श.			
श्यामाच्छबलं प्रपद्ये	८	१३	१
श्रुतꣳ ह्येव मे भगव०....	४	९	३
श्रोत्रमेव ब्रह्मणः	३	१८	६
श्रोत्रमेवर्ङ्मनः	२	७	३
श्रोत्रं होच्चक्राम	२	१	१०
श्वेतकेतुर्हाऽऽरुणेय आस	६	१	१

खण्डविभागाद्यपदानि।	अध्यायादीनि।		
श्वेतकेतुर्हाऽऽरुणेयः पञ्चा-			
लानां	५	३	१
ष.			
षोडशकलः सोम्य	६	७	१
स.			
स एतां त्रयीं विद्यां	४	१७	३
स एतास्तिस्रो देवता: ...	४	१७	१
स एवाधस्तात्सः	७	१९	१
स एष परोवरीयान्	१	९	९
स एष ये चैतस्मात्	१	७	८
स एष रसानां	१	१	३
स जातो यावदायुषं ...	५	९	१
सत्यकामो ह जाबालः	४	४	१
सदेव सोम्येदमग्रे	६	१	१
स ब्रूयान्नास्य... ...	८	१	५
समान उ एवायं ...	१	३	१
समाने तृप्यति ...	५	११	१
स य आकाशं	७	११	१
स य आशां	७	१४	९
स य इदमविद्वान्	५	२४	१
स य एतदेवममृतं वेद मरुतां	३	९	३
स य एतदेवममृतं वेद रुद्राणां	३	७	३
स य एतदेवममृतं वेद वसूनां	३	६	१
स य एतदेवममृतं वेद साध्यानां	३	१०	३
स य एतदेवममृतं वेदाऽऽदित्यानां	३	८	३
स य एतदेवं विद्वानक्षरं...	१	४	५
स य एतदेवं विद्वान्साधु...	२	१	४

खण्डविभागाद्यपदानि।	अध्यायादीनि।		
स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः	४	८	४
स य एतदेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवान्	४	५	३
स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मान्	४	७	४
स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः	४	६	४
स य एतमेवं विद्वानादित्यं	३	१९	४
स य एतमेवं विद्वानुपास्ते	४	११	२
,, ,, ,, ,,	४	१२	२
,, ,, ,, ,,	४	१३	२
स य एवमेतत्साम....	२	२१	२
स य एवमेतद्गायत्रं	२	११	२
स य एवमेतद्बृहदादित्ये	२	१४	२
स य एवमेतद्यज्ञाः	२	१९	२
स य एवमेतद्रथं०	२	१२	२
स य एवमेतद्राजनं ...२	२	२०	२
स य एवमेतद्वैराजमृतुषु...२	२	११	२
स य एवमेतद्वैरूपं ...२	२	१९	२
स य एवमेतद्वामदेव्यं ...२	२	१३	२
स य एवमेता रेवत्यः २	२	१८	२
स य एवमेताः शक्वर्यो ...२	२	१७	२
स य एषोऽणिमा	६	८	७
,, ,, ...	६	९	४
,, ,, ...	६	१०	३
स य एषोऽणिमैतदात्म्य०	६	१२	३
,, ,, ...	६	१३	३
,, ,, ...	६	१४	३
,, ,, ...	६	१५	३

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
स यथा तत्र	६	१६	३
स यथा शकुनिः ...	६	८	२
स यथोभयपात्	४	१६	५
स यदब्रोचं प्राणं	३	१५	४
स यदशिशिषति ...	३	१७	१
स यदि पितरं	७	१५	२
स यदि पितृलोककामो भवति	८	२	१
स यश्चित्तं	७	५	३
स यस्तेजो	७	११	२
स यः संकल्पं ...	७	४	३
स यः स्मरं	७	१३	२
स यावदादित्य उत्तरतः	७	१०	४
स यावदादित्यः पश्चात्	३	९	४
स यावदादित्यः पुरस्तात्० द्विस्तावत्	३	७	४
,, ,, ,, वसूनां	३	६	४
स यावदादित्यो दक्षिणतः	३	८	४
स यो ध्यानं...	७	६	२
स यो नाम	७	१	५
स योऽन्नं	७	९	२
स योऽपो	७	१०	२
स यो बलं	७	८	१
स यो मनो	७	३	२
स यो वाचं	७	२	२
स यो विज्ञानं... ...	७	७	२
सर्वकर्मा सर्वकामः	३	१४	४
सर्वं खल्विदं ब्रह्म	३	१४	१
सर्वास्वप्सु	२	४	१
सर्वे स्वरा इन्द्रस्याऽऽत्मानः	२	२२	३
सर्वे स्वरा घोषवन्तो ...	२	२२	५
स वा एष आत्मा	८	३	३

खण्डविभागाद्यपदानि ।	अध्यायादीनि ।		
स समित्पाणिः पुनरेयाय	८	१०	३
,, ,, ...	८	११	२
स ह क्षत्ताऽन्विष्य	४	१	७
स ह खादित्वाऽतिशेषान्	१	१०	९
स ह गौतमो ...	५	३	६
स ह द्वादशवर्ष उपेत्य	६	८	२
स ह पञ्चदशाहानि	६	७	२
स ह प्रातः संजिहानः...	१	१०	६
स ह व्याधिनाऽभिशिशुं	४	१०	३
स ह शिलकः	१	८	३
स ह संपादयांचकार ...	५	११	३
स ह हारिद्रुमतं	४	४	३
स हाऽऽशाथ हैनं ...	६	७	४
स हेम्यं कुल्माषान् ...	१	१०	२
स होवाच किं मेऽन्नं ...	५	२	१
स होवाच किं मे वाक्	५	२	२
स होवाच भगवन्तं ...	८	११	२
स होवाच महात्मनः	४	३	६
स होवाच विजानाम्यहं	४	१०	५
संकल्पो वाव मनसः	७	४	८
सा हैनमुवाच... ...	४	४	२
सेयं देवतैक्षत...	६	३	२
सैषा चतुष्पदा ...	३	१०	४
सोऽधस्ताच्छकटस्य	४	१	८
सोऽहं भगवो मन्त्रविदेवास्मि	७	१	३
स्तेनो हिरण्यस्य सुरां ...	५	१०	९
स्मरो वावाऽऽकाशात्	७	१३	१
ह.			
हन्ताहमेतद्भगवतो	८	८	७
हरस्ते पादं वक्तेति ...	४	७	८

समाप्तेयं छान्दोग्योपनिषद्भागानां वर्णानुक्रमणिका।

ग्रन्थनाम ।	मूल्यम् रू०	आ
९४ संस्कारपद्धतिः—अभ्यंकरोपाह्वभास्करशास्त्रिविरचिता ।	२	८
९५ काश्यपशिल्पम्—महेश्वरोपादिष्टम् ।	३	१
९६ करणकौस्तुभः—कृष्णदैवज्ञविरचितः ।	०	९
९७ मीमांसादर्शनम्-सतन्त्रवार्तिकशाबरभा० भागषट्कात्मकम् ।	२५	९
९८ धर्मतत्त्वनिर्णयः—अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीतः ।	०	९
९८ धर्मतत्त्वनिर्णयपरिशिष्टम्— ,, ,,	०	१३
९९ भास्करीयबीजगणितः—नवाङ्कुराटीकासहितम् । ...	२	०
१०० प्रायश्चित्तेन्दुशेखरः—नागेशभट्टविरचितः । कुण्डार्कयुतः ।	१	१०
१०१ शांकरपादरक्षणम्—पर्वतेइत्युपाह्वरघुनाथशास्त्रिकृतं द्विभा०	८	५
१०२ ब्रह्मवैवर्तपुराणम्—भागद्वयात्मकम् ।	९	४
१०३ श्रुतिसारसमुद्धरणम्—गिर्यपरनामकतोटकाचार्यप्रणीतम् ।	०	१३
१०४ त्रिंशच्छ्लोकी—टिप्पणीविवृतिभ्यां समेता । धर्मशास्त्रग्रन्थः ।	२	१५
१०५ आश्वलायनगृह्यसूत्रम्—आश्वलायनाचार्यप्रणीतम् ।	२	१२
१०६ दशोपनिषदः—मूलमात्राः ।	२	०
१०७ लीलावती-श्रीमद्भास्कराचार्यप्रणीता । टीकाद्वयोपेता द्विभागा ।	३	०
१०८ व्या०महाभाष्यम्—(अङ्ग.)। पतञ्जलिवि.प.उ.यु.द्विभागम् ।	४	४
१०९ श्रीमद्भगवद्गीताप्रथमाध्यायौ—म.म. अभ्यंकरटीकायुतौ ।	२	३
११० ग्रहगणिताध्यायः—भागद्वयात्मकः । भाष्यटीकोपेतः ।	४	५
१११ कायपरिशुद्धिः—म.म. अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीता ।	१	४
११२ श्रीमद्भगवद्गीता—राजानकरामकविकृतटीकायुता ।	३	०
११३ मध्वतन्त्रमुखमर्दनम्—अप्पय्यदीक्षितकृतम् । ...	१	८
११४ रुद्राध्यायः—विष्णुसूरिकृतभाष्ययुतः । अद्वैतपरः । ...	०	१२
११५ रसरत्नसमुच्चयटीका—वामनात्मजचिन्तामणिविरचिता ।	२	८
११६ दत्तकमीमांसा—श्रीनन्दपण्डितविरचिता मञ्जरीव्या. स. ।	३	५
११७ ब्रह्मसूत्रसिद्धान्तमुक्तावलिः—वनमालिकृता । ...	२	८
११८ दत्तकचन्द्रिका—कुबेरभट्टप्रणीता । शांकरीयव्याख्यायुता ।	१	४
११९ कालमाधवकारिकाः-माधवाचार्यप्रणीताः। वैद्यनाथकृत वि.स.	०	८
१२० तिथिचिन्तामणिः—गणेशदैवज्ञकृतः ।	०	८
श्रीमत्पद्मपुराणम्—महापुराणान्तर्गतं चतुर्भागात्मकम् । ...	२०	०
सिद्धान्तदर्शनम्—महर्षिवेदव्यासप्रणीतं निरञ्जनभाष्ययुतम् ।	१	४
आधानपद्धतिः—किंजवडेकरोपाह्ववामनशास्त्रिभिः कृता ।	१	१४
पश्वालम्भमीमांसा—किंजवडेकरोपाह्ववामनशास्त्रिविरचिता ।	०	१०
शिवभारतम्—कवीन्द्रपरमानन्दविरचितम् ।	१	०

आनन्दाश्रमसंशोधितग्रन्थावल्या अकारादिवर्णानुक्रमेण सूची ।

ग्रन्थाङ्काः	ग्रन्थः	मूल्यम् रू०	मूल्यम् आ०
४१	अग्निपुराणम्	५	४
८७	अग्निहोत्रचन्द्रिका	२	१४
८४	अद्वैतामोदः	२	०
५७	आचारभूषणम्	४	६
५८	आचारेन्दुः	४	०
	आधानपद्धतिः	१	१४
१०५	आश्वलायनगृह्यसूत्रम्	२	१२
८१	आश्वलायनश्रौतसूत्रम्	४	११
६२	ईशकेनकठाद्युप०(रामा०)	२	८
७६	ईशकेनकठोपनिषदः(दिगं)	१	०
५	ईशावास्योपनिषत्	०	१४
२९	उपनिषदां समुच्चयः	६	१२
३२	ऐतरेयब्राह्मणम्	१०	१०
३८	ऐतरेयारण्यकम्	३	०
११	ऐतरेयोपनिषत्	१	४
९६	करणकौस्तुभः	०	९
७	काठकोपनिषत्	१	४
१११	कायपरिशुद्धिः	१	४
११९	कालमाधवकारिकाः	०	८
६६	काव्यप्रकाशः(प्रदीपो.)	६	४
८९	काव्यप्रकाशः(सांकेतटी)	३	४
९५	काश्यपशिल्पम्	३	१
६	केनोपनिषत्	१	०
५२	गणेशगीता	२	०
१	गणेशार्थर्वशीर्षम्	०	६
७३	गायत्रीपुरश्चरणपद्धतिः	१	८
६१	गौतमसूत्रम्	२	८
११०	ग्रहगणिताध्यायः	४	५
१४	छान्दोग्योपनिषत्(शां०)	५	०
६३	छान्दोग्योपनि०(रामा)	३	१२
७९	छान्दोग्योप०(मिताक्षरा०)	२	०
२०	जीवन्मुक्तिविवेकः	३	१२
२४	जैमिनीयन्यायमालाविस्तरः	८	०
६९	ज्ञानार्णवतन्त्रम्	१	४
८५	ज्योतिर्निबन्धः	३	१५
१२०	तिथिचिन्तामणिः	०	८
३७	तैत्तिरीयब्राह्मणम्	१४	८
४२	तैत्तिरीयसंहिता	४५	१२
३६	तैत्तिरीयारण्यकम्	९	१
१२	तैत्तिरीयोपनिषत्	१	१२
१३	तैत्तिरीयोपनिषद्भाष्यवा०	२	२
७८	त्रिस्थलीसेतुः	३	१२
१०४	त्रिंशच्छ्लोकी	२	१५
११६	दत्तकमीमांसा	३	५
११८	दत्तकचन्द्रिका	१	४
९३	दर्शपूर्णमासप्रकाशः	६	१२
१०६	दशोपनिषदः	२	०
७४	द्राह्यायणगृह्यसूत्रवृत्तिः	१	०
३३	धन्वन्तरीयनिघण्टु रा०	६	४
९८	धर्मतत्त्वनिर्णयः	०	९
९८	धर्मतत्त्व०परिशिष्टम्	०	१३
५६	नित्याषोडशिकार्णवः	३	८
८८	निरुक्तम्	१६	४
३०	नृसिंहपूर्वोत्तरतापनीयोप०	१	१२
९१	न्यायसूत्राणि	४	८
	पद्मपुराणम्	२०	०
	पश्चालम्भमीमांसा	०	१०
७२	परिभाषेन्दुशेखरः	२	६
४७	पातञ्जलयोगसूत्राणि	३	०
३	पुरुषसूक्तम्	०	४
५५	पुरुषार्थचिन्तामणिः	४	०
८	प्रश्नोपनिषत्	१	०
१००	प्रायश्चित्तेन्दुशेखरः	१	१०
९९	बीजगणितं सटीकम्	२	०
१५	बृहदारण्यकोपनिषत्	८	०

ग्रन्थाङ्काः	मूल्यम् रू०	मूल्यम् आ०
६४ बृहदा०(रामानुजटी०)	३	४
३१ ,, (मिताक्षरा)	२	१२
१६ बृहदारण्यकोपनिषद्वा०	२२	८
७१ बृहद्योगतरङ्गिणी	१०	१२
६८ बृहद्ब्रह्मसंहिता	१	१२
२८ ब्रह्मपुराणम्	६	४
१०२ ब्रह्मवैवर्तपुराणम्	९	४
२१ ब्रह्मसूत्राणि (शां०)	१२	०
६७ ,, ब्रह्मामृतवर्षिणी-दीपिकासमेतानि	४	८
८२ ब्रह्मसूत्रवृत्तिः	२	७
११७ ब्रह्मसूत्रसिद्धान्त-मुक्तावलिः।	२	८
३४ भगवद्गीता (शां०भा०)	२	०
३४ ,, (सटीकशां०भा०)	६	४
४४ ,, (पैशाचभाष्य०)	१	८
४५ ,, (मधुसूदनीश्रीधरी०	५	४
९२ ,, (रामानुजीया)	७	८
१०९ ,,(अद्वैताङ्कुरटीका)	२	३
११२ ,,काश्मीरपाठानुसारिणी	३	०
७५ भाष्यार्थरत्नमाला	४	४
५४ मत्स्यपुराणम्	६	०
११३ मध्वतन्त्रमुखमर्दनम्	१	८
१० माण्डूक्योपनिषत्	२	५
९७ मीमांसादर्शनम्	२५	९
९ मुण्डकोपनिषत्	०	१०
६० यतिधर्मसंग्रहः	१	१२
५० यतीन्द्रमतदीपिका	१	४
४६ याज्ञवल्क्यस्मृतिः	१३	०
४ योगरत्नाकरः	५	०
१९ रसरत्नसमुच्चयः	३	१२
१५ रसरत्नसमुच्चयटीका	२	८

ग्रन्थाङ्काः	मूल्यम् रू०	मूल्यम् आ०
२ रुद्राध्यायः	१	६
११४ ,, अद्वैतपरः।	०	१२
१०७ लीलावती	३	०
८० वाक्यवृत्तिः	०	८
४९ वायुपुराणम्	४	१२
८६ विधानमाला	४	४
२७ वृन्दमाधवः	६	१२
७७ वेदान्तसूत्रमुक्तावलिः	२	६
४३ वैयाकरणसिद्धान्तकारिकाः	०	१२
२३ वैयासकन्यायमालाविस्तरः	१	१२
१०८ व्याकरणमहाभाष्यम्	४	४
१०१ शांकरपादभूषणम्	८	५
६५ शाङ्खायनब्राह्मणम्	१	४
९० शाङ्खायनारण्यकम्	०	९
शिवभारतम्	१	५
५९ श्राद्धमञ्जरी	२	०
२२ श्रीमच्छंकरदिग्विजयः	६	०
१०३ श्रुतिसारसमुद्धरणम्	०	१३
१७ श्वेताश्वतरोपनिषत्	२	४
९४ संस्कारपद्धतिः	२	८
८३ संक्षेपशारीरकम्	९	१
३५ संगीतरत्नाकरः	१०	४
५३ सत्याषाढश्रौतसूत्रम्	२८	५
५१ सर्वदर्शनसंग्रहः	२	०
४० संध्याभाष्यसमुच्चयः	२	०
३९ संस्काररत्नमाला	१२	८
[illegible]	१	४
२५ सूतसंहिता	११	८
१८ सौरपुराणम्	३	०
४८ स्मृतीनां समुच्चयः	५	०
७० स्मृत्यर्थसारः	१	१०
२६ हस्त्यायुर्वेदः	७	६